TAITTIRĪYA SAṀHITĀ

WITH THE PADAPĀṬHA AND THE COMMENTARIES
OF
BHAṬṬA BHĀSKARA MIŚRA AND SĀYAṆĀCĀRYA

Vol. IV Part II
(Kāṇḍa VIIth)

Edited by
T. N. Dharmadhikari

Adarsha Sanskrit Shodha Samstha
(Vaidika Saṁśodhana Maṇḍala, Pune – 411 037)

Funded by
Rashtriya Sanskrit Shodh Samsanthan, N. Delhi

2010

Published by,

The Director, Adarsha Sanskrit Shodha Śamstha.

(Vaidika Saṁśodhana Maṇḍala, Mukund Nagar, T.M.V. Colony, Pune - 411 037)

Copies : 500
Price : Rs. 950/-

Printed at,
Step in Services
1311, Kasba Peth,
Pune - 411 002

राष्ट्रिय-संस्कृत-संस्थानेन प्रदत्तानुदानेन वैदिक-संशोधन-मण्डलेन प्रचालितया
आदर्श-संस्कृत-शोध-संस्थया प्रकाशिता

कृष्णयजुर्वेदीया

तैत्तिरीय-संहिता

पदपाठयुता

भट्टभास्कर-सायणाचार्य-विरचित-भाष्याभ्यां समेता

चतुर्थखण्डस्य द्वितीयो भागः

[सप्तमः काण्डः]

धर्माधिकारी नारायणसूनुः त्रिविक्रमशर्मा
इत्यनेन संपादिता

आदर्श-संस्कृत-शोध-संस्था
(वैदिक संशोधन मंडलम्)
टि.म.वि. कॉलनी, मुकुंदनगर, पुणे ४११०३७

शाके १९३२
युगाब्दे ५११२

Acknowledgement

We gratefully acknowledge our indebtedness to Dr. T. N. Dharmadhikari, former Secretary of the Vaidika Saṁśodhana Maṇḍala and former Director of the Adarsha Sanskrit Shodha Samstha, Pune - 37, for meticulously editing this present volume. With this volume the entire project of the Taittirīya Saṁhitā (with the commentaries of Bhaṭṭa Bhāskara and Sāyaṇa) successfully comes to an end.

Despite of his personal research works, he completed this time-consuming task, which shows his heart-felt love and concern towards Vaidika Saṁśodhana Maṇḍala and above all towards the Vedas.

Our sincere thanks are due to the authorities of the **Rashtriya Sanskrit Samsthan, New Delhi,** for approving and funding this project of the Critical Edition of the **Taittirīya Saṁhitā along with the Padapāṭha and the Commentaries of Bhaṭṭa Bhāskara and Sāyaṇa**. The Rashtriya Sanskrit Samsthan has supported the entire scheme of the Adarsha Sanskrit Shodha Samstha, under which this project was being carried out for past few decades.

We take this opportunity to express our deep sense of gratitude towards the trustees of the late Prof. Shankar Yadav Ponkshe, educational trust, for their generous donation to meet the expenses of printing of this volume.

We also thank Shri. Parashuram Paranjape and Mrs. Shraddha Paranjape from Vaidika Saṁśodhana Maṇḍala, for their assistance in bringing out the present volume.

Mr. Vinayaka Bhide and Ms. Ketaki Gokhale deserve our thanks for the DTP-work and Ms. Vaijayanti Dhole-Patil and Ms. Surekha Wagale of Step in Services for fine and speedy printing.

October 2010
Śake 1932

Dr. Mrs. Bhagyalata A. Pataskar
The Director,
Adarsha Sanskrit Shodha Samstha.
(Vaidika Saṁśodhana Maṇḍala)
Pune – 411037

Introduction

We have great pleasure in presenting to the world of Vedic Scholars and the admirers of Ancient Indian Culture, this long awaited eighth part of Kṛṣṇa Yajurveda Taittirīya Saṁhitā, along with its *padapāṭha* and critically edited texts of the commentaries of Bhaṭṭa-Bhāskara Miśra and Sāyaṇācārya thereon. They are respectively named as Jñānayajña and Vedārtha-prakāśa.

The scheme of editing and publishing the Tattirīya Saṁhitā with *padapāṭha* and the two commentaries, was launched long before by the Maṇḍala, and its first part of the first volume, consisting *Kāṇḍa* I, *Prapāṭhaka*-s 1 to 4, was released in 1970.

The critically editing of the entire text of the Taittirīya Saṁhitā comprising seven *kāṇḍa*-s along with the *Padapāṭha* and two above mentioned commentaries is being brought to completion with this fourth volume.

The work of preparing the Word Index and *Mantra* index was entrusted to Dr. S. L. Athlekar, the traditional Sanskrit scholar. He had completed it under my guidance. The Taittirīya Saṁhitā belonging to Kṛṣṇa Yajurveda is an admixture of *Yajuṣ* and *Ṛk mantra*-s mingled with the Brāhmaṇa text in prose. It was therefore very difficult to cull out the *Yajus* and *Ṛk Mantra*-s from the portions of *Brāhmaṇa* and arrange them alphabetically.

These two indices were further edited by Dr. Bhāgyalatā Pāṭaskar and Dr. Bhāgyashree Bhāgawat. Vaidika Samshodhana Mandala, published them in 2007, in the fifth volume of this scheme.

The scheme of editing, printing and publishing took about more than forty years for its completion. This delay has been caused by more than one reasons.

Veda Vidyā Mudraṇālaya, and Tilaka Vidyāpeeth Mudraṇālaya, where the first volume was printed were closed and we had to make arrangement of printing elsewhere. The Mandala tried to establish its own composing unit and get the work printed in some other printing presses. By the time, hand compose of metal types had gone extinct. We have to adopt DTP technique. Thus the want of printing arrangements delayed the printing process.

Finance for printing paper, and for printing was also a great problem.

The earlier two editions of Taittirīya Saṁhitā with (1) Bhaṭṭa Bhāskara's Bhāṣya and (2) with Sāyaṇācārya's Bhāṣya were published by (1) Government Oriental Series Bibliotheca Sanskrit, Mysore and by (2) Ānandāśrama, Pune respectively. They had utilized very scanty manuscript material for their respective editions. We tried to acquire afresh manuscripts of these two commentaries, in a much larger numbers, from many manuscripts libraries and private sources and have collated the readings meticulously for our edition and tried to fix the original

reading, as far as possible. The process of collation was also carried on with scanty number of scholars, due to want of funds.

These elements have caused the delay in editing and printing of this big work. For this delay we beg apologies of the scholars.

However we are glad to note that, we could pave the way and have brought this work to completion.

The manuscript material used for this volume is listed below –

Bhaṭṭa Bhāskara Bhāṣya

तं 696/1051 Palm leaf, Grantha lipi, Leaves 118, VIIth Kāṇḍa Incomplete, upto TS 7.5.18, Saraswatīmahal Granthālaya, Tanjore.

तं१ 697/1046 Palm leaf, Grantha lipi, Leaves 104, VIth and VIIth Kāṇḍas Incomplete, Saraswatīmahal Granthālaya, Tanjore.

अ१ 73664, Palm leaf, Grantha lipi, Leaves 168, VIth and VIIth Kāṇḍas Incomplete, Mostly Similar, to अ (70041), Theosophical Society's Library, Adyar.

अ 70041, Palm leaf, Grantha Lipi, Leaves 156, VIth and VIIth Kāṇḍas Incomplete, Theosophical Society's Library, Adyar.

मै१ A-7 Paper Mss, Kannada Lipi, Folios 160, VIIth Kāṇḍa Incomplete, O.R.I. Mysore.

मै२ A27 Palm leaf, Grantha Lipi, Folios 159, VIth and VIIth Kāṇḍas Incomplete, O.R.I. Mysore.

मै३ 673 Palm leaf, Telugu Lipi, Folios 61, VIth and VIIth Kāṇḍas. Incomplete O.R.I. Mysore.

Bhaṭṭa Bhāskara commentary not available after TS 7.5.18.

Sāyaṇa's Commentary.

शृ१ Śṛṅgerī-Peeṭham, Śṛṅgeri, Palm leaf, Telugu Lipi, Folios 222, Kāṇḍa III and Kāṇḍa VII – Incomplete.

अ Pt. Vāsudeva-śāstri Abhyankar collection, V. S. Mandala, Pune, No. 6798, Paper, Folios 98, VIIth Kāṇḍa, Devanāgarī Lipi.

पा Śrautācārya Dhuṇḍirāja-śāstri Bapat collection, V. S. Mandala, Pune, Paper manuscript, Folios 77, Kāṇḍa VII, Complete.

हा Pt. Biṣṭeśā Dixit collection, (Hanagal) paper, Devanāgarī Lipi, Folios 84, VIIth Kāṇḍa, Complete.

उ Scindia O. R. Institute, Ujjayinī, Paper, Devanāgarī Lipi, Ms. No. 1409, VIIth Kāṇḍa, Incomplete, Folios 73.

इ Bhārata Itihāsa Saṁśodhana Maṇḍala, Pune, Ms. No. 217, Paper, Devanāgarī Lipi, Saṁvat 1810, Kāṇḍas I, II, III and VIIth, Complete.

वा Prājña-Pāṭhaśālā, Wai, Paper, Devanāgarī Lipi, Kāṇḍa VII, Complete, Śaka 1703, Acc. No. 536.

म Government Oriental Manuscript Library, Chennai, Palm leaf, VIIth Kāṇḍa, Folios 104, Incomplete, Catalogue No. 111.

वै Vaidika Samshodhana Mandala, Pune, Ms. No. 14030, Paper, Devanāgarī Lipi, Kāṇḍa I, III and VIIth, Complete.

मै Oriental Institute, Mysore, Paper, Telugu Lipi, Ms. No. A175, Kāṇḍa VII, Complete.

It may be noted that the *mss* of Bhaṭṭa Bhāṣkara Bhāṣya viz. मै, मै३, अ are much similar to each other and form one origin and the others viz. तं, तं१, मै२, अ१ belong to different tradition. These four manuscripts appear to be most trustworthy.

Similarly the following *mss* of Sāyaṇa belong to one family viz. शृ१, म, मै.

The other manuscripts viz. अ, पा, हा, उ, इ, बा, वै belong to another tradition. The manuscript of हा at times gives better reading and in few cases is similar to शृ१, म and मै category. The mss of शृ१, म and मै give more authentic readings.

I retired from the services of Vaidika Samshodhana Mandala in 1991. However I continued to work in the capacity of a Director upto March 1993. But I was not authorized to work in the administration work of the Mandala. By that time I had completed the editing of 5th and 6th *kāṇḍas* which were further published in 1999 and in 2006 respectively.

Even after my retirement, as a Director, in 1993, I was entrusted with the work of editing the remaining 7th Kāṇḍas, with two commentaries, which I carried on successfully. For the printing of this volume Shri. Vināyaka Bhide of Pune, helped in

DTP. The printing has been carried by Step-in-Services of Pune of this volume and I sincerely thank both of them.

Any way, the entire project is successfully competed and after a successful completion of the Ṛgveda with Sāyaṇa-bhāṣya edition, the completion of this project of the Taittirīya Saṁhitā with *padapāṭha* and with two commentaries is a great achievement in the history of the Vaidika Samshodhana Mandala.

First I record my heartfelt indebtedness to Dr. Mrs. Bhāgyalatā Pāṭaskar, the Secretary and the Director of the Vaidika Samshodhana Mandala, Ādarsha Sanskrit Shodha Samstha, for allowing all possible facilities to edit this text. I offer my thanks to her.

Secondly I also thank, Shri. Parashuram Paranjape and Mrs. Shraddha Paranjape for helping me in every stage of editing and printing this volume.

I hope this entire publication, along with this last volume will receive high approval of the world of Vedic Scholars which I deem, will be a great reward to me.

Pune
Date : 17th Oct. 2010 T. N. Dharmadhikari
Vijayā Daśamī
Saka 1932
Yugābda 5112

प्रास्ताविकं किञ्चित् ।

अथेमं कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः सप्तकाण्डात्मकं पदपाठयुतं श्रीमद्भट्टभास्करमिश्र-सायणाचार्यविरचितभाष्यद्वयालंकृतं चरमं भागं विमलमतीनां निरवद्यवेदविद्यासंसक्तचेतसां विचक्षणानां करारविन्देषु सस्नेहादरमुपहारीकुर्वतां नो मानसम् एकतः परमां निर्वृतिमधिरोहति, कार्यादस्मात् निवृत्तोऽस्मीति इत उत्तरं रिक्तमिवात्मानं मन्यमानः अतितरां वैक्लव्यं चापि भजते । युक्तमिदमुक्तं – रिक्तः सर्वो लघुर्भवतीति । अथापि चित्रमिदं वाचां प्रपञ्चे यत् रिक्तत्वेऽपि पूर्णतामनुभवामः । शून्यः पूर्णश्च अनर्थान्तराभिधौ इति कोशकृद्भिः तत्त्ववेत्तृभिश्च प्रतिज्ञातं किल ।

मान्याः, अयमस्य बृहत्तमस्य तैत्तिरीयसंहिताप्रकल्पस्य भाष्यद्वययुतस्य अन्तिमो भागः । प्रकल्पोऽयं सप्तकाण्डात्मकः चतुर्षु खण्डेषु अष्टसु च विभागेषु विभक्तः । पञ्चमः खण्डः मन्त्र-पदादिसूच्यात्मकः इतः पूर्वं वैदिकसंशोधनमण्डलेन प्रकाशं प्रापितः अस्त्येव ।

सायणाचार्यकृतभाष्यसहितस्य ऋग्वेदस्य महान् प्रकल्पः वैदिकसंशोधनमण्डलेन सिद्धिं नीत्वा इतः पूर्वं प्रसिद्धिं प्रापितः । ततश्च श्रौतकोशः अवेस्ता इत्यादीन् नैकान् ग्रन्थान् प्रकाश्य तदनन्तरमयमद्वितीयोऽपि द्वितीयः बृहत्प्रकल्पः अद्यत्वे पूर्णतां प्राप्यते मण्डलेन इति महदिदं संतोषस्थानम् । पूर्णता गौरवाय भवतीति विचिन्त्य अद्यत्वे महान्तं मनसः संप्रसादं वाचामगोचरमनुभवामः ।

प्रकल्पोऽयं प्रायशः पञ्चचत्वारिंशद्वर्षेभ्यः प्राक् समारब्धः अद्यत्वे समाप्तिमगमत् । प्रकल्पस्यास्य अन्तगमनाय किल चिररात्राय कालकलाः प्रतीक्षितव्या समपद्यन्त । तत्र कारणान्यपि बहूनि । संकटं ह्यासीत् प्रत्यवायैः बहुभिः संपादनमस्य प्रकल्पस्य । यद्यपि भट्टभास्करभाष्यं तैत्तिरीयम् इतः पूर्वं मैसूरस्थित-गव्हर्नमेंट-ओरिएण्टल-सेरीज् द्वारा, तथा च सायणीयं भाष्यं कोलकातास्थित-एशियाटिक-सोसायटी-ऑफ बेंगालद्वारा, अपि च पुण्यपुत्तनस्थ-आनन्दाश्रमसंस्थाद्वारा प्रकाशिते आस्तां तथापि भाष्यसंपादनार्थं तैरुपयुक्ता लिखितपुस्तकसामग्री अकिंचित्करैवासीत् । तेन भाष्यद्वयेऽपि संपादनत्रुटयः बह्व्यः समलक्ष्यन्त । अतः त्रुटिपूरणार्थमस्माभिः महती लिखितपुस्तकसामग्री लिखितपुस्तकसंग्रहालयेभ्यः, अथ च प्राचीन-पण्डित-कुलेभ्यः प्रयत्नेन संपाद्य, तेभ्यः लिखितपुस्तकेभ्यः इदंप्रथमतया समग्रान् पाठभेदान् संकलय्य ततः प्रायशः भाष्यकृद्भ्यां संकल्पितान् मूलान् पाठान् विचित्य विचित्य भाष्यद्वयमस्माभिः महता प्रयासेन

संपादितमस्ति । या खलु ग्रन्थसंपादनार्थं लिखितपुस्तकसामग्री अस्माभिः संकलिता तस्याः विवरणम् आङ्ग्लभाषानिबद्धप्रस्तावनायां द्रष्टव्यम् । न हि तस्य पुनरुक्तिमत्र विदध्मः ।

मान्याः विद्वांसः, मूलग्रन्थकृता लिखितस्य पाठस्य प्रतिष्ठा हि अनितरसाधारणैः प्रयासैरेव संपादयितुं शक्यते । तदर्थं हि शतकेभ्यः पूर्वमाविर्भूतानां ग्रन्थकृतां मनःसु तन्मना इव भूत्वा, प्राप्तावसरे प्रवेशः साधनीयो भवति । तच्च अवसरोपसर्पणीयत्वं यौगिकात् परकायाप्रवेशादपि नूनं दुर्गमं संपद्यते इति अनुभूतचरमेव ग्रन्थसंपादनानुशासनशीलानां विद्वन्मूर्धन्यानाम् ।

अन्यच्च, यदा किल लिखितपुस्तकसामग्रीतोऽपि संदर्भान्वितः उचितः मूलश्च पाठः निर्धारयितुं न शक्यते तदा लिखितपुस्तकपरंपराप्राप्तं भ्रष्टमपि पाठं संस्कृत्य, प्रायशः मूललेखकेन संकल्पितमिव, नूत्नमपि प्रत्नमिव तं संभाव्य स पाठः स्वीकर्तव्यो भवतीत्ययमपरोऽस्य विशेषः प्राचीनग्रन्थसंपादनतथ्यस्य ।

ग्रन्थप्रकाशनं हि अनल्पवित्तव्ययसाध्यं भवति । सहजा हि नः वित्तविपत्तिः। तां हि यथाकथंचित् दूरतोऽपसार्य प्रकल्पस्यास्य सर्वे भागाः अद्यत्वे प्रकाशतां यान्तीति महदिदं नः प्रमोदस्थानं संपन्नम् । न ह्येतादृशं कष्टसाध्यं कर्म एकाकिना मया कर्तुं साध्यमिति अस्मिन् कर्मणि साहाय्यकृद्भ्यः सर्वेभ्योऽपि सुहृद्भ्यः मनसा प्रह्वीभूय हार्दान् धन्यवादान् वितरामः ।

मान्याः, 'अनारम्भो हि कार्याणां प्रथमं बुद्धिलक्षणम् । प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम्' इति प्रसिद्धं किल सुभाषितम् । तत्र प्रथमबुद्धिलक्षणात् वञ्चिताः स्मः । अथापि 'न हि मूषकाः सन्तीति शालयो नोप्यन्ते' इति प्राचीनपरम्परापूतं न्यायमादृत्य प्रकल्पसंपादनस्य कार्यमारभ्य, तदन्तगमनेन अन्यतरस्यापि बुद्धिलक्षणस्य भाजनं संवृत्ता स्मः इति धन्यान् नः संभाव्य, समग्रमपि इमं प्रकल्पं वृन्दीयसामपि वन्द्येभ्यः वैदिकानां विदुषां चरणारविन्देभ्यः, 'न मम' इति भावनया सविनयं समर्प्य कृतार्था स्मः इति मनसः समाधानं निवेद्य विरमामः लेखनीव्यापारप्रसङ्गादस्मादिति शम् । पुनश्च धन्यवादाः ॥

त्रि. ना. धर्माधिकारी

पुणे
आश्विनशुद्ध १० शके १९३२
युगाब्दः ५११२
विजयादशमी
दि. १७.१०.२०१०

A Critical exegesis of The Taittirīya School of The Kṛṣṇa Yajurveda

It is well known that the four-fold division of the Vedas – viz. the Ṛgveda, Yajurveda, Sāmaveda and Atharvaveda is mostly based on the division of the duties of four categories of the *Ṛtvik*-s i.e. the priests – viz. the *Hotṛ*, *Adhvaryu Udgātṛ* and *Brahmā* and their associates respectively.

This is pointed out by Yāskācārya, in his *Nirukta*, by quoting a verse from the Ṛgveda – viz. 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः ।' He further explains – इति ऋत्विक्-कर्मणां विनियोगमाचष्टे । ऋचाम् एकः पोषमास्ते पुपुष्वान् **होता** । गायत्रम् एको गायति शक्वरीषु **उद्गाता** । ब्रह्मा एको जाते जाते विद्यां वदति । ब्रह्मा सर्वविद्यः ... । यज्ञस्य मात्रां विमिमीते एकः अध्वर्युः । अध्वर्युः अध्वरयुः अध्वरं युनक्ति । अध्वरस्य नेता । (निरुक्त I.8) i.e. the *Hotṛ* priest is engaged in employing the *Ṛk*-s in the sacrifice. The *Udgātṛ* sings the *Gāyatra* chants superimposed on *Śakvarī Ṛks*. The *Brahmā* quotes his knowledge on the occasions of expiations and the *Adhvaryu* measures out the full length of the sacrifice i.e. he performs all the acts that pertain to a sacrifice from beginning to end.

Ait. Br. 5.6 ऋचैव हौत्रं क्रियते यजुषाऽऽध्वर्यवं साम्नोद्गीथम् । व्यारब्धा त्रयी विद्या । cf. also *Āpastamba Śrauta Sūtra* (24.1.16-19) which prescribes – ऋग्वेदेन होता करोति । सामवेदेनोद्गाता यजुर्वेदेनाध्वर्युः ।

सर्वैर्ब्रह्मा। *Vedāṅga Jyotiṣa* enjoins – वेदा हि यज्ञार्थमभिप्रवृत्ताः – i.e. The Vedas are intent upon enjoining and prescribing the sacrifice.

The Yajurveda is related to the duties assigned to the *Adhvaryu* priest and his associates – viz. प्रतिप्रस्थाता, नेष्टा and उन्नेता.

Veda is defined as मन्त्रब्राह्मणयोर्वेदनामधेयम्। i.e.*Mantra*-s and *Brāhmaṇa*-s constitute the Veda. *Mantra*-s are recited in sacrifices and *Brāhmaṇa*-s are the commentary on the *Mantra*-s. (Cp. Sāyaṇa – introduction to *TS* ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात्)

Each of the four Vedas has various schools and is further divided into *Saṁhitā*, *Brāhmaṇa*, *Āraṇyaka* and *Upaniṣad.*

Ṛk, *Yajus* and *Sāman*-s are the types of *mantra*-s.

Ṛk-s are in metrical form. *Yajus* means the *mantra*-s in prose, while *Sāman*-s are the *mantra*-s i.e. the chants to be sung.

The Yajurveda consists mostly of *Yajus* i.e. prose *Mantras*. Sāyaṇa comments in his introduction to the Taittirīya Saṁhitā of the Kṛṣṇa-Yajurveda – 'तत्र यजुषामध्वर्युर्वेदे बहुलत्वात् कचित् ऋचां सद्भावेऽपि यजुर्वेद इत्येव व्याख्यायते।' i.e. Even though there are *Ṛk* *mantra*-s i.e. metrical formulas, in Yajurveda, its name indicates that the greater number of prose *mantra*-s are collected in the Yajurveda Saṁhitā-s. This is the characteristic of all the Yajurveda-schools.

It may be noted here that, the *Ṛk mantra*-s are also included in Yajurveda schools.

All the four Vedas are important from different view points. Ṛgveda is always held at the helm of all the Vedas. In the famous *Puruṣa sūkta* – the *Ṛṣi* gives the first place to the *Ṛks* – तस्मात् यज्ञात् सर्वहुतः **ऋचः** सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत । Thus the *Pāṭha-prāthamya* suggests the highest position of the Ṛgveda. Taittirīya Saṁhita (6.5.10.3) – observes यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् यद् **ऋचा** तद् दृढम् । i.e. whatever is accomplished by a *sāman* or *Yajus* is loose, whatever is accomplished with a *Ṛk* is firm.

In the list of *aparā-vidyā*, the Ṛgveda stands first – Cp. *Muṇḍakopaniṣad* (५) - तत्रापरा **ऋग्वेदो** यजुर्वेदः सामवेदोऽथर्ववेदः etc.

In the list of what Nārada studied, Ṛgveda again appears first – Cp. **ऋग्वेदं** भगवोऽध्येमि यजुर्वेदं सामवेदम् आथर्वणं चतुर्थम् । (*ChU.* 7.2.2).

As far as Sāmaveda is concerned, in the Bhagavadgītā, Bhagavān Śrīkṛṣṇa himself confirms 'वेदानां **सामवेदो**ऽस्मि ।' (10.22). *ChU.* 1.1.2 – states वाचः ऋक् रसः । ऋचः **साम** रसः. It also remarks सामान्येव मधुकृतः, **सामवेद** एव पुष्पम् ।.

Yajurveda is the first literature to design the architecture of sacrifice. Sāyaṇa in his introduction to the Taittirīya Saṁhitā clearly states – (P. 1) कर्मकाण्डविषये **यजुर्वेदस्यैव** प्राधान्यात् । आनुपूर्व्या कर्मणां सरूपं **यजुर्वेदे** समाम्नातम् । तत्र तत्र विशेषापेक्षायाम् अपेक्षिता याज्यापुरोनुवाक्यादयः ऋग्वेदे समाम्नायन्ते । स्तोत्रादीनि तु सामवेदे । तथा सति

भित्तिस्थानीयो यजुर्वेदश्चित्रस्थानीयावितरौ । तस्मात् कर्मसु **यजुर्वेदस्यैव** प्राधान्यम् । i.e. As far as sacrificial procedure is concerned, Yajurveda plays the principal role. It is like a wall or a canvas on which the pictures are drawn. Hence in sacrificial institutions Yajurveda wins the important place.

Taittirīya school belonging to the Kṛṣṇa Yajurveda, therefore attains the important place; in procedure of sacrificial performances.

Yajurveda is transmitted by the tradition in two main schools viz. *Kṛṣṇa* and *Śukla.*

In Kṛṣṇa Yajurveda, the *Mantra*-s in metrical form or in prose form are intermingled with *Brāhmaṇa* portions i.e. there is an admixture (व्यामिश्रत्व) of *Mantra* and *Brāhmaṇa*. In Śukla Yajurveda however the *Mantra* and *Brāhmaṇa* portions are sharply separated from each other. The *Mantra*-portions are collected in the books called *Saṁhitā*-s while the *Brāhmaṇa* portions are included in separate *Brāhmaṇa*-s named as *Śatapatha-Brāhmaṇa*.

Mainly four schools of Kṛṣṇa Yajurveda have come down to us – viz. the *Maitrāyaṇī*, *Kāṭhaka*, *Kapiṣṭhala* and the *Taittirīya*. Amongst these, the first three form the offshoots of *Caraka*-s. They are so closely related amongst themselves that they form a group different from the *Taittirīya* school, on one hand and from the *Mādhyandina* and *Kāṇva*, on the other hand.

Chronologically Taittirīya school may be placed after the *caraka* schools and before the appearance of Śukla Yajurveda – *Mādhyandina* and *Kāṇva* schools.

The *Purāṇa*-s give an interesting mythological account of the origin of the Taittirīya school. According to the Puranic legend, Vaiśaṁpāyana had many disciples including Yājñavalkya. Once Vaiśaṁpāyana incurred sin due to *Brahmahatyā*. He asked his disciples to perform expiatory vows with a view to absolving him from that sin. Yājñavalkya, one of his students, who happened to be his sister's son declared that he only shall perform the expiatory vow. Vaiśaṁpāyana got angry with Yājñavalkya for under-estimating his other students and asked Yājñavalkya to give back the Veda taught by him to Yājñavalkya. As a result, Yājñavalkya vomited the Veda which was taught to him. Further that vomited Veda was consumed by *Ṛṣi*-s in the form of *Tittiri* bird, bearing speckled spots. That Veda consumed by *Tittiri* was known as Taittirīya. This myth appears in Viṣṇu Purāṇa.

This appears to be a mythological interpretation of the mixed-speckled character of the Taittirīya school. Belonging to a school of Kṛṣṇa Yajurveda, the Taittirīya Saṁhitā, Taittirīya Brāhmaṇa and Taittirīya Āraṇyaka bear the intermingled character of *Mantra*-s and the *Brāhmaṇa*-portions.

The oral tradition of the entire Taittirīya school viz. Saṁhitā, Brāhmaṇa and Āraṇyaka is still living.

The Saṁhitā text has its *padapāṭha*, while the Taittirīya Brāhmaṇa and the Taittirīya Āraṇyaka do not have

their *padapāṭha*. But unlike Aitareya Brāhmaṇa and the Aitaraya Āraṇyaka, the Taittirīya Brāhmaṇa and the Taittirīya Āraṇyaka have a tradition of the *trai-svarya* accents. It may be incidentally noted here that the Śatapatha Brāhmaṇa shows *Bhāṣika svaras*, i.e. *udātta* and *anudātta* only.

Two Traditions of Taittirīya School :

Further the Taittirīya school has two traditions of text-order. One of the two text-orders is called *Ārṣeya pāṭha* and the other text-order is known as *Sāraswata pāṭha*.

Ārṣeya pāṭha appears to be more logical and more disciplined than the *Sārasvata pāṭha*.

Kāṇḍānukramaṇikā divided this *Ārṣeya pāṭha* into five *kāṇḍa*-s viz. *Prājāpatya*, *Saumya*, *Āgneya*, *Vaiśvadeva* and *Svāyambhuvạ*.

Baudhāyana Gṛhya-sūtra (BGS) 3.3 enumerates the sacrificial topics of these five *kāṇḍa*-s as under –

i. **प्राजापत्यकाण्डम्** - पौरोडाशिकं याजमानं होतारः हौत्रं पितृमेधः सब्राह्मणानि सानुब्राह्मणानि प्राजापत्यानि ।

ii. **सौम्यकाण्डम्** - आध्वर्यवं ग्रहाः दाक्षिणानि समिष्टयजूंषि अवभृथयजूंषि वाजपेयाः शुक्रियाणि सवाः इति सब्राह्मणानि सानुब्राह्मणानि - सौम्यानि ।

iii. **आग्नेयकाण्डम्** - अग्न्याधेयम् अग्निहोत्रम् अग्न्युपस्थानम् अग्निचयनं सावित्रं नाचिकेतं चातुर्होत्रिकं वैश्वसृजम् आरुणा इति सब्राह्मणानि सानुब्राह्मणानि आग्नेयानि ।

iv. **वैश्वदेवकाण्डम्** - राजसूयः पशुबन्धः इष्टयः नक्षत्रेष्टयः दिवश्येनयः अपाघाः सात्रायणम् उपहोमाः कौकिली सूक्तान्यौपानुवाक्यं याज्या अश्वमेधः पुरुषमेधः सौत्रामणी अच्छिद्राणि पशुहौत्रं उपनिषद् इति सब्राह्मणानि सानुब्राह्मणानि वैश्वदेवानि ।

v. **स्वायंभुवकाण्डम्** - स्वायंभुवं काण्डं काठके पठितो विधिः ।

Besides BGS 3.3, the *Kāṇḍānukramaṇikā* also enumerates these topics, with certain details.

These five *kāṇḍa*-s are said to have been revealed to the *Ṛṣi*-s as noted above.

This *Ārṣeya-pāṭhakrama*, appears to have amalgamated the topics covered by the *Sāraswata-pāṭhakrama*, the another text-order of this Taittirīya school, which is divided in the present make-up of तैत्तिरीय संहिता - तैत्तिरीय ब्राह्मण and तैत्तिरीय आरण्यक (including Taittirīya Upaniṣad).

The तैत्तिरीयसंहिता as presented in *Sāraswata-pāṭhakrama* consists of seven *kāṇḍa*-s, each sub-divided into *prapāṭhaka*-s and each *prapāṭhaka* in several *anuvāka*-s. As noted above, only the Taittirīya Saṁhitā consists of the *Padapāṭha* while Taittirīya Brāhmaṇa and Taittirīya Āraṇyaka with Taittirīya Upaniṣad do not have the *padapāṭha*.

The topics covered by this Saṁhitā text are *Darśapūrṇamāsau*, *Paśuḥ*, *Agniṣṭoma-mantra*-s and Brāhmaṇa, *Punarādhāna*, *Yājamāna*, *Rājasūya*, *Kāmya-Paśu*-s, *Kāmya-īṣṭi*-s, *iṣṭi-vidhāna, Avaśiṣṭa* and *Nyūna Karma*-s, *Pāvamānādi graha*-s, *Vaikṛta-karma-vidhāna*, *Iṣṭi-hautra, Agniciti-mantra*-s and

Agniciti Brāhmaṇa, *Soma Brāhmaṇa*-s, *Aśvamedha*, *Ṣaḍrātra*-s and *Sattra*-s.

Sāyaṇācārya in his introduction to the *Taittirīya Saṁhitā* observed – आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम्, i.e. the ritual actions are prescribed in sequential order, in the Yajurveda. But this observation appears to be partially true, because many details of actions in sacrifices have been skipped over which appeared in different parts of the Taittirīya school, without following their sequential order. Hence we often find remarks like अनारभ्याधीतम् i.e. read as a detached subject. E.g. Sāyaṇa's commentary on *TS* 3.1.1 एतच्च **तृतीयकाण्डम्** औपानुवाक्यमिति संप्रदायविद आहुः । अनुवाकानां समीपम् उपानुवाकम् । तत्र अन्वेतुं योग्यानामर्थानां प्रतिपादकत्वाद् इदं काण्डमौपानुवाकम् । यद्यप्येतत् **सर्वमनारभ्याधीतं** तथापि वाक्यादिप्रमाणेन तत्र तत्र अनुवाकेषु अन्वयः उत्प्रेक्षणीयः । etc. i.e. This third *kāṇḍa* of The Taittirīya Saṁhitā is named as औपानुवाक्य by those who know the traditions. Even though all this is studied as a detached topic, with the help of the means of knowledge like *Vākya* (in श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या) etc. one can conjecture the logical link with the related chapters.

This third *kāṇḍa* of *TS* is also termed as न्यूनकर्माभिधान i.e. one which speaks of the actions wanting in their proper sequence.

Bhaṭṭa Bhāskara, at the beginning of his commentary on the Taittirīya Saṁhitā remarks – अत्र काण्डानां संकीर्णत्वेऽपि यथाम्नायमेवाध्येयं, सारस्वतत्वादस्य पाठस्य । सरस्वती हि स्वसुताय

सारस्वताय इमं पाठमुपदिदेश स च सर्वविद्यानिधिः अमुमेव पाठमध्यैष्ट । तस्मादनतिक्रमणीयः ।

Sāyaṇācārya, commenting on *TBr* 1.5.1 states

आधानात्पूर्वमेवैषा वक्तव्या पुनराहितिः ।

तथाप्यध्ययनस्यास्य क्रमो वरवृतत्वतः ।

सरस्वती स्वपुत्राय तद्बुद्धिस्थे क्रमे वरम् ।

ददौ, तेन क्रमेणैव पठन्त्यन्येऽपि याज्ञिकाः ।

i.e. This topic of *Punarādhāna* should have been included after the Agnyādhāna. But this order of the text is accepted due to the boon granted by Saraswatī to her son.

Saraswatī granted a boon to her son सारस्वत, in connection with the order of the text conceived by her. Therefore the *Yājñika*-s also study this school in the same order.

Ārṣeya Brāhmaṇa states –

यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति । अथ यो मन्त्रे मन्त्रे वेद स सर्वमायुरेति । (*Ārṣeya Brāhmaṇa* 1.1)

i.e. One who makes the sacrificer perform a sacrifice by means of *mantra*-s, not knowing their *Ṛṣi*-s, deities or *chandas*, becomes like an inactive pole, or falls down in a pitch or meets death, becomes sinful. His *mantra*-s become stale. However if he knows the *Ṛṣi*-s, deities and *chandas* of each *mantra*, he enjoys the entire length of life.

This is why one needs to know the *Ṛṣi devatā* and *chanda*-s of the *mantra*-s.

The *Sārasvata pāṭha* is without any *Ṛṣi*. This *pāṭha* serves the purpose of knowledge only.

To fulfill this lacuna of *Sārasvata pāṭha*, *Ārṣeya pāṭha*, with *Ṛṣi-devatā* and *chanda*-s came into existence.

Dr. Kashikar maintains that *Ārṣeya-pāṭha* existed in the period when *BŚs* was orally delivered. It cannot be said that the *Ārṣeya-pāṭha*, as it stands at present, existed in *Buadhāyana*'s time. (Page 4 – Reflections on the TBr.)

Taittirīya Brāhmaṇa :

Taittirīya Brāhmaṇa – consists of three *kāṇḍa*-s, divided into 28 *prapāṭhaka*-s which are again sub-divided into 338 *Anuvāka*-s.

The topics dealt with in this *Brāhmaṇa* may be generally listed as *Agnyādheya, Gavām Ayana, Vājapeya,* stray – *Soma* topics, *Agnihotra*, *Cāturmāsya* as a part of *Rājasūya, Nakṣatreṣṭi*-s, *Rājasūya-anuābrāhmaṇa*, *Agnihotra Brāhmaṇa, Hotṛ Brāhmaṇa, Upahoma*-s, *Sautrāmaṇī Savas, Ekāhas, Kāmyapaśu Hautra*, *Hautra* of *Nakṣatreṣṭi*, with their *Brāhmaṇa*, *Darśa-Pūrṇamāseṣṭi Brāhmaṇa, Puruṣamedha, Iṣṭi-hautra, Paśu-hautra, Acchidra-Kāṇḍa* including expiatory rites with *mantra*-s, *Aśvamedha, Sāvitra-cayana, Nāciketa-cayana, Cāturhotra* and *Vaiśvasṛja-cayanas* etc. etc.

Since the Taittirīya belongs to the *Adhvaryu*, the various rites have been enjoined along with their relative *mantra*-s to suit the performances of Adhvaryu and their associates, but the sequential order of those rites has not been followed, while

compiling and dividing the texts in *mantra*-s and the *Brāhmaṇas*. Sometimes the *mantra*-s and their corresponding *brāhmaṇa* portions are collected in the same section, even in the same *prapāṭhaka* or in the same *anuvāka*, or dispersed into separate texts of *mantra* and *brāhmaṇa*. The sequence of ritualistic order is also often disturbed, e.g. the ritual of the *Darśapūrṇamāsau* naturally presupposes that of *Ādhāna* i.e. the setting of fires, for, without setting fires, no offering can be offered on fires. However the *mantra*-s of *Darśapūrṇamāsau* are collected in *TS* (1.1.1), the related *Brāhmaṇa* appears in *TBr* III.2.1 – III.3.10. The *mantra*-s for *Ādhāna* are placed in *TBr* 1.1.7 and 1.2.1.

Taittirīya Brāhmaṇa III.7 is named as acchidra-kāṇḍa. Bhaṭṭa Bhāskara's commentary on *TBr* 3.7.1 states अथाच्छिद्रं काण्डं वैश्वदेवमारभ्यते । छिद्रपूरणप्रायश्चित्तादिप्रायत्वात् अच्छिद्रम् । This section is named as acchidra; because it tries to fill up the lacunas in the text, with a view to fill up the holes in the text.

Bhaṭṭa Bhāskara – commenting on *TBr* III.9.1 remarks, at its very beginning – एवमश्वमेधान्तानि **तित्तिरिप्रोक्तानि** काण्डानि व्याख्यातानि । अथ **काठका**ग्निकाण्डान्यष्टौ, सावित्रनाचिकेतचातुर्होत्रवैश्वसृजआरुणकेतुकानि पञ्च चित्यानि, दिवः श्येनयोऽपाघाश्चेष्टयः स्वाध्यायब्राह्मणमष्टममिति । तत्र चित्यानां हव्यवाट् काण्डऋषिः आरुणकेतुकस्य वरुणः, इष्टिकाण्डयोर्विश्वेदेवाः, स्वाध्यायविधेर्ब्रह्मा ।.

This means that the *kāṇḍa*-s concluding with अश्वमेध (i.e. III.8.22) are named after the sage तित्तिरिः । Here after (i.e. from *TBr* III.10.1) eight *kāṇḍa*-s seen by कठ are included.

This hints that the *Kāṭha*-texts are appended to the *Taittirīya Brāhmaṇa* of this Taittirīya school.

Kāṇḍānukramaṇī states –

वैशम्पायनो यास्कायैनां शाखां प्राह पैङ्गये

यास्कः पैङ्गिः तित्तिरये, उखाय प्राह तित्तिरिः ।

उखः शाखामिमां प्राह आत्रेयाय यशस्विने ।

तेन शाखा प्रणीतेयमात्रेयी इति प्रोच्यते ॥

i.e. *Vaiśampāyana* taught this school to *Yāska Paiṅgi*, who further taught it to *Tittirī*, who then taught it to *Ukha*. *Ukha* taught it to *Ātreya*. This school was promoted by *Ātreya*. Hence this school is named as *Ātreya*.

Dr. C. G. Kashikar, in this context remarked – '*Ukha* formulated the text tradition of the *Taittirīya* text as the Taittirīya Brāhmaṇa. Ātreya to whom the Saṁhitā and the Brāhmaṇa came down from his teacher *Ukha* confirmed the new arrangement, by composing the *Padapāṭha* of the *Saṁhitā* portion only. In his time, the *Taittirīya Saṁhitā*, together with its additions was complete.

According to Dr. C. G. Kashikar, the entire *Taittirīya Brāhmaṇa* of *Sāraswata pāṭha* was also known by the name *Pārakṣudra*. Bhaṭṭa Bhāskara at the beginning of his commentary to the Taittirīya Brāhmaṇa – commented अथ पारक्षुद्रान् अनुक्रमिष्यामः । Further at the end of the first *Aṣṭaka* he referred to *Pārakṣudra*, in the *Puṣpikā* as इति श्रीमद्भट्टभास्करविरचिते यजुर्वेदभाष्ये पारक्षुद्रे प्रथमेऽष्टके अष्टमप्रपाठके दशमोऽनुवाकः ।

After that the name *Pārakṣudra* is not refereed to any where, not also in the colophons, by Bhaṭṭa-Bhāskara. This may suggest that the first *kāṇḍa* of this *Brahmaṇa* only was known with this name.

It may also be noted that this *Sārasvata pāṭha* has no *sarvānukramaṇī* and that it is without any *Ṛṣi*.

Arṣeya pāṭha has been recognized in principle by the *Taittirīya Śrauta Sūtra*-s.

Gajānanda Devarata opined that *Ārṣeya-Pāṭhakrama* be understood as the older than *Sārasvata Pāṭha*, having three distinct texts viz. *Saṁhitā, Brāhmaṇa* and *Āraṇyaka*. (Cp. his Vedavedikā-intro). Dr. Kashikar has however rejected the anteriority of the *Ārṣeya-pāṭha*, on the ground that, *Ārṣeya-pāṭha* having some portion with *Padapāṭha* and remaining without it, cannot be taken as the original one. According to him, three distinct texts viz. *Saṁhitā*, *Brāhmaṇa* and *Āraṇyaka* were originally planned. In course of time each one developed in its own way.

Taittirīya school belongs to *Adhvaryu* priest. But in course of time the *Hautra* portions of *Yājyā-Puronuvākya*-s were appended to each *prapāṭhaka* of *kāṇḍa*-s I, II & III and also to a part of *kāṇḍa* IV of TS. Naturally this portion has been culled out from the Ṛgveda and collected in the Taittirīya Saṁhitā, when and where the Ṛgvedic priests could not become available for performing the hautra of *iṣṭi* and *Soma* sacrifices.

For *Pārakṣudra*, Dr. Kashikar has quoted few references from Dhūrtaswamin, Rudradatta or Āpastamba Śrauta

Sūtra, and also from Rāmāgnicit's gloss on the *bhāṣya* on the *sūtra*-s.

I would like to quote one reference to Pārakṣudra from the Sāyaṇa's commentary on the *Baudhāyana Śrauta Sūtra* – 'तं तन्वन्तं कूर्मप्रकारं करोति । सर्वाणि कपालानि अभिप्रथयति' (तै.सं. २.६.३.६) इति ब्राह्मणम् (बौ.श्रौ. १.८) । Here Sāyaṇa comments – ब्राह्मणग्रहणं **संहितापारक्षुद्रयोः** ऐकार्थ्यख्यापनार्थम् । ... अयमर्थः - संहितायाम् 'उरु प्रथस्व' (तै. सं. १.१.८.९) इति प्रथनमात्रम् उक्तम् । तस्य **इयता पारक्षुद्रे** ख्याप्यते । **संहितामध्यपतितस्य ब्राह्मणस्य पारक्षुद्रसंज्ञा याज्ञिकप्रसिद्धा ।** एवमनयोः ऐकार्थ्यख्यापनेन सर्वकपालाभिप्रथनस्य वैकल्पिकत्वं निवारयति । तथा च सूत्रं - पुरोडाशं प्रथयन् सर्वाणि कपालानि प्रथयति (आप. श्रौ. १.२५.३) इति ।

Thus the *mantra* 'उरु प्रथस्व' appears in Taittirīya Saṁhitā *TS* 1.1.8 and its *Brāhmaṇa* specifying the 'इयत्ता' i.e. extension of spreading is specified in Taittirīya Saṁhitā 2.6.3.6 'सर्वाणि कपालानि अभिप्रथयति ।'

Here Sāyaṇa clearly seems to refer to Taittirīya Saṁhitā 2.6.3.6, by the term पारक्षुद्र.

Thus पारक्षुद्र does not here refer to the Taittirīya Brāhmaṇa only, but to Brāhmaṇa portion appearing in the Taittirīya Saṁhitā.

मन्त्रब्राह्मणयोर्वेदनामधेयम् (*ĀpŚs* 24.1.3.1) or आम्नायः पुनः मन्त्राश्च ब्राह्मणानि (*Kauśika sūtra* 1.13) or मन्त्राश्च ब्राह्मणं च वेदाः (*Jaimini sūtra* 3.1.3) have included *Mantra*-s and *Brāhmaṇa*-s in the fold of *Āmnāya* i.e. the Veda. However this does not mean that these

authorities have excluded the *Āraṇyaka*-s and *Upaniṣads* from the Veda. On the otherhand, *Āraṇyaka* and *Upaniṣads* have been included in the *Brāhmaṇa*.

Sāyaṇācārya while commenting on *Brahmavallī* of *Taittirīya Upaniṣad* remarked वेदो हि मन्त्रब्राह्मणरूपेण द्विविधः । तत्र इयं ब्रह्मवल्ली ब्राह्मणरूपा ।

Bhaṭṭa Bhāskara commenting on *TS* 1.8.1 divides *Brāhmaṇa* into two categories viz. कर्मब्राह्मण and कल्पब्राह्मण. Further he quotes from *TĀ* I.32 – 'संवत्सरमेतद् व्रतं चरेत्, द्वौ वा मासौ -' and remarks – इति कल्पब्राह्मणं भवति । Thus he includes the *TĀ* passage in the *Brāhmaṇa* naming it as Kalpa-Brāhmaṇa.

***Taittirīya Āraṇyaka*:**

Taittirīya Āraṇyaka is divided into prapāṭhakas which are again subdivided into *Anuvāka*-s. Even in *TĀ*, there are two traditions of text order.

One of these two traditions, divides the *TĀ* into ten *prapāṭhaka*-s, while the other tradition divides it into eight *prapāṭhaka*-s. In these two traditions, not only the number of *Prapāṭhaka*-s differ from each other, but even their text order also differs.

Sayāṇācārya has accepted the text order of the Taittirīya Āraṇyaka, as divided into ten chapters, while Bhaṭṭa Bhāskara has accepted the text order as divided into eight chapters, while composing their commentaries thereon.

Sāyaṇācārya remarks at the beginning of his commentary on the Taittirīya Āraṇyaka as –

आरण्यकविशेषास्तु पूर्वाचार्यैरुदाहृताः ।

होतॄन् प्रवर्ग्यकाण्डं च याश्चोपनिषदो विदुः ॥

आरुणीयविधिश्चैव **काठके** परिकीर्तितः ।

रुद्रो नारायणश्चैव मेधो यश्चैव विक्रियः ।

एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति ॥

These verses are quoted by Bhaṭṭa Bhāskara also with some minor variant readings. The order of topics as accepted by Sāyaṇa is as follows.

1. आरुणकेतुकचयनम् 2. स्वाध्यायब्राह्मणम् 3. चातुर्होत्रचयनम् चतुर्होतृमन्त्राः, पुरुषचितिः, भर्तृसूक्तं, मृत्युसूक्तं, ब्रह्ममेधः 4. प्रवर्ग्यमन्त्राः 5. प्रवर्ग्यब्राह्मणम् 6. पितृमेधः 7-8-9. तैत्तिरीय उपनिषद् (सांहिती उपनिषद्) 10. नारायणोपनिषद् ।

Bhaṭṭa Bhāskara has accepted the order as follows – first three *prapāṭhaka*-s, are the same as in Sāyaṇa tradition, 4th *prapāṭhaka* deals with पितृमेधमन्त्रs, 5th *prapāṭhaka* deals with तैत्तिरीय उपनिषद् with its three *vallī*-s which are placed in 7th to 9th *prapāṭhaka*-s in Sāyaṇa's tradition, 6th *prapāṭhaka* consists of *Nārāyaṇopaniṣad*. 7th *prapāṭhaka* deals with Pravargya-*mantras* and 8th with the Pravargya-brāhmaṇa which are numbered as 4 and 5 in Sāyaṇa's tradition.

The contents of *Āraṇyaka*, according to the tradition are to be recited by a *Vratī* in the midst of *Araṇya* – i.e. forest. These *vrata*-s are elucidated as auxiliary to the *Āruṇaketuka*

cayana in *TĀ* 1.32 – beginning with संवत्सरमेतद् व्रतं चरेत् । द्वौ वा मासौ । ... एवं स्वाध्यायधर्मेण अरण्ये अधीयीरन् । etc.

The topics viz. सावित्रचयन, नाचिकेतचयन, चातुर्होतृचयन, वैश्वसृजचयन, आरुणकेतुकचयन, दिवःश्येनेष्टयः, अपाघा इष्टयः and स्वाध्यायब्राह्मण are assigned to the school originated by sage *Kaṭha*. Out of these eight topics, first four चयनs, दिवाः श्येनेष्टयः and अपाघा इष्टयः have been included in the *TBr* II.10-12, probably by the way of appendices. Since the topics of आरुणकेतुकचयन and स्वाध्यायब्राह्मण are expected to be recited in the forest, they appear to have been included in the text of *Āraṇyaka*.

The first *prapāṭhaka* dealing with *Āruṇaketuka-cayana* and the second comprising of *Svādhyāya Brāhmaṇa* belong to *Kaṭha*-school. The *Ṛṣi* of the first *prapāṭhaka*, prescribing *Āruṇa-ketuka cayana* appears to be *Āruṇas* – vide आरुणाः काण्डर्षयः (*TĀ* 1.32)

The second *prapāṭhaka*, named as स्वाध्यायब्राह्मण deals with यज्ञोपवीत, सन्ध्योपासना, कूष्माण्डहोम, दीक्षा and व्रतs for one who initiates in *Soma* sacrifice; five महायज्ञs, प्रायश्चित्तs, ब्रह्मोपस्थान and दिगुपस्थान.

The nature of this entire *prapāṭhaka* appears to be of late origin. The *Dīkṣa* and *Vrata*-s prescribed for *Soma-yājī* (II.1) do not have proper context for their prescription.

The third *prapāṭhaka* compiles the formulas for *Caturhotraciti, Puruṣākṛti-citi, Upahoma*-s in *Paśu*-sacrifice to

be offered to *Mṛtyu* and the Brahmamedha. The *Brāhmaṇa* sections related to चतुर्होतृ appears in the *TBr* 3.12.5.

Puruṣākṛticiti consists of two *Nārāyaṇuvāka*-s, one of which is the famous *Puruṣa-sūkta*.

The चतुर्होतृचिति is otherwise called ब्रह्मचिति. Cp. भारद्वाज पैतृमेधिक सूत्र 2.1 अथात उत्तरम् **पैतृमेधं** व्याख्यास्यामः यं **ब्रह्ममेध** इत्याचक्षते । Sāyaṇācārya brings out a subtle difference between ब्रह्ममेध and पितृमेध. According to him the cremation rite of a sacrificer is called पितृमेध, while that of a sacrificer who has realized the *Brahman* is named as ब्रह्ममेध. Cp. सायण on *TĀ* 3.21 – आहिताग्नेर्यो दहनादिसंस्कारः सोऽयं पितृमेधः । आहिताग्नित्वे सति यो ब्रह्मतत्त्वम् जानाति तस्य दहनादिसंस्कारः ब्रह्ममेध इत्युच्यते । This ब्रह्ममेध finds place in the 5th Prapāṭhaka along with some other minor topics in the 5th Prapāṭhaka. The sixth *prapāṭhaka* deals with नारायणोपनिषद् which is also called as याज्ञिकी उपनिषद्.

The seventh and the eighth Prapāṭhakas deal with **प्रवर्ग्य-मन्त्र** and **प्रवर्ग्य-ब्राह्मण** respectively. The other two extant schools of Kṛṣṇa Yajurveda viz. *Kaṭha* and *Kapiṣṭhala* do not compile the *pravargya* formulas and their *Brāhmaṇa*-s. The *Maitrāyaṇī* school of the black Yajurveda however collects *pravargya* formulas only, in the 4th i.e. *khila kāṇḍa* of its *Saṁhitā*, as no separate *Brāhmaṇa* or *Āraṇyaka* of that school exists. But the Pravargya anuvākas of the मैत्रायणीसंहिता IV.9.14 and

IV.9.17 are referred to by मैत्रायणीसंहिता 3.3.10 and मानवश्रौतसूत्र (6.1.7.20, 4.4.43), as *anuvāka*-s being collected in *Āraṇyaka*.

The *Yājñikī Upaniṣad* – in the 6th प्रपाठक of *TĀ* – (tradition as accepted by Bhaṭṭa Bhāskara), also named as नारायणोपनिषद्, is handed down to us in 64 *anuvāka*-s.

Sāyaṇācārya comments – तदीयपाठसंप्रदायस्तु देशविशेषेषु बहुविध उपलभ्यते । तत्र यद्यपि शाखाभेदः कारणम् तथापि तैत्तिरीयशाखाध्यापकैः तत्तद्देशनिवासिभिः शिष्टैरादृतत्वात् सर्वोऽपि पाठ उपादेय एव। तत्र द्राविडानां चतुःषष्ट्यनुवाकपाठः । आन्ध्राणामशीत्यनुवाकपाठः । कर्णाटकेषु केषांचित् चतुःसप्ततिपाठः । अपरेषां नवाशीतिपाठः । Bhaṭṭa Bhāskara has also accepted the *pāṭha* of 64 *anuvāka*-s.

In *Taittirīya* school, the *Taittirīya Āraṇyaka* is also accented and shows traisvarya.

However in the first five *prapāṭhaka*-s the accents are very irregular.

Bhaṭṭa Bhāskara (*TĀ* 1.1) observed – अत्र केषुचित् वाक्येषु ऐकश्रुत्यं दृश्यते केषुचित् त्रैस्वर्यमेव । उदात्तनिहितस्वार्यप्रचयेभ्यो विलक्षणा एकश्रुतिः ससूत्रेषु पञ्चप्रश्नेषु दृश्यते । ... तस्मात् व्यत्ययो बहुलम् इति प्राप्तस्य स्वरान्यत्वस्य अयं प्रकारविशेषः। आहुश्च 'वर्णान्यो वा स्वरान्यो वा पञ्चप्रश्नेषु दृश्यते' इति (*TĀ* 1.1). These irregularities have been illustrated in Āraṇyakaśikṣā of this Veda. This Śikṣā is a very small treatise, but has not still seen the light of the day. It needs editing and publication.

To conclude, let me remark that the division of the *Taittirīya* school into *Saṁhitā, Brāhmaṇa*, *Āraṇyaka* etc. appears

to be artificial and without any sound basis. It appears that, in course of time, the different topics were invented at different periods and were added to the texts of *Taittirīya* School, abruptly.

T. N. Dharmadhikari

[Please refer to the article – 'Reflections on the Taittirīya Brāhmaṇa, penned by Dr. C. G. Kashikar, printed and published by VSM, Pune (2006)]

पाठभेदविषयकाः विचाराः ।

अस्मत्संपादितावृत्तौ स्वीकृताः भाष्यद्वयस्थाः नैके पाठाः पूर्वप्रकाशितभाष्यावृत्तिस्वीकृतपाठापेक्षया विभिन्नाः सन्ति । ते च इदंप्रथमतया अस्माभिः संपादितां लिखितपुस्तकसामग्रीमाश्रित्यैव स्वीकृताः सन्ति । अथापि विशेषतः भट्टभास्करीयभाष्यस्य त्रुटितत्वात् बहवः पाठाः भाष्येऽस्मिन् अस्माभिः शुद्धीकृताः संभाविताश्च । प्रायशः तेषामत्र उद्देशतः समीक्षा अस्माभिः कृताऽस्ति । एवं पूर्वतनभाष्यावृत्तिपाठानपेक्ष्य भिन्नानां केषांश्चन एव पाठानां स्वीकृतिविषयको विचारः अनतिविस्तरेणात्र उदाहरणमात्रं प्रस्तूयते ।

भट्टभास्करभाष्यम्

७.८ संयुज्यत इति - अस्माभिः स्वीकृतोऽयं पाठः भाष्यस्थां वाक्यरचनासंगतिं सम्यगनुबध्नाति ॥ मै. मै२. मै३. अ. अ१ - 'संयुज्यत इति' नास्ति ॥

७.१२ सवनं वहतः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यस्थां वाक्यरचनासंगतिं सम्यगनुबध्नाति । ब्राह्मणभागस्यास्य सायणभाष्यमप्यनुसरति ॥ मै. मै१. अ१ - 'सवनं वहतः' नास्ति ॥

८.४ हि - अस्मत्स्वीकृतोऽयं पाठः भाष्यगतचक्षुःश्रोत्रयोः विषयग्रहणौचित्यं सम्यक् प्रतिपादयति ॥ मै. मै२. मै३. अ. अ१. तं. त१. 'हि' नास्ति ॥

९.८ हि स्थूरिः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतमर्थं सम्यक् प्रबलयति । अग्रिमं भाष्यांशं च सम्यगन्वेति ॥ अस्थूरिः - मै. मै१. मै२. अ१ ॥

११.१० अस्याम् - अस्माभिः शुद्धीकृत्य संभावितोऽयं पाठः भाष्यगतपङ्क्तेः प्रयोगसाधुत्वं प्रतिपादयति । अत्रत्यसंहिताभागमप्यनुसरति ॥ अस्मात् [स्मिन्] - मै, अस्मात् - सर्वाणि च लिखितपुस्तकानि ॥

१४.९ Vप्रजापतिः एव Vअग्रे Vअयजत प्रथममयजत प्रथममनेनेष्ट्वा - अस्माभिः स्वीकृतोऽयं पाठः ब्राह्मणभागस्य अर्थं साधु प्रकाशयति । संहितामप्यनुसरति ॥ प्रजापतिरनेनाग्रे प्रथममयजत - मै. मै१. मै२. अ१ ॥

१५.१३ मुखे भवत्वान्मुखस्य - अस्माभिः स्वीकृतोऽयं पाठः ब्राह्मणगतस्य मुखतः इति पदस्यार्थं साधु प्रतिपादयति ॥ मुखे भवत्वोन्मुख्यस्य - मै. मै१. मै२. तं. तं१. अ ॥

१७.१० अशितानि - अस्मत्स्वीकृतोऽयं पाठः 'अन्नधानमुदरम्' इति पदस्य व्याख्यारूपमर्थं योग्यतया प्रतिपादयति ॥ अशनानि - मै. मै१. मै२. मै३. अ ॥

१९.१३ सप्तदशाक्षरात्मा - अस्माभिः स्वीकृतोऽयं पाठः प्रजापतेः सप्तदशाक्षरसमूहत्वं सुस्पष्टं प्रतिपादयति । "यो वै सप्तदशम्" (तैसं १.६.१२) इत्यनुवाके 'सप्तदशाक्षरसमूहात्मा प्रजापतिः सप्तदशः' इत्येव भट्टभास्करमिश्रैर्व्याख्यातम् ॥ सप्तदशात्मा - मै. मै३. अ ॥

२९.११ ताश्चेतरत्र - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतां वाक्यरचनासंगतिं सम्यगनुसरति । वैयाकरणानां 'तदिति परोक्षे विजानीयात्' इति नियममनुगच्छति ॥ एताश्चेतरत्र - मै. मै१. मै२. अ ॥

३३.८ 'उभयतोऽतिरात्राणि सत्राणि भवन्ति' - अस्मत्स्वीकृतोऽयं पाठः भाष्यगतमहीनस्वरूप-विवरणं साधु पुष्णाति ॥ इति - मै२, उभयतोऽतिरात्राणि - अ१, 'उभयतोऽतिरात्राणि सत्राणि भवन्ति' नास्ति - मै. मै३. अ ॥

३३.१० [^{V}आसत] - अस्माभिः प्रपूरितोऽयं पाठः 'आसिरयमनर्थकः सोऽस्मिन् विषये आस्थानकर्मेत्येके' इति विवरणं कस्येत्याकाङ्क्षां प्रपूरयति । अत्रत्यं संहिताभागमप्यनुसरति ॥ '[^{V}आसत]' नास्ति - मै. मै१. मै२. मै३. अ. अ१ ॥

३३.१२ क्रतुकर्मविशेषः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य 'सत्रसनं सहासनम्' इत्यस्य स्वरूपं सम्यक् प्रतिपादयति ॥ क्रतुविशेषस्य - मै. मै२. मै३. अ. अ१ ॥

३८.८ उत्तरे षोडशी - अस्माभिः संभावितोऽयं पाठः भाष्यगतपङ्क्तेरर्थं सुस्पष्टयति । भाष्यगतां त्रुटिमपि प्रपूरयति ॥ 'उत्तरे षोडशी' नास्ति - मै. मै१. मै२. मै३. अ. अ१ ॥

३९.१० हविष्मत् निधनो स्तोमो यस्य - अस्माभिः स्वीकृतोऽयं पाठः अग्रिमेण 'तत्' इति पदेन सम्यगन्वेति । हविष्मन्निधनशब्दस्य व्युत्पत्तिमपि साधु प्रकाशयति । भाष्यगतां त्रुटिमपनोदति ॥ 'हविष्मत् निधनो स्तोमो यस्य' नास्ति - मै. मै१. मै२. मै३. अ. अ१ ॥

४२.६ त्रिरात्रा विधीयन्ते - अस्मत्स्वीकृतोऽयं पाठः अग्रे भाष्ये 'पञ्च त्रिरात्राः' इति विद्यमानत्वात् तदनुरूपां बहुवचनाकाङ्क्षां प्रपूरयति ॥ त्रिरात्रो विधीयते - मै. मै१ ॥

४२.१२ अपश्यत् - अस्माभिः शुद्धतामापादितेनानेन पाठेन भाष्यगतपङ्क्तेरर्थसाधुत्वं सम्यक् संपाद्यते । अत्रत्यं संहिताभागमप्यनुसरति पाठोऽयम् ॥ अपव्यत् - मै. मै२. मै३. अ. अ१, उपविश्य - मै१ ॥

४७.७ विशीर्णमभवत् - अस्माभिः स्वीकृतोऽयं पाठः संहिताभागस्य 'व्यवैर्यत' इति पदस्यार्थसाधुत्वं प्रकाशयति ॥ विशीर्णमधोऽपतत् - मै. मै१. मै३. अ. अ१ ॥

५३.६ तद्धोतारमभिलक्ष्यातिरिच्यते - अस्मत्स्वीकृतोऽयं पाठः 'तस्मादतिरिक्तः स्यात् होता' इति भाष्यपङ्क्तेरर्थमाधिक्येन पोषयति ॥ तस्योत्तरमभिलक्ष्यातिरिच्यते - मै. मै२. मै३. अ ॥

५३.६ पूर्वत्र - अस्माभिः स्वीकृतोऽयं पाठः भाष्यस्थेनाग्रिमेण 'उत्तरत्र' इति पदेन सार्धं वाक्यरचनासंगतिं सम्यगनुबध्नाति ॥ पूर्ववत् - मै. मै१. मै२. मै३. अ ॥

५४.१० सहस्रतमीम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य ‘ नियन्तुमर्हतीति ’ इति पदस्य द्वितीयाविभक्तेराकाङ्क्षां प्रपूरयति ॥ सहस्रतमी - मै. मै३. अ. अ१ ॥

५८.१० भागवन्तौ - अस्माभिः स्वीकृतोऽयं पाठः सोमेन्द्रयोः गवां लाभात्, तयोः भागधारित्वं स्पष्टयति ॥ भागः तौ - मै. मै२. मै३. अ. अ१ ॥

६३.१० मूर्खा - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतं रोषणशीलेत्यर्थं सम्यगन्वेति ॥ मूर्छा - मै. मै२. मै३. अ. अ१ ॥

७१.१० शक्नुयाः - अस्मत्स्वीकृतोऽयं पाठः भाष्यगतायाः ‘ सा त्वं किं नाम न कुर्याः ’ इति पङ्क्तेरनुगुणं मध्यमपुरुषस्याकाङ्क्षां प्रपूरयति ॥ शक्यं त्वया - मै. मै१. मै३. अ. अ१ ॥

७८.९ पृष्ठतो गच्छति - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य ‘ अनु पर्यावर्तते ’ इत्यस्य साध्वर्थं प्रतिपादयति ॥ अनुगच्छति - मै. अ, प्रभूतोऽनुगच्छति - मै२, गच्छति - मै३ ॥

८१.११ इत्येके - अस्माभिः शुद्धीकृत्य संभावितोऽयं पाठः भाष्यस्य वाक्यरचनासंगतिं सम्यगातनोति । मै - मुद्रितावृत्तौ विद्यमानां पाठभ्रष्टतामपि दूरीकरोति ॥ इत्येते - मै ॥

८३.८ एवम् - अस्माभिः स्वीकृतोऽयं पाठः प्रथमद्वितीयाह्नोः साधर्म्यं सुष्ठु प्रतिपादयति । वाक्यरचनासंगतिं च सम्यगातनोति ॥ अथ - मै. मै१. अ. अ१ ॥

८४.१४ इत्यादिनैव - असत्स्वीकृतोऽयं पाठः गतार्थत्वं केनेत्याकांक्षां प्रपूरयति । इत्यादिना - मै. मै३. अ. अ१ ।

८८.८ वारुणः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य ‘ दशकपालः ’ इत्यस्य पुरोडाशस्य विशेषणत्वात् तदनुरूपं लिङ्गवचनविभक्तीश्च प्रपूरयति ॥ वारुणम् - मै. मै१. मै२. अ. अ१ ॥

१००.६ ईदृशीम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतेनाग्रिमेण ‘ इमाम् ’ इति पदेन सार्धं साधर्म्यं भजते । पदयोरुभयोर्मध्ये विद्यमानं विरोधमपि परिहरति ॥ तादृशीम् - मै. मै१. मै२. मै३. अ ॥

१०२.८ धारणकुशलश्च - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य ‘ धरुणः ’ इति पदस्य साध्वर्थं प्रतिपादयति ॥ धारणशीलः - मै. मै२. मै३. अ. अ१ ॥

१०४.८ अध्वानम् - अस्माभिः स्वीकृतोऽयं पाठः प्रयोगसाधुत्वमातनोति । भाष्यगतां वाक्यरचनासंगतिमपि सम्यग्दर्शयति ॥ अध्वनाम् - मै. मै१. मै३. अ. अ१ ॥

११०.९ गच्छते - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य ‘ परावल्गते ’ इत्यस्य पदस्य

साध्वर्थं प्रतिपादयति । संहितास्थयोः 'आवल्गते परावल्गते' इति पदयोः भाष्यरचनासंगतिमपि सम्यगातनोति ॥ आगच्छते - मै. मै२. मै३. अ ॥

१२१.६ दीप्तिमतीम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य 'द्याम्' इति पदस्यार्थं साधु प्रकाशयति ॥ दीपितवतीम् - मै. मै१. मै२. मै३. अ ॥

१२४.८ बद्ध्यमानाय - अस्माभिः स्वीकृतोऽयं पाठः 'सन्दीयमानाय' इति पदस्य साध्वर्थं प्रतिपादयति । 'दो अवखण्डने (धापा ११७३) संपूर्वो बन्धनकर्मा' इत्यादिभाष्य-पङ्क्तिनाऽपि सम्यगन्वेति ॥ नियम्यमानाय - मै. मै२. मै३. अ ॥

१२८.१८तक्षणम् - अस्मत्स्वीकृतोऽयं पाठः 'निकषणम्' इति पदस्यार्थं सम्यग्विवृणोति । 'काष्ठादिषु शरीरस्य' इति भाष्यवाक्यरचनासंगतिं सम्यगातनोति ॥ तत्क्षणम् - अ१ ॥

१४०.९ इत्युत्तरार्धेन अर्थानुवादः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यपङ्क्तेरर्थगभीरत्वं प्रबलयति ॥ इत्युत्तरार्थोऽनुवादः - मै. मै१. मै३. अ. अ१ ॥

१४२.९ देवान् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य 'यान्ति' इति गत्यर्थस्य धातोः द्वितीयाविभक्तेरपेक्षां प्रपूरयति ॥ देवाः - मै. अ१ ।

१४८.१२प्रारब्धाम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतं 'प्रस्नवती' इति पदं सम्यगन्वेति । गोदोहनक्रियाव्यापृतत्वमप्यनेन स्पष्टीभवति ॥ प्रवृत्ताम् - मै. मै१. मै३. अ. अ१ ॥

१५३.१५निघ्नन्ति - अस्माभिः स्वीकृतोऽयं पाठः संहितागतस्य 'निगच्छन्ति' इति पदस्यर्थविवरणं करोति ॥ 'निघ्नन्ति' नास्ति - मै. मै१. मै२. मै३. अ. अ१ ॥

१५६.८ ख्यातिलोकप्रतिष्ठितानां [V]प्रजानां मध्ये ख्यतिं गच्छति - शुद्धतामापाद्य अस्माभिः कल्पितोऽयं पाठः ब्राह्मणभागस्यास्यानुरूपमविरुद्धं च भाष्यमारचयितुं समर्थो भवति ॥ ख्यातिसिलोके प्रतिष्ठिता [ख्यातिच्छाये प्रतिष्टितं ?] नाम प्रजानां गच्छति - मै, ख्यातिश्लोकप्रतिष्ठा नाम प्रतिष्ठितानाम् - मै१, प्रतिष्ठितानां प्रजानाम्-अ१ ॥

१६३.११[V]पर्यूहते - संहितामादृत्यास्माभिः संशोधितोऽयं पाठः 'सर्वतो नयति' इति भाष्यगतस्य विवरणं कस्य पदस्येत्याकाङ्क्षां प्रपूरयति अत्रस्थं संहिताभागमप्यनुसरति ॥ पर्यूहन्ते - मै, सर्वाणि च लिखितपुस्तकानि ॥

१७०.९ एकादशरात्रः - अस्माभिः स्वीकृतोऽयं पाठः अग्रेण भाष्यगतेन 'तं विदधाति' इत्यनेन वाक्यांशेन साकं प्रयोगसाधुत्वं प्रदर्शयति ॥ एकादशरात्रम् - मै. मै१. मै२. मै३. अ ॥

१८८.६ विहिता त्रिस्त्र्यनीका परिवर्तते यद्यव्यूढः - सूत्रमवलम्ब्यास्माभिः शुद्धीकृत्योत्प्रेक्षितोऽयं

पाठः अत्रत्यं भाष्यगतं विवरणभागं सम्यगनुसरति ॥ विहित - - - - निका - - - - इति - मै, विहित - - - - निका परीतित इति (?) - मै१, विहितात् त्यहीको परिवर्तत इति - अ१, विहिताद्धनीका परिवर्तत इति - मै२ ॥

२०१.१०अव्यूढः - अस्माभिः संभावितोऽयं पाठः अनुवाकस्यास्य भाष्यारम्भगतं विवेचनं सम्यगनुसरति ॥ समूढः - मै, सर्वाणि च लिखितपुस्तकानि ॥

२१८.६ [V]मस्तिष्कं शिरोमांसम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यभागस्य शब्दानां प्रयोगसाधुत्वं प्रतिपादयति ॥ मस्तिष्कः शिरोमांसः - मै. मै१. मै३. अ. अ१ ॥

२४५.१०व्यक्तप्रकाशः - लिपिसाधर्म्यात् शुद्धीकृत्यास्माभिरुत्प्रेक्षितोऽयं पाठः भाष्यगतस्य 'व्युष्टिः' इति पदस्य साध्वर्थं प्रतिपादयति । सायणभाष्यमपि पाठमिदम् अनुसरति ॥ उक्तप्रकाशः - मै, सर्वाणि च लिखितपुस्तकानि ॥

२५२.११विवक्तव्यमत्र भवत्येवेति - अस्माभिः स्वीकृतोऽयं पाठः स्खलितं व्याकर्तव्यमेवेति निर्णयं प्रदर्शयति ॥ विवक्तव्यमेवेति - मै. मै१. मै३. अ. अ१ ॥

२५६.८ वयम् - अस्माभिः संभावितोऽयं पाठः भाष्यगतेनाग्रिमेण 'उत्तिष्ठाम' इत्यनेन सार्धम् अर्थसाधुत्वं साधयति ॥ वशम् - मै, सर्वाणि च लिखितपुस्तकानि ॥

२५६.१०ते - अस्माभिः स्वीकृतोऽयं पाठः अत्रत्यं संहिताभागमनुसरति ॥ तेभ्यः - मै. मै१. मै३. अ ॥

२९४.७ पूर्वम् अस्मिन् - अस्माभिः संभावितोऽयं पाठः भाष्यगतेनाग्रिमेण 'मनुष्यलोके' इति पदेन सार्धमर्थदृष्ट्या साध्वन्वेति । अत्रत्यं संहिताभागमप्यनुसरति ॥ पूर्वस्मिन् - मै. मै१. मै३. अ. अ१ ॥

२९८.८ अतिग्राह्याः मध्येषु - अस्माभिः स्वीकृतोऽयं पाठः कर्मकाण्डानुसारी विराजते । भाष्यस्थां वाक्यरचनासंगतिमपि सम्यगन्वेति ॥ अतिग्राह्यमध्येषु - मै. मै१. मै३. अ. अ१ ॥

३०४.५ अष्टावाप्तीः - अस्माभिः स्वीकृतोऽयं पाठः अनुवाकस्यास्य विषयमनुसरति । अनुवाकस्यास्य आप्तिहोममन्त्रविषयत्वात् ॥ अष्टावाहुतीः - मै. मै१. मै३. अ. अ१ ॥

३५८.८ भवतः - अस्माभिः शुद्धतामापाद्य संभावितोऽयं पाठः अत्रत्यं भाष्यगतं संहिताभागस्योद्धरणं शोधयति । अत्रत्यं संहिताभागमप्यनुसरति ॥ बहवः - मै, सर्वाणि च लिखितपुस्तकानि ॥

३८४.११ऊनातिरिक्तस्वरूपतापादनेन - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य वाक्यस्य प्रयोगसाधुत्वं प्रदर्शयति ॥ ऊनातिरिक्ततास्वरूपतापदेन - मै२, ऊनातिरिक्तस्वरूपता-पदेन - मै. मै१. मै३. अ. अ१ ॥

४३३.१०सत्यस्य - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य 'ऋतस्य' इति पदस्यानुरूपमर्थं

प्रदर्शयति । भाष्यपङ्क्तेरपि साधुतरमर्थं प्रतिपादयति ॥ सत्रस्य - मै. मै१. मै३. अ. अ१ ॥

४४५.७ तत्तथा - अस्माभिः शुद्धीकृत्य संभावितोऽयं पाठः भाष्यपङ्क्तेः साध्वर्थप्रतिपादनायोपकरोति ॥ ततस्तथा - मै. मै१. मै३. अ१, ततस्था - अ ॥

५४२.७ कुटित्वाऽ[भि]नयन्त्यः - अस्माभिः संभावितोऽयं पाठः भाष्यभागस्यास्य संदर्भोचितमर्थं प्रदर्शयति ॥ कुटित्वा न यन्त्यः (कुटिलं यन्त्यः) - मै, कुटित्वा न यन्त्यः - मै२ ॥

सायणभाष्यम् ।

६.१६ दश दश मिलित्वा - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतस्य एकोनविंशतिविराड्रूपस्य सिद्ध्यर्थं दश दश स्तोत्रीयाणां मेलनस्यैवावश्यकत्वं प्रदर्शयति । न तु दशभिर्विभागम् ॥ दशभिर्विभक्ताः - आ. क, दश मिलिताः - अ. पा. हा. इ. वा. म. वै ॥

३४.१३ तदीयाम् - अस्मत्स्वीकृतोऽयं पाठः 'तत्सम्बन्धिनीं सामग्रीम्' इति संदर्भोचितमर्थं प्रकाशयति ॥ तृतीयाम् - आ ।

३५.११ स्वर्गं प्रति प्रस्थितौ उत्तरेणाह्ना स्वर्गं प्रविष्टौ - अस्माभिः स्वीकृतोऽयं पाठः पूर्वेणाह्ना स्वर्गं प्रति प्रस्थितौ, तदनु उत्तरेणाह्ना स्वर्गं प्रविष्टाविति साध्वर्थं प्रतिपादयति ॥ स्वर्गं प्रविष्टौ - अ. आ. क. पा. इ. वा. म. वै ॥

३५.१२ अहःशब्देनैकदिनसाध्यसोमप्रयोगः - अस्माभिः स्वीकृतोऽयं पाठः अहःशब्दस्य सोमप्रयोगत्वं स्पष्टयति । न तु तस्य स्तोमप्रयोगत्वमिति ॥ अहःशब्देनैकदिनसाध्यस्तोमप्रयोगः - अ. आ. क. पा. इ. वा. वै. म ॥

३६.१७ सर्वमप्यप्राप्तम् - अस्मत्स्वीकृतोऽयं पाठः भाष्यपङ्क्तेरर्थं साध्वातनोति । यथा, प्राप्तिस्तावत् अप्राप्तस्यैव भवति । न तु अप्राप्यस्य इति ॥ सर्वमप्यप्राप्यम् - अ. आ. क. पा. वा, सर्वमप्राप्तम् - इ. वै ॥

३७.१३ संपादयति - अस्माभिः स्वीकृतोऽयं पाठः तेजस्त्वं, ब्रह्मवर्चसत्वं तदुभयमपि संपादयतीति भाष्यभागस्यास्य उचितमर्थं प्रकाशयति ॥ समापयति - अ. आ. क. पा. इ. वा. वै ॥

६७.१९ वक्ष्यते - अस्माभिः स्वीकृतोऽयं पाठः अस्मिन्नेवानुवाकेऽग्रे महीतिशब्दस्य गोशब्दार्थेन प्रयोगात् तदनुरोधेन प्रयोगसाधुत्वं प्रदर्शयति ॥ ल(व)क्ष्यते - मै, लक्ष्यते - अ. आ. पा. इ. वा. वै ॥

९५.१९ द्विरात्रादिपदान्तरगतः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतेन 'द्वादशाहपदान्तर्गतः' इत्यस्मात् प्रकृतस्य पार्थक्यं पदान्तरत्वं वा सुस्पष्टं प्रतिपादयति ॥ द्विरात्रादिपदान्तर्गतः - इ. वा. म ॥

१०१.१९ विस्तारेण - अस्माभिः स्वीकृतोऽयं पाठः 'स च शब्दस्य विस्तरः' इति

भाषिकानुशासनमनुसरति ॥ विस्तरेण - अ ॥

१०५.२०[V]इहि गच्छ - अस्माभिः स्वीकृतोऽयं पाठः अत्रत्यं संहिताभागमनुसरति ॥ इहागच्छ - म. वै ॥

१५०.२१शास्त्रमुखेन - अस्माभिः स्वीकृतोऽयं पाठः अध्ययनकालस्य बाल्यवयसि निर्णीतत्वात् तदानीं शास्त्रस्यासंबन्धात्, निर्णयस्य च शास्त्राधीनत्वाच्च अस्यैव साधुत्वं प्रतिपादयति ॥ सर्वाणि लिखितपुस्तकान्यपि 'गुरुमुखेन' इति पाठं नानुसरन्ति ॥ गुरुमुखेन(ण) - आ, साश्रुमुखेन - अ. इ. वा. म. मै. वै ॥

१६०.१८क्रतुम् - अस्माभिः स्वीकृतोऽयं पाठः साध्वर्थं प्रतिपादयति । द्वादशसंख्यामुपजीव्य क्रतोरेव विधानात् । न तु क्रमस्य । अत्रत्यः पाठः कर्णाटतेलुगुलिप्योः सादृश्यात् संभूतो दृश्यते ॥ क्रमम् - अ. आ. पा. इ. वा. वै ॥

१६५.१२शत्रुक्षयरूपम् - अस्माभिः स्वीकृतोऽयं पाठः भाष्यभागस्यास्यान्ते विद्यमानस्य 'तेन भ्रातृव्यमेव क्षीणं करोति' इत्यंशस्य पूरकत्वमाभजति ॥ शत्रुजयरूपम् - अ. आ. पा. इ. वा. वै ॥

१६६.१३दूरतः - अस्माभिः स्वीकृतोऽयं पाठः भाष्यपङ्क्तेरर्थसाधुत्वं प्रतिपादयति ॥ अतः - अ. आ. इ. वा. म ॥

१९५.१७वाग्रूपत्वम् । अष्टमस्याह्नोऽपि - अस्माभिः स्वीकृतोऽयं पाठः 'वागष्टममहः' इति संहितागतस्य भागस्यार्थं साधु विषदयति ॥ वाग्रूपत्वमर्थवादान्तरे - अ. आ. पा. इ. वा. वै, अष्टमस्याह्नो वाग्रूपत्वम् - म ॥

२०९.१९प्रीतिहेतुः - अस्माभिः स्वीकृतोऽयं पाठः सत्रानुष्ठानस्य साध्वर्थं प्रतिपादयति । भाष्यगतस्य 'प्राणाः प्रीताः भवन्ति' इत्यनेन पङ्क्तिना च संगच्छते ॥ धृतिहेतुः - म ॥

३०५.१९भ्रातरश्च - अस्माभिः स्वीकृतोऽयं पाठः दायभागार्थं भृत्याः न युद्ध्यन्ति भ्रातर एव युद्ध्यन्तीति कृत्वा साध्वर्थं प्रकटयति ॥ भृत्याश्च - अ. आ. क. पा. हा. इ. उ. वा. वै ॥

३१४.१६प्रथमम् - अस्माभिः स्वीकृतोऽयं पाठः, मन्त्रभागस्यास्य ऋग्रूपत्वात् यद्यपि 'प्रथमाम्' इत्येव साधुतरः पाठः स्यात्तथाऽपि भाष्ये एव एतदर्थं मन्त्रशब्दस्य प्रयोगात् तदनुरूपं लिङ्गवचनविभक्तेराकाङ्क्षां प्रपूरयति ॥ प्रथमाम् - शृ१. क. हा ॥

३५९.१९अतस्तत्परिहाराय यदूर्ध्वषोडशिदिनेषु अनुष्ठेयाः स्तोमाः क्लृप्ताः सर्वेऽपि समानपरिमाणत्वेन निश्चिताः स्युस्तदानीं यजमानाः क्लृप्ताः इदमेतावद्भोग्यमित्येवं निश्चययुक्ताः सन्तः स्वर्गं प्राप्नुवन्ति - अस्माभिः स्वीकृतोऽयं पाठः भाष्यगतां त्रुटिमत्रापूरयति ॥

४२३.१०प्रहन्ति - अस्माभिः स्वीकृतोऽयं पाठः कल्पसूत्रमनुसरति ॥ प्रहरति - अ. आ. क. पा.

हा. इ. वा. वै, प्रभवन्ति - भृ१ ॥

४२४.१४ब्रह्मा - अस्माभिः स्वीकृतोऽयं पाठः कल्पसूत्रमनुसरति । भाष्यगतपङ्क्तेरर्थमपि साधु विषदयति ॥ होता - भृ१. म. मै ॥

४९७.१६मध्यरात्रे - अस्माभिः स्वीकृतोऽयं पाठः ऋत्विजावुभौ स्पर्धत इति कृत्वा एकस्य प्रबोधात्पूर्वमेव द्वितीयः प्रबुध्य प्रातरनुवाकस्य शस्त्रस्योपाकरणं कुर्यादित्यर्थं साधु स्पष्टयति ॥ महारात्रे - अ. आ. क. पा. हा. इ. उ. वा. वै ॥

५२०.१५अभीष्टमाहृत्य - अस्माभिः स्वीकृतोऽयं पाठः पिता पुत्रेभ्यः ईप्सितमेवाहरतीति कृत्वा भाष्यपङ्क्तेः साध्वर्थं प्रतिपादयति ॥ भागमाहृत्य - अ. आ. क. पा. हा. इ. उ. वा. वै. म ॥

५६६.१८ ^{V}अनु कर्मारभामहे - अस्माभिः स्वीकृतोऽयं पाठः प्राक्तनकर्मसमाप्तिं निर्दिशति ॥ त्वामन्वारभे - अ. आ. क. पा. हा ॥

विषयानुक्रमणी

अनुवाकः	विषयः	पृष्ठानि
७.१.१	एकाहेष्वग्निष्टोमविधिः	१-२१
२	स्तोमानां संभूयकारित्वम्	२२-२५
३	अतिरात्रविधिः	२६-३२
४	अहीनेषु द्विरात्रविधिः	३३-४१
५	त्रिरात्रविधिः	४२-५७
६	सहस्रतमीस्तुत्यादि	५८-७२
७	सहस्रतमीदानम्	७३-७९
८	चतूरात्रस्यात्रेयविधिः	८०-८५
९	जामदग्न्यचतूरात्रविधिः	८६-८८
१०	पञ्चरात्रविधिः	८९-९८
११	अश्वमेधमन्त्राः	९९-१०३
१२	अश्वमेधमन्त्राः	१०४-१०८
१३	अश्वमेधमन्त्राः	१०९-१११
१४	अश्वमेधमन्त्राः	११२-११२
१५	अश्वमेधमन्त्राः	११३-११४
१६	अश्वमेधमन्त्राः	११५-११५
१७	अश्वमेधमन्त्राः	११६-११७
१८	अश्वमेधमन्त्राः	११८-१२१
१९	अश्वमेधमन्त्राः	१२२-१२९
२०	अश्वमेधमन्त्राः	१३०-१३५
७.२.१	षड्रात्रविधिः	१३६-१४४
२	सप्तरात्रविधिः	१४५-१४९
३	अष्टरात्रविधिः	१५०-१५२
४	नवरात्रविधिः	१५३-१५८
५	दशरात्रविधिः	१५९-१६९
६	एकादशरात्रविधिः	१७०-१७६
७	द्वादशरात्रविधिः	१७७-१८७
८	द्वादशरात्रविधिः	१८८-२०४
९	द्वादशरात्रविधिः	२०५-२१०

१०	द्वादशाहविधिः	२११-२२७
११	अश्वमेधाङ्गरात्रिहोममन्त्राः	२२८-२३२
१२	अश्वमेधाङ्गरात्रिहोममन्त्राः	२३३-२३४
१३	अश्वमेधाङ्गरात्रिहोममन्त्राः	२३५-२३५
१४	अश्वमेधाङ्गरात्रिहोममन्त्राः	२३६-२३७
१५	अश्वमेधाङ्गरात्रिहोममन्त्राः	२३८-२३८
१६	अश्वमेधाङ्गरात्रिहोममन्त्राः	२३९-२३९
१७	अश्वमेधाङ्गरात्रिहोममन्त्राः	२४०-२४०
१८	अश्वमेधाङ्गरात्रिहोममन्त्राः	२४१-२४१
१९	अश्वमेधाङ्गरात्रिहोममन्त्राः	२४२-२४३
२०	अश्वमेधाङ्गरात्रिहोममन्त्राः	२४४-२४७
७.३.१	दशरात्रस्य दशममहः	२४८-२५९
२	द्वादशाहयाजननिषेधः	२६०-२६२
३	त्रयोदशरात्रविधिः	२६३-२६६
४	चतुर्दशरात्रविधिः	२६७-२६९
५	चतुर्दशरात्रयोः विधिः	२७०-२७५
६	पञ्चदशरात्रविधिः	२७६-२७८
७	पञ्चदशरात्रविधिः	२७९-२८४
८	सप्तदशरात्रविधिः	२८५-२८७
९	विंशतिरात्रविधिः	२८८-२९३
१०	एकविंशरात्रविधिः	२९४-३०३
११	आप्तिहोममन्त्राः	३०४-३११
१२	पर्याप्तिहोममन्त्राः	३१२-३१३
१३	आभूतिहोममन्त्राः	३१४-३१६
१४	अनुभूतिहोममन्त्राः	३१७-३१८
१५	वैश्वदेवाहुतिमन्त्राः	३१९-३२२
१६	अश्वाङ्गहोममन्त्राः	३२३-३२६
१७	रूपहोममन्त्राः	३२७-३२९
१८	रूपहोममन्त्राः	३३०-३३१
१९	ओषधीहोममन्त्राः	३३२-३३३
२०	वनस्पतिहोममन्त्राः	३३४-३३६
७.४.१	चतुर्विंशतिरात्रः	३३७-३४०

२	द्वितीयश्चतुर्विंशतिरात्रः	३४१-३५०
३	त्रिंशद्रात्रः	३५१-३६०
४	द्वात्रिंशद्रात्रः	३६१-३६५
५	त्रयस्त्रिंशद्रात्रः	३६६-३७४
६	षट्त्रिंशद्रात्रः	३७५-३७८
७	एकान्नपञ्चाशद्रात्रः	३७९-३८६
८	संवत्सरसत्रम्	३८७-३९५
९	दीक्षोपसदः	३९६-३९७
१०	प्रायणीयाख्यं प्रथममहः	३९८-४०३
११	अभिप्लवषडहः	४०४-४१३
१२	आपाव्यहोमाः	४१४-४१७
१३	अपां होमाः	४१८-४२०
१४	अपां होमाः	४२१-४२२
१५	शुनः प्रहारः	४२३-४२६
१६	यव्याख्यो होमः	४२७-४२८
१७	गव्याख्यो होमः	४२९-४३४
१८	ब्रह्मोद्यम्	४३५-४४०
१९	मृताश्वोपचारः	४४१-४५७
२०	जीवतोऽश्वस्योपचारः	४५८-४६३
२१	संततिहोमाः	४६४-४६४
२२	प्रमुक्तिहोमाः	४६५-४६८
७.५.१	गवामयनविशेषाः	४६९-४८२
२	गवामयनविकल्पः	४८३-४८७
३	पृष्ठ्यषडहविधिः	४८८-४९१
४	गवामयने उत्तरपक्षविशेषः	४९२-४९६
५	सोमौ संसुतौ स्याताम्	४९७-५०३
६	उत्सर्गिणामयनम्	५०४-५११
७	अहरुत्सर्गे विशेषः	५१२-५२१
८	महाव्रतस्य सामविशेषाः	५२२-५३२
९	अर्क्यसामादिविधिः	५३३-५४०
१०	दासीनृत्यम्	५४१-५४३
११	नक्तंहोममन्त्राः	५४४-५४७

१२	शरीरहोममन्त्राः	५४८-५५०
१३	परिधिमन्त्राः	५५१-५५२
१४	सर्वपृष्ठेष्टिनिर्वापः	५५३-५५४
१५	सर्वपृष्ठेष्टिप्रयोगः	५५५-५५८
१६	पूर्वमहिमाख्यग्रहमन्त्रः	५५९-५६०
१७	द्वितीयमहिमाख्यः	५६१-५६२
१८	ब्रह्मवर्चसहोमः	५६३-५६४
१९	अश्वानुमन्त्रणम्	५६५-५६६
२०	अन्नहोममन्त्राः	५६७-५६८
२१	प्रायश्चित्तेष्टयः	५६९-५६९
२२	मृगारेष्टिः	५७०-५७०
२३	संनतिहोमाः	५७१-५७२
२४	यजमानवाचनम्	५७३-५७४
२५	अश्वस्तुतिः	५७५-५७९

संक्षेपविवरणम् ।

आपमन्त्र	आपस्तम्बमन्त्रप्रश्न:
आपश्रौ	आपस्तम्बश्रौतसूत्रम्
उ/उसू	उणादिसूत्रम्
ऋ	ऋग्वेदसंहिता
कपिसं	कपिष्ठलसंहिता
कासं	काठक संहिता
गणपा	गणपाठ:
जैन्या	जैमिनीयन्यायमाला विस्तर:
तांब्रा	ताण्ड्यमहाब्राह्मणम्
तैआ	तैत्तिरीयारण्यकम्
तैब्रा	तैत्तिरीयब्राह्मणम्
तैसं	तैत्तिरीय संहिता
द्र	द्रष्टव्यम्
धापा	धातुपाठ:
नि	निरुक्तम्
पा/पासू	पाणिनीयसूत्रम्
पामभा	पातञ्जलमहाभाष्यम्
फिसू	फिट्सूत्रम्
बौश्रौ	बौधायनश्रौतसूत्रम्
महाभा	महाभारतम्
मैसं	मैत्रायणीसंहिता
वा	वार्तिकम्
वासं	वाजसनेयिसंहिता
शब्रा	शतपथब्राह्मणम्
साम	सामवेदसंहिता

TĀ	Taittirīya Āraṇyaka
TB	Taittirīya Brāhmaṇa
TS	Taittirīya Saṁhitā

ॐ

कृष्ण-यजुर्वेदीया

तैत्तिरीय-संहिता

भट्टभास्करभाष्य-सायणभाष्यसमेता

(अथ सप्तमे काण्डे प्रथमः प्रपाठकः)

॥ श्री गणेशाय नमः ॥

[1-] षष्ठेन काण्डेन [2]दीक्षाद्युदयनीयान्तोऽग्निष्टोमः सगुणः प्रतिपादितः । [3]स इदानीमिह विधीयते । पूर्वत्र हि कर्तव्यतामात्रमस्य विहितम् । अस्यैव गुणविकाराः सर्वसंस्था उत्तराः [4-]अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्याम इति [-4] । एतत्प्रकृतिकाः [5]एव सर्वे विश्वजिदादयः एकाहाः [6]द्विरात्रप्रभृतयश्चाहीनाः द्वादशाहादीनि च सत्राणि । तत्र पूर्वप्रकरणशेषभूतं तद्गतमेव किंचिदारभ्यते ॥

॥ श्री गणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१॥
चयनब्राह्मणं काण्डे पञ्चमे स्फुटमीरितम् ।
षष्ठे तु काण्डे सोमस्य मन्त्राणां ब्राह्मणं क्रमात् ॥२॥
[1]उक्तं मन्त्रास्त्वाद्यकाण्डे द्वितीयादिप्रपाठकैः ।
[2]त्रिभिरुक्ता [3]ब्राह्मणं [4]च व्याख्यातं तत्र तैः सह ॥३॥
[5-] षट् स्युः प्रपाठकाः [6-] षष्ठे काण्डे [-6] प्रत्येकमेषु च [-5] ।
एकादशानुवाकाः स्युस्तदर्थान् वच्म्यनुक्रमात् ॥४॥

१. मै१ - 'षष्ठेन ---- दर्शयति' नास्ति । २. मै१ - दीक्षणीयाद्युदय° । ३. मै२ - 'सः' नास्ति । ४-४. मै. मै१. मै२. तं. तं१. अ - अत्यग्निष्टोमाप्तोर्यामान्ताः, अ१ - अग्निष्टोमान्ताः । ५. मै, मै१. मै२. तं. तं१. अ. अ१ - 'एव' नास्ति । ६. मै - द्विरात्रात् प्रभृ° ।

१. इ. वा. म. वै - उक्ता । २. अ. पा. हा. इ. वा. वै. - चितिरुक्ता । ३. भृ१ - ब्राह्मणे । ४. मै - 'च' नास्ति । ५-५. भृ१ - षट्सु प्रपाठकाण्डस्था प्रत्येकमेष एव च, मै - 'षट्स्युः ----- च' नास्ति । ६-६. इ. म. वै - षष्ठकाण्डे ।

प्राग्वंशं क्षुरकर्मादिसंस्कृतः प्रविशेदिति ।
आद्ये प्रोक्तं द्वितीये तु दीक्षाहुतय ईरिताः ॥५॥
कृष्णाजिनेन वस्त्रेण दीक्षां मेखलया तथा ।
कुर्यात् तृतीये तत् प्रोक्तं तथा कृष्णविषाणया ॥६॥
चतुर्थे दण्डमादाय मुष्टीकरणवाग्यमौ ।
कृत्वाऽसौ दीक्षितो भूत्वा नियमाननुतिष्ठति ॥७॥
पञ्चमे [७] प्रायणीया स्यात् [७] षष्ठे त्वरुणया क्रयः ।
सप्तमे तत्प्रकारः स्यादष्टमे पदसंग्रहः ॥८॥
सोमोन्मानं तु नवमे [८] दशमेऽन्यैश्च तत्क्रयः [८] ।
एकादशे क्रीतसोमं शकटेन नयेदिति ॥९॥
प्रपाठकेऽस्मिन् प्रथमेऽनुवाकार्थाः समीरिताः ।
प्रपाठके [९]द्वितीयेऽथानुवाकार्थान् क्रमाद् ब्रुवे ॥१०॥
आतिथ्येष्टिरिहाऽऽद्ये [१०] स्यात् तानूनप्त्रं द्वितीयके ।
तथाऽवान्तरदीक्षा च तृतीये तूपसद्भवेत् ॥११॥
वेदिरुक्ता चतुर्थेऽथ पञ्चमे व्रतनिर्णयः ।
षष्ठे काम्या यागभूमिः सप्तमे वेदिरुत्तरा ॥१२॥
व्याघारणं त्वष्टमे स्याद्धविर्धानमनन्तरे ।
दशमे तु सदः प्रोक्तं प्रोक्ता उपरवाः परे ॥१३॥
प्रपाठकेऽनुवाकार्था द्वितीयेऽस्मिन्नुदीरिताः [१०] ।
तृतीयस्याऽऽदिमे सर्वे धिष्णियाः स्युर्द्वितीयके ॥१४॥
अग्नीषोमप्रणयनं तृतीये यूपखण्डनम् ।
चतुर्थे स्थापयेद्यूपं वह्निं मथ्नाति पञ्चमे ॥१५॥
नियुनक्ति पशुं षष्ठे सामिधेन्यस्तु सप्तमे ।
आघारौ च प्रयाजाश्च ह्यष्टमे हिंसनं पशोः ॥१६॥

७-७. भृ१ - प्रायणीयाख्या, इ. वै - प्रायणी स्यात् । ८-८. म - दशमे तु क्रप्तैश्च तत् । ९. आ - द्वितीयेऽत्रानु°, इ. वै. म. क. अ. पा. हा - द्वितीयाद्यानु° । १०-१०. भृ१ - 'स्यात् - - - - नुदीरिताः' त्रुटितः ।

एकाहेष्वग्निष्टोमविधिः]

नवमे स्याद्वपाहोमोऽवदानानि त्वनन्तरे ।
एकादशे त्वनूयाजास्तृतीयोऽयं प्रपाठकः ॥१७॥
गुदयागश्चतुर्थाद्ये वसतीवर्य ईरिताः ।
द्वितीयेऽथ तृतीये सोमोपावहरणं श्रुतम् ॥१८॥
सोमोन्मानं चतुर्थे स्यात् पञ्चमादिषु सप्तसु ।
उपांशुप्रमुखा आग्रयणान्ता हि ग्रहाः [११]श्रुताः ॥१९॥
उपांशुरन्तर्यामश्च [१२]तृतीयस्त्वैन्द्रवायवः ।
मैत्रावरुणनामा स्यादाश्विनाख्यग्रहस्तथा ॥२०॥
शुक्रामन्थिग्रहावाग्रयणस्तुर्यः प्रपाठकः ।
उक्थ्यग्रहः [१३]पञ्चमाद्ये द्वितीये ध्रुव [१४]ईरितः ॥२१॥
[१५]ऋतुग्रहास्तृतीये स्युरैन्द्राग्नस्तु चतुर्थके ।
मरुत्वतीया माहेन्द्रश्चेत्येते पञ्चमे श्रुताः ॥२२॥
[१६]स्यादादित्यग्रहः षष्ठे सावित्रः सप्तमे तथा ।
[१७]वैश्वदेवोऽथाष्टमे हि श्रुतः [१८]पात्नीवतो [१९]ग्रहः ॥२३॥
हारियोजनसंज्ञस्तु नवमे ग्रह ईरितः ।
क्षये त्वाग्रयणादीनां दशमे स्यात् पुनर्ग्रहः ॥२४॥
[२०-] सवनीयपुरोडाशविधिरेकादशे स्थितः ।
प्रपाठके पञ्चमेऽनुवाकार्था एवमीरिताः[-२०] ॥२५॥
[२१]षष्ठाद्ये [२२]दाक्षिणो होमः[-२१] [२३]समिष्टयजुरुत्तरे ।
तृतीयेऽवभृथस्तुर्ये यूपैकादशिनी [२४]श्रुता ॥२६॥

---

११. वा - 'श्रुताः' नास्ति । १२. अ. आ. क. पा. हा. इ. वा. म. वै - °श्चैन्द्रवा° । १३. वै - पञ्चमाऽद्यो । १४. मै - ईरिताः । १५. मै - क्रतुग्रहाः । १६. मै - °ग्रहे । १७. शृ१ - वैश्वदेवावथ । १८. शृ१ - पत्नीवतो । १९. भृ१ - ग्रहम्, म - ग्रहाः । २०-२०. आ - स्तोमपात्रस्तुतिस्त्वन्त्ये पञ्चमोऽयं प्रपाठकः, अ. पा. मै. इ. वा - 'सोमपात्र - - - प्रपाठकः' नास्ति । २१-२१. अ. पा. मै. इ. वा. वै. - 'षष्ठाद्ये - - - - 'होमः' नास्ति । २२. आ. क. म. - दक्षिणाहोमः । २३. शृ१. मै - समिष्टियजु° । २४. अ. आ. क. पा. हा. इ. वा. म. वै - स्मृता ।

हरिः ॐ ॥ प्रजननं ज्योतिरग्निर्देवतानां

प्रजननमिति प्र-जननम् । ज्योतिः । अग्निः । देवतानाम् ।

तत्र त्रिवृदादिस्तोमभेदनिबन्धनत्वात् तेषाम् [७]अह्नामहीनानां च [८]विभागस्य, [९]तेषां स्वरूपमुत्पत्तिं चाभिधास्यन् [१०]तन्निमित्तं चास्य ज्योतिरिति संज्ञां निर्वक्ष्यन् प्रथममनयैव संज्ञया [११]इदमुपादाय विशिष्टफलसाधनत्वमस्य [१२]दर्शयति [-१] - [१३-]'प्रजननं ज्योतिः' इति [-१३] ॥ एषां च सर्वविकारार्थतां द्योतयितुं काण्डभेदः । अस्य च सर्वप्रकृतितां सूचयितुं काण्डभेदेन [१४]पृथक्कारः

[२५]पश्वैकादशिनी तूर्ध्वे षष्ठे पात्नीवतः पशुः ।
सौम्यश्चरुः सप्तमे [२६]स्यादतिग्राह्यास्तथाऽष्टमे ॥२७॥
अदाभ्यो नवमे तद्वदंशुस्तु दशमे श्रुतः ।
षोडश्येकादशे प्रोक्त एवं षष्ठ समापितः ॥२८॥
[२७-] इत्थं प्रपाठकैः षड्भिः सोमयागो निरूपितः[-२७] ।
एकाहाहीनसत्राणि सोमभेदा इमे [२८]त्रयः ॥२९॥
वर्ण्यन्ते सप्तमे काण्डे मन्त्रा येऽप्यश्वमेधगाः ।
ज्योतिष्टोमः सोमयागप्रकृतिः स तु सप्तधा ॥३०॥
अग्निष्टोमो [२९]ज्योतिर्भेदैर्मूलप्रकृतिरादिमः ।
स्तोमा ज्योतींषि यस्यासौ ज्योतिष्टोमः [३०]समीरितः ॥३१॥
त्रिवृत् पञ्चदशः सप्तदशः स्तोमास्त्रयो मताः ।
तथैकविंश एतानि ज्योतींषीत्यभ्यधाच्छ्रुतिः ॥३२॥
सोऽयमेतादृशो ज्योतिष्टोम आदौ विधीयते ॥

॥ इति भाष्यकारोपोद्घातः ॥

७. तं. तं१ - साह्नामही° । ८. मै२ - विहास्य । ९. तं. तं१. अ१ - सर्वेषाम् । १०. मै२ - तन्निमित्ता° । ११. मै२ - इममुपा° । १२. [तं१. अ१ इति पुस्तकयोरत्र 'दर्शयति' इत्यस्यानन्तरं 'षष्ठः काण्डः समाप्तः' इति पङ्क्तिरुपलभ्यते ।] । १३-१३. मै - 'प्रजनं ज्योतिः' इति । १४. मै१. अ१ - प्रकरः, मै२ - पृथक्कर्तारः ।

२५. शृ१ - पञ्चैका°, इ. वै - पश्वैका°, वा - पश्वेका ॥ २६. शृ१. म. मै - स्यु° । २७-२७. अ. आ. इ. क. पा. म. वा. वै - 'इत्थं - - - - - निरूपितः' नास्ति । २८. मै - क्रयः । २९. वै - ज्योतिर्भेदैः°, शृ१. म. मै - उक्थ्यादिभेदः मूल° । ३०. आ. इ. म. मै. वा. वै. - स ईरितः ।

ज्योतिर्विराट् छन्दसां ज्योतिर्विराड्वाचोऽग्नौ सं तिष्ठते

ज्योतिः । विराडिति वि-राट् । छन्दसाम् । ज्योतिः । विराडिति वि-राट् । वाचः । अग्नौ । समिति । तिष्ठते ।

कृतः । [15]तत्राद्यमनुवाकत्रयं सौम्यम् , [16-] शिष्टमपि सर्वं [-16] काण्डं वैश्वदेवम् । Vप्रजननं सर्वासां [17-] प्रजानां जन्महेतुः, वक्ष्यति च [-17] " अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " (तैसं ७.१.१) । Vज्योतिः अग्निष्टोमः । [18-] ज्योतिष्ट्वं चास्येदानीं प्रतिपादयति - ' अग्निः ' इति । [19]देवतानां मध्ये Vअग्निः Vज्योतिः द्योतमानो भवति, Vछन्दसां मध्ये Vविराट् दशाक्षरा Vज्योतिः विराजमाना भवति । भवतामग्निविराजौ ज्योतिषी, [20]किंनिमित्तमग्निष्टोमस्य ज्योतिष्ट्वमित्याह- ' विराड्वाचः ' इत्यादि ॥ Vवाचः स्तोमलक्षणायाः संबन्धिनि Vअग्नौ आग्नेये अग्निष्टोमाख्ये

प्रजननमिति ॥ तमेतं ज्योतिष्टोमं विधातुं दृष्टान्तत्रयेण ज्योतिष्ट्वं तावद्दर्शयति - ' प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट् छन्दसां ज्योतिर्विराड्वाचोऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात् तज्ज्योतिरुच्यते ' इति ॥ [31-] मनुष्याणां मध्ये [32]प्रजोत्पादकत्वं Vज्योतिः[-31] । अपत्यरहितास्तु म्लानमुखास्तमःसदृशा भवन्ति । Vदेवतानां मध्ये Vज्योतिः Vअग्निः । अन्यासां देवतानां गृहमध्ये यथा [33]दीपापेक्षा नैवमग्नेरन्यापेक्षाऽस्ति । Vछन्दसां मध्ये [34]विराट्छन्दो Vज्योतिः । दीप्तिवाचकेन राजतिधातुना व्यवह्रियमाणत्वात् । तदेतद् त्रिविधमपि लोकप्रसिद्धं ज्योतिः [35]सोमयागे संपादयितुं शक्यते । प्रजोत्पत्तिसाधनरूपत्वं तावद्वक्ष्यते - " अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " (तैसं ७.१.१) इति । अग्निरूपत्वं विराड्रूपत्वं चात्रैव [36]संपाद्यते । या Vवाचः Vविराट् तदुपलक्षिता दशसंख्या " दशाक्षरा विराट् " (तैसं २.६.१) इति श्रुतेः, सेयं संख्या अग्नौ समाप्यते । तथा हि प्रातःसवने [37-] बहिष्पवमानाख्यस्य स्तोत्रस्य [-37] [38]त्रिवृत्स्तोमः । तत्र त्रिषु सूक्तेष्वेकैकस्मिंस्तिस्र ऋच इत्येवं नव स्तोत्रियाः । तथा तस्मिन्नेव सवने

१५. अ१ - अत्राद्य° । १६-१६. मै१ - शिष्टं सर्वमपि । १७-१७. मै२ - प्रजननं जननहेतुं वा तज्ज्योतिः च । १८. अ१- ज्योतिष्टोमानिष्ट्वा, मै२ - ज्योतिष्टोमम् । १९. मै. मै१. मै३. तं. तं१. अ. अ१ - देवानाम् । २०. मै२- किमेतावताऽग्निष्टो° ।

३१-३१. शृ१. हा - ' मनुष्याणां - - - - ज्योतिः' नास्ति । ३२. अ. आ - प्रजोत्पादनम् , इ. क. पा. वा. वै - प्रजोत्पादनत्वम् । ३३. अ. इ. पा. वै. हा - यदा । ३४. शृ१ - विराट्छन्दसाम् । ३५. इ. वै - सोमयागः, वा - सोमयागम् । ३६. शृ१ - संपद्यते । ३७ -३७. अ. आ. क. पा. हा. इ. वा. मै. वै - °तस्मात्स्तोत्रस्य । ३८. म - त्रिवृत्स्तोमः ।

विराजमभि सं पद्यते तस्मात् तज्ज्योतिरुच्यते

विराजमिति वि-राजम् । अभि । समिति । पद्यते । तस्मात् । तत् । ज्योतिः । उच्यते ।

[२१-] यज्ञायज्ञीये सामनि [-२१] संस्थिते [V]विराट् संतिष्ठते विराट्संख्या पूर्यते [२२-] " वाचोऽग्नौ संतिष्ठते " इति तलवकारब्राह्मणम् [-२२] । तां च [V]विराजं [२३]संपद्यमानाम् [V]अभि [२४]अयमग्निष्टोमोऽपि [V]संपद्यते । " अभिरभागे " (पा १.४.९१) इति [२५-]अभेः लक्षणे [-२५] कर्मप्रवचनीयत्वम् । यस्मादयं [२६]ज्योतिर्द्वयसंपत्त्यधीनोऽस्यात्मलाभः [२७]तस्मात् सोऽग्निष्टोमो [V]ज्योतिः [V]उच्यते । [२८]तत्र [२९-] बहिष्पवमाने [३०]नव [३१-] स्तोत्रिया त्रिवृद्बहिष्पवमान इति । पञ्चदशान्याज्यानि, तत्र षष्टिः स्तोत्रियाः[-२९] । पञ्चदशो माध्यन्दिनः[-३१] पवमान इति पञ्चदश स्तोत्रियाः ।

[३९] चतुर्ष्वाज्यस्तोत्रेषु पञ्चदशस्तोमे सति षष्टिः स्तोत्रीयाः संपद्यन्ते । तथा माध्यदिनसवने [४०-] माध्यन्दिनपवमानाख्यस्य स्तोत्रस्य [-४०] पञ्चदशस्तोमे सति पञ्चदश स्तोत्रीयाः संपद्यन्ते । तथा [४१]अस्मिन्नेव सवने चतुर्षु पृष्ठस्तोत्रेषु सप्तदशस्तोमे सत्यष्टषष्टिः स्तोत्रीयाः संपद्यन्ते । तथा तृतीयसवन आर्भवपवमानाख्यस्य स्तोत्रस्य सप्तदश स्तोमे सति सप्तदश स्तोत्रीयाः संपद्यन्ते । यद्यपि माध्यन्दिनपवमानार्भवपवमानयोः [४३]सूक्तभेदादृचोऽत्यन्तं बहवः सन्ति तथाऽपि [४४]स्तोत्रगतस्तोमप्रयुक्त्या [४५]गणनेयमित्यविरोधः । तथा तस्मिन्नेव सवने [४६]यज्ञायज्ञियस्तोत्रस्यैकविंशस्तोमे सत्येकविंशतिसंख्याका स्तोत्रीयाः संपद्यन्ते । तदेवं प्रातःसवन एकोनसप्ततिर्माध्यन्दिनसवने त्र्यशीतिस्तृतीयसवनेऽष्टात्रिंशदिति मिलित्वा नवत्यधिकाः शतसंख्याकाः स्तोत्रीया भवन्ति । ताश्च [४७-] दश दश मिलिताः [-४७] सत्य [४८]एकोनविंशतिविराड्रूपाः संपद्यन्ते । सेयं

२१-२१. अ. अ१ - ' यज्ञायज्ञीये सामनि ' नास्ति । २२. मै२ - ' वाचोऽग्नौ - - - - ब्राह्मणम् ' नास्ति । २३. मै१ - संपद्यमानामनु अभ्ययमग्नि° । २४. मै. मै२. मै३. अ. अ१ - ' अयम् ' नास्ति । २५-२५. मै१ - लक्षणाभे, मै२ - लक्षणे अभेः । २६. मै१ - ज्योतिर्यत्संपत्य° । २७. मै२ - अस्मात्सोऽग्नि° । २८. मै१ - अत्र । २९-२९. मै२ - बहिष्पवमाने नवभिः स्तोत्रियाः त्रिः अभि बहिष्पवमानमन्याज्यानि षष्टिस्तोत्रीयाः । ३०. मै२ - च । ३१-३१. अ. अ१ - ' स्तोत्रिया - - - - माध्यन्दिनः ' नास्ति ।

३९. वा - चतुर्थाज्य° । ४०-४०. अ. आ. इ. क. पा. म. वा. वै. हा - °नाख्यस्तोत्रस्य । ४१. शृ१. इ. वा. म. मै. वै - तस्मिन् । ४२. वै - संपद्यन्ते पद्यन्ते । ४३. इ. वै - °भेदादचो°, वा - °भेदादयो° । ४४. शृ१ - स्तोत्रगते स्तोम° । ४५. मै - गणे नेयमि° । ४६. शृ१ - यज्ञायज्ञियस्य स्तोत्रस्य । ४७-४७. आ. क - दशभिर्विभक्ताः, अ. पा. हा. इ. वा. म. वै - दश मिलिताः । ४८. शृ१. मै - एकादशविरा° ।

**द्वौ स्तोमौ प्रातःसवनं वहतो यथा प्राणश्चापानश्च
द्वौ माध्यंदिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च**

द्वौ । स्तोमौ । प्रातःसवनमिति प्रातः-सवनम् । वहतः । यथा । प्राण इति प्र-अनः । च । अपान इत्यप अनः । च । द्वौ । माध्यन्दिनम् । सवनम् । यथा । चक्षुः । च । श्रोत्रम् । च ।

सप्तदशानि पृष्ठानि, तत्र अष्टषष्टिः स्तोत्रियाः । सप्तदश [32]आर्भवः पवमान इति सप्तदश स्तोत्रियाः । एकविंशमग्निष्टोमसामेति [33-] एकविंशतिः स्तोत्रियाः[-33] । एवमग्निष्टोमस्य [34]द्वादशस्तोत्रस्य [35]नवतिशतं स्तोत्रिया भवन्ति । [36-] ताश्च दशभिर्ह्रियमाणाः[-36] शुद्धं भागं प्रयच्छन्तीति विराट्संपत्तिः [37-] संयुज्यत इति [-37], [38]नैवमुक्थ्यादीनां दशके संपूर्णे समाप्तिरिति ।

अथ के पुनस्ते स्तोमाः, को वा यज्ञस्य तदुपकारः, इत्याह - [39-]'द्वौ' इत्यादि [-39] ॥ त्रिवृत्पञ्चदशौ Vप्रातःसवनं धारयतः, यथा प्राणापानौ [40]पुरुषं धारयतः । जन्मकाल एव [41]च संयुज्येते [42]इति पूर्वभावित्वमेतयोः । Vद्वौ [43-V]माध्यंदिनं [44-] सवनं वहतः[-44], पञ्चदशसप्तदशौ

संपद्यमाना [49-] स्तोत्रीयाख्यायाः वाचः संबंधिनी विराडुपलक्षिता [-49] दशसंख्याऽग्नौ समाप्यते । अन्तिमस्य यज्ञायज्ञियस्तोत्रस्याऽऽग्नेयत्वात् अग्निर्हि तत्र प्रतिपाद्यते । "यज्ञायज्ञा वो अग्नयः" (ऋ ६.४८.१) इत्याम्नानात् । अतोऽग्निरूपत्वं विराड्रूपत्वं च सोमयागस्य सिद्धम् । यस्मादयं सोमयागो विराड्रूपमभिसंपद्यते तस्माद्विराड्रूपत्वात् प्रजोत्पत्तिहेतुत्वाच्च [50]सोमयागस्वरूपं ज्योतिरित्युच्यते ॥

द्वाविति ॥ तदेवं विधेयस्य सोमयागस्य संबन्धिनि ज्योतिष्टोमनाम्नि ज्योतिरित्ययमंशः प्रतिपादितः । अथावशिष्टमंशं प्रतिपादयति - 'द्वौ स्तोमौ प्रातः सवनं वहतो यथा प्राणश्चापानश्च द्वौ माध्यन्दिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक् च प्रतिष्ठा च पुरुषसंमितो वा एष यज्ञोऽस्थूरिः" इति ।

---

३२. मै१ - आवहः । ३३-३३. मै१ - °विंशस्तोत्रीयाः । ३४. तं. तं१. अ१. मै१ - °स्तोत्रस्य पराक्त्ववृत्तिभेदेन । ३५. मै२ - भवतिशतम् । ३६-३६. मै१ - ताश्चतुर्दशभि° । ३७-३७. मै. मै२. मै३. अ. अ१ - 'संयुज्यत इति' नास्ति । ३८. तं. तं१. मै१ - मैवयुक्थ्या° । ३९-३९. मै२ - 'द्वौ इत्यादि' नास्ति । ४०. मै२ - 'पुरुषम्' नास्ति । ४१. मै. मै१. मै२. तं. तं१. अ. अ१ - अनेन । ४२. मै१ - 'इति' नास्ति । ४३-४३. मै१ - माध्यन्दिनं सवनं धारयतः वहतः पञ्चदशसप्तदशौ च यथा । ४४. मै. मै१. अ१ - 'सवनं वहतः' नास्ति ।

४९-४९. अ. आ. इ. क. पा. म. वा. वै. हा - स्तोत्रियाख्या वाचः संबन्धिनी विराडुपलक्षिता । ५०. शृ१. मै - तत्सोमयाग° ।

द्वौ तृतीयसवनं यथा वाक् चं प्रतिष्ठा च

द्वौ । तृतीयसवनमितिं तृतीय-सवनम् । यथां । वाक् । च । प्रतिष्ठेतिं प्रति-स्था । च ।

---

[४५]Vवहतः [४६]इत्येव । Vयथा [-४३] [४७-]Vचक्षुः Vच Vश्रोत्रं Vच [-४७] पुरुषं वहतः । जननोत्तरकालं [४८]हि विषयग्रहणमेतयोर्भवतीति [४९]मध्यभावित्वमेतयोः । [५०-]Vद्वौ Vतृतीयसवनं वहतः सप्तदशैकविंशौ, Vयथा Vवाक् Vच Vप्रतिष्ठा Vच आदौ पुरुषं वहतः । वाक्प्रतिष्ठयोः स्वकार्यकरणसामर्थ्यें कतिपयदिवसव्यपगतौ भवत इति चरमभावित्वमेतयोः[-५०] यथा [५१]प्राणादिवृत्तित्वेऽविशिष्टेऽपि [५२]विशिष्टोपकारजनकतया [५३]प्राणापानादिषट्कं भिद्यते एवं [५४]सवनभेदेनोपकारविशेषजनकतया पञ्चदशसप्तदशयोरावृत्त्याऽवस्थानात् षट्त्वोपपत्तिः स्तोमानाम् । यस्मादेवं तस्मात् Vएषः Vयज्ञः [५५]Vपुरुषसंमितः [५६-] पुरुषेण तुल्यः[-५६] । उपमानपूर्वपदप्रकृतिस्वरत्वम् , " तृतीया कर्मणि " (पा ६.२.४८) इति वा । [५७]Vअस्थूरिः

तत्र त्रिवृत्स्तोमो [५१-] बहिष्पवमानाख्यं स्तोमं [-५१] वहति निष्पादयति । पञ्चदशस्तोमश्चत्वार्याज्यस्तोत्राणि वहति । एवं Vद्वौ Vस्तोमौ Vप्रातःसवनं निर्वहतः । Vयथा लोके पुरुषस्य प्राणापानौ जीवनं निर्वहतस्तद्वत् । [५२]तथा पञ्चदशस्तोमो माध्यन्दिनं पवमानस्तोत्रं वहति । सप्तदशस्तोमश्चत्वारि पृष्ठस्तोत्राणि वहति । [५३]एवं द्वौ स्तोमौ माध्यंन्दिनसवनं बहतः । यथा पुरुषस्य चक्षुःश्रोत्रे रूपदर्शनशब्दश्रवणव्यवहारं वहतस्तद्वत् । [५४]तथा सप्तदशस्तोम आर्भवपवमानं वहति । [५५]एकविंशस्तोमो यज्ञायज्ञियस्तोत्रं वहति । एवं द्वौ स्तौमौ तृतीयसवनं वहतः । यथा पुरुषस्य वागिन्द्रियं [५६]पदिन्द्रियं चाभिवदनगमनव्यवहारं वहतस्तद्वत् । [५७-]प्रतितिष्ठन्ति मार्गे [५८]यया [-५७] पदिन्द्रियप्रवृत्त्या सेयं Vप्रतिष्ठा । तदेवं स्तोमैर्निष्पन्नोऽयं सोमयागः पुरुषसदृशो न तु स्थूरिः ।

---

४५. मै२ - भवतः । ४६. मै१. अ१ - पञ्चदशसप्तदशौ । ४७. मै१ - चक्षुश्रोत्रं च । ४८. मै. मै२. मै३. अ. अ१. तं. तं१ - ' हि ' नास्ति । ४९. मै२ - अमध्यभावित्व° । ५०-५०. मै१. अ१ - ' द्वौ - - - - मेतयोः ' नास्ति । ५१. मै१ - ब्राह्मणावृत्तित्वे, मै२ - प्राणावृत्तित्वे । ५२. मै२ - °कारजनककाया । ५३ अ१. मै१ - प्राणादिषट्कम् । ५४. अ१ - सवनं भेदेन । ५५. मै१. अ१- संमित इति । ५६. मै२. अ१ - पुरुषतुल्यः । ५७. मै१ - असूरिः ।

५१-५१. म. मै. वा. -बहिष्पवमानाख्यस्तोत्रम् । ५२. शृ१ - यथा, अ. आ. इ. क. पा. म. वा. वै. हा - ततः । ५३. वा- एव, शृ१ - ' एवम् ' नास्ति । ५४. अ. आ. इ. क. पा. हा. वै. वा - ' तथा ' नास्ति । ५५. मै - एकशः स्तोमः । ५६. शृ१ - पदेन्द्रियम् । ५७ - ५७. म - प्रतितिष्ठतीति यथा मार्गे । ५८. इ. मै. वा. वै - यथा । ५९. मै - अन्यूनः, म - ' न्यूनः ' नास्ति ।

एकाहेष्वग्निष्टोमविधिः]

पुरुषसंमितो वा एष यज्ञोऽस्थूरि(१)र्यं कामं कामयते तमेतेनाभ्यश्नुते सर्वं॒ ह्यस्थूरिणाऽभ्यश्नुतेऽग्निष्टोमेन

पुरुषसंमित इति पुरुष-संमितः । वै । एषः । यज्ञः । अस्थूरिः (१) । यम् । कामम् । कामयते । तम् । एतेन । अभीति । अश्नुते । सर्वम् । हि । अस्थूरिणा । अभ्यश्नुत इत्यभि-अश्नुते । अग्निष्टोमेनेत्यग्नि-स्तोमेन ।

[५८]अग्निष्टोमः । [५९-] यथा शाखान्तरे [-५९] इयमग्निष्टोमस्याख्या । सर्वं [६०]^V^हि स्वर्गादिफलम् अस्थूरिणाग्निष्टोमेन ^V^अभ्यश्नुते न प्रजापतिमेव । [६१]अस्थूरित्वं चास्य ' द्वौ स्तोमौ प्रातःसवनम् ' इत्यादिना प्रतिपादितम् । तथा [६२-] हि स्थूरिः [-६२] पृष्ठवाही स चतुर्भिः [६३]पादैः युज्यमानः [६४]स्वकार्यवहनं करोति यथा गवादिः । अयं तु [६५]प्रतिसवनं द्वाभ्यां युज्यमानः स्वकार्यं करोति, यथा [६६]शिरोवाही पुरुषः । तस्मादेष पुरुषसंमितः इति । " हि च " (पा ८.१.३४) इति निघाताभावः, " तिङि चोदात्तवति " (पा ८.१.७१) इति गतेरनुदात्तत्वं, समासश्च ॥

केनाप्यङ्गेन [५९]न्यूनः स्थूरिरित्युच्यते, ★ न त्वयं न्यूनः प्राणापानादिकृत्स्नपुरुषावयवसाम्यस्य प्रतिपादितत्त्वात् । एवं स्तोमरूपत्वे सिद्धे सति ज्योतीरूपाः स्तोमा अत्रेति व्युत्पत्त्या ज्योतिष्टोम इत्युच्यते ★ । एतदेवाभिप्रेत्यान्यत्राम्नातम् -" तदाहुः । कतमानि तानि ज्योतीꣳषि । य एतस्य स्तोमा इति । त्रिवृत् पञ्चदशः सप्तदश एकविꣳशः । एतानि वाव तानि ज्योतीꣳषि । य एतस्य स्तोमाः" (तैब्रा १.५.११) इति । स्तोमानां च स्वरूपविशेषः प्रथमकाण्डे राजसूयप्रकरणे "समिधमातिष्ठ" (तैसं १.८.१२) इत्यनुवाके [६०]सामब्राह्मणोदाहरणेन [६१]विस्पष्टं प्रतिपादितः ॥

यमिति ॥ तदेवं [६२-] विधेयस्य सोमयागस्य संबन्धिनी [-६२] [६३]ज्योतिष्टोमनामावयवव्युत्पादनमुखेन विधेयार्थप्रशंसा संपादिता । इदानीं तद्विधिमुन्नयति - ' यं कामं कामयते तमेतेनाभ्यश्नुते सर्वꣳ ह्यस्थूरिणाऽभ्यश्नुते '

५८. अ१ - अग्निष्टोमे । ५९-५९. मै. मै२. मै३. अ. अ१- शाखान्तरीयपाठे च । ६०. मै. मै२. मै३. अ१ - ' हि ' नास्ति । ६१. मै१ - असूरित्वम् । ६२-६२. मै. मै१. मै२. अ१ - अस्थूरिः । ६३. मै२ - ' पादैः ' नास्ति । ६४. मै१ - स्वकार्यदवहनम् । ६५. मै१ - प्रतिस्वनम् । ६६. मै२ - शिरोही ।

★-★ शृ१ - न त्वयं - - - - इत्युच्यते ' नास्ति । ६०. शृ१. अ. पा. हा. इ. वा. वै. सोमब्राह्मणे, मै - सोमप्रह्वदाहरणेन(?) । ६१. अ. आ. क. पा. हा. इ. वा. मै. म - विस्पष्टः । ६२-६२. अ. आ. क. पा. हा. इ. वा. वै. मै - ' विधेयस्य - - - - संबंधिनी ' नास्ति । ६३. अ. आ. क. पा. हा. इ. वा. वै - ज्योतिष्टोमनामव्युत्पादन°, मै - ज्योतिष्टोमावुत्पादन° ।

[एकाहेष्वग्निष्टोमविधिः

वै प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात् तासां परिगृहीतानामश्वतरोऽत्यप्रवत तस्यानुहाय रेत आऽदत्त

वै । प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । ताः । अग्निष्टोमेनेत्यग्नि-स्तोमेन । एव । परीति । अगृह्णात् । तासाम् । परिगृहीतानामिति परि-गृहीतानाम् । अश्वतरः । अतीति । अप्रवत । तस्य । अनुहायेत्यनु-हाय । रेतः । एति । अदत्त ।

[६७-] अथ यदुक्तं [-६७] 'प्रजननं ज्योतिः' इति, तत्समर्थयते - 'अग्निष्टोमेन' [६८]इत्यादिना ।। [६९]अप्रजाताः [V]प्रजाः[७०]अजनयत् , प्रजाताश्च [V]पर्यगृह्णात् , विधेयीकृतवान् । अग्नेः स्तोमो यज्ञायज्ञीयः, तदन्तः क्रतुरग्निष्टोमः " अग्नेः स्तुत्स्तोमसोमाः " (पा ८.३.८२) इति षत्वम् । [V]तासां [V]परिगृहीतानां प्रजानां मध्ये [V]अश्वतरः [V]अत्यप्रवत परिग्रहमतीत्यागच्छत् । " ज्युङ् प्रुङ् प्लुङ् गतौ " (धापा ९८१,९८२,९८३) । अश्वायां गर्दभेनोत्पन्नः अश्वतरः । " वत्सोक्षाश्व° " (पा ५.३.९१) इत्यादिना ष्टरच् । [V]तस्य [V]अनुहाय अनुगम्य [V]रेतः [V]आऽदत्त [७१]गृहीतवान् । " ओहाङ् गतौ " (धापा १११४) । [V]तत् रेतः [V]गर्दभे [V]न्यमार्ट् निमृष्टवान् । मृजेर्लङि तिपि " मृजेर्वृद्धिः " (पा ७.२.११४) इति वृद्धिः , व्रश्चादिना (पा ८.२.३६)

इति ।। [V]एतेन ज्योतिष्टोमेन सर्वकामानां(णां) प्राप्तुं शक्यत्वादिमं ज्योतिष्टोमं कुर्यादित्यभिप्रायः । [६४]यस्माल्लोकेऽपि [V]अस्थूरिणा सर्वावयवसंपूर्णेन साधनेन तत्फलं [V]सर्वम् अप्यश्नुते । तस्मादत्रापि स्तोमसंपूर्णेन [६५]यागेन सर्वकामप्राप्तिर्युक्ता ।।

अग्निष्टोमेनेति ।। इत्थं ज्योतिष्टोमं सर्वसोमयागप्रकृतिभूतं विधाय तदीयासु सप्तसंस्थासु मध्ये प्रथमसंस्थारूपमग्निष्टोमं विधातुं प्रस्तौति - 'अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात् तासां परिगृहीतानामश्वतरोऽत्यप्रवत तस्यानुहाय रेत आऽऽदत्त तद्गर्दभे न्यमार्ट् तस्माद्गर्दभो द्विरेता अथो आहुर्वडवायां न्यमार्डिति तस्माद्वडबा द्विरेता अथो आहुरोषधीषु न्यमार्डिति तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्माद्यमौ जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्बर्हिष्यनवक्लृप्तः सर्ववेदसे वा सहस्रे वाऽवक्लृप्तोऽति ह्यप्रवत' इति ।। पुरा सिसृक्षुः [V]प्रजापतिः [V]अग्निष्टोमेन साधनेन [V]प्रजाः

६७-६७. मै२ - अयुक्तम् । ६८. अ१. मै१ - इत्यादि । ६९. मै२ - अप्रजाताः । ७०. अ१ - अजनयत् । ७१. मै१ - अगृहीतवान् ।

---

६४. मै - यस्मिंल्लोके° । ६५. आ-अनेन, अ. क. पा. हा. इ. वा. वै - 'यागेन' नास्ति ।

तद्गर्दभे न्यमार्ट् तस्माद्गर्दभो द्विरेता अथो आहुर्वडवायां न्यमार्डिति तस्माद्वडवा द्विरेता अथो आहुरोषधीषु (२) न्यमार्डिति

तत् । गर्दभे । नीति । अमार्ट् । तस्मात् । गर्दभः । द्विरेता इति-द्वि-रेताः । अथो इति । आहुः । वडबायाम् । नीति । अमार्ट् । इति । तस्मात् । वडबा । द्विरेता इति द्वि-रेताः । अथो इति । आहुः । ओषधीषु (२) । नीति । अमार्ट् । इति ।

षत्वम् , तिपो हल्ङ्यादिलोपे कृते (पा ६.१.६८) " रात्सस्य " (पा ८.२.२४) इति नियमात् [७२]अन्त्यस्य न संयोगान्तलोपः[७२] । तस्मात् Vगर्दभः Vद्विरेताः [७३] द्वयोर्गर्दभ्या वडवायाश्च प्रजायते इति कृत्वा द्विशक्तिकं रेतोऽस्येति द्विरेताः । " परादिश्छन्दसि " (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् । Vअथो अन्ये Vवडवायाम् अश्वायां Vन्यमार्ट् Vइति Vआहुः । Vतस्मात् Vवडवा Vद्विरेताः द्वाभ्यामश्वगर्दभाभ्यां प्रजायते इति कृत्वा द्वे रेतसी [७४]अस्यां निषिच्येते इति द्विरेताः[७३] । Vअथो अन्ये Vओषधीषु Vन्यमार्ट् Vइति Vआहुः । "ओषधेश्च विभक्तावप्रथमायाम्" (पा ६.३.१३२) इति [७५]दीर्घत्वम् । Vतस्मात् Vओषधयः Vअनभ्यक्ताः [७६]अकृतमैथुनाः Vरेभन्ति [७७]जगति । [७८] प्रथने रेभशब्दः[७८] । [७९]अथापरे [८०]Vप्रजासु Vन्यमार्ट् Vइति Vआहुः । Vतस्मात्

सृष्ट्वा तेन Vएव स्वाधीनतया परिगृहीतवान् । तासां Vपरिगृहीतानां [६६]प्रजानां मध्ये [६७]योऽयं गर्दभाश्वाभ्यामुत्पादितः संकीर्णजातिः Vअश्वतरः सोऽयं [६८]प्रजापतिपरिग्रहमुल्लङ्घ्यात्यन्तदूरं गतः । स च [६९]प्रजापतिः Vतस्य अश्व[७०][तर]स्य पृष्ठतो गत्वा तदीयं शरीरगतं सारभूतं Vरेतः आदाय गर्दभशरीरे Vन्यमार्ट् नितरां मृष्टवान् । अत एव [७१]लोके गर्दभः द्विविधरेतोयुक्तः । गर्दभजातेरश्वतरजातेश्चोत्पादनेन द्विविधत्त्वम् । अपि [७२]चान्ये केचिदभिज्ञा एवम् Vआहुः - Vवडबायाम् अश्वयोषिति नितरां मृष्टवानिति ।

७२-७२. मै२ - संयोगान्तलोपाभावः । ७३-७३. मै२ - °द्वयोर्गर्दभ्या - - - - द्विरेताः ' नास्ति । ७४. मै - अस्मात् [स्मिन्], [सर्वेषु लिखितपुस्तकेषु ' अस्मात् ' इति पाठ उपलभ्यते पाठोऽयमस्माभिः शुद्धीकृतो द्रष्टव्यः ।] ७५. मै. मै१. मै२. अ. अ१ - दीर्घः । ७६. अ१ - अरेतसो मैथुनाः । ७७. अ१ - गच्छन्ति, मै१ - जगन्ति । ७८-७८. अ१ - प्रथमं रिभशब्दे, मै१ - प्रथमप्रशब्दे । ७९. अ१. मै१ - अथोऽन्ये, तं. तं१ - अथान्ये । ८०. तं. तं१ - ओषधीषु ।

---

६६. पा - ' प्रजानाम् ' नास्ति । ६७. अ. आ. क. पा. हा. इ. वा. वै. म - ' योऽयम् ' नास्ति । ६८. शृ१ - प्रजापतिः परिग्रह° । ६९-६९. इ - सन् । ७०. [भट्टभास्करभाष्यमनुरुन्ध्य प्रपूरितोऽस्माभिर्द्रष्टव्यः ।] ७१. अ. आ. क. पा. हा. इ. वा. वै - ' लोके ' नास्ति । ७२. वा - वान्ये ।

तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्माद्यमौ जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि

तस्मात् । ओषधयः । अनभ्यक्ता इत्यनभि-अक्ताः । रेभन्ति । अथो इति । आहुः । प्रजास्विति प्र-जासु । नीति । अमार्ट् । इति । तस्मात् । यमौ । जायेते इति । तस्मात् । अश्वतरः । न । प्रेति । जायते । आत्तरेता इत्यात्त-रेताः । हि ।

[V]यमौ प्रजासु प्रजायेते, रेतोद्वयस्य विद्यमानत्वात् । [८१-] [V]तस्मात् [V]अश्वतरः [V]न [V]प्रजायते [V]तस्मात् [V]आत्तरेता [V]हि यस्मादनुहाय [-८१] रेत आदत्ते इति [८२]प्रकृतेनान्वीयते । तदेवाह - 'आत्तरेता हि' इति । [८३-] हेतौ हि [-८३]- शब्दः । [V]तस्मात् [८४]एव [V]बर्हिषि यज्ञे अश्वतरः [V]अनवक्लृप्तः दक्षिणादौ योग्यतां न भजते, [८५]आत्तरेतस्त्वेन असारत्वात् ॥

'सर्ववेदसे' इत्यादि ॥ सर्वाणि वेदांसि अस्मिन् देयानीति सर्ववेदसं सर्वस्वदानम् । " अनसन्तात्° " (पा ५.४.१०३) इत्यच् समासान्तः । यद्वा सर्वधनवत् [V]सर्ववेदसम्, अर्श [८६]आदिना (पा ५.२.१२७) अच् समासान्तः । सहस्रदक्षिणत्वात् सहस्रमित्युपचारः तत्रावक्लृप्तः देय एव । " गतिरनन्तरः " (पा ६.२.४९) इति गतेः प्रकृतिस्वरत्वम् । हेतुमाह- 'अति ह्यप्रवत' इति । [८७]" हि च " (पा ८.१.३४) इति निघातप्रतिषेधः । अयं च बर्हिष्यनवक्लृप्तत्वे

[V]तस्मात् इयं [V]वडबा रेतोद्वययुक्ता । साऽप्यश्वजातिमश्वतरजातिं चोत्पादयति । अपि चान्ये अभिज्ञा एवम् [V]आहुः - [V]ओषधीषु नितरां मृष्टवानिति । अत एव [V]ओषधयः मनुष्याणामिव घृततैलाभ्यङ्गाभावेऽपि साराधिक्येन वर्धन्ते स्निग्धवद्दृश्यन्ते इत्यर्थः । अपि चान्ये अभिज्ञा एवम् [V]आहुः - [V]प्रजासु [७३]मनुष्यादिजातिषु नितरां मृष्टवानिति । अत एव क्वचिदेकस्मिन् गर्भे शरीरद्वयमुत्पद्यते । यस्मादयम् [V]अश्वतरः प्रजापत्यपहृतरेतस्कः

८१-८१. मै. मै२. मै३ - तस्मादश्वतरो न प्रजायते इति यस्मात्तस्मादनुहाय, तं. तं१. मै१ - तस्मादात्तरेता हि यस्मात् । ८२. मै२ - प्रकृतेनाधीयते । ८३-८३. अ१ - 'हेतौ हि' नास्ति । ८४. मै१ - एवम् । ८५. मै२ - आत्तत्वेन । ८६. अ. मै१. मै२ - आदित्वादच् । ८७. मै१ - 'हि' नास्ति । ८८-८८. मै२ - उत्तरत्र च देयत्वे ।

---

७३. अ. आ - मनुष्यजा° ।

तस्माद्बर्हिष्यनवक्लृप्तः सर्ववेदसे वा सहस्रे वाऽवक्लृप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते

तस्मात् । बर्हिषि । अनवक्लृप्त इत्यनव-क्लृप्तः । सर्ववेदस इति सर्व-वेदसे । वा । सहस्रे । वा । अवक्लृप्त इत्यव-क्लृप्तः । अतीति । हि । अप्रवत । यः । एवम् । विद्वान् । अग्निष्टोमेनेत्यग्नि-स्तोमेन । यजते ।

[८८-] इतरत्र प्रदेयत्वे [-८८] हेतुः । अग्निष्टोमदक्षिणाभूतगवादिसकाशात् निष्क्रान्तत्वात् तत्र तावत् [V]अनवक्लृप्तः, [८९-] सोऽयं 'गौश्चाश्वतरश्च' इति [-८९] प्रकृतावाम्नानात् इह च प्रतिषिद्धत्वात् [९०]साप्तदश्यवत् [९१]विकृत्यर्थो भवति । [९२-] तदिदमुक्तम् - [V]अति [V]हि [V]अप्रवत इति । प्राकृतीर्दक्षिणा अतीत्य गतोऽयम् इदानीं [९३-] विकृत्यर्थोऽपि यदि [-९३] न स्यात् आम्नानवैयर्थ्यं स्यात् [-९२] । प्रासङ्गिकोऽयमश्वतरस्य क्षेपः ॥

[९४-] 'य एवम्' इत्यादि [-९४] ॥ [९५]तस्मात् 'अग्निष्टोमेन यजेत' इति विधिरनुमीयते । "चादिलोपे विभाषा" (पा ८.१.६३) इति प्रथमा तिङ्विभक्तिर्न [९६]निहन्यते । 'तस्मादाहुः'

[V]तस्मात् नपुंसकवदयं प्रजामुत्पादयितुमसमर्थः । यस्माच्चायं निःसारः [V]तस्मात् एव यज्ञेऽप्ययोग्यः । यस्तु यज्ञविशेषः [७४]सर्वस्वदक्षिणाकः सहस्रदक्षिणाको वा तत्रायं [७५]दानयोग्यः । ★ रेतोराहित्येऽप्यतिलङ्घ्य गन्तुं समर्थत्वादतिलङ्घितप्राकृतदक्षिणाके यज्ञे योग्यो भवति ★। [७६-] "अश्वतरं [७७]साहस्रे सर्ववेदसे च ददाति" (आपश्रौ १२.५.३) इति [-७६] सूत्रकारवचनात् ॥

य इति ॥ इदानीं विधत्ते - 'य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परिप्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत' इति ॥ अग्निष्टोमयाजी पूर्वमनुत्पन्नाः [V]प्रजाः उत्पादयितुमुत्पन्नाश्च स्वाधीनत्वेन परिग्रहीतुं समर्थो भवति । [७८]यस्मात् सर्वेषां देवानां मध्ये [V]ज्येष्ठः

८९-८९. मै२ - प्रकृतः । ९०. मै२ - साप्तदश्यः । ९१. तं. तं१. मै१ - प्रकृतमर्थः । ९२-९२. मै२ - 'तदिदं - - - - स्यात्' नास्ति । ९३-९३. मै१ - विकृत्यर्थो विपदि । ९४-९४. मै२ - 'य - - - - इत्यादि' नास्ति । ९५. मै२ - इयत्येव । ९६. मै१. अ१ - निहन्यते जनयति ।

---

७४. वा - सर्वदक्षि° । ७५. अ. आ. क. पा. हा. वा. वै - नियमेन दान° । ★-★ [प्रजापतिपरिग्रहमुल्लङ्घ्य यदा सोऽत्यन्तदूरं गतः, तदा स रेतोरहितो नासीत्, अतः कथमिदं वाक्यं घटते ?] । ७६-७६. म. मै. इ - 'अश्वतरं - - - - इति' नास्ति । ७७. मै - सहस्रे । ७८. भृ१ - तस्मात् ।

प्राजाताः प्रजा जनयति परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति (३) प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत

प्रेति । अजाताः । प्रजा इति प्र-जाः । जनयति । परीति । प्रजाता इति प्र-जाताः । गृह्णाति । तस्मात् । आहुः । ज्येष्ठयज्ञ इति ज्येष्ठ-यज्ञः । इति (३) । प्रजापतिरिति प्रजा-पतिः । वाव । ज्येष्ठः । सः । हि । एतेन । अग्रे । अयजत ।

इति । यस्मादेवं प्रजासृष्ट्यर्थं प्रजापतिरनेन [९७]अयजत [९८]तस्मादिममग्निष्टोमं [९९]ज्येष्ठयज्ञमाहुः [१००-] ज्येष्ठस्य प्रशस्तस्य प्रजापतेः यज्ञ इति कृत्वा । तदेवाह - 'प्रजापतिर्वाव' इत्यादि [-१००] । 'अग्रे' इतीदानीमधिकं स्यात्, तस्मादन्यथा व्याख्यायते - ज्येष्ठः प्रथमः, ज्येष्ठश्चासौ यज्ञश्चेति [१०१]Vज्येष्ठयज्ञः । प्राथम्ये हेतुमाह - यस्मात् [१०२-]Vप्रजापतिः एव Vअग्रे Vअयजत प्रथममयजत प्रथममनेनेष्ट्वा [-१०२] [१०३]ततोऽन्यैः क्रतुभिः अयष्ट तस्मात् अयं प्रथमो [१०४-] यज्ञानामासीदिति [-१०४], यथोक्तम् - " एष वाव प्रथमो यज्ञो यज्ञानां [१०५]यदग्निष्टोमः " (द्र.तांब्रा १६.१.२) इति । [१०६]इदामिदानीं किमर्थं 'प्रजापतिर्वाव ज्येष्ठ' इति । [१०७-] नानेन ज्येष्ठपदं व्याख्यायते, अपि तर्हि [-१०७] ? वृद्धतमत्वं प्रजापतेरुच्यते यथाऽनेन कृतं तथाऽन्यैः कर्तव्यमिति प्रतिपादनार्थम् । तस्मादनेनानिष्ट्वा अन्येन विकारेण न यजेतेति । " हि च " (पा ८.१.३४) इति निघाताभावः ॥

Vप्रजापतिः सृष्टिसाधनत्वेन Vअग्रे Vएतेन Vअयजत, Vतस्मात् ज्येष्ठेनेष्टत्वात् प्रथममिष्टत्वाच्चायमग्निष्टोमः Vज्येष्ठयज्ञः सर्वेषामुक्थ्यादीनां मूलप्रकृतिभूत इत्यर्थः । अग्निविषयेण " यज्ञायज्ञा वो अग्नये " (साम ७०३) इति मन्त्रेण संपाद्यमानो योऽयमेकविंशः स्तोमस्तेन समाप्यमानत्वादयमग्निष्टोम इत्युच्यते ॥

प्रजापतिरिति ॥ [७९]एतस्य च [८०]प्रजोत्पादनसाधनत्वं यत् पूर्वमुक्तम् - " अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " (तैसं ७.१.१) इति, तदिदं मुखादिस्थानचतुष्टयेन प्रपञ्चयितुं मुखजन्यां [८१]सृष्टिं दर्शयति -

९७. मै१ - अयजदिति । ९८. मै१ - तस्मादिदम् । ९९. तं. तं१. अ१. मै१ - ज्येष्ठमाहुः । १००-१००. [अ१. मै१ - इति संज्ञयोर्लिखितपुस्तकयोः 'ज्येष्ठस्य' इत्यारभ्य 'इत्यादि' इत्यन्तः पङ्क्तिद्वयोरंशः व्युत्क्रमेण लिखितो दृश्यते ।] १०१. अ१. मै१ - ज्येष्ठयज्ञ इति । १०२-१०२. मै. मै१. मै२. अ१ - प्रजापतिरनेनाग्रे प्रथममयजत । १०३. मै. मै१. मै२. अ. अ१. तं. तं१ - ततोऽन्यः । १०४-१०४. मै१ - °यज्ञो नामासीति । १०५. मै. मै२. मै३. अ - 'यदग्निष्टोमः' नास्ति । १०६. मै१. अ१ - इदानीम् । १०७-१०७. मै२ - 'नानेन - - - - तर्हि' नास्ति ।

७९. अ. आ. क. पा. हा. इ. वा. वै. म - तस्य । ८०. वै - प्रयाजोत्पा° । ८१. मै - दृष्टिम् ।

प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथन्तरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात् ते मुख्या मुखतो

प्रजापतिरिति प्रजा-पतिः । अकामयत । प्रेति । जायेय । इति । सः । मुखतः । त्रिवृतमिति त्रि-वृतम् । निरिति । अमिमीत । तम् । अग्निः । देवता । अन्विति । असृज्यत । गायत्री । छन्दः । रथंतरमिति रथं-तरम् । साम । ब्राह्मणः । मनुष्याणाम् । अजः । पशूनाम् । तस्मात् । ते । मुख्याः । मुखतः ।

'प्रजापतिरकामयत [108]प्र जायेय' इत्यादि ॥ स्तोमानामुत्पत्तिरिहोच्यते । प्रासङ्गिकम् [109]अग्न्यादीनाम् । Vत्रिवृतं नवस्तोत्रीयं स्तोमं [110]Vमुखतः [111]Vनिरमिमीत । " अपादाने चाहीयरुहोः " (पा ५.४.४५) इति तसिः । त्र्यवयवास्तिस्रो वृत्तयोऽस्येति त्रिवृत् , त्रिचक्रादित्त्वादुत्तरपदान्तोदात्तत्वम् (गणपाठ २२९, पा ६.२.१९९) । Vतम् Vअनु तेन [112]सहाऽग्न्यादयोऽन्वसृज्यन्त । [113]तत्र तृतीयार्थे अनोः कर्मप्रवचनीयत्वम् । Vमुख्याः प्रधाना इत्यर्थः । तमेव हेतुमाह - [114]' मुखतः ' इति । मुखे [115]भवत्वान्मुखस्य च प्रधानत्वात् ।

'प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथन्तरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात् ते मुख्या मुखतो ह्यसृज्यन्त ' इति ॥ सिसृक्षुः Vप्रजापतिः तत्साधनत्वेनाग्निष्टोममनुष्ठाय तत्सामर्थ्येन सत्यसंकल्पः सन् स्वकीयात् मुखात् त्रिवृदादय [82]उत्पद्यन्तामिति संकल्प्य [83]तथैव [84]निर्मितवान् । आदौ त्रिवृत्स्तोमः [85]सृष्टः । Vतम् अनु देवतानां मध्ये Vअग्निः । तमप्यनु छन्दसां मध्ये Vगायत्री सृष्टा । तामप्यनु साम्नां मध्ये Vरथन्तरं सृष्टम् । तदप्यनु Vमनुष्याणां मध्ये Vब्राह्मणः सृष्टः । तमप्यनु Vपशूनां मध्ये Vअजः सृष्टः । यस्मादेते Vमुखतः सृष्टाः Vतस्मात् Vमुख्याः वक्ष्यमाणेभ्यः श्रेष्ठाः ॥

१०८. मै. मै२. मै३. अ. अ१. तं. तं१ - 'प्र जायेय' नास्ति । १०९. मै२ - इत्यादिना । ११०. मै२ - मुख्ये । १११. मै१ - निरमीत । ११२. अ१ - °दशोसृज्यन्त । ११३. मै. मै२. मै३. अ - 'तत्र' नास्ति । ११४. मै२ - मुखे भवाः । ११५. मै. मै१. मै२. तं. तं१. अ - °त्वोन्मुख्यस्य ।

८२. अ. क. पा. हा. इ. वा. वै - उत्पाद्यन्ताम् । ८३. शृ१. मै - न यथैव । ८४. अ. आ. क. पा. हा. इ. वा. वै - निर्मितः सन् । ८५. शृ१ - सृष्ट्वा ।

**ह्यसृ॑ज्य॒न्तोर॑सो बा॒हुभ्यां॑ पञ्च॒द॒शं निर॑मिमीत॒ तमिन्द्रो॑ दे॒वताऽन्व॑सृज्यत त्रि॒ष्टुप्
छन्दो॑ बृ॒हत् (४) साम॑ राज॒न्यो॑ मनु॒ष्या॑णा॒मवि॑ः पशू॒नां
तस्मा॒त् ते वी॒र्या॑वन्तो वी॒र्या॑द्ध्यसृ॒ज्यन्त**

हि । असृ॑ज्यन्त । उर॑सः । बा॒हुभ्या॒मिति॑ बा॒हु-भ्या॒म् । प॒ञ्च॒द॒शमिति॑ पञ्च-द॒शम् । निरिति॑ । अ॒मि॒मी॒त । तम् । इन्द्र॑ः । दे॒वता॑ । अन्विति॑ । अ॒सृ॒ज्य॒त । त्रि॒ष्टुप् । छन्द॑ः । बृ॒हत् (४) । साम॑ । रा॒ज॒न्य॑ः । म॒नु॒ष्या॑णाम् । अवि॑ः । प॒शू॒नाम् । तस्मा॑त् । ते । वी॒र्या॑वन्त॒ इति॑ वी॒र्य॑-व॒न्तः । वी॒र्या॑त् । हि । असृ॑ज्यन्त ।

दिगादित्वाद्यत् (गपा१११) । यतो हि [११६]यत् [११७]निर्मीयते [११८]तत्र भवति तत् । न हि निष्क्रमणमात्रं निर्माणम् इति । [११९]पूर्ववन्निघाताभावः (पा ८.१.३४) ॥

‘ उरसः’ इत्यादि ॥ [१२०]Vउरसः बाहुभ्यां [१२१-] पञ्चदशं पञ्चदशस्तोत्रीयं निरमिमीत [-१२१] । “ स्तोमे डविधिः पञ्चदशाद्यर्थे ” (पा ५.१.५८ वा ८) इति डः । [१२२]ततः तु इन्द्रादयः Vअसृज्यन्त [१२३]Vवीर्यावन्तः । “ अन्येषामपि [१२४]दृश्यते ” (पा ६.३.१३७) इति [१२५]दीर्घत्वम् । तमेव हेतुमाह - ‘ वीर्यात् ’ इति । वीर्यवतः स्थानादित्यर्थः । [१२६]वीर्यवत्त्वातिशयप्रतिपादनार्थम् ताच्छब्द्यम् । [१२७]लुप्तमत्त्वर्थीयो वा ॥

उरस इति ॥ अथ द्वितीयस्थानादुत्पत्तिं दर्शयति - [८६-] ‘ उरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप्छन्दो बृहत्साम राजन्यो मनुष्याणामविः पशूनां तस्मात् ते वीर्यावन्तो वीर्याद्ध्यसृज्यन्त ’ इति ॥ पूर्ववद्व्याख्येयम् । वीर्ययुक्ताद्बाहुदेशादुत्पन्नत्वात् तेषामपि सामर्थ्याधिक्यम् ॥

मध्यत इति ॥ अथ तृतीयस्थानादुत्पत्तिं दर्शयति -[८६] ‘ मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपं साम वैश्यो मनुष्याणां गावः पशूनां तस्मात् त आद्या

---

११६. मै१ - यम् , मै२ - यन्ति । ११७. मै२ - अमीयते । ११८. मै. मै२. अ - ‘ तत्र ’ नास्ति । ११९. मै१ - °निखाताभावः । १२०. मै२ - उरसश्च । १२१-१२१. मै१. तं. तं१. अ१ - पञ्चदशं निरमिमीत पञ्चदशस्तोत्रीयं निर्मितवान् (अ१ - निर्ममीतवान्) । १२२. मै२ - तम् । १२३. अ१ - आद्या विर्यवन्तः । १२४. मै. मै२. मै३. तं. तं१. अ - ‘ दृश्यते ’ नास्ति । १२५. मै१ - दीर्घः । १२६. मै. मै२. मै३ - °शयप्रदर्शनार्थम् , मै१ - प्रदानार्थम् ॥ १२७. मै२- मत्त्वर्थीयः ।

८६-८६. शृ१ - ‘ उरसो - - - - दर्शयति ’ नास्ति ।

मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपꣳ साम वैश्यो मनुष्याणां गावः पशूनां तस्मात् त आद्या अन्नधानाद्ध्यसृज्यन्त तस्माद्भूयाꣳसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त

मध्यतः । सप्तदशमिति सप्त-दशम् । निरिति । अमिमीत । तम् । विश्वे । देवाः । देवताः । अन्विति । असृज्यन्त । जगती । छन्दः । वैरूपम् । साम । वैश्यः । मनुष्याणाम् । गावः । पशूनाम् । तस्मात् । ते । आद्याः । अन्नधानादित्यन्न-धानात् । हि । असृज्यन्त । तस्मात् । भूयाꣳसः । अन्येभ्यः । भूयिष्ठाः । हि । देवताः । अन्विति । असृज्यन्त ।

'मध्यतः' इत्यादि ॥ [128]Vमध्यतः उदरात् [129]सप्तदशस्तोत्रं Vनिरमिमीत । Vतम् अनु विश्वेदेवादयः [130]Vअन्वसृज्यन्त । Vआद्याः उपजीव्याः, कृष्यादीनां क्षीरादीनां च तदधीनत्वात् । [131]तमेव हेतुमाह - 'अन्नधानात्' [132]इत्यादि । अन्नानि [133]आशितानि धीयन्ते अस्मिन्नित्यन्नधानमुदरम् । [134-] अधिकरणे ल्युट् [-134] । Vतस्मात् Vभूयाꣳसः बहुतराः [135]अन्येभ्यः उत्पन्नेभ्यः । तमेव हेतुमाह - यस्मात् भूयिष्ठाभिः [136]बहुतमाभिः देवताभिः विश्वेदेवाख्याभिः सह Vअसृज्यन्त जगत्यादयः Vतस्मात् भूयांसोऽन्येभ्यः, अन्ये त्वेकैकामनूत्पन्ना इति नातिभूयांसः ॥

अन्नधानादध्यसृज्यन्त तस्माद्भूयांसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त' इति ॥ Vमध्यतः [87]उदरप्रदेशात् । यस्मादन्नाधारादुदरादसृज्यन्त तस्मात् Vआद्याः भोग्याः । वैश्या वाणिज्येन धनसंपादकत्वाद्भोग्याः । Vगावः च [88]क्षीरादिसंपादनेन भोग्याः । [89]यस्मादतिबहून् विश्वान् [90]देवानन्वेते वैश्याः सृष्टास्तस्माद्वाणिज्यकर्तारो लोके भूयांसः ॥

---

१२८. अ१. मै१ - 'मध्यतः' नास्ति । १२९. अ१ - °शस्तोत्रीयम्, मै१ - °शस्तोत्रीया । १३०. मै१ - असृज्यन्त । १३१. मै१ - अयं च यानात् । १३२. अ१. मै२ - इति । १३३. मै. मै१. मै२. मै३. अ - अशनानि । १३४-१३४. मै. मै२. मै३. अ - 'अधिकरणे ल्युट्' नास्ति । १३५. मै२ - अन्नेभ्यः । १३६. मै१ - बहुतराभिः ।

---

८७. अ - उरदेशप्र°, मै - उदरप्रवेशात् । ८८. अ. आ. क. पा. हा. इ. वा. वै. म. मै - संपादनेन । ८९. शृ१ - तस्मात् । ९०. म - देवानन्विति, वै - देवान् यजेत ।

[एकाहेष्वग्निष्टोमविधिः

पत्त एकविꣳशं निरमिमीत तमनुष्टुप् छन्दो (५)ऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ भूतसंक्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो

पत्तः । एकविꣳशमित्येक-विꣳशम् । निरिति । अमिमीत । तम् । अनुष्टुबित्यनु-स्तुप् । छन्दः (५) । अन्विति । असृज्यत । वैराजम् । साम । शूद्रः । मनुष्याणाम् । अश्वः । पशूनाम् । तस्मात् । तौ । भूतसंक्रामिणाविति भूत-संक्रामिणौ । अश्वः । च । शूद्रः । च । तस्मात् । शूद्रः ।

‘पत्तः इत्यादि ॥’ Vपत्तः पद्भ्याम् [१३७]Vएकविंशम् एकविंशस्तोत्रीयं Vनिरमिमीत । “पद्दन्°” (पा ६.१.६३) [१३८]इत्यादिना पद्भावः । तमनुष्टुबादयः [१३९]Vअन्वसृज्यन्त । Vतौ [१४०-] Vभूतसंक्रामिणौ विदितावेतावनन्तरोक्तावश्वशूद्रौ [-१४०] भूतानां [१४१]संक्रामयितारौ [१४२]वोढृत्वेन [१४३]देशात् देशान्तरं [१४४]प्रापयतः [१४५]कृष्यादिव्यापारद्वारा इत्यर्थः । वक्ष्यमाणः ‘पत्तो ह्यसृज्येताम्’ इति हेतुः अत्रापि द्रष्टव्यः । Vतस्मात् एव Vशूद्रः Vयज्ञे सर्वात्मना अनवक्लृप्तः । हेतुं चाह - ‘न हि’ इति । [१४६-] Vन Vहि अत्र शूद्रो देवताभिः सह Vअन्वसृज्यत [-१४६] । [१४७]एकविंशसृष्ट्यादौ [१४८]देवतासृष्ट्यभावात् । नन्वश्वस्यापि

पत्त इति ॥ अथ चतुर्थस्थानादुत्पत्तिं दर्शयति - ‘पत्त एकविꣳशं निरमिमीत तमनुष्टुप्छन्दोऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ भूतसंक्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येताम्’ इति ॥ Vपत्तः पादतः । [९१]भूतानां पूर्वोत्पन्नानां ब्राह्मणादीनां संक्रामः सम्यगाक्रमणं [९२]तदधीनत्वेनावस्थानमित्यर्थः । सोऽयं [९३]भूतसंक्रामो ययोरश्वशूद्रयोः[-९३] Vतौ उभौ Vभूतसंक्रामिणौ । शूद्राणां वर्णत्रयपरिचर्यामुख्यत्वेन तदधीनत्वम् । [९४]अश्वानां

१३७. मै. मै२. मै३. तं. तं१. अ. अ१ - ‘एकविंशम्’ नास्ति । १३८. मै२ - इति । १३९. अ१ - अन्वसृज्यन्तादयः तस्मात् भूयांसः । १४०-१४०. अ१ - °क्रमिणाविति तावेतावनन्तरोक्तौ अवश्वदौ । १४१. मै१. तं. तं१. अ१ - संक्रमितारौ । १४२. मै२ - वोढृत्वेन । १४३. मै२ - ‘देशात्’ नास्ति । १४४. मै१ - प्राप इति, तं. तं१. अ१ - प्रापयतः इति । १४५. मै२ - कृष्यव्यापारावित्यर्थः । १४६-१४६. मै१ - देवता हि सहानासृज्यन्त, अ१ - शूद्रो देवताभिः सहासृज्यत । १४७. मै२ - एकसृष्टौ । १४८. मै२ - देवताशक्त्यभावात् ।

९१. शृ१ - तास्माम् । ९२. वै. मै - तदधीनत्वम्, वा - तदधीनत्वे । ९३-९३. मै. शृ१ - भूतसंक्रामरूपयोरश्व° । ९४. अ. क. पा. हा. इ. वा. वै - अश्वादीनाम् ।

एकाहेष्वग्निष्टोमविधिः]

यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका

यज्ञे । अनवक्लृप्त इत्यनव-क्लृप्तः । न । हि । देवताः । अन्विति । असृज्यत । तस्मात् । पादौ । उपेति । जीवतः । पत्तः । हि । असृज्येताम् । प्राणा इति प्र-अनाः । वै । त्रिवृदिति त्रि-वृत् । अर्धमासा इत्यर्ध-मासाः । पञ्चदश इति पञ्च-दशः । प्रजापतिरिति प्रजा-पतिः । सप्तदश इति सप्त-दशः । त्रयः । इमे । लोकाः ।

समानमेतत् । सत्यम् । तस्य स्वयमेव [१४९]सर्वदेवताधारत्वात् न देवताभिः सह सृष्ट्यभावो [१५०-] यागायोग्यतामस्यावहतीति नूनं मन्यते [-१५०] । यथोक्तम् - " तस्मादश्वे सर्वा देवता अन्वायत्ताः " (तैब्रा ३.८.७) इति । तस्मात् पादावुपजीवत इति । [१५१]स्वप्रयासाधीनजीवना इत्यर्थः । कस्मादित्याह- ' पत्तो हि ' इति ॥

' प्राणा वै ' इत्यादि ॥ स्तोमानां स्तुतिः । [१५२]नवत्वान्वयात्त्रिवृदादीनां प्राणादित्वेन स्तुतिः " नव वै पुरुषे प्राणाः " (तैसं ६.१.१) इति । [१५३][V]अर्धमासाः पञ्चदशदिवसाः [१५४-][V]पञ्चदशः । [V]प्रजापतिः[-१५४] [१५५]सप्तदशाक्षरात्मा [१५६]छन्दस्यः । यथा - " यो वै सप्तदशम् "

च वहनेन तदधीनत्वम् । अत्र पूर्वस्थानेभ्य [९५]इव पादतः [V]न [९६]काऽपि [V]देवता [V]सृष्टा [V]तस्मात् [९७]देवतामनु [९८]सृज्यत्वाभावात् [V]शूद्रः [V]यज्ञे प्रवर्तितुं न योग्यः । यस्मादश्वशूद्रौ पादत उत्पन्नौ [V]तस्मात् [V]पादौ एव तयोर्जीवनसाधनम् । शूद्रो हि ब्राह्मणाद्याज्ञया पद्भ्यां यत्र क्वापि गमनागमने कुर्वञ्जीवति । अश्वश्च [९९]ब्राह्मणादिवाहिपादैर्यत्र क्वापि [-९९] गच्छन् [१००]खाद्यं लभते ॥

प्राणा इति ॥ एवं सृष्टिसाधनमग्निष्टोमं प्रशंसितुं सृष्टिं प्रपञ्च्य तत्र प्रकृतोपयुक्तान् स्तोमान् विशेषतः प्रशंसति - ' प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका असावादित्य

१४९. अ१. मै१ - देवतासारत्वात् । १५०-१५०. मै१ - °वहीति नमनं मन्यते । १५१. मै१. अ१ - °धीनजीवितापि । १५२. मै१ - नवत्वाद्यन्वयात् । १५३. मै२ - 'अर्धमासः' नास्ति । १५४-१५४. मै२ - 'पञ्चदशः प्रजापतिः' नास्ति । १५५. मै. मै३. अ - सप्तदशात्मा, [' यो वै सप्तदशम् ' (तैसं १.६.१२) इत्यनुवाके सप्तदशाक्षरसमूहात्मा प्रजापतिः सप्तदशः ' इत्येव भट्टभास्करमिश्रैर्व्याख्यातम् ।] १५६. मै२ - छन्दस्यः प्रजापतिः ।

९५. शृ१ - एव । ९६. अ. आ. क. पा. हा. इ. वा. वै. शृ१. म - काचित् । ९७. म - देवतानामनु । ९८. शृ१ - सृज्यत्वात् । ९९-९९. म - °णादि यत्रापि । १००. पा - 'खाद्यम्' नास्ति ।

असावा॑दि॒त्य ए॑कवि॒ꣳश ए॒तस्मि॒न् वा ए॒ते श्रि॒ता ए॒तस्मि॒न् प्रति॑ष्ठिता॒ (६) य

अ॒सौ । आ॒दि॒त्यः । ए॒क॒वि॒ꣳश इत्ये॑क-वि॒ꣳशः । ए॒तस्मि॑न् । वै । ए॒ते । श्रि॒ताः । ए॒तस्मि॑न् । प्रति॑ष्ठिता॒ इति॒ प्रति॑-स्थि॒ताः (६) । यः ।

(तैसं १.६.११) इत्यादि । यद्वा - प्रजोत्पत्तिहेतुत्वात् सप्तदशस्य प्रजापतित्वेन स्तुतिः । सप्तदशेन प्रजापतिना त्रिभिश्च लोकैः [१५७]संमितः । Vआदित्यः एकविंशत्यन्वयात् Vएकविंशः स्तोमः ॥ 'एतस्मिन्' इत्यादि ॥ एवमनेन प्रकारेण Vएतस्मिन् [१५८]एतत्स्तोमचतुष्टयवत्यग्निष्टोमे

एकविꣳश एतस्मिन् वा एते श्रिता एतस्मिन् प्रतिष्ठिता य एवं वेदैतस्मिन्नेव श्रयत एतस्मिन् प्रति तिष्ठति' इति ॥ बहिष्पवमानस्तोत्रे [१०१]सूक्तानां त्रित्त्वात् [१०२- एकैकस्मिन् सूक्ते [१०३]ऋचां त्रित्वाच्च -१०२] तदीयस्य स्तोमस्य [१०४]त्रिवृत्त्वम् । प्राणापानव्यानानां चोर्ध्वाधोमध्यवर्तिनां त्रित्त्वात् तत्साम्यम् । अर्धमासगतानां रात्रीणां [१०५]संख्यया पञ्चदशस्तोमसाम्यम् । प्रजापतिरूपाणामाश्रावयेत्यादीनामक्षराणां [१०६]संख्यया सप्तदशस्तोमसाम्यम् । आदित्यस्य संख्यया एकविंशस्तोमसाम्यं [१०७]वक्तुं " त्रय इमे लोकाः " इत्यनेन ब्राह्मणान्तरं प्रत्यभिज्ञाप्यते । तच्च [१०८]ब्राह्मणान्तरमेवमाम्नातम् - " द्वादश मासाः पञ्चर्तवः त्रय इमे लोका असावादित्य एकविꣳशः" इति । Vएतस्मिन् एकविंशस्तोमे पूर्वोक्तास्त्रिवृदादय आश्रिताः ।

---

१५७. तं. तं१. अ१. मै१ - सहितः । १५८. मै२ - °चतुष्टयवन्त्यग्नि° ।

---

१०१. शृ१ - सूक्तर्चान् । १०२-१०२. शृ१ - 'एकैकस्मिन् - - - - त्रित्वाच्च' नास्ति । १०३. अ. आ. क. पा. हा. इ. वा. वै. म - भक्तीनाम् । १०४. शृ१ - त्रित्त्वम्, म - तृत्वम्, मै - त्रिवृत्तम् । १०५. वा - संख्यायाः, शृ१. मै - संख्यायाम् । १०६. वा. शृ१ - संख्यायाः । १०७. शृ१ - 'वक्तुम्' नास्ति । १०८. मै - °माम्नातं यत् ।

एकाहेष्वग्निष्टोमविधिः]

एवं वेदैतस्मिन्नेव श्रयत एतस्मिन् प्रति तिष्ठति ॥१॥

(अस्थूरिरोषधीषु ज्येष्ठयज्ञ इति बृहदनुष्टुप्छन्दः प्रतिष्ठिता नव च ।)

एवम् । वेद । एतस्मिन् । एव । श्रयते । एतस्मिन् । प्रतीति । तिष्ठति ॥१॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[१५९][V]एते प्राणादयः आदित्यपर्यन्ताः [१६०][V]श्रिताः, [१६१-][V]एतस्मिन् [V]एव [V]प्रतिष्ठिताः[-१६१] अत्रैव नियतं वर्तन्ते, न कदाचिदिमं त्यजन्ति । [V]एवं [१६२]वेदिता [V]एतस्मिन् अग्निष्टोमे श्रितः प्रतिष्ठितश्च भवति एतदनुष्ठानशीलो भवति ॥

॥ [१६३-] इति सप्तमे प्रथमे प्रथमोनुवाकः [-१६३] ॥

अधिकसंख्यायामल्पसंख्यान्तर्भावात् । किञ्च [V]एतस्मिन् [V]एव [V]स्तोमाः [V]प्रतिष्ठिताः सम्प्राप्ताः । नह्येकविंशादूर्ध्वमग्निष्टोमे कश्चिदधिकः स्तोमो विद्यते । [V]यः एवम् [V]एतस्य महिमानं [V]वेद सः [V]एतस्मिन् आश्रितः प्रतिष्ठितो भवति । [१०९]अग्निष्टोममनुष्ठातुं फलं प्राप्तुं च योग्यो भवतीत्यर्थः ॥

[११०]इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः[-११०] ॥

१५९. मै१. अ१ - 'एते' नास्ति, मै२ - इव । १६०. मै१. तं. तं१. अ१ - अवस्थिताः । १६१-१६१. मै१. अ१ - 'एतस्मिन्नेव प्रतिष्ठिताः' नास्ति । १६२. मै२ - विहिता । १६३-१६३. अ१ - सप्तमे प्रथमोऽनुवाकः, मै१ - इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये सप्तमकाण्डे प्रथमप्रश्ने प्रथमोऽनुवाकः ।

१०९. म - °मनुष्ठाय । ११०-११०. वै - इति प्रथमोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः ।

[स्तोमानां संभूयकारित्वम्

प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय

प्रातःसवन इति प्रातः-सवने । वै । गायत्रेण । छन्दसा । त्रिवृत इति त्रि-वृते । स्तोमाय । ज्योतिः । दधत् । एति । त्रिवृतेति त्रि-वृता । ब्रह्मवर्चसेनेति ब्रह्म-वर्चसेन । पञ्चदशायेति पञ्च-दशाय । ज्योतिः । दधत् । एति । पञ्चदशेनेति पञ्च-दशेन । ओजसा । वीर्येण । सप्तदशायेति सप्त-दशाय ।

इदानीं पुरुषमिव प्राणाः त्रिवृदादयो यज्ञाङ्गसाहित्येन भवन्तीति प्रतिपादयितुमाह - 'प्रातःसवने' इत्यादि ॥ अयं यज्ञः [V]प्रातःसवने [V]गायत्रेण [V]छन्दसा त्रिवृत्संबन्धिना [1][V]ज्योतिः दीप्तिं [V]दधत् [V]त्रिवृते [V]स्तोमाय [2][V]एति [3]गच्छति त्रिवृत्सकाशं गच्छति गायत्रत्वात् प्रातःसवनस्य । गायत्र्येव गायत्रम् । " छन्दसः प्रत्ययविधाने *नपुंसकात् स्वार्थ उपसंख्यानम् " (पा ४.२.५५ वा १) [4]इत्यण् । छन्दोग्रहणं [5]सामनिवृत्त्यर्थम् । " क्रियाग्रहणं कर्तव्यम् " (द्र. महाभा १.४.३२) इति कर्मणः संप्रदानत्वम् । यावत्त्रिवृद्गायत्र्यन्वयाज्ज्योतिष्मान् भवति यज्ञः ततः [V]त्रिवृता [6]ब्रह्मवर्चसनिमित्तेन

प्रथमेऽनुवाके सोमयागानामाद्यो ज्योतिष्टोमस्तदीयसप्तसंस्थानामाद्य-संस्थारूपोऽग्निष्टोमश्चेत्युभयं [1]विवक्षितम् ॥

प्रातःसवन इति ॥ [2]अथ तत्र स्तोमानां मुख्यत्वं दर्शयितुं [3]द्वितीयेऽनुवाके स्तोमानां संभूयकारित्वं तावदादौ दर्शयति - 'प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकवि९ंशाय ज्योतिर्दधदेति स्तोम एव तत् स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति ' इति ॥ आदौ [4]प्रजापतिरग्निष्टोममनुतिष्ठन् प्रातःसवनकाले " उपास्मै गायतां

---

१. मै. - निवृत् । २. मै. मै२. मै३. अ. अ१ - 'एति ' नास्ति । ३. मै१ - 'गच्छति ' नास्ति । *[वार्त्तिकपाठमनुरुन्ध्य संशोधितोऽयं पाठः, मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ' नपुंसके ' इत्युपलभ्यते ।] । ४. मै१ - इत्यव् । ५. मै२ - साम्नि वृत्यर्थम् । ६. मै१ - ब्रह्मवर्चसेन निमित्तेन मत् ।

---

१. अ. आ. क. पा. हा. इ. वा. वै. मै - विहितम् । २. शृ१ - ' अथ ' नास्ति । ३. अ. आ. क. पा. हा. इ. वा. वै - द्वितीयेऽनु° । ४. अ - °ममनुष्ठितवान् ।

स्तोमानां संभूयकारित्वम्]

ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकवि॰शाय ज्योतिर्दधदेति स्तोम एव तत् स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति

ज्योतिः । दधत् । एति । सप्तदशेनेति सप्त-दशेन । प्राजापत्येनेति प्राजा-पत्येन । प्रजननेनेति प्र-जननेन । एकवि॰शायेत्येक-वि॰शाय । ज्योतिः । दधत् । एति । स्तोमः । एव । तत् । स्तोमाय । ज्योतिः । दधत् । एति । अथो इति । स्तोमे । एव । स्तोमम् । अभि । प्रेति । नयति ।

Vज्योतिः Vदधत् Vपञ्चदशाय स्तोमाय [7]Vएति । [8]ततो ओजोवीर्यहेतुना Vपञ्चदशेन Vज्योतिः Vदधत् Vसप्तदशाय [9]Vएति । ततः [10]प्रजननहेतुना Vप्राजापत्येन Vसप्तदशेन Vज्योतिः Vदधत् Vएकविंशाय [11]Vएति । तस्मात् Vस्तोमः Vएव भूत्वा Vज्योतिः Vदधत् अयं यज्ञः Vस्तोमाय उत्तरस्मै Vएति । Vअथो अपि च अयमेव यज्ञः Vस्तोमे पञ्चदशाधिके [12]स्तोमं त्रिवृदादिकम् [12] अभि प्रणयति आभिमुख्येन नयति अतः स्तोमाधीनमस्य सर्वफलसाधनत्वमिति ॥

नरः" (ऋ. ९.११.१) ★इत्येतन्मन्त्रगतेन Vगायत्रेण Vछन्दसा युक्तस्तावता परितोषम् [5]अप्राप्य त्रिवृत्स्तोमसिद्ध्यर्थं Vज्योतिः Vदधत् [6]तद्विषयप्रकाशिकां मनोवृत्तिं [7]धारयन् Vएति [7] प्रवर्तते त्रिवृत्सोम इत्थं प्रयोक्तव्य इति विचारयन् [8]एव आस्त इत्यर्थः । स च स्तोमो ब्रह्मवर्चसप्रदत्वात् तद्रूपः । तेन ब्रह्मवर्चसरूपेण त्रिवृत्सोमेन तुष्टोऽप्यपरितुष्टः पञ्चदशस्तोमाय मनोवृत्तिं धारयन्नास्ते । स च पञ्चदशः शारीरबलस्येन्द्रियसामर्थ्यस्य च हेतुत्वात् तदुभयात्मकः । [9]तेनापि युक्तः पुनः सप्तदशस्तोमानुष्ठानाय मनोवृत्तिं धारयन् प्रवर्तते । स च स्तोमः [10]संख्ययाऽऽश्रावयेत्याद्यक्षरसाम्यात् [11]तदक्षरात्मकप्रजापतिसंबन्धि(न्धी) प्रजोत्पत्तिहेतुश्च । तादृशेन स्तोमेन युक्तोऽपि

---

७. मै१ - इति । ८. मै. मै१. मै३. अ. अ१ - 'ततः' नास्ति । ९. मै१. अ१. तं. तं१ - गच्छति । १०. मै१. अ१ - प्रजाहेतुना । ११. मै१ - इति । १२-१२. मै१ - स्तोत्रत्रिवृदादि° ।

★ [आनन्दाश्रममुद्रितावृत्तौ संसूचितः पाठः ।] लिखितपुस्तकेषु च - इत्येवास्मिन् मन्त्र° । ५. अ. वा. मै - प्राप्य, इ. वै - आप्यम् । ६. अ. आ. क. पा. हा. इ. वा. मै. म - °षयप्रसारिकाम् । ७-७. इ. वा - धारयेन्नेति । ८. शृ१ - 'एव' नास्ति । ९. मै - केनापि । १०. वा - संख्यायाः आश्रा° । ११. शृ१ - अक्षरात्मक° ।

[स्तोमानां संभूयकारित्वम्

यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोका(१)-
स्तावन्ति ज्योती१ँष्येतावंत

यावन्तः । वै । स्तोमाः । तावन्तः । कामाः । तावन्तः । लोकाः (१) ।
तावन्ति । ज्योती१ँषि । एतावंतः ।

तदेवाह - 'यावन्तः' इत्यादि ॥ [१३-]Vयावन्तः यावत्परिमाणाः[-१३] Vस्तोमाः Vतावन्ति [१४]कामलोकज्योतींषि तत्रैव समाप्तानि । [१५-]Vकामाः धनपुत्रादयः[-१५] । Vलोकाः स्वर्गादयः । Vज्योतींषि तेजांसि ब्रह्मवर्चसादीनि । 'एतावतः' इत्यादि । [१६]एतावत्परिमाणान्यभितःस्तोमादिना Vअवरुन्द्धे लभते । एतस्तोमसाध्यानि सर्वाण्यपि

[१२]पुनरेकविंशस्तोमानुष्ठानाय [१३-] मनोवृत्तिं धारयन् प्रवर्तते । तदेवं [१४]स्तोमः Vएव पूर्वोक्तस्तोमरूप [-१३] [१५]एव सन्नुत्तरस्तोमाय तत् Vज्योतिः मनोवृत्तिं धारयन् प्रवर्तते । अपि च तथा [१६-] प्रवृत्तः सन्नुत्तरस्तोममाभिमुख्येन [-१६] Vप्रणयति ॥

'यावन्तः' इति ॥ इत्थं स्तोमानां संभूयकारित्वं [१७]दर्शितम् । [१८-]अथ स्तोमान् [-१८] प्रशंसति- 'यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोकास्तावन्ति ज्योती१ँषि' इति ॥ Vस्तोमाः Vयावन्तः यावत्संख्याकाः [१९]Vतावन्तः एव [२०]Vकामाः काम्यानि फलानि तैर्निष्पाद्यानि । तच्च पूर्वमेव सूचितम् । त्रिवृता ब्रह्मवर्चसं [२१]निष्पाद्यते । पञ्चदशेनौजो वीर्यं च । सप्तदशेन प्रजास्वामित्वं [२२]प्रजोत्पादकत्वं च । [२३-] तत् त्रयमत्रैव [-२३] सूचितम् । एकविंशेन प्रतिष्ठोत्पाद्यते । तच्च पूर्वानुवाके " एतस्मिन् प्रतितिष्ठति " (तैसं ७.१.१) इति सूचितम् । एवं सति यावन्तः स्तोमास्तावन्तः कामाः

१३-१३. मै१. अ१ - यत्परिणामाः । १४. मै१ - कालौकम् , मै२ - कालो तज्ज्योतींषि । १५-१५. मै१ - कामशासनपुत्रादयः । १६. मै१ - °परिणामानभिमत°, अ - °परिमाणाभिमत°, तं. तं१. अ१. मै१ - °स्तोमादीन् ।

१२. शृ१ - °रेवकविंशतिस्तोम° । १३. शृ१. क. पा. हा. इ. वा. म. मै. वै - मनोवृत्तिरूपम् । १४-१४. म - 'स्तोमः . . . . रूपः' नास्ति । १५. इ. वै - एवम् । १६-१६. म - °वृत्तिस्तोमपूर्वस्याभिमुख्येन, शृ१. मै - उत्तरस्तोमे पूर्वस्तोममभि°, वा - °स्तोमात्रिमुख्येन । १७. इ. वै - दर्शयति । १८-१८. शृ१ - आद्यस्तोमान् । १९. वै - तावत् । २०. इ. वा. वै - कार्या, मै - काम्याः । २१. अ. आ. क. पा. हा. वा - निष्पद्यते, इ. वै - निष्प्रपद्यते । २२. म. मै - प्रजोत्पादनम् , शृ१ - 'प्रजोत्पादनत्वम्' नास्ति । २३-२३. म - तत्र एतत्त्रयमत्रैव, शृ१. क. हा. इ. वा. वै. मै - एतत् त्रयमत्रैव ।

स्तोमानां संभूयकारित्वम्]

एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीऽष्यव रुन्द्धे ॥ २ ॥

(तावन्तो लोकास्त्रयोदश च ।)

एव । स्तोमान् । एतावतः । कामान् । एतावतः । लोकान् । एतावन्ति । ज्योतीऽषि । अवेति । रुन्द्धे ॥ २ ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

एवमादीन्यवरुन्द्धे । तदेवाह - ‘एतावतः [१७]कामान्’ इत्यादि । एतस्तोमसाध्यानि सर्वाण्यपि कामलोकज्योतींषि अवरुन्द्धे इत्यर्थः । कः ? पूर्वानुवाकशेषत्वात् ‘योऽग्निष्टोमेन यजते’ इति गम्यते ॥

॥ [१८] इति सप्तमे प्रथमे द्वितीयोऽनुवाकः [१८] ॥

संपन्नाः । तत्फलभोगाधारभूता देहाः [V]लोकाः तेऽपि [V]तावन्तः एव । तेषु देहेषु [२४]तत्फलानुभवा [२५]एव [V]ज्योतीऽषि । [२६]तान्यपि तावन्ति एव ॥

एतावदिति ॥ [२७]इत्थं स्तोमान् [२८]प्रशस्य योऽग्निष्टोमेन यजते तस्य फलं [२९]प्रशंसति - ‘एतावत् एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीऽष्यव रुन्द्धे’ इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथम प्रपाठके द्वितीयोऽनुवाकः ॥

१७. मै. मै२. मै३. तं. तं१. अ - ‘कामान्’ नास्ति । १८-१८. मै१. इति द्वितीयः ।

२४. शृ१ - तत्फलानुभावाः°, अ. हा. पा. वा. वै. मै - °लानुभवः, इ - तत्काला° । २५. मै - ‘एव’ नास्ति । २६. शृ१ - ‘तान्यपि’ नास्ति । २७. शृ१ - एवम् । २८. वा - प्रशंस्य । २९. म. मै - दर्शयति ।

ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । सः । तु । वै । यजेत । यः । अग्निष्टोमेनेत्यग्नि-स्तोमेन । यजमानः । अथ । सर्वस्तोमेनेति सर्व-स्तोमेन । यजेत । इति ।

अधुना [1]स्तोमान्तरं निन्दन् विशिष्टरूपतामस्य ज्ञात्वैव यष्टव्यमनेन [2]इति दर्शयितुमाह- 'ब्रह्मवादिनः' इत्यादि ॥ [V]सः एव यष्टुमर्हति । "अर्हे कृत्यतृचश्च" (पा ३.३.१६९) इति [3-] यजेर्लिङादि । इतः पूर्वं [V]यः [V]अग्निष्टोमेन [4-V]यजमानः सन् [-4] इदानीं सर्वस्तोमेन [V]यजेत । [5-]"शकि लिङ् च" (पा ३.३.१७२) इति द्वितीये पर्याये लिङ् [-5] । [6]चतुष्टोमेनाप्यनन्तरितेन सर्वस्तोमेन स्तोमानां [7]यथात्म्यं विदित्वा अप्रमत्तः यष्टुं शक्नोतीति [V]ब्रह्मवादिनः आहुः । संहितायां तोरन्तलोपश्छान्दसः । उक्तं च प्रातिशाख्ये - "तुनुपूर्व उदात्तयोर्वकारः" (तैप्रा ५.१३) इति ॥

प्रथमानुवाकविहिते ज्योतिष्टोमे पुरुषं प्ररोचयितुं [1]द्वितीयेऽनुवाके स्तोमप्रशंसा कृता । अग्निष्टोमस्य [2]तु [3]प्राथम्यं "तस्मादाहुर्ज्येष्ठयज्ञः" (तैसं ७.१.१) इति वाक्येनोक्तम् । [4]तत्प्राथम्यवत् [5]प्राथम्यमतिरात्रस्यापि वैकल्पिकमस्ति । अत एव सूत्रकारेणोक्तम् - "अग्निष्टोमः प्रथमयज्ञः । अतिरात्रमेके पूर्वं समामनन्ति" (आपश्रौ १०.२.३-४) इति ॥

ब्रह्मवादिन इति ॥ तस्यैतस्यातिरात्रस्य तृतीयानुवाके विधिमुन्नयति - 'ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति' इति ॥ [V]यः पुरुषः अग्निःष्टोममनुतिष्ठति [V]सः पुनः [V]सर्वस्तोमेन चेत् [V6]यजेत [7]स एव मुख्यो यष्टा [V]इति [V]ब्रह्मवादिनः आहुः । तस्मात् सर्वस्तोममनुतिष्ठेदिति

---

१. मै. मै१ - स्तोमान्तरयम् । २. तं. तं१. मै१ - एतत्, अ१ - तद् । ३. अ१ - यजेर्तिङ् । ४-४. अ१ - यजते सः । ५-५. मै२ - 'शकि ---- लिङ्' नास्ति । ६. मै. मै२ - °नाप्यन्तरितेन । ७. तं. तं१. अ१. मै१ - याथातथ्यम् ।

---

१. म. मै. वै - द्वितीयानुवाके । २. म. मै - च, अ. पा. हा. वा - तत्, क. इ. वै - 'तु' नास्ति । ३. अ. पा. वा - सामर्थ्यम् । ४. शृ१. म - तत्र प्राथम्यम्, क. इ. वै - तत्प्राथम्यम्, मै - तच्च प्राथम्यम्, अ. पा - तत्प्राथम्यात् । ५. शृ१. म. मै. क. इ. वै - अतिरात्रस्यापि, अ - °रात्रस्य । ६. अ. आ. क. पा. हा. इ. वा. वै. म. मै - यजेत तदा । ७. अ. पा. वा - सवम्, इ. म. वै - सर्व ।

अतिरात्रविधिः]

यस्यं त्रिवृतंमन्तर्यन्तिं प्राणाः॑स्तस्यान्तर्यन्तिं प्राणेषु मेऽप्यंसदितिं खलु वै यज्ञेन यजमानो यजते

यस्यं । त्रिवृतमितिं त्रि-वृतम् । अन्तर्यन्तीत्यन्तः-यन्तिं । प्राणानितिं प्र-अनान् । तस्यं । अन्तः । यन्ति । प्राणेष्वितिं प्र-अनेषु । मे । अपीतिं । असत् । इतिं । खलु । वै । यज्ञेन । यजमानः । यजते ।

'यस्य' इत्यादि ॥ Vअन्तर्यन्ति प्रमादादुत्सृजन्ति । " अन्तरपरिग्रहे " (पा १.४.६५) इति [८]गतित्वात् " तिङि चोदात्तवति " (पा. ८.१.७१) इति अन्तःशब्दो निहन्यते, "[९]उदात्तवता तिङा " (पामभा २.२.१८) इति समासः, प्राणान् [१०-] यजमानस्योत्सृजन्ति [११]विनाशयन्ति साम्यात् । ननु यद्यन्तरिताः प्राणाः प्रेप्सितस्य सर्वस्य का गतिरित्याह - 'प्राणेषु' [१२]इति । न केवलं स्वर्ग एव अपि तु Vप्राणेषु अपि Vमे मम भागित्वम् Vअसत् अस्ति Vइति Vखलु Vवै Vयज्ञेन अनेन अग्निष्टोमेन [-१०] यजमानः यजते, 'सर्वेभ्यः कामेभ्योऽग्निष्टोमः' इति । यद्वा - 'प्राणेषु' इति निमित्तसप्तमी । न केवलं स्वर्गार्थमेव, अपि तु प्राणार्थमपि ममायं यज्ञोऽस्तु इति यजमानो [१३]अनेन [१४]यजते, एवं सर्वत्र द्रष्टव्यम् ॥

'वीर्यम्' इति ॥ पञ्चदशस्य वीर्यस्थानादुत्पन्नत्वात् ॥

---

[८]विधिरुन्नेयः । अग्निष्टोमे चत्वार एव स्तोमास्त्रिवृदादयः । अतिरात्रे तु त्रिणवस्त्रयस्त्रिंशावपि स्तोमौ [९]विद्येते । तस्मादयं सर्वस्तोमः ॥

यस्येति ॥ तत्रान्वयव्यतिरेकाभ्यां प्रथमस्तोमं प्रशंसति - 'यस्य त्रिवृतमन्तर्यन्ति प्राणाः॑ तस्यान्तर्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते' इति ॥ Vयस्य यजमानस्य यागे वर्तमाना ऋत्विजस्त्रिवृत्स्तोममन्तरितं कुर्युस्तस्य स्तोमस्य प्राणरूपत्वात् त ऋत्विजः V[१०]तस्य यजमानस्य Vप्राणान् एवान्तरितान् कुर्वन्ति । न त्वेतद्युक्तम् । अयं यजमानो हि Vप्राणेषु अपि Vमे भागित्वमस्त्वित्यभिप्रेत्य यज्ञमनुतिष्ठति । तस्मात् त्रिवृत्स्तोमोऽवश्यंभावी ॥

---

८. तं. तं१ अ१ - द्वितीया । ९. अ१ - °वता च । १०-१०. मै१. मै२ - 'यजमानस्य - - - - ष्टोमेन' नास्ति । ११. मै१ - नाशयन्ति । १२. अ१ - इत्यादि । १३. मै. मै२. मै३. अ - 'अनेन' नास्ति । १४. अ१ - यजति ।

---

८. शृ१. मै - विध्युन्नयः, अ. पा. इ. वै. वा. म - विध्युन्नेयः । ९. क - विद्यते , इ. वै - विद्येत । १०. अ - यस्य ।

यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति (१) प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते

यस्य । पञ्चदशमिति पञ्च-दशम् । अन्तर्यन्तीत्यन्तः-यन्ति । वीर्यम् । तस्य । अन्तः । यन्ति । वीर्ये । मे । अपीति । असत् । इति । खलु । वै । यज्ञेन । यजमानः । यजते । यस्य । सप्तदशमिति सप्त-दशम् । अन्तर्यन्तीत्यन्तः-यन्ति (१) । प्रजामिति प्र-जाम् । तस्य । अन्तः । यन्ति । प्रजायामिति प्र-जायाम् । मे । अपीति । असत् । इति । खलु । वै । यज्ञेन । यजमानः । यजते । यस्य । एकविꣳशमित्येक-विꣳशम् । अन्तर्यन्तीत्यन्तः-यन्ति । प्रतिष्ठामिति प्रति-स्थाम् । तस्य । अन्तः । यन्ति । प्रतिष्ठायामिति प्रति-स्थायाम् । मे । अपीति । असत् । इति । खलु । वै । यज्ञेन । यजमानः । यजते ।

'प्रजाम्' इति ॥ [१९]प्रजननसाधनत्वात् सप्तदशस्य ॥

'प्रतिष्ठाम्' इति ॥ एकविंशस्य पद्भ्यामुत्पन्नत्वात् ॥

यस्येति ॥ अथ द्वितीयस्तोमं प्रशंसति - 'यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते' इति ॥ [११-] पञ्चदशस्य वीर्यसाधनत्वात् [-११] तदन्तराये वीर्यस्यान्तरायः । अन्यत् पूर्ववत् ॥

यस्येति ॥ [१२-] अथ तृतीयस्तोमं प्रशंसति [-१२] - 'यस्य सप्तदशमन्तर्यन्ति प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते' इति ॥ पूर्ववत् [१३]व्याख्येयम् ॥

यस्येति ॥ अथ चतुर्थस्तोमं प्रशंसति - 'यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते' इति ॥ पूर्ववत् व्याख्येयम् ॥

---

१९. मै१ - सार्थत्वात् ।

११-११. अ. पा. इ. वा. वै - पञ्चदशसुवीर्य° । १२-१२. इ. वा. वै. - 'अथ - - - - प्रशंसति' नास्ति । १३. अ. आ. क. पा. इ. वा. वै - 'व्याख्येयम्' नास्ति ।

यस्यं त्रिणवमंन्तर्यन्त्यृतू२ँश्च तस्यं नक्षत्रियां च विराजंमन्तर्यन्त्यृतुषु मेऽप्यंसन्नक्षत्रियांयां च विराजीति (२) खलु वै यज्ञेन यजमानो यजते

यस्यं । त्रिणवमितिं त्रि-नवम् । अन्तर्यन्तीत्यंन्तः-यन्तिं । ऋतून् । च । तस्यं । नक्षत्रियाम् । च । विराजमितिं वि-राजम् । अन्तः । यन्ति । ऋतुषु । मे । अपीतिं । असत् । नक्षत्रियांयाम् । च । विराजीतिं वि-राजि । इतिं (२) । खलु । वै । यज्ञेनं । यजमानः । यजते ।

'त्रिणवम्' इति ॥ त्रीणि नवकानि परिमाणमस्येति [१६]पूर्ववत् [१७]डः । [१८]सप्तविंशस्तोत्रीयस्त्रिणवः । "पूर्वपदात्संज्ञायामगः" (पा ८.४.३) इति णत्वम् । [१९]ननु त्रिणवत्रयस्त्रिंशयोः चतुष्टोमेऽस्मिन् कः प्रसङ्गः ? सत्यम्, एतयोरप्यन्तरयदोषश्रवणात् [२०]एतावप्यग्निष्टोमे ऋद्ध्या संपाद्याविति [२१]भावः । तत्कथमेतौ संपादितौ स्यातामिति ? उच्यते - [२२]आज्यानि चत्वारि पञ्चदशान्नानि (°शावृत्तानि ?), संभूय षष्टिस्तोत्रिया भवन्ति ताश्च [२३]द्वौ त्रिंशद्वर्गौ [२३]तत्रैकस्मात्तिस्र उद्ध्रियन्ते [२४]ताश्चेतरत्र [२५]दीयन्ते । एवमेतौ [२५] [२६]संपन्नावन्तरितौ भवतः । ततश्च तदन्तरयदोषो न भविष्यतीति । 'ऋतून्' इति । [२७]नक्षत्रसंख्यान्वयेन संवत्सरात्मकत्वात् त्रिणवस्य । ऋत्वन्तरये च सर्वपुरुषार्थलोपः । 'नक्षत्रियाम्' इति । नक्षत्रसमूहात्मिकां विराजम् अन्तर्यन्ति, "नक्षत्राद्घः" (पा ४.४.१४१) इति समूहे [२८]घः । [२९]सप्तविंशतिनक्षत्राणि तिस्रो

यस्येति ॥ अथ पञ्चमं स्तोमं प्रशंसति - 'यस्य त्रिणवमन्तर्यन्त्यृतू२ँश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायां च विराजीति खलु वै यज्ञेन यजमानो यजते' इति ॥ ऋतुत्वेन त्रिणवस्य स्तुतिः शाखान्तरे द्रष्टव्या । अतस्त्रिणवस्यान्तराये [१४]ऋतूनामेवान्तरायो भवति । [१५]त्रिणवस्तोमे [१६] सप्तविंशतिसंख्याकाः स्तोत्रीया नक्षत्राणि च कृत्तिकादीनि [१६] सप्तविंशतिसंख्याकानि । [१७]विराट्शब्दोऽपि

१६. मैर - 'पूर्ववत्' नास्ति । १७. मै१. मैर - 'उः' नास्ति । १८. अ१ - सप्तविंशतिस्तोत्रीयत्वं त्रिणवत्वम्, मै१ - सप्तविंशतिस्तोत्रीयं त्रिणवम् । १९. मै१. अ१ - 'ननु' नास्ति । २०. अ१ - एत्रावग्निष्टोमे । २१. अ१. मै१ - 'भावः' नास्ति । २२. मै२ - आद्यानि । २३-२३. अ१ - द्वात्रिंशद्वर्गौ । २४. मै. मै१. मै२. अ - एताश्चेतरत्र । २५-२५. मै१ - दीयन्तावमेतेन । २६. मै१ - संपन्नावनान्तरितौ, अ१ - संपन्नौ च नान्तरितौ । २७. मै१ - °संख्यान्वये । २८. मै१ - अधः । २९. मै. मै२. मै३. अ. अ१ - °नक्षत्राणीति ।

१४. इ. वा. वै - °न्तराये, मै - एकान्तरायः । १५. अ. पा. इ. वा. मै - °स्तोमेन । १६-१६. इ. वै - 'सप्तविंशति ---- कृत्तिकादीनि' नास्ति । १७. अ. क. पा. म - विराट्छन्दोऽपि ।

यस्यं त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते

यस्यं । त्रयस्त्रिꣳशमिति त्रयः-त्रिꣳशम् । अन्तर्यन्तीत्यन्तः - यन्ति । देवताः । तस्य । अन्तः । यन्ति । देवतासु । मे । अपीति । असत् । इति । खलु । वै । यज्ञेन । यजमानः । यजते ।

विराजो निवृत्तः (त्रिवृतः ?) एकैकाक्षरोनत्वात् । एकैव त्रिवृत् [३०]त्रिपदा विराट् । त्रिणवत्वस्यान्तरये नक्षत्राण्येवान्तरितानि स्युः, ततोऽस्य सर्वार्थलोपः । यद्वा - जीवितविषयत्वात् [३१]जन्मदिनानामावृत्त्या त्रिंशन्नक्षत्राणि भवन्तीति [३२]पूर्णा [३३]एव तिस्रो विराजः । तदन्तरये जीवितलोपः इति ॥

[३४]'त्रयस्त्रिंशम्' इति ॥ [३५]त्रयश्च त्रिंशच्च[-३५] त्रयस्त्रिंशत् । "त्रेस्त्रयः" (पा ७.१.५३) इति त्रयसादेशः । तावत्यः स्तोत्रियाः [३६]परिमाणमस्येति पूर्ववत् डः । 'देवताः' इति । [३७]तासां त्रयस्त्रिंशत्वात् [३८]द्यावापृथिव्यन्तरिक्षस्थानां प्रत्येकमेकादशत्वात् ॥

विविधराज्यवाची सन् नक्षत्रेष्टिषु श्रूयमाणं फलसमूहमुपलक्षयति । तथा सति [१८]त्रिणवान्तरायेण नक्षत्रसंबधिन्या विराजोऽन्तरायः । शेषं पूर्ववत् ॥

यस्येति ॥ अथ षष्ठं स्तोमं प्रशंसति - 'यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते' इति ॥ त्रिष्वपि लोकेषु [१९-] प्रत्येकमेकादशसंख्याका देवताः । ताश्च[-१९] "ये देवा [२०]दिव्येकादश स्थ" (तैसं १.४.१०) इति मन्त्रे समाम्नाताः । तथा सति त्रयस्त्रिंशस्तोमान्तराये [२१]त्रयस्त्रिंशस्तोमाख्यसंख्यासाम्यात् [२२-] तासां देवतानामन्तरायो भवति । [२३]सोऽयमन्तरायोऽनुपपन्नः । देवतासु यत् फलं तत् [V]अपि [२४]मे भूयादित्यभिप्रेत्य यजमानेन यष्टुं प्रवृत्तत्वात् । तदेवमतिरात्रविवक्षया[-२२] सर्वे

---

३०. अ१ - त्रिवृता । ३१. मै१. अ१ - जन्मादीनामावृत्त्या । ३२. अ१ - पूर्वा । ३३. मै२ - एवम् । ३४. अ१ - त्रयस्त्रिंशतमिति । ३५-३५. मै१ - त्रयस्त्रिंशच्च । ३६. मै१ - परिमाणोऽस्येति । ३७. अ१ - 'तासाम्' नास्ति । ३८. मै. मै१. मै३. अ. अ१ - द्युपृथिव्यन्तरिक्ष° ।

---

१८. शृ१ - त्रिणवान्तरायेण । १९-१९. म - संख्याको ग्रन्थसारोऽन्यत्र द्रष्टव्यः देवताश्च । २०. मै - दिवि दश । २१. अ. आ. क. पा. इ. म. वै - °स्तोमाख्यसाम्यात् । २२-२२. इ. वै - 'तस्यां - - - - °विवक्षया' नास्ति । २३. शृ१ - °मपराधोऽ° । २४. मै - 'मे' नास्ति ।

यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत्

यः । वै । स्तोमानाम् । अवमम् । परमताम् । गच्छन्तम् । वेद । परमताम् । एव । गच्छति । त्रिवृदिति त्रि-वृत् । वै । स्तोमानाम् । अवमः । त्रिवृदिति त्रि-वृत् ।

एवं सर्वप्रकृतिरग्निष्टोमः सगुणो विहितः । [३९]अधुना विकृतीनामप्युदाहरणार्थम् अतिरात्रो यज्ञक्रतूनां परमो विधीयते । यथोक्तम् - " अतिरात्रः परमो यज्ञक्रतूनाम् " (तैसं ७.४.१०) इति । तदर्थं तद्गतं [४०]कञ्चिद्गुणविशेषं विधातुमाह - ' यो वै ' इत्यादि । अवमः अल्पः, परमः उत्तमः । यद्वा -अवमः आद्यः, परमः [४१]अन्त्यः । Vत्रिवृत् Vस्तोमानाम् अवमः यः अतिरात्रे परमः भवतीति [४२]त्रिवृद्रथन्तरसन्धिः इति सन्धिस्तोत्रस्य त्रिवृत्त्वात् । एवं वेदिता Vपरमताम् उत्तमतां

स्तोमाः प्रशस्ताः । सन्ति हि कस्मिंश्चिदतिरात्रे सर्वे स्तोमाः । अत एव ह्युपरिष्टाद्विधास्यति - " सर्वस्तोमोऽतिरात्र उत्तरम् " (तैसं ७.१.४) इति ॥

यो वा इति ॥ [२५]अथाऽन्यमतिरात्रगतं विशेषं विधित्सया प्रशंसति - ' यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत् परमो य एवं वेद परमतामेव गच्छति ' इति ॥ Vस्तोमानां [२६] मध्ये ह्यूनसंख्याकस्तोत्रीयोपेतस्त्रिवृत्स्तोमोऽवमः[२६], स एवोत्तमः, [२७]तस्य च [२८]परमत्वादन्ते

३९. मै. मै१. मै२. अ. अ१ - अथ । ४०. मै१ - किञ्चिद्गुण° । ४१. मै२ - 'अन्त्यः' नास्ति । ४२. मै१ - °द्राथन्तरः सन्धिः, अ१ - °द्रायथन्तरं सन्धिः ।

२५. अ. आ. क. पा. इ. वा. वै - तथा । २६-२६. शृ१ - मध्ये न्यून - - - - मोऽवमः, म - असमं ह्यूनसंख्याकं यः श्रोत्रियो वै च तत्र त्रिवृत्स्तोमोऽवमः, मै - स्तोत्रियो यद्वा त्रिवृत्स्तो°, अ. पा. इ. वा. वै - स्तोत्रिया यदि त्रिवृत्स्तो° । २७. आ - स एवोत्तमः तस्य । २८. शृ१ - परत्वमेते, म. मै - परत्वमन्ते ।

परमो य एवं वेदं परमतामेव गच्छति ॥ ३ ॥

(सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च ।)

परमः । यः । एवम् । वेद । परमताम् । एव । गच्छति ॥ ३ ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[V]गच्छति । [43]तस्मात् तथा कर्तव्यमिति शेषः । एवंगुणकोऽतिरात्रः कर्तव्य इति विधिरनुमीयते उपलक्षणत्वाच्च सर्वेऽप्येकाहा विहिता भवन्तीति ॥

॥ [44-]इति सप्तमे प्रथमे तृतीयोऽनुवाकः [-44] ॥

प्रयोगः । अतिरात्रे हि तथा प्रयुज्यते । [29-] त्रिवृद्रथन्तरः सन्धिरिति [-29] चरमे सन्धिस्तोत्रे त्रिवृतो विधानात् । [V]यः [30]एवं [V]वेद इति [31]पुनर्वचनमुपसंहारार्थम् ॥

॥ [32-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः [-32] ॥

---

४३. तं. तं१. मै१ - तस्मात् उत्तमतां गच्छतः तस्मात् । ४४-४४. मै१ - सप्तमे प्रथमे तृतीयः, मै२ - इति तृतीयोऽनुवाकः ।

२९-२९. मै - त्रिवृद्रथन्तर°, क - त्रिवृद्राथन्तरसं° । ३०. वा - एव । ३१. वै - °हारार्थे । ३२-३२. वै - इति तृतीयोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे अष्टमप्रपाठके - - - - ।

अङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमायन् तेषाꣳ हविष्मांꣳश्च हविष्कृच्चाहीयेतां तावकामयेताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां

अङ्गिरसः । वै । सत्रम् । आसत । ते । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । तेषाम् । हविष्मान् । च । हविष्कृदिति हविः-कृत् । च । अहीयेताम् । तौ । अकामयेताम् । सुवर्गमिति सुवः-गम् । लोकम् । इयाव । इति । तौ । एतम् । द्विरात्रमिति द्वि-रात्रम् । अपश्यताम् ।

एवं सर्वेऽप्येकाहा विहिताः । द्विरात्रादयोऽप्यहीनाः क्रमेण विधीयन्ते । सर्वे चाहीनाः अन्यतरतोऽतिरात्रा भवन्ति । [1-] उभयतोऽतिरात्राणि सत्राणि भवन्ति [-1] । [2]यदि चैवाहीनो यदि च सत्रम् उभयथैवोभयतोऽतिरात्रो द्वादशाहो भवति [3-] आदेशात् । अन्यथाऽहीनोऽपि उभयतोऽतिरात्रो भवति [-3] । सर्वमुत्तरत्र वक्ष्यते । 'अङ्गिरसः'[4]इत्यादि । [[V]आसत ।] आसिरयमकर्मकः सोऽस्मिन् विषये आस्थानकर्मेत्येके । यथा [5-]सत्रं भवति[-5] तथाऽऽसतेत्यन्ये । सत्रासनं सहासनं [6]क्रतुकर्मविशेषः [7]स्यात् तदकुर्वतेत्यपरे । यथा " प्रति प्रातिष्ठदध्वरे " (तैब्रा ३.१२.९)

---

[1]तृतीयेऽनुवाके सर्वस्तोमोऽतिरात्र उक्तः । स चैकाह इति [2-] सर्वेऽप्येकाहा [3-] एतेनोपलक्षिताः [-3] । अथाहीना द्विरात्रादयः क्रमेणोच्यन्ते । चत्वारो हि द्विरात्रभेदाः । तत्र [4]व्युष्टिर्द्विरात्रो [5]राजसूयान्ते (बौश्रौ १२-२०) विहितः ॥

अङ्गिरस इति ॥ [6-] अत्र त्वङ्गिरसां [-6] द्विरात्रो विधीयते [-3]-'अङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमायन् तेषाꣳ हविष्माꣳश्च हविष्कृच्चाहीयेतां तावकामयेताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां तमाहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान् द्विरात्रेण यजते सुवर्गमेव लोकमेति '

१-१. मै२ - इति, अ१ - उभयतोऽतिरात्राणि, मै. मै३ अ - 'उभयतो - - - - भवन्ति' नास्ति । २. अ१ - सः । ३-३. मै१. अ१ - 'आदेशात् - - - - भवति' नास्ति । ४. मै१ -इति । ५-५. अ१ - सत्रां स न भवति । ६. मै. मै२. मै३. अ. अ१ - क्रतुविशेषस्य । ७. मै. मै२. मै३. अ - आख्या, अ१ - 'स्यात्' नास्ति ।

---

१. अ. आ. क. पा. वा. म - तृतीयानु° । २. शृ१ - म. मै - °प्येकाहास्तेनो° । ३-३. वा - ए विधीयते । ४. म - द्विरात्रः । ५. मै - राजयान्ते, अ. आ. क. पा. इ. म. वै - राज्ञाम् । ६-६. अ. आ. क. पा. इ - अथाङ्गिरसाम्, शृ१ म - अत्र त्वङ्गि° ।

तमाऽहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान् द्विरात्रेण यजते सुवर्गमेव लोकमेति

तम् । एतिं । अहरताम् । तेनं । अयजेताम् । ततः । वै । तौ । सुवर्गमितिं सुवः-गम् । लोकम् । ऐताम् । यः । एवम् । विद्वान् । द्विरात्रेणेतिं द्वि-रात्रेणं । यजते । सुवर्गमितिं सुवः-गम् । एव । लोकम् । एति ।

इत्यादि । तेषां मध्ये [८-] हविष्मत्-हविष्कृत्-नामानौ [-८] [V]अहीयेतां [९]तस्मात् स्थानात् प्रच्युतौ । [१०]'तावकामयेताम्' इति । चत्वारो द्विरात्राः [११]व्युष्टिद्विरात्राङ्गिरसकपिवनचैत्ररथनामानः । [१२]तत्र 'एतम्' इत्याङ्गिरसं [-१२] निर्दिशति इतरनिवृत्त्यर्थम् । [V]तम् [V]आहरताम् इष्टसाधनत्वेन गृहीतवन्तौ [V]तेन [V]अयजेताम् इष्टं साधितवन्तौ । यद्वा - तमाहरताम् [१३]आरभेतां तेन [१४]अयजेतां [१५]देवान् पूजितवन्तौ । ततः स्वर्गं गतौ । [१६][V]ऐतां स्वर्गार्थं प्रस्थितौ । [V]अगच्छतां स्वर्गं

इति ॥ [V]अङ्गिरसः महर्षयो यदा [V]सत्रम् अनुष्ठाय स्वर्गं प्राप्तास्तदानीं [७-] तेषां मध्ये [V]हविष्मान् [V]हविष्कृत् इत्येतौ पुरुषावनुष्ठानेन [-७] [८]स्वर्गतावपि हीनौ स्याताम् *[अभवताम्] । [V]तौ पुनः स्वर्गप्राप्तिं कामयमानौ [९-] द्विरात्राख्यं यागं [-९] तत्साधनत्वेन निश्चित्य [१०]तदीयां सामग्रीं संपाद्य [११]तदनुष्ठानेन स्वर्गं प्राप्तौ । [१२-] अतोऽन्योऽपि स्वर्गप्राप्तये [-१२] [V]द्विरात्रेण यजेत ॥

८-८. मै१ - हविष्मद्धविष्कृतौ एतौ, अ१ - हविष्मान् हविष्कृच्च तौ । ९. मै१ - तस्मात् सत्रात् सार्धात् प्रपचतिरितौ (?), अ१ - तस्मात् सत्रात् सार्थात् प्रचरितौ । १०. मै१ - तवेतुमिति, अ१ - तावेतमिति । ११. मै२ - °कपिनवचैत्र° । १२. मै१. मै२ - °तमित्यङ्गिरसम् । १३. मै. मै२. मै३. अ. अ१ - तमारभेताम् । १४. मै१ - यजेताम् । १५. मै२ - देवताः । १६. मै१ - एताम् ।

७-७. शृ१ - 'तेषां मध्ये ---- °वनुष्ठानेन' नास्ति । ८. शृ१ - स्वर्गप्राप्तौ च, क. पा. म. वै - स्वर्गतौ च, इ. वा - स्वर्गतौ वहिनौ, मै - स्वर्गाप्तौ च । * [आनन्दाश्रमावृत्तौ संसूचितः पाठः ।]। ९. शृ१ - द्विरात्राख्ययागे, इ. वै - द्विरात्राख्ययागम् । १०. आ - तृतीयाम् । ११. मै - तमनुष्ठाय । १२-१२. इ. वा. वै - अतोऽन्येऽपि स्वर्ग°, मै - अतोऽन्यपि स्वर्ग°, शृ१ - अतोऽन्योऽपि स्वर्गप्राप्तये तेषां मध्ये हविष्मान्हविष्कृदित्येतौ पुरुषौ अनुष्ठाने ।

अहीनेषु द्विरात्रविधिः]

तावैतां पूर्वेणाह्नाऽगच्छतामुत्तरेणा(१)भिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति

तौ । ऐताम् । पूर्वेण । अह्ना । अगच्छताम् । उत्तरेणेत्युत्-तरेण (१) । अभिप्लव इत्यभि-प्लवः । पूर्वम् । अहः । भवति । गतिः । उत्तरमित्युत्-तरम् । ज्योतिष्टोम इति ज्योतिः-स्तोमः । अग्निष्टोम इत्यग्नि-स्तोमः । पूर्वम् । अहः । भवति ।

[17]प्राप्तवन्तौ । Vअभिप्लवः षडहस्याद्यमहः Vअस्य Vपूर्वम् Vअहः Vभवति । 'गतिरुत्तरम्'[18] इति ॥

[19]तयोः [20]चाह्नोः स्तोमविधानार्थमाह - Vज्योतिष्टोमः त्रिवृदादिस्तोमचतुष्टयवान् Vअग्निष्टोमः अग्निष्टोमसामान्तं Vपूर्वम् Vअहः Vभवति । Vसर्वस्तोमः सर्वसंस्थासंबन्धिस्तोमवान्

ताविति ॥ [13]अथाहर्विशेषौ विधत्ते - 'तावैतां पूर्वेणाह्नाऽगच्छतामुत्तरेणाऽभिप्लवः पूर्वमहर्भवति गतिरुत्तरम्' इति ॥ Vतौ हविष्मद्धविष्कृन्नामानावृषी द्विरात्रगतेन Vपूर्वेण Vअह्ना स्वर्गं [14-]प्रति प्रस्थितौ उत्तरेणाह्ना स्वर्गं[-14] प्रविष्टौ । अत्र [15]सर्वत्र [16]अहःशब्दैनैकदिनसाध्यसोमप्रयोग उपलक्ष्यते । अभिप्लवाख्यः [17]च कश्चित् [18]षडहो यागविशेषः । तस्य च प्रथमदिने [19]ज्योतिष्टोमः [20]प्रथमसंस्थारूपोऽग्निष्टोमो विहितोऽस्ति । स एवात्राभिप्लवशब्देनोपलक्ष्यते । [21]सोऽत्र Vपूर्वम् Vअहः Vभवति, पूर्वदिने अनुष्ठेय इत्यर्थः । गम्यते स्वर्गो येनातिरात्रेण [22]सोऽयमतिरात्रविशेषः Vगतिः । [23]स च गतिरुत्तरमहर्भवति, द्वितीयदिने सोऽतिरात्रोऽनुष्ठेय इत्यर्थः ॥

१७. मै१ - प्राप्तवन्तौ । अभिप्लवः पूर्वमहर्भवति । १८. [मै - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'इति' इत्यस्यानन्तरम् 'अष्टमोऽतिरात्रविशेषः उत्तरमहर्भवति' इत्यधिकोंऽशः उपलभ्यते । परमयमंशः प्रकृतेऽसंबद्धत्वादस्माभिः परित्यक्तः ।]। १९. मै२ - 'तयोः' नास्ति । २०. मै. मै२. मै३. अ - 'अह्नोः' नास्ति ।

१३. अ. आ. क. पा. इ. वा. वै. म - °विशेषम् । १४-१४. अ.आ. क. पा. इ. वा. म. वै - 'प्रति - - - - स्वर्गम्' नास्ति । १५. म - 'सर्वत्र' नास्ति । १६. अ. आ. क. पा. इ. वा. वै. म - साध्यस्तोम° । १७. अ. आ. क. पा. इ. वा. वै. म. मै - 'च' नास्ति । १८. अ. पा. इ. वा. वै - षडहे, मै - 'षडहः' नास्ति, क. आ - षडहयाग° । १९. म. मै - °ष्टोमस्य, क. आ - °ष्टोमप्रथम° । २०. शृ१ - प्रथमसंख्यारूपो°, म - प्रथमसंस्काररूपो° । २१. इ - स च । २२. इ. वै - सोममतिरात्र° । २३. शृ१. म. मै - सा ।

तेजस्तेनावं रुन्द्धे सर्वस्तोमोऽतिरात्र उत्तर९ सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै गायत्रं पूर्वेऽहन्त्सामं भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं

तेजः। तेनं। अवेतिं। रुन्द्धे। सर्वस्तोम इति सर्व-स्तोमः। अतिरात्र इत्यंति-रात्रः। उत्तरमित्युत्-तरम्। सर्वस्य। आप्त्यै। सर्वस्य। अवरुद्ध्या इत्यव-रुद्ध्यै। गायत्रम्। पूर्वे। अहन्। सामं। भवति। तेजः। वै। गायत्री। गायत्री। ब्रह्मवर्चसमितिं ब्रह्म-वर्चसम्।

[V]अतिरात्रः द्वितीयमहर्भवति। यथोक्तम् - ‘चतुर्विंशाः पवमानाः पञ्चदशानि त्रीण्याज्यानि, सप्तदशमच्छावाकस्य एकविंशानि त्रीणि पृष्ठानि, [21]त्रिणवम् अच्छावाकस्य, [22]त्रयस्त्रिंशोऽग्निष्टोमसामानि, एकविंशान्युक्थ्यानि, सषोडशिकानि पञ्चदशी रात्रिः त्रिवृत्सन्धिः’ इति॥

[V]गायत्रं गायत्रीप्रभवं [V]पूर्वे अह्नि [V]साम [V]भवति, [V]त्रैष्टुभम् उत्तरस्मिन्नह्नि। आज्ये त्रैष्टुभस्य साम्नोऽभावात् होतुराज्ये विधानम्। यथोक्तमाचार्येण - “[23]होतुराज्यं संपादयेत्” [24]इति॥

ज्योतिष्टोम इति॥ उक्तार्थस्पष्टीकरणद्वारेण स्तोमविशेषान् विधत्ते - ‘ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्द्धे सर्वस्तोमोऽतिरात्र उत्तर९ सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै’ इति॥ अभिप्लव इत्यस्य व्याख्यानं ज्योतिष्टोम इति। तत्र हि [24]ज्योतिष्टोमे निरूपितास्त्रिवृदादयश्चत्वारः स्तोमाः क्रियन्ते। तदनुष्ठानेन [25][V]तेजः प्राप्नोति। [26-] सर्वैः स्तोमैरुपेतः [-26] [V]अतिरात्रः इत्यनेन [27]त्रिणवत्रयस्त्रिंशस्तोमाभ्यां सहिता अशेषस्तोमा उक्ताः। तेन च [28]सर्वमप्यप्राप्तं प्राप्यते, स्वाधीनं च भवति। द्वादशभिः स्तोत्रैरुपेतोऽग्निष्टोम [29-] एकोनत्रिंशद्भिः स्तोत्रैरुपेतोऽतिरात्र [-29] इति [30]तयोर्भेदः॥

गायत्रमिति॥ अथ होतारं प्रति प्रयोक्तव्ये स्तोत्रे दिनभेदेन सामविशेषं विधत्ते - ‘गायत्रं पूर्वेऽहन्त्साम भवति, तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन् धत्ते त्रैष्टुभमुत्तर ओजो वै

---

२१. मै - त्रिवृतम्। २२. मै१. अ१ - °ग्निष्टोमसामम्। २३. [मै - तलटिप्पण्यां ‘होतुराज्यमेतानि’ इत्युपलभ्यते।]। २४. अ१ - अथ।

---

२४. शृ१. म. मै - ज्योतिष्टोमेन न, अ. क. पा. इ. वा. वै - ज्योतिष्टोमेन। २५. म - ‘तेजः’ नास्ति। २६-२६. अ. आ. क. पा. इ. वा. वै. म - सर्वस्तोमैरु°। २७. शृ१. मै - °त्त्रयस्त्रि९शाभ्याम्। २८. अ. आ. क. पा. वा - °मप्यप्राप्यम्, इ. वै - °मप्राप्यम्। २९-२९. म - द्विस्तोमैरुपेतोऽ°। ३०. मै - तयोः।

तेज एव ब्रह्मवर्चसमात्मन् धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन् धत्ते रथन्तरं पूर्वे(२)ऽहन्त्साम भवतीयं वै रथन्तरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चानुष्टुप् चेति

तेजः । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । आत्मन् । धत्ते । त्रैष्टुभम् । उत्तर इत्युत्-तरे । ओजः । वै । वीर्यम् । त्रिष्टुक् । ओजः । एव । वीर्यम् । आत्मन् । धत्ते । रथंतरमिति रथं-तरम् । पूर्वे (२) । अहन् । साम । भवति । इयम् । वै । रथंतरमिति रथं-तरम् । अस्याम् । एव । प्रतीति । तिष्ठति । बृहत् । उत्तर इत्युत्-तरे । असौ । वै । बृहत् । अमुष्याम् । एव । प्रतीति । तिष्ठति । तत् । आहुः । क्व । जगती । च । अनुष्टुबित्यनु-स्तुप् । च । इति ।

[V]रथन्तरं [V]बृहत् च पृष्ठेषु नियम्यते । 'तदाहुः' इति । तत्र चोदयन्तीत्यर्थः । एते गायत्री त्रिष्टुभौ दृष्टे । क्वेदानीं जगत्यनुष्टुभौ द्रष्टव्ये इति ॥

वीर्यं त्रिष्टुगोज एव वीर्यमात्मन् धत्ते ' इति ॥ गायत्रीछन्दस्कायामृच्युत्पन्नं [V]गायत्रम् [31]एतन्नामकं [V]साम [32]तदेतद्धोतुराभिमुख्येन पठनीये स्तोत्रे गायेत् । तदेतत् [V]पूर्वे अह्नि द्रष्टव्यम् । गायत्र्या अग्निना सहोत्पन्नत्वात् तेजस्त्वं, ब्राह्मणैरनुष्ठेयत्वाद्ब्रह्मवर्चसत्वं, तदुभयमनेन साम्ना स्वस्मिन् [33]संपादयति । यद्यपि त्रैष्टुभाख्यं किञ्चित् साम नास्ति तथापि त्रिष्टुप्छन्दस्कायामुत्पन्नत्वात् [V]त्रैष्टुभम् इत्युच्यते । तदेतदुत्तरदिने गायेत् । [34]तेन [35]शारीरं बलमिन्द्रियसामर्थ्यं च प्राप्नोति ॥

रथन्तरमिति ॥ अथ पृष्ठस्तोत्रसामविशेषं [36]चोदकप्राप्तविकल्पनिवारणाय नियमयति - 'रथन्तरं पूर्वेऽहन्त्साम भवतीयं वै रथन्तरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति ' इति ॥ प्रकृतौ [37]हि बृहद्रथन्तरयोरैच्छिको विकल्पः । [38]अत्र तु दिनभेदेन व्यवस्था ॥

तदाहुरिति ॥ पुनरपि दिनभेदेन व्यवस्थितं सामान्तरं विधत्ते - 'तदाहुः क्व जगती चानुष्टुप् चेति वैखानसं पूर्वेऽहन्त्साम भवति तेन जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभः' [39] इति ॥ अत्र -[39] ब्रह्मवादिनश्चोदयन्ति-

३१. अ. आ. क. पा. इ. वा. वै - °नामैकम् , शृ१ - नाम । ३२. शृ१ - तद्धोताभि°, इ. वै - तद्धेतुरभि° । ३३. अ. आ. क. पा. इ. वा. वै - समापयन्ति । ३४. वा - तत्र । ३५. अ. वा - शरीरम् । ३६. शृ१ - चोदकप्राप्तं विकल्प्य निराकरणाय, क - °विकल्पवारणाय, म - °प्राप्तनिवारणाय । ३७. अ. आ. क. पा. इ. वा. वै. म - तु । ३८. अ. आ. क. पा. इ. वा. वै - इह । ३९-३९. म - 'इति अत्र ' नास्ति ।

वैखानसं पूर्वेऽहन्त्सामं भवति तेन जगंत्यै नैतिं
षोडश्युत्तंरे तेनांनुष्टुभोऽथांऽऽहुर्यत्

वैखानसम् । पूर्वे । अहंन् । सामं । भवति । तेनं । जगंत्यै । न । एति । षोडशि । उत्तंर इत्युत्-तरे । तेनं । अनुष्टुभ इत्यंनु-स्तुभः । अथं । आहुः । यत् ।

परिहरति - ‘ वैखानसम् ’ इति ॥ पृष्ठेषु Vबार्हतं साम Vवैखानसं Vभवति बृहती चतुरभ्यासात्, षट्त्रिंशदक्षरा । तत्र [२५-] च तिस्रो [-२५] जगत्यो भवन्ति । Vतेन Vजगत्यै जगत्याः Vन [२६]Vएति न हीयते यज्ञः । षोडशीसाम गौरिवीतमुत्तरस्मिन्नहि भवति । उक्थ्येभ्यः पुरस्तात् भवति । [२७]द्वावनुष्टुभौ [२८-] उत्तरे षोडशी [-२८], तेन अनुष्टुभः नैतीत्येव ॥

‘ अथाहुः [२९-] यत् ’ इति [-२९]॥ यदि Vसमाने एकस्मिन् Vअर्धमासे स्यातां द्वे [३०]अप्यहनी Vअन्यतरस्य [३१]Vअह्नः Vवीर्यं फलसाधनसामर्थ्यम् Vअनु Vपद्येत प्रसज्येत एकमेवाहः स्यात्

अत्र विद्यमाने द्वे [४०]एवाहनी, तयोः पूर्वस्मिन् गायत्र्यामुत्पन्नं साम गीतं, [४१]उत्तरस्मिंस्तु त्रिष्टुभ्युत्पन्नं साम गीतं, न [४२]त्वत्र तृतीयचतुर्थे अहनी विद्येते । [४३]तदेतौ जगत्यनुष्टुभौ द्वाववतिष्ठेते इति । [४४]तत्र अभिज्ञाः सामान्तरविधानमुखेनोत्तरमाहुः - यद्बृहत्यामृच्युत्पन्नं [४५]वैखानसाख्यं साम तत्पूर्वदिने गायेत् । बृहती च षट्त्रिंशदक्षरा सती चतुर्वारमावर्त्यमाना जगतीत्रयं संपद्यते । अष्टाचत्वारिंशदक्षराणां जगतीनां तिसृणामक्षरसंख्यया बृहतीचतुष्टयसमानत्वात् । Vतेन वैखानससाम्नाऽयं द्विरात्रयागो जगत्याः सकाशात् Vन अपैति । षोडशिशब्देन षोडशस्तोत्रे गीयमानं गौरिवीताख्यं सामोच्यते । तच्च Vउत्तरे अहनि गायेत् । तदाधारभूताम् [४६]ऋचम् अवलम्ब्य पूर्ववदनुष्टुभं संपादयेत् । तेन षोडशिसाम्नाऽयं द्विरात्रः Vअनुष्टुभः सकाशान्नापैति ॥

अथाहुरिति ॥ अथ दिनद्वयस्य पक्षव्यवस्थां विधत्ते ‘अथाहुर्यत् समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनु पद्येतेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं, नानैवाऽर्धमासयोर्भवतो नानावीर्ये भवतः’ इति ॥

२५-२५. मै - चतस्रः । २६. मै१ - इति । २७. मै. मै३. अ. अ१ - द्वे चानुष्टुभौ, मै१ - द्वे चानुभौ । २८-२८. [मै२-पुस्तकमवलम्ब्य संभावितोऽयं पाठः ।], मै. मै१. मै३. अ. अ१ - ‘उत्तरे षोडशी ’ नास्ति; मै२ - षोडशे । २९-२९. मै. मै२. मै३. अ. अ१ - ‘ यत् इति ’ नास्ति । ३०. मै२ - अप्यग्नी । ३१. मै२ - एवाह्नः ।

४०. म - ‘ एव ’ नास्ति । ४१. अ. आ. क. पा. इ. वा. वै. म - तदुत्तर°, मै - य उत्तर° । ४२. अ. आ. क. पा. इ. वा. वै. म - ह्यत्र । ४३. अ. आ. क. पा. इ. वा. मै. वै. - ततो । ४४. शृ१ - ततः । ४५. शृ१ - वैश्वानराख्यम् । ४६. म - ‘ ऋचम् ’ नास्ति ।

अहीनेषु द्विरात्रविधिः]

समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनु(३) पद्येतेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानैवार्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनं

समाने । अर्धमास इत्यर्ध-मासे । स्याताम् । अन्यतरस्य । अह्नः । वीर्यम् । अन्विति (३) । पद्येत । इति । अमावास्यायामित्यमा-वास्यायाम् । पूर्वम् । अहः । भवति । उत्तरस्मिन्नित्युत्-तरस्मिन् । उत्तरमित्युत्-तरम् । नाना । एव । अर्धमासयोरित्यर्ध-मासयोः । भवतः । नानावीर्ये इति नाना-वीर्ये । भवतः । हविष्मन्निधनमिति हविष्मत्-निधनम् ।

[V]इति यावत् । तस्मात् [V]अमावास्यायां [V]पूर्वम् [V]अहः [V]भवति । [V]उत्तरस्मिन् यजनीये [३२]अह्नि द्वितीयम् [३३]अहर्भवति । [३४-] एवं क्रियमाणे [-३४] [V]नाना भूतयोः पृथग्भूतयोः [V]अर्धमासयोः [३५]कृते [V]भवतः । [३६-] ततश्च [V]नानावीर्ये नानाफले भवतः [-३६] । ' हविष्मन्निधनम् ' [३७]इति । [३८]हविष्मच्छब्दवत् [३९-] हविष्मत् निधनं स्तोमो यस्य [-३९] तत् [V]हविष्मन्निधनं [४०-V]पूर्वम्

शुक्लः कृष्णो [४७]वैक एव पक्षः [४८]समानोऽर्धमासः । तस्मिन्नेव यद्युभे अहनी [V]स्यातां तदानीमेकपक्षगतत्वादेकस्य [V]अह्नः यावत् [V]वीर्यं तावदेव भवेत् । इतरस्य वीर्यं [४९]तु [५०]लुप्येत । अतः कृष्णपक्षस्यान्तिमदिने प्रथमम् [V]अहः कर्तव्यम् । शुक्लपक्षस्य प्रथमदिने द्वितीयमहः । एवं सति भिन्नार्धमासवर्तित्वाद्भिन्नवीर्ये [V]भवतः ॥

हविष्मदिति ॥ अथ दिनभेदेन [५१]निधनविशेषं विधत्ते - ' हविष्मन्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै ' इति ॥ पञ्चधा विभक्तस्य साम्नः पञ्चमभागो निधनम् । [५२]हविष्मच्छब्दरूपं निधनं यस्मिन्नहनि तत् [V]हविष्मन्निधनं, पूर्वदिने [५३]हविष्मदिति शब्दः प्रयोक्तव्य इत्यर्थः । एवमितरत्रापि [५४-] उत्तरस्मिन्नहनि हविष्कृच्छब्द इत्यर्थः [-५४] । निधनयोर्द्वित्वात् पादसद्दशत्वेन [V]प्रतिष्ठित्यै संपद्यते ॥

अत्र मीमांसा -

दशमाध्यायस्य पञ्चमपादे [५५]चिन्तितम्

---

३२. मै२ - ' अह्नि ' नास्ति । ३३. मै२ - ' अहर्भवति ' नास्ति । ३४. अ१ - अहर्गणे । ३५. मै. मै२. मै३. अ - कृतौ । ३६. मै. मै२. मै३. अ - ' ततश्च - - - - भवतः ' नास्ति । ३७. अ१. मै१. - भवति । ३८. मै१ - °ष्मच्छन्दवत् । ३९-३९. मै - ' हविष्मत् - - - - यस्य ' नास्ति । ४०-४०. मै१ - एवं हविष्मन्निधनमुत्तरमहः ।

---

४७. इ. वै - वा । ४८. वै - समार्धमासः । ४९. वा - नु , शृ१. पा. म. मै - ' तु ' नास्ति । ५०. वै - व्येत । ५१. शृ१ - नियम° । ५२. शृ१ - हविष्मन्रूपम् । ५३. म - हविष्यदिति । ५४-५४. शृ१. अ. पा. क. इ. वा. वै. म. मै - ' उत्तरस्मि° - - - - इत्यर्थः ' नास्ति । ५५. क. आ - चतुर्थाधिकरणे चिन्तितम् । ५६. अ. पा. इ. वा. वै - क्रतुः ।

पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै ॥ ४ ॥

(उत्तरेण रथन्तरं पूर्वेऽन्वेकविꣳशतिश्च)

पूर्वम् । अहः । भवति । हविष्कृन्निधनमिति हविष्कृत्-निधनम् । उत्तरमित्युत्-तरम् । प्रतिष्ठित्या इति प्रति-स्थित्यै ॥ ४ ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[V]अहः [-४०] । एवं [V]हविष्कृन्निधनम् [V]उत्तरम् [V]अहः । तत् [V]प्रतिष्ठित्यै भवति द्रष्टृभ्यां संबन्धेन अह्नोः स्थिरत्वं भवति । एतेनाङ्गिरसेन सर्वे द्विरात्रा व्याख्याताः ॥

॥ [४१-] इति सप्तमे प्रथमे चतुर्थोऽनुवाकः [-४१] ॥

" द्विरात्रादौ द्वादशाहप्रायणीयादिकः [५६]क्रमः ।
आद्यन्तौ वर्जयित्वा [५७]वा विशेषाभावतोऽग्रिमः ॥
द्वादशाहे द्वितीयस्य द्विरात्रे प्रथमत्वतः ।
[५८]जागतस्यान्तरायाच्च विध्यन्तो दशरात्रगः " ॥ (जैन्या १०.५.४-५)

अहीनरूपस्य द्वादशाहस्य विकृतयो द्विरात्रत्रिरात्रादयः । तेषु किं द्वादशाहस्य प्रथममहः [५९]प्रायणीयसंज्ञकमारभ्य क्रमेण [६०]विध्यन्तः प्रवर्तते, किंवा प्रायणीयोदयनीयावाद्यन्तौ वर्जयित्वा तन्मध्यगतस्य [६१]दशरात्रस्य विध्यन्तः प्रवर्तते इति संशयः । ईदृशमहरुपादेयमीदृशं [६२]वर्जनीयमिति विशेषनियामकाभावादादित आरभ्य प्रवर्तत इति पूर्वः पक्षः । [६३-] द्विरात्रं प्रकृत्यैवम् [-६३] आम्नायते - [६४-] " यत् प्रथमं तद्द्वितीयं यद्द्वितीयं तत् तृतीयम् ' [-६४] इति । अयमर्थः [६५] द्विरात्रस्य यत् प्रथममहरनुष्ठेयं तद्द्वादशाहस्य द्वितीयमिति । एवमुत्तरत्रापि योज्यम् । तदेतत् प्रायणीयवर्जने लिङ्गम् । [६६]तथा जगतीमन्तर्यन्तीति जागतस्याह्नोऽन्तराय आम्नायते । तच्च वर्जने लिङ्गम् । एवमादिभिर्लिङ्गैरुभयं वर्जयित्वा[६७]अवशिष्टो विध्यन्तो यत्र यावानपेक्षित [६८]तत्र तावान् [६९]प्रवर्तयितव्य [७०-] इत्यर्थः अवगन्तव्यः [-७०] ॥

४१-४१. मै१ - इति सप्तमे प्रथमचतुर्थः ।

५७. म - तु , मै - च । ५८. अ. पा. इ. वा. वै - हि गतस्य । ५९. इ. वा. म. वै - प्रायणीयसंज्ञिक° । ६०. अ. इ. वा. म. वै - विधितः । ६१. अ. आ. क. पा. इ. वा. वै - ' दशरात्रस्य ' नास्ति । ६२. म - अहर्वर्जनीयमिति, योजनीयमिति । ६३-६३. शृ१. मै - द्विरात्रप्रकरण एवम् , इ. वा. वै - द्विरात्र प्रकृता एवम् । ६४-६४. शृ१ - तत्प्रथममेतद्द्वितीयं द्वितीयेऽत्र तृतीयम् । ६५. वा - त्रिरात्रस्य । ६६. पा. इ. वा. वै. म - यथा । ६७. शृ१. मै - अवशिष्टस्य । ६८. इ. वा. वै - ' तत्र ' नास्ति । ६९. शृ१ - प्रवर्तते, म - वर्तते । ७०-७०. अ. आ. क. पा. इ. वा. वै. मै. शृ१ - इत्यवगन्तव्यम् ।

अहीनेषु द्विरात्रविधिः]

[७१]तत्रैवाऽन्यच्चिन्तितम् -

“ द्विरात्रेऽङ्गिरसां षोडश्यप्राप्तः किं विधीयते ।
परिसंख्यायते [७२]वाऽथश्चोदकाच्छीघ्रबुद्धितः ॥
[७३]अनारभ्यविधेः प्राप्तौ परिसंख्याऽतिदेशतः ।
विकल्पोऽन्यद्विरात्रेषु प्रोक्तं वृत्तिकृतो [७४]मतम् ” ॥ (जैन्या १०.५.१८-१९)

सन्ति बहवो द्विरात्राः । तेष्वङ्गिरसां द्विरात्रे श्रूयते - “ वैखानसं पूर्वेऽहन्त्साम भवति, षोडश्युत्तरे ” (तैसं ७.१.४) इति । सोऽयं षोडश्यप्राप्तः [७५]सन् विधीयते । न च चोदकात् प्राप्तिः शङ्कनीया, प्रत्यक्षवचनस्य शीघ्रप्रवृत्तेः । चोदको ह्यनुमानिकत्वेन विलम्बित इति प्राप्ते ब्रूमः - मा भूच्चोदकः । अस्ति ह्यनारभ्याधीतं प्रत्यक्षं विध्यन्तरम् [७६]“ उत्तमेऽहन् द्विरात्रस्य गृह्यते ” इति । [७७]तेन सर्वेषु द्विरात्रेषु [७८]प्राप्तः सन् अङ्गिरसां द्विरात्र एव नान्येषु [७९]द्विरात्रेष्विति परिसंख्यायते । ततोऽङ्गिरसां द्विरात्रे नियमेन षोडशी गृह्यत इतरेष्वतिरात्रविकृतित्वेनातिदेशाद्विकल्प्यते । तदेतद्वृत्तिकारमतम् ।

तत्रैव भाष्यकारमतेनाऽऽरचयति -

“ परिसंख्या पूर्वपक्षे, न सा युक्ता त्रिदोषतः ।
प्राप्तस्या(स्यैवा)नुवादेन [८१]विधेये [८२] सा न शक्यते [८२] ” ॥ (जैन्या १०.५.२०)

वृत्तिकारस्य सिद्धान्तरूपा [८३] या परिसंख्या [८३] सैव भाष्यकारमते पूर्वः पक्षः । सिद्धान्तस्तु [८४]नैव । षोडश्युत्तर इत्ययं विधिरेव न भवति । विधित्सितवैखानससामवाक्यशेषत्वेनार्थवत्त्वात् । अतः [८५] परिसंख्या दोषत्रयोपेता नात्र कल्पनीया [८५] । प्राप्तस्य विध्यर्थस्य परित्यागः । अप्राप्तस्य निषेधार्थस्य स्वीकारः । अन्यत्र प्राप्तस्य [८६]बाध इति दोषत्रयम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥

---

७१. क. आ - तत्रैव त्रयोदशाधिकरणे । ७२. अ. पा. इ. वा. वै - योद्यश्चो° । ७३. म - अनारम्भविधौ, इ. वा. वै - अनारभ्यं विधौ । ७४. म - मतः । ७५. अ. पा. इ. वा. वै - सन् किम् । ७६. आ - उत्तरेऽहन् । ७७. आ - तेषु (न), वा - तेषु । ७८. अ - अप्राप्तः । ७९. वा - द्विरात्रेति । ८०. आ - पूर्वपक्षे (क्षो), इ. वै - पूर्वपक्षौ । ८१. मै - विधेयम् । ८२-८२. शृ१ - साम यस्य ते, मै - साम शस्यते । ८३-८३. वा - परिसंख्यया, इ - या परिसंख्ययाः (?) । ८४. म - नैति, आ. मै. वै - ‘ नैव ’ नास्ति । ८५-८५. शृ१. मै - परिसंख्यात्वं दोषत्रयोपेतं नामात्वं (मै - नात्र) कल्पनीयम् , म - परिसंख्या दोषत्रयोपेतं नात्र विकल्पनीयम् । ८६. अ. पा. इ. वा. वै - बोधः ।

आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत् स इमामपश्यत् तां वराहो भूत्वाऽहरत् तां विश्वकर्मा भूत्वा व्यमार्ट्

आपः । वै । इदम् । अग्रे । सलिलम् । आसीत् । तस्मिन् । प्रजापतिरिति प्रजा-पतिः । वायुः । भूत्वा । अचरत् । सः । इमाम् । अपश्यत् । ताम् । वराहः । भूत्वा । एति । अहरत् । ताम् । विश्वकर्मेति विश्व-कर्मा । भूत्वा । वीति । अमार्ट् ।

'आपो वा' इत्यादि ॥ अथ [१-] त्रिरात्रा विधीयन्ते [-१] । गर्गत्रिरात्रः अश्वमेधः बैदत्रिरात्रः [२]छन्दोमपवमानः पराक इति [३-] पञ्च त्रिरात्राः [-३] । तत्र प्रथमं गर्गत्रिरात्र आरभ्यते [४-] 'आपो वा इदमग्रे सलिलमासीत्' इति [-४] । [V]इदं विश्वम् [V]अग्रे आदौ [V]सलिलम् [V]आसीत् प्रत्यस्तमितसमस्तविकारं केवलं जलमेवासीदिति [५]प्रतिपादनार्थम् । [६-] आपः सलिलमिति द्वयोरुपादानमाहुः [-६] यदिदं सलिलविकारं क्षित्यादि एतत्सर्वमग्रे [V]आपः एवासीदिति । [V]तस्मिन् उदके [V]प्रजापतिः सिसृक्षुः [V]वायुः [७][V]भूत्वा [V]अचरत् । [V]सः [८]वायुरूपः प्रजापतिः [V]इमां पृथिवीम् अन्तर्जले [९][V]अपश्यत् । [V]तां पृथिवीं वायुरूपमुत्सृज्य [V]वराहः [V]भूत्वा जलस्योपरि [V]आहरत् । आहृत्य वराहरूपमुत्सृज्य [V]विश्वकर्मा [V]भूत्वा [१०-][V]तां [V]पृथिवीं [-१०] [V]व्यमार्ट् विस्तारितवान् ।

आप इति ॥ चतुर्थे द्विरात्रोऽभिहितः । अथ त्रिरात्रं विधातुं काचिदाख्यायिकोच्यते । तस्यां चाख्यायिकायामादौ पृथिव्युत्पत्तिं दर्शयति - 'आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत् स इमामपश्यत् तां वराहो भूत्वाऽऽहरत् तां विश्वकर्मा भूत्वा व्यमार्ट् साऽप्रथत सा पृथिव्यभवत् तत् पृथिव्यै पृथिवित्वम्' इति ॥ [V]इदम् इतीदानीं दृश्यमानं गिरिनदीसमुद्रादिकं जगत् पृथिव्युत्पत्तेः पूर्वं [V]सलिलम् [V]आसीत् । [V]तस्मिन् एव सलिले केवलाः [V]आपः एव, न तु भूतान्तरं तत्कार्यं वा किञ्चिदपि आसीत् । तदानीं [V]प्रजापतिः मूर्तस्य शरीरस्याऽवस्थातुं स्थानाभावाद्वायुरूपः [V]भूत्वा तस्मिन् सलिले सर्वत्र [V]अचरत् ।

---

१. मै. मै१ - त्रिरात्रो विधीयते । २-२. मै. मै२. मै३. अ - छन्दोमनपव० । ३-३. मै२ - 'पञ्च त्रिरात्राः' नास्ति । ४-४. मै२ - आप इत्यादि । ५. [अस्माभिः शुद्धतामापाद्य प्रपूरितोऽयमंशः । मै - मुद्रितपुस्तके लिखितपुस्तकेषु सर्वेषु च 'प्रतिपादनार्थः' इति लभ्यते ।]। ६. मै. मै२. मै३. अ. अ१ - अन्य आहुः । ७. मै१ - हत्वा । ८. मै१ - वायुः । ९. [अस्माभिः शुद्धतामापादितोऽयमंशः ।], मै. मै२. मै३. अ. अ१ - अपब्यत्, मै१ - उपविश्य । १०-१०. मै१ - 'तां पृथिवीम्' नास्ति ।

साऽप्रथत सा पृथिव्यभवत् तत् पृथिव्यै पृथिवित्वं तस्यामश्राम्यत् प्रजापतिः स देवानसृजत

सा । अप्रथत । सा । पृथिवी । अभवत् । तत् । पृथिव्यै । पृथिवित्वमिति पृथिवि-त्वम् । तस्याम् । अश्राम्यत् । प्रजापतिरिति प्रजा-पतिः । सः । देवान् । असृजत ।

मृजेर्लिङि तिपि " मृजेर्वृद्धिः " (पा७.२.११४) इति वृद्धिः । विश्वं कर्मास्येति विश्वकर्मा विश्वनिर्माणकुशलः । " बहुव्रीहौ विश्वं संज्ञायाम् " (पा ६.२.१०६) इति पूर्वपदान्तोदात्तत्वम् । ततः Vसा पृथिवी [११]Vअप्रथत विस्तीर्णाऽभवत् । [१२]Vतत् तस्याः [१३]पृथिव्याः Vपृथिवित्वम् । "[१४-]त्वे च " (पा ६.३.६४) ह्रस्वत्वम् [-१४], " प्रथेष्षिवन् संप्रसारणं च " (उसू १.१५०) इति [१५]षिवन् प्रत्ययः । [१६-] पृथिवीशब्दो ङीषन्तोऽन्तोदात्तः [-१६] ॥

'तस्याम्' इत्यादि ॥ ततः Vप्रजापतिः Vतस्याम् Vअश्राम्यत्, तपोऽतप्यत । ततः Vसः Vदेवान् Vअसृजत वस्वादीन् । अथ ते Vदेवाः Vप्रजापतिम् Vअब्रुवन् Vप्र Vजायामहै [१७]प्रजा

चरित्वा च सलिले निमग्नां भूमिं दृष्ट्वा स्वयं Vवराहः Vभूत्वा दंष्ट्राग्रेण Vतां भूमिं जलस्योपरि Vआहरत् । आहृत्य च वराहरूपमुत्सृज्य Vविश्वकर्मा भूत्वा विशेषेण मार्जनं कृत्वा तत्रत्यं द्रवमपनीय तां विस्तारितवान् । तत इयं दृश्यमाना सर्वप्राण्याधारभूता Vपृथिवी Vअभवत् । प्रथनादेव पृथिवीनाम संपन्नम् ॥

तस्यामिति ॥ अथ देवसृष्टिं [१]गोसृष्टिं च क्रमेण दर्शयति - 'तस्यामश्राम्यत् प्रजापतिः स देवानसृजत वसून् रुद्रानादित्यान् ते देवाः प्रजापतिमब्रुवन् प्रजायामहा इति सोऽब्रवीद्यथाऽहं युष्माꣳस्तपसाऽसृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाश्राम्यन् ते संवत्सर एकां गामसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्रायच्छन्नेताꣳ रक्षध्वमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रतम्यभवत्' इति ॥ Vतस्यां भूमौ Vसः Vप्रजापतिः [२]स्वेनैव शरीरेणाऽवस्थाय सिसृक्षुः Vअश्राम्यत् तपः

११. मै२ - पृथुतरा । १२. मै१ - 'तत्' नास्ति । १३. मै. मै२. मै३. अ. अ१ - 'पृथिव्याः' नास्ति । १४-१४. मै. मै२. मै३. अ. अ१ - 'त्वे ---- ह्रस्वत्वम्' नास्ति । १५. मै१ - वन्, मै२ - विपत् । १६-१६. मै२ - 'पृथिवी° ---- °न्तोदात्तः' नास्ति । १७. मै. मै२. मै३. अ. अ१ - प्रजाम् ।

१. शृ१. इ. वै - 'गोसृष्टिम्' नास्ति । २. म - तेनैव ।

वसून् रुद्रानादित्यान् ते देवाः प्रजापतिमब्रुवन् प्र जायामहा इति सोऽब्रवीत् (१) यथाऽहं युष्मा ँस्तपसाऽसृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाश्राम्यन्

वसून् । रुद्रान् । आदित्यान् । ते । देवाः । प्रजापतिमिति प्रजा-पतिम् । अब्रुवन् । प्रेति । जायामहे । इति । सः । अब्रवीत् (१) । यथा । अहम् । युष्मान् । तपसा । असृक्षि । एवम् । तपसि । प्रजननमिति प्र-जननम् । इच्छध्वम् । इति । तेभ्यः । अग्निम् । आयतनमित्या-यतनम् । प्रेति । अयच्छत् । एतेन । आयतनेनेत्या-यतनेन । श्राम्यत । इति । ते । अग्निना । आयतनेनेत्या-यतनेन । अश्राम्यन् ।

उत्पादयामहे Vइति । Vसः Vअब्रवीत् प्रजापतिः Vयथा Vअहं Vयुष्मान् Vतपसा Vअसृक्षि सृष्टवान् । " लिङ्सिचौ " (पा १.२.११) इति [१८]कित्वम् । एवं यूयमपि Vतपसि वर्तमानाः Vप्रजननम् Vइच्छध्वम् Vइति । यद्वा - [१९]प्रयोजकनिमित्तसप्तमी, तपसा [२०]- निमित्तेति । इच्छध्वमिति -[२०] व्यत्ययेनात्मनेपदम् ॥

'तेभ्यः' इत्यादि ॥ एवमुक्त्वा Vतेभ्यः Vअग्निम् [२१]आयतनस्थानं तपःस्थानमौपासनाख्यं प्रायच्छत्, Vएतेन Vआयतनेन तपः कुरुतेति । Vते च तथाऽकुर्वत । ते संवत्सरान्तेन पाकयज्ञेन Vएकां Vगाम् Vअसृजन्त । Vतां प्रथमं Vवसुभ्यः दत्तवन्तः [२२]Vएतां Vरक्षध्वम् Vइति, [२३]- वयं

कृतवान् । तस्माच्च [३]तपसः सामर्थ्यात् -[३] त्रीन् वस्वादिदेवगणान् Vअसृजत । Vते च वस्वादयः Vप्रजापतिं प्रति प्रजोत्पादनोपायं पप्रच्छुः । Vस च प्रजापतिः [४]- मद्वत् तपसि -[४] कृते सति पश्चाद्यूयमुत्पादनमिच्छतेत्युक्त्वा [५]- होमाख्यस्य तपस -[५] आधारभूतम् Vअग्निं दत्त्वा तेनाग्निना होमलक्षणं [६]तपः कुरुतेत्युक्तवान् । Vते च Vसंवत्सरं तथा कृत्वा तदन्ते सर्वेऽपि Vएकां Vगाम् Vअसृजन्त । Vतां च गां स प्रजापतिः Vवसुभ्यः रक्षणार्थं

---

१८. मै. मै२. मै३. अ. अ१ - कुत्वम् । १९. मै१ - प्रतिप्रयोजक° । २०-२०. अ१ - नैच्छध्वमिति, मै. मै२ - निमित्तेनेति । २१. अ१ - आयतनं स्थानम् । २२. मै१. अ१ - एनाम् । २३-२३. मै२ - 'वयं - - - - ध्वमिति' नास्ति ।

३-३. अ. आ. पा. इ. वा. वै. मै - तपःसामर्थ्यात् । ४-४. शृ१- मध्यंदिनतपसि । ५-५. म - होमाख्यतपसः । ६. अ - 'तपः' नास्ति ।

ते संवत्सर एकां गामसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्रायच्छन्नेताꣳ रक्षध्वमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च (२) शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रतम्यभवत्

ते । संवत्सर इति सं-वत्सरे । एकाम् । गाम् । असृजन्त । ताम् । वसुभ्य इति वसु-भ्यः । रुद्रेभ्यः । आदित्येभ्यः । प्रेति । अयच्छन् । एताम् । रक्षध्वम् । इति । ताम् । वसवः । रुद्राः । आदित्याः । अरक्षन्त । सा । वसुभ्य इति वसु-भ्यः । रुद्रेभ्यः । आदित्येभ्यः । प्रेति । अजायत । त्रीणि । च (२) । शतानि । त्रयस्त्रिꣳशतमिति त्रयः- त्रिꣳशतम् । च । अथ । सा । एव । सहस्रतमीति सहस्र-तमी । अभवत् ।

तप्यामहे इति । ते च [V]वसवः [V]ताम् अरक्षन् । [V]सा च तेभ्यः [V]प्राजायत प्रजा [२४]अजनयत् । कियतीः ? [V]त्रीणि [V]च [V]शतानि [V]त्रयस्त्रिंशतं [V]च । त्रयश्च त्रिंशच्च [२५]त्रयस्त्रिंशत् । " संख्या " (पा ६.२.३५) इति पूर्वपदप्रकृतिस्वरत्वम् । एवं रुद्रेष्वादित्येषु द्रष्टव्यम् । यथा - तां [V]रुद्रेभ्यः [२६][V]प्रायच्छन् एतां रक्षध्वमिति [-२३] । तां च रुद्रा अरक्षन् । सा च रुद्रेभ्यः प्राजायत त्रीणि च शतानि त्रयस्त्रिंशतं च । [२७]तथा [V]आदित्येभ्यः प्रायच्छन् एतां रक्षध्वमिति । ते च तामरक्षन् । सा चादित्येभ्यः प्राजायत त्रीणि च शतानि त्रयस्त्रिंशतं च । एवं समुदायो ददाति [२८]अवयवः प्रतिगृह्णाति । [२९-] वाक्यत्रयमिदं तन्त्रेण निर्दिष्टम् [-२९] । [३०]एवं वसुरुद्रादित्यानां संभूय एकोनसहस्रं गावोऽभवन् । अथ [V]सा [V]एव गौः [V]सहस्रतमी सहस्रस्य पूरणी [V]अभवत् । " नित्यं [३१-] शतादि° " (पा ५.२.५७) इत्यादिना डट् , तमडागमः [-३१] (पा ५.२.५६) ॥

दत्तवान् । सा च रक्षिता सती वस्वर्थं गवां शतत्रयं [V]त्रयस्त्रिंशतं चोत्पादयामास । ततः प्रजापतिः [७-]तामेव गां [V]रुद्रेभ्यः [-७] दत्तवान् । रुद्रार्थमपि [८-] सा तथैवोत्पादयामास [-८] एवमादित्यार्थमप्युत्पादयामास । तमिमं पर्यायत्रयं संगृह्य श्रुतिरेकेनैव वाक्येनोदाजहार । तत्र त्रेधा वाक्यं विभज्य योजयितव्यम् । एवं सत्येकोनसहस्रं गवां [९-] संपन्नम् । या [V]इयं सर्वमाता गौः [V]सा [V]एव [-९] सहस्रसंख्यापूरणी [V]अभवत् ॥

२४. मै१- अजनयन् । २५. मै१ - त्रयस्त्रिंशतम् । २६. मै१ - प्रायच्छत् । २७. मै२ - तथा ताम् । २८. मै१ - अवयः । २९-२९. मै१ - एवं वाक्यत्रयमन्तरेण द्रष्टव्यम् । ३०. अ१ - 'एवम्' नास्ति । ३१-३१. मै१ - एतेत्यादिना डाः तमडागमः, अ१ - शतेत्यादिना मडागमः ।

७-७. म - 'तामेव गां रुद्रेभ्यः' नास्ति । ८-८. म - सैवोत्पादयामास । ९-९. शृ१ - संपत्तये यं सर्वमाता गौः सैव, अ. आ. पा. इ. वा. वै - संपन्नं येयं सहस्रतमी गौः सेयम् ।

ते देवाः प्रजापतिमब्रुवन्त्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत् त इमं लोकमजयन् तच्चाददुः स उक्थ्येन रुद्रानयाजयत् तेऽन्तरिक्षमजयन् तच्चाददुः सोऽतिरात्रेणाऽऽदित्यानयाजयत् तेऽमुं लोकमजयन्

ते । देवाः । प्रजापतिमिति प्रजा-पतिम् । अब्रुवन् । सहस्रेण । नः । याजय । इति । सः । अग्निष्टोमेनेत्यग्नि-स्तोमेन । वसून् । अयाजयत् । ते । इमम् । लोकम् । अजयन् । तत् । च । अददुः । सः । उक्थ्येन । रुद्रान् । अयाजयत् । ते । अन्तरिक्षम् । अजयन् । तत् । च । अददुः । सः । अतिरात्रेणेत्यति-रात्रेण । आदित्यान् । अयाजयत् । ते । अमुम् । लोकम् । अजयन् ।

'ते देवाः' इत्यादि ॥ [V]अथ [३२][V]ते देवाः [V]प्रजापतिम् [V]अब्रुवन् अनेन [V]सहस्रेण अस्मान् [V]याजय [V]इति । [V]सः [V]अग्निष्टोमेन [V]वसून् [V]अयाजयत् । [V]ते वसवः [V]इमं लोकम् [३३][V]अजयन् । [३४]तच्च [३५]आत्मीयत्रयस्त्रिंशदधिकशतत्रयं गोधनं दत्तवन्तः दक्षिणां कृतवन्तः । अथ प्रजापतिः [V]उक्थ्येन [V]रुद्रान् [V]अयाजयत् [३६]इत्यादि । गतम् ॥

त इति ॥ [१०]अथ [११]गोसहस्रदक्षिणाकेन त्रिरात्रयागेन(ण) [१२]याजनं दर्शयति - 'ते देवाः प्रजापतिमब्रुवन्त्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत् त इमं लोकमजयन् तच्चाददुः स उक्थ्येन रुद्रानयाजयत् तेऽन्तरिक्षमजयन् तच्चाददुः सोऽतिरात्रेणादित्यानयाजयत् तेऽमुं लोकमजयन् तच्चाददुः' इति ॥ [१३]वसुरुद्रादित्याः सर्वे मिलित्वा [१४]गोसहस्रदक्षिणाकयज्ञार्थं [V]प्रजापतिं प्रार्थयामासुः । [V]सः च प्रजापतिर्देवगणत्रयं विभज्य त्रिषु [१५]दिनेषु क्रमादग्निष्टोमोक्थ्यातिरात्रैर्याजितवान् । द्वादशस्तोत्रोऽग्निष्टोमः । पञ्चदशस्तोत्र उक्थ्यः । [१६]एकोनत्रिंशत्स्तोत्रोऽतिरात्रः । [१७-][V]ते च त्रैलोक्यत्रयम् [V]अजयन् [-१७] । स्वकीयं [१८]स्वकीयं [V]तत् तद्गोधनं [V]च दक्षिणार्थमृत्विग्भ्यो दत्तवन्तः ॥

---

३२. मै. मै१. मै३. अ. अ१ - 'ते' नास्ति । ३३. मै१ - असृजन्त । ३४. मै१. अ१ - 'तच्च' नास्ति । ३५. मै१. अ - °दधिकशतं त्रयसंख्यम् । ३६. मै२ - इति ।

---

१०. अ. आ. इ. पा. वा. वै - अतः. म - 'अथ' नास्ति । ११. अ. आ. इ. वा. पा. वै. म - सहस्रदक्षिणाकेन । १२. वा. वै. इ - योजनम् । १३. म - 'वसुरुद्रादित्याः' नास्ति । १४. म. मै - °कयागार्थम् । १५. इ. वै - 'दिनेषु' नास्ति । १६. इ. वै - एकोनविंश° । १७-१७. म - 'ते - - - - °मजयन्' नास्ति । १८. शृ१. मै - 'स्वकीयम्' नास्ति ।

तच्चाददुस्तदन्तरिक्षं (३) व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति

तत् । च । अददुः । तत् । अन्तरिक्षम् (३) । व्यवैर्यतेति वि-अवैर्यत । तस्मात् । रुद्राः । घातुकाः । अनायतना इत्यना-यतनाः । हि । तस्मात् । आहुः । शिथिलम् । वै । मध्यमम् । अहः । त्रिरात्रस्येति त्रि-रात्रस्य । वीति । हि । तत् । अवैर्यतेत्यव-ऐर्यत । इति ।

'तदन्तरिक्षम्' इत्यादि ॥ अथ Vतत् Vअन्तरिक्षं Vव्यवैर्यत [37]विशीर्णमभवत् । [38-]"ईर 卐प्रेरणे", कर्मणि लङ्, यकि "गतिर्गतौ" (पा ८.१.७०) इति गतेरनुदात्तत्वम्, [39]उदात्तवत्या गत्या आख्यातसमुदायेन समासः । Vतस्मात् Vरुद्राः Vघातुकाः हननशीलाः । "लषपत°" (पा ३.२.१५४) [40]इत्यादिना उकञ् । Vअनायतनाः Vहि विशीर्णस्थानत्वात् । Vतस्मात् Vत्रिरात्रस्य Vमध्यमम् Vअहः Vशिथिलम् इत्याह । हेतुं चाह - 'वि हि तदवैर्यत' इति । तन्मध्यममहः Vव्यवैर्यत [41]विशीर्णमभवत्[-38] । फलस्य विशीर्णत्वात् । "हि च" (पा

तदिति ॥ अथोक्थ्यरूपे मध्यमेऽहनि [19-]कांश्चिच्छस्त्रविशेषान्[-19] विधत्ते - 'तदन्तरिक्षं व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्नः आज्यं भवति संयानानि सूक्तानि शꣳसति षोडशिनं शꣳसत्यह्नो धृत्या अशिथिलंभावाय' इति ॥ यदन्तरिक्षं रुद्रैर्जितं Vतत् Vअन्तरिक्षं Vव्यवैर्यत विशीर्णमभूत् । गृहरूपं लोकसंस्थानं भग्नमभूदित्यर्थः । यस्माद्रुद्राणामायतनम् [20-]अन्तरिक्षलोकसंस्थानं विशीर्णमभूत्[-20] Vतस्मात् [21]आयतनरहिताः Vरुद्राः

---

३७. मै. मै१. मै३. अ. अ१ - विशीर्णमधोऽपतत् । ३८-३८. मै२ - 'ईर ---- °मभवत्' नास्ति । 卐[ईरधातुर्यद्यपि भट्टभास्करमिश्रैः प्रेरणार्थे उक्तः तथापि धातुपाठे तावत् "ईर गतौ कम्पने च" (धापा १०४३), "ईर क्षेपे" (धापा १८३५) इत्यर्थेषु दृश्यते ।]। ३९. अ१ - उदात्तवता । ४०. अ१ - इति । ४१. मै१ - विशीर्णः भवत् ।

१९-१९. शृ१ - कांश्चिच्छ सत्रविशेषान्, अ. पा. इ. वा. वै - काश्चिच सविशेषान्, आ - कांश्चित् शंसनवि° । २०-२०. म - 'अन्तरिक्ष° ---- °मभूत्' नास्ति, आ - °रिक्षलोकस्थानं विशीर्ण°, वा - °रिक्षलोकस्याविशीर्ण°, इ - °रिक्षलोकस्थनं विशीर्णा° । २१. अ. आ. पा. इ. वा. वै - आयतनाभावात् ।

त्रैष्टुभं मध्यमस्याह्न आज्यं भवति संयानानि सूक्तानि शꣳसति षोडशिनꣳ शꣳसत्यह्नो धृत्या अशिथिलंभावाय तस्मात् त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र

त्रैष्टुभम् । मध्यमस्य । अह्नः । आज्यम् । भवति । संयानानीति सं-यानानि । सूक्तानीति सु-उक्तानि । शꣳसति । षोडशिनम् । शꣳसति । अह्नः । धृत्यै । अशिथिलंभावायेत्यशिथिलं-भावाय । तस्मात् । त्रिरात्रस्येति त्रि-रात्रस्य । अग्निष्टोम इत्यग्नि-स्तोमः । एव । प्रथमम् । अहः । स्यात् । अथ । उक्थ्यः । अथ । अतिरात्र इत्यति-रात्रः ।

८.१.३४) इति [४२]निघातप्रतिषेधः । " तिङि चोदात्तवति " (पा ८.१.७१) इति गतेरनुदात्तत्वम् , समासश्च । तस्मात् [V]मध्यमस्य [V]अह्नः [V]आज्यं [V]त्रैष्टुभं [V]भवति । पूर्ववत् होतुराज्यमिति वेदितव्यम् । [V]संयानानि [V]सूक्तानि [V]शंसति तेषां महत्त्वात् । षोडशिनं च शस्त्रं [V]शंसति [V]अह्नः दुर्बलत्वात् । तस्य [V]धृत्यै धारणार्थम् , [V]अशिथिलंभावाय । छान्दसः [४३]खश् (पा ३.२.२५) । यस्मादेवम् [४४]एनान् एतैः [४५]अयाजयत् [V]तस्मात् [V]त्रिरात्रस्य [४६]इत्यादि स्पष्टम् ॥

कोपाविष्टाः सन्तः सर्वत्र प्राणिघातिनोऽभवन् । यस्मात् फलभूतमन्तरिक्षं विशीर्णमभूत् [२२]तस्मात् [२३]तत्साधनमात्रं त्रिरात्रयागस्य [V]मध्यमम् [V]अहः केनापि वैकल्येन [V]शिथिलम् इत्येवमभिज्ञा आहुः । [२४-] न हि साधनशैथिल्यमन्तरेण फलशैथिल्यं भवति [-२४] । [२५-] तस्मात् [V]मध्यमस्य [V]अह्नः [-२५] [२६]दार्ढ्यै शैथिल्यपरिहाराय कानिचिच्छस्त्राण्यनुष्ठेयानि । त्रिष्टुप्छन्दस्कायामृच्युत्पन्नं [V]त्रैष्टुभं होतुराज्यशस्त्रं शंसनीयम् । तथा [२७]संयानाख्यानि दाशतय्यां प्रसिद्धानि [२८][V]सूक्तानि शंसेत् । तथा [२९-] षोडश्याख्यमपि शस्त्रं शंसेत् [-२९] ॥

तस्मादिति ॥ [३०]इत्थमाख्यायिकां प्रस्तुत्य [३१-] मध्यमेऽह्नि शस्त्रविशेषांश्च [-३१] विधाय त्रिरात्रयागस्याहर्विशेषान् विधत्ते - ' तस्मात् त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां

---

४२. मै२ - निघाताभावात् । ४३. मै१ - खमुङ् । ४४. मै१ - एताम् । ४५. मै१. अ१ - अयाजयन् । ४६. मै१ - इति ।

---

२२. अ - 'तस्मात्' नास्ति । २३. शृ१. मै - तत्साधनभूतस्य । २४-२४. अ. आ. पा. इ. वा. वै. म - 'न हि - - - - भवति' नास्ति । २५-२५. म - 'तस्मात् - - - - अह्नः' नास्ति । २६. अ. आ. पा. इ. वा. वै - दार्ढ्येन । २७. मै - संदानाख्यानि । २८. शृ१ - चोक्तानि । २९-२९. म - 'षोडशाख्य° - - - - शंसेत्' नास्ति, मै - °डशाख्यशस्त्रमपि शंसेत् । ३०. शृ१. मै - °माख्यायिकया । ३१-३१. अ. आ. पा. इ. वा. वै - मध्यमे विशेषांश्च, म - एवमाज्यविशेषं सूक्तविशेषांश्च ।

एषां लोकानां विधृत्यै त्रीणिंत्रीणि शतान्यंनूचीनाहमव्यंवच्छिन्नानि ददात्ये(४)षां लोकानामनु संतंत्यै

एषाम् । लोकानाम् । विधृत्या इति वि-धृत्यै । त्रीणिंत्रीणीति त्रीणि-त्रीणि । शतानिं । अनूचीनाहमित्यंनूचीन-अहम् । अव्यंवच्छिन्नानीत्यविं-अवच्छिन्नानि । ददाति (४) । एषाम् । लोकानाम् । अन्विति । संतंत्या इति सं-तत्यै ।

‘ त्रीणित्रीणि ’ इत्यादि ॥ [४७-]Vअनूचीनाहम् Vअव्यवच्छिन्नानि [-४७] Vददाति । उत्तमे [४८]अह्नि चत्वारिंशता । अन्वञ्चतीति “ ऋत्विक्° ” (पा ३.२.५९) इत्यादिना [४९]क्विन् , [५०-]“ अनिदिताम्° ” (पा ६.४.२४) इति नलोपः [-५०], “ विभाषाऽञ्चेः° ” (पा ५.४.८) इत्यादिना खः, “ चौ ” (पा ६.३.१३८) इति दीर्घत्वम् , [५१]अनूचीनाहं, समासे “ राजाहःसखिभ्यष्टच् ” (पा ४.५.९१) । Vएषां Vलोकानाम् Vअनु क्रमेण Vसन्तत्यै सन्तानार्थं तद्भवति ॥

लोकानां विधृत्यै ’ इति ॥ यस्माद्वस्वादिभिरहस्त्रयेण [३२-] लोकत्रयं जितं Vतस्मात् यजमानोऽपि लोकत्रयजयाय अहस्त्रयसंघातरूपं त्रिरात्रयागमनुतिष्ठेदित्यर्थः [-३२] ॥

त्रीणित्रीणीति ॥ यदुक्तं [३३-] सूत्रकारेण - “ सहस्रं [-३३] दक्षिणा त्रीणि शतानि त्रयस्त्रिंशतं च प्रथमेऽहनि ददात्येवं द्वितीये तृतीये च [३४]साहस्र्यतिरिच्यते ” (आपश्रौ २२.१५.६-८) इति तदिदं विधत्ते - ‘ त्रीणित्रीणि शतान्यनूचीनाहमव्यवच्छिन्नानि ददात्येषां लोकानामनु संतत्यै ’ इति ॥ [३५-] अनुक्रमेणाञ्चति प्रवर्तत इति [-३५] अनूचीनं, तादृशं च तदहश्च Vअनूचीनाहं प्रतिदिनमित्यर्थः । [३६-] प्रतिदिनम् Vअव्यवच्छिन्नानि [-३६] यथा भवन्ति तथा Vत्रीणित्रीणि Vशतानि Vददाति । [३७]त्रयस्त्रिंशत्संख्याया [३८]अप्येतदुपलक्षणम् । [३९-] तथा

४७-४७. मै१ - °चीनामन्वहं व्यव° । ४८. मै२ - अहनि । ४९. मै. मै२. मै३. अ - क्विप् । ५०-५०. मै२ - ‘ अनिदिताम् इति नलोपः ’ नास्ति । ५१. मै१ - अनूचीनामहः ।

३२-३२. आ - लोकत्रयजयायाहस्त्रयसंघातरूपमनुष्ठितं तस्मात् त्रिरात्रयागमनुतिष्ठेदित्यर्थः, म - लोकत्रयं जितं तस्मादेतल्लोकविजयाय सहस्रदक्षिणाकयागमनु°, अ. पा. इ. वा. वै - लोकत्रयजयायाहस्त्रयसंघातरूपं त्रिरात्रयागमनु° । ३३-३३. म - ‘ सूत्रका° - - - - सहस्रम् ’ नास्ति । ३४. शृ१ - साहस्र्यं निषेध्यते, म - सा वाक्पतिरिच्यते । ३५-३५. म - ‘ अनुक्र - - - - इति ’ नास्ति । ३६-३६. [अस्माभिः शुद्धतामापाद्योत्प्रेक्षितोऽयं पाठः ।], अ. आ. पा. इ. वा - प्रतिदिनमविच्छि°, वै - °मवच्छि°, मै - °मपिच्छि° । ३७. वै - °शत्संख्या । ३८. अ. पा - अथैतदु° । ३९-३९. म - °तथा - - - - दिने ’ नास्ति ।

दशतं न वि च्छिन्याद्विराजं नेद्विच्छिनदानीत्यथ

दशतम् । न । वीति । छिन्यात् । विराजमिति वि-राजम् । न । इत् ।
विच्छिनदानीति वि-छिनदानि । इति । अथ ।

‘दशतम्’ इत्यादि ॥ दशानां वर्गो दशत्, [५२-]“ पञ्चद्दशतौवर्गे वा ”[-५२] (पा ५.१.६०) इति निपात्यते । तं [V]न [V]विच्छिन्यात् दक्षिणां ददत् दशभ्यो [५३]न्यूनं [५४]न दद्यात् [V]विराजं [V]नेत् [V]विच्छिनदानि [V]इति विराजोऽन्नस्य विच्छित्तिर्मे मा भूदिति यावत् । “ निपातैर्यद्यदिहन्त°” (पा ८.१.३०) [५५]इत्यादिना निघाताभावः [-५५] । पूर्ववद्गतिस्वरसमासौ (पा ८.१.७१) । [५६-] अथ [५७]यस्मै एकां गां [५८-] दास्यन् स्यात् [-५८] द्वे [५९]वा पञ्च वा तत्र [-५६] कथं [६०-] भवितव्यम् ? [६१]अत्रोक्तमाचार्येण [-६०]“ यस्मा एकां गां दास्यन् स्यात् दशभ्यस्तेभ्यो दशतमपाकुर्यात् । यस्मै द्वे पञ्चभ्यः यस्मै पञ्च [६२-] द्वाभ्यामेवमा शतादा [६३]वा सहस्रात् [-६२] इति ” (आपश्रौ २२.१७.६-८) ॥

सत्येकैकस्मिन् दिने [-३९] [४०-] त्रयस्त्रिंशदधिकं गवां शतत्रयं दद्यादित्यर्थो भवति । एतच्च [-४०] लोकानां भूरादीनां संतत्यै भवति ॥

दशतमिति ॥ यदुक्तं सूत्रकारेण - [४१-]“ दक्षिणानयन्नन्यूना दशतो नयेत् ” (आपश्रौ २२.१७.५) इति, [४२]तद्विधत्ते ‘ दशतं न विच्छिन्याद्विराजं नेद्विच्छिनदानीति ’ इति ॥ [४३-] दशानां वर्गो दशत्तस्य वर्गस्य विच्छेदं [-४३] न कुर्यात् । [४४-] वेदेर्दक्षिणस्यां दिश्यवस्थिता गाः [४५]प्राग्वंशसदसोर्मध्येन यदोत्तरस्यां [-४४] दिशि दक्षिणार्थं नयति तदानीमेकैकं दशकं सहैव नयेत् । न तु दशतो न्यूनं नयेत् । दशसंख्याया विराड्रूपत्वात्,

५२-५२. मै२ - पञ्चविंशतेन वर्गे च । ५३. मै२ - नूनम् । ५४. मै१ - ‘ न ’ नास्ति । ५५-५५. मै२ - क्विन्नेति दीर्घाभावः । ५६-५६. अ१ - एकां द्वे पञ्च वा तत्र । ५७. मै२ - यद्वा । ५८-५८. मै२ - दद्यात् । ५९. मै. मै१. मै३. अ. अ१ - ‘ वा ’ नास्ति । ६०-६०. अ१ - भवितव्यमिति ? यत्रोक्त° । ६१. मै२ - अत्रोत्तरमाचा° । ६२-६२. मै१ - द्वाभ्यावशाशतादावासहस्राविति, मै२ - °दासत्यात् । ६३. मै. मै२. मै३. अ. अ१- ‘ वा ’ नास्ति ।

४०-४०. म - त्रयस्त्रिंशतं च दद्यादेवंकृते एषाम् । ४१-४१. अ. आ. पा. इ. वा. वै - दक्षिणानयने न्यूना दशधा, म - दक्षिणानयनस्योना दशता । ४२. अ. आ. पा. इ. वा. वै. मै - तदेतद्वि° । ४३-४३. म - दशानामवमो दश, मै - दशानां वर्गो दशत् तद्विच्छेदम् । ४४-४४. म - °वेददक्षिणस्यां - - - - यदोत्तरस्यां ’ नास्ति । ४५. शृ१ - प्राग्वंशे सदसोर्मध्ये ।

या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताऽ स इन्द्रोऽमन्यतानया वा इदं विष्णुः सहस्रं वर्क्ष्यत इति

या । सहस्रतमीति सहस्र-तमी । आसीत् । तस्याम् । इन्द्रः । च । विष्णुः । च । व्यायच्छेतामिति वि-आयच्छेताम् । सः । इन्द्रः । अमन्यत । अनया । वै । इदम् । विष्णुः । सहस्रम् । वर्क्ष्यते । इति ।

‘अथ’ इत्यादि ॥ [V]अथ [V]या [६४][V]सहस्रतमी गौः [V]आसीत् [६५-] तस्यां तन्निमित्तं [-६५] [V]इन्द्रः [V]विष्णुः [V]च व्यायच्छेतां [६६-] ममेयं ममेयमिति [-६६] विप्रतिषन्नावभवताम् । “गतिर्गतौ” (पा ८.१.७०) इति गतेरनुदात्तत्वं, समासश्च पूर्ववत् । अथ [V]इन्द्रः [V]अमन्यत यदीमां [V]विष्णुः [६७]लभेत ततः [V]अनया [V]सहस्रम् अपि [६८]गवां [V]वर्क्ष्यते वशीकरोति । [६९]वृजिरावर्जनकर्मा, (धापा १०५४, १४८४) [७०-] लृट् [७१]स्यः [-७०] । तस्मात् अधिकभाजा मया भवितव्यमिति । [७२]ततः [V]तस्यां [७३]तौ [V]अकल्पेतां व्यवस्थां [७४]कृतवन्तौ ★भागयोः ॥

विराजं [V]न एव विच्छिन्नां करोमीति [४६-] नेतुरभिप्रायः । यत्तु त्रिंशत उपरि त्रयमधिकं तदपि चरमेण दशकेन सह नयेत् । न्यूनत्वस्यैवात्र [४७]निषेधात् [-४६] ॥

अथेति ॥ [४८]एवमेकोनसहस्रे त्रिषु दिनेषु दत्ते सति सहस्रतमी परिशिष्यते । [४९]तद्दानं तु बहुधा विकल्पितं [५०]प्रदर्शयितुं प्रस्तौति - ‘अथ या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताऽ स इन्द्रोऽमन्यतानया वा इदं विष्णुः सहस्रं वर्क्ष्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति’ इति ॥ [५१-] क्लृप्तिः कल्पनं, [५२]तयैव क्लृप्त्या [-५१] [V]तस्यां सहस्रतम्यां [५३-] गवि निमित्तभूतायां ममैवेयं भूयादित्येवम् [V]इन्द्रः [V]च [V]विष्णुः [V]च परस्परं कलहं कुरुतः । तदानीम्

---

६४. मै१ - सहस्रमती । ६५-६५. मै२ - तन्निमित्तं तस्याम् । ६६-६६. मै१ - मेयं मेयमिति । ६७. मै२ - लभते । ६८. मै१ - गता, मै. मै२. मै३. अ - ‘गवाम्’ नास्ति । ६९. मै१ - वृत्तिराव° । ७०-७०. मै२ - ‘लृट् स्यः’ नास्ति । ७१. मै१ - स्यत । ७२. मै. मै१. मै३. अ. अ१ - ‘ततः’ नास्ति । ७३. मै२ - तावत् । ७४. मै१- कृतवन्तम् । ★अ१ - लाभयोः ।

४६-४६. म - नेतुरभिप्रायेण अधिकं तत्रायमपि चरमदशकेन सहैव नयेत् न्यूनत्वस्यैवात्र निषेधात् । ४७. अ. आ. पा. इ. बा. वै - विधानात् । ४८. इ. बा. वै - °कोनसहस्रम् । ४९. अ. पा - तद्धनम्, म - तद्धानम् । ५०. इ. म. वै. मै - दर्शयितुम् । ५१-५१. शृ१. म. मै - ‘क्लृप्तिः ---- क्लृप्त्या’ नास्ति । ५२. अ. बा - तथैव । ५३-५३. शृ१ - ‘गवि ---- तस्यां’ नास्ति ।

तस्यांमकल्पेतां द्विभांग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति तां वा एतामंच्छावाक (५) एव शंसत्यथ

तस्याम् । अकल्पेताम् । द्विभांग इति द्वि-भागे । इन्द्रः । तृतीये । विष्णुः । तत् । वै । एषा । अभ्यनूच्यत इत्यभि-अनूच्यते । उभा । जिग्यथुः । इतिं । ताम् । वै । एताम् । अच्छावाकः (५) । एव । शंसति । अथ ।

[७५-] 'द्विभागे' इत्यादि [-७५] ॥ [७६-] द्वयोर्भागयोः Vइन्द्रः व्यवस्थितः [-७६] । " द्विगौ प्रमाणे " (पा ६.२.१२) इति पूर्वपदप्रकृतिस्वरत्वम् । [७७]द्वयोर्भागयोः समाहारो द्विभागः । तृतीयो भागस्त्रिभागः । तत्र Vविष्णुः व्यवस्थितः [-७७] । " पूरणाद्भागेतीयादन् " (पा ५.३.४८) [७८]इत्यन्प्रत्ययः । Vतत् एतदर्थरूपमभिलक्ष्य एषा वक्ष्यमाणा ऋगुच्यते " उभा जिग्यथुः " (तैसं ३.२.११) Vइति । व्याख्याता [७९]चेयं " प्र सो अग्ने " (तैसं ३.२.११) इत्यत्र । उत्तरत्र चानुवाके (तैसं ७.१.६) व्यक्तार्था भविष्यति । Vताम् Vएताम् Vअच्छावाकः Vएव Vशंसति । Vअथ [८०]या Vसहस्रतमी होतुर्भागे [८१]सा Vदेया [८२]इति । [८३]अत्र हेतुमाह - [८४]Vयत् यज्ञे Vअतिरिच्यते

Vइन्द्रः मनस्येवमचिन्तयत् [५४-] तां गां गृहीत्वा [-५४] Vविष्णुः Vअनया गवा Vसहस्रम् Vइदं सर्वं मां वर्जयित्वा स्वाधीनं करिष्यति, [५५]तस्मान्ममैवाधिकेन भागेन भवितव्यमिति । ततस्तावुभौ Vतस्यां [-५३] गवि Vअकल्पेतां व्यवस्थां कृतवन्तौ । Vइन्द्रः Vद्विभागे व्यवस्थितः, Vविष्णुः तृतीये भागे व्यवस्थितः । [५६]तदेतदर्थजातमभिलक्ष्य [५७]काचिदृग्वेदेऽप्यृगनूच्यते (ऋ ६.६९.८) । सा च भागत्रयप्रतिपादिका । तस्याश्च प्रतीकम् - " उभा जिग्यथुः " इत्येतत् । इयं चोपरितनेऽनुवाके (तैसं ७.१.६) समाम्नास्यते ॥

तामिति ॥ अथैतस्या ऋचः [५८]शंसननियमं विधत्ते - 'तां वा एतामच्छावाक एव शंसति' इति ॥

७५-७५. मै२ - ' द्विभागे इत्यादि ' नास्ति । ७६-७६. अ१. मै१ - द्वयोर्भागयोः समाहारः द्विभागः तृतीयो भागः त्रिभागः । ७७-७७. मै१. अ१ - ' द्वयोर्भागयोः - - - - °व्यवस्थितः ' नास्ति । ७८. मै१. अ१ - तत्र तृतीये भागे विष्णुर्व्यवस्थितः । ७९. मै२ - इयम् । ८०. मै. मै२. मै३. अ - ' या ' नास्ति, मै१- वा । ८१. मै. मै२. मै३. अ - ' सा ' नास्ति । ८२. मै. मै२. मै३. अ - ' इति ' नास्ति । ८३. मै. मै२. मै३. अ. अ१ - ' अत्र ' नास्ति । ८४. मै१ - ' यत् ' नास्ति ।

५४-५४. म - ' तां - - - - गृहीत्वा ' नास्ति, मै - एतां गां गृहीत्वा । ५५. अ. आ. पा. इ. वा. वै. म - तस्मान्मयैव । ५६. अ. आ. पा. इ. वा. वै - तदेतदर्थम् । ५७. शृ१. मै - °ऋग्वेदेष्वनूच्यते, इ. वा - ऋग्वेदेष्वृग् अनूच्यते । ५८. वै - शंकन° ।

या सहस्रतमी सा होत्रे देयेति होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽनाप्तस्याऽऽपयिताऽथाऽऽहुरुन्नेत्रे

या । सहस्रतमीति सहस्र-तमी । सा । होत्रे । देया । इति । होतारम् । वै । अभ्यतिरिच्यत इत्यभि-अतिरिच्यते । यत् । अतिरिच्यत इत्यति-रिच्यते । होता । अनाप्तस्य । आपयिता । अथ । आहुः । उन्नेत्र इत्युत्-नेत्रे ।

---

[८५]तद्धोतारमभिलक्ष्यातिरिच्यते तस्मादतिरिक्तः [८६]स्यात् Vहोता । [८७] पूर्वत्र “ गतिर्गतौ ” (पा ८.१.७०) इति गतेरनुदात्तत्वम् , [८८]उत्तरत्र “ तिङि चोदात्तवति ” (पा ८.१.७१) इति । उभयत्र समासः पूर्ववत् । किंच - Vअनाप्तस्य प्रापयिता होता [८९]यद्यङ्गस्योन्नतस्य [९०]पूरयिता समीकर्ता होता तां गामर्हतीति ॥

‘ अथाहुः’ इत्यादि ॥ Vअथ [९१]Vआहुः [९२]अन्ये Vउन्नेत्रे Vदेया Vइति । हेतुं चाहुः - Vअतिरिक्ता खलु Vएषा [९३]सवीर्या Vसहस्रस्य । Vउन्नेता च [९४]Vऋत्विजां [९५-] Vहारियोजनस्य धारयिता [-९५] । अथ अन्ये वदन्ति - ‘ सर्वेभ्यः ’ इति । गतम् । Vअथ Vआहुः अपरे - ‘ उदाकृत्या

अथेति ॥ विकल्पितेषु दानपक्षेषु प्रथमं पक्षमाह - ‘ अथ या सहस्रतमी सा होत्रे देयेति होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽनाप्तस्याऽऽपयिता ’ इति ॥ प्रतिदिनं [५९]त्रयस्त्रिंशदधिकशतत्रये साम्येन दत्ते सति Vसा इयं Vसहस्रतमी Vअतिरिच्यते । यत्तु द्रव्यं यागेऽतिरिक्तं भवति तत् सर्वं होतारमभिलक्ष्यैवातिरिच्यते । Vहोता हि Vअनाप्तस्य सर्वस्य फलस्य प्रापयिता । तस्मात् होत्रे सहस्रतमी देयेत्याद्यः पक्षः ॥

अथाहुरिति ॥ द्वितीयं पक्षं दर्शयति - ‘ अथाहुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजाम् ’ इति ॥ Vएषा गौः [६०-] Vसहस्रस्य मध्येऽतिरिक्तवीर्या [-६०] । Vउन्नेता अपि Vऋत्विजां

---

८५. मै. मै२. मै३. अ - तस्योत्तर°, मै१ - ‘तद्धोतार°’ नास्ति । ८६. मै१- स्यादतः । ८७. मै. मै१. मै२. मै३. अ - पूर्ववत् । ८८. अ१ - इतरत्र । ८९. मै१. अ१ - यज्ञोऽनन्तरस्य । ९०. मै१. मै२ - पूरयिता तेन । ९१. मै२ - आह । ९२. मै३ - इत्येतत् । ९३. मै१ - ‘ सवीर्या ’ नास्ति । ९४. अ१ - ‘ऋत्विजाम्’ नास्ति । ९५-९५. मै२ - हारियोजने भवादृत्विजाम् ।

---

५९. शृ१. मै - °दधिके शतत्रये । ६०-६०. अ - सहस्रमध्ये° ।

देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामथाऽऽहुः सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुदाकृत्या सा वशं चरेदित्यथाऽऽहुर्ब्रह्मणे चाग्नीधे च देयेति (६)

देया । इति । अतिरिक्तेत्यति-रिक्ता । वै । एषा । सहस्रस्य । अतिरिक्त इत्यति-रिक्तः । उन्नेतेत्युत्-नेता । ऋत्विजाम् । अथ । आहुः। सर्वेभ्यः । सदस्येभ्यः । देया । इति । अथ । आहुः । उदाकृत्येत्युत्-आकृत्या । सा । वशम् । चरेत् । इति । अथ । आहुः । ब्रह्मणे । च । अग्नीध इत्यग्नि-इधे । च । देया । इति (६) ।

सा वशं चरेत् ' इति । [९६]उदाकरणमुत्सर्जनं [९७]तदर्हा, [९८-]" असंज्ञायामपि क्यप् च " इति अर्हार्थे क्यप् , तुगागमः [-९८] । [९९]^{V}सा ^{V}वशं ^{V}चरेत् [१००-]^{V}इति यथेष्टं स्वतन्त्रा गच्छेदित्यर्थः । [१०१-] न तु [-१०१] कश्चिदपि [-१००] [१०२-] स्वामितया विशेषेण [-१०२] [१०३]सहस्रतमीं नियन्तुमर्हतीति ॥

मध्येऽतिरिक्तवीर्यः । अत एव हि [६१]हारियोजनभक्षे श्रूयते - " उन्नेतर्युपहवमिच्छन्ते " (तैसं ७.५.९) इति ! तस्मादियमुन्नेत्रे देयेत्येवं केचिदाहुः ॥

अथाहुरिति ॥ तृतीयं पक्षं दर्शयति - ' अथाऽऽहुः सर्वेभ्यः सदस्येभ्यो देयेति ' [६२]इति ॥ अत्रोपपत्तिर्बहिरेव द्रष्टव्या । " यावन्तो वै सदस्यास्ते सर्वे दक्षिण्याः [६३]तेभ्यः " (तैसं ३.२.८) इति [६४]हि अन्यत्राम्नातम् । तस्मात् सदस्येभ्यो देया ॥

अथाहुरिति ॥ चतुर्थं पक्षं दर्शयति - ' अथाऽऽहुरुदाकृत्या सा वशं चरेदिति ' इति ॥ अत्राप्युपपत्तिः [६५]बहिरेव । [६६-] दिनत्रयेऽपि भागसाम्येन [-६६] दक्षिणा दत्ता । इयं [६७]चैका, भागवैषम्यं च न युक्तम् । [६८]अतो यज्ञभूमेरुद्गतां कृत्वा स्ववशत्वेन यथा चरति तथा कुर्यात् ॥

---

९६. मै२ - उत्करणमुपसर्जनम् । ९७. मै२ - तदर्हत्वात् । ९८-९८. मै२ - ' असंज्ञायामपि - - - - तुगागमः ' नास्ति । ९९. मै२ - सः । १००-१००. मै२ - ' इति - - - - कश्चिदपि ' नास्ति । १०१-१०१. मै१ - ननु । १०२-१०२. मै२ - स्वामिया विशेषे । १०३. मै. मै३. अ. अ१ - सहस्रतमी, मै२ - ' सहस्रतमीम् ' नास्ति ।

---

६१. शृ१. मै - °जनभक्षणे । ६२. मै. वै - ' इति ' नास्ति । ६३. अ. आ. पा. इ. वा. वै. म. मै - ' तेभ्यः ' नास्ति । ६४. अ. आ. पा. इ. वा. वै. म - ' हि ' नास्ति । ६५. आ. क - पूर्ववत् , अ. पा. इ. वै - ' बहिरेव ' नास्ति । ६६-६६. अ. आ. इ. पा. वा. वै. म - दिनत्रये विभागसाम्येन । ६७. अ. पा. वा - चैषा, वै- चेषा । ६८. शृ१. मै - ततः ।

द्विभागं ब्रह्मणे तृतीयमग्नीधं ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाहुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽहुर्या

द्विभागमिति द्वि-भागम् । ब्रह्मणे । तृतीयम् । अग्नीध इत्यग्नि-इधे । ऐन्द्रः । वै । ब्रह्मा । वैष्णवः । अग्नीदित्यग्नि-इत् । यथा । एव । तौ । अकल्पेताम् । इति । अथ । आहुः । या । कल्याणी । बहुरूपेति बहु-रूपा । सा । देया । इति । अथ । आहुः । या ।

[V]अथ अपरे ब्रुवते - 'ब्रह्मणे' इत्यादि ॥ गतम् । 'यथैव' इति । [V]यथा [V]एव [104]इन्द्रविष्णुभ्यां कल्पितं तथैव तदीययोः ब्रह्माग्नीध्रयोः [105]भवितुमर्हतीति ॥

'अथाहुः' इत्यादि ॥ [V]अथ अन्ये आचक्षते - [V]या [V]कल्याणी गुणवती अनेकरूपा च तादृशी [106]अन्या [V]देया [V]इति । "बहोर्नञ्वत्" (पा ६.२.१०५) इति [107]नञवद्भावात् "नञ्सुभ्याम्" (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् । अपरे च [V]आहुः - [V]या [V]द्विरूपा [V]उभयतएनी उभयपार्श्वशुक्ला [V]सा [V]तादृशी [V]देया [V]इति । तत् [108-V]सहस्रस्य [V]परिगृहीत्यै [-108] सहस्रस्य परिग्रहार्थं भवति । [109]अन्यासां गवाम् "वर्णादनुदात्तात्°" (पा ४.१.३९) इति [110]ङीप् , [111]एनीशब्दस्य नत्वम् , "तत्पुरुषे [112-] तुल्यार्थे°" (पा ६.२.२) इति [-112] अव्ययपूर्वपदप्रकृतिस्वरत्वम् । "°नञ्कुनिपातानामेव" (वा-पासू ६.२.२) इति चेत् व्यत्ययेन भविष्यति । द्विरूपशब्दः निरुदकादिषु (पा ६.२.१८४) द्रष्टव्यः ॥

अथाहुरिति ॥ पञ्चमं पक्षं दर्शयति - 'अथाऽऽहुर्ब्रह्मणे चाग्नीधे च देयेति द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामिति' इति ॥ इन्द्रस्य विष्णोश्च या भागक्लृप्तिः [69]तद्वत् [70]तदीययोर्ब्रह्माग्नीध्रयोर्देया इति ॥

अथाहुरिति ॥ षष्ठं पक्षं दर्शयति - 'अथाहुर्या कल्याणी बहुरूपा सा देयेति' इति ॥ इयं वै सहस्रतमी [71]न कस्मैचिद्देया । किं त्वेतत्प्रतिनिधिरूपा [72]अन्या काचित् [V]कल्याणी बहुक्षीरादिगुणवती [73]विचित्रवर्णा [74-V]सा दातव्या ॥

१०४. मैर - °इन्द्राविष्णुभ्याम् । १०५. मै. मैर. मै३. अ. अ१ - युक्तं भवितुम् । १०६. मैर - आद्या । १०७. मैर - मन्त्रभावात् । १०८-१०८. मैर - 'सहस्रस्य परिगृहीत्यै' नास्ति । १०९. मैर - तत्तासाम् । ११०. मैर - 'ङीप्' नास्ति । १११. अ१ - एतच्छब्दस्य । ११२-११२. मै. मैर. मै३. अ. अ१ - 'तुल्यार्थे इति' नास्ति ।

६९. म. मै - 'तद्वत्' नास्ति । ७०. शृ१ - तयोः, मै - तदैव क्लृप्त्या । ७१. वा - नु । ७२. अ. आ. पा. इ. वा. वै. म - या । ७३. इ. वै - चित्रवर्णा । ७४. अ. पा. इ. वा. वै - 'सा' नास्ति ।

द्विरूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतत् सहस्रस्यायनꣳ सहस्रꣳ स्तोत्रीयाः सहस्रं दक्षिणाः सहस्रसंमितः

द्विरूपेति द्वि-रूपा । उभयत-एनीत्युभयतः-एनी । सा । देया । इति । सहस्रस्य । परिगृहीत्या इति परि-गृहीत्यै । तत् । वै । एतत् । सहस्रस्य । अयनम् । सहस्रम् । स्तोत्रीयाः । सहस्रम् । दक्षिणाः । सहस्रसंमित इति सहस्र-संमितः ।

'तद्वा [११३]एतत्' इत्यादि ॥ Vतत् Vएतत् त्रिरात्राख्यं कर्म Vसहस्रस्य [११४]Vअयनं लाभहेतुः । Vसहस्रम् [११५]अस्य Vस्तोत्रीयाः भवन्ति । [११६]कथम् ? नवत्यधिकशतमग्निष्टोमस्य [११७]त्रिपञ्चाशदधिकं [११८]शतद्वयमुक्थ्यस्य । [११९-] द्विचत्वारिंशदधिकानि चत्वारि शतान्यतिरात्रस्य [-११९] । शेषं [१२०-] वैकृतं पञ्चदशाधिकं शतं च [-१२०] द्विरात्रे दर्शितम् । सर्वस्तोमे स्तोत्रे भवाः स्तोत्रीयाः । [१२१]गर्गादित्वात् छः (गणपा ५७, पा ४.१.१०५) । अथास्य Vसहस्रं Vदक्षिणाः भवन्ति ।

अथाहुरिति ॥ सप्तमं पक्षं दर्शयति - 'अथाऽऽहुर्या द्विरूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै' इति ॥ Vया गौः शुक्लकृष्णवर्णाभ्यामुपेतत्वेन Vद्विरूपा पार्श्वद्वये शुक्लकेशोपेतत्वात् Vउभयतएनी, सहस्रसंख्यापूर्त्यर्थं तादृशी काचिद्देया ॥

तद्वेति ॥ तदिदं सहस्रदानोपेतं कर्म [७५]प्रशंसति - 'तद्वा एतत् सहस्रस्यायनꣳ सहस्रꣳ स्तोत्रीयाः सहस्रं दक्षिणाः सहस्रसंमितः सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै' इति ॥ त्रिरात्राख्यं यत् कर्मोक्तं तदेतत् सहस्रसंख्याकफलस्य प्राप्तिहेतुः । [७६]तस्मादत्र [७७]त्रिष्वपि दिनेषु मिलित्वा Vस्तोत्रीयाः ऋचः Vसहस्रं

---

११३. मै. मै२. मै३. अ - 'एतत्' नास्ति । ११४. अ१. मै१ - अयनं सहस्रस्य लाभ° । ११५. मै२ - 'अस्य' नास्ति । ११६. मै. मै२. मै३. अ - 'कथम्' नास्ति । ११७. मै२ - पञ्चाशदधिकम् । ११८. मै२ - शतमुक्थ्यस्य । ११९-११९. मै२ - चत्वारिंशतान्यतिरात्रस्य । १२०-१२०. मै१ - वैकृतपञ्चाशदधिकशतं तद्वत् । १२१. मै२ - गवादित्वात् ।

---

७५. वा - प्रशंसन्ति । ७६. अ. आ. पा. इ. वा. वै. मै - यस्मादत्र । ७७. अ. आ. पा. इ. वा. वै. म - 'अपि' नास्ति ।

सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै ॥५॥

(अब्रवीच्च तदन्तरिक्षं ददात्यच्छावाकश्च देयेति सप्तचत्वारिꣳशच्च ।)

सुवर्ग इति सुवः-गः । लोकः । सुवर्गस्येति सुवः-गस्य । लोकस्य । अभिजित्या इत्यभि-जित्यै ॥५॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

यस्मादेवं तस्मात् [१२२]सहस्रसंमितस्य महत्त्वात् सहस्रतुल्यस्य स्वर्गस्य [V]लोकस्य [१२३]विजयाय [१२४]भवति । [१२५-]" तादौ च° "[-१२५] (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । सहस्रेण संमितं तुल्यमिति । " तृतीया कर्मणि " (पा ६.२.४८) इति पूर्वपदप्रकृतिस्त्ररत्वम् । [१२६-] उपमानपूर्वपदप्रकृतिस्वरत्वं वा [-१२६] ॥

॥ [१२७-]इति सप्तमे प्रथमे पञ्चमोऽनुवाकः [-१२७] ॥

विद्यन्ते । [V]दक्षिणाः चोक्तरीत्या [V]सहस्रं [७८]गावः स्वर्गलोकश्च सुखाधिक्याद्भूलोकसहस्रेण समानः, [तस्मात्] तादृशस्य स्वर्गस्याभिजयाय [७९]इदं कर्म योग्यम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥

---

१२२. अ१ - समतस्य, मै१ - समन्तस्य । १२३. अ१. मै१ - जयाय । १२४. मै१- भवन्ति । १२५-१२५. मै१ - तदेवेति । १२६-१२६. अ१. मै२ - 'उपमान° - - - - वा 'नास्ति । १२७-१२७. मै१ - इति सप्तमप्रथमे पञ्चमः ।

---

७८. इ. वा- गाः, वै - गान । ७९. इ. वा. वै - 'इदम् 'नास्ति ।

सोमो वै सहस्रमविन्दत् तमिन्द्रोऽन्वविन्दत् तौ यमो न्यागच्छत् तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही३ इत्यब्रूता९ स यम एकस्यां वीर्यं पर्यपश्यदिदं वा अस्य सहस्रस्य वीर्यं बिभर्तीति

सोमः । वै । सहस्रम् । अविन्दत् । तम् । इन्द्रः । अन्विति । अविन्दत् । तौ । यमः । न्यागच्छदिति नि-आगच्छत् । तौ । अब्रवीत् । अस्तु । मे । अत्र । अपीति । इति । अस्तु । ही ३ । इति । अब्रूताम् । सः । यमः । एकस्याम् । वीर्यम् । परीति । अपश्यत् । इयम् । वै । अस्य । सहस्रस्य । वीर्यम् । बिभर्ति । इति ।

इदानीं प्रकारान्तरेण सहस्रतमी स्तूयते - ‘सोमो वै’ इत्यादि ॥ Vसोमः [१]गवां [२]Vसहस्रम् [३]Vअविन्दत् । [४-] Vइन्द्रः अपि इमं सोममागम्य तदेव [५]गवां सहस्रम् Vअविन्दत् । एवं तदुभयोरभवत् , [६]भागवन्तौ Vतौ सोमेन्द्रौ Vयमः Vन्यागच्छत् [७-] निकामयमानः आगच्छत् [-७] । “ गतिर्गतौ ” (पा ८.१.७०) इति गतेरनुदात्तत्वं समासश्च । Vतौ च Vअब्रवीत् - मम Vअपि Vअत्र गवां सहस्रे अंशित्वम् Vअस्तु इति । [८]अस्तु Vहि Vइति [९]तौ Vअब्रूताम् । [१०-] “प्रतिश्रवणे च” (पा ८.२.९९) इति प्लुतः [-१०], [११-] अभिपूजिते वा [-११] (पा ८.२.१००) । ततः [१२]प्रतिश्रुतांशो [१३]Vयमः

सोम इति ॥ पञ्चमेऽनुवाके [१]त्रिरात्रोऽभिहितः । अथ षष्ठे तत्रत्यां सहस्रतमीं प्रपञ्चयितुमुपाख्यानं दर्शयति - ‘सोमो वै सहस्रमविन्दत् तमिन्द्रोऽन्वविन्दत् तौ यमो न्यागच्छत् तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही३ इत्यब्रूता९ स यम एकस्यां वीर्यं पर्यपश्यदिदं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतद्युवयोरिति तावब्रूता९सर्वे वा एतदेतस्यां वीर्यं परिपश्यामोऽ९शमा हरामहा इति तस्याम९शमाऽहरन्त ’ इति ॥ पुरा कदाचित् V[२]सोमः गोसहस्रमलभत । Vतम् अनुगम्य Vइन्द्रः अपि तदेव गोसहस्रमलभत । V[३]तौ सोमेन्द्रौ प्रति Vयमः अपि भागं निकामयमानः Vआगच्छत् । आगत्य च Vअत्र

---

१. अ१. मै१ - ‘गवाम्’ नास्ति । २. मै१ - ‘सहस्रम्’ नास्ति । ३. मै. मै१. मै३ - अलभत् , मै२ - अलभत इति । ४-४. मै२ - इन्द्रोऽपीतं सोममनुगम्य । ५. अ१ - गाम् । ६. मै. मै२. मै३. अ. अ१ - भागः तौ । ७-७. मै१ - ‘निकाम° - - - - °च्छत्’ नास्ति । ८. मै. मै२. मै३. अ. अ१ - अथास्तु । ९. मै. मै२. मै३. अ - तम् । १०-१०. मै१ - प्रतिश्रवणेन प्लुतः । ११-११. मै२ - अर्तिपूजिते । १२. अ१. मै१ - संप्रतिश्रुतांशः । १३. मै२ - अयम् , मै१. अ१ - मम ।

---

१. मै - त्रिरात्रो विहितः । २.मै - स्तोमः । ३. मै - ‘तौ’ नास्ति ।

सहस्रतमीस्तुत्यादि]

तावंब्रवीदि॒यं ममा॑स्त्वे॒तद्यु॒वयो॒रिति॒ तावंब्रूता॒ꣳ सर्वे॑ वा ए॒तदे॒तस्यां॒ वी॒र्यं॑ (१) परिं पश्या॒मोऽꣳश॒मा हरा॑मह॒ इति॒ तस्या॑मꣳश॒माऽहंरन्त

तौ । अ॒ब्र॒वी॒त् । इ॒यम् । ममं । अस्तुं । ए॒तत् । यु॒वयोः॑ । इतिं । तौ । अ॒ब्रू॒ता॒म् । सर्वे॑ । वै । ए॒तत् । ए॒तस्या॑म् । वी॒र्य॑म् (१) । परी॒तिं । प॒श्या॒मः॒ । अꣳशं॑म् । एतिं । ह॒रा॒म॒हे॒ । इतिं । तस्या॑म् । अꣳशं॑म् । एतिं । अ॒ह॒र॒न्त॒ ।

[V]एकस्यां सहस्रतम्यां [१४-] सर्वस्मादपि गोसमूहात् [-१४] [V]वीर्यं [V]पर्यपश्यत् कात्स्न्येनापश्यत् [V]इयम् एकैव [V]अस्य [V]सहस्रस्य [V]वीर्यं [V]बिभर्ति [V]इति । एवं [१५]पश्यन् [V]तौ [V]सोमेन्द्रौ यमः [V]अब्रवीत् - [V]इयम् [१६]एकैव [V]मम [१७][V]अस्तु [V]एतत् [V]सहस्रं [V]युवयोः अस्तु [V]इति । [१८]" युष्मदस्मदोर्ङसि " (पा ६.२.२११) इति ममशब्द आद्युदात्तः [-१८] ॥

'तावब्रूताम्' इत्यादि ॥ [१९]अथ तच्छ्रुत्वा [-१९] [२०]विदिताभिप्रायौ [V]तौ [V]अब्रूताम् - [V]सर्वे वयम् [V]एतस्यां विद्यमानं वीर्यं सहस्रसंमितं [V]परिपश्यामः [V]अंशं च हरामहै [२१]अंशनियमं च [२२]अनयैव कुर्म इतीत्थं [२३]कृतमतयः सर्वेऽपि सोमेन्द्रयमाः [V]तस्याम् [V]अंशम् [V]आहरन्त [V]ताम् एव नियमहेतुं कृत्वा स्वं स्वमंशं गृहीतवन्तः ॥

गोसहस्रे मम [V]अपि कश्चिद्भागः [V]अस्तु [V]इति अब्रवीत् । तावपि तथा [V]अस्तु [V]इति अङ्गीकुरुतः । आदरार्थः प्लुतः (पा ८.२.१००) । ततः [V]सः [V]यमः परीक्ष्य तस्मिन् सहस्रे [४]कस्याश्चित् उत्तमायां गवि सामर्थ्यमपश्यत् । ततः [V]इयम् [५]एकैव [V]अस्य गोसहस्रस्य [V]वीर्यं [V]बिभर्ति [V]इति मनसा निश्चित्य [६-] इयम् एव [-६] [V]मम [V]अस्तु [V]युवयोः ★इतरत्सहस्रम् [V]इति अब्रवीत् । ततः तौ सोमेन्द्रावेवमुक्तवन्तौ [V]सर्वे अपि वयं मिलित्वा [V]एतस्याम् उत्तमायां गवि [V]वीर्यं परीक्ष्य तस्याम् [V]अंशम् एकैकं स्वीकुर्म इति विचार्य तथैव कृतवन्तः ॥

१४-१४. अ१ - प्रसंग्रहांश । १५. मै१ - पश्यन्तौ, मै२ - अपश्यत् । १६. मै२ - एवम् । १७. मै२ - 'अस्तु' नास्ति । १८-१८. अ१. मै१ - 'युष्मद° - - - - °द्युदात्तः' नास्ति । १९-१९. अ१ - 'अथ तच्छ्रुत्वा' नास्ति । २०. अ१ - तद्विदिता । २१. मै१ - अशान्तियमम्, अ - अंशनियमयम् । २२. मै२ - 'अनयैव' नास्ति । २३. मै१ - कुमतयः ।

४. अ. आ. पा. इ. वा. वै - एकस्याम् । ५. मै - एव । ६-६. मै - इयमेकैव । ★ [एकोनसहस्रम् इत्यर्थः ।]

तामप्सु प्रावेशयन्त्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणीयाद्य एवं विद्वान्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति

ताम् । अप्स्वित्यप्-सु । प्रेति । अवेशयन् । सोमाय । उदेहीत्युत्-एहि । इति । सा । रोहिणी । पिङ्गला । एकहायनीत्येक-हायनी । रूपम् । कृत्वा । त्रयस्त्रिꣳशतेति त्रयः-त्रिꣳशता । च । त्रिभिरिति त्रि-भिः । च । शतैः । सह । उदैदित्युत्-ऐत् । तस्मात् । रोहिण्या । पिङ्गलया । एकहायन्येत्येक-हायन्या । सोमम् । क्रीणीयात् । यः । एवम् । विद्वान् । रोहिण्या । पिङ्गलया । एकहायन्येत्येक-हायन्या । सोमम् । क्रीणाति ।

कथमित्याह - ‘ताम्’ इत्यादि ॥ सोमो यादृशीं त्वामर्हति यावतीश्च गा अर्हति तदनुरूपा [V]उदेहि उदयं प्रतिपद्यस्व [V]इति [V]ताम् [V]अप्सु [V]प्रावेशयन् । पूर्ववद्गतिस्वरसमासौ (पा ८.१.७०) । ‘सा’ इत्यादि । [V]रोहिणी रोहितवर्णा । “वर्णादनुदात्तात्°” (पा ४.१.३९) इति ङीप् । [V]पिङ्गला पिङ्गलाक्षी [V]एकहायनी एकवर्षा । “दामहायनान्ताच्च” (पा ४.१.२७) इति ङीप् । [२४]ईदृशी भूत्वा [V]रूपं चैतदनुगुणं [V]कृत्वा त्रयस्त्रिंशदधिकशतत्रयसंख्याभिः [२५]गोभिः [V]सह [V]उदैत् उदगच्छत् । [२६]पूर्ववन्निघातसमासौ (पा ८.१.७०) । ‘तस्मात्’ इत्यादि । गतम् ॥

तामिति ॥ तत्र सोमस्य प्रथममंशहरणप्रकारं दर्शयति ‘तामप्सु प्रावेशयन्त्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणीयाद्य एवं विद्वान् रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति त्रयस्त्रिꣳशता चैवास्य त्रिभिश्च शतैः सोमः क्रीतो भवति सुक्रीतेन यजते’ इति ॥ ते त्रयोऽपि मिलित्वा [V]ताम् उत्तमां गां [V]सोमाय [V]उदेहि [V]इति एवं ब्रुवन्तः [V]अप्सु प्रावेशयन् । सोमस्य यद्यावद्रूपं योग्यं तत्तावद्रूपं गृहीत्वा [७]जलादुदगच्छेत्यर्थः । ततः [V]सा गौरप्सु प्रविष्टा जलादुद्गमनवेलायां [८]तैः प्रार्थितं[८] [V]रूपं [V]कृत्वा उदगच्छत् । तदेव रूपं स्पष्टीक्रियते - [V]रोहिणी शरीरे लोहितवर्णा [V]पिङ्गला [९]पिङ्गाक्षी [V]एकहायनी एकसंवत्सरवयस्का ईदृशी

२४. अ१. मै१ - तादृशी । २५. मै१ - ‘गोभिः’ नास्ति । २६. मै१ - °समासोऽयम् ।

७. वा - °जलादुगच्छेदित्यर्थः । ८-८. अ. आ. पा. इ. वा. वै - तत्प्रार्थितम् । ९. अ. आ. पा. इ. वा. वै - पिङ्गलाक्षी ।

त्रयस्त्रि॑ꣳशता चैवास्य॑ त्रिभिश्च॑(२)श॒तैः सोमः॑ क्री॒तो भ॑वति सु॒क्रीतेन यज॑ते॒ ताम॒प्सु प्रावे॑शय॒न्निन्द्रा॑यो॒देही॑ति॒ सा रोहि॑णी लक्ष्म॒णा प॑ष्ठौ॒ही वार्त्र॑घ्नी रू॒पं कृत्वा त्रय॑स्त्रि॒ꣳशता च त्रि॒भिश्च॑ श॒तैः

त्रय॑स्त्रिꣳश॒तेति॒ त्रय॑ः-त्रि॒ꣳश॒ता । च॒ । ए॒व । अ॒स्य॒ । त्रि॒भिरिति॑ त्रि-भिः । च॒ (२) । श॒तैः । सोम॑ः । क्री॒तः । भ॒व॒ति॒ । सु॒क्री॒ते॒नेति॒ सु-क्री॒ते॒न । य॒ज॒ते॒ । ताम् । अ॒प्स्वित्य॑प्-सु । प्रेति॑ । अ॒वे॒श॒य॒न् । इन्द्रा॑य । उ॒देही॒त्यु॑त्-एहि॑ । इति॑ । सा । रोहि॑णी । ल॒क्ष्म॒णा । प॒ष्ठौ॒ही । वा॒र्त्र॒घ्नीति॒ वार्त्र॑-घ्नी । रू॒पम् । कृ॒त्वा । त्रय॑स्त्रिꣳश॒तेति॒ त्रय॑ः-त्रि॒ꣳश॒ता । च॒ । त्रि॒भिरिति॑ त्रि-भिः । च॒ । श॒तैः ।

'त्रयस्त्रिंशता चैव' इत्यादि ॥ तदात्मकत्वात्तासाम् । ततः सुक्रीतेन सोमेन यजते । प्रादिसमासे "गतिरनन्तरः" (पा ६.२.४९) इति स्वरः ॥

'ताम्' इत्यादि ॥ [२७-] Vइन्द्राय Vअनुरूपम् [-२७] Vउदेहि Vइति Vतां पुनः Vअप्सु Vप्रावेशयन् । Vरोहिणी उक्तलक्षणा । Vलक्ष्मणा [२८]लक्ष्मवती । [२९]पामादित्वान्नप्रत्ययः (गणपाठ १७८ पा ५.२.१००) । Vपष्ठौही [३०-] चतुर्वर्षा । पष्ठं [-३०] वहतीति "वहश्च" (पा ३.२.६४) इति ण्विः, "वाहः" (पा ४.१.६१) इति ङीप् , "वाह ऊठ्" (पा ६.४.१३२) इत्यूठ् ,

---

सती लावण्योपेतं रूपं च कृत्वा गवामन्यासां [१०-] त्रयस्त्रिंशत्संख्यया शतत्रयसंख्यया [-१०] च सह जलादुदगच्छत् । यस्मात् सोमार्थं [११]रोहिण्यादिरूपं धृतवती तस्मात् Vरोहिण्या Vएकहायन्या पिङ्गलाक्ष्या Vसोमं Vक्रीणीयात् । तथा क्रीतः सोमस्त्रयस्त्रिंशदधिकेन शतत्रयेण Vक्रीतः Vभवति । ततः Vसुक्रीतेन सोमेनासौ Vयजते ॥

तामिति ॥ अथैन्द्रस्य [१२]तदीयांशहरणप्रकारं दर्शयति - 'तामप्सु प्रावेशयन्निन्द्रायोदेहीति सा रोहिणी लक्ष्मणा पष्ठौही वार्त्रघ्नी रूपं कृत्वा त्रयस्त्रिंꣳशता च त्रिभिश्चशतैः सहोदैत् तस्माद्रोहिणीं लक्ष्मणां

२७-२७. मै१ - इन्द्रानुरूपम् । २८. मै२ - 'लक्ष्मवती' नास्ति । २९. मै१ - पामादित्वान्तः । ३०-३०. अ१. मै१ - चतुर्वर्षा षष्ठेन ।

१०-१०. मै - त्रयस्त्रिंशत्संख्याका शतसंख्याका । ११. मै - अरुणयादिरूपम् । १२. शृ१. मै. इ. वा. वै - तदीयांशाहरण° ।

[सहस्रतमीस्तुत्यादि

स॒होदै॑त् तस्मा॒द्रोहि॑णीं लक्ष्म॒णां प॑ष्ठौ॒हीं वार्त्र॑घ्नीं दद्या॒द्य ए॒वं
वि॒द्वान्रोहि॑णीं लक्ष्म॒णां प॑ष्ठौ॒हीं वार्त्र॑घ्नीं॒ ददा॑ति॒
त्रय॑स्त्रिꣳश॒च्चैवास्य॒ त्रीणि॑ च श॒तानि॒
सा द॒त्ता (३) भ॑वति॒

स॒ह । उदै॑दित्यु॑त्-ऐत् । तस्मा॑त् । रोहि॑णीम् । ल॒क्ष्म॒णाम् । प॒ष्ठौ॒हीम् । वार्त्र॑घ्नी॒मिति॒ वार्त्र॑-घ्नीम् । द॒द्यात् । यः । ए॒वम् । वि॒द्वान् । रोहि॑णीम् । ल॒क्ष्म॒णाम् । प॒ष्ठौ॒हीम् । वार्त्र॑घ्नी॒मिति॒ वार्त्र॑-घ्नीम् । ददा॑ति । त्रय॑स्त्रिꣳश॒दिति॒ त्रय॑ः-त्रि॒ꣳश॒त् । च॒ । ए॒व । अ॒स्य॒ । त्रीणि॑ । च॒ । श॒तानि॑ । सा । द॒त्ता (३) । भ॒व॒ति॒ ।

" एत्येधत्यूठ्सु " (पा ६.१.८९) इति वृद्धिः । Vवार्त्रघ्नी द्विरूपेत्येके । [३१]इन्द्ररूपधारिणीत्यन्ये । [३२]गतमन्यत् । " षपूर्वहन्धृतराज्ञामणि " (पा ६.४.१३५) इत्यादिना अल्लोपः, [३३]वृषादित्वादाद्युदात्तत्वम् (गणपाठ २०८ पा ६.१.२०३) । Vसा दत्ता भवतीति सैवैका दत्ता त्रयस्त्रिंशदधिकशतत्रयतुल्या भवतीति । क्व पुनरियं दातव्या [३४]भवति ? उक्तमाचार्येण - ' सङ्ग्रामं जित्वा राजन्ये एनां दद्यात् ' इति । तत्र वचनात् प्रकरणं बाध्यते ॥

पष्ठौहीं वार्त्रघ्नीं दद्याद्य एवं विद्वान् रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं ददाति त्रयस्त्रिंꣳशच्चैवास्य त्रीणि च शतानि सा दत्ता भवति ' इति ॥ पूर्ववद्व्याख्येयम् । V[१३]लक्ष्मणा [१४]शृङ्गपुच्छाद्यवयवसौष्ठवेन योग्यलक्षणोपेता । Vपष्ठौही चतुर्वर्षा । Vवार्त्रघ्नी दर्शनमात्रेण मानसक्लेशापहन्त्री । यस्मादिन्द्रस्येदृशी प्रिया V[१५]उदैत् Vतस्मात् ईदृशीमेव दक्षिणात्वेन दद्यात् ॥

---

३१. मै२ - °धारिणीत्येके । ३२. अ१ - मै१ ' गतमन्यत् ' नास्ति । ३३. मै२ - पादित्वात् । ३४. मै१ - ' भवति ' नास्ति ।

---

१३. इ. वा. वै - ' लक्ष्मणा ' नास्ति । १४. अ. पा. - °वसौष्ठवयोग्य°, आ.. पा. इ. वा. वै - °योग्यलक्षणोपेता । १५. शृ१. इ. मै. वै - ' उदैत् ' नास्ति ।

ताम्प्सु प्रावेशयन् यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माज्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं

ताम् । अप्स्वित्यप्-सु । प्रेति । अवेशयन् । यमाय । उदेहीत्युत्-एहि । इति । सा । जरती । मूर्खा । तज्जघन्येति तत्-जघन्या । रूपम् । कृत्वा । त्रयस्त्रिꣳशतेति त्रयः-त्रिꣳशता । च । त्रिभिरिति त्रि-भिः । च । शतैः । सह । उदैदित्युत्-ऐत् । तस्मात् । जरतीम् । मूर्खाम् । तज्जघन्यामिति तत्-जघन्याम् । अनुस्तरणीमित्यनु-स्तरणीम् । कुर्वीत । यः । एवम् । विद्वान् । जरतीम् ।

'ताम्' इत्यादि ॥ [३५]पुनरप्सु Vप्रावेशयन् Vयमाय इति । Vजरती वृद्धा । [३६]जीर्यतेरतृन् । [३७]मूर्खा रोषणशीला । Vतज्जघन्या [३८]जघन्यरूपा जाता । [३९]दुःशीलेत्यन्ये । सैव जघन्या तज्जघन्या, [४०]नेदृश्यन्या जघन्यास्तीति । 'तस्मात्' इत्यादि । ईदृशीमनुस्तरणीं पितृमेधे कुर्वीत । [४१-] मृताय या हन्यते [-४१] साऽनुस्तरणी★ । अनुस्तीर्यते इत्यनुस्तरणी, कर्मणि ल्युट् ।

तामिति ॥ [१६]अथ यमस्य तदीयांशहरणप्रकारं दर्शयति - 'तामप्सु प्रावेशयन् यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्मात् जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि साऽमुष्मिँल्लोके भवति' इति ॥ Vजरती वृद्धा । Vमूर्खा रोषणशीला । सा एव जघन्या Vतज्जघन्या इयमेवात्यन्तकुरूपा नान्येत्यर्थः । [१७-] अनुस्तरणी मृतं [-१७] [१८-] पुरुषमनु यां गां हत्वा तदवयवान् प्रेतपुरुषस्यावयवेष्वास्तृणन्ति सेयमनुस्तरणी । सा च जरादिगुणयुक्ता कार्या । [१९]अनेन परलोके त्रयस्त्रिंशदधिकगोशतत्रयं संपद्यते । शेषं पूर्ववत् । अत्र [२०]क्रयदानानुस्तरणीविधयः [-१८] प्रासङ्गिकाः ॥

३५. मै. मै१. मै२. मै३. अ - पुनरपि । ३६. मै१ - जीर्यतेरञन् । ३७. मै. मै२. मै३. अ. अ१ - मूर्छा । ३८. अ१ - तज्जघन्यरूपा, मै१ - तर्जन्यरूपा । ३९. मै१ - दुःखशीले° । ४०. मै - नेनेदृशी । ४१-४१. मै१ - मृता यथा हन्यते, मै२ - मृतायेति । ★. मै - मुद्रितपुस्तके 'सानुस्तरणिः' ।

१६. म - 'अथ' नास्ति । १७-१७. वा - °स्तरणी मतम्, अ - °स्तरणीं मत्तम् । १८-१८. इ. वै - 'पुरुषमनु - - - °विधयः' नास्ति । १९. अ. आ. पा. इ. वा. वै - तस्यास्तरणेन, म - तद्दक्षिणाके । २०. शृ१ - °स्तरणी विधेयः ।

मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि साऽमुष्मिꣳल्लोके भवति वागेव सहस्रतमी तस्माद्(४)वद्धरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति

मूर्खाम् । तज्जघन्यामिति तत्-जघन्याम् । अनुस्तरणीमित्यनु-स्तरणीम् । कुरुते । त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत् । च । एव । अस्य । त्रीणि । च । शतानि । सा । अमुष्मिन् । लोके । भवति । वाक् । एव । सहस्रतमीति सहस्र-तमी । तस्मात् (४) । वरः । देयः । सा । हि । वरः । सहस्रम् । अस्य । सा । दत्ता । भवति ।

अत्रापि वचनात् प्रकरणबाधः । 'साऽमुष्मिन्' इति । [V]सा [४२]एवैका [४३] गौः [V]अमुष्मिन् लोके अस्य [४४-]दातुः मृतस्य वा [-४४] त्रयस्त्रिंशदधिकशतत्रयसङ्ख्यया [४५]परिणता [४६-]भोगाय [V]भवति इति [-४६] ॥

'वागेव' इत्यादि ॥ एवं दर्शितरूपत्रया [४७-] एकोनसहस्रा या [-४७] सहस्रतमी सा [V]वाक् [V]एव स्वयं प्रकृष्टतमेति यावत् । [V]तस्मात् [V]वरः [V]देयः । सहस्रदक्षिणे [४८]अमुष्मिन् सहस्रं दत्तं भवतीति भावः । कः पुनः स द्रव्यविशेष इत्याह - 'सा हि' इति । एषा खलु सहस्रतमी उत्कृष्टो

वागिति ॥ एवमाख्यायिकया सहस्रतमीं प्रशस्याथ प्रकारान्तरेण प्रशंसति - " वागेव सहस्रतमी तस्माद्वरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं वर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथाऽस्य तत् सहस्रमप्रतिगृहीतं भवति ' इति ॥ [२१-] येयं सहस्रतमी सोमाद्यर्थे [-२१] रूपत्रयं स्वीकृत्य जलादुद्गता सा वाग्देवता [V]एव । यस्मादस्या वाग्देवतैव (ता) रूपं (रूपत्वं) [V]तस्मात् सहस्रदक्षिणे यागे वाग्देवतात्वसंपादनाय श्रेष्ठ एव गोविशेषो देयः । यस्मात् सहस्रतमी [२२]श्रेष्ठो गोविशेषस्तमाच्छ्रेष्ठे दत्ते सत्यस्य यजमानस्य सहस्रस्वरूपा [V]सा सहस्रतमी [V]दत्ता

४२. मै१. मै२ - एकैव । ४३. मै२ - गुण । ४४-४४. मै२ - अस्यानुवृत्तस्य सा, मै१ - अमृतस्य । ४५. मै२ - परिमाणतः । ४६-४६. अ१ - भोगा भवन्तीति, मै२ - भागाय भवति । ४७-४७. मै२ - विभक्तैकोन सहस्राया । ४८. मै१ - अस्मिन् , मै२ - समित् ।

२१-२१. म - एवं सहस्रतमीं सोमाद्यर्थम् । २२. शृ१ - श्रेष्ठा ।

तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं वर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथाऽस्य तत् सहस्रमप्रतिगृहीतं

तस्मात् । वरः । न । प्रतिगृह्य इति प्रति-गृह्यः । सा । हि । वरः । सहस्रम् । अस्य । प्रतिगृहीतमिति प्रति-गृहीतम् । भवति । इयम् । वरः । इति । ब्रूयात् । अथ । अन्याम् । ब्रूयात् । इयम् । मम । इति । तथा । अस्य । तत् । सहस्रम् । अप्रतिगृहीतमित्यप्रति-गृहीतम् ।

द्रव्यविशेषः, [49]सर्वस्माद्गोसहस्राद्वागात्मकत्वात् । [50]तस्मात् Vसा एवैका Vदत्ता Vअस्य दातुः Vसहस्रं भवति । Vतस्मात् एव हेतोः Vवरः विशिष्टो द्रव्यविशेषः [51]सहस्रतम्यादिः Vन Vप्रतिगृह्यः न प्रतिग्रहीतव्यः । " प्रत्यपिभ्यां ग्रहेः " (पा ३.१.११८) इति क्यप् । [52]हेतुमाह - ' सा हि ' इति । Vसा [53]Vहि खलु सहस्रतमी विशिष्टद्रव्यात्मिका, तामेव चायं ददाति, तस्मात्तत्परिग्रहे Vसहस्रम् Vअस्य Vप्रतिगृहीतं Vभवति । [54-] ततश्च सहस्रस्य प्रतिग्रहदोषः[-54] ॥

समाधत्ते - ' इयं वरः ' इति ॥ [55-]V इयं Vवरः इति [-55] सहस्रतमीं [56]प्रतिग्राहयिता Vब्रूयात् । Vअथ Vअन्याम् अन्यः Vब्रूयात् ' इयं मम ' इति । Vतथा सति ' इयं वरः ' इति वचनात् तेन Vसहस्रं दत्तं भवति । Vइयं Vमम इत्यन्यस्याः वचनात् इतरेण सहस्रं प्र[57][अप्र]तिगृहीतं भवति ॥

Vभवति । यस्माच्छ्रेष्ठो गोविशेषः सहस्रसदृशः [23-] Vतस्मात् श्रेष्ठं [-23] गोविशेषं Vन प्रतिगृह्णीयात् । तत्प्रतिग्रहे सति गोसहस्रप्रतिग्रहदोषो भवेत् । अथ कथंचित् [24]प्रतिगृह्णीयात् [25-] तदा तामेव [-25] निर्दिशेत् - योऽयं Vवरः Vसा इयं सहस्रतमीति । एवं निर्दिश्य Vअथ Vअन्यां [26]प्रत्येवं Vब्रूयात् - Vइयं वरव्यतिरिक्ता Vमम Vइति । एवं निर्देशे सति वरप्रतिग्रहेऽपि [27]सहस्रप्रतिग्रहदोषो [28]न भवति ॥

---

४९. अ१ - °सहस्राद्वा वागात्म°, मै२ - °गोसहस्रवागात्म° । ५०. अ१. मै१. मै२ - ' तस्मात् ' नास्ति । ५१. मै२- सहस्रतमी इत्यादि । ५२. अ१ - तदेवाह । ५३. मै. मै२. मै३. अ - ' हि ' नास्ति । ५४-५४. अ१ - सहस्रं प्रतिग्रहदोषम्, मै१ - ततश्च सहस्रप्रतिग्रहदोषम् । ५५-५५. मै१. मै२ - ' इयं वर इति ' नास्ति । ५६. मै२ - ग्राहयित्वा, अ१ - ' ग्राहयिता ' नास्ति । ५७. [मै मुद्रितावृत्तौ संसूचितोऽयं पाठः, सर्वत्र लिखितपुस्तकेषु ' सहस्रं प्रतिगृहीतम् ' इति पाठ उपलभ्यते ।]। ५८. मै२ - उभयतवादी ।

२३-२३. शृ१ - तत्सृष्टम् । २४. शृ१ - गृह्णीयात् । २५-२५. अ. आ. इ. वा. वै. पा. मै - तदानीमेवम् । २६. अ. पा. वा - प्रत्येकम् । २७. वा - सहक्षं प्रतिग्रह° । २८. वा. ' न ' नास्ति ।

भवत्युभयतएनी स्यात् तदाहुरन्यतएनी स्यात् सहस्रं परस्तादेतमिति यैव वरः (५) कल्याणी रूपसंमृद्धा सा स्यात् सा हि वरः समृद्ध्यै

भवति । उभयतएनीत्युभयतः-एनी । स्यात् । तत् । आहुः । अन्यतएनीत्यन्यतः-एनी । स्यात् । सहस्रम् । परस्तात् । एतम् । इति । या । एव । वरः(५) । कल्याणी । रूपसंमृद्धेति रूप-समृद्धा । सा । स्यात् । सा । हि । वरः । समृद्ध्या इति सम्-ऋद्ध्यै ।

'[५८]उभयतएनी' इत्यादि ॥ व्यत्ययेन 'नञ् कुनिपातानाम्' इति वचनात् समासान्तोदात्तत्वमेव । 'तदाहुः' इति । तत्राहुरन्ये इत्यर्थः । [५९]अन्यतः [६०]एकपार्श्वे शुक्ला [V]सहस्रतमी [V]स्यात् । [V]परस्तात् इतरस्मिन् भागे [६१-] सहस्रभूतमेतं शुक्लं [-६१] स्यात् [६२]उभयमिदं तुल्यं, तस्याः सहस्रेण तुल्यत्वात् इत्येवमस्याः स्तुतिः । पक्षान्तरमाह - 'यैव' इति । [V]या वरद्रव्यात्मिका कल्याणगुणवती [V]रूपसमृद्धा शोभनरूपा च । "तृतीया कर्मणि" (पा ६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वम् । [V]सा [V]स्यात् देया सहस्रमध्ये, [V]सा [६३][V]हि तद्रूपा हि [V]वरः भवति । तस्मात् सा [६४]दातुः समृद्ध्यै भवति । "तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् ॥

उभयत इति ॥ इत्थं सहस्रतमीं बहुधा प्रशस्य तस्या दातव्याया लक्षणं विधत्ते - 'उभयतएनी स्यात्' इति ॥ उभयोः पार्श्वयोः शुक्लरेखा यस्याः सेयम् [V]उभयतएनी ॥

तदाहुरिति ॥ अथ प्रकारान्तरेण लक्षणं विधत्ते - 'तदाहुरन्यतएनी स्यात् सहस्रं परस्तादेतमिति' इति ॥ [२९][V]तत् तस्मिन् सहस्रतमीविषयेऽभिज्ञा एवमाहुः - अन्यतरस्मिन्नेव पार्श्वे शुक्लरेखा पर्याप्ता । तत्रोपपत्तिं चैवमाहुः - [३०][V]एतं [V]परस्तात् [V]सहस्रम् एतस्य गोविशेषस्य परभागे गोसहस्रं तिष्ठत्यतो न तत्र शुक्लरेखाऽपेक्षितेति ॥

येति ॥ अथ सहस्रतमीप्रतिनिधित्वेन पक्षान्तरं विधत्ते - 'यैव वरः कल्याणी रूपसमृद्धा सा स्यात् सा हि वरः समृद्ध्यै' इति ॥ या गौः [V]कल्याणी बहुक्षीरादिगुणवती [V][३१]रूपसमृद्धा समीचीनशृङ्गपुच्छाद्युपेता [V]सा एवात्र [V]वरः दातव्यो गोविशेषः [V]स्यात् । [३२]तद्दानेनैव समृद्धिर्भवति ॥

५९. मै२ - अन्यत्र । ६०. मै१. मै२ - एकत्र पार्श्वे । ६१. मै१ - सहस्रमेतं शुद्धम् । ६२. अ१ - उभयमित्र । ६३. मै२ - 'हि' नास्ति । ६४. मै२ - तु ।

२९. अ. आ. पा. वा. वै - 'तत्' नास्ति । ३०. शृ१ - एवम् । ३१. अ. पा. इ. वा. वै - °समृद्ध्यै । ३२. शृ१. मै - तद्दाने च ।

तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्यान्ते द्रोणकलशमव घ्रापयेदा जिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मां सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति

ताम् । उत्तरेणेत्युत्-तरेण । आग्नीध्रमित्याग्नि-इध्रम् । पर्याणीयेति परि-आनीय । आहवनीयस्येत्या-हवनीयस्य । अन्ते । द्रोणकलशमिति द्रोण-कलशम् । अवेति । घ्रापयेत् । एति । जिघ्र । कलशम् । महि । उरुधारेत्युरु-धारा । पयस्वती । एति । त्वा । विशन्तु । इन्दवः । समुद्रम् । इव । सिन्धवः । सा । मा । सहस्रे । एति । भज । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः । सह । पुनः । मा । एति । विशतात् । रयिः । इति ।

'तामुत्तरेण' इत्यादि । अग्नीधः शरणमाग्नीध्रम् । "अग्नीधः शरणे रण् भ च" (पा ४.३.१२०वा) इति [65]रण् । तदुत्तरेण Vतां गां Vपर्याणीय परितः आनीय Vआहवनीयस्य Vअन्ते समीपे 'आ जिघ्र' इति मन्त्रेण द्रोणकलशम् Vअवघ्रापयेत् । इयं च सप्तपदा शक्वरी सर्वे च पादा अष्टाक्षराः । हे Vमहि मंहनीये, Vकलशम् Vआजिघ्र आभिमुख्येन जिघ्र । Vउरुधारा विस्तीर्णधारा त्वं Vपयस्वती बहुक्षीरा, त्वाम् Vइन्दवः सोमरसाः Vआविशन्तु, Vसमुद्रम् Vइव

तामिति ॥ दातव्यायास्तस्या गोराघ्रापणं विधत्ते - 'तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्यान्ते द्रोणकलशमव घ्रापयेत्' इति ॥ अग्नीधः शरणम् Vआग्नीध्रं तस्योत्तरभागे Vतां दातव्यां गां प्रदक्षिणत्वेनाऽऽनीय Vआहवनीयस्य समीपे द्रोणकलशस्थितं सोमम् Vअवघ्रापयेत् ॥

आ जिघ्रेति ॥ तस्मिन्नाघ्रापणे मन्त्रमुत्पादयति - 'आ जिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति' इति ॥ महीति [33]गोर्नाम [34]वक्ष्यते । हे [35]Vमहि त्वं द्रोणकलशं सर्वतो जिघ्र । कीदृशी त्वम्, Vउरुधारा दीर्घक्षीरधारोपेता । Vपयस्वती बहुलक्षीरोपेता । तादृशीं त्वाम् Vइन्दवः सोमबिन्दवः Vआविशन्तु । यथा Vसमुद्रं Vसिन्धवः प्रविशन्ति तद्वत् । Vसा त्वं मामस्मिन् गोसहस्रे Vआभज सर्वतः प्रापय । तथा Vरयिः धनं Vप्रजया Vपशुभिः च Vसह मां V[36]पुनः आविशतु ॥

---

६५. मै१ - रङ् ।

---

३३. मै - गोनाम । ३४. अ. आ. पा. इ. वा. वै - लक्ष्यते । ३५. मै - नहि । ३६. शृ१. मै - पुनः पुनः ।

प्रजयैवैनं पशुभी रय्या स(६)मर्धयति प्रजावान् पशुमान्
रयिमान् भवति य एवं वेद तया सहाऽऽग्नीध्रं परेत्य
पुरस्तात् प्रतीच्यां तिष्ठन्त्यां जुहुयादुभा

प्रजयेति प्र-जया । एव । एनम् । पशुभिरिति पशु-भिः । रय्या । समिति (६) अर्धयति । प्रजावानिति प्रजा-वान् । पशुमानिति पशु-मान् । रयिमानिति रयि-मान् । भवति । यः । एवम् । वेद । तया । सह । आग्नीध्रमित्याग्नि-इध्रम् । परेत्येति परा-इत्य । पुरस्तात् । प्रतीच्याम् । तिष्ठन्त्याम् । जुहुयात् । उभा ।

नद्यः, [V]सा त्वमेवं विशिष्टा मां [V]सहस्रे [V]आभज स्वामित्वेन स्थापय । निमित्तसप्तमी वा । [66]सहस्रार्थमा भज । [V]प्रजया [V]पशुभिः च [67-V]सह त्वत्प्रसादात् [-67] [68-V]पुनः [V]मा [V]विशतात् [-68] [69]दानानन्तरमेव गोसहस्रलक्षणा [V]रयिः मां प्राप्नोतु । 'प्रजया' इत्यादि ॥

'तया सह' इत्यादि ॥ [V]आग्नीध्रं [V]परेत्य परागत्य तस्याः [V]पुरस्तात् [V]प्रतीच्यां [V]तिष्ठन्त्यां प्रत्यङ्मुख्याम् "उभा जिग्यथुः" (तैसं ३.२.११) इति जुहोति । त्रिष्टुबियं "प्र सो अग्ने" (तैसं ३.२.११) [70]इत्यत्र व्याख्याता । [71-] एवं दर्शितौ [-71] उभौ अपि युवां सर्वथा [V]जिग्यथुः जयथः न

प्रजयेति ॥ आघ्रापणस्य फलं दर्शयति - 'प्रजयैवैनं पशुभी रय्या समर्धयति' इति ॥

प्रजावानिति ॥ वेदनं प्रशंसति - 'प्रजावान् पशुमान् रयिमान् भवति य एवं वेद' इति ॥

तयेति ॥ अथ तदङ्गभूतं कञ्चिद्धोमं विधत्ते - 'तया सहाऽऽग्नीध्रं परेत्य पुरस्तात् प्रतीच्यां तिष्ठन्त्यां जुहुयात्' इति ॥ [37]आहवनीयसमीपे स्थितया [V]तया गवा [V]सह पुनराग्नीध्रसमीपे प्रत्यागत्य तस्याऽऽग्नीध्रस्य पूर्वभागे [38]प्रत्यङ्मुखत्वेन गवि स्थितायां जुहुयात् ॥

---

६६. मै१ - सहस्रार्थं मा मा भज । ६७-६७. अ१. मै१ - 'सह त्वत्प्रसादात्' नास्ति । ६८-६८. अ१. मै१ - पुनर्मा मा विशत (मै१ - विशतात्) । ६९. मै१ - दानानन्तरमेवम्, मै२ - आनन्तरमेव । ७०. मै२ - इत्यादि । ७१. मै२ - 'एवं दर्शितौ' नास्ति ।

---

३७. मै - नाहवनीय° । ३८. शृ१ - प्राङ्मुखत्वेन ।

सहस्रतमीस्तुत्यादि]

जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै

जिग्यथुः । न । परेति । जयेथे इति । न । परेति । जिग्ये । कतरः । चन । एनोः । इन्द्रः । च । विष्णो इति । यत् । अपस्पृधेथाम् । त्रेधा । सहस्रम् । वीति । तत् । ऐरयेथाम् । इति । त्रेधाविभक्तामिति त्रेधा-विभक्तम् । वै ।

कदाचिदपि Vपराजयेथे । तथा हि [७२]एनयोर्मध्ये Vकतरः च एकतरोऽपि [७३]न कदाचित् Vपराजिग्ये । [७४-]किं च[-७४] - हे विष्णो, त्वं च Vइन्द्रः च Vयदपस्पृधेथां स्पर्धां कृतवन्तौ [७५]यथा " तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताम् " (तैसं ७.१.५) इति, Vतत् गवां Vसहस्रं Vत्रेधा [७६]Vव्यैरयेथां विभक्तवन्तौ विभज्य च व्यवस्थितवन्तौ द्विभागे इन्द्रः तृतीये त्वमिति ॥

तदिदमनेन [७७]मन्त्रेण उक्तमिति दर्शयति ' त्रेधा विभक्तं [७८]वै ' इत्यादि ॥ गतम् । Vसाहस्रीं सहस्रस्य संबन्धिनीं सहस्रतमीम् [७९]Vएव Vएनां Vकरोति [८०]त्रेधाविभक्तसहस्रानुवादेन ।

उभेति ॥ होमाङ्गभूतं मन्त्रं दर्शयति - ' उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि [३९]तदैरयेथामिति ' इति ॥ हे इन्द्राविष्णू , युवाम् [४०-]Vउभा उभौ[-४०] Vजिग्यथुः सर्वत्र जितवन्तौ Vन Vपराजयेथे क्वापि पराजयं न प्राप्नुथः । Vएनोः [४१]एनयोरुभयोर्मध्ये Vकतरः Vचन एकोऽपि Vन Vपराजिग्ये पराजयं न प्राप्तवान् । हे Vविष्णो, त्वम् Vइन्द्रः Vच उभौ Vयत् Vअपस्पृधेथां यदा परस्परं स्पर्धितवन्तौ तत् तदा गोसहस्रं Vत्रेधा विभज्य Vऐरयेथाम् इन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवं प्राप्तवन्तौ ॥

त्रेधेति ॥ ' त्रेधा सहस्रम् ' इति मन्त्रभागस्य तात्पर्यं [४२]दर्शयति इति - ' त्रेधाविभक्तं वै त्रिरात्रे सहस्र९ साहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां करोति ' इति ॥ त्रिरात्राख्ये यागे गोसहस्रं दिनत्रयार्थं

---

७२. अ१. मै१ - तयोर्मध्ये । ७३. मै२ - ' न ' नास्ति । ७४-७४. मै२ - ' किं च ' नास्ति । ७५. मै२ - तथा । ७६. अ१- वितदैरयेथाम् , मै१ - विदैरयेथाम् । ७७. मै२ - ' मन्त्रेण ' नास्ति । ७८. मै२ - चापि । ७९. मै२ - च । ८०-८०. मै२ - ' त्रेधा° - - - - करोति ' नास्ति ।

---

३९. अ. आ. पा. इ. वै. मै - °येथामिति इति । ४०-४०. आ. इ. वै - उभा, मै - उभौ । ४१. इ. वै - एतयो° । ४२. सर्वेषु लिखितपुस्तकेषु ' दर्शयति ' इति ।

त्रिरात्रे सहस्रꣳ साहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां (७) करोति रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे

त्रिरात्र इति त्रि-रात्रे । सहस्रम् । साहस्रीम् । एव । एनाम् । करोति । सहस्रस्य । एव । एनाम् । मात्राम् (७) । करोति । रूपाणि । जुहोति । रूपैः । एव । एनाम् । समिति । अर्धयति । तस्याः । उपोत्थायेत्युप-उत्थाय । कर्णम् । एति । जपेत् । इडे ।

किञ्च - [V]सहस्रस्य [V]मात्रां तुल्यप्रमाणाम् [V]एनां [V]करोति । मीयतेऽनयेति मात्रा उपमानम् । 'रूपाणि' इत्यादि । यान्यश्वमेधे प्रसिद्धानि "अञ्ज्येताय" (तैसं ७.३.१७) इत्यादीनि रूपाणि । तानि [८२]यथार्थमूहित्वा जुहोति [८३]रूपसमृद्धाम् एनां करोति [-८०] ।।

'तस्याः' इत्यादि ।। [V]तस्याः [V]उपोत्थाय कर्णसमीपमागत्य स्थित्वा [८४][V]आ जपेत् - 'इडे रन्ते' इति । इयं विराट् चतुष्पदा । सर्वाण्येतान्यामन्त्रितानि । "आमन्त्रितं [८५]पूर्वमविद्यमानवत्" (पा ८.१.७२) [८६-] इत्यविद्यमानत्वान्निघाताभावः, [८७]ततः [८८]षाष्टिकमाद्युदात्तत्वम् (पा ६.१.१९८) [-८६] । अष्टौ गाव एताः, तादात्म्येन [८९]संस्तूयन्ते । तेन "नामन्त्रिते [९०]समानाधिकरणम्" (पा ८.१.१७३)

[४३]त्रेधाविभक्तामिति यत् तेन [V]एनां सहस्रतमीमेव गां [४४][V]साहस्रीं सहस्रोपेतां करोति, न केवलं सहस्रोपेतां किन्तु तस्य सहस्रस्य यावती मात्रा तावन्मात्राम् [V]एव [V]एनां करोति ।।

रूपाणीति ।। अथैतदङ्गभूतं होमान्तरं विधत्ते - 'रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति' इति ।। रोहिणी पिङ्गलैकहायनीत्यादीनि यानि [V]रूपाणि उक्तानि तानि जुहुयात् । "रोहिण्यै स्वाहा" (तैब्रा३.१.४) इत्यादयो [४५]मन्त्रास्तत्रोन्नेयाः । एतस्मिन् होमे कृते सत्यपेक्षितैः [४६-][V]रूपैः [V]एव [V]एनां [-४६] समृद्धां करोति ।।

तस्या इति ।। अथैतदङ्गभूतं जपं [४७]विधत्ते - 'तस्या उपोत्थाय कर्णमा जपेत्' इति ।। [V]तस्याः गोः कर्णसमीपं [४८]प्रत्युत्थितो भूत्वा वक्ष्यमाणं मन्त्रं जपेत् ।।

८१. मै१ - एताम् । ८२. मै१ - °मूहित्वा च । ८३. अ१ - 'रूपसमृद्धाम्' नास्ति । ८४. मै. मै१. मै२. मै३. अ - जपेत् । ८५. अ१ - पूर्वं विद्यमानवत् । ८६-८६. मै२ - इत्यविद्यमानवत्वात् निघाताभावे षाष्ठिकानामामन्त्रिताद्युदात्तत्वम् । ८७. अ१ - सर्वत्र । ८८. अ१ - °कमामन्त्रिताद्युदात्तत्वम् । ८९. अ१ - यं स्तूयते । ९०. मै२ - 'समानाधिकरणम्' नास्ति ।

४३. [अस्माभिः संशोधितोऽयं पाठः, आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु °विभक्तव्यमिति पाठ उपलभ्यते ।] । ४४. म - 'साहस्रीम्' नास्ति । ४५. म- मन्त्रा उक्तस्तत्रो° । ४६-४६. आ - रूपैरेवैनाम्, शृ१. पा. इ. वा. वै - रूपैरेनाम् । ४७. मै - 'विधत्ते' नास्ति । ४८. अ. आ. इ. पा. वा. वै. म - प्रत्युपस्थितः ।

रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते
अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति

रन्ते । अदिते । सरस्वति । प्रिये । प्रेयसि । महि । विश्रुतीति वि-श्रुति । एतानि । ते । अघ्निये । नामानि । सुकृतमिति सु-कृतम् । मा । देवेषु । ब्रूतात् । इति ।

इति [९१]निषेधाभावः । [९२]- तेन [९३]पदात्परत्वाभावात् [९४]षाष्ठिकमाद्युदात्तत्वमेव -[९२] (पा ६.१.१९८) । हे Vइडे [९५]अन्नवति, Vरन्ते [९६]रतिहेतो, Vअदिते [९७]अखण्डिते, Vसरस्वति [९८]सरणवति, Vप्रिये सर्वस्य [९९]प्रीणयित्रि, Vप्रेयसि प्रियतरे रत्नादेरपि, Vमहि महनीये, [१००]Vविश्रुति विशेषेण श्रुते । " क्तिच्क्तौ च°" (पा ३.३.१७४) इति क्तिच्, " कृदिकारादक्तिनः " (गणसूत्र पा ४.१.४५) इति [१०१]ङीष् । हे [१०२]Vअघ्निये [१०३]अहन्तव्ये आयुष्मति Vएतानि तव Vनामानि, सा त्वं किं नाम न कुर्याः, किं वा कर्तुं न [१०४]शक्नुयाः । [१०५]सा तादृशी महानुभावा त्वं [१०६]Vदेवेषु [१०७]सुकृतं

इडे इति ।। तमिमं मन्त्रं दर्शयति - ' इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति ' इति ।। केनापि न हन्यते इत्यघ्निया गौः । हे Vअघ्निये इडादीनि तव नामानि । अतस्तैर्नामभिरिह [४९]गौः [५०]संबोध्यते । एतादृशी त्वं Vदेवेषु मध्ये मां यजमानं Vसुकृतं पुण्यकृतं ब्रूहि ।।

---

९१. अ१ - °धाभावाः, मै२ - तेषामभावः । ९२. मै२ - ' तेन - - - - °त्त्वेन ' नास्ति । ९३. अ१ - °परत्वात् । ९४. अ१ - °दाद्युदात्तमेव । ९५. मै१ - अश्नवति, मै२ - अन्तवति । ९६. अ१ - रतिवति । ९७. अ१ - खण्डिते । ९८. अ१ - सरसे, मै१ - सरसस्ते । ९९. मै१ - प्रीणयति । १००. मै१ - ' विश्रुति ' नास्ति । १०१. मै२ - दीर्घः । १०२. मै१ - आग्रेध्यः, मै२ - ' अघ्निये ' नास्ति । १०३. अ१ - ' अहन्तव्ये ' नास्ति, मै१ - आहन्तव्ये, मै२ - हन्तव्ये । १०४. मै. मै१. मै३. अ. अ१ - शक्यं त्वया । १०५. मै२ - या । १०६. अ१. मै१ - ' देवेषु ' नास्ति । १०७. मै२. मां सुकृतम् ।

---

४९. [मै - कोशमवलम्ब्य शुद्धीकृतः पाठः ।], मै - गाः, अ. आ. पा. इ. वा. वै. म. शृ१ - ' गौः ' नास्ति । ५०. इ. वा. वै - संबोध्य, म - संबुद्ध्य ।

देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुद्ध्यन्ते ॥६॥

(एतदेतस्यां वीर्यमस्य त्रिभिश्च दत्ता सहस्रतमी तस्मादेव वरः सं मात्रामेकान्नचत्वारिꣳशच्च ।)

देवेभ्यः । एव । एनम् । एति । वेदयति । अन्विति । एनम् । देवाः । बुद्ध्यन्ते ॥६॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

शोभनकर्माणं Vमा [१०८]देवेषु Vब्रूतात् [-१०८] आवेदयतादित्याशास्ते । “ सुकर्मपापमन्त्रपु°” (पा ३.२.८९) इत्यादिना क्विप् । ‘ देवेभ्यः ’ इत्यादि । एवमनेन प्रार्थिता Vसा Vदेवेभ्यः एवम् Vआवेदयति Vएव । आवेदनानन्तरं च Vएनं देवाः Vबुद्ध्यन्ते सुकर्माणं निश्चिन्वन्ति ॥

[१०९-] ॥ इति सप्तमे प्रथमे षष्ठोऽनुवाकः [-१०९] ॥

देवेभ्य इति ॥ मन्त्रस्य तात्पर्यं दर्शयति - ‘देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते ’ इति ॥ एतन्मन्त्रपाठेनेयं गौः Vदेवेभ्यः Vएव Vएनं यजमानम् Vआवेदयति । ते च Vदेवाः Vएनं यजमानं पुण्यकारिणं जानन्ति ॥

॥ [५१-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः [-५१] ॥

१०८-१०८. मै. मै२. मै३. अ. अ१ - ब्रूयात् । १०९-१०९. मै१ - इति सप्तमे प्रथमे षष्ठः, मै२ - सप्तमे प्रथमे षष्ठः ।

५१-५१. वै - इति षष्ठोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुर्वेदसंहितायां प्रथमकाण्डे षष्ठोऽनुवाकः ।

सहस्रतमीदानम्]

सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनं सुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तं लोकं गमयेत्याह

सहस्रतम्येति सहस्र - तम्या । वै । यजमानः । सुवर्गमिति सुवः-गम् । लोकम् । एति । सा । एनम् । सुवर्गमिति सुवः-गम् । लोकम् । गमयति । सा । मा । सुवर्गमिति सुवः-गम् । लोकम् । गमय । इति । आह । सुवर्गमिति सुवः-गम् । एव । एनम् । लोकम् । गमयति । सा । मा । ज्योतिष्मन्तम् । लोकम् । गमय । इति । आह ।

'सहस्रतम्या' इत्यादि ॥ [V]सहस्रतम्या [V]यजमानः [1][V]सुवर्गं गच्छति । [V]सा च [V]एनं स्वर्गं [2]लोकं [V]गमयति यद्येतैर्मन्त्रैः स्तुता । तस्मात् [3-]'सा मा [-3] सुवर्गम्' इत्यादिभिरुदीचीं नीयमानामनुमन्त्रयते - [V]सा त्वं गच्छन्ती मां [4][V]सुवर्गं [V]लोकं [V]गमय इति, [5-] सुवर्गं गमयेत्येव [-5] । एक [6]एव मन्त्रोऽवयुत्यैव ब्राह्मणेन व्याख्यायते । गता [7-] मन्त्राः, ब्राह्मणानि [-7] च (द्र. तैसं७.१.६) । ज्योतिष्मान् लोक आदित्यः । [8-] पुण्या लोका [-8] इन्द्रादीनां लोकाः

षष्ठेऽनुवाके सहस्रतमीं प्रशस्य तदङ्गभूतं होमादिकमुक्तम् । अथ सप्तमे तद्दानं विधीयते ॥

सहस्रतम्येति ॥ तत्र यदुक्तं सूत्रकारेण - " तां [1]यजमानोऽभिमन्त्रयते सा मा सुवर्गं लोकं गमय [2]इति " (आपश्रौ २२.१६.१०) इति, [3]तानेतान् सहस्रतम्या अनुमन्त्रणमन्त्रांश्चतुरो [4]ह्युत्पाद्य व्याचिख्यासुः प्रथममन्त्रतात्पर्यं दर्शयति - 'सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनं सुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति' इति ॥ [V]यजमानः अयं [V]सहस्रतम्या गवा स्वर्गं [V]लोकं प्राप्नोति । [V]सा हि [V]एनं प्रापयति । तस्मात् 'सा मा' इत्यादि मन्त्रं [5]पठेत् । हे सहस्रतमे, [V]सा त्वं मां स्वर्गं [V]लोकं प्रापयेति तस्यार्थः । तेन सा स्वर्गं [6]लोकं प्रापयत्येव ॥

---

१. मै. मै१. मै२. मै३. अ - स्वर्गम् । २. मै. मै१. मै३. अ. अ१ - 'लोकम्' नास्ति । ३-३. अ१ - 'सा मा' नास्ति । ४. मै१ - 'सुवर्गम्' नास्ति । ५-५. अ१. मै१ - 'सुवर्गं गमयेत्येव' नास्ति, मै२ - सुवर्गं गमयत्येव । ६. मै२ - 'एव' नास्ति । ७-७. मै२ - मन्त्रब्राह्मणानि । ८-८. मै१ - पुण्यलोकः ।

---

१. म - यजमानोऽनुमन्त्रयते । २. अ. पा. म - 'इति' नास्ति । ३. अ - तानेनान् । ४. क. मै - व्युत्पाद्य । ५. इ - पठन्, वा - पठं शच् (?) । ६. अ. आ. पा. इ. वा. म - 'लोकम्' नास्ति ।

ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान् पुण्याँल्लोकान् गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान् गमयति सा (१) मां प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽविंशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रति ष्ठापयति प्रजावान् पशुमान् रयिमान् भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा

ज्योतिष्मन्तम् । एव । एनम् । लोकम् । गमयति । सा । मा । सर्वान् । पुण्यान् । लोकान् । गमय । इति । आह । सर्वान् । एव । एनम् । पुण्यान् । लोकान् । गमयति । सा(१) । मा । प्रतिष्ठामिति प्रति-स्थाम् । गमय । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः । सह । पुनः । मा । एति । विशतात् । रयिः । इति । प्रजयेति प्र-जया । एव । एनम् । पशुभिरिति पशु-भिः । रय्याम् । प्रतीति । स्थापयति । प्रजावानिति प्रजा-वान् । पशुमानिति पशु-मान् । रयिमानिति रयि-मान् । भवति । यः । एवम् । वेद । ताम् । अग्नीध इत्यग्नि-इधे । वा । ब्रह्मणे । वा ।

ब्रह्मलोकपर्यन्ताः । प्रतिष्ठा प्रजादिभिः सहाऽस्मिन् लोके धनविषयमैश्वर्यम् । ‘प्रजावान्’ इत्यादि । [९] विदुषः सिद्धिः ॥

‘ताम्’ इत्यादि ॥ [१०]पुनर्वचनं गतम् । ‘सहस्रमस्य’ इत्यादि । ‘यस्तामविद्वान्’ इति । विशेषं वक्ष्यामीति [११]कृत्वा । अविदुषा प्रतिगृह्णता सहस्रं प्रतिगृहीतं भवति । तस्मादेवं विदित्वा Vतां Vप्रतिगृह्णीयात् - [१२]एकाऽसि’[९] इत्यादिना मन्त्रेण ‘सुशेवामाविश’

सेति ॥ एवमुत्तरेषां त्रयाणामपि मन्त्राणां क्रमेण तात्पर्यं दर्शयति - ‘सा मा ज्योतिष्मन्तं लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान् पुण्याँल्लोकान् गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान् गमयति सा मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रति ष्ठापयति’ इति ॥ ज्योतिष्मानादित्यलोकः । इन्द्रलोकादयः [७]पुण्याः । Vप्रतिष्ठां [८]स्थिरावस्थानम् । Vप्रजया Vपशुभिः च Vसह [९]रयिर्धनं Vपुनः Vमा प्रविशतु ॥

प्रजावानिति ॥ वेदनं प्रशंसति - ‘प्रजावान् पशुमान् रयिमान् भवति य एवं वेद’ इति ॥

९-९. अ१ - ‘विदुषः - - - - एकाऽसि’ नास्ति । १०. मै. मै२. मै३. अ - ‘पुनर्वचनम्’ नास्ति । ११. मै. मै२. मै३. अ - पुनर्वचनम् । १२. मै२ - ‘एकासि’ नास्ति ।

७. अ. पा. इ. वा. वै - पुण्यान् । ८. मै - °स्थानाम् । ९. शृ१ - रयिं धनम् ।

सहस्रतमीदानम्]

होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्यात् सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतं भवति यस्तामविद्वान् (२) प्रतिगृह्णाति तां प्रति गृह्णीयादेकाऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि

होत्रे । वा । उद्गात्र इत्युत्-गात्रे । वा । अध्वर्यवे । वा । दद्यात् । सहस्रम् । अस्य । सा । दत्ता । भवति । सहस्रम् । अस्य । प्रतिगृहीतमिति प्रति-गृहीतम् । भवति । यः । ताम् । अविद्वान् । (२) । प्रतिगृह्णातीति प्रति-गृह्णाति । ताम् । प्रतीति । गृह्णीयात् । एका । असि । न । सहस्रम् । एकाम् । त्वा । भूताम् । प्रतीति । गृह्णामि ।

---

[13]इत्यन्तेन । [14][V]एका त्वम् [V]असि [V]न [V]सहस्रम् , [15-] तस्मात् [V]एकाम् एव [V]भूतां [-15] त्वां [16][V]प्रतिगृह्णामि [V]न [17]तु सहस्रभूतां, तस्मात् त्वमपि [V]एका एव [V]भूता [18]माम् [V]आविश [V]मा [19]सहस्रभूता ॥

'एकामेव' इत्यादि ॥ विदुषो ब्राह्मणम् ॥ [V]स्योना [20]सुखहेतुरस्माकं सुपरिचारा वा त्वम् [V]असि । [V]सुषदा सुखेन [21]सदनीया दोहनादाविति । खलि कृदुत्तरपदप्रकृतिस्वरत्वम् ।

तामग्नीध इति ॥ तस्याः सहस्रतम्या दानं विधत्ते - 'तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्यात् सहस्रमस्य सा दत्ता भवति' इति ॥

सहस्रमस्येति ॥ अथ [10]प्रतिग्रहदोषपरिहाराय तत्प्रतिग्रहमन्त्रं विधत्ते - 'सहस्रमस्य प्रतिगृहीतं भवति यस्तामविद्वान् प्रतिगृह्णाति तां प्रतिगृह्णीयादेकाऽसि न सहस्रमेकां त्वा भूतां प्रतिगृह्णामि न सहस्रमेका मा भूताऽऽविश मा सहस्रमिति' इति ॥ [V]यः मन्त्रम् [V]अविद्वान् सहस्रतमीं प्रतिगृह्णीयात् [V]अस्य गोसहस्रं [V]प्रतिगृहीतं [V]भवति, तावान् प्रत्यवाय इत्यर्थः । अतः 'एकाऽसि' इत्यादिमन्त्रेण [V]तां सहस्रतमीं [V]प्रतिगृह्णीयात् । मन्त्रार्थस्तु - [11]सहस्रतमी त्वम् [V]एका एव गौः [V]असि [V]न तु [V]सहस्रम् । अतस्त्वाम् [V]एकाम् [12]एव [V]भूतां [V]प्रतिगृह्णामि [V]न तु [V]सहस्रं, त्वमपि एका एव [V]भूता मां प्रविश, [V]सहस्रं भूत्वा [V]मा [13]प्रविश । [14-][V]इति शब्दो [-14] मन्त्रसमाप्त्यर्थः ॥

---

१३. मै२ - इत्यन्ये । १४. मै२ - एकारः । १५-१५. अ१ - तस्मामेव भूतां मत्वा । १६. अ१. मै१ - प्रतिगृह्णामीति । १७. मै. मै२. मै३. अ - 'तु' नास्ति । १८. मै१ - मा । १९. अ१ - ऋता । २०. मै१ - सुखां दोग्युरसि(?), मै२ - सुखादेरस्मा° । २१. मै१ - सादनीया ।

---

१०. शृ१ - °ग्रहणदोष°, इ. वा. वै. मै. - °ग्रहे दोष° । ११. मै - हे सहस्रतमी । १२-१२. इ. वै - एवम् । १३. व - प्रविशत । १४-१४. शृ१ - इति मन्त्रे शब्दः ।

न सहस्रमेका मा भूताऽऽविश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं वेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा माऽऽविशे (३) त्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशति नैनꣳ हिनस्ति ब्रह्मवादिनो वदन्ति

न । सहस्रम् । एका । मा । भूता । एति । विश । मा । सहस्रम् । इति । एकाम् । एव । एनाम् । भूताम् । प्रतीति । गृह्णाति । न । सहस्रम् । यः । एवम् । वेद । स्योना । असि । सुषदेति सु-सदा । सुशेवेति सु-शेवा । स्योना । मा । एति । विश । सुषदेति सु-सदा । मा । एति । विश । सुशेवेति सु-शेवा । मा । एति । विश (३) । इति । आह । स्योना । एव । एनम् । सुषदेति सु-सदा । सुशेवेति सु-शेवा । भूता । एति । विशति । न । एनम् । हिनस्ति । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति ।

[V]सुशेवा [२२]सुफला बहुदुग्धत्वात् । "[२३-] आद्युदात्तश्छन्दसि" (पा ६.२.९१ वा) इत्युत्तरपदाद्युदात्तत्वम् [-२३] । सा त्वं तादृशी [V]स्योना [२४]अविगुणा सती माम् [V]आविश, यथा [२५-] मे न [-२५] कदाचिदपि हिंसा स्यात् तथा मामाविशेति ॥

'स्योनैव' इत्यादि । ब्राह्मणम् । गतम् ॥

एकामिति ॥ मन्त्रवेदनं प्रशंसति - 'एकामेवैनां भूतां प्रतिगृह्णाति न सहस्रं य एवं वेद' इति ॥

स्योनाऽसीति ॥ अथ प्रतिग्रहादूर्ध्वं जप्यं मन्त्रमुत्पाद्य तात्पर्यं दर्शयति - 'स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा माऽऽविशेत्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशेति नैनꣳ हिनस्ति' इति ॥ हे सहस्रतमि, त्वं [V]स्योना सुखप्रदा [V]सुषदा दोहनादिकाले सुखेन प्राप्तुं शक्या [V]सुशेवा कण्डूयनादिना सुखेन सेवितुं शक्या च [V]असि । अतस्तथाविधैव भूत्वा मां प्रविश । एतन्मन्त्रपाठेन तथैव भूत्वा प्रविश्य सर्वप्रकारेणापि [V]एनं न [V]हिनस्ति ॥

ब्रह्मवादिन इति ॥ अथान्वयव्यतिरेकाभ्यां प्रत्यङ्मुखत्वेनोत्सर्जनं विधत्ते - 'ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती३ सहस्रतमीꣳ सहस्रा३मिति यत् प्राचीमुत्सृजेत् सहस्रꣳ सहस्रतम्यन्वियात् तत्

२२. मै२ - सुगला, अ१ - 'सुफला' नास्ति । २३-२३. अ१ - छन्दसीत्युत्तर°, मै२ - आद्युदात्तस्य छन्दसि इत्यान्तरपद° । २४. मै२ - अभिगुणा । २५-२५. मै१. अ१ - तेन ।

सहस्रꣳ सहस्रतम्यन्वेती३ सहस्रतमीꣳ सहस्रा३ मिति यत् प्राचीमुत्सृजेत् सहस्रꣳ सहस्रतम्यन्वियात् तत्सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात् प्रतीचीमुत्सृजति

सहस्रम् । सहस्रतमीति सहस्र-तमी । अन्विति । एती३ । सहस्रतमीमिति सहस्र-तमीम् । सहस्रा३म् । इति । यत् । प्राचीम् । उत्सृजेदित्युत्-सृजेत् । सहस्रम् । सहस्रतमीति सहस्र-तमी । अन्विति । इयात् । तत् । सहस्रम् । अप्रज्ञात्रमित्यप्र-ज्ञात्रम् । सुवर्गमिति सुवः-गम् । लोकम् । न । प्रेति । जानीयात् । प्रतीचीम् । उदिति । सृजति ।

'ब्रह्मवादिनः' इत्यादि ॥ किं [V]सहस्रं [V]सहस्रतमी [V]अन्वेति अनुगच्छति ? [२६-] उत सहस्रं [V]सहस्रतमीम् अन्वेति [-२६]। उभयत्र " विचार्यमाणानाम् " (पा ८.२.९७) इति प्लुतः । [२७-] एवं [V]ब्रह्मवादिनः विचारं [V]वदन्ति [-२७] ॥

[२८]इदानीं पक्षद्वयस्योत्थापनं [२९]फलभेदं चाह - 'यत् प्राचीम्' [३०]इत्यादि ॥ [३१-][V]यत् यद्यर्थे [-३१]। यद्येनां [V]प्राचीम् [V]उत्सृजेत् [V]सहस्रतमी [V]सहस्रम् [V]अन्वियात् [३२]अनुगच्छेत् अग्रे सहस्रं गच्छेत् तत्सहस्रतम्यनुगच्छेत् । ततश्च [V]तत् [V]सहस्रम् [V]अप्रज्ञात्रं [३३]प्रज्ञानरहितं [३४]स्वर्गं [V]न [V]प्रजानीयात् ततश्च स्वर्गं [३५]न गच्छेत् यजमानः । प्रकृष्टज्ञानं प्रज्ञात्रम् । औणादिकस्त्रप्रत्ययः, (उसू ४.१७०) बहुव्रीहौ " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् । तस्मात् [३६]प्रतीचीमुत्सृजति इति विधिः । " चौ " (पा ६.३.१३८) इति [३७-] पूर्वपदस्य दीर्घत्वम् [-३७],

---

सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात् प्रतीचीमुत्सृजति ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति' इति ॥ किं गोसहस्रस्य पुरतो गमनं किं वा सहस्रतम्याः पुरतो गमनमिति ब्रह्मवादिनां विचारः । [१५]तत्र यदि प्राङ्मुखीमेनाम् [V]उत्सृजेत् तदानीं पुरतो गोसहस्रे [१६]गच्छति [१७]सति पश्चादियं गच्छेत् । तदानीं

२६-२६. मै१ - 'उत - - - - अन्वेति ' नास्ति । २७-२७. अ१. मै१ - एवं विचारयन्ति ब्रह्मवादिनः । २८. अ१. मै१-'इदानीम्'नास्ति । २९. मै१ - फलं भेदम्, मै२ - फलम् । ३०. अ१ - इति । ३१-३१. मै१ -'यत् यद्यर्थे ' नास्ति । ३२. अ१. मै१ - 'अनुगच्छेत् ' नास्ति । ३३. मै२ - प्रज्ञातरहितम् । ३४. मै२ - न ज्ञानरहितं स्वर्गम् । ३५. मै१ - 'न 'नास्ति । ३६. मै१- °मुत्सृजेत् । ३७-३७. अ१. मै१ - दीर्घत्वं पूर्वपदस्य ।

---

१५. म - तत्र तत्र । १६. अ - गच्छन्ति । १७. अ. वा - 'सति 'नास्ति ।

ता८ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति यजमान (४) मभ्युत् सृजति क्षिप्रे सहस्रं प्र जायत

ताम् । सहस्रम् । अन्विति । पर्यावर्तत इति परि-आवर्तते । सा । प्रजानतीति प्र-जानती । सुवर्गमिति सुवः-गम् । लोकम् । एति । यजमानम् (४) । अभि । उदिति । सृजति । क्षिप्रे । सहस्रम् । प्रेति । जायते ।

अन्तोदात्तत्वं च (पा ६.१.१२२)। [३८]तां सहस्रतमीमग्रे गच्छन्तीं [V]सहस्रम् [V]अनु [V]पर्यावर्तते [३९-] पृष्ठतो गच्छति [-३९]। " गतिर्गतौ " (पा ८.१.७०) इति [४०]पूर्ववन्निघातः, समासश्च । अनुः कर्मप्रवचनीय उदात्त एव । [V]सा च [V]प्रजानती [४१][V]सुवर्गं गच्छति । " शतुरनुमः°" (पा ६.१.१७३) इति [४२]नद्या उदात्तत्वम् । तत्र चैवं [४३]कर्तव्यमित्याह - [V]यजमानम् [V]अभि यजमानं लक्षीकृत्य

प्रज्ञानरहितं गोसहस्रं स्वर्गं [V]न जानीयात् । तस्मात् तत्परिहाराय प्रत्यङ्मुखीमेनामुत्सृजेत् । तदानीं पुरतो गच्छन्तीं तां सहस्रतमीम् [V]अनु पृष्ठतो गोसहस्रं गच्छति । [१८][V]सा [१९]च सहस्रतमी मार्गाभिज्ञा सती स्वर्गं प्राप्नोति ॥

यजमानमिति ॥ यदुक्तं सूत्रकारेण - " तां शतमानेन हिरण्येन निष्क्रीय यजमानस्य गोष्ठे विसृजति " (आपश्रौ २२.१६.१६) इति, तदेतद्विधत्ते - ' यजमानमभ्युत्सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान् गच्छति ' इति ॥ ऋत्विग्भ्यो निष्क्रीतां तां सहस्रतमीं यजमानगृहाभिमुख्येखेनोत्सृजेत्

---

३८. अ१ - तां सहस्रस्य । ३९-३९. मै. अ - अनुगच्छति, मै२ - प्रभूतोऽनुगच्छति, मै३ - गच्छति । ४०. मै२- पूर्वस्य निघातः । ४१. अ१ - सुवर्गं स्वर्गम् । ४२. मै२ - तद्वा । ४३. मै. मै३. अ. अ१ - वक्तव्य° ।

---

१८. मै - गा । १९. वा - चन ।

उत्तमा नीयते प्रथमा देवान् गच्छति ॥७॥

(लोकान् गमयति साऽविद्वान् सुशेवा माऽऽविश यजमानं द्वादश च) ।

उत्तमेत्युत्-तमा । नीयते । प्रथमा । देवान् । गच्छति ॥७॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

ताम् [V]उत्सृजति, [४४]ततश्च [V]क्षिप्रे काले [V]सहस्रं बहु [V]प्रजायते यजमानः । [V]उत्तमा [V]नीयते [४५-]पश्चात्सर्वान्ते नीयते[-४५] । [V]प्रथमा [V]देवान् [V]गच्छति प्रथममेव यजमानमपि गृहीत्वा देवसकाशं गच्छति । उत्तमशब्दः [४६]उञ्छादित्वादन्तोदात्तः (गणपा २०७, पा ६.१.१६०) ॥

[४७-] इति सप्तमे प्रथमे सप्तमोऽनुवाकः[-४७] ॥

। तथा सति यजमानगृहे [२०]स्वल्प एव काले [V]सहस्रम् उत्पद्यते । इयं च सहस्रतमी [२१]दक्षिणानयनकाले चरमा सती [V]नीयते । स्वर्गप्राप्तिकाले [V]प्रथमा सती यजमानेन सह [२२][V]देवान् [V]गच्छति ॥

॥ [२३-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः[-२३] ॥

---

४४. मै२ - ‘ततश्च’ नास्ति । ४५-४५. मै१- पश्चात्सर्वास्ता मीयन्ते, अ१ - पश्चात्सवास्ते नीयते । ४६. मै१ - उञ्छादिरन्तोदात्तः । ४७-४७. मै१ - इति सप्तमप्रथमे प्रथमः, मै२ - इति सप्तमे प्रथमे सप्तमः ॥

---

२०. अ. आ. पा. इ. वा. वै - त्वल्पे । २१. शृ१ - दक्षिणायनबले । २२. मै - ‘देवान्’ नास्ति । २३-२३. वै - इति सप्तमोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ।

[चतूरात्रस्यात्रेयविधिः

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत् तमाऽहरत् तेनायजत

अत्रिः । अददात् । और्वाय । प्रजामिति प्र-जाम् । पुत्रकामायेति पुत्र-कामाय । सः । रिरिचानः । अमन्यत । निर्वीर्य इति निः-वीर्यः । शिथिलः । यातयामेति यात-यामा । सः । एतम् । चतूरात्रमिति चतुः-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत ।

अथ चत्वारः [१]चतूरात्राः भवन्ति - [२]आत्रेयजामदग्न्यवसिष्ठसंसर्पविश्वामित्रसंजयाख्याः । [३] तत्रात्रेयाश्चतुर्वीरषोडशिमच्चतुर्थषष्ठोमनामानः चत्वारश्चतूरात्राः । जामदग्न्यादीनां त्रयाणां चैक इति [-३] [४]तत्रात्रेयचतूरात्रेषु [५]चतुर्षु [६-] प्रथमं चतुर्वीराख्यं [-६] [७]चतूरात्रं विधातुमाह - 'अत्रिरददात्' इत्यादि ॥ ऊर्वपुत्रः [८]और्वः । "अनृष्यानन्तर्ये°" (पा ४.१.१०४) इति [९]बिदादित्वात् (गणपाठ ५६, पा ४.१.१०६) अञ् । तस्मै [V]और्वाय [V]पुत्रकामाय आत्मीयां [V]प्रजाम् अपत्यत्वेन [V]अददात् । पुत्रं कामयत इति "शीलिकामि°" (पा ३.२.१ वा ७) इत्यादिना णः पूर्वपदप्रकृतिस्वरत्वं च । अथ [१०]अत्रिः [V]रिरिचानः रिच्यमानः [११]प्रजारहितत्वात् [१२-] इत्थम् [V]अमन्यत [-१२] । [V]निर्वीर्यः प्रजोत्पादनसामर्थ्यरहितोऽस्मि, [V]शिथिलः [१३]कार्याक्षमः [V]यातायामा [१४]गतसारश्चास्मि ॥

सप्तमे सहस्रतमीदानमुक्तम् । तावता पञ्चममारभ्य त्रिष्वनुवाकेषु गर्गत्रिरात्रः समापितः । अथाष्टमनवमयोर्द्वौ चतूरात्रावुच्येते ।

अत्रिरिति ॥ [१]तत्रात्रेश्चतूरात्रमष्टमे [२]विधत्ते - 'अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत् तमाहरत् तेनायजत ततो वै तस्य चत्वारो वीरा आऽऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुसभेयो य एवं विद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता

---

१. मै२ - च त्रिरात्रा । २. अ१ - आत्रेया जामदग्न्य° । ३-३. मै१ - 'तत्रात्रेया° - - - - चैक इति' नास्ति । ४. मै१ - तत्रात्रेयम् । ५. मै२ - 'चतुर्षु' नास्ति । ६-६. मै१ - प्रथमचतुर्वीरा°, मै२ - प्रथमश्चतुर्विधः । ७. मै२ - तम् । ८. मै१ - और्वः ऊर्वपुत्रः और्ववश्यः । ९. अ१. मै१ - 'बिदादित्वात्' नास्ति । १०. मै. मै२. मै३. अ - सः । ११. मै. मै२. मै३. अ - प्रजारहितः । १२. अ१ - इत्थं मन्यत, मै१ - स इत्थं मन्यत, मै२ - इत्थमहमद्य । १३. मै२ - अकार्यक्षमः ब्राह्मी । १४. मै२ - हृतसार° ।

---

१. शृ१ - तच्चात्रेश्च° । २. अ. आ. पा. इ. वा. वै - अभिधत्ते ।

ततो वै तस्यं चत्वारों वीरा आऽजांयन्त सुहोंता सूंद्गाता स्वंध्वर्युः सुसंभेयो य एवं विद्वाँश्चंतूरात्रेण यजंत आऽस्यं चत्वारों वीरा जांयन्ते

ततंः । वै । तस्यं । चत्वारंः । वीराः । एतिं । अजायन्त । सुहोतेतिं सु-होता । सूंद्गातेतिं सु-उद्गाता । स्वंध्वर्युरिति सु-अध्वर्युः । सुसंभेय इति सु-सभेयः । यः । एवम् । विद्वान् । चतूरात्रेणेतिं चतुः-रात्रेणं । यजंते । एतिं । अस्य । चत्वारंः । वीराः । जायन्ते ।

'स एतं [१५]चतूरात्रमपश्यत्' इत्यादि ॥ गतम् । [१६-] Vआऽहरत् [१७]Vतेन अयजत तेन कर्मणा देवानपूजयत् [-१६] । [१८]Vततः Vतस्य अत्रेः Vचत्वारः Vवीराः Vआजायन्त [१९-] आ च [-१९] आभिमुख्ये मर्यादायां वा । [२०-] Vसुहोता Vसूद्गाता Vस्वध्वर्युः Vसुसभेयः[-२०] । [२१]शोभनत्वं च होत्रादीनाम् , [२२]आत्मीयसमस्तवेदव्याख्यानकुशलत्वम् । सभायां साधुः सभेयः, [२३-] " ढश्छन्दसि " (पा ४.४.१०६) इति ढः[-२३] । [२४]सर्वयज्ञप्रयोगवित् , सुसभेयः सदस्य [२५]इत्येके । सर्वत्राव्ययपूर्वपदप्रकृतिस्वरत्वम् (पा ६.२.२) । द्वितीये " स्वरितो वाऽनुदात्ते पदादौ " (पा ८.२.६) इत्येकादेशः स्वर्यते, [२६]तृतीये " उदात्तस्वरितयोर्यणः° " (पा ८.२.४) [२७]इत्यादिना । 'य एवम्' इत्यादि । गतम् ॥

सूद्गाता स्वध्वर्युः सुसभेयः' इति ॥ ऊर्वस्य पुत्रः और्वः । स च पुत्रकामोऽत्रिं याचितवान् । तस्मै सः Vअत्रिः स्वकीयां Vप्रजां ददौ । ततः प्रजाराहित्येन रिक्तः सन् मनस्येवम् Vअमन्यत - अहं Vनिर्वीर्यः प्रजोत्पादनसामर्थ्यरहितः Vशिथिलः कार्येष्वक्षमः Vयातयामा गतसारश्चास्मीति विचार्य प्रजोत्पादनसाधनं Vचतूरात्रं निश्चित्य तत्सामग्रीमाहृत्य Vतेन Vअयजत, [३]ततः तस्य सुहोत्रादयः Vचत्वारः पुत्रा उत्पन्नाः । ते च

१५. मै. मै१. मै३. अ. अ१ - चतूरात्रम् । १६-१६. मै२ - 'आहरत् ---- °पूजयत्' नास्ति । १७. मै. मै१. मै२. मै३. अ - अहरत तेन । १८. मै२ - ततः तेन कर्मणा । १९-१९. मै. मै२. मै३. अ. अ१ - 'आ च' नास्ति । २०-२०. मै२ - 'सुहोता ---- सुसभेयः' नास्ति । २१. मै२ - सौहोत्रत्वम् । २२. मै१. मै२. अ१ - °नकौशलत्वम् । २३-२३. [पाणिनीसूत्रमवलम्ब्य शुद्धीकृतः पाठोऽस्माभिर्द्रष्टव्यः । मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'छन्दसीति डः' इत्युपलभ्यते ।]। २४. अ१ - सर्वज्ञप्रयोगवित् । २५. [अस्माभिः शुद्धीकृतोऽयं पाठः, मै मुद्रितपुस्तके तेलुगुकन्नडलिपिसाधर्म्यात् 'इत्येते' इति पाठ उपलभ्यते ।] , मै१. अ१ - इत्यपरे । २६. अ१ - 'तृतीये' नास्ति । २७. मै१ - इति ।

३. अ. आ. पा. इ. वा. वै. म - 'ततः' नास्ति ।

सुहोता सूद्गाता स्वध्वर्युः सुसभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं त(१)य उद्यन्तः स्तोमाः

सुहोतेति सु-होता । सूद्गातेति सु-उद्गाता । स्वध्वर्युरिति सु-अध्वर्युः । सुसभेय इति सु-सभेयः । ये । चतुर्विꣳशा इति चतुः-विꣳशाः । पवमानाः । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । तत् (१) । ये । उद्यन्त इत्युत्-यन्तः । स्तोमाः ।

‘ये चतुर्विंशाः’ इत्यादि ॥ [28]चतुर्विंशस्तोत्रियास्त्रयोऽपि [29]Vपवमानाः बहिष्पवमानादयो भवन्ति Vब्रह्मवर्चसं [30-] Vतत् [31]गायत्रसामान्यात् । चतुर्विंशस्य “ चतुर्विंशत्यक्षरा गायत्री ” (तैसं २.५.१०) इति कृत्वा, तद्धेतुत्वात्ताच्छब्द्यम् [-30] । [32]Vये Vउद्यन्तः Vस्तोमाः भवन्ति, उत्तरोत्तरमहीयांसः यथा - त्रिवृत् प्रथममहः पञ्चदशो द्वितीयः सप्तदशस्तृतीयः, एकविंशश्चतुर्थ इति । [33-] सा स्वयं [-33]Vश्रीः । [34]पूर्ववत्ताच्छब्द्यम् । त्रिवृत् प्रथमस्याह्नः प्रातःसवनम् , पञ्चदशं

हौत्रे [4]औद्गात्रे आध्वर्यवे [5]यज्ञप्रयोगोपदेशे च कुशलाः । [6]अतोऽपि Vचतूरात्रेण इष्ट्वा तादृशान् [7]पुत्राँल्लभते ॥

य इति ॥ अत्र [8]बहिष्पवमानमाध्यन्दिनपवमानार्भवपवमानेषु त्रिष्वपि स्तोमविशेषं विधत्ते - ‘ये चतुर्विꣳशा पवमाना ब्रह्मवर्चसं तत् ’ इति ॥ [9]चतुर्विंशतिसंख्यया यत्र स्तोत्रिया ऋचः आवृत्ताः स स्तोमश्चतुर्विंशः । तादृशेन स्तोमेन युक्ताः Vये Vपवमानाः ते कर्तव्याः । तथा सति तत् पवमानत्रयं सर्वं ब्रह्मवर्चसस्वरूपं भवति । चतुर्विंशतिसंख्यायाः [10]गायत्रीद्वारा ब्रह्मवर्चसहेतुत्वात् ॥

य इति ॥ अथ [11]पवमानव्यतिरिक्तस्तोत्रेषूत्तरोत्तरस्तोमवृद्धिं विधत्ते - ‘य उद्यन्तः स्तोमाः श्रीः सा ’ इति ॥ उत्तरोत्तरमुत्कर्षं गच्छन्तः Vस्तोमाः उद्यत्स्तोमाः । तादृशाः Vये सन्ति Vसा एव Vश्रीः । तद्धेतुत्वेन तेषां श्रीत्वम् । [12]अभिवृद्धिप्रकारस्तूच्यते - [13]सन्ति त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाख्याः

२८. मै१ - चतुर्विंशतिस्तो° । २९. मै२ - ‘पवमानाः’ नास्ति । ३०-३०. मै२ - ‘तत् .... °च्छब्द्यम्’ नास्ति । ३१. अ१ - °सामान्यत्वात् । ३२. मै१ - तत् ये । ३३-३३. मै१ - साध्वयम् । ३४. मै१ - अथापरत्र, अ१ - यथापरत्र ।

४. मै - अह्नात्रे (?) । ५. इ. वा. वै - यज्ञे । ६. अ. आ. पा. इ. वा. वै - अतोऽन्येऽपि । ७. अ. आ. पा. इ. मै - °ल्लभ्यन्ते, म - °ल्लभेत । ८. शृ१ - ‘ आर्भवपवमान°’ नास्ति । ९. म - °संख्याया । १०. आ - गायत्रीजपादिना, [आ-तलटिप्पण्यां- गायत्रीछन्दसा च, गायत्र्या च ।], इ. वा - गायत्री, अ. पा - ‘ गायत्रीद्वारा ’ नास्ति । ११. अ. पा - °स्तोमविशेषम् । १२. अ. आ. पा. वा. म - °कारः सूच्यते । १३. इ. वा - ते सन्ति ।

चतूरात्रस्यात्रेयविधिः]

श्रीः साऽत्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन् तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान् सोमानपश्यत् तानाऽहरत् तैरयजत

श्रीः । सा । अत्रिम् । श्रद्धादेवमिति श्रद्धा-देवम् । यजमानम् । चत्वारि । वीर्याणि । न । उपेति । अनमन् । तेजः । इन्द्रियम् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अन्नाद्यमित्यन्न-अद्यम् । सः । एतान् । चतुरः । चतुष्टोमानिति चतुः-स्तोमान् । सोमान् । अपश्यत् । तान् । एति । अहरत् । तैः । अयजत ।

माध्यंदिनं सवनम् । सप्तदशं तृतीयं [३५]सवनम् , [३६]एवं द्वितीयस्याह्नः पञ्चदशं प्रातःसवनम् , सप्तदशं माध्यंदिनं सवनम् । एकविंशं तृतीयसवनम् । अथ तृतीयस्याह्नः सप्तदशं प्रातःसवनम् , एकविंशं माध्यन्दिनं सवनं, त्रिणवं तृतीयसवनम् । चतुर्थस्याह्नः एकविंशं प्रातःसवनं, त्रिणवं माध्यंदिनं सवनं, त्रयस्त्रिंशं तृतीयसवनं, एवमुद्यन्तः स्तोमाः श्रीः [३७]सा ॥

[३८]'अत्रिम्' इत्यादि [-३८] ॥ Vश्रद्धादेवं श्रद्धाप्रधानं [३९]चत्वारि वीर्याणि [४०]वीर्यहेतुभूतानि तेजःप्रभृतीनि Vनोपानमन् नोपागच्छन् । [४१-] Vसः अत्रिः[-४१] Vएतान् Vचतुरः Vचतुष्टोमान्

षट्स्तोमाः । तत्र [१४]प्रथमेऽह्नि प्रातःसवनं त्रिवृत्स्तोमयुक्तम् । माध्यन्दिनं [१५]सवनं पञ्चदशस्तोमयुक्तम् । तृतीयसवनं सप्तदशस्तोमयुक्तम् । अथ द्वितीयेऽह्नि [१६]त्रिवृतं [१७]परित्यज्यैकविंशं स्तोमं स्वीकृत्य पञ्चदशसप्तदशैकविंशैः सवनत्रयं [१८]निष्पाद्यम् । तृतीयेऽह्नि सप्तदशैकविंशत्रिणवैः । चतुर्थे त्वह्नि एकविंशत्रिणवत्रयस्त्रिंशैः । तदिदमुद्यत्स्तोमत्वम् ॥

अत्रिमिति ॥ तमिमं [१९]चतूरात्रविकारं प्रशंसति - 'अत्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन् तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान् सोमानपश्यत् तानाहरत् तैरयजत तेज एव प्रथमेनावारुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन ' इति ॥ श्रद्धा [२०]देवो यस्यासौ

---

३५. मै२ - 'सवनम्' नास्ति । ३६. मै. मै१. मै३. अ. अ१ - अथ । ३७. मै. मै२. मै३. अ. अ१ - इति । ३८-३८. अ१ - सत्रिम् , मै१ - अत्रिम् । ३९. मै. मै१. मै३. अ. अ१ - 'चत्वारि' नास्ति, मै२ - अत्रिं चत्वारि । ४०. मै१ - वीर्यभूतानि । ४१-४१. मै२ - स इति ।

---

१४. शृ१ - °मेऽहनि । १५. अ. आ. इ. बा. वै - पवमानम् । १६. शृ१ - त्रिवृतंत्रिवृतम् । १७. शृ१. मै - °कविंशमन्यम् । १८. म. मै - निष्पाद्य, म - संपाद्यम् । १९. शृ१. म. मै- °रात्रप्रकारम् । २०. मै - एव देवाः, इ. वै - देवाः ।

तेज एव प्रथमेनावारुन्द्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं विद्वाꣳश्चतुरश्चतुष्टोमान् सोमानाहरति तैर्यजते तेज एव (२) प्रथमेनाव रुन्द्ध इन्द्रियं द्वितीयेन

तेजः । एव (२) । प्रथमेन । अवेति । अरुन्द्ध । इन्द्रियम् । द्वितीयेन । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । तृतीयेन । अन्नाद्यमित्यन्न-अद्यम् । चतुर्थेन । यः । एवम् । विद्वान् । चतुरः । चतुष्टोमानिति चतुः-स्तोमान् । सोमान् । आहरतीत्या-हरति । तैः । यजते । तेजः । एव । प्रथमेन । अवेति । रुन्द्धे । इन्द्रियम् । द्वितीयेन ।

त्रिवृदादिस्तोमकान् स्तोमान् [४२-] चतूरात्रान् अपश्यत् [-४२] [४३]Vतान् Vआहरत् Vतैः च Vअयजत [-४३] । तत्र Vप्रथमेन चतूरात्रेण Vतेजः Vअवरुन्द्धे इन्द्रियादीनि च द्वितीयादिभिः [४४]चतूरात्रैः ॥

'य एवं विद्वान्' इत्यादि ॥ [४५]ननु 'यामेवात्रिर्ऋद्धिमार्ध्नोत्' इति, [४६]किम् उच्यते 'तेज एव प्रथमेन' [४७]इत्यादिनैव [४८]गतार्थत्वात् । नैवम् , [४९]न तेजः[५०]प्रभृत्युपसंग्रहार्थमिदं

श्रद्धादेवः । यथा देवतायामादरस्तथा श्रद्धायामित्यर्थः । तादृशोऽत्रिर्यजमानः सर्वदा [२१]यागान् करोति । तथाविधं Vयजमानं तेज आदीनि न प्राप्नुवन् । Vतेजः शरीरकान्तिः । Vइन्द्रियं चक्षुरादिसामर्थ्यम् । Vब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः । Vअन्नाद्यं स्वाद्वन्नसंपत्तिः । एकैकस्मिन्नह्नि पवमानेषु चतुर्विंशस्तोमः । [२२]सवनत्रयार्थम् [२३]उक्तरीत्या त्रिवृदादयस्त्रयः स्तोमाः । एवं चतुर्ष्वपि दिनेषु चतुष्टोमाश्चत्वारः [२४]सोमयागास्तदनुष्ठानेनात्रिस्तेज आदिकमलभत ॥

४२-४२. मै१ - अपश्यचतूरात्रम् । ४३-४३. अ१ - चतूरात्रान् , मै१ - 'तान् ---- अयजत' नास्ति । ४४. मै. मै३. अ - 'चतूरात्रैः' नास्ति । ४५. मै२ - किमर्थम् । ४६. मै२ - 'किम्' नास्ति । ४७. मै. मै३. अ. अ१ - इत्यादिना, मै२ - इत्यादि । ४८. मै. मै२. मै३. अ. अ१ - गतत्वात् । ४९. मै२ - नेयम् । ५०. मै - °त्युपसंहारार्थ° ।

---

२१. म - यातयामान् । २२. अ. आ. पा. इ. बा. वै. म - पवमानत्रया° । २३. बा - उक्तनीत्या, इ. पा. म. उक्तनित्याः । २४. वै - °गास्तदाऽनुष्ठानेन ।

ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन यामेवात्रिर्ऋद्धिमार्ध्नोत् तामेव यजमान ऋध्नोति ॥८॥

(तत्तेज एवाष्टादश च ।)

ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । तृतीयेन । अन्नाद्यमित्यन्न-अद्यम् । चतुर्थेन । याम् । एव । अत्रिः । ऋद्धिम् । आर्ध्नोत् । ताम् । एव । यजमानः । ऋध्नोति ॥८॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

भवति, अपि तु ^V^याम् अन्यामपि ^V^अत्रिः ^V^ऋद्धिम् ^V^आर्ध्नोत् ^V^ताम् अपीति प्रतिपादयितुम् । तेन ‘ तस्य चत्वारो वीरा आजायन्त ’ इत्येतदपि संगृहीतं भवति । ‘ ऋद्धिमार्ध्नोत् ’ इति गोपोषं पुष्णातीतिवद्द्रष्टव्यम् ॥

[५१-] इति सप्तमे प्रथमेऽष्टमोऽनुवाकः [-५१] ॥

य इति ॥ पूर्वं चतूरात्रेणायजतेति कृत्स्नः क्रतुर्विहितः । इदानीं क्रत्ववयवांश्चतुरहर्विशेषान् विधत्ते - ‘ य एवं विद्वाꣳश्चतुरश्चतुष्टोमान् सोमानाहरति नैर्यजते तेज एव प्रथमेनाव रुन्द्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन यामेवात्रिर्ऋद्धिमार्ध्नोत् तामेव यजमान ऋध्नोति ’ इति ॥ तेज एव प्रथमेनेत्यादेरुक्तस्यैव [२५-]संग्रहार्थं यामेवेत्यादिपुनर्वचनम् ॥

॥ [२६-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः [-२६] ॥

५१-५१. मै१ - इति सप्तमप्रथमेऽष्टमः ।

२५. इ. वा - संग्रहार्थे । २६-२६. वै - अष्टमोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे प्रथमप्रपाठके अष्टमोऽनुवाकः ॥

जमदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान् पोषा॑ँ अपुष्यत् तस्मात् पलितौ जामदग्नियौ न सं जानाते

जमदग्निः । पुष्टिकाम इति पुष्टि-कामः । चतूरात्रेणेति चतुः-रात्रेण । अयजत । सः । एतान् । पोषान् । अपुष्यत् । तस्मात् । पलितौ । जामदग्नियौ । न । समिति । जानाते इति ।

अथ [१]जामदग्न्यं चतूरात्रं विधातुमाह - [२-] इतरौ तु वसिष्ठसंसर्पविश्वामित्रसंजयाख्यौ शाखान्तरे द्रष्टव्यौ [-२]। 'जमदग्निः' इत्यादि। [३V]पुष्टिकामः [४]अन्नपशुपुत्रादिवृद्धिकामः [५V]चतूरात्रेण [V]अयजत । चतुर्णामह्नां समाहारश्चतूरात्रः । " अहःसर्वैकदेश°" (पा ५.४.८७) इत्यादिना अच्समासान्तः । [६V]सः [V]एतान् [७]प्रसिद्धान् [V]पोषान् [V]अपुष्यत् । [८]सामान्यपुष्टेर्विशेषपुष्टिः कर्मेत्युक्तम् । 'तस्मात् [९]पलितौ ' इत्यादि। अवधारणमत्र द्रष्टव्यम्। [V]पलितौ एव केवलमिति महापुष्टिरहितौ वृथैव पलितावस्थां प्राप्तौ [१०]दरिद्रौ [११-]जामदग्न्यौ पितापुत्रौ [-११V]न [V]संजानाते [१२]अद्यत्वेऽपि न जायेते, समासादिताऽशेषपुष्टेः जमदग्नेरन्वये [१३]जातत्वात् , सर्वेषां

अष्टमेऽनुवाके चतूरात्र आत्रेयो निरूपितः । अथ नवमे जामदग्न्यश्चतूरात्रो निरूप्यते ॥

जमदग्निरिति ॥ [१]तमिमं विधातुं प्रस्तौति - 'जमदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान् पोषा॑ँ अपुष्यत् तस्मात् पलितौ जामदग्नियौ न सं जानाते ' इति ॥ [V]एतान् लोकप्रसिद्धान् [२-] प्रजापशुधनपोषान् [V]अपुष्यत् संपादितवान् । यस्मादेव [V]जमदग्निः पुष्टहेतुर्यागप्रवर्तकस्तस्मात् जामदग्नियौ तद्वंशोत्पन्नौ द्वौ पितृपुत्रौ पुष्टिमन्तरेण वृथैव [V]पलितौ दरिद्रौ [३]न [V४]संजानाते नोत्पद्येते। यद्वा वृथैव पलितं स्वकीयं [५]देहं न [६]जानाते। अयमर्थः [-२] - [७]पुष्टिसंप्रदायस्य जमदग्निना प्रवर्तितत्वात् तद्वंशे कोऽपि दरिद्रो नास्ति। यदि कश्चित् प्रमादात् स्यात् तथापि नैरन्तर्येण द्वौ पुरुषौ पुष्टिमन्तरेण वृथा पलितौ न स्त एवेति ॥

---

१. मै२ - जामदग्न्यः । २-२. मै२ - ' इतरौ - - - - द्रष्टव्यौ ' नास्ति । ३. अ. मै१ - जमदग्निः । ४. मै१ - पशुरित्यादि° । ५. अ१ - च चतूरात्रेण । ६. मै. मै१. मै२. अ. अ१ - ततः । ७. मै. मै२. अ - 'प्रसिद्धान् ' नास्ति । ८. मै१ - सामान्यपुषेर्विशेषपुषिः । ९. मै. मै१. मै२. अ - ' पलितौ ' नास्ति । १०. मै१ - दरिद्राविति । ११-११. मै१ - ' जामदग्न्यौ पितापुत्रौ ' नास्ति । १२. मै२ - अन्यत्वेऽपि । १३. मै२ - ' जातत्वात् नास्ति ।

---

१. मै - तमेवम् , वै - तमेतद् , शृ१. अ. पा. इ. वा. म - तमेतम् । २-२. म. मै - ' प्रजापशु° - - - - अयमर्थः ' नास्ति । ३. वा - च । ४. अ. आ. पा. इ. वा. मै. म - जानाते । ५. शृ१ - देहद्वयम् । ६. शृ१ - जानीतः । ७. म - यथा पुष्टिसंप्रदा° ।

जामदग्न्यचतूरात्रविधिः]

एतानेव पोषान् पुष्यति य एवं विद्वाꣳश्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशः पशूनेवाव रुन्द्धेऽन्नं वै

एतान् । एव । पोषान् । पुष्यति । यः । एवम् । विद्वान् । चतूरात्रेणेति चतुः-रात्रेण । यजते । पुरोडाशिन्यः । उपसद इत्युप-सदः । भवन्ति । पशवः । वै । पुरोडाशः । पशून् । एव । अवेति । रुन्द्धे । अन्नम् । वै ।

सुपुष्टत्वात् । जनेर्व्यत्ययेन श्ना । [14]यद्वा - जानातेरेव कर्मणि लट् व्यत्ययेन श्ना [-14] । तादृशौ न ज्ञायेते, न स्त एवेति [15]यावत् । यद्वा - "संप्रतिभ्याम्°" (पा १.३.४६) [16]इत्यात्मनेपदम् । वृथा पलितात्मानौ जामदग्न्यौ न संजानाते [17] न प्रतिजानाते [-17] । अस्त्वेकः पुष्टिरहितः तथापि आनन्तर्येण द्वौ दरिद्रौ न स्त इति [18]ख्यापनार्थं द्वयोरुपादानम् । जमदग्निशब्दो गर्गादिः (गणपाठ ५७, पा ४.१.१०५) । एतानेवेत्यादि । विदुषः ।

पुरोडाशिन्य इत्यादि ॥ अत्रोक्तमाचार्येण - "आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौम्यश्चतुष्कपालः सावित्रः पञ्चकपालो [19]धात्रः षट्कपालो मारुतः सप्तकपालो

एतानिति ॥ अथ विधत्ते - 'एतानेव पोषान् पुष्यति य एवं विद्वाꣳश्चतूरात्रेण यजते' इति ॥

पुरोडाशिन्य इति ॥ '[8]अत्र [9]उपसत्सु कंचिद्विशेषं [-9] [10]विधत्ते - 'पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशः पशूनेवाव रुन्द्धेऽन्नं वै पुरोडाशोऽन्नमेवाव रुन्द्धे' इति ॥ पुरोडाश आसूपसत्स्वस्तीति पुरोडाशिन्यः । द्वादशसूपसत्सु द्वादशपुरोडाशविशेषान् सूत्रकारो दर्शयति - "आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौम्यश्चतुष्कपालः सावित्रः पञ्चकपालो धात्रः षट्कपालो मारुतः सप्तकपालो बार्हस्पत्योऽष्टाकपालो मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादशकपालो वैश्वदेवो द्वादशकपालो दर्विहोमा भवन्ति' (आपश्रौ २२.१८.१८-१९) इति । पुरोडाशानां [11]पशुहेतुत्वादन्नहेतुत्वादन्नरूपत्वाच्च तदुभयप्राप्तिः ॥

१४-१४. अ१. मै१ - 'यद्वा - - - - श्ना' नास्ति । १५. मै२ - 'यावत्' नास्ति । १६. मै१ - आत्मनेपदम् । १७-१७. मै२ - 'न प्रतिजानाते' नास्ति । १८. मै२ - स्थापनार्थम् । १९. मै१ - धातुः ।

---

८. शृ१ - तत्र । ९-९. मै - उपसत्सुखं चिद्विशेषम् । १०. मै - 'विधत्ते' नास्ति । ११. शृ१ - पुष्टिहेतुत्वात्° ।

पुरोडाशोऽन्नमेवाव रुन्द्धेऽन्नादः पशुमान् भवति य एवं विद्वा९श्चतूरात्रेण यजते ॥९॥

(जमदग्निरष्टाचत्वारि९शत् ।)

पुरोडाशः । अन्नम् । एव । अवेति । रुन्द्धे । अन्नाद इत्यन्न-अदः । पशुमानिति पशु-मान् । भवति । यः । एवम् । विद्वान् । चतूरात्रेणेति चतुः-रात्रेण । यजते ॥९॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

बार्हस्पत्योऽष्टाकपालः मैत्रो नवकपालो [२०]वारुणो दशकपाल ऐन्द्राग्न एकादशकपालो [२१]वैश्वदेवो द्वादशकपालो [२१] दर्विहोमा भवन्ति" (आपश्रौ २२.१८.१८-१९) इति । [२२]एवमौषधियुक्ता द्वादशोपसदो भवन्तीति । 'पशवो वै' इत्यादि । गतम् ॥

॥ इति सप्तमे प्रथमे नवमोऽनुवाकः ॥

अन्नाद इति ॥ एतद्वेदनपूर्वकमनुष्ठानं प्रशंसति - 'अन्नादः पशुमान् भवति य एवं विद्वा९श्चतूरात्रेण यजते' इति ॥

॥ [१२] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः [१२] ॥

---

२०. मै. मै१. मै२. अ. अ१ - वारुणम् । २१-२१. मै२ - 'वैश्व° - - - - कपालो' नास्ति । २२. मै. मै२. अ. अ१ - °मौषध्ययुक्ता°, मै१ - °मौत्तर्ययुक्ता° ।

१२-१२. म - इति नवमोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ।

संवत्सरो वा इदमेकं आसीत् सोऽकामयतर्तून्त्सृजेयेति स एतं पञ्चरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान् पञ्चरात्रेण यजते प्रैव जायते

संवत्सर इति सं-वत्सरः । वै । इदम् । एकः । आसीत् । सः । अकामयत । ऋतून् । सृजेय । इति । सः । एतम् । पञ्चरात्रमिति पञ्च-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । ऋतून् । असृजत । यः । एवम् । विद्वान् । पञ्चरात्रेणेति पञ्च-रात्रेण । यजते । प्रेति । एव । जायते ।

[1-] अथ पञ्च पञ्चरात्रा भवन्ति -[-1] [2]संवत्सराख्यः प्रथमः अभ्यासङ्ग्यो द्वितीयः, [3]पञ्चशरदीयस्तृतीयः, [4]अन्तर्महाव्रतश्चतुर्थः पुरुषमेधः पञ्चमः । तत्र प्रथमो विधीयते - ' संवत्सरो वा ' इत्यादि ॥ [5-] इतरे त्वभ्यासङ्ग्यादयः पञ्चरात्राः शाखान्तरे द्रष्टव्याः[-5] । [6-] यत् [V]इदं [-6] दृश्यमानं ऋतुमासनक्षत्रादि, एतदात्मा [7]अयं [V]संवत्सरः । [8]पूर्वमेकरूपः [9]ऋत्वादिविभागरहितः [V]आसीत् । [V]सः [10][V]अकामयत ऋत्वादीन् [V]सृजेय [V]इति । यद्वा - [11]ऋतूंस्तावत्सृजेय ततश्च स्वयमेव मासादयो भविष्यन्तीति । ' स एतम् ' इत्यादि । गतम् । [V]एवं [V]विद्वान् [V]प्रजायते प्रजावान् भवतीति ॥

[1]नवमेऽनुवाके जामदग्न्यचतूरात्र उक्तः । अथ दशमे पञ्चरात्रोऽभिधीयते ॥

संवत्सर इति ॥ तमिमं विधत्ते - ' संवत्सरो वा इदमेक आसीत् सोऽकामयतर्तून् सृजेयेति स एतं पञ्चरात्रमपश्यत् तमाहरत् तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान् पञ्चरात्रेण यजते प्रैव जायते ' इति ॥ [V]इदं [2]वसन्ताद्यृतुभेदोपेतं कालस्वरूपमृतूत्पत्तेः [3]पूर्वं संवत्सरात्मकः [4][V]एकः एव प्रजापतिः [V]आसीत् । [5][V]सः [V]ऋतून् सिसृक्षुस्तत्साधनत्वेन पञ्चरात्रयागमनुष्ठाय सृष्टवान् । एवमन्योऽपि प्रजाकामः [6-] तेन यागेन [-6] प्रजामुत्पादयति ॥

१-१. अ१ - चतूरात्रः, मै१ - अथ पञ्चरात्राः । २. अ१. मै२ - संवत्सरस्य, मै१ - संवत्सरस्या । ३. मै. मै२. मै३. अ - उपशारदीय° । ४. अ१ - अन्तर्महान्त° । ५-५. मै२ - ' इतरे - - - - द्रष्टव्याः ' नास्ति । ६-६. मै२ - य इदम् । ७. मै१ - ' अयम् ' नास्ति । ८. मै२ - पूर्वमेकः । ९. मै१ - एकपर्वत्वावित्यादिभाग°, मै२ - एकपर्वत्वादिविभाग° । १०. मै - अकमायत । ११. मै२ - °सृजेय इति ।

१. मै - नवमेऽनुवाकेऽनुवाके । २. मै - °न्ताद्युतोः भेदोपेतम् । ३. शृ१. मै - पुरा । ४. इ. वै - ' एकः ' नास्ति । ५. म - ' सः ' नास्ति । ६-६. मै - सोमयागेन ।

त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते व्यावर्तन्त (१) य एवं विद्वान् पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽवर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्त्स्यामिति

ते । ऋतवः । सृष्टाः । न । व्यावर्तन्तेति वि-आवर्तन्त । ते । एतम् । पञ्चरात्रमिति पञ्च-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । व्यावर्तन्तेति वि-आवर्तन्त (१) । यः । एवम् । विद्वान् । पञ्चरात्रेणेति पञ्च-रात्रेण । यजते । वीति । पाप्मना । भ्रातृव्येण । एति । वर्तते । सार्वसेनिरिति सार्व-सेनिः । शौचेयः । अकामयत । पशुमानिति पशु-मान् । स्याम् । इति ।

'त ऋतवः'[१२-] इत्यादि ॥ Vन [-१२] Vव्यावर्तन्त विभक्तस्वभावभाजो [१३]नाभवन् एकरूपा एव सर्वेऽप्यृतवोऽभवन् । उक्तौ निघातसमासौ (पा ८.१.७०) । [१४-]'त एतम्' इत्यादि [-१४] । गतम् । Vएवं Vविद्वान् Vपाप्मना Vभ्रातृव्येण च Vव्यावर्तते [१५]तद्रहित एव भवति ॥

त इति ॥ अथ व्यावृत्तिकामस्य [७]तमेव विधत्ते - 'त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै ते व्यावर्तन्त य एवं विद्वान् पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणावर्तते' इति ॥ प्रजापतिना [८]Vसृष्टाः [९]वसन्ताद्यृतुदेवताः तत्तदृतुलिङ्गविशेषैर्व्यावृत्तिमलभमानास्तत्साधनत्वेन Vपञ्चरात्रम् अनुष्ठाय तत्तदृतुलिङ्गैर्व्यावृत्तिं प्राप्ताः । [१०]एवमन्योऽप्यनुष्ठाय Vपाप्मना Vभ्रातृव्येण च वियोगं प्राप्नोति ॥

सार्वसेनिरिति ॥ अथ पशुप्राप्त्यर्थं तमेव विधत्ते - [११-]'सार्वसेनिः शौचेयोऽकामयत पशुमान्त्समिति स एतं पञ्चरात्रमाहरत् तेनायजत ततो वै स सहस्रं पशून् प्राप्नोद्य एवं विद्वान् पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति' इति ॥ सर्वसेनाख्यस्य पुरुषस्यापत्यं Vसार्वसेनिः । शुच्याख्याया स्त्रियः अपत्यं Vशौचेयः ॥

१२-१२. मै१ - इत्यादिना । १३. अ१. मै१ - नाभवन्ति । १४-१४. मै१ - ततो वा । १५. मै२ - तद्रहितः एकः ।

७. मै - न । ८. वा - सृष्ट्या । ९. अ. आ. पा. इ. वा. वै. मै. म - °द्यृतुदेवास्तत्त° । १०. इ. वा - °मन्येऽप्यनु° । ११-११. वा - 'सार्वसेनिः - - - - °विशेषम्' नास्ति ।

स एतं पंञ्चरात्रमाऽहंरत् तेनांयजत ततो वै स सहस्रं पशून् प्राऽऽप्नोद्य एवं विद्वान् पंञ्चरात्रेण यजंते प्र सहस्रं पशूनांप्नोति बबरः प्रावांहणिरकामयत वाचः प्रंवदिता स्यामिति स एतं पंञ्चरात्रमा(२)ऽहंरत् तेनांयजत

सः । एतम् । पञ्चरात्रमितिं पञ्च-रात्रम् । एतिं । अहरत् । तेनं । अयजत । ततंः । वै । सः । सहस्रम् । पशून् । प्रेतिं । आप्नोत् । यः । एवम् । विद्वान् । पञ्चरात्रेणेतिं पञ्च-रात्रेणं । यजंते । प्रेतिं । सहस्रम् । पशून् । आप्नोति । बबरः । प्रावांहणिः । अकामयत । वाचः । प्रवदितेतिं प्र-वदिता । स्याम् । इतिं । सः । एतम् । पञ्चरात्रमितिं पञ्च-रात्रम् । एतिं (२) । अहरत् । तेनं । अयजत ।

'सार्वसेनिः '[16]इत्यादि ॥ [17]सर्वसेनः पिता[-17] तस्यापत्यं [18]Vसार्वसेनिः । "अत इञ्" (पा ४.१.९५) शुचिर्माता तस्या अपत्यम् , " इतश्चानिञः " (पा ४.१.१२२) इति ढक् । [19-] Vपशुमान् Vस्याम् Vइति Vअकामयत । गतमन्यत् ॥

' बबरः ' इत्यादि ॥ Vप्रावाहणिः[-19] प्रवाहणस्यापत्यं Vबबरः नाम Vअकामयत । Vवाचः कृत्स्नायाः श्रुतिस्मृतिरूपायाः Vप्रवदिता प्रवक्ता व्याख्याता [20]Vस्याम् Vइति । यद्वा - वाचः प्रकर्षेण वक्ता स्यामिति । ' अथो ' [21]इति । अपि च Vएनम् [22]Vवाचस्पतिः [23-]Vइति Vआहुः[-23] । वाचः प्रभवितेत्याहुः वाचः [24]प्रभुत्वेन लोके ख्यातिं गच्छति । उक्तौ [25]स्वरसमासौ (पा ८.१.७०) ।

बबर इति ॥ [12]अथ सभायां वक्तृत्वविशेषं[-12] कामयमानस्य तमेव पञ्चरात्रं विधत्ते - ' बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमाहरत् तेजायजत ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान् पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुः ' इति ॥ [13-]Vबबरः नामतः[-13] प्रवाहणस्यापत्यं Vप्रावाहणिः । बबरवदन्योऽपि Vपञ्चरात्रेण सभायां प्रकर्षेण वक्ता भवति । तदीयं वक्तृत्वमनुमोदमानाः सर्वे सभ्यास्तं Vवाचस्पतिः Vइति एवं व्यवहरन्ति ॥

१६. मै१. मै२ - इत्यादि गतम् । १७-१७. मै२ - सर्वे जन्य सविता । १८. मै१ - 'सार्वसेनिः ' नास्ति । १९-१९. मै२- ' पशुमान् - - - - प्रावाहणिः ' नास्ति । २०. मै२ - न स्याम् । २१. मै१ - ' इति ' नास्ति । २२. मै१ - वा वृत्तिः । २३-२३. मै२ - ' इत्याहुः ' नास्ति । २४. मै२ - प्रभवेन । २५. मै२ - स्वरौ ।

१२. मै - ' अथ ' नास्ति । १३-१३. न - बबरनामकः ।

ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान् पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष संप्रति यज्ञो यत् पञ्चरात्रो

ततः । वै । सः । वाचः । प्रवदितेति प्र-वदिता । अभवत् । यः । एवम् । विद्वान् । पञ्चरात्रेणेति पञ्च-रात्रेण । यजते । प्रवदितेति प्र-वदिता । एव । वाचः । भवति । अथो इति । एनम् । वाचः । पतिः । इति । आहुः । अनाप्तः । चतूरात्र इति चतुः-रात्रः । अतिरिक्त इत्यति-रिक्तः । षड्रात्र इति षट्-रात्रः । अथ । वै । एषः । संप्रतीति सं-प्रति । यज्ञः । यत् । पञ्चरात्र इति पञ्च-रात्रः ।

'अनाप्तः' इत्यादि ॥अत्रैव वक्ष्यते - 'पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञः' इति । [२६]तेनाभिप्रायेणेदमुच्यते । तत्पाङ्क्तं यज्ञस्वरूपम् Vअनाप्तः Vचतूरात्रः ऊनत्वादप्राप्तः । Vषड्रात्रः [२७]- तु पाङ्क्तस्वरूपम् -[२७] Vअतिरिक्तः अतिक्रम्य वर्तते अधिकत्वात् । अथ इदानीमेव [२८]Vपञ्चरात्रः Vसंप्रति Vयज्ञः अन्यूनानतिरिक्तपाङ्क्तस्वरूपवान् यज्ञः । [२९]प्रतिपत्त्या संगतं [३०]संप्रति, तिष्ठद्गुप्रभृतित्वादव्ययीभावः (पा २.१.१७) निरुदकादिर्द्रष्टव्यः (गणपाठ २२६ पा ६.२.१८४) । 'संप्रत्येव' इति । अन्यूनानतिरिक्तयज्ञस्वरूपवतेत्यर्थः । 'पञ्च वा ऋतवः' इति । हेमन्तशिशिरयोरेकत्वाभिप्रायमिदम् । ऋत्वात्मनि Vसंवत्सरे प्रतिष्ठितो भवति पञ्चसंख्यान्वयात् । Vअथो अपि च Vपञ्चाक्षरा Vपङ्क्तिः Vपाङ्क्तः Vयज्ञः पङ्क्तिप्रभवत्वाद्धानादिपञ्चकप्रभवत्वाद्वा । उत्सादित्वादञ् (गणपाठ ५२, पा ४.१.८६) ॥

अनाप्त इति ॥ एवं [१४]बहुविधफलसाधनत्वेन पञ्चरात्रं विधाय न्यूनातिरेकाभावेन तं प्रशंसति - 'अनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथवा एष संप्रति यज्ञो यत् पञ्चरात्रो य एवं विद्वान् पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते' इति ॥ एकेनाह्ना न्यूनत्वात् Vचतूरात्रः नोक्तेभ्यः फलेभ्यः पर्याप्तः । [१५]पञ्चभिरेवाह्नोभिस्तत्फलनिवृत्तेरेकेनाह्ना Vषड्रात्रः Vअतिरिक्तः । Vएषः [१६]तु Vपञ्चरात्रः Vसंप्रति समीचीनो न्यूनातिरेकाभावेन योग्यः । [१७]अत [१८]एतदनुष्ठायी योग्येनैव Vयज्ञेन इष्टवान् भवति ॥

---

२६. मै२ - °येणैतदुच्यते । २७-२७. मै२ - तत् पाक्तं रूपम् । २८. मै२ - पञ्चरात्रयज्ञः । २९. मै१ - प्रत्यपत्त्या । ३०. मै१ - संप्रति इति ।

---

१४. शृ१ - षड्विध° । १५. शृ१. म. मै - °फलनिष्पत्तेः°, अ. पा. वा - °फलनिवृत्तेः° । १६. अ. आ. पा. इ. वा. वै - 'तु' नास्ति । १७. शृ१ - सः । १८. मै - °दनुष्ठाय ।

य एवं विद्वान् पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवत्सरः (३) ऋतुष्वेव संवत्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्द्धे त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्द्धे

यः । एवम् । विद्वान् । पञ्चरात्रेणेति पञ्च-रात्रेण । यजते । संप्रतीति सं-प्रति । एव । यज्ञेन । यजते । पञ्चरात्र इति पञ्च-रात्रः । भवति । पञ्च । वै । ऋतवः । संवत्सर इति सं-वत्सरः (३) । ऋतुषु । एव । संवत्सर इति सं-वत्सरे । प्रतीति । तिष्ठति । अथो इति । पञ्चाक्षरेति पञ्च-अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति । रुन्द्धे । त्रिवृदिति त्रि-वृत् । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । तेजः । एव । अवेति । रुन्द्धे ।

‘ त्रिवृत् ’ इत्यादि ॥ [V]त्रिवृत् [V]अग्निष्टोमः प्रथममहः [V]भवति । [V]तेजः अवरुद्ध्यै [31]तद्भवति त्रिवृता सहोत्पन्नत्वात् । [V]पञ्चदशः द्वितीयमहः उक्थ्यः इन्द्रियस्यावरुद्ध्यै, इन्द्रियेण सहोत्पन्नत्वात् । [V]सप्तदशः तृतीयमहः [V]अन्नाद्यस्य [V]अवरुद्ध्यै, अनयोरन्नस्थाने उत्पन्नत्वात् ।

पञ्चरात्र इति ॥ [19]अथाऽऽहर्गतां पञ्चसंख्यां प्रशंसति - ‘पञ्चरात्रो भवति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्द्धे ’ इति ॥ हेमन्तशिशिरयोः समासादृतूनां पञ्चत्वम् ॥

त्रिवृदिति ॥ अथ पञ्चरात्रावयवभूतानि पञ्चाहानि विधत्ते - ‘त्रिवृदग्निष्टोमो भवति तेज एवावरुन्द्धे पञ्चदशो भवन्तीन्द्रियमेवाव रुन्द्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ’ इति ॥ प्रकृतौ हि त्रिवृत्पञ्चदशसप्तदशैकविंशैश्चतुर्भिः [20]स्तोमैरग्निष्टोमगतानि द्वादश स्तोत्राणि निष्पाद्यन्ते । अत्र त्वेकेनैव [21-] त्रिवृत्स्तोमेन सर्वस्तोत्रनिष्पत्तिः [-21] । तादृशः [V]अग्निष्टोमः प्रथममहः । [22]त्रिवृदग्न्योरुभयोर्मुखेन सहोत्पन्नत्वात् त्रिवृता तेजःप्राप्तिः । पञ्चदशेनैकेनैव स्तोमेन [23]युक्त उक्थ्यो द्वितीयमहः । पञ्चदशस्तोमस्येन्द्रस्य चोरौ बाहुषु सहोत्पन्नत्वात् पञ्चदशेनेन्द्रियप्राप्तिः । सप्तदशेनैकेन स्तोमेन युक्त उक्थ्यस्तृतीयमहः । सप्तदशस्यान्नाधारे मध्यप्रदेश उत्पन्नत्वात् तेनाऽन्नप्राप्तिः । अपि च सप्तदशस्य

३१. मै२ - तस्य ।

१९. वा - °हर्गवाम् , मै - °हर्गतपञ्च° । २०. शृ१ - स्तोमैरग्निरग्निष्टोम° । २१-२१. वै - त्रिवृत्स्तोत्र° । २२. [अस्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः । आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ‘°मुखेन ’ इति पाठ उपलभ्यते ।] ।२३. शृ१. मै - प्रयुक्ते ।

पञ्चदशो भवतीन्द्रियमेवाव रुन्द्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते पञ्चवि९ँशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै

पञ्चदश इति पञ्च-दशः । भवति । इन्द्रियम् । एव । अवेति । रुन्द्धे । सप्तदश इति सप्त-दशः । भवति । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायते । पञ्चवि९ँश इति पञ्च-वि९ँशः । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । प्रजापतेरिति प्रजा-पतेः । आप्त्यै । महाव्रतवानिति महाव्रत-वान् । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै ।

[V]अथो अपि च [V]तेन सप्तदशेनाह्ना [V]प्रजायते तस्य प्रजाहेतुत्वात् । [V]पञ्चविंशः [V]अग्निष्टोमः [३२]चतुर्थमहः [V]प्रजापतेः [V]आप्त्यै प्रजापतेः पञ्चविंशतित्वात् । [V]महाव्रतवान् अयं [V]भवति अह्नः संभवात् । महाव्रतधर्मवान् तदीयस्तोत्रवान् इत्यन्ये । [V]अन्नाद्यस्य [V]अवरुद्ध्यै तस्यान्नहेतुत्वात् । यथोक्तं महाव्रते " तदन्नं पञ्चविंशमभवत् " (तैब्रा १.२.६) इति । [V]विश्वजित्

प्राजापत्यत्वात् तेन [२४]प्रजोत्पादकत्वमपि भवति । यद्यप्यत्रोभयत्रोक्थ्यो न [२५]श्रुतस्तथाप्यहीनानामेतेषां द्वादशाहविकृतित्वाद्द्वादशाहे च [२६]प्रायणीयानन्तरभाविनः [२७]पृष्ठ्यषडहस्य [२८]पञ्चरात्रप्रकृतित्वात् [२९]पृष्ठ्यषडहे च [३०]द्वितीयतृतीययोरुभयोरुक्थ्यत्वात् तद्विकृतिरूपयोरनयोरप्यह्नोरुक्थ्यत्वं [३१]लभ्यते । एतदेवाभिप्रेत्य बौधायनेनोक्तम् - " तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चविंशोऽग्निष्टोमो महाव्रतवान् विश्वजित् सर्वपृष्ठोऽतिरात्रः " (बौश्रौ १६.२९) इति । चोदकप्राप्तानामपि त्रयाणामेतेषामह्नां विस्पष्टार्थं पुनर्विधानम् । पञ्चविंशेनैकेनैव स्तोमेन युक्तः [V]अग्निष्टोमः चतुर्थमहः । यद्यपि त्रिवृदादिस्तोमवत् सामब्राह्मणे पञ्चविंशस्तोमो नाम्नातस्तथापि सूत्रकारोक्तप्रकारेण स स्तोम उन्नेयः । अस्य च स्तोमस्य प्रजापतिदेवताकत्वात् तेन तत्प्राप्तिः । स चाग्निष्टोमो महाव्रतधर्मवान् । गवामयने [३२]महाव्रताख्यमेकमहः । तस्मिन्नहनि यानि

३२. मै२ - °चतुर्थग्रहः ।

२४. इ. वा. वै - प्रजोत्पादनत्वमपि । २५. शृ१ - °प्यहीनानामप्येतेषाम् । २६. मै. वै. - °यान्तरभाविनः (वै - नः) । २७. शृ१. अ. पा. इ. वा. वै. म मै पृष्ठ्यः षडहस्य । २८. इ. वा. वै - प्रकृतत्वात् । २९. शृ१. अ. पा. वा - पृष्ठ्यःषडहे । ३०. शृ१. मै - °तृतीययोरह्नोरुक्थ्य°, वा - °तृतीययोरह्नयोरुक्थ्य° । ३१. शृ१ - लभते । ३२. वा - °मेकमह्नः ।

विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै(४) ॥१०॥

(ते व्यावर्तन्त प्रवदिता स्यामिति स एतं पञ्चरात्रमा संवत्सरोऽभिजित्यै)

विश्वजिदिति विश्व-जित् । सर्वपृष्ठ इति सर्व-पृष्ठः । अतिरात्र इत्यति-रात्रः । भवति । सर्वस्य । अभिजित्या इत्यभि-जित्यै (४) ॥१०॥

[कासं - - - - ; मैसं - - - - ; कपिसं - - - - ; शब्रा - - - -]

[V]सर्वपृष्ठः [V]अतिरात्रः पञ्चममहः । विश्वजित् सहस्रदक्षिणत्वादिधर्मः [३३]सर्वपृष्ठः । रथन्तरबृहद्वैरूपवैराजशाक्वररैवतपृष्ठः [V]सर्वस्य अभिजयार्थं [३४][V]भवति । " तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । त्रिवृदादयो निरुक्ताः (तैसं ७.१.८) ॥

॥ [३५-] इति सप्तमे प्रथमे दशमोऽनुवाकः [-३५] ॥

स्तोत्राणि तान्यत्र प्रयोक्तव्यानीत्यर्थः । महाव्रतस्यान्नसाधनत्वात् तेनान्नप्राप्तिः । [V]विश्वजित् नामाग्निष्टोमविकारः कश्चिदेकाहः । सोऽत्रातिरात्रविकृतित्वमापादितः पञ्चममहर्भवति । स पुनः [V]सर्वपृष्ठः रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यानि पृष्ठस्तोत्रगतानि सामानि सर्वाण्यपि यस्यासौ सर्वपृष्ठः । स च [V]सर्वस्य फलस्य [V]अभिजित्यै संपद्यते ॥

[३३]अत्र मीमांसा

अष्टमाध्यायस्य [३४]प्रथमपादे चिन्तितम् -

[३५]"अहर्गणेषु सोमस्य द्वादशाहस्य वाऽग्रिमः ।
पूर्ववद्दिनसंघादिविशेषैरन्तिमो भवेत् " ॥ (जैन्या ८.१.१०.१३)

द्विरात्रमारभ्य शतरात्रपर्यन्तेषु अहर्गणेषु गवामयने च पूर्ववदव्यक्तलिङ्गेन सोमस्य धर्मा इति चेन्न । [३६]विशेषलिङ्गसद्भावात् । [३७]द्वादशाहपदान्तर्गतोऽहःशब्दः षष्टिघटिकात्मकदिनपरः । [३८]द्विरात्रादिपदान्तरगतो रात्रिशब्दश्च तादृशः एतदेकं विशेषलिङ्गम् । अहःसंघो द्वितीयं द्वादश दीक्षास्तृतीयं [३९]तच्च गवामयने

३३. मै. मै२. अ - 'सर्वपृष्ठः' नास्ति । ३४. मै. मै२. अ - भवति । सर्वपृष्ठः । ३५-३५. मै१ - सप्तमप्रथमे दशमः ।

३३. शृ१ - अथ । ३४. अ. आ. पा - °मपादे दशमाधिकरणे । ३५. इ. वा. म. वै. मै - अहर्गणे तु, अ. पा - 'अहर्गणेषु' नास्ति । ३६. अ. पा. इ. वा. वै - अविशेषलिङ्ग° । ३७. शृ१ - °न्तर्गतोऽहः । ३८. इ. वा. म - °पदान्तर्गतः । ३९. अ. पा. वा - तत्र ।

विद्यते । तत्र ह्यभीन्धत एव दीक्षाभिरित्युक्त्वा दीक्षायुग्मानि (णि) षडुपन्यस्तनि - " द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां मा९सं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रम् " (तैसं ७.४.९) इति । तस्मादहर्गणेषु द्वादशाहस्य धर्माः ॥

प्रथमाध्याये [४०]तृतीयपादे चिन्तितम् -

" लौकिको वाक्यगो वार्थस्त्रिवृदादेः समत्वतः ।
उभौ विध्यर्थवादैकवाक्यत्वादस्त्विहान्तिमः " ॥ (जैन्या १.३.५.१९)

त्रिवृद्बहिष्पवमानमिति श्रुतौ [४१-] त्रिवृच्छब्दस्य त्रैगुण्यं [-४१] लोके प्रसिद्धोऽर्थः । वाक्यशेषादृक्त्रयात्मकेषु [४२]त्रिषु सूक्तेष्ववस्थितानां [४३]बहिष्पवमानस्तोत्रनिष्पादनक्षमाणाम् " उपास्मै गायता नरः " (ऋ ९.११.१; साम ६५१) इत्यादीनामृचां नवकमर्थः । तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि [४४]पदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्पेन ग्रहीतव्याविति चेन्मैवम् । लौकिकार्थस्वीकारपक्षे [४५]विधिवाक्येऽर्थत्रैगुण्यम् , अर्थवादवाक्ये स्तोत्रियाणामृचां नवकमित्येवं [४६]विध्यर्थवादवाक्ययोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात् , अत एकवाक्यत्वाय [४७-] स्तोत्रियाणां नवकमेव विधिवाक्ये नियतः[-४७] अर्थः ॥

दशमाध्यायस्य [४८]षष्ठपादे चिन्तितम् -

" त्रिवृदग्निष्टुदित्येतत् सर्वत्र [४९]सोम एव वा ।
[५०]आद्यस्त्रैगुण्यवाचित्वादन्त्यः [५१]स्तोमेऽस्य रूढितः " ॥ (जैन्या १०.६.७.१०)

[५२-] एवं श्रूयते [-५२] " त्रिवृदग्निष्टुदग्निष्टोमः " (तांब्रा १७.६.१.२) इति । किं त्रिवृत्त्वमग्निष्टुति क्रतौ सर्वेषु साधनेषु संपद्यते किं वा स्तोममात्रसंबन्धि । तत्र त्रिवृद्रज्जुरित्यादौ त्रिवृच्छब्दस्य [५३]त्र्यैगुण्यवाचित्वदर्शनादत्रापि क्रतुसाधनेषु या या संख्या श्रूयते सा सर्वा त्रित्वेन [५४]विक्रियत इति प्राप्ते ब्रूमः - यद्यपि त्रिवृच्छब्दोऽवयवप्रसिद्ध्या

---

४०. शृ१ - तृतीये, आ - °यपादे पञ्चमाधिकरणे । ४१-४१. शृ१ - त्रिंवृद्ब्रह्मणत्रैगुण्यम् । ४२. इ. वै - त्रिषुत्रिषु । ४३. शृ१ - °बमानाना (?)मेकः स्तोत्र°, मै - °बमाननामकस्तोत्र° । ४४. अ. आ. इ. वा. वै. मै - पदपदार्थ° । ४५. पा. इ. वा. वै. म. मै - विधिवाक्ये त्रैगुण्यम् , अ - ' विधि° - - - - °गुण्यम् ' नास्ति । ४६. वा - विध्यर्थवाक्ययोः° । ४७-४७. शृ१. मै. वै - स्तोत्रियानवकमित्येव विधिवाक्यनियतः । ४८. आ - षष्ठपादे सप्तमाधिकरणे । ४९. अ - स्तोत्रः । ५०. म - अथ, अ. पा. इ. वा. वै - °दतः । ५१. मै - स्तोमस्य । ५२-५२. अ. पा. इ. वा. वै - ' एवं श्रूयते ' नास्ति । ५३. अ. पा. वा - °वाचित्वादर्शनात् । ५४. इ. वा. वै. मै - क्रियते ।

लोके [55]त्रैगुण्यं ब्रूते तथापि वेदे रूढ्या स्तोमवाची । [56]त्रिवृद्बहिष्पवमानः इत्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रमणात् [57] अत्र स्तोमविषयमेव [57] त्रिवृत्त्वम् ॥

सप्तमाध्यायस्य [58]तृतीयपादे चिन्तितम्-

" विश्वजित् सर्वपृष्ठः किमनुवादो रथन्तरम् ।
बृहता वा समुच्चेयं यद्वा षाडहिकानि षट् ॥
अतिदेश्यानि तत्राद्यो माहेन्द्रादिचतुष्टये ।
पृष्ठशब्दाच्चोदकेन सर्वेषामिह संभवात् ॥
[59]समुच्चयो वा विषये [60]सर्वत्वं बह्वपेक्षया ।
न तु द्वयोरतः षण्णां पृष्ठानामतिदेशनम् " ॥ (जैन्या ७.३.३.६-८)

" विश्वजित् सर्वपृष्ठो भवति " (तैसं ७.५.२) इति श्रूयते । तत्र सर्वपृष्ठशब्दोऽनुवादः । कुतः ? प्राप्तत्वात् । तथा हि ज्योतिष्टोमे माध्यन्दिनपवमानानन्तरभावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति । " अभि त्वा शूर नोनुमः " (ऋ ७.३२.२२) " कया नश्चित्र आभुवत् " (ऋ ४.३१.१) " तं वो दस्ममृतीषहम् " (ऋ ८.८८.१) " तरोभिर्वो विदद्वसुम् " (ऋ ८.६६.१) इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदशस्तोमतामापाद्य गीयन्ते । एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधानेन सप्तदशधाऽभ्यासः सप्तदशस्तोमः । तादृशेषु [61]स्तोत्रेषु पृष्ठशब्दः श्रूयते - " सप्तदशानि पृष्ठानि " (तांब्रा २१.६.१) इति । तानि चत्वारि पृष्ठानि [62]विश्वजिति चोदकप्राप्तत्वात् सर्वपृष्ठशब्देनानूद्यन्त इत्याद्यः पक्षः । रथन्तरपृष्ठबृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि [63]चोदकेन विकल्पप्राप्तौ सर्वशब्देन समुच्चयो विधीयते । तथा सत्यनुवादकृतं वैयर्थ्यं न भविष्यतीति द्वितीयः पक्षः । सर्वत्वं बहुषु मुख्यं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट्संख्याकानि पृष्ठान्यतिदिश्यन्ते । षडहे प्रतिदिनमेकैकं पृष्ठं विहितम् । तानि च षट्पृष्ठानि रथन्तरबृहद्वैरूपवैराजशाक्वररैवतसामभिर्निष्पाद्यानि । यद्यपि विश्वजित एकाहत्वाज्ज्योतिष्टोमविकृतित्वम् [64] एव, न तु षडहविकृतित्वं [64], तथाऽपि सर्वपृष्ठोक्तिबलात्तानि षट्पृष्ठान्यतिदिश्यन्ते ॥

~~~~~~~~~~~~~~~~~~~~~~

५५. इ. वा. वै - वैगुण्यम् । ५६. अ. आ. पा. वै - बहिष्पवमानम् । ५७-५७. अ. पा. इ. वा. वै. म - अतः स्तोमविषयमेव । ५८. आ - °यपादे तृतीयाधिकरणे । ५९. इ. वा. म. वै - समुच्चये । ६०. अ. पा. इ. वा - अल्पत्वम् । ६१. अ. पा. वा. वै - 'स्तोत्रेषु' नास्ति । ६२. अ. पा. इ. वा. वै. म - 'विश्वजिति' नास्ति । ६३. अ. पा. इ. वा. वै - चोदकत्वेन । ६४-६४. अ. पा. इ. वा. वै. म - 'एव - - - - °तित्वम्' नास्ति ।
~~~~~~~~~~~~~~~~~~~~~~

दशमाध्यायस्य षष्ठे [६५]पादे चिन्तितम् -

"[६६]किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा ।
पृष्ठशब्दात् पृष्ठदेशे वचनात्तु व्यवस्थितिः" ।। (जैन्या १०.६.५.८)

इदमाम्नायते - "विश्वजित् सर्वपृष्ठः" (तैसं ७.५.२) इति । षडहे षट्स्वहःसु क्रमेण [६७]रथन्तरबृहद्वैरूपमित्यादिभिः षड्भिः सामभिः पृष्ठस्तोत्रं निष्पादितम् । तानि सर्वाणि पृष्ठसामानि यस्मिन् विश्वजिति सोऽयं सर्वपृष्ठः । तत्र माध्यन्दिनपवमानमैत्रावरुणसाम्नोरन्तरालरूपे पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठसामानि कार्याणि, किंवा यथावचनं देशव्यवस्थेति संशयः । पृष्ठकार्यगमकेन(ण) पृष्ठशब्देन पृष्ठदेशे प्राप्ते [६८]वचनात् [६९]देशविशेषो व्यवस्थाप्यते । वचनं चैवमाम्नायते " पवमाने रथन्तरं करोत्यार्भवे बृहन्मध्यत इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसाम " (तांब्रा १६.५.२४) इति । वचनं हि न्यायाद्बलीयः । तस्माद्देशविशेषा व्यवस्थिताः ।।

।। [७०] इति श्रीमद्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः [७०] ।।

---

६५. आ. क - °पादे पञ्चमाधिकरणे । ६६. वै - कम् । ६७. वै - रूपमित्यादि । ६८. अ. आ. पा. इ. वा. वै. म - वचनेन । ६९. शृ१ - एतद्विशेषः । ७०-७०. वै - इति सप्तमाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।

देवस्य । त्वा । सवितुः । प्रसव इति प्र-सवे । अश्विनोः । बाहुभ्यामिति बाहु-भ्याम् । पूष्णः । हस्ताभ्याम् । एति । ददे । इमाम् । अगृभ्णन् । रशनाम् । ऋतस्य । पूर्वे । आयुषि । विदथेषु । कव्या ।

इत [1]ऊर्ध्वमश्वमेधमन्त्राः । तत्र रशनामादत्ते - 'देवस्य त्वा' इति । व्याख्यातं (तैसं १.१.४) दर्शपूर्णमासयोः । [V]देवस्य [V]सवितुः आज्ञां लब्ध्वा [V]अश्विनोः एव [V]बाहुभ्यां [2]नात्मीयाभ्यां [V]पूष्णः एव [V]हस्ताभ्यां त्वाम् [V]आददे ॥

आदायाभिमन्त्रयते - 'इमाम्' इति त्रिष्टुभा । इयमपि अग्निकाण्डे (तैसं ४.१.२) [3]व्याख्याता । [V]ऋतस्य यज्ञस्य [V]रशनां [4]बन्धनीयां [V]पूर्वे [V]कव्याः कवयः । यद्वा - कवनीयेषु स्तोतव्येषु [V]विदथेषु यज्ञेषु [5]आयुरर्थमगृभ्णन् गृहीतवन्तः । या [V]ऋतस्य यज्ञस्य [6][V]सामन्

दशमेऽनुवाके पञ्चरात्रो वर्णितः । अथात्राहीनविशेषानवस्थाप्यैकादशमारभ्य प्रपाठकसमाप्तिपर्यन्तमश्वमेधमन्त्रा उच्यन्ते । तेषां यथासंभवं [1-] ब्राह्मणग्रंथोक्ता विनियोगा उदाहियन्ते [-1] । तत्र ब्राह्मणवाक्यमेवं पठ्यते - " देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते [2]प्रसूत्यै [3-] अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । व्यृद्धं वा एतद्यज्ञस्य । यदयजुष्केण क्रियते " (तैब्रा ३.८.३) इति [-3] ।

देवस्येति ॥ मन्त्रपाठस्तु - 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे' इति ॥ हे रशने [V]सवितुः [V]देवस्य प्रेरणे [4]सत्यश्विसंबन्धिभ्यां बाहुमूलाभ्यां पूषसंबन्धिभ्यां [5]हस्ताग्राभ्यां [6]त्वाम् [V]आददे ॥

इमामिति ॥ अथ ब्राह्मणम् - " इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै " (तैब्रा ३.८.३) इति ॥

---

१. मै१ - °मश्वमन्त्राः । २. मै१ - नात्मीया । ३. अ१ - 'व्याख्याता' नास्ति । ४. अ१. मै१ - तत्संबन्धिनीमिमाम् । ५. मै. मै२. मै३. अ. अ१ - °मगृह्णन् । ६. मै२ - 'सामन्' नास्ति ।

---

१. शृ१ - ब्राह्मणवचनं यथोक्तानि विनियोगादाद्रियन्ते । २. शृ१. पा. इ. वा. म - प्रसूत्यै इति । ३. शृ१. अ. पा. इ. वा. म. वै - 'अश्विनो° ---- इति' नास्ति । ४. वा - °संबन्धिन्याम् । ५. इ. वा. वै - हस्ताभ्याम् । ६. शृ१ - 'त्वाम्' नास्ति ।

तया॑ दे॒वाः सु॒तमा ब॑भूवुर्ऋ॒तस्य॒ साम॑न्त्स॒रमा॒रप॑न्ती । अ॒भि॒धा अ॑सि॒ भुव॑नमसि

**तया॑ । दे॒वाः । सु॒तम् । एति॑ । ब॒भू॒वुः । ऋ॒तस्य॑ । साम॑न् । स॒रम् । आ॒र॒प॒न्तीत्या॑-रप॑न्ती ।
अ॒भि॒धा-इत्य॑भि-धाः । अ॒सि॒ । भुव॑नम् । अ॒सि॒ ।**

[७-] साम्नि समाप्तौ [-७] [V]सरं सरणम् [V]आरपन्ती अभिवदन्ती भवति । [८-] रपतिः शब्दकर्मा [-८] (धापा ४०२) । शीघ्रं मया यज्ञं [९]संपादयतेति । [V]तया [१०]हि [V]देवाः [V]सुतं सोमम् [V]आवभूवुः आभिमुख्येन प्राप्नुवन् । [११]ईदृशीम् [V]इमां गृह्णामीति ।

तया [१२]अश्वमभिदधाति - 'अभिधा असि' इति ॥ अभिपूर्वो दधातिः बन्धने वर्तते, कर्मणि क्विप् । बन्धनीयस्त्वम् [१३V]असि । अत एव [१४-V]भुवनं सर्वं [-१४] [१५-] भूतजातं च त्वम् [-१५] असि । यज्ञसाधनत्वेन सर्वेषां [१६]धारकत्वात् । [१७V]यन्ता यमयिता च [V]असि [१८-] सर्वस्य । अत

पाठस्तु - " इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य सामन्त्सरमारपन्ती " इति ॥ [V]विदथेषु यज्ञेषु [V]आयुषि यजमानायुर्निमित्ते [V]पूर्वे [V]कव्याः कवयो विद्वांस ऋत्विजः [V]ऋतस्य यज्ञस्य संबन्धिनीम् [V]इमां रशनाम् [V]अगृभ्णन् स्वीकृतवन्तः । [V]तया रशनया [V]देवाः सर्वे [V]सुतम् [V]आबभूवुः [७]अश्वबन्धनद्वारा तस्मिन्नश्वमेधे प्रधानभूतं त्रिरात्राख्यं [८]सोमयागमभितः प्राप्ताः । कीदृशी रशना ? [V]ऋतस्य यज्ञस्य [V]सामन् सामनि समाप्तौ निमित्तभूतायां सत्यां [V९]सरं सरणं प्रवृत्तिम् [V]आरपन्ती कथयन्ती । हे ऋत्विग्यजमानाः, शीघ्रं यज्ञं समापयतेति वदन्ती सेयं रशना लक्ष्यते, स्वकीयदीर्घत्वेनाश्वबन्धनयोग्यत्वदर्शनात् ॥

अभिधेति ॥ कल्पः - " अभिधा असीत्यश्वमभि दधाति " (आपश्रौ २०.३.५) इति ॥

पाठस्तु - 'अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानर९ँसप्रथसं गच्छ स्वाहाकृतः

७-७. अ१ - 'साम्नि समाप्तौ' नास्ति, मै१ - सामनि समाप्तौ । ८. मै२ - 'रपतिः शब्दकर्मा' नास्ति । ९. मै२ - समापयति । १०. अ१ - इह । ११. मै. मै१. मै२. मै३. अ - तादृशीम् । १२. मै२ - अभिधा इति । १३. अ१ - 'असि' नास्ति । १४. मै. मै१. मै३. अ - सर्वं भुवनम् । १५-१५. अ१ - भूतं त्वम्, मै२ - भूतजातत्वम् । १६. मै२ - वारकत्वात् । १७. मै२ - 'यन्ता' नास्ति । १८-१८. मै२ - 'सर्वस्य - - - - असि' नास्ति ।

---

७. म - अश्वसंबन्धनद्वारा । ८. अ. इ - °यागमभिमतः, पा. वा - यागाभिमतः । ९. वै - 'सरम्' नास्ति ।

यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यन्ता राड्यन्ताऽसि यमनो धर्ताऽसि धरुणः(१)

यन्ता। असि। धर्ता। असि। सः। अग्निम्। वैश्वानरम्। सप्रथसमिति स-प्रथसम्। गच्छ। स्वाहाकृत इति स्वाहा-कृतः। पृथिव्याम्। यन्ता। राट्। यन्ता। असि। यमनः। धर्ता। असि। धरुणः (१)।

एव [V]धर्ता धारयिता च [V]असि [-18] लोकस्य। [V]सः त्वं [V]वैश्वानरं विश्वेषां नराणां स्वामित्वेन संबन्धिनं [V]सप्रथसं प्रथसा विस्तारेण सहितं विश्वव्यापिनम् [19][V]अग्निं [V]गच्छ। " इयं वा अग्निर्वैश्वानरः " (तैब्रा ३.९.१७)। [V]स्वाहाकृतः स्वाहाकारेण संस्कृतः स्वाहाकारोच्चारणेन [20]संस्कृतः। ब्राह्मणं च " स्वाहाकृत इत्याह। होम एवास्यैषः " (तैब्रा ३.८.३) इति। [21]स्वाहाशब्दस्योर्यादित्वेन (गणपाठ ५, पा १.४.६१) गतित्वात् " गतिरनन्तरः " (पा ६.२.४९) इति गतेः प्रकृतिस्वरत्वम्। [22-] निपाता आद्युदात्ताः [-22]। किञ्च त्वमेव हि [23][V]यन्ता नियन्ता मनुष्यादीनाम्। [V]राट् दीप्यमानश्च [V]पृथिव्याम् अस्याम् [24][V]असि। अथ द्वितीयस्यामपि पृथिव्यां [25]अन्तरिक्षे [26-][V]यन्ता नियन्ता [-26] ग्रहनक्षत्रादीनां [27]च त्वमेव [V]असि। [28][V]यमनः

पृथिव्यां यन्ता राड्यन्ताऽसि यमनो धर्ताऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः' इति॥ अभिधीयते धार्यते बध्यते [अनया] इति [V]अभिधा। हेऽश्व, त्वं तादृशो [10]बध्यमानोऽसि। तथा भुवनादिरूपोऽसि। तव प्राजापत्यत्वात् प्रजापतिगुणाः सर्वेऽपि त्वय्यवस्थिताः प्रजापतिश्च भुवनकारणत्वाद्भुवनरूपः। अन्तर्यामित्वाच्च [V]यन्ता। पोषकत्वाच्च [V]धर्ता तद्द्वारा त्वमपि तथाविधोऽसि। स तादृशस्त्वं [V]वैश्वानरं सर्वपुरुषहितकारिणं [11][V]सप्रथसं [12]विस्तारेण सहितम् [V]अग्निम् आहवनीयं गच्छ। आहवनीये ह्यश्वाङ्गानि हूयन्ते। तत्र गत्वा च [V]स्वाहाकृतः स्वाहाकारेणास्माभिर्देवेभ्यो [13-] दत्तो भव [-13]। ततो हुतः सन्नृपो भूत्वा [V]पृथिव्यां [V]यन्ता [V]राट् भव नियामको राजा भव। ततोऽनन्तरभाविन्यन्तरिक्षे च ग्रहनक्षत्रादीनां [V]यन्ता [V]यमनः चापि, नियन्तुमुद्युक्तो

१९. अ१. मै१ - वह्निम्, मै२ - ' अग्निम् ' नास्ति। २०. अ१. मै१ - ' संस्कृतः ' नास्ति। २१. मै२ - °स्योर्यादित्वात्। २२-२२. मै२ - निपातः आद्युदात्तः। २३. मै२ - यन्ता मनुष्यादि। २४. मै२ - अधि। २५. मै२ - अन्तरिक्षशब्दस्योर्यादित्वात्। २६. मै२ - यन्ताऽसि। २७. मै२ - ' च ' नास्ति। २८. मै२ - धनः।

१०. वा - बुद्ध्यमानोऽसि। ११. इ. वै - सप्रथमम्। १२. अ - विस्तरेण। १३-१३. वै - दत्तोऽभवत्।

कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा
पृथिव्यै त्वाऽन्तरिक्षाय त्वा
दिवे त्वा सते त्वाऽसते

कृष्यै । त्वा । क्षेमाय । त्वा । रय्यै । त्वा । पोषाय । त्वा ।
पृथिव्यै । त्वा । अन्तरिक्षाय । त्वा । दिवे ।
त्वा । सते । त्वा । असते ।

---

[२९]यमसाधनभूतश्चासि । अथ तृतीयस्यामपि पृथिव्यां [३०]दिवि [३१][V]धर्ता धारयिता देवानां [३२-] त्वमेव [V]असि [-३२] । [V]धरुणः [३३]धारणकुशलश्च त्वमेवासि । औणादिक *उनन्(?)प्रत्ययः । (द्र. उसू ३.५३) पृथिवीशब्दस्त्रिष्वपि लोकेषु वर्तते यथा - " यो द्वितीयस्यां तृतीयस्यां पृथिव्याम् " (तैसं १.२.१२) इति ॥

[३४]अथैनभिप्रोक्षणेन प्रोक्षति - ' कृष्यै [३५]त्वा ' [३६]इत्यादि ॥ कृष्याद्यर्थं त्वां [३७]अभिप्रोक्षामिति । " उदात्तयणः°" (पा ६.१.१७४) [३८]इति विभक्तेरुदात्तत्वम् , " ऊडिदम्°"

यन्ता, नियन्तुं समर्थो यमनस्तादृशो भव । ततोऽप्युपरितने द्युलोके [V]धर्ता [V]धरुणः [V]असि स्वर्गस्थितानां पुरुषाणां धर्त्ता पोषयितुमुद्युक्तः " धरुणः पोषयितुं समर्थः तादृशो भव । तथाविधं त्वां [V]कृष्यै सर्व(स्य)निष्पत्तये बध्नामीति शेषः । एवमुत्तरत्रापि योज्यम् । क्षेमः प्राप्तस्य धनस्य रक्षणम् । रयिः प्रापणीयं धनम् । [१४]पोषस्तज्जन्या

---

२९. मै२ - °साधनभूतं वासि । ३०. मै. मै२. मै३. अ. अ१ - ' दिवि ' नास्ति । ३१. मै२ - यन्ता । ३२-३२. अ१ - ' त्वमेवासि ' नास्ति, मै१ - त्वम् । ३३. मै. मै२. मै३. अ. अ१ - धारणशीलः । [" कृवृदारिभ्य उनन् " (उसू ३.५३) इत्यस्मिन् औणादिके सूत्रे यद्यपि धृधातुर्न परिगणितः अथापि सादृश्यादस्माभिः उनन् प्रत्ययः संभावितः । मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ' उनप्रत्ययः ' इत्युपलभ्यते ।] । ३४. मै२ - अथैनं हि प्रोक्षणेन । ३५. मै२ - ' त्वा ' नास्ति । ३६. मै२ - इति । ३७. मै. मै१. मै३. अ - प्रोक्षामीति, मै२ - प्रोक्षति । ३८. मै. मै२. मै३. अ - इति स्वरः ।

---

१४. इ. वा. म. वै - °स्तज्जन्यः ।

त्वाऽद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः ॥११॥

(धरुणः पञ्चविंशतिश्च ।)

त्वा । अद्भ्य इत्यत्-भ्यः । त्वा । ओषधीभ्य इत्योषधि-भ्यः । त्वा ।
विश्वेभ्यः । त्वा । भूतेभ्यः ॥११॥

[कासं, अश्वमेध १.२ ; कपिसं - - - - ; मैसं - - - - ; वासं २२.१-३]

(पा ६.१.१७१) इति दिवः [३९]अद्भ्यः [४०]च । "शतुरनुमः°" (पा ६.१.१७३) इति सतः । "ओषधेश्च [४१]विभक्तावप्रथमायाम्" (पा ६.३.१३२) इति ओषधिशब्दस्य संहितायां दीर्घत्वम् ।

[४२-] इति सप्तमे प्रथमे एकादशोऽनुवाकः [-४२] ॥

भोगपुष्टिः । पृथिव्यादयस्त्रयः प्राप्तव्या लोकाः । तेषु लोकेषु पूर्वं विद्यमानं द्रव्यं सत् । इतः परं संपादनीयं [१५]द्रव्यमसत् । एतत्सर्वं [१६]भाविजन्मविषयम् । अस्मिञ्जन्मन्यपेक्षिता आप ओषधयः [१७-] सर्वप्राणिनश्च । तस्य सर्वस्य [-१७] सिद्ध्यर्थं त्वामिह बध्नामि । एतच्च सर्वं यागद्वारेणोपपद्यते ॥

[१८-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके एकादशोऽनुवाकः [-१८] ॥

---

३९. मै१ - अद्भिः । ४०. अ१ - 'च' नास्ति । ४१. मै२ - अविभक्ता° । ४२-४२. मै१. मै२ - सप्तमप्रथमे एकादशः ।

---

१५. शृ१ - असत् । १६. शृ१ - °जन्मविषये, म - जन्यविषयम् । १७-१७. म - °प्राणिभ्यश्च सर्वस्य । १८-१८. वै - इत्येकादशोऽनुवाकः ।

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि

विभूरिति वि-भूः । मात्रा । प्रभूरिति प्र-भूः । पित्रा । अश्वः । असि ।
हयः । असि । अत्यः । असि । नरः । असि । अर्वा । असि ।

अश्वस्य दक्षिणे कर्णे यजमानमश्वनामानि वाचयति - ‘विभूः’ इत्यादि ।। [1]धारणान्माता पृथिवी । तत्र वृष्ट्या प्रजा उत्पादयतीति पिता द्यौः । ब्राह्मणं च भवति - “ इयं वै माता । असौ पिता ” (तैब्रा ३.८.९) इति । तत्र [V]मात्रा पृथिव्या त्वं [V]विभूः [V]असि विशेषेण भवसि [2]विशिष्टोऽसि [V]पित्रा [3-]दिवा [4]च त्वं [-3] [5][V]प्रभूः असि प्रकर्षेण भवसि प्रकृष्टोऽसि । “ उदात्तयणः” (पा ६.१.१७४) इति तृतीयाया उदात्तत्वम् । [V]अश्वः व्यापकोऽसि [6]अध्वानं, [V]हयः क्रमणवान् [V]असि । “ हय [7]गतिक्रान्त्योः” (धापा ५१३) । [8]पचाद्यजन्तः (गणपाठ ३७, (पा ३.१.१३४) वृषादित्वादाद्युदात्तत्वम् (गणपाठ २०८, पा ६.१.२०३) । [V]अत्यः [9]सातत्येन गन्तुं समर्थोऽसि । [10]अततेः “ कृत्यल्युटो बहुलम् ” (पा ३.३.११३) इति कर्तरि यत् “ यतोऽनावः ” (पा ६.१.२१३) इत्याद्युदात्तत्वम् । [11-][V]नरः [V]असि कर्मणां नेताऽसि । “ नृ [-11] नये ” (धापा ८६२, १५९५) पूर्ववदच् , स्वरश्च (पा ३.१.१३४, पा ६.१.२०३) । [V]अर्वा

विभूरिति ।। कल्पः “ विभूर्मात्रा प्रभूः पित्रेत्यश्वस्य दक्षिणे कर्णे [1]यजमानमश्वनामानि वाचयित्वा ” (आपश्रौ २०.५.९) इति । पाठस्तु - “ विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वाऽन्विहि ’ इति ।। हेऽश्व त्वं [V]मात्रा त्वदीयया पृथिवीरूपया [V]विभूः असि व्याप्तिमानसि । [V]पित्रा द्युलोकरूपेण [V]प्रभूः प्रभुत्वशक्तिमानसि । “ इयं [2]वै माता । असौ पिता ” (तैब्रा ३.८.९) इति हि ब्राह्मणम् । पृथिव्या विभुत्वाद्द्युलोकस्य [3]भोगप्रभुत्वाच्च तदुभयमस्मिन्नुपचर्यते । तथा त्वम् [V]अश्वः [V]असि मुख्याश्वजातिमानसि, न तु तव गर्दभसांकर्यम् । हिधातोः [4]क्रमणार्थकादुत्पन्नो हयशब्दः (धापा १२८२) । अतः [V]हयः [V]असि समीचीनक्रमणवानसि । खुरसौकर्येण भूमावाक्रमणं त्वदीयं स्थिरमित्यर्थः । [V]अत्यः [V]असि

१. मैर - धारणात्मका । २. मैर - ‘ विशिष्टोऽसि ’ नास्ति । ३-३. अ१. मै१ - ‘ दिवा च त्वम् ’ नास्ति । ४. मैर - ‘ च ’ नास्ति । ५. अ१ - विभूः । ६. मै. मै१. मै३. अ. अ१ - अध्वनाम् । ७. मैर - गतिक्रान्तौ । ८. मैर - °द्यजन्तौ । ९. मैर - अत सातत्येन । १०. मैर - ‘ अततेः ’ नास्ति । ११-११. मैर - ‘ नरः - - - - नृ ’ नास्ति ।

१. अ.पा. आ. इ. वा. वै - यजमानम् , शृ१ - यजमान अश्वनामानि । २. म - ते । ३. म. क - भोग्यप्रदत्वाच्च । ४. अ. पा. वा - क्रमणार्थः, इ. म. वै - क्रमणार्थात् ।

सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्विह्यग्नये स्वाहा

~~~~~~~~~~~~~~~~~~~~

सप्तिः । असि । वाजी । असि । वृषा । असि । नृमणा इति नृ-मनाः । असि । ययुः । नाम । असि । आदित्यानाम् । पत्व । अन्विति । इहि । अग्नये । स्वाहा ।

~~~~~~~~~~~~~~~~~~~~

[12]अरणकुशलः Vअसि । अर्तेर्वनिप् Vसप्तिः सर्वत्र समवेतः Vअसि । " षप समवाये " (धापा ४०१) [13]क्तिच् । Vवाजी वेगवान् Vअसि । Vवृषा वर्षिता सेक्ता वा Vअसि । " कनिन्युवृषि°" (उसू १.१५६) इत्यादिना कनिन् । Vनृमणाः नृषु मनः यस्य, नॄन् मन्यते उपकरोति, नृभिर्वा मन्यसे उपकुर्विति । " गतिकारकयोरपि " (द्र.पा ६.२.१३९) इत्यसुन् , " परादिश्छन्दसि " (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् , " पूर्वपदात् संज्ञायामगः " (पा ८.४.३) इति णत्वम् । Vययुः यानशीलः । [14]" यो द्वे च " (उसू २१) इत्युप्रत्ययः[-14] । ययुरित्यश्वमेधयोग्योऽश्व इत्याहुः । ययुः Vनाम Vत्वम् Vअसि । ब्राह्मणं च " एतद्वा अश्वस्य प्रियं [15]नामधेयम् " (तैब्रा ३.८.९) इति ॥

उपतिष्ठते - ' आदित्यानाम् ' इति ॥ Vआदित्यानां Vयत् Vपत्व पतनं [16] तत् Vअन्विहि [-16] तदनुगच्छ शीघ्रं गच्छेति यावत् । यद्वा आदित्यानां [17] यत् पत्व [-17] मार्गः व्योम तदनु [18]गच्छ " उर्वन्तरिक्षमन्विहि " (तैसं १.१.२) इति [19]यावत् । पतेरौणादिको वनिप् (उसू ४.११२) ॥

~~~~~~~~~~~~~~~~~~~~

सततगमनशीलोऽसि । Vनरः Vअसि [5]उपर्यारूढानां नेताऽसि । Vअर्वा Vअसि समीचीनगतिमानसि । Vसप्तिः Vअसि सर्वेष्वपि युद्धादिकार्येषु संबद्धोऽसि । Vवाजी वेगवानसि । Vवृषा पुंस्त्वसामर्थ्यवानसि । Vनृमणाः नृभिर्मननीयोऽसि । Vययुः Vनाम Vअसि स्वर्गप्रापक इत्येतदेव तव प्रियं नाम । अत एव ब्राह्मणम् - " ययुर्नामासीत्याह । एतद्वा अश्वस्य प्रियं नामधेयम् " (तैब्रा ३.८.९) इति । ईदृशस्त्वम् Vआदित्यानां प्रतिमासवर्तिनां [6]द्वादशसंख्यानां [7]पत्व पतनं यदन्तरिक्षगमनं तदन्वन्तरिक्षमार्गेण [8-]Vइहि गच्छ [-8] ॥

~~~~~~~~~~~~~~~~~~~~

१२. मै२ - अरुणाकुशलः । १३. मै२ - ' क्तिच् ' नास्ति । १४-१४. मै१ - योश्वे चेति आयुःप्रत्ययः, मै२ - योवेति यारुप्रत्ययः । १५. मै१ - नाम । १६-१६. मै. मै१. मै३. अ. अ२ - ' तत् अन्विहि ' नास्ति । १७. अ१. मै१ - पतनम । १८. मै१ - गच्छ च । १९. मै१ - ' यावत् ' नास्ति ।

~~~~~~~~~~~~~~~~~~~~

५. म - उपचर्यारूढानाम् । ६. इ. वा. म. वै - °संख्याकानाम् । ७. [संहितामादृत्य शुद्धीकृतः पाठः । आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु पत्वमिति लभ्यते ।] । ८-८. म. वै - इहागच्छ ।
~~~~~~~~~~~~~~~~~~~~

स्वाहेन्द्राग्निभ्या९ स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहे(१)ह

स्वाहा । इन्द्राग्निभ्यामितीन्द्राग्नि-भ्याम् । स्वाहा । प्रजापतय इति प्रजा-पतये । स्वाहा । विश्वेभ्यः । देवेभ्यः । स्वाहा । सर्वाभ्यः । देवताभ्यः । इह । धृतिः । स्वाहा । इह । विधृतिरिति वि-धृतिः । स्वाहा । इह । रन्तिः । स्वाहा(१) । इह ।

पूर्वहोमात् पुरस्ताद्भागान् [20] पञ्च जुहोति [20] 'अग्नये [21]स्वाहा' इत्यादि ॥ प्रथमः उपरिष्टात्स्वाहाकारः अन्ये पुरस्तात् स्वाहाकाराः । इन्द्राग्निशब्दे "नोत्तरपदेऽनुदात्तादौ" (पा ६.२.१४२) इति देवताद्वन्द्वलक्षणस्य स्वरस्य प्रतिषेधः ॥

सायमश्वस्य [22]चतुर्षु पत्सु चतस्रो धृतीर्जुहोति - 'इह धृतिः' इत्यादि ॥ [V]इह अस्मिन् [23]पादे [V]धृतिः धारणं तृप्तिर्वा अस्तु । [V]इह [V]विधृतिः [24]विद्यापुत्रादिसंपत्प्रभवा धृतिरस्तु । [25][V]इह [V]रन्तिः [26]रतिसाधनभूता गवादयः सन्तु । "क्तिच्क्तौ च°" (पा ३.३.१७४) इति क्तिच्, "°दीर्घश्च" (पा ६.४.१९) इति नलोपाभावः । [V]इह [V]रमतिः [27] इह रमणमस्तु [27] । रमतेरौणादिकोऽतिप्रत्ययः (उसू ४.६३) [28] उभयत्रापि वृषादित्वादाद्युदात्तत्वम् [28] (गणपाठ २०८, पा १.२०३) ।

अग्नय इति ॥ कल्पः - "अग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पूर्वहोमान् हुत्वा" (आपश्रौ २०.५.९) इति ॥ पाठस्तु - "अग्नये स्वाहा स्वाहेन्द्राग्निभ्या९ स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्यः" इति । अत्र प्रथममन्त्रः [9]स्वाहान्तः उत्तरे चत्वारो मन्त्राः [10]स्वाहादयः ॥

इहेति ॥ कल्पः "[11]रथकारकुले वसतिर्भवति । इह [12]धृतिरिति सायमश्वस्य चतुर्षु पत्सु चतस्रो धृतीर्जुहोति" (आपश्रौ २०.५.१८,१९) इति ॥ पाठस्तु - 'इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा' इति ॥ [V]इह अस्मिन् दक्षिणपूर्वपादे [V]धृतिः धरणं स्थैर्यं भवतु । तदर्थमिदं स्वाहुतमस्तु ।

२०-२०. मै. मै२. मै३. अ - जुहोति पञ्च । २१. मै१ - 'स्वाहा' नास्ति । २२. मै. मै१. मै३. अ. अ१ - 'चतुर्षु' नास्ति । २३. अ१. मै१ - प्रदेशे । २४. अ१ - विदिधासंपत्, मै२ - विद्यापुत्रादि° । २५. मै. मै३. अ - 'इह' नास्ति । २६. मै२ - रीतिसाधन° । २७-२७. मै२ - 'इह रमणमस्तु' नास्ति । २८-२८. अ१ - 'उभयत्रापि - - - - °द्युदात्तत्वम्' नास्ति, मै. मै२. मै३. अ - उभयत्रवृषादि° ।

---

९. म - स्वाहाकारान्तः । १०. म - स्वाहाकारादयः । ११. [आपश्रौसूत्रमवलम्ब्यास्माभिः शुद्धीकृतः पाठः । आ - मुद्रितपुस्तके लिखितपुस्तकेषु च 'रथकारगृहे' इति पाठ उपलभ्यते ।] । १२. म - धृतिः इह विधृतिः ।

रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो

रमतिः । स्वाहा । भूः । असि । भुवे । त्वा । भव्याय । त्वा । भविष्यते । त्वा । विश्वेभ्यः । त्वा ।

अश्वमुत्सृजति - [29-] 'भूरसि' इति ॥ [V]भूः [-29] भावयिता [30]त्वं विश्वस्य [31][V]असि । "बहुलमन्यत्रापि" (उसू २.५०) इति णिलुक् । तस्मात् [V]भुवे [32]यत्किञ्चित् [33]भूतमतिक्रान्तं वस्तु तदर्थं तद्भावनार्थं त्वामुत्सृजामीति । "भूतेऽपि [34]दृश्यन्ते" (पा ३.३.१) इत्यौणादिकः क्विप्, "सावेकाचः" (पा ६.१.१६८) इति [35]विभक्तेरुदात्तत्वम् । [V]भव्याय भवते वस्तुने । "भव्यगेय°" (पा ३.४.६८) इति वर्तमाने यत्, "यतोऽनावः" (पा ६.१.२१३) इत्याद्युदात्तत्वम् । भविष्यते वस्तुने च त्वामुत्सृजामि । "शतुरनुमः°" (पा ६.१.१७३) इति चतुर्थ्या उदात्तत्वम् । किं बहुना - विश्वेभ्यस्त्वा भूतेभ्यः [36]त्वामुत्सृजामि [37]इति ॥

[13-] [V]इह अस्मिन् दक्षिणपृष्ठपादे [V]विधृतिः विशेषेण स्थैर्यमस्तु । [V]इह अस्मिन्नुत्तरपृष्ठपादे [V]रन्तिः स्थैर्येण रमणमस्तु । [V]इह अस्मिन्नुत्तरपूर्वपादे [V]रमतिः अत्यन्तं स्थिरं रमणमस्तु [-13] ॥

भूरिति ॥ [14] पाठस्तु - [15-] 'भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यः' इति [-15] ॥ कल्पः - "भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्यश्वमुत्सृज्य" (आपश्रौ २०.५.९) इति ॥ 'विश्वेभ्यस्त्वा भूतेभ्यः' इति [16]मन्त्रशेषपाठः । हेऽश्व त्वं [V]भूः [V]असि अतीतानामनागतानां वर्तमानानां [17-] च श्रेयसां [-17] भावयिताऽसि । भूशब्दोऽतीतमाचष्टे भव्यशब्दो वर्तमानं, भविष्यच्छब्द आगामि, [18]तस्य [19]त्रिविधस्य श्रेयसः सिद्ध्यर्थं [20]त्वाम् उत्सृजामि । तथा [V]विश्वेभ्यः [21]भूतेभ्यः सर्वप्राणिस्वाधीनत्वार्थं त्वामुत्सृजामि ॥

२९-२९. मै२ - भूरसीत्याद्याः । ३०. मै. मै२. मै३. अ. अ१ - 'त्वम्' नास्ति । ३१. मै. मै२. मै३. अ. अ१ - अपि । ३२. मै२ - यततु किञ्चित् । ३३. मै३ - भूतमनिक्रामन्तम् । ३४. अ१. मै१ - दृश्यते । ३५. मै२ - चतुर्थ्या उदा° । ३६. मै१ - 'त्वम्' नास्ति । ३७. मै२ - 'इति' नास्ति ।

१३-१३. इ. वै - 'इहास्मिन् - - - - रमणमस्तु' नास्ति । १४. [भाष्यकारशैलीमनुरुन्ध्यास्माभिः प्रपूरिताऽयमंशः ।]। १५-१५. इ. वा. म - 'भूरसि - - - - इति' नास्ति । १६. वा - मन्त्रशेषेण पाठः । १७-१७. अ. आ. इ. पा. वा. वे - 'च श्रेयसाम्' नास्ति । १८. इ. वा. वै - कस्य । १९. वा - त्रिविधा यस्य । २०. अ - 'त्वाम्' नास्ति । २१. शृ१ - देवेभ्यः ।

देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत ॥१२॥

(रन्तिः स्वाहा द्वाविंशतिश्च ।)

भूतेभ्यः । देवाः । आशापाला इत्याशा-पालाः । एतम् । देवेभ्यः । अश्वम् । मेधाय । प्रोक्षितमिति प्र-उक्षितम् । गोपायत ॥१२॥

[कासं, अश्वमेध १.३; कपिसं - - - -; मैसं ३.१२.४ ; वासं २२.१९]

अथैनं देवताभ्यो रक्षार्थं [३८]परिददाति - 'देवाः' [३९-] इत्यादि ॥ हे Vदेवाः[-३९] Vआशापालाः दिशां गोप्तारः । " विभाषितं विशेषवचने बहुवचनम् " (पामभा ८.१.७४) इति [४०]पूर्वस्याविद्यमानवत्त्वाभावः । [४१]एवम् Vअश्वं [४२-]Vमेधाय यज्ञायाभिप्रोक्षितं [-४२] [४३-] अत एव महार्घं [-४३] [४४-] एतमश्वं Vदेवेभ्यः देवार्थं [-४४]Vगोपायत रक्षत ॥ " शतं वै तल्प्या राजपुत्रा देवा आशापालाः " (तैब्रा ३.८.९) इति ब्राह्मणम् ॥

॥ [४५-] इति सप्तमे प्रथमे द्वादशोऽनुवाकः [-४५] ॥

देवा इति ॥ कल्पः - " देवा आशापाला इति रत्निभ्यः परिददाति " (आपश्रौ २०.५.९) इति ॥ [२२]पाठस्तु - " देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत " इति ॥ आशापालाः दिक्षु पालकाः । हे Vदेवाः [२३]देवतामूर्तिधारिणो रत्नाद्याभरणभूषिताः शतसंख्याका राजपुत्राः Vमेधाय यज्ञाय Vप्रोक्षितम् Vएतम् Vअश्वं Vदेवेभ्यः देवार्थं Vगोपायत रक्षत ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके द्वादशोऽनुवाकः ॥

३८. अ१. मै१ - परिददामीति । ३९-३९. अ१. मै१ - 'इत्यादि हे देवाः' नास्ति । ४०. अ१ - °स्याविद्यमानवत् भावाभावः , मै१ - स्याविद्यमानाभावात् भावाभावः । ४१. मै२ - एतम् । ४२-४२. मै२ - देवार्थं प्रोक्षितम् । ४३-४३. मै२ - त्वमेतं मदार्हाम् । ४४-४४. मै२ - 'एतमश्वं - - - - देवार्थम्' नास्ति । ४५-४५. मै२ - सप्तमे प्रथमे द्वादशः ।

२२. म - 'पाठस्तु' नास्ति । २३. अ. आ. पा. वा. वै - देवमूर्तिधारिणो ।

आय॑नाय॒ स्वाहा॒ प्राय॑णाय॒ स्वाहो॑द्द्रा॒वाय॒ स्वाहोद्द्रु॑ताय॒ स्वाहा॑ शूका॒राय॒ स्वाहा॒ शूकृ॑ताय॒ स्वाहा॒

आय॑ना॒येत्या॑-अय॑नाय । स्वाहा॑ । प्राय॑णा॒येति॑ प्र-अय॑नाय । स्वाहा॑ । उ॒द्द्रा॒वायेत्यु॑त्-द्रा॒वाय॑ । स्वाहा॑ । उद्द्रु॑ता॒येत्युत्-द्रु॒ता॒य॒ । स्वाहा॑ । शू॒का॒रायेति॑ शू-का॒राय॑ । स्वाहा॑ । शूकृ॑ता॒येति॒ शू-कृ॒ता॒य॒ । स्वाहा॑ ।

अथ [1] त्रयोदश ध्रुवा [1] जुहोति - 'आयनाय स्वाहा' इत्यादि ॥ आयनमागमनम्, प्रायणं प्रकृष्टगमनम्, गमनारम्भो वा । उभयत्रापि कृदुत्तरपदप्रकृतिस्वरत्वम् (पा ६.२.१३९) । उद्द्रावः उत्प्लुत्य गमनम् । [2] "उदि श्रयतियौति°" (पा ३.३.४९) इत्यादिना [3]द्रवतेः करणे घञ् [2] । [4]उद्द्रवणहेतुः शक्तिविशेषः उद्द्रावः । थाथादिनोत्तरपदान्तोदात्तत्वम् (पा ६.२.१४४) । [5] उद्द्रुतमुत्प्लुत्य गतिः [5] । "गतिरनन्तरः" (पा ६.२.४९) इत्यकर्मण्यपि व्यत्ययेन गतेः प्रकृतिस्वरत्वम् । [6] कर्मणोऽभिधानं वा [6] । शूकारः उद्द्रवणहेतुरनुकरणशब्दः, [7] सादिना साधारणकाले [7] यः क्रियते । कशाघातेन [8] सहितः शूकारः [8] । [9] तत्कारणं शूकृतम् [9] अनुकरणं

आयनायेति ॥ कल्पः - "आयनाय स्वाहा प्रायणाय स्वाहेत्युद्द्रावान्" (आपश्रौ २०.११.२) इति ॥ पाठस्तु - 'आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा' इति ॥ आभिमुख्येनाऽऽयनं गमनं यस्यासावायनस्तस्मा अश्वाय [1]तत्प्रीत्यर्थमिदं स्वाहुतम् । आभिमुख्यगमनमपि द्विविधं, मन्दगमनं तीव्रगमनं च । तत्राऽऽद्यं पूर्वमन्त्रेऽभिहितं, द्वितीयं प्रायणमन्त्रेऽभिधीयते । केचन [2]धूर्ता अश्वा गन्तुमनिच्छन्तस्ताडिताः सन्तः [3] पूर्वौ पादौ [3] उन्नमयन्ति, [4] अन्ये चापरौ पादावुन्नमयन्ति [4], [5]तदुभयमुद्द्रावोद्द्रुतशब्दाभ्यामभिधीयते । कशया घातितेनोद्द्रवणार्थं क्रियमाणस्य शब्दविशेषस्यानुकरणार्थं

---

१. मै२ - तृतीयो दशो ध्रुवा । २. मै२ - इति श्रयति याति इति करणे यज्ञः । ३. मै. मै२. मै३. अ - 'द्रवतेः' नास्ति । ४. मै. मै१. मै३. अ. अ१ - द्रवणहेतुः । ५. मै२ - °उत्प्लुत्योत्प्लुत्य । ६. मै२ - कर्माभिधानम् । ७-७. मै२- सानिना सूकरणे उद्द्रवणहेतुशक्तिविशेषौ उद्द्रावः काले (?) । ८-८. मै२ - सहशूकारः । ९-९. मै२ - नक्करणम् अनुकृतम् ।

---

१. वै - 'तत्' नास्ति । २. मै - धूताः, शृ१ - द्वार्ताः । ३-३. अ. आ. पा. इ. वा. वै - पूर्वपादौ । ४-४. म - 'अन्ये - - - - °नयन्ति' नास्ति । ५. शृ१ - तदुभयमुद्दावशब्दा°, मै - तदुभयमुद्रातशब्दा° ।

पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा

**पलायिताय । स्वाहा । आपलायितायेत्या-पलायिताय । स्वाहा ।
आवल्गत इत्या-वल्गते । स्वाहा ।**

चानिति परम् " (पा १.४.६२) इति गतित्वात् पूर्वत्र थाथादिस्वरः (पा ६.२.१४४) उत्तरत्र गतिस्वरः (पा ६.२.४९) । पलायितं शीघ्रगमनम् । " उपसर्गस्यायतौ " (पा ८.२.१९) इति लत्वम् । विकारत्वादनवग्रहः । पूर्ववद्गतिस्वरः (६.२.४९) । आपलायितं शीघ्रगमनम् । अनन्तरस्य गतेः [१०]प्रकृतिस्वरत्वम् (पा ६.२.४९) । [११-V]आवल्गते [१२]आवल्गनं गतिविशेषः[-११] विक्रमणपर्यायः तेन गतिविशेषेणागच्छते । [१३-V]परावल्गते तेनैव [-१३] गतिविशेषेण [१४]गच्छते । उभयत्रापि कृदुत्तरपदप्रकृतिस्वरत्वम् (पा ६.२.१३९) । [V]आयते आयनकुशलाय । [१५]वर्तमानविवक्षायाम् [१६]एतेर्लट् शत्रादेशः । " इणो [१७]यण् (पा ६.४.८१) । [V]प्रयते प्रयाणकुशलाय

शूकार [६-] इति प्रयुक्तम् । शूकृतमपि तदेव [-६] । पूर्वापरपादविषयत्वेन द्वेधाभिधानम् । पुरतो वेगेन [७]धावनं पलायनम् । आभिमुख्येन [८]धावनमापलायनम् । चतुर्णामपि पादानां [९]सकृदुन्नयनम्, आभिमुख्यविषयमावल्गनम् । पराङ्मुखत्वविषयं परावल्गनम् । पूर्वमायनप्रायणशब्दाभ्यां योऽर्थोऽभिहितः सोऽतीतविषयः । इह त्वायत्प्रयच्छब्दाभ्यां वर्तमानविषयः स एवार्थोऽभिधीयते । [१०]यथोक्ततत्तद्गुणयुक्तायाश्वाय तत्प्रीत्यर्थं

---

१०. मै२ - °स्वरार्थम् । ११-११. मै२ - आवल्गाने वल्गु नमनम् । १२. मै. अ - वल्गनम् । १३-१३. मै. मै२. मै३. अ - परावल्गनेनापि । १४. मै. मै२. मै३. अ - आगच्छते । १५. मै२ - 'वर्तमानविवक्षायाम्' नास्ति । १६. मै२ - इण् लट् । १७. मै२ - यण् अणः ।

६-६. अ. आ. पा. इ. वा. वै - इति प्रयुक्तम् । शूकृतमेतदेव, शृ१ - इति प्रयुक्तशूकृतमन्त्रेऽभिधीयते । ७. इ. वै - 'धावनम्' नास्ति । ८. मै - 'धावनम्' नास्ति । ९. अ. आ. पा. इ. वा. वै. म. मै - सकृदुन्नमनम् । १०. अ. आ. पा - अतो यथोक्त°, इ. वा. वै - यतो यथोक्त° ।

परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा ॥१३॥

(आयनायोत्तरमापलायिताय षड्विꣳशतिः ।)

परावल्गत इति परा-वल्गते । स्वाहा । आयत इत्या-यते । स्वाहा । प्रयत इति प्र-यते । स्वाहा । सर्वस्मै । स्वाहा ॥१३॥

[कासं. अश्वमेध १.४ ; कपिसं - - - - ; मैसं ३.१२.३; वासं २२.७-८]

प्रकृष्टगमनकुशलाय । उभयत्रापि " शतुरनुमः°" (पा ६.१.१७३) इति चतुर्थ्या उदात्तत्वम् । [18-] सर्वस्मै अन्योऽपि यो गमनप्रकारोऽस्य दुर्निरूपः तस्मै सर्वस्मै ᐯस्वाहा [-18] । पूर्णाहुतिरियम् । " सर्वस्य सुपि " (पा ६.१.१९१) इत्याद्युदात्तत्वम् ॥

॥ [19-] इति सप्तमे प्रथमे त्रयोदशोऽनुवाकः [-19] ॥

[11-] स्वाहा हुतम् [-11] इदमस्तु । किं बहुना सर्वस्मै सर्वप्रकारगमनविशेषयुक्ताश्वप्रीत्यर्थमिदं [12-] स्वाहा हुतम् [-12] अस्तु । उत्कृष्टगमनविषयत्वादेतेषां [13]होमानामुद्द्रावा इति नामधेयम् ॥

॥ [14-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके त्रयोदशोनुवाकः [-14] ॥

१८-१८. मै२ - अन्यस्मै दुर्निरूपा भाविगमनप्रकाराय स्वाहा । १९-१९. मै१. मै२ - सप्तमप्रथमे त्रयोदशः ।

११-११. शृ१. इ. मै. वै - स्वाहुतम् । १२-१२. इ. मै. वै - स्वाहुतम् । १३. मै - °नामुपद्रवा । १४-१४. वै - इति त्रयोदशोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे प्रथमप्रपाठके त्रयोदशोऽनुवाकः ।

अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहा॑ वा॒यवे॒ स्वाहा॒ऽपां मोदा॑य॒ स्वाहा॑ सवि॒त्रे स्वाहा॒ सर॑स्वत्यै॒ स्वाहेन्द्रा॑य॒ स्वाहा॒ बृह॒स्पत॑ये॒ स्वाहा॑ मि॒त्राय॒ स्वाहा॒ वरु॑णाय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥१४॥

(अ॒ग्नये॑ वा॒यवे॒ऽपां मोदा॒येन्द्रा॑य॒ त्रयो॑विꣳशतिः ।)

अ॒ग्नये॑ । स्वाहा॑ । सोमा॑य । स्वाहा॑ । वा॒यवे॑ । स्वाहा॑ । अ॒पाम् । मोदा॑य । स्वाहा॑ । स॒वि॒त्रे । स्वाहा॑ । सर॑स्वत्यै । स्वाहा॑ । इन्द्रा॑य । स्वाहा॑ । बृ॒ह॒स्पत॑ये । स्वाहा॑ । मि॒त्राय॑ । स्वाहा॑ । वरु॑णाय । स्वाहा॑ । सर्व॑स्मै । स्वाहा॑ ॥१४॥

[कासं, अश्वमेध १.५ ; कपिसं - - - - ; मैसं ३.१२.२ ; वासं २२.६]

अथ पूर्वाश्वस्य स्तोत्रियाः - ‘ अग्नये स्वाहा ’ [1]इत्यादि ॥ निगदसिद्धाः । अपां मोदः पर्जन्यः । [V]सवित्रे “ उदात्तयणः°” (पा ६.१.१७४) इति विभक्तेरुदात्तत्वम् । [V]बृहस्पतये सुट्स्वरावुक्तौ । [V]सर्वस्मै अनुक्ताय [2]प्रजापत्यादये पूर्णाहुतिः । एवं सर्वत्र ॥

॥ [3-] इति सप्तमे प्रथमे चतुर्दशोऽनुवाकः [-3] ॥

अग्नय इति ॥ कल्पः - “ अग्नये स्वाहा सोमाय स्वाहेति पूर्वहोमान् ” (आपश्रौ २०.११.३) इति ॥ [1]पाठस्तु - ‘ अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ’ इति । अपां मोदः पर्जन्यः । [2]अनुक्तानां [3-] पूर्वहोमाङ्गानां देवानां संग्रहार्थं सर्वशब्दः [-3] ॥

॥ [4-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके चतुर्दशोऽनुवाकः [-4] ॥

१. मै१. मै२ - इति । २. मै२ - प्राजापत्यादये । ३-३. मै१ - सप्तमप्रथमे चतुर्दशः, मै२ - प्रथमे चतुर्दशः ।

१. वा - ‘ पाठस्तु ’ नास्ति । २. शृ१ - नोक्तानाम् । ३-३. इ. वै - ‘°होमाङ्गानां - - - - सर्वशब्दः ’ नास्ति, मै - °होमाङ्गानां दिवा मां संग्रहाय, म - °ग्रहाय नश्वशब्दः । ४-४. मै - इति चतुर्दशोऽनुवाकः ।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः

पृथिव्यै । स्वाहा । अन्तरिक्षाय । स्वाहा । दिवे । स्वाहा । सूर्याय । स्वाहा । चन्द्रमसे । स्वाहा । नक्षत्रेभ्यः । स्वाहा । प्राच्यै । दिशे । स्वाहा । दक्षिणायै । दिशे । स्वाहा । प्रतीच्यै । दिशे । स्वाहा । उदीच्यै । दिशे । स्वाहा । ऊर्ध्वायै । दिशे । स्वाहा । दिग्भ्य इति दिक्-भ्यः । स्वाहा । अवान्तरदिशाभ्य इत्यवान्तर-दिशाभ्यः ।

अथ [१-] पूर्वा ऋतुदीक्षाः [-१] - 'पृथिव्यै स्वाहा ' [२]इत्यादि ॥ गताः । पृथिव्याः स एव स्वरः । " ऊडिदम्° " (पा ६.१.१७१) इति दिवः । " सावेकाचः°" (पा ६.१.१६८) इति दिशः । [३]Vदिग्भ्यः इति सामान्येन [४]उच्यते । अवान्तरदिशाः [५]कोणाः । समाशरच्छब्दौ

पृथिव्या इति ॥ [१-] कल्पः - " पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येतं हुत्वा " (आपश्रौ २०.११.४) इति ॥ एतमनुवाकं [-१] [२]पूर्वनामकहोमान्तःपातित्वेनैव हुत्वेत्यर्थः ॥

पाठस्तु - 'पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा ' इति ॥ [३-] प्राच्यादिशब्दा विशेषवाचिनः ।

१-१. मैर - ऋतुपूर्वा ऋतुदीक्षाः । २. मैर - इति । ३. मैर - 'दिग्भ्यः 'नास्ति । ४. मैर - चोच्यते । ५. मैर - कोणादयः ।

१-१. इ. वै - 'कल्पः - - - - °नुवाकम् 'नास्ति । २. शृ१ - °पातित्वेनेयम् , म - मान्तः पठित्वैव तेनैव । ३-३. शृ१. इ. वा. मै - प्राच्यां दिशि शब्दविशेषवाचिना दिक्शब्दः सामान्यवाचिनः ।

स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा ॥१५॥

(पृथिव्यै दिवे सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तचत्वारिंशत् ।)

स्वाहा । समाभ्यः । स्वाहा । शरद्भ्य इति शरत्-भ्यः । स्वाहा । अहोरात्रेभ्य इत्यहः-रात्रेभ्यः । स्वाहा । अर्धमासेभ्य इत्यर्ध-मासेभ्यः । स्वाहा । मासेभ्यः । स्वाहा । ऋतुभ्य इत्यृतु-भ्यः । स्वाहा । संवत्सरायेति सं-वत्सराय । स्वाहा । सर्वस्मै । स्वाहा ॥१५॥

[कासं, अश्वमेध १-६ ; कपिसं - - - ; मैसं ३-१२.७ -८; वासं २२.२७-२८]

संवत्सरविशेषवचनौ । गतौ गतेरिष्यन् ? वर्षवचनावित्येके । इह [६] तु ताभ्यां [६] तदवयवभूताः सूक्ष्माः [७]यामघटिकानिमेषादयो गृह्यन्ते । Vसर्वस्मै यौ दिक्कालकार्यौ [८] यौ च दिक्कालावनुक्तौ [८] तस्मै सर्वस्मै Vस्वाहा Vइति ॥

॥ [९] इति सप्तमे प्रथमे पञ्चदशोऽनुवाकः [९] ॥

दिक्शब्दः सामान्यवाची [४] । समाशरत्संवत्सरशब्दाः सौरचान्द्रनाक्षत्रविषयाः । [५]सर्वशब्दोऽनुक्तकालविषयः ॥

॥ [५] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके पञ्चदशोनुवाकः [५] ॥

६-६. मै२ - इताभ्याम् । ७. मै२ - नैषयामघटिकादयः । ८-८. मै२ - योनुक्तौ दिक्कालकार्यौ दिक्कालावनुगतौ वा । ९-९. मै२ - सप्तमे प्रथमे पञ्चदशः ।

---

४. शृ१. इ. मै. वै - °कालविशेषविषयः, म - °नुक्तविशेषविषयः । ५-५. मै. वै - इति पञ्चदशोऽनुवाकः ।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥१६॥

(अग्नये सवित्रे पूष्णेऽपां मोदाय वायवे त्रयोविꣳशतिः ।)

अग्नये । स्वाहा । सोमाय । स्वाहा । सवित्रे । स्वाहा । सरस्वत्यै । स्वाहा । पूष्णे । स्वाहा । बृहस्पतये । स्वाहा । अपाम् । मोदाय । स्वाहा । वायवे । स्वाहा । मित्राय । स्वाहा । वरुणाय । स्वाहा । सर्वस्मै । स्वाहा ॥१६॥

[कासं, अश्वमेध १.७ ; कपिसं - - - - ; मैसं ३.१२.५ ; वासं २२.२७]

अथोत्तरस्तोत्रीयाः - 'अग्नये स्वाहा' इति ॥ स्पष्टाः । अत्र विशेषः - वाय्वपांमोदशब्दौ [1]बृहस्पतिमित्रयोर्मध्ये द्रष्टव्यौ [2]विपर्यस्तौ । इन्द्रस्य [3]च स्थाने पूषा भवति । [4]पूर्वस्तोत्रियैः समानमन्यत् । उदात्तनिवृत्तिस्वरेण पूष्णो विभक्तेरुदात्तत्वम् । [5]सर्वस्मै [5] प्रजापत्यादये च [5] ॥

॥ [6] इति सप्तमे प्रथमे षोडशोऽनुवाकः [6] ॥

अग्नय इति ॥ कल्पः - " अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षाम् " (आपश्रौ २०.११.४) इति ॥

पाठस्तु - ' अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ' इति ॥

पूर्वहोमानुवाकवदयमनुवाको व्याख्येयः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके षोडशोऽनुवाकः ॥

१. मै२ - बृहस्पत्योर्मध्ये । २. मै२ - विपश्यन्ति । ३. मै. मै१. मै३. अ. अ१ - 'च' नास्ति । ४. मै२ - स्तोत्रियाः । ५-५. मै२ - प्राजापत्याय । ६-६. मै२ - प्रधमे षोडशः ।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिम्ने स्वाहा

पृथिव्यै । स्वाहा । अन्तरिक्षाय । स्वाहा । दिवे । स्वाहा । अग्नये । स्वाहा । सोमाय । स्वाहा । सूर्याय । स्वाहा । चन्द्रमसे । स्वाहा । अह्ने । स्वाहा । रात्रियै । स्वाहा । ऋजवे । स्वाहा । साधवे । स्वाहा । सुक्षित्या इति सु-क्षित्यै । स्वाहा । क्षुधे । स्वाहा । आशितिम्ने । स्वाहा ।

अथ दीक्षाहुतयः ‘ पृथिव्यै स्वाहा ’ [1]इत्यादि ॥ एकविंशतिः । [2]निगदव्याख्याताः । ऋज्वादयः पृथिव्यादयो लोकाः । [3]यथोक्तम् - “ इयं वा ऋजुः । अन्तरिक्षꣳ साधु । असौ सुक्षितिः” (तैआ ५.३) इति । [V]सुक्षित्यै स एव स्वरः । [V]क्षुधे “ सावेकाचः°” (पा ६.१.१६८) इत्युदात्तत्वम् । [4-V]आशितिम्ने आशितमसु(?)हितं, [5]तत्स्वभावाय । छन्दसीमनिच् । यद्वा - आशितृशब्दात् ‘ छन्दसि ’ इतीमनिच् , “ तुरिष्ठेमेयःस्सु ” (पा ६.४.१५४) इत्येकदेशस्य

पृथिव्या इति ॥ कल्पः - “ पृथिव्यै स्वाहाऽन्तरिक्षाय [1]स्वाहेत्येकविꣳशिनीं दीक्षाम् ” (आपश्रौ २७.११.५) इति ॥

पाठस्तु - ‘ पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहां सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहाऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ’ इति ॥ अत्र [2]ऋज्वादयः [3]त्रयः पृथिव्यादिलोकाः । तथा च ब्राह्मणम् - “ इयं वा ऋजुः । अन्तरिक्षꣳ साधु । असौ सुक्षितिः” (तैआ ५.३) इति । अशितिमशब्देन क्षुन्निवारकमाशितृत्वमभिधीयते । [4]स्वर्गः पुण्यफलभूतः । लोकशब्दः सामान्यवाची । अत्रातीतौ “ अग्नये स्वाहा ” (तैसं ७.१.१४) “ पृथिव्यै स्वाहा ” (तैसं ७.१.१५) इत्यनुवाकौ पूर्वहोमविषयौ । तथा च ब्राह्मणम् - “ अग्नये स्वाहा [4]

---

१. मैर - इति । २. मैर - °व्याख्यातः । ३. अ१ - ‘ यथोक्तम् ’ नास्ति । ४-४. मैर - आशति मन आशितस्तनं तत्रावयवाश्छान्दस इमनिच् आशितशब्दात् छन्दसीति इमनिच् उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । ५. मै१ - तत्स्वभावा यत् ।

---

१. म - °विꣳशतिम् । २. मै - ऋक्वादयः, इ. वै - क्रत्वादयः, वा - ऋत्वादयः । ३. म - ‘ त्रयः ’ नास्ति । ४-४. वा - ‘ स्वर्गः - - - - स्वाहा ’ नास्ति ।

रोगा॑य॒ स्वाहा॑ हि॒माय॒ स्वाहा॑ शी॒ताय॒ स्वाहा॑ऽऽत॒पाय॒ स्वाहाऽर॑ण्याय॒ स्वाहा॑ सु॒व॒र्गाय॒ स्वाहा॑ लो॒काय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥१७॥

(पृ॒थि॒व्या अ॒ग्नयेऽह्ने॒ रात्रि॑यै॒ चतु॑श्चत्वारिꣳशत् ।)

रोगा॑य । स्वाहा॑ । हि॒माय॑ । स्वाहा॑ । शी॒ताय॑ । स्वाहा॑ । आ॒त॒पायेत्या॑-त॒पाय॑ । स्वाहा॑ । अर॑ण्याय । स्वाहा॑ । सु॒व॒र्गायेति॑ सुवः॒-गाय॑ । स्वाहा॑ । लो॒काय॑ । स्वाहा॑ । सर्व॑स्मै । स्वाहा॑ ॥१७॥

[कासं, अश्वमेध १.८ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

ऋकारस्य लोपश्छान्दसः, उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् -४ । Vरोगाय । गतम् । Vसर्वस्मै याऽनुक्ता दीक्षादेवता, ६यश्च उपसर्गः, ६यश्च फलभूतः पुण्यलोकः । तस्मै Vसर्वस्मै Vस्वाहा इति ॥

॥ ७- इति सप्तमे प्रथमे सप्तदशोऽनुवाकः -७ ॥

सोमाय स्वाहेति पूर्वहोमाञ्जुहोति । पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति " ॥ (द्र.तैब्रा ३.८.९), " पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह । ५यथायजुरेवैतत् " (तैब्रा ३.८.१८) ६इति । उत्तरौ चानुवाकौ दीक्षाविषयौ । तत्रापि ब्राह्मणम् - " अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षा जुहोति । ७- पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति । पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकविꣳशिनीं दीक्षां जुहोति -७ " (तैब्रा ३.८.१७) इति ॥

॥८- इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तदशोऽनुवाकः-८ ॥

६. मैर - पश्च । ७-७. मै१. मैर - सप्तमप्रथमे सप्तदशः ।

५. मै - यथायुरेवैतत् । ६. वा - ' इति ' नास्ति । ७-७. शृ१ - ' पूर्वः - - - - जुहोति ' नास्ति । ८-८. मै. वै - इति सप्तदशोऽनुवाकः ।

भुवो॑ दे॒वानां॒ कर्म॑णाऽपस॒र्तस्य॑ प॒थ्या॑ऽसि॒ वसु॑भिर्दे॒वेभि॑र्दे॒वत॑या गाय॒त्रेण॑ त्वा॒ छन्द॑सा युनज्मि वस॒न्तेन॑ त्व॒र्तुना॑ ह॒विषा॑ दीक्षयामि

भुव॑ः । दे॒वाना॑म् । कर्म॑णा । अ॒पसा॑ । ऋ॒तस्य॑ । प॒थ्या॑ । अ॒सि॒ । वसु॑भि॒रिति॒ वसु॑-भिः । दे॒वेभि॑ः । दे॒वत॑या । गा॒य॒त्रेण॑ । त्वा॒ । छन्द॑सा । यु॒न॒ज्मि॒ । व॒स॒न्तेन॑ । त्वा॒ । ऋ॒तुना॑ । ह॒विषा॑ । दी॒क्ष॒या॒मि॒ ।

अथोत्तरा ऋतुदीक्षाः - ‘ भुवो देवानाम् ’ इति ॥ अत्र ‘ वसुभिः’ इत्यादयः पञ्च पर्यायाः । [1]तत्र आदौ ‘ पथ्याऽसि ’ इत्यन्तं सर्वेषां [2] तुल्यम् । अन्ते च “ आऽहं दीक्षाम् ” (तैसं ७.१.८) इत्यादि “ ऋतेधाम् ” (तैसं ७.१.८) इत्यन्तं सर्वेषां [2] तुल्यमेव । ततोऽन्ते द्वे ऋचौ त्रिष्टुभौ “ महीमू षु मातरम् ” (तैसं १.५.११) इत्येका, “ सुत्रामाणं पृथिवीम् ” (तैसं १.५.११) इति द्वितीया । एते [3]च “ वैश्वानरो न ऊत्या ” (तैसं १.५.११) इत्यत्र व्याख्याते, इह तु [4]प्रतीकग्रहणम् । दीक्षे त्वं [V]देवानां [V]कर्मणा देवसंबन्धिना व्यापारेण होमादिना [V]भुवः भव उत्पद्यस्व । भवतेर्लेटि शपो लुक् , “ लेटोडाटौ ” (पा ३.४.९४) इत्यडागमः, “ भूसुवोस्तिङि ” (पा ७.३.८८) इति गुणाभावः । [V]ऋतस्य यज्ञस्य [V]अपसा कर्मणा हेतुना भुव इत्येव । [V]पथ्या हिता खलु [V]असि सर्वस्य लोकस्य । छान्दसमन्तस्वरितत्वम् , डादेशो वा विभक्तेः । तां त्वां

भुवः इति ॥ कल्पः - “ भुवो देवानां कर्मणेत्यृतुदीक्षाभिः कृष्णाजिनमा रोहन्तमभिमन्त्रयते ” (आपश्रौ २०.८.१२) इति ॥

तत्र प्रथममन्त्रमाह - ‘ भुवो देवानां कर्मणाऽपसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि ’ इति । हे दीक्षे, त्वं [V]देवानां संबन्धिना [V]कर्मणा [V]ऋतस्य यज्ञस्य संबन्धिना [V]अपसा व्यापारेण [1]च [V]भुवः युक्ता भव । त्वं [V]पथ्या [V]असि देवानां यज्ञस्य च हिताऽसि । अहं [V]वसुभिः [V]देवेभिः वसुसंज्ञकैर्देवैः [V]देवतया दीक्षाभिमानिन्या [V]गायत्रेण [V]छन्दसा च [V]त्वा [V]युनज्मि त्वां [2]युक्तां करोमि । तथा [V]वसन्तेन [V]ऋतुना सहितोऽहं [3]त्वां [V]हविषा [V]दीक्षयामि संस्कृतां करोमि ॥

१. मै२ - ‘ तत्र ’ नास्ति । २. मै२ - ‘ तुल्यं - - - - सर्वेषाम् ’ नास्ति । ३. मै२ - ‘ च ’ नास्ति । ४. मै२ - ‘ प्रतीकग्रहणम् ’ नास्ति ।

१. अ. आ. पा. क. हा. इ. वा. वै - ‘ च ’ नास्ति । २. म. मै. वै - युक्तम् । ३. वा - ‘ त्वाम् ’ नास्ति ।

रु॒द्रेभि॑र्दे॒वेभि॑र्दे॒वत॑या॒ त्रैष्टु॑भेन॒ त्वा॒ छन्द॑सा युनज्मि ग्री॒ष्मेण॑ त्व॒र्तुना॑ ह॒विषा॑ दीक्षयाम्यादि॒त्येभि॑र्दे॒वेभि॑र्दे॒वत॑या॒ जाग॑तेन त्वा॒ च्छन्द॑सा युनज्मि व॒र्षाभि॑स्त्व॒र्तुना॑ ह॒विषा॑ दीक्षयामि॒ विश्वे॑भिर्दे॒वेभि॑र्दे॒वत॑याऽऽ-नु॑ष्टुभेन त्वा॒ च्छन्द॑सा युनज्मि (१) श॒रदा॑ त्व॒र्तुना॑

रु॒द्रेभिः॑ । दे॒वेभिः॑ । दे॒वत॑या । त्रैष्टु॑भेन । त्वा॒ । छन्द॑सा । यु॒नज्मि॒ । ग्री॒ष्मेण॑ । त्वा॒ । ऋ॒तुना॑ । ह॒विषा॑ । दी॒क्षया॒मि॒ । आ॒दि॒त्येभिः॑ । दे॒वेभिः॑ । दे॒वत॑या । जाग॑तेन । त्वा॒ । छन्द॑सा । यु॒नज्मि॒ । व॒र्षाभिः॑ । त्वा॒ । ऋ॒तुना॑ । ह॒विषा॑ । दी॒क्षया॒मि॒ । विश्वे॑भिः । दे॒वेभिः॑ । दे॒वत॑या । आनु॑ष्टुभे॒नेत्यानु॑-स्तु॒भे॒न॒ । त्वा॒ । छन्द॑सा । यु॒नज्मि॒ (१) । श॒रदा॑ । त्वा॒ । ऋ॒तुना॑ ।

देवेभिः वयुभिः देवैः गायत्रेण छन्दसा युनज्मि। त्वां च वसन्तेन ऋतुना वासन्तिकेन हविषा त्वां दीक्षयामि दीक्षां करोमि अविगुणं निर्वर्तयामीति यावत्। “ तत्करोति ” इति णिच्। [5] सः अहं [5] दीक्षाम् आरुहम् आरूढोऽस्मि। “ कृमृदृरुहिभ्यः ” (पा ३.१.५९) इति च्लेरङ्। ऋतस्य यज्ञस्य पत्नीं पालयित्रीम्। “ पत्युर्नः॰” (पा ४.१.३३) इति [6]ङीप्नकारौ। गायत्रेण छन्दसा ब्रह्मणा च ऋतं सत्ये अधां दधामि स्थापयामि। छान्दसो लुङ्। मानसं सत्यमृतं, वाचिकं सत्यम्। ‘[7]छन्दसः प्रत्ययविधाने नपुंसके [8]स्वार्थ उपसंख्यानम् ’ इति गायत्र्यादिषु स्वार्थिकोऽण्। त्रिष्टुबादिभ्य उत्सादित्वादञ् (गणपाठ ५२, पा ४.१.८६)॥

रुद्रेभिरिति ॥ अथोत्तरांश्चतुरो मन्त्रानाह - ‘ रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयामि ’ इति ॥ एतेषु चतुर्ष्वपि मन्त्रेषु ‘ भुवो देवानाम् ’ इत्यादिभागमनुषज्य पूर्ववद्व्याख्येयम् ॥

५-५. अ१ - आहम्, मै१ - आह। ६. मै१ - ॰नकारादेशौ। ७. अ१, मै१ - छान्दसः। ८. मै१ - स्वर्ग।

हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयाम्याऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम् । महीमू षु सुत्रामाणमिह धृतिः

हविषा । दीक्षयामि । अङ्गिरोभिरित्यङ्गिरः-भिः । देवेभिः । देवतया । पाङ्क्तेन । त्वा । छन्दसा । युनज्मि । हेमन्तशिशिराभ्यामिति हेमन्त-शिशिराभ्याम् । त्वा । ऋतुना । हविषा । दीक्षयामि । एति । अहम् । दीक्षाम् । अरुहम् । ऋतस्य । पत्नीम् । गायत्रेण । छन्दसा । ब्रह्मणा । च । ऋतम् । सत्ये । अधाम् । सत्यम् । ऋते । अधाम् । महीम् । उ । स्विति । सुत्रामाणमिति सु-त्रामाणम् । इह । धृतिः ।

एवं रुद्रादिपर्यायेष्वपि द्रष्टव्यम् ॥

'महिमू षु' इत्यादि ॥ सुव्रतानां शोभनकर्मणां मातरं मातृवत् पालयित्रीं Vमहीं देवीमेव ऋतस्य यज्ञस्य पत्नीं पालयित्रीम् अवसे रक्षणार्थं सुहुवेम सुष्ठु आह्वयामः तुविक्षत्रां प्रवृद्धबलाम् अजरन्तीम् अनुपक्षयाम् उरूचीमुरुगमनां सुशर्माणं सुमुखाम् अदितिम् अखण्डनीयां सुप्रणीतिं [9] शोभनप्रणयित्रीम् [10]इति ।

आऽहमिति ॥ अथ षष्ठमन्त्रमाह - 'आऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम्' इति ॥ Vअहं यजमानः Vगायत्रेण Vछन्दसा Vब्रह्मणा छन्दोरहितेन मन्त्रेण च अनुगृहीतः सन् [4-]Vऋतस्य Vपत्नीं यज्ञस्य [4] पालयित्रीं [5-]Vदीक्षां नियमविशेषरूपाम् [5] Vआऽरुहम् आरूढोऽस्मि । [6]मदीयम् Vऋतं सत्ये स्थापयामि, Vसत्यम् अपि Vऋते स्थापयामि । चिन्त्यमानं [7]वस्तुतत्त्वमृतम् । [8-]उच्यमानं वस्तुतत्त्वं [8] सत्यम् । अहं सर्वदा मनसा वस्तुतत्त्वं विचार्य पश्चाद्वक्ष्यामि । वाचाऽपि वस्तुतत्त्वमुच्चार्य पश्चादन्यद्वस्तुतत्त्वं चिन्तयामीत्यर्थः ॥

महीमिति ॥ अथ [9]सप्तमाष्टमयोर्मन्त्रयोः प्रतीके दर्शयति - 'महीमू षु सुत्रामाणम्' इति ॥ V"महीमू षु मातरम्" (तैसं १.५.११) इत्येको मन्त्रः । "सुत्रामाणं पृथिवीं द्याम्" (तैसं १.५.११) इत्यपरो

९. मै. मै२. मै३. अ - शोभनप्रणयनाम्, मै१ - शोभनां प्रणयिना । १०. मै१ - 'इति' नास्ति ।

४-४. शृ१ - तस्य त्वां यज्ञस्य । ५-५. वा - दीक्षानियम°, वै - दीक्षो नियम° । ६. अ. पा. इ. वा - महीयम् । ७. वा - वस्तुत्वमृतम् । ८-८. मै - उच्यउच्यमानं स्तुतत्वम् । ९. म - सप्तमाष्टममन्त्रयोः ।

स्वा॒हे॒ह विधृ॑ति॒ः स्वा॒हे॒ह रन्ति॒ः स्वा॒हे॒ह रम॑ति॒ः स्वाहा॑ ॥१८॥

(आनु॑ष्टुभेन त्वा॒ छन्द॑सा यु॒नज्म्येका॒न्नप॑ञ्चा॒शच्च॑ ।)

स्वाहा॑ । इ॒ह । विधृ॑ति॒रिति॒ वि-धृ॒ति॒ः । स्वाहा॑ । इ॒ह । रन्ति॒ः ।
स्वाहा॑ । इ॒ह । रम॑तिः । स्वाहा॑ ॥१८॥

[कासं, अश्वमेध १.८ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ द्वितीया - [V]सुत्रामाणं सुष्ठु त्रायन्तीं पृथिवीं द्यां [11]दीप्तिमतीम् अनेहसम् अपापाम् । 'सुशर्माणम्' इत्यादि । गतम् । दैवीं नावं स्वरित्राम् , अनागसम् अनवद्याम् अस्रवन्तीम् अच्छिद्रामा रुहेम स्वस्तये अविनाशायेति ॥

उत्सृष्टे चतुर्षु पत्सु चतस्र आहुतीर्जुहोति - 'इह धृतिः' इत्यादि ॥ व्याख्यातम् (तैसं ७.१.१२) ॥

॥ इति सप्तमे प्रथमे अष्टादशोऽनुवाकः ॥

मन्त्रः । द्वौ च मन्त्रौ " वैश्वानरो न ऊत्या " (तैसं १.५.११) इत्युनुवाके व्याख्यातौ ॥

इहेति ॥ [10]कल्पः - " सायं धृतिषु हूयमानासु राजन्यो वीणागाथी गायति " (आपश्रौ २०.७.१४) इति ॥

तानेतान् [11]धृतिमन्त्रानाह - 'इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा' इति ॥ एतच्चतुष्टयं पूर्ववद्व्याख्येयम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥

---

११. मै. मै१. मै२. मै३. अ - दीपितवतीम् ।

---

१०. म - 'कल्पः' नास्ति । ११. वा - मन्त्रानाह ।

ईङ्काराय स्वाहेङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा

ईङ्कारायेतीं-काराय । स्वाहा । ईङ्कृतायेतीं-कृताय । स्वाहा । क्रन्दते । स्वाहा । अवक्रन्दत इत्यव-क्रन्दते । स्वाहा । प्रोथते । स्वाहा ।

अथ पुरस्तात् स्विष्टकृतः [१]त्र्यशीतिमश्वचरितान्युपजुहोति - 'ईङ्काराय' इति ॥ ईमित्यनुकरणशब्दः सन्नाहादौ क्रियते अश्वेन । [२-]" अनुकरणं चानिति परम्" (पा १.४.६२) इति गतित्वात् थाथादिस्वरः [-२] । निवर्तमानावस्थ उच्यते । ईङ्कृतः [३]स [४]एव [५]निवृत्तावस्थ उच्यते । पूर्ववद्गतित्वात् (पा ८.४.६२) "गतिरनन्तरः" (पा ६.२.४९) इति तस्य [६]प्रकृतिस्वरत्वम् । Vक्रन्दते उच्चैर्हेषमाणाय । Vअवक्रन्दते अवाङ्मुखं [७]निभृतं [८]घोषमाणाय । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः, उत्तरत्र कृदुत्तरपदप्रकृतिस्वरत्वम् । Vप्रोथते

ईङ्कारायेति ॥ कल्पः - " ईङ्काराय स्वाहेङ्कृताय स्वाहेत्यश्वचरितानि " (आपश्रौ २०.६.३) इति ॥

पाठस्तु - 'ईङ्काराय स्वाहेङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा संदीयमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपर१ंस्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषत्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहाऽऽसिष्यते स्वाहाऽऽसीनाय स्वाहाऽऽसिताय स्वाहा निपत्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोत्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा स१ंहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवर्त्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्र१ंस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा

१. मै२ - त्रयोविंशतिमश्व° । २-२. अ१ - अनुकरणत्वादिति, परिमितिगतित्वात्, मै१ - अनुकरणं चानिति परिमितिगतित्वात् । ३. अ१. मै१ - 'सः' नास्ति । ४. मै१ - एवम् । ५. मै२ - निवृत्तावभूतः । ६. मै१ - °स्वरः । ७. मै२ - निवृतम् । ८. अ१ - हेषमाणाय ।

प्रपोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा

प्रपोथत इति प्र-पोथते । स्वाहा । गन्धाय । स्वाहा । घ्राताय । स्वाहा । प्राणायेति प्र-अनाय । स्वाहा । व्यानायेति वि-अनाय । स्वाहा । अपानायेत्यप-अनाय । स्वाहा ।

नासापुटाभ्यां शब्दं विस्तारयते । Vप्रप्रोथते उपर्युपरि तथाकुर्वते । प्रोथृ पर्याप्तौ (धापा ८९२) स एव स्वरः (पा १.४.६२) । Vगन्धाय गन्धयित्रे गन्धं गृह्णते । " गन्ध अर्दने " (धापा १७०८) पचाद्यच् (गणपाठ ३७, पा ३.१.१३४) । Vघ्राताय [९]घ्रातवते । " घ्रा गन्धोपादने " (धापा ९५१) व्यत्ययेन कर्तरि निष्ठा । [१०]मत्वर्थीयो वा लुप्यते । " [११]नुदविदोन्दत्राघ्रा°" (पा ८.२.५६) इति निष्ठानत्वाभावः पाक्षिकः । [१२]प्राणव्यानापानाः [१३-] व्याख्याताः (तैसं ५.५.५) । पचाद्यजन्ताः[-१३] (गणपाठ.३७, पा ३.१.१३४) । द्वितीयस्य [१४]सांहितिकं [१५]दीर्घत्वम् । प्रातिशाख्ये [१६]चोक्तम् - " व्युत्पूर्व आननुदात्तोनूष्मवति " (तैप्रा ३.१५) इति ॥

चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा ' इति ॥ खाद्यं दृष्ट्वा [१-] याचितुं यं [-१] मन्दशब्दं करोति [२]तदनुकरणम् ' ईम् ' इत्यनेनोच्यते । स च शब्दो वर्तमान ईङ्कारः । अतीतस्त्वीङ्कृतः । वडवां [३]दृष्ट्वोच्चैः [४]घोषेण उत्साहजनितं क्रन्दनम् । विरोधिनमश्वं दृष्ट्वा [५]क्रोधेनोच्चैर्घोषणमवक्रन्दनम् । गमनकाले नासापुटयोः श्वासशब्दः प्रोथनम् । स एवानुवर्तमानः प्रप्रोथनम् । तृणभक्षणे वा श्वासशब्दः प्रप्रोथनम् । अश्वान्तराघ्राणं गन्धः । स एवातीतो [६]घ्रातः । [७-] प्राणापानव्याना ऊर्ध्वाधोमध्यवृत्तयः [-७] । संदीयमानो बध्यमानः । संदितो बद्धः ।

९. अ१ - घ्राणते, मै१ - घ्रूणते । १०. मै२ - तमर्थीयः । ११. अ१ - घ्रातवते नुदते न घ्रा, मै१ - घ्रातवते नुदविदोश्चत्र । १२. अ१ - प्राणव्यानापानेभ्यः । १३-१३. अ१ - व्याख्याताः - - - - °द्यजन्ताः' नास्ति । १४. मै. मै१ - छान्दसं सांहितिकम् । १५. अ१ - दीर्घत्वम् प्राप्नोति । १६. अ१ - ' चोक्तम् ' नास्ति ।

१-१. अ. आ. पा. इ. बा. वै - यातुं यो, म - योत्तुं यम् । २. अ. आ. पा. इ. बा. वै - °करणं तदीमित्यने°, मै - °करणमित्यने° । ३. मै - दृष्टो वै । ४. अ. आ. पा. बा - घोषेणोत्साहजननम् । ५. बा - °णमक्रन्दनम् । ६. म - घ्रातम् । ७-७. मै - °व्यानादूर्ध्वायो मध्यं वृत्तयः ।

संदीयमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरꣳस्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा

संदीयमानायेति सं-दीयमानाय । स्वाहा । संदितायेति सं-दिताय । स्वाहा । विचृत्यमानायेति वि-चृत्यमानाय । स्वाहा । विचृत्तायेति वि-चृत्ताय । स्वाहा । पलायिष्यमाणाय । स्वाहा । पलायिताय । स्वाहा । उपरꣳस्यत इत्युप-रꣳस्यते । स्वाहा । उपरतायेत्युप-रताय । स्वाहा । निवेक्ष्यत इति नि-वेक्ष्यते । स्वाहा ।

[V]सन्दीयमानाय [१७]बद्ध्यमानाय । " दो अवखण्डने " (धापा ११७३) संपूर्वो [१८]बन्धनकर्मा [१९-]"घुमास्थागापा°" (पा ६.४.६६) इति सूत्रेणेत्वम् [-१९] । [V]सन्दिताय बद्धाय । " द्यतिस्यति "(पा ७.४.४०) इत्यादिना इत्वं, पूर्ववल्लसार्वधातुकानुदात्तत्वे गतिस्वरौ (पा १.४.६२), (पा ६.२.४९) । [२०-] [V]विचृत्यमानाय [२१-] विमुच्यमानाय । [V]विचृत्ताय [-२१] विमुक्ताय [-२०] । " चृती हिंसादौ " (धापा १३५०), " श्वीदितो निष्ठायाम् " (पा ७.२.१४) इतीट्प्रतिषेधः, पूर्ववत्स्वरौ (पा १.४.६२), (पा ६.२.४९) । [V]पलायिष्यमाणाय हविर्भूत्वा [२२]शीघ्रं देवसकाशं प्राप्स्यते । " अय गतौ " (धापा ४७५) " उपसर्गस्यायतौ " (पा ८.२.१९) इति लत्वम् । [V]पलायिताय देवसकाशं [२३]प्राप्ताय । तावेव स्वरौ (पा १.४.६२), (पा ६.२.४९) । [V]उपरंस्यते मनुष्यलोकं हित्वा देवसकाशे रन्तुं यास्यते । " उपाच्च " (पा १.३.८४) इति रमतेः परस्मैपदम् , " शतुरनुमः°" (पा ६.१.१७३) इति विभक्तेरुदात्तत्वम् । [V]उपरताय देवसकाशं गतवते । पूर्ववद्गतिस्वरः (पा १.४.६२) । [V]निवेक्ष्यते देवान् प्रवेक्ष्यते । अतः परं [२४]त्रिकालवर्तिचरितग्रहणम् । " शतुरनुमः°" (पा ६.१.१७३) इति विभक्तेरुदात्तत्वम् । [V]निविशमानाय । " नेर्विशः" (पा १.३.१७)

[८]विचृत्यमानो मुच्यमानः । [९]विचृत्तो मुक्तः । पलायितुमुद्यतः पलायिष्यमाणः । निर्वर्तितपलायनः पलायितः । पलायनपरित्याग उपरमः । स च भावी भूतश्च । शालाप्रवेशो निवेशनम् । तच्च भावि वर्तमानमतीत

१७. मै. मै२. मै३. अ - नियम्यमानाय । १८. अ१ - बन्धने वर्तते । १९-१९. अ१ - घुमास्थेति इत्वम् , मै१ - घुमास्थादि सूत्रेणेत्वम् । २०-२०. मै१ - विवृत्तत्यमानाय विवृत्ताय विमुक्ताय । २१-२१. अ१ - ' विमुच्य° - - - - °त्ताय ' नास्ति । २२. अ१ - ' शीघ्रम् ' नास्ति । २३. अ१. मै१ - प्राप्तवते । २४. अ१ - त्रिकालवच्चरितग्रहणम् ।

८. मै. वै - विवृत्त्यमानः । ९. अ. इ. वा. मै. वै - विवृत्तः ।

नि॒वि॒शमा॑नाय॒ स्वाहा॑ नि॒विष्टा॑य॒ स्वाहा॑ नि॒षत्स्य॒ते स्वाहा॑ नि॒षीद॑ते॒ स्वाहा॑ नि॒षण्णा॑य॒ स्वाहा॑ (१)ऽऽसिष्य॒ते स्वाहाऽऽसी॑नाय॒ स्वाहाऽऽसि॒ताय॒ स्वाहा॑ नि॒पत्स्य॒ते स्वाहा॑ नि॒पद्य॑मानाय॒ स्वाहा॑ नि॒पन्ना॑य॒ स्वाहा॑

नि॒वि॒शमा॑नायेति॑ नि-वि॒शमा॑नाय । स्वाहा॑ । नि॒विष्टा॒येति॑ नि-वि॒ष्टा॒य । स्वाहा॑ । नि॒ष॒त्स्य॒त इति॑ नि-स॒त्स्य॒ते । स्वाहा॑ । नि॒षीद॑त इति॑ नि-सीद॑ते । स्वाहा॑ । नि॒षण्णा॒येति॑ नि-स॒न्ना॒य । स्वाहा॑ (१) । आ॒सि॒ष्य॒ते । स्वाहा॑ । आसी॑नाय । स्वाहा॑ । आ॒सि॒ताय॑ । स्वाहा॑ । नि॒प॒त्स्य॒त इति॑ नि-प॒त्स्य॒ते । स्वाहा॑ । नि॒पद्य॑मा॒ना॒येति॑ नि-पद्य॑मानाय । स्वाहा॑ । नि॒पन्ना॒येति॑ नि-प॒न्ना॒य । स्वाहा॑ ।

इत्यात्मनेपदम् । पूर्ववद्व्यत्ययेन कृतः सतिशिष्टस्वरः । [२५-V] निविष्टाय । कर्तरि निष्ठा । तत्र व्यत्ययेन गतेः प्रकृतिस्वरत्वम् [-२५] (पा ६.२.४९) । [२६-V]निषत्स्यते । [२७-] निषीदनम् आसनाधिकरणावस्थानपरिग्रहः[-२७] । " सदिरप्रतेः" (पा ८.३.६६) इति षत्वम् । [२८V]निषीदते "[२९-] पाघ्रा°" (पा ७.३.७८) आदिना [-२९] [३०]सीदादेशः । [V]निषण्णाय " रदाभ्याम्°" (पा ८.२.४२) इति निष्ठानत्वम् । सर्वत्रोक्त एव स्वरः (पा १.४.६२) । [V]आसिष्यते इत्यादि । गतम् [-२६] । [V]आसीनाय । अनुदात्तेत्वाल्लसार्वधातुकानुदात्तत्वम् । [V]निपत्स्यते [३१]निपतनं शयनाधिकरणस्थानपरिग्रहः । व्यत्ययेनैव [३२]परस्मैपदम् । [V]निपद्यमानाय [३३]अदुपदेशाल्ल-

---

चेति त्रिविधम् । प्रविश्य शालायां स्थितिर्निषदनम् । [१०-] तदपि पूर्ववत् त्रिविधम् । एतच्च त्रैविध्यं सर्वत्र द्रष्टव्यम् । क्षणमात्रं पादसंकोच आसनम् । पार्श्वस्य भूमिस्पर्शो निपतनम् । पादप्रसारणं शयनम् [-१०] ।

२५-२५. अ१ - मै१ - ' निविष्टाय - - - - °स्वरत्वम् ' नास्ति । २६-२६. अ१ - ' निषत्स्यते - - - - गतम् ' नास्ति । २७-२७. मै१ - ' निषीदनम् - - - - °परिग्रहः ' नास्ति, मै२ - निषवनं आसनाधि° । २८. मै२ - निषीवते । २९-२९. मै२ - पार्यादिना । ३०. मै२ - सधादेशः । ३१. अ१ - निपातनम् । ३२. [अ१ - इत्यस्मिन् लिखितपुस्तके ' परस्मैपदम् ' इति पदानन्तरं पृष्ठभागे गलितः ' सदिरप्रतेः - - - - निष्ठानत्वम् ' इत्यन्तोंऽशः अत्रोल्लिखितः ।] । ३३. अ१. मै१ - °कोदात्तत्वम् ।

१०-१०. अ. वा - ' तदपि - - - - शयनम् ' नास्ति ।

शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोत्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा

शयिष्यते । स्वाहा । शयानाय । स्वाहा । शयिताय । स्वाहा । संमीलिष्यत इति सं-मीलिष्यते । स्वाहा । संमीलत इति सं-मीलते । स्वाहा । संमीलितायेति सं-मीलिताय । स्वाहा । स्वप्स्यते । स्वाहा । स्वपते । स्वाहा । सुप्ताय । स्वाहा । प्रभोत्स्यत इति प्र-भोत्स्यते । स्वाहा । प्रबुध्यमानायेति प्र-बुध्यमानाय । स्वाहा । प्रबुद्धायेति प्र-बुद्धाय । स्वाहा । जागरिष्यते । स्वाहा । जाग्रते । स्वाहा । जागरिताय । स्वाहा ।

सार्वधातुकानुदात्तत्वे श्यनो नित्वात् " ञ्नित्यादिर्नित्यम् " (पा ६.१.१९) [३४]इत्याद्युदात्तत्वम्, उक्तमन्यत् । Vशयिष्यते । स्वरपरस्मैपदे उक्ते (पा ६.१.१७३), (पा १.३.८४) । Vशयानाय [३५]ङित्वाल्लसार्वधातुकानुदात्तत्वम् ॥

'संमीलिष्यते' इत्यादि ॥ गतम् । Vस्वप्स्यते बाह्यकरणोपरमः स्वापः । गतमन्यत् । Vप्रभोत्स्यते " एकाचः° " (पा ८.२.६७) इति भष्भावः । Vप्रबुद्ध्यमानाय Vजागरिष्यते । गतम् । Vजाग्रते । " जक्षि° " (पा ६.१.६) इत्यादिना अभ्यस्तसंज्ञत्वात् " अभ्यस्तानामादिः " (पा ६.१.१८९) इत्याद्युदात्तत्वम् । Vजागरिताय । " जाग्रोऽविचिण्णल्ङित्सु " (पा ७.३.८५) इति गुणः ॥

चक्षुषोर्निमीलनं [११]संमीलनम् । स्वापो निद्रा । तत्परित्यागः प्रबोधः । बाह्यावलोकनं जागरणम् ।

---

३४. मै२ - इत्यावनुदात्तत्वम् । ३५ मै - शित्वाल्ल° ।

---

११. वा - 'संमीलनम्' नास्ति ।

शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा (२) वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा सꣳहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवर्त्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते

शुश्रूषमाणाय । स्वाहा । शृण्वते । स्वाहा । श्रुताय । स्वाहा । वीक्षिष्यत इति वि-ईक्षिष्यते । स्वाहा (२) । वीक्षमाणायेति वि-ईक्षमाणाय । स्वाहा । वीक्षितायेति वि-ईक्षिताय । स्वाहा । सꣳहास्यत इति सं-हास्यते । स्वाहा । संजिहानायेति सं-जिहानाय । स्वाहा । उज्जिहानायेत्युत्-जिहानाय । स्वाहा । विवर्त्स्यत इति वि-वर्त्स्यते । स्वाहा । विवर्तमानायेति वि-वर्तमानाय । स्वाहा । विवृत्तायेति वि-वृत्ताय । स्वाहा । उत्थास्यत इत्युत्-स्थास्यते । स्वाहा । उत्तिष्ठत इत्युत्-तिष्ठते ।

Vशुश्रूषमाणाय [36]जागरित्वा [37]शब्दं श्रोतुमिच्छते । पूर्ववदाद्युदात्तत्वम् (पा ६.१.११८) । " ज्ञाश्रुस्मृदृशां [38]सनः " (पा १.३.५७) इत्यात्मनेपदम् । उत्तरे गते । Vवीक्षिष्यते इत्यादि । गतम् । Vसंहास्यते इत्यादि । [39] गतम् । संहासनं बाह्येन्द्रियाणां [-39] स्वैः स्वैर्विषयैः संयोगः । " ओहाङ् गतौ " (धापा १११४) । Vसंजिहानाय " भृञामित् " (पा ७.४.७६) इतीत्वम् । Vउज्जिहानाय कार्येषूपयोगं कुर्वते । उक्ते स्वरपरस्मैपदे (पा ६.१.१७३), (पा १.३.८४) । Vविवर्त्स्यते । विवर्तनं शयनस्थानत्यागः । " वृद्भ्यः स्यसनोः" (पा १.३.९२) इति परस्मैपदम् । " न वृद्भ्यश्चतुर्भ्यः " (पा ७.२.५९) इतीडभावः । उक्तमन्यत् । Vविवृत्ताय " उदितो वा " (पा ७.२.५६) इति विभाषितेट् " यस्य विभाषा " (पा ७.२.१५) इतीट्प्रतिषेधः ॥

अश्वपालकानामुत्थापनशब्दानुसंधानं श्रवणम् । तृणखाद्यान्वेषणं वीक्षणम् । शालाया बहिर्गमनं संहानम् । निर्गत्य भूमौ विलुण्ठनं विवर्तनम् । तदनन्तरमूर्ध्वं स्थितिरुत्थानम् । उत्थितस्य धूलिमपनेतुं शरीरचालनं

३६. मै१- जरिता । ३७. मै२ - अशनम् । ३८. मै१ - 'सनः' नास्ति । ३९-३९. मै१ - संहातं संगतिबाह्येन्द्रियाणाम्, मै२ - संहासनं संसादिः बाह्येन्द्रि° ।

स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्रꣳस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय

स्वाहा । उत्थितायेत्युत्-स्थिताय । स्वाहा । विधविष्यत इति वि-धविष्यते । स्वाहा । विधून्वानायेति वि-धून्वानाय । स्वाहा । विधूतायेति वि-धूताय । स्वाहा । उत्क्रꣳस्यत इत्युत्-क्रꣳस्यते । स्वाहा । उत्क्रामत इत्युत्-क्रामते । स्वाहा । उत्क्रान्तायेत्युत्-क्रान्ताय । स्वाहा । चङ्क्रमिष्यते । स्वाहा । चङ्क्रम्यमाणाय । स्वाहा । चङ्क्रमिताय । स्वाहा । कण्डूयिष्यते । स्वाहा । कण्डूयमानाय ।

Vउत्थास्यते । " उदः स्थास्तम्भोः [४०]पूर्वस्य " (पा ८.४.६१) इति पूर्वरूपता । Vविधविष्यते । विधवनं देहस्य कम्पनम् । Vविधून्वानाय । " धूञ् कम्पने " (धापा १८५९) क्रैयादिकः, व्यत्ययेन श्नुः [४१]कृदुत्तरपदप्रकृतिस्वरत्वे शानच्स्वरः [४२]सतिशिष्टोऽपि [४३]विकरणस्वरः लसार्वधातुकस्वरेण बाध्यते । [४४]Vउत्क्रंस्यते । उत्क्रमणं शिरःकम्पनम्, [४५]व्यत्ययेनेडभावः (पा ७.२.५९) । गतमन्यत् । Vचङ्क्रमिष्यते । चङ्क्रमणं पुनः पुनः क्रमणं सातत्येन गमनम् [४६]यङन्ताल्लुकि " यस्य हलः " (पा ६.४.४९) इति यलोपः ॥

Vकण्डूयिष्यते । दर्पनिमित्ता कण्डूया । " कण्ड्वादिभ्यो यक् " (पा ३.१.२७) । Vनिकषिष्यते । निकषणं काष्ठादिषु शरीरस्य [४७]तक्षणम् । " कष हिंसायाम् " (धापा ६८६) ।

विधूननम् । पादस्योन्नमनम् [१२]उत्क्रमणम् । मन्दगमनं चङ्क्रमणम् । दन्तपङ्क्तिभ्यां पृष्ठभागे दंशनं

---

४०. मै. मै१. मै३. अ. अ१ - ' पूर्वस्य ' नास्ति । ४१. मै१ - °पदस्वरत्वम् । ४२. मै२ - अतिशिष्टोऽपि । ४३. मै१ - स्वकरण° । ४४. मै२ - व्यत्ययेनेडभावः । ४५. मै२ - ' व्यत्ययेनेडभावः ' नास्ति । ४६. [अस्माभिः शुद्धतामापादितोऽयं पाठः ।], मै. मै१. मै३. अ. अ१ - °न्ताल्लुटि, मै२ - °न्ताल्लुङि । ४७. [अ - लिखितपुस्तकानुरोधेन शुद्धतामापादितः पाठः ।] अ१ - [illegible], मै. मै१. मै२. मै३. अ - ' तक्षणम् ' नास्ति ।

---

१२. अ. वा. पा - उपक्रमणम् ।

स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकर्षमाणाय स्वाहा (३) निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा ॥१९॥

(निषण्णाय स्वाहा वीक्षिष्यते स्वाहा निकर्षमाणाय स्वाहा सप्तविꣳशतिश्च)

स्वाहा । कण्डूयिताय । स्वाहा । निकषिष्यत इति नि-कषिष्यते । स्वाहा । निकर्षमाणायेति नि-कर्षमाणाय । स्वाहा (३) । निकषितायेति नि-कषिताय । स्वाहा । यत् । अत्ति । तस्मै । स्वाहा । यत् । पिबति । तस्मै । स्वाहा । यत् । मेहति । तस्मै । स्वाहा । यत् । शकृत् । करोति । तस्मै । स्वाहा । रेतसे । स्वाहा । प्रजाभ्य-इति प्र-जाभ्यः । स्वाहा । प्रजननायेति प्र-जननाय । स्वाहा । सर्वस्मै । स्वाहा ॥१९॥

[कासं, अश्वमेध १.१०; कपिसं ----, मैसं ३.१२.३, वासं २२.७-८]

[V]निकषमाणाय । व्यत्ययेनात्मनेपदम् । [48]गतमन्यत् । [49][V]यदत्ति येन सामर्थ्येन [50]अदनं करोति [V]तस्मै [V]स्वाहा । तस्मा एव वा अदनाय । एवं पानादिषु [51]द्रष्टव्यम् ॥

[V]रेतसे [52]रेतःसेचनकर्मणे । [V]प्रजाभ्यः प्रजोत्पादनसामर्थ्याय । [V]प्रजननाय प्रजननेन्द्रियाय । [V]सर्वस्मै अनुक्तमन्यदपि चरितमश्वस्य [53]हासरोदनादि [V]तस्मै [V]सर्वस्मै [V]स्वाहा ॥

॥ [54] इति सप्तमे प्रथमे एकोनविंशोऽनुवाकः [54] ॥

कण्डूयनम् । कुड्यस्तम्भादौ शरीरघर्षणं निकषणम् । अदनादयः प्रसिद्धाः । प्रजा अश्वस्यापत्यानि । प्रजननं तदुत्पादनम् । सर्वशब्देनावशिष्टान्यश्वचरितानि संगृह्यन्ते ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके एकोनविंशोऽनुवाकः ॥

४८. मै२ - 'गतमन्यत्' नास्ति । ४९. मै२ - यान्ति । ५०. मै२ - पानम् । ५१. मै१ - द्रष्टव्यः । ५२. मै१ - रेतते सेचन° । ५३. मै१ - हासकरोद° । ५४-५४. मै१ - सप्तमप्रथमे एकोनविंशः ।

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृतस्य पन्था असि देवानां छायाऽमृतस्य नाम तत् सत्यं यत् त्वं

अग्नये । स्वाहा । वायवे । स्वाहा । सूर्याय । स्वाहा । ऋतम् । असि । ऋतस्य । ऋतम् । असि । सत्यम् । असि । सत्यस्य । सत्यम् । असि । ऋतस्य । पन्थाः । असि । देवानाम् । छाया । अमृतस्य । नाम । तत् । सत्यम् । यत् । त्वम् ।

अथाश्वस्य सावित्राणि [१]सप्त जुहोति - 'अग्नये '[२]इत्यादि ।। [V]अग्नये [V]वायवे [V]सूर्याय [३]इत्यादि त्रीणि, उत्तराणि चत्वारि 'अधि यदस्मिन्' इत्यादि चतुष्पदा विराट् । 'शुभः, विशः, कव्यन्, परिज्मा' इति पादानामन्ताः । [४-] 'अग्नये' इत्यादि । गतम् [-४] ।।

[V]ऋतं यज्ञः त्वमेव [V]असि, प्राधान्यात् स्तुतिः । [५-] 'ऋतस्य ऋतमसि' इति [-५] । [V]ऋतस्य अपि यज्ञस्यापि त्वं यज्ञः [V]असि, तथा हि यज्ञः इष्टसाधनं भवतीति । किं च - [V]सत्यम् अवितथं सति साधु सत्यं तदपि [६]त्वमेवासि [V]सत्यस्य अपि प्रकृष्टतरं [V]सत्यं त्वम् [V]असि । किं च [V]ऋतस्य यज्ञस्य [V]पन्थाः प्राप्तिमार्गस्त्वम् [V]असि त्वया [७]हीष्टे यागफलं प्राप्यते इति । अपि

अग्नय इति ।। कल्पः - " अग्नये स्वाहा वायवे स्वाहेत्येतं हुत्वा " (आपश्रौ २०.११.७) इति ।। एतस्मिन्ननुवाके त्रीन् मन्त्रानाह - 'अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहा' इति ।।

ऋतमसीति ।। अथ चतुर्थपञ्चममन्त्रावाह - 'ऋतमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमसि' इति ।। हेऽश्व, त्वं [V]ऋतं सत्यं [१]तदसि । यागरहितानां पुरुषाणां यदृतं तस्याप्युत्तमं त्वम् [V][२]ऋतं सत्यमसि । तव यागसाधनत्वात् । एवं [३]सत्यवाक्यमपि [४]वाचिकविषयत्वेन व्याख्येयम् ।।

ऋतस्येति ।। अथ षष्ठमन्त्रमाह - 'ऋतस्य पन्था असि देवानां छायाऽमृतस्य नाम तत् सत्यं यत् त्वं प्रजापतिरसि' इति ।। [V]ऋतस्य यज्ञस्य [V]पन्थाः मार्गोऽसि । त्वदद्वारेण हि यागो [५]निर्वर्त्यते । तथा [V]देवानां [V]छाया असि । यथा [६]च [७]धर्मकाले [८-] वृक्षस्य छाया [-८] सुखप्रदा तथा त्वं सुखप्रदोऽसि । अत एव

१. मै१ - 'सप्त' नास्ति । २. मै१ - इति । ३. अ१ - इति । ४-४. मै२ - 'अग्नये - - - - गतम्' नास्ति । ५-५. मै२ - 'ऋतस्य - - - - इति' नास्ति । ६. अ१. मै१ - त्वमेव । ७. मै२ - इष्टे ।

१. अ. पा. इ. वा. म - यदस्ति । २. शृ१. अ. पा. इ. वा. मै. वै - 'ऋतम्' नास्ति । ३. अ. पा. इ. वा. म. वै - सत्ये वाच्यमपि । ४. अ. पा. इ. आ. वा. म. वै - वाचक° । ५. मै - निवर्त्यते । ६. अ. आ. पा. इ. वा. वै. म. मै - 'च' नास्ति । ७. आ - धर्मकाले । ८-८. शृ१. मै - वृक्षच्छाया ।

प्रजापतिरस्यधि यदस्मिन् वाजिनीव शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन् पशुं न गोपा इर्यः परिज्मा ॥२०॥

(अग्नये वायवे सूर्यायाष्टाचत्वारिꣳशत् ।)

प्रजापतिरिति प्रजा-पतिः । असि । अधीति । यत् । अस्मिन् । वाजिनि । इव । शुभः । स्पर्धन्ते । दिवः । सूर्येण । विशः । अपः । वृणानः । पवते । कव्यन् । पशुम् । न । गोपा इति गो-पाः । इर्यः । परिज्मेति परि-ज्मा ॥२०॥

[कासं अश्वमेध, १.११; कपिसं - - - - ; मैसं - - - - वासं - - - -]

च त्वं [V]देवानां [८][V]छाया इवासि अनन्यभूतत्वात् । यद्वा - छाया गृहं, गृहमेव त्वं देवानामसि । ब्राह्मणं च भवति - " अश्वे वै सर्वा देवता अन्वायत्ताः " (तैब्रा ३.८.७) [९]इति । किं च - [V]अमृतस्य [V]नाम [१०]अमरणत्वस्य नमनं त्वमसि । यद्वा - अमृतस्य पर्यायान्तरं त्वमस्यश्व इति । यस्मादेवं त्वमसि तस्मात् [V]तत् [११][V]सत्यं [V]यत् [V]त्वम् । [V]प्रजापतिः [V]असि त्वमेव प्रजापतिः प्रजापतितुल्यो वा त्वमसीति [१२]त्वा मन्यामहे । तत्र [१३-] न काचित् स्तुतिरिति [-१३] ॥

[१४-] किं च [-१४] - [V]यत् [१५-] यस्मादीदृशे [V]अस्मिन् [-१५] महाभागे [V]वाजिनि अश्वे अधिकम् [V]इव वर्तन्ते । के ? [१६][V]शुभः [१७]योग्यतागुणाः [१८]अग्न्यादिदेवताभ्योऽप्यधिकमस्मिन् अश्वे गुणाः

त्वम् [९-] [V]अमृतस्य [V]नाम [-९] असि । देवा हि त्वदीयं हविः पीयूषमित्येव स्वीकुर्वन्ति । [V]त्वं प्रजापतिरूपः [V]असि इति यत् [१०]तत् सत्यं नात्र कश्चिदुपचारोऽस्ति । [११-] प्रजापतेरक्ष्येव हि [-११] त्वदाकारेण निष्पन्नम् ॥

अधीति ॥ अथ सप्तमं [१२]मन्त्रम् आह ' अधि यदस्मिन् वाजिनीव शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यं पशुं न गोपा इर्यः परिज्मा इति ॥

८. मै१ - जाया । ९. अ१ - ' इति ' नास्ति । १०. अ१ - अमरणत्वस्य नाम । ११. [मै - मुद्रितपुस्तकेऽत्र ' सत्यम् ' इत्यस्यानन्तरं ' कविम् ' इत्यधिकोंऽशः धनुश्चिह्नाङ्कितेन संसूचितोऽस्ति । परमस्यात्रानावश्यकत्वादयमधिकोंऽशोऽस्माभिः परित्यक्तः ।] १२. मै१ - त्वम् । १३-१३. मै१ - नरकात् स्तुतिरिति ॥ १४-१४. मै१ - किम् , अ१ - ' किं च ' नास्ति । १५-१५. मै१. अ१ - यस्मादस्मिन्नीदृशे । १६. मै१. अ१ - शुभा । १७. [मै - तलटिप्पण्यां ' शोभना गुणाः ' इति पाठो दर्शितः ।] १८. मै१ - °ताभ्योऽधिकसस्मिन् ।

९-९. शृ - अमृतनाम । १०. अ. पा. वा - ' तत् ' नास्ति । ११-११. मै - प्रजापतेरक्ष्ये बहि । १२. अ. पा. इ. वा. वै - ' मन्त्रम् ' नास्ति ।

प्रजननं प्रातःसवने वै ब्रह्मवादिनः स त्वाऽऽङ्गिरस आपो वै सोमो वै सहस्रतम्याऽत्रिर्जमदग्निः संवत्सरो देवस्य विभूरायनायाग्नये पृथिव्या अग्नये पृथिव्यै भुवं ईंकारायाग्नये वायवे सूर्याय विंशतिः ॥२०॥

प्रजननमङ्गिरसः सोमो वै प्रतिगृह्णाति विभूर्वीक्षमाणाय द्विपंञ्चाशत् ॥५२॥

~~~~~~~~~~~~~~~~~~~~~~~~

सन्ति, तस्मादसहमानाः अनेनाश्वेन [V]स्पर्धन्ते । [V]दिवः दिवौकसः [V]सूर्येण [१९]सवित्रा [V]विशः देवविशो मरुदादयश्च । यदा - अनेनाश्वेन सूर्येण *सावकेन(?) [२०]सर्वलोकोत्पत्तिहेतुना सह स्पर्धन्ते देवा [२१]इति । किंच - अयमश्वः [V]अपः [V]वृणानः उदकमुत्पादयितुमिच्छन् कर्माणि वा प्रजानां यथायथं प्रवर्तयितुमिच्छन् [V]पवते पुनाति सर्वम् । पवमानरूपेण वा वृष्टिमुत्पादयितुम् [२२]इच्छन् सर्वत्र गच्छति । [२३-] गमनकर्मात्र पवतिः [-२३] । [V]कव्यन् स्तुतिमात्मन इच्छन् । [२४-] " कु शब्दे " (धापा १०६७) " ऋदोरप् " (पा ३.३.५७) [२५-] कवं स्तुतिमात्मन [-२५] इच्छतीति [-२४] [२६]क्यच् , छान्दसोऽन्त्यलोपः, [२७-] " न च्छन्दसि° " (पा ७.४.३५) इत्यवर्णस्य क्यचीत्वाभावः[-२७], सर्वैः स्तूयमान इति यावत् । यद्वा - कव्यन् शब्दं महान्तं कुर्वन् । " कु शब्दे " (धापा १०६७), छान्दसो [२८-] यकारो विकरणस्य [-२८], " धातोस्तन्निमित्तस्यैव "

~~~~~~~~~~~~~~~~~~~~~~~~

यद्यस्मात् कारणात् [V]वाजिनि [१३-] अस्मिन्नश्वे [V]शुभः[-१३] शोभनो गुणसंधः [१४-] [V]अधि [V]इव [-१४] [१५-] देवेभ्योऽप्यधिक इव [-१५] दृश्यते तस्मात् कारणात् [V]दिवः संबन्धिना [V]विशः मरुद्गणाः [V]सूर्येण सूर्यसमानेनाश्वेन सार्धं [V]स्पर्धन्ते वयं गुणाधिका अश्वो [१६]न गुणाधिक इत्येवं स्पर्धां कुर्वन्ति । तादृशोऽयमश्वः [१७-] किंचायम् [V]अपः [-१७] [V]वृणानः इदं कर्म प्रवर्तयितुमिच्छन् [V]पवते विश्वं पुनाति । तत्र दृष्टान्तः - कव्यं पशुं [१८]न । यथा यागेषु स्तुतिमिच्छन् देवः [V]पशुं वृणीते तथाऽयमश्वः कर्मेदं वृणीते । देवो हि नानाविधाभिः

~~~~~~~~~~~~~~~~~~~~~~~~

१९. मै१ - सहिता । *[अत्र ' पावकेन ' इति पाठः संभाव्यते । आन्ध्रकर्णाटादि लिपिसाधर्म्यात् पश्चाद्देवनागर्या लिप्यन्तरवशादित्थं भ्रष्टोऽभूदिति भाति ।] । २०. मै१. अ१ - °त्पत्तिहेतुत्वेन । २१. अ१ ' इति ' नास्ति । २२. मै२ - ' इच्छन् ' नास्ति । २३-२३. मै२ - ' गमनः° - - - पवतिः' नास्ति । २४-२४. मै२ - ' कुशब्दे - - - - इच्छति ' इति नास्ति । २५-२५. अ१ - कवः स्तुतिः तमात्मनः । २६. मै१ - क्यप् । २७-२७. मै२ - ' न छन्दसि - - - °चीत्वाभावः ' नास्ति । २८-२८. मै१ - यकारो विकरणः, अ१ - यकारप्रत्ययः ।

~~~~~~~~~~~~~~~~~~~~~~~~

१३-१३. शृ१ - अस्मिन् मखे इह । १४-१४. अ. पा. इ. वा. वै - अधीन, म - अधीव । १५. म - °प्यधिकैव । १६. इ. वा. वै. म. मै - ' न ' नास्ति । १७-१७. म - किञ्चायमश्वमपः । १८. इ. वै - ' न ' नास्ति ।

(पा ६.१.८०) [२९-] इति वान्तादेशः [-२९] । Vपशुं Vन पशुमिव वृणानः Vगोपाः । [३०-] गाः पातीति [-३०] [३१]पातेर्विच् । Vइर्यः इरा अन्नम् , तत्संयोगनिमित्तभूतः [३२-] इति स्मत् । [तस्मात्] ? इरायां वा वायुः परिशुद्धः सर्वतो हन्ता सर्वलोकेस्येति हेतुत्वमगमत् तद्द्वारेण सर्वगतत्वात् अस्य वाजिनः । Vपरिज्मा इति निपात्यते । तस्मादीदृशोऽयमश्वोऽस्मदभिमतं साधयतीति । वायुरेवोच्यते [-३२] [३३]यः सर्वेण ईदृशो, यः Vपरिज्मा वायुः पवते, त्वया [३४]अश्वोऽपि स्पर्धते इति ॥

॥ इति श्रीभट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः ॥

॥ प्रपाठकश्च समाप्तः ॥

स्तुतिभिः [१९-] स्तूयमानः पशुरूपं [-१९] [२०]हविरतिप्रीतिपूर्वकमिच्छति । एवमश्वोऽप्यनेकैर्होमैः स्तावकैर्मन्त्रैश्च परितुष्टः कर्मेदं समापयितुमिच्छतीत्यर्थः । कीदृशोऽश्वः Vगोपाः ऋत्विग्यजमानानां रक्षकः । Vइर्यः कर्मद्वाराऽन्नहेतुः । Vपरिज्मा परितः स्वर्गलोकादौ गन्तुं समर्थः । एतैः सप्तभिर्मन्त्रैर्होमो बोधायनेनापि दर्शितः ' सावित्राणि जुहोत्यग्नये स्वाहा वायवे स्वाहेति सप्त ' इति ॥

अत्र विनियोगसंग्रहः -

उच्यन्ते ह्यनुवाकार्थाः सप्तमाद्यप्रपाठके ।
अग्निष्टोमविधिस्ताद्ये द्वितीये स्तोमसंस्तवः ॥
सर्वस्तोमस्तृतीये स्याच्चतुर्थे तु द्विरात्रकः ।
त्रिरात्रः पञ्चमे षष्ठे स्युः [२१]सहस्रतमीगताः ॥
होमाद्याः सप्तमे दानं [२२]चतूरात्रोऽग्रिमोऽष्टमे ।
द्वितीयो नवमे पञ्चरात्रो दशम ईरितः ॥

२९-२९. मै. मै२. मै३. अ - इत्यवादेशः । ३०-३०. अ१ - गां पातीति गोपाः । ३१. अ१ - पातेर्विच् वक्तव्यः । ३२-३२. अ१. मै१ - ' इति स्मत् - - - - °रेवोच्यते ' नास्ति । ३३. मै. मै२. मै३. अ. अ१ - ' यः ' नास्ति । ३४. मै. मै१. मै३ .अ. अ१ - सोऽपि ।

१९-१९. मै - स्तूयमानपशुरूपम् । २०. इ. वै - °प्रीतिपूर्वमिच्छति । २१. शृ१ - सहस्रतमीगताः, म - सहस्रतमागमाः । २२. मै - चतूरात्रे°, शृ१ - °अग्रिमे समे, अ. पा. वै - °अग्रिमाष्टमे, म - °अग्रिमेऽष्टमे ।

अत ऊर्ध्वं [23-] त्वश्वमेधमन्त्राणां विनियोजनम् [-23] ।
उच्यते रशनां देव गृहीत्वा [24]मन्त्रयेदिमाम् ॥
अभिधेत्यश्वमाबध्य [25-] (श्वं बध्नीयात्) [-25] त्रयो मन्त्रा इहेरिताः ।
विभुः कर्णे वाचयीत अग्नये [26-] पूर्वहोमकान् ॥
पञ्चेह [27]पत्सु [28]जुहुयाच्चतुर्भिः[29]भूरसीयतः ।
अश्वमुत्सृजते [30]देवाः [31]पत्निभ्योऽश्वं प्रयच्छति ।
अनुवाके द्वादशेऽस्मिन् मन्त्रा द्वादश वर्णिताः ।
[32-] आयनोद्द्रावहोमाः स्युः [-32] [33]तत्तन्मन्त्रास्त्रयोदश ।
अग्नये पूर्वहोमाः स्युर्मन्त्रा एकादश स्मृताः ॥
[34-] पृथिव्या इति [-34] ते होमा मन्त्रा अत्रैकविंशतिः ॥
अग्नये पूर्वदीक्षार्था होमा एकादश स्मृताः ।
[35]पृथीत्यपि तथा होमा द्वाविंशतिरुदीरिताः ॥
भुव [36]इत्यृतुदीक्षाख्यमन्त्रैश्चर्माधिरोहणे ।
मन्त्रयेदष्टभिः [37]पत्सु [38]जुहुयादिह पूर्ववत् ॥
[39]अष्टादशानुवाकेऽस्मिन् मन्त्रा द्वादश वर्णिताः ॥

~~~~~~~~~~~~~~~~~~~~

२३-२३. शृ१ - °मन्त्रास्वद्विनियोजनम्, मै - मन्त्रास्तद्विनियोजनम् । २४. मै - °दिनम् । २५-२५. [आ - मुद्रितावृत्तौ संसूचितः पाठः ।] । २६. शृ१. मै - पूर्वमन्त्रकाः, म - पूर्वहोमकाः । २७. म - पत्सु, मै - पशु । २८. शृ१ - क्षुभयात्°, मै - क्षुहुयात्° । २९. म - भूरभित्यतः । ३०. मै - देवः । ३१. अ. आ. पा. इ. वा. वै. म. मै रत्निभ्यः । ३२-३२. आ. वै - °होमस्तु, म - होमाश्च । ३३. अ. आ. पा. इ. वा. वै मै - तत्र मन्त्रा°, म - स्तवमन्त्रा° । ३४-३४. शृ१. मै - पृथीत्यपि च । ३५. अ. आ. पा. इ. वा. वै - पृथ्वीत्यपि, म - पृथिव्यपि । ३६. शृ१ - °दीक्षाश्चम°, मै - °दीक्षाख्याम° । ३७. शृ१ - पुच्छात् । ३८. शृ१ - जुहुयादिति । ३९. मै - °दशोऽनुवाके° ।
~~~~~~~~~~~~~~~~~~~~

[४०]ईमश्वचरितैर्होमाश्चतुरशीतिरीरिताः ।
अग्नये सप्तभिमन्त्रैर्होमः सावित्र ईरितः ॥

[४१-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः [-४१] ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

॥ इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकः ॥

४०. अ. पा. वै - °होममन्त्राश्चतुर ईरिताः, म - °होमा मन्त्राश्चतुरशीति ताः, मै - °होमे मन्त्राश्चतुरशीतिकाः, शृ१ - ईमश्वं चरितैर्होमे मन्त्राश्चतुरशीतिकाः । ४१-४१. वै - इति सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः । समाप्तः प्रपाठकः, मै - इति माधवीये वेदार्थप्रकाशे सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः ।

(द्वितीयः प्रपाठकः)

साध्या वै देवाः सुवर्गकामा एत९ं षड्रात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गं लोकमायन् य एवं विद्वा९ंसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति

साध्याः । वै । देवाः । सुवर्गकामा इति सुवर्ग-कामाः । एतम् । षड्रात्रमिति षट्-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । ये । एवम् । विद्वा९ंसः । षड्रात्रमिति षट्-रात्रम् । आसते । सुवर्गमिति सुवः-गम् । एव । लोकम् । यन्ति ।

[1-] अथ चत्वारः षडहाः सन्ति - साध्यानां [-1] [2]प्रथमः, द्वितीय उपरिष्टात्, [3]त्रिककुत् तृतीयः [4]अभ्यासश्चतुर्थः । तत्र प्रथमं विदधाति - 'साध्या वै' इत्यादि । गतम् । [V]साध्याः देवविशेषाः । तत्र कर्तरि यत्, उदात्तनिवृत्तिस्वरेण तत उदात्तत्वम् । 'आसते' इत्यादि । चोदितत्वात् सत्रं षड्रात्रः, अत एव बहुवचनं [V]देवाः इति ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अहीनाः पञ्चरात्रान्ताः प्रथमे समुदीरिताः ।
षड्रारात्राद्याः द्वितीयेऽथ वक्ष्यन्तेऽस्मिन् प्रपाठके ॥

साध्या इति ॥ तत्र प्रथमेऽनुवाके षड्रात्रं विधत्ते - 'साध्या वै देवाः सुवर्गकामा एत९ं षड्रात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै ते सुवर्गं लोकमायन् य एवं विद्वा९ंसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति' इति ॥ [1]साध्यशब्दो देवगणविशेषवाची । अत्र सर्वत्र दर्शनं शास्त्रीयनिश्चयः । आहरणं सामग्रीसंपादनम् । यजनमनुष्ठानम् । यद्यप्ययं [2]षड्रात्रोऽहीनत्वाद्यजतिचोदनाविधेयस्तथाऽप्यत्र केषाञ्चित् [3]सारस्वतसत्रधर्माणां सद्भावमभिप्रेत्य [V]विद्वांसः आसते इत्यासिचोदनया विहितः । [4-] ते च धर्माः [-4] 'आश्वत्थी हविर्धानं च' इत्यादिना वक्ष्यन्ते ॥

१-१. अ१ - 'अथ ---- साध्यानाम्' नास्ति, मै१ - 'अथ' नास्ति । २. अ१ - प्रथमो मन्त्राणाम्, मै१ - प्रथमं ऋतूनाम्, मै२ - प्रथमऋतूनाम् इति । ३. अ१. मै१ - त्रिकद्रुकः । ४. अ१ - अभ्यासयावान् चतुर्थः, मै१ - अभ्यास्योवाचकरोर्थः चतुर्थः ।

१. शृ१ - साध्याशब्दः । २. शृ१ - °चोदनाविशेषो देयः, इ. वा. वै. म - °चोदनया विधेयः, मै - °चोदनायाः विधेयः । ३. शृ१ - °स्वतधर्माणम्, अ. वा - °स्वतस्तत्र धर्माणः, मै - °स्वतस्तत्रधर्माणम् । ४-४. मै - चेतनधर्माः ।

देवस॒त्रं वै ष॑ड्रा॒त्रः प्र॒त्यक्ष॑ꣳ ह्ये॒तानि॑ पृ॒ष्ठानि॒ य ए॒वं वि॒द्वाꣳस॑ः षड्रा॒त्रमास॑ते सा॒क्षादे॒व दे॒वता॑ अ॒भ्यारो॑हन्ति

दे॒व॒स॒त्रमिति॑ देव-स॒त्रम् । वै । ष॒ड्रा॒त्र इति॑ षट्-रा॒त्रः । प्र॒त्यक्ष॒मिति॑ प्रति-अक्ष॑म् । हि । ए॒तानि॑ । पृ॒ष्ठानि॑ । ये । ए॒वम् । वि॒द्वाꣳस॑ः । ष॒ड्रा॒त्रमिति॑ षट्-रा॒त्रम् । आस॑ते । सा॒क्षादिति॑ स-अ॒क्षात् । ए॒व । दे॒वता॑ः । अ॒भ्यारो॑ह॒न्तीत्य॑भि-आरो॑हन्ति ।

'देवसत्रम्' इत्यादि ॥ देवैर्दृष्टत्वात् । यद्वा - देवा एव सत्रात्मना तिष्ठन्तीति Vदेवसत्रं, देवाः Vप्रत्यक्षम् एव Vहि अव्यवधानेन वर्तन्ते यानि Vएतानि Vपृष्ठानि रथन्तरादीनि तान्येव हि देवाः, देवतुल्यत्वात्, अतो देवसत्रम् । "कूलतीर°" (पा ६.२.१०२) इत्यादिना प्रत्यक्षशब्दः [५]उत्तरपदाद्युदात्तः, तस्मात् Vसाक्षात् अव्यवधानेन देवतास्थानम् Vअभ्यारोहन्ति । देवताशब्देन साहचर्यात् तदीयं स्थानमुच्यते । Vदेवताः एव वा प्रविशन्ति । सत्रत्वात् सर्वत्र बहुवचनम् । 'पृष्ठानि' इति वचनात् पृष्ठ्यः षडहो भवति इति गम्यते । तच्चेदानीमेव दर्शयिष्यति - 'त्रिवृदग्निष्टोमः' इत्यादिना । षट्त्वान्वयात् षड्भिः Vपृष्ठैः Vऋतून् अनुक्रमेणारोहन्ति । उक्तौ स्वरसमासौ । Vऋतुभिः च Vसंवत्सरम् आदित्यात्मानम् । अथ [६]Vते [७]तत्रैव प्रतिष्ठिता भवन्ति । अथ 'बृहद्रथन्तराभ्याम्' इति । द्वितीयत्वे [८]अपि अल्पाच्तरत्वाद्बृहतः पूर्वनिपातः । अत्रायं षडहोऽतिरात्रोऽहीनः तत्रान्त्येऽहनि Vबृहद्रथन्तराभ्यां Vयन्ति गच्छन्ति यागं

देवसत्रमिति ॥ एतमेव सत्रत्वोपचारमभिप्रेत्य प्रशंसति - 'देवसत्रं वै षड्रात्रः प्रत्यक्षꣳ ह्येतानि पृष्ठानि य एवं विद्वाꣳसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति' इति ॥ देवानां सत्रवत् प्रियत्वादिदं [५]Vदेवसत्रम् । [६] तदेव सत्रवत् [६] प्रियत्वं [७]स्पष्टीक्रियते - सत्ररूपे [८] द्वादशाहे यः पृष्ठ्यः षडहस्तस्मिन् षट्सु [८] दिनेषु यानि पृष्ठस्तोत्राणि [९] रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यैः सामभिर्निष्पाद्यानि [९] Vएतानि अत्रापि षट्सु दिनेषु क्रमेण [१०]प्रत्यक्षमुपलभ्यन्ते । यस्मादेवं तस्मात् देवानां सत्रवत् प्रियत्वमुचितम् । एवं [११]देवप्रियत्वं विदित्वाऽनुष्ठानेन बहुकालव्यवधानमन्तरेणैव Vदेवताः प्राप्नोति ॥

५. मै२ - °द्युदात्तत्वम् । ६. अ१. मै१ - 'ते' नास्ति । ७. मै२ - तत्रान्यः । ८. मै२ - 'अपि' नास्ति ।

५. शृ१ - सत्रम् । ६-६. वा - देवसत्रवत् । ७. शृ१ - स्वीक्रियते । ८-८. शृ१ - द्वादशाहरूपः सोऽयं पृष्ठ्यः षडहः तस्मिन् मुखेऽपि । ९- ९. म - °शाक्वररैवतनिष्पाद्यति । १०. अ - उपलभ्यन्ते, पा. इ. वा. वै - विशिष्टमुपलभ्यन्ते, म. मै - विस्पष्टमुपलभ्यते । ११. म - देवसत्रवत् प्रियत्वम् ।

षड्रात्रो भवति षड्वा ऋतवः षट्पृष्ठानि (१) पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै

षड्रात्र इति षट्-रात्रः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि (१) । पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिरित्यृतु-भिः । संवत्सरमिति सं-वत्सरम् । ते । संवत्सर इति सं-वत्सरे । एव । प्रतीति । तिष्ठन्ति । बृहद्रथंतराभ्यामिति बृहत्-रथंतराभ्याम् । यन्ति । इयम् । वाव । रथंतरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै ।

निर्वर्तयन्ति । पूर्वेषु त्वहःसु 'प्रत्यक्षं ह्येतानि' इति वचनात् [९]वैरूपादीन्यपि [१०]यथायथं वर्तन्ते [११]इति । 'इयम्' इत्यादि । गतम् । अपि चानयोर्द्यावापृथिव्योः प्रतिष्ठिता भवन्ति । यावदिमे तावत् स्थास्यन्ति । "त्यदादीनां यद्यत्परम्" (द्र. वा-पा १.२.७२) इतीदमः शेषः । एते बृहद्रथन्तरे ^यज्ञस्य अञ्जसा आर्जवेन अपरिहारेण गमनसाधने ^स्रुती मार्गौ 'अञ्जस उपसंख्यानम्' इत्यलुक् ॥

षड्रात्र इति ॥ अत्राहर्गतां षट्संख्यां प्रशंसति - 'षड्रात्रो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति' इति ॥ ^ऋतवः यथा षट्संख्याका एवं पृष्ठान्यपि षट्संख्याकानि । अतः ^पृष्ठैः ऋतुद्वारा ^संवत्सरं प्राप्य तत्र प्रतितिष्ठन्ति ॥

बृहदिति ॥ एतेषु [१२]षट्सु पृष्ठस्तोत्रेषु प्रथमद्वितीययोरह्नोरनुष्ठेये रथन्तरबृहत्पृष्ठे ये स्तोत्रे ते विशेषेण प्रशंसति - 'बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति' इति ॥ [१३]★ शब्दशास्त्रप्रोक्त एवात्र बृहच्छब्दस्य

---

९. मै२ - °दीत्यपि च । १०. मै२ - यथायथा । ११. मै. मै१. मै३. अ. अ१ - 'इति' नास्ति ।

---

१२. शृ१ - षट्सु अपि । १३. मै - शब्दशास्त्रप्रयुक्तः, शृ१ - शब्दशास्त्रतः प्रयुक्तः । ★-★. ["अल्पाच्तरम्" (पा २.२.३४) इति सूत्रात् पूर्वनिपातः ।] ।

यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशो (२) भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते

यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । त्रिवृदिति त्रि-वृत् । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । तेजः । एव । अवेति । रुन्धते । पञ्चदश इति पञ्च-दशः । भवति । इन्द्रियम् । एव । अवेति । रुन्धते । सप्तदश इति सप्त-दशः (२) । भवति । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायन्ते । एकविꣳश इत्येक-विꣳशः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् । दधते ।

' त्रिवृदग्निष्टोमः ' इति ॥ पृष्ठ्यषडहं दर्शयति - ' त्रिवृदग्निष्टोमो रथन्तरसामा प्रथममहः । Vपञ्चदशः उक्थ्यो बृहत्सामा द्वितीयमहः । सप्तदशः उक्थ्यो वैरूपसामा तृतीयम् [12]अहः । [13]Vएकविंशः षोडशी वैराजसामा [14]चतुर्थम् । Vत्रिणवः उक्थ्यः शाक्वरसामा

[14]पूर्वनिपातः * । अनुष्ठानं [15]तु [16]रथन्तरस्यैव प्रथमम् । Vयन्ति स्तोत्रमनुतिष्ठेयुरित्यर्थः । Vअनयोः साम्नोर्लोकद्वयरूपत्वात् [17] लोकाभ्यामेव तदनुष्ठितं भवति । अपि चानुष्ठातारो लोकयोर्द्वयोः प्रतितिष्ठन्त्येव । किंचैते सामनी यज्ञस्यार्जवेन समाप्तिप्रापकौ मार्गौ अतस्ताभ्यामेव [17] स्वर्गं प्राप्नुवन्ति ॥

त्रिवृदिति ॥ अथ षट्संख्याकान्यहानि चोदकप्राप्तानि विस्पष्टं दर्शयति - ' त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन् दधते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै ' इति ॥ त्रिवृदादयः शब्दाः पूर्वोक्तपञ्चरात्रानुवाक इवात्र [18]अपि व्याख्येयाः । तत्र सत्रधर्मातिदेशाभावेन

१२. अ१. मै१ - ' अहः ' नास्ति । १३. मै२ - एकविंशति । १४. मै२ - चतुर्थः ।

१४. शृ१. म. मै - प्रथमपाठः, अ. पा. इ. वा. वै - पूर्वपातः । १५. शृ१ - ' तु ' नास्ति । १६. वा - बृहद्रथन्तर° । १७-१७. वा - ' लोकाभ्यामेव - - - - ताभ्यामेव ' नास्ति । १८. म. मै - ' अपि ' नास्ति ।

त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै सदोहविर्धानिन एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यं

त्रिणव इति त्रि-नवः । भवति । विजित्या इति वि-जित्यै । त्रयस्त्रिꣳश इति त्रयः-त्रिꣳशः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । सदोहविर्धानिन इति सदः-हविर्धानिनः । एतेन । षड्रात्रेणेति षट्-रात्रेण । यजेरन् । आश्वत्थी इति । हविर्धानमिति हविः-धानम् । च । आग्नीध्रमित्याग्नि-इध्रम् । च । भवतः । तत् । हि । सुवर्ग्यमिति सुवः-ग्यम् ।

---

[15]पञ्चमम् । Vत्रयस्त्रिंशः उक्थ्यो रैवतसामा षष्ठम् । इत्येषः पृष्ठ्यः षडहः । वैकृतस्तु विशेषो यथावद्योग्य इति । त्रिवृदादयः शब्दाः व्याख्याताः (तैसं ७.१.१०) ॥

सदोहविर्धानिन [16-] इत्युत्तरार्धेन अर्थानुवादः [-16] विशेषं दर्शयितुम् [17]आह - ' आश्वत्थी ' इति ॥ [18-] अश्वत्थमय्यौ । विकृत्यभिप्रायमिदं [-18] स्त्रीत्वम् । हविर्धानाग्नीध्रे अश्वत्थविकृती । " वा छन्दसि " (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम् , " सुपां सुलुक्°" (पा ७.१.३९) इति [19]लुक् , Vतत् हि Vसुवर्ग्यं [20-] सुवर्गस्य लोकस्य निमित्तम् [-20] । " गोढ्यचः°"

बहुयजमानकत्वनियमाभावादेकवचनेन निर्देशः । [19-] इह तु तन्नियमसद्भावाद्बहुवचनेन निर्देशः [-19] । प्रकृतिरूपे पृष्ठ्यषडहे V[20]त्रिवृत् Vअग्निष्टोमः रथन्तरसामा Vप्रथमम् Vअहः । Vपञ्चदशः Vउक्थ्यः बृहत्सामा ★द्वितीयम् । Vसप्तदशः उक्थ्यो वैरूपसामा ★तृतीयम् । Vएकविंशः षोडशी वैराजसामा ★चतुर्थम् । Vत्रिणवः उक्थ्यः शाक्वरसामा ★पञ्चमम् । त्रयस्त्रिंशः उक्थ्यो रैवतसामा ★षष्ठम् । तदिदं द्वादशाहान्तर्गतस्य पृष्ठ्यषडहस्य स्वरूपम् । [21]तद्विकृतित्वादत्रापि तथाविधान्येवाहानि द्रष्टव्यानि ॥

सदोहविर्धानिन इति ॥ अथ सारस्वतसत्रधर्माननुवाकसमाप्तिपर्यन्तमतिदिदिक्षुस्तावदेकं [22]धर्मं विधत्ते - ' सदोहविर्धानिन एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यम् '

---

१५. अ१ - पञ्चकम् , मै२ - पञ्चमः । १६. मै. मै१. मै३. अ. अ१ - इत्युत्तरोर्थोऽनुवादः । १७. मै. मै१. मै३. अ. अ१ - ' आह ' नास्ति । १८-१८. मै२ - अश्वत्थस्य प्रकृत्यभि° । १९. मै३ - चालुक् । २०-२०. अ१ - सुवर्गनिमित्तम् , मै१ - स्वर्गनिमित्तम् , मै२ - सुवर्गस्य निमित्तम् ।

१९-१९. पा - ' इह - - - निर्देशः ' नास्ति । २०. मै - त्रिवृदग्निः । ★ अत्र सर्वत्र ' प्रथममहः ' इति भाष्यकृद्भिरुक्तत्वात् तदनुरोधं पाठो गृहीतः । परं पुस्तकान्तरेषु दृश्यमानपुल्लिङ्गपाठः उक्थ्यादिभिः संबद्धो दृश्यते । २१. शृ१ - विकृतित्वात् । २२. म - ' धर्मम् ' नास्ति ।

चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या
उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै

चक्रीवती इति । भवतः । सुवर्गस्येति सुवः-गस्य । लोकस्य । समष्ट्या इति सम्-अष्ट्यै । उलूखलबुध्न इत्युलूखल-बुध्नः । यूपः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । प्राश्नः ।

(पा ५.१.३९) इति यत् । [२१]Vचक्रीवती चक्रयुक्ते शकटे Vभवतः । अन्य आहुः - एवं सति [२२]सदसो [२३]विशेषवचने [२४]तद्ग्रहणानर्थक्यात् हविर्धानस्य प्रयोजनाभावात् [२५-] सद आग्नीध्रे [-२५] शकटवती Vभवतः इति । " आसन्दीवत्°" (पा ८.२.१२) इत्यादौ निपात्यते " नपुंसकाच्च " (पा ७.१.१९) इति शीभावः । Vसमष्ट्यै सम्यक्प्राप्तये । " तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । ' उलूखलबुध्नः ' इति । उलूखलाकारमूलः इति । ' प्राश्वः ' इति । प्राङ्मुखा गच्छन्ति सत्रं समापयन्ति [२६]प्रकर्षेणाश्नन्निव स्वर्गो भवति [-२६] ।

इति ॥ ये यजमानाः सदोहविर्धानाभ्यां मण्डपाभ्यां युक्ताः षड्रात्रे प्रवर्तन्ते तेषां Vहविर्धानम् Vआग्नीध्रं Vच इति मण्डपद्वयम् Vआश्वत्थी Vभवतः अश्वत्थकाष्ठनिर्मिते उभे कार्ये । [२३]तच्चाश्वत्थकाष्ठं स्वर्गसाधनम् ॥

चक्रीवतीति ॥ धर्मान्तरं विधत्ते - ' चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्यै ' इति ॥ यथा रथस्य शकटस्य वा चक्रं तथा चक्रं ययोराग्नीध्रहविर्धानमण्डपयोस्ते Vचक्रीवती । अयमर्थः - [२४]चक्रयोरक्षं प्रक्षिप्य शकटाकारं कृत्वा तस्योपरि फलकान्यास्तीर्य तेषामुपरि भूमाविव मण्डपं निर्मातव्यमिति । ईदृशं च स्वर्गप्राप्त्यै भवति रथेनेव चक्रयुक्तेन मण्डपेन गन्तुं शक्यत्वात् ।

उलूखलबुध्न इति ॥ धर्मान्तरं विधत्ते – ' उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै ' इति ॥ यथा [२५]काष्ठमयस्योलूखलस्य मूलमतिस्थूलं समतलं भवति तथा यूपमूलं कर्तव्यम् । एतच्च यत्र यत्र [२६-] यूपो [२७]नीयते तत्र तत्र [-२६] भूमौ खननमन्तरेणैव प्रतिष्ठापनार्थम् ॥

२१. अ१. मै१ - चक्रवतीति । २२. अ१ - सदः । २३. अ१. मै१ - विशेषवचनम् । २४. मै१ - तन्नतद्ग्रहणा° ।
२५-२५. मै. मै२. मै३. अ. अ१ - सदोहविर्धाने २६-२६. मै२ - °श्नतीति स्वर्गो भवतीति ।

२३. अ. आ. पा. इ. वा. वै. म - तत्रश्वत्थ° । २४. शृ१ - चक्रयोः रथम् । २५. इ. वा - काष्ठमस्योलूखलस्य ।
२६-२६. म - यूपा नियम्यते तत्र । २७. मै - नयते, अ. पा. इ. वा. वै - मीयते ।

प्राञ्चो यान्ति प्राङिव हि सुवर्गो (३) लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्याक्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन् प्रतिषज्य प्रतिष्ठां गच्छन्ति

यान्ति । प्राङ् । इव । हि । सुवर्ग इति सुवः-गः (३) । लोकः । सरस्वत्या । यान्ति । एषः । वै । देवयान इति देव-यानः । पन्थाः । तम् । एव । अन्वारोहन्तीत्यनु-आरोहन्ति । आक्रोशन्त इत्या-क्रोशन्तः । यान्ति । अवर्तिम् । एव । अन्यस्मिन् । प्रतिषज्येति प्रति-सज्य । प्रतिष्ठामिति प्रति-स्थाम् । गच्छन्ति ।

'सरस्वत्या' इति । तीर्थविशेषः [२७]सरस्वती, तया [V]यान्ति तां प्राप्य सत्रं समापयन्ति । 'एष वै' इति । [२८]देवान् [२९]यान्ति अनेनेति [V]देवयानः [V]तम् [V]एव मार्गं [३०]समारोहन्ति [३१]प्रपद्यन्ते । 'आक्रोशन्तः' इति । [३२-] अवर्ति अवर्तनं [-३२] [३३]दारिद्र्यम् [३४][V]अन्यस्मिन् पुरुषे [३५][V]प्रतिषज्य समासज्य [V]प्रतिष्ठां [३६]समाप्तिं [V]गच्छन्ति ॥

प्राञ्च इति ॥ धर्मान्तरं विधत्ते - 'प्राञ्चो यान्ति प्राङिव हि सुवर्गो लोकः' इति ॥ चक्रयुक्ताग्नीध्रादिभिः सह प्राङ्मुखा गच्छेयुः । स्वर्गलोकस्य प्राग्वर्तित्वेन प्रतिभानात् । एतच्चोक्तं सूत्रकारेण "तस्मिन् संस्थितेऽध्वर्युः शम्यां प्राचः प्रास्यति सा यत्र निपतति तद्गार्हपत्यः, [२८]तस्मात् [२९]षट्त्रिंशतं प्राचः प्रक्रमान् प्रक्रामति [३०]तदाहवनीयः चक्रीवन्ति सदोहविर्धानान्याग्नीध्रं चाऽऽश्वत्थी हविर्धानमाग्नीध्रं चोलूखलबुध्नो यूपः [३१]प्रकृष्यः उपोप्त एव [३२-] नोपरवान् खनन्ति" (आपश्रौ २३.१२.९-१६) इति [-३२] ॥ एकस्मिन्नहि समाप्ते सति परेद्युः प्रातः शम्याक्षेपमात्रं गत्वा [३३-] तत्र अहरन्तरमनुष्ठाय [-३३] तस्मिन्नपि समाप्ते ततः परेद्युरपि तथेत्यर्थः ॥

सरस्वत्येति ॥ धर्मान्तरं विधत्ते - 'सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्ति' इति ॥ या सरस्वत्याख्या नदी तया सह तत्तीरं प्रतिदिनं [३४]गच्छेयुः । [V]एषः सरस्वतीतीरगतो मार्गः [V]देवयानः देवान् प्रापयितुं [३५]क्षमोऽतः [V]तम् [V]एव प्राप्नुवन्ति ॥

---

२७. मै२ - 'सरस्वती' नास्ति । २८. मै. अ१ - देवाः । २९. मै२ - यज । ३०. अ१ - अन्वारोहन्ति । ३१. मै२ - प्रतिपद्यन्ते । ३२-३२. मै२ - अयमेवर्तिन् । ३३. अ१ - 'दारिद्र्यम्' नास्ति । ३४. मै१ - अस्मिन् । ३५. मै२ - प्रतिसन्ध्य । ३६. मै. मै२. मै३. अ - प्राप्तिम् ।

---

२८. अ. आ. पा. म. वै - तस्मिन् । २९. म. वै - षट्त्रिंशम् । ३०. शृ१ - तदाहवनीये, म - तदाहवनीयम् । ३१. शृ१ - प्रकृष्योपोप्त, म - प्रकृष्येदुपोप । ३२-३२. म - °रवानेत इति, मै - °रवान् खनन्ति । ३३-३३. तत्राहरत तमनुष्ठेयम् । ३४. म - गच्छेयुः धनसंकोचमन्तरेण । ३५. वै - समोऽतः ।

यदा दश शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति

यदा । दश । शतम् । कुर्वन्ति । अथ । एकम् । उत्थानमित्युत्-स्थानम् । शतायुरिति शत-आयुः । पुरुषः । शतेन्द्रिय इति शत-इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठन्ति ।

'यदा' इत्यादि ॥ [३७]Vयदा ऋषभाधिका Vदश गावः प्रसवेन Vशतं Vकुर्वन्ति Vअथ अनन्तरम् Vएकम् Vउत्थानम् । अयमपि [३८]कश्चित्समापनकालः एतावति [३९]काले सत्रं समाप्यते [४०]इति [४१-] एके आहुरिति यावत् [-४१] । 'शतायुः' इति । गतम् (तैसं २.३.२) ॥

[४२]'यदा शतम्' इत्यादि ॥ एवमेव Vशतं [४३]ऋषभादिका गावः Vयदा Vसहस्रं Vकुर्वन्ति Vअथ [४४]इदमपि Vएकम् Vउत्थानम् इति [४५-] वदन्त्येके, प्रसवशक्तिवैचित्र्यात् गवां पक्षभेदः । Vसहस्रसंमितः सहस्रतुल्यः [४६-] सहस्रसंख्यः स्वर्गतुल्यः [-४६] महत्त्वाद्दुःखसंपाद्यत्वाच्च ॥

आक्रोशन्त इति ॥ धर्मान्तरं विधत्ते - आक्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन् प्रतिषज्य प्रतिष्ठां गच्छन्ति' इति ॥ उत्साहातिशयेन क्रियमाण [३६]उच्चतमो ध्वनिराक्रोशस्तं कुर्वन्तो गच्छेयुः । धनसंकोचमन्तरेण जीवनं [३७]वृत्तिः । तद्वैपरीत्येन [३८]दारिद्र्यमवृत्तिः । अवृत्तिरेवावर्तिः । तां च Vअवर्तिम् Vअन्यस्मिन् वैरिणि Vप्रतिषज्य प्रतिष्ठितत्वेन [३९]सक्तां कृत्वा स्वयं [४०-] धनसंपन्नां Vप्रतिष्ठां [-४०] गच्छन्ति ॥

यदेति ॥ [४१]एवमनुतिष्ठतः कालावधिरूपं धर्मान्तरं विधत्ते - 'यदा दश शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति' इति ॥ एकेन वृषभेण सहिताः Vदश गावो यावति कालेऽपत्यप्रसवेन गवां Vशतं संपादयन्ति तावन्तं कालं पौनःपुन्येनानुष्ठाय तदनुष्ठानात् Vउत्थानं कर्तव्यमनुष्ठानं समापयेदित्यर्थः । सोऽयमेकः समाप्तिकालः । गोशते सति पुरुषस्य [४२]शतसंवत्सरायुष्ट्वान्नाडीशतकसंचारेण [४३]शतेन्द्रियत्वात् Vआयुषि Vइन्द्रिये च प्रतितिष्ठन्ति ॥

३७. अ१ - 'यदा' नास्ति । ३८. मैर - °समाप्तिकालः । ३९. मैर - काले ते । ४०. अ१. मै१ - इत्यादि । ४१-४१. मैर - 'एके - - - - यावत्' नास्ति । ४२. मैर - यदा दश । ४३. मैर - ऋषभाधिकम् । ४४. मै. मैर. मै३. अ. अ१ - 'इदमपि' नास्ति । ४५-४५. मैर - 'वदन्त्येके - - - - उत्थानमिति' नास्ति । ४६-४६. मै. मै१. मैर. मै३. अ१. - 'सहस्रसंख्यः सहस्रतुल्यः' नास्ति ।

३६. म - चरमः । ३७. अ. आ. इ. वा. वै - वर्तिः । ३८. अ. आ. इ. वा. वै - °मवर्तिः । ३९. अ. आ. इ. वा. म. वै - संयुक्ताम् । ४०-४०. मै - धनसंप्रतिष्ठाम् । ४१. अ - °मनुष्ठितः । ४२. मै - °रायुष्मान्° । ४३. आ - °त्वादा(व्या) युषी° ।

यदा शत९ं सहस्रं कुर्वन्त्यथैकमुत्थानं९ं सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदै(४)षां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम् ॥१॥

(पृष्ठानि सप्तदशः सुवर्गो जयन्ति यदैकादश च ।)

यदा । शतम् । सहस्रम् । कुर्वन्ति । अथ । एकम् । उत्थानमित्युत्-स्थानम् । सहस्रसंमित इति सहस्र-संमितः । वै । असौ । लोकः । अमुम् । एव । लोकम् । अभीति । जयन्ति । यदा (४) । एषाम् । प्रमीयेतेति प्र-मीयेत । यदा । वा । जीयेरन् । अथ । एकम् । उत्थानमित्युत्-स्थानम् । तत् । हि । तीर्थम् ॥४॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'यदैषाम्' इत्यादि ॥ Vयदा Vएषां सत्रिणां मध्ये कश्चित् Vप्रमीयेत Vयदा Vवा Vजीयेरन् सर्वस्वमपि हीयेरन् तदाऽपि Vएकम् Vउत्थानम् इति -[४५] । Vतत् Vहि Vतीर्थम् तारकं दुरितेभ्यः इति । [४७]अर्थादियन्तं कालमावर्तते षडह इति गम्यते । [४८-] उक्तं च चोदितत्वात् -[४८] सत्रं षड्रात्र इति ॥

॥ इति सप्तमे द्वितीये प्रथमोऽनुवाकः ॥

यदेति ॥ कालावधौ पक्षान्तरं विधत्ते - 'यदा शत९ं सहस्रं कुर्वन्त्यथैकमुत्थान९ं सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभिजयन्ति' इति ॥ Vशतं गावः Vयदा पूर्ववत् Vसहस्रं संपादयन्ति सोऽयमेक उत्थानकालः । न चाऽतीतपक्षेण सांकर्यं शङ्कनीयम् । प्रसववैचित्र्येण न्यूनाधिककालसंभवात् । [४४-] गवां सहस्रसंपत्तौ सत्यां सहस्रसंख्याकैर्भोग्यजातैः समृद्धः स्वर्गः प्राप्तो भवति ॥

यदैषामिति ॥ कालवधावेवापरं पक्षद्वयं विधत्ते - 'यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम्' इति ॥ Vएषां यजमानानां मध्ये कश्चित् Vयदा Vप्रमीयेत सोऽयमेक -[४४] [४५]उत्थानकालः । Vयदा Vवा राष्ट्रक्षोभादिना शत्रुभिरेते यजमाना जिता अपहृतसर्वस्वा भवन्ति सोऽयमेक [४५]उत्थानकालः । उक्तविधं यत् Vउत्थानं Vतत् Vतीर्थं [४६]पापेभ्यस्तारकम् । तस्मात् [४७-] तत्पर्यन्त षड्रात्र आवर्तनीयः -[४७] ॥

॥ [४८-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके प्रथमोऽनुवाकः -[४८] ॥

४७. मैर - अजादियन्तम् । ४८-४८. मैर - उक्तापि ।

४४-४४. मै - 'गवां - - - - सोऽयमेकः' नास्ति । ४५. शृ१ - ऊह्यमानकालः । ४६. मै - पादेभ्यः° । ४७-४७. शृ१ - तत्पर्यन्तः । ४८-४८. वै - इति द्वितीये प्रपाठके प्रथमोऽनुवाकः ।

कुसुरुविन्द औद्दालकिरकामयत पशुमान्त्स्यामिति स एतꣳ सप्तरात्रमाऽहरत्
तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्द्ध य एवं
विद्वान्त्सप्तरात्रेण यजते यावन्त एव ग्राम्याः
पशवस्तानेवाव रुन्द्धे सप्तरात्रो भवति

कुसुरुविन्दः । औद्दालकिरित्यौत्-दालकिः । अकामयत । पशुमानिति पशु-मान् । स्याम् । इति । सः । एतम् । सप्तरात्रमिति सप्त-रात्रम् । एति । अहरत् । तेन । अयजत । तेन । वै । सः । यावन्तः । ग्राम्याः । पशवः । तान् । अवेति । अरुन्ध । यः । एवम् । विद्वान् । सप्तरात्रेणेति सप्त-रात्रेण । यजते । यावन्तः । एव । ग्राम्याः । पशवः । तान् । एव । अवेति । रुन्द्धे । सप्तरात्र इति सप्त-रात्रः । भवति ।

अथाष्टौ सप्तरात्राः - [1]कौसुरुविन्दः प्रथमः, सप्तर्षीणां द्वितीयः, [2]प्राजापत्यस्तृतीयः, [3]छन्दोमपवमानश्चतुर्थः, पृष्ठ्यावलम्बः [4]पञ्चमः, सत्रसंमितः षष्ठः, ऐन्द्रः सप्तमः, जनकसप्तरात्रोऽष्टमः । [5]तत्र प्रथमं विदधाति - 'कुसुरुविन्दः' इति । Vकुसुरविन्दः नाम उद्दालकपुत्रः Vअकामयत Vपशुमान् बहुपशुः Vस्याम् इति । "ह्रस्वनुड्भ्याम्°" (पा ६.१.१७६) इति मतुप उदात्तत्वम् । 'स एतम्' इत्यादि । गतम् । अन्यो द्रष्टा, अयमाहर्ता, Vतेन अपश्यदिति

प्रथमेऽनुवाके षड्रात्रोऽभिहितः । अथ द्वितीये सप्तरात्रोऽभिधीयते ।

कुसुरुविन्द इति ॥ तमिमं विधत्ते - कुसुरुविन्द औद्दालकिरकामयत पशुमान्त्स्यामिति स एतꣳ सप्तरात्रमाहरत् तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्द्ध य एवं विद्वान्त्सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्द्धे' इति ॥ Vकुसुरुविन्दः नामतः । स चोद्दालकस्य पुत्रः । Vपशुमान् बहुपशुयुक्तः । [1]गोछागाश्वाविपुरुषगर्दभोष्ट्राः सप्त ग्राम्याः ॥

सप्तरात्र इति ॥ अथाहःसंख्यां प्रशंसति - 'सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्तारण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै' इति ॥ Vग्राम्याः उक्ताः । [2]द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयाः Vसप्त Vआरण्याः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्य इति Vसप्त Vछन्दांसि । Vउभयस्य पशुसमूहस्य [3]छन्दसः समूहस्य च -[3] ॥

---

१. अ१ - क्रसुरविन्दः, मै१ - कुसुरविन्दः । २. मै२ - °स्तृतीयम् । ३. अ१ - छन्दोमाः पव° । ४. मै२ - पञ्चमम् । ५. मै२ - 'तत्र' नास्ति ।

---

१. शृ१. म - गोजाश्वा । २. मै - द्विखुरश्वा अपदक्षिररी° । ३-३. शृ१. मै - छन्दःसमूहस्य वा ।

सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेज (१) एवाव रुन्द्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्द्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते

सप्त । ग्राम्याः । पशवः । सप्त । आरण्याः । सप्त । छन्दाꣳसि । उभयस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । त्रिवृदिति त्रि-वृत् । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । तेजः (१) । एव । अवेति । रुन्द्धे । पञ्चदश इति पञ्च-दशः । भवति । इन्द्रियम् । एव । अवेति । रुन्द्धे । सप्तदश इति सप्त-दशः । भवति । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायते । एकविꣳश इत्येक-विꣳशः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् । धत्ते ।

नोक्तम् । [6]गोऽजाश्वाविकपुरुषगर्दभोष्ट्राः सप्त Vग्राम्याः Vपशवः । द्विखुरश्वापदपक्षिसरीसृपहस्ति-मर्कटादयः Vसप्त Vआरण्याः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः Vसप्त Vछन्दांसि । चतुरुत्तराणि । Vउभयस्य Vअवरुद्ध्यै पशूनां छन्दसां च [7]अवरुद्ध्यै भवति [8]सप्तत्वान्वयात् ॥

'त्रिवृत्' इत्यादि ॥ अहीनत्वादत्र सर्वत्रैकवचनम् । त्रयस्त्रिंशस्य स्थाने पञ्चविंश इति विशेषः । [9]Vमहाव्रतवान् ये महाव्रतधर्माः "[10]स्तुवन्त्यनुश्लोकेन" (तैसं ७.५.८) इत्याद्याः

त्रिवृदिति ॥ अथाहर्विशेषान् विधत्ते - 'त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्द्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्द्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन् धत्ते त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै' इति ॥ यथासंभवं [4]पञ्चरात्रषड्रात्रवच्च व्याख्येयम् । 'श्लोकेन पुरस्तात् सदसः स्तुवन्त्यनुश्लोकेन पश्चात्' इत्यादयो महाव्रतधर्माः । तद्धर्मोपेतत्वं [5]महाव्रतत्वम् ॥

---

६. मै२ - °पुरुषगजतोष्ट्राः । ७. अ१. मै१ - 'अवरुद्ध्यै' नास्ति । ८. मै२ - सप्तत्वाय । ९. मै२ - महाव्रतत्वात् । १०. मै१ - अनुश्लोकेन स्तुवते, मै२ - अनुस्तुवन्त्यनुश्लोकेन ।

---

४. मै - रात्रवड्रात्र° । ५. भृ१. मै - व्रतत्वम् ।

त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत् प्रत्यक्षं पूर्वेष्वहःसु पृष्ठान्युपेयुः

त्रिणव इति त्रि-नवः । भवति । विजित्या इति वि-जित्यै । पञ्चविꣳश इति पञ्च-विꣳशः । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । प्रजापतेरिति प्रजा-पतेः । आप्त्यै । महाव्रतवानिति महाव्रत-वान् । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । विश्वजिदिति विश्व-जित् । सर्वपृष्ठ इति सर्व-पृष्ठः । अतिरात्र इत्यति-रात्रः । भवति । सर्वस्य । अभिजित्या इत्यभि-जित्यै । यत् । प्रत्यक्षमिति प्रति-अक्षम् । पूर्वेषु । अहःस्वित्यहः-सु । पृष्ठानि । उपेयुरित्युप-इयुः ।

तद्वान् । Vविश्वजित् Vसर्वपृष्ठः Vअतिरात्रः सप्तममहः । [11]बृहद्रथन्तरवैरूपवैराजशाक्वररैवतानि सर्वाण्यपि पृष्ठान्यस्येति सर्वपृष्ठः ॥

'यत् प्रत्यक्षम्' इत्यादि ॥ Vपूर्वेषु Vअहःसु त्रिवृदादिषु Vपृष्ठानि रथन्तरादीनि Vप्रत्यक्षम् अविकृतमेव Vउपेयुः । तत्तथा स्यात् । कथम् ? यथैव Vदुग्धाम् अपि गां तदैव दोग्धुं दोग्धा Vउपसीदिति Vएवम् इदम् Vउत्तमम् Vअहः निःसारं Vस्यात् , ततश्च Vनैकरात्रः अपि Vस्यात्,

---

यदिति ॥ [6]अथ कंचिद्विशेषं विधत्ते - 'यत् प्रत्यक्षं पूर्वेष्वहःसु [7] पृष्ठान्युपेयुः प्रत्यक्षं विश्वजिति यथा दुग्धामुपसीदत्येवमुत्तममहः स्यान्नैकरात्रश्चन स्याद्बृहद्रथन्तरे पूर्वेष्वहःसूप यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत् प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत्' इति ॥ सप्तमादह्नः पूर्वाण्यहानि यानि सन्ति तेषु Vअहःसु [-7] रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानि Vपृष्ठानि [8]यदि Vप्रत्यक्षम् Vउपेयुः अविकृतानि तथैव प्रयुज्यन्त इत्यर्थः । तथा सति [9]सर्वपृष्ठविधानात् Vविश्वजिति अपि [10]सप्तमेऽह्नि Vप्रत्यक्षम् अविकृतं यथा भवति तथा पृष्ठस्तोत्राणि प्रयोक्तव्यानि । एवमुभयत्रापि [11]विकृतप्रयोगे सति Vयथा लोके सकृत् Vदुग्धां गां पुनरपि दोग्धुं भ्रान्तः पुरुषः [12]उपासीदति

---

११. अ१. मै१ - रैवतानि इति ।

---

६. अ. आ. इ. वा. वै. मै - अत्र । ७-७. शृ१. इ. वा - 'पृष्ठान्युपेयुः - - - - तेष्वहःसु' नास्ति । ८. मै - यन्तीति । ९. अ. आ. इ. वा. वै. म. मै - सर्वपृष्ठ इति विधानात् । १०. आ. वा - सप्तमेऽह्नि यत् । ११. आ - (वि)कृतप्रयोगे, वै - कृतप्रयोगे; अ - प्रकृतप्रयोगे । १२. शृ१. इ. वा. वै - उपसीदति ।

प्रत्यक्षं (२) विश्वजिति यथा दुग्धामुपसीदत्येवमुत्तममहः स्यान्नैकरात्रश्चन स्याद्बृहद्रथन्तरे पूर्वेष्वहःसूप यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति

प्रत्यक्षमिति प्रति-अक्षम् (२) । विश्वजितीति विश्व-जिति । यथा । दुग्धाम् । उपसीदतीत्युप-सीदति । एवम् । उत्तममित्युत्-तमम् । अहः । स्यात् । न । एकरात्र इत्येक-रात्रः । चन । स्यात् । बृहद्रथन्तरे इति बृहत्-रथन्तरे । पूर्वेषु । अहःस्वित्यहः-सु । उपेति । यन्ति । इयम् । वाव । रथन्तरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । न । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति ।

---

[१२]एकरात्रमपि विश्वजिन्न स्यात् । तस्मात् [V]पूर्वेषु [V]अहःसु [V]बृहद्रथन्तरे रथन्तरं बृहदिति पर्यायेण [V]उपयन्ति [१३]अन्त्याद्दिवसात् प्राग्वैरूपादिभिर्विना ॥

'इयं वाव' इत्यादि ॥ गतम् (तैसं ७.२.१) । 'यत्' इत्यादि । अथ [V]विश्वजिति सर्वपृष्ठानि [V]प्रत्यक्षम् [V]उपयन्ति । [V]यथा [V]प्रत्तां पयो दातुं [१४]प्रारब्धां प्रस्रवर्तीं [१५]गां दुग्धे तादृक्

एवम् इदम् [V]उत्तमं [१३] सप्तमम् अहः [१३] [V]स्यात् । तथा सत्ययं विश्वजित् [१४]दुग्धगोवन्निःसारत्वेन कश्चिदेकरात्रयागः [१५]अपि [V]न भवेत् सप्तरात्रयागान्तर्भावोऽपि न संभवतीति किमु वक्तव्यम् । तस्माद्विश्वजितः [१६]सारत्वाय [१७]वैरूपादीनि पृष्ठान्यवस्थाप्य [V]पूर्वेषु षट्सु [V]अहःसु बृहद्रथन्तरे [१८]उभे एव पृष्ठे पर्यायेणाऽऽवर्तनीये । 'इयं वाव' इत्यादि पूर्ववत् । पूर्वानुवाके निषेधकस्य नकारस्याभावादाभ्यामेव [V]यन्ति इत्यत्र लोकाभ्यामनुष्ठानं निर्वर्तयन्तीति व्याख्यातम् । इह [१९] तु नकारस्य [१९] सद्भावात् [V]आभ्यां [२०]लोकाभ्यां [V]न [२१]अपगच्छन्तीति ।

---

१२. मै१ - रात्रमपि, मै२ - एकरात्रमात्रमपि । १३. मै१ - अन्त्यादिवसात् । १४. मै. मै१. मै३. अ. अ१ - प्रवृत्ताम् । १५. मै२ - 'गाम्' नास्ति ।

१३-१३. म - सप्तरात्रमहः । १४. भृ१ - दुग्धं गोवन्निःसा° । १५. मै - 'अपि' नास्ति । १६. भृ१. मै - ससारत्वाय । १७. भृ१ - वैरूपत्वादिति । १८. मै - उक्ते । १९-१९. अ. इ. वा. वै - तु न नकारस्य । २०. म - 'लोकाभ्याम्' नास्ति । २१. भृ१. मै - अपगच्छति; म - अवगच्छन्ति ।

यत् प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत् ॥२॥

(तेजं उपेयुः प्रत्यक्षं द्विचत्वारिंशच्च ।)

यत् । प्रत्यक्षमिति प्रति-अक्षम् । विश्वजितीति विश्व-जिति । पृष्ठानि । उपयन्तीत्युप-यन्ति । यथा । प्रत्ताम् । दुहे । तादृक् । एव । तत् (३) ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

तद्भवति । आदिकर्मणि क्तः, " अच [16]उपसर्गात्तः " (पा ७.४.४७), "लोपस्त आत्मनेपदेषु " (पा ७.१.४७) इति तलोपः ॥

॥ इति सप्तमे द्वितीये द्वितीयोऽनुवाकः ॥

व्याख्येयम् । पूर्वेष्वहःसु बृहद्रथन्तरे द्वे एवानुष्ठाय विश्वजिति अविकृतानां सर्वेषां पृष्ठानामनुष्ठाने सति [V]यथा लोके [V]प्रत्तां क्षीरं दातुं प्रवृत्तां [22]प्रसूतां गां पुरुषो दुग्धे [23-] [V]तादृक् [V]एव [V]तत् [-23] भवति ॥

[24-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः [-24] ॥

---

१६. मै२ - °सर्गात् क्तः ।

---

२२. मै - प्रस्नुताम् ; म - प्रसृताम् ; अ. इ. वै - प्रस्तुताम् ; वा - प्रश्रुताम् । २३-२३. अ. इ. वा. वै. म. मै - तादृक् एतत् । २४-२४. वै - इति द्वितीयप्रपाठके द्वितीयोऽनुवाकः; मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्द्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्द्धे (१)

बृहस्पतिः । अकामयत । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । स्याम् । इति । सः । एतम् । अष्टरात्रमित्यष्ट-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । अभवत् । यः । एवम् । विद्वान् । अष्टरात्रेणेत्यष्ट-रात्रेण । यजते । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । एव । भवति । अष्टरात्र इत्यष्ट-रात्रः । भवति । अष्टाक्षरेत्यष्टा-अक्षरा । गायत्री । गायत्री । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । गायत्रिया । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अवेति । रुन्द्धे । अष्टरात्र इत्यष्ट-रात्रः । भवति । चतस्रः । वै । दिशः । चतस्रः । अवान्तरदिशा इत्यवान्तर-दिशाः । दिग्भ्य इति दिक्-भ्यः । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अवेति । रुन्द्धे (१) ।

अथाष्टरात्र [1]एकः तद्विदधाति - 'बृहस्पतिः' इत्यादि ॥ गतम् । अष्टत्वान्वयात् अष्टाक्षरगायत्र्यात्मकब्रह्मवर्चसलाभः । पुनः [2]अपि अष्टत्वान्वयात् । [3]अष्टभ्यो दिग्भ्यो ब्रह्मवर्चसलाभः ॥

बृहस्पतिरिति ॥ द्वितीये सप्तरात्रोऽभिहितः । अथ तृतीयेऽष्टरात्रः [1]अभिधीयते - 'बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत् तमाहरत् तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्द्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्द्धे' इति ॥ पूर्वत्र [2]कुसुरुबिन्देन बाल्य एवाध्ययनकाले सप्तरात्रस्य [3]शास्त्रमुखेन निश्चितत्वात् कामनाया ऊर्ध्वं [4]दर्शनं नापेक्षितमिति [4]

---

१. अ१. मै१ 'एकः' नास्ति । २. मै२ - 'अपि' नास्ति । ३. मै१ - अष्टाभ्यः ।

---

१. शृ१ - 'अभिधीयते' नास्ति; म - विधीयते । २. मै - कुस्रविन्देन । ३. आ - गुरुमुखेन; अ. इ. वा. म. मै. वै - साश्रुमुखेन । ४-४. म - दर्शनेनापेक्षितम् ।

त्रिवृद॑ग्निष्टो॒मो भ॑वति॒ तेज॑ ए॒वाव॑ रुन्धे पञ्चद॒शो भ॑वतीन्द्रि॒यमे॒वाव॑ रुन्धे सप्तद॒शो भ॑वत्यन्ना॒द्यस्याव॑रुद्ध्या॒ अथो॒ प्रैव तेन॑ जायत एकवि॒ꣳशो भ॑वति॒ प्रति॑ष्ठित्या॒ अथो॒ रुच॑मे॒वाऽऽत्मन् ध॑त्ते त्रिण॒वो भ॑वति॒ विजि॑त्यै त्रयस्त्रि॒ꣳशो भ॑वति॒ प्रति॑ष्ठित्यै पञ्चवि॒ꣳशो॑ऽग्निष्टो॒मो भ॑वति

त्रि॒वृदिति॑ त्रि-वृत् । अ॒ग्नि॒ष्टो॒म इत्य॑ग्नि-स्तो॒मः । भ॒व॒ति॒ । तेजः॑ । ए॒व । अवेति॑ । रु॒न्धे॒ । प॒ञ्च॒द॒श इति॑ पञ्च-द॒शः । भ॒व॒ति॒ । इ॒न्द्रि॒यम् । ए॒व । अवेति॑ । रु॒न्धे॒ । स॒प्त॒द॒श इति॑ सप्त-द॒शः । भ॒व॒ति॒ । अ॒न्ना॒द्यस्येत्य॑न्न-अ॒द्यस्य॑ । अव॑रुद्ध्या॒ इत्यव॑-रु॒द्ध्यै॒ । अथो॒ इति॑ । प्रेति॑ । ए॒व । तेन॑ । जा॒य॒ते॒ । ए॒क॒वि॒ꣳश इत्ये॑क-वि॒ꣳशः । भ॒व॒ति॒ । प्रति॑ष्ठित्या॒ इति॒ प्रति॑-स्थि॒त्यै॒ । अथो॒ इति॑ । रुच॑म् । ए॒व । आ॒त्मन् । ध॒त्ते॒ । त्रि॒ण॒व इति॑ त्रि-न॒वः । भ॒व॒ति॒ । विजि॑त्या॒ इति॒ वि-जि॒त्यै॒ । त्र॒य॒स्त्रि॒ꣳश इति॑ त्रयः-त्रि॒ꣳशः । भ॒व॒ति॒ । प्रति॑ष्ठित्या॒ इति॒ प्रति॑-स्थि॒त्यै॒ । प॒ञ्च॒वि॒ꣳश इति॑ पञ्च-वि॒ꣳशः । अ॒ग्नि॒ष्टो॒म इत्य॑ग्नि-स्तो॒मः । भ॒व॒ति॒ ।

'त्रिवृत्' इत्यादि ॥ गतम् (तैसं ७.२.२) । त्रिवृदादयस्त्रयस्त्रिंशान्ताः षट्, पञ्चविंशः अग्निष्टोमः महाव्रतवान् [४]सप्तमः, विश्वजित् सर्वपृष्ठः अतिरात्र अष्टममहः ॥

॥ [५]इति सप्तमे द्वितीये तृतीयोऽनुवाकः[५] ॥

---

[५]नोक्तम् । इह तु तदभावात् [६]अपश्यत् इत्युक्तम् । गायत्र्या अष्टाक्षरत्वाद्दिशामवान्तरदिशां च मिलित्वाऽष्टसंख्योपेतत्वात् संख्याद्वारा तदुभयमुखेन ब्रह्मवर्चसप्राप्तिः ॥

त्रिवृदिति ॥ अथाहर्विशेषान् विधत्ते - 'त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन् धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै' इति ॥

---

४. मै१. मै२ - सप्तमम् । ५-५. मै१ - द्वितीये तृतीयोऽनुवाकः ।

---

५. अ - वोक्तम् । ६. अ. वा - सर्वत्र ।

[अष्टरात्रविधिः

प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (२) ॥३॥

(दिग्भ्य एव ब्रह्मवर्चसमव रुन्द्धेऽभिजित्यै)

प्रजापतेरिति प्रजा-पतेः । आप्त्यै । महाव्रतवानिति महाव्रत-वान् । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । विश्वजिदिति विश्व-जित् । सर्वपृष्ठ इति सर्व-पृष्ठः । अतिरात्र इत्यति-रात्रः । भवति । सर्वस्य । अभिजित्या इत्यभि-जित्यै (२) ॥३॥

[कासं - - - - ; कृपिसं - - - - ; मैसं - - - - ; वासं - - - -]

---

[६]पूर्वत्र पञ्चैव [७]पृष्ठ्यषडहगतान्यहानि षष्ठः Vपञ्चविंशः Vअग्निष्टोमः । इह तु तस्य सप्तमत्वात् [८]षाडहिकानि [९]सर्वाण्यप्यहानि क्रमेणैवानुष्ठेयानि । Vअतिरात्रः अष्टमः ॥

॥ [१०-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः [-१०] ॥

---

७. भृ१ - षडहस्तान्यहानि । ८. भृ१ - षडधिकानि । ९. भृ१ - सर्वाण्यहानि । १०-१०. वै - इति तृतीयोऽनुवाकः; मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥

नवरात्रविधिः]

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्त्स एतं नवरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अक्लृप्ता

प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । ताः । सृष्टाः । क्षुधम् । नीति । आयन् । सः । एतम् । नवरात्रमिति नव-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । प्रजाभ्य इति प्र-जाभ्यः । अकल्पत । यर्हि । प्रजा इति प्र-जाः । क्षुधम् । निगच्छेयुरिति नि-गच्छेयुः । तर्हि । नवरात्रेणेति नव-रात्रेण । यजेत । इमे । हि । वै । एतासाम् । लोकाः । अक्लृप्ताः ।

त्रयो नवरात्राः । आयुष्कामस्य प्रथमः । ब्रह्मवर्चसकामस्य द्वितीयः । शलली-पिशङ्गस्तृतीयः । तत्राद्यो विधीयते - 'प्रजापतिः प्रजा' इत्यादि ॥ प्रजासृष्ट्यनन्तरमेव ^V^क्षुधं [1]नियमेनागच्छन् ततः अक्षीयन्त । अथ ^V^नवरात्रेण [2]लोकान् प्रजाभ्यः ^V^अकल्पत वृत्तिविधानेन क्षुधं निवर्तयितुं समर्थोऽभवत् । ततः प्रजा दीर्घमजीवन् । 'यर्हि' इत्यादि । यस्मिन् काले । "अनद्यतने र्हिलन्यतरस्याम्" (पा ५.३.२१) ॥

'इमे हि' इत्यादि ॥ ^V^एतासां प्रजानाम् ^V^इमे ^V^लोकाः ^V^अक्लृप्ताः [3]सस्याभावेन रक्षणपर्याप्ता न भवन्ति, अतः ^V^एताः ^V^क्षुधं ^V^निगच्छन्ति [4]निघ्नन्ति । तस्मान्नवरात्रेण ^V^लोकान्

तृतीयेऽनुवाकेऽष्टरात्रोऽभिहितः । [1]अथ चतुर्थे नवरात्रोऽभिधीयते ॥

प्रजापतिरिति ॥ तमेतं विधत्ते - 'प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्त्स एतं नवरात्रमपश्यत् तमाहरत् तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अक्लृप्ता अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान् कल्पयति तान् कल्पमानान् प्रजाभ्योऽनु कल्पते कल्पन्तेऽस्मा इमे लोका ऊर्जं प्रजासु दधाति' इति ॥ ^V^न्यायन् नितरां [2]प्राप्नुवन् । ^V^प्रजाभ्यः ^V^अकल्पत [3-]प्रजानां क्षुन्निवारणाय[-3] समर्थोऽभूत् । अतो यस्मिन् काले ^V^प्रजाः अन्नाभावेन [4]^V^क्षुधं नितरां प्राप्नुवन्ति [5]तदा [6-] ^V^नवरात्रेण ^V^यजेत । [7]^V^इमे भूम्यादयो लोकाः सस्यनिष्पत्त्यभावेन

१. मै२ - नियतमागच्छन् । २. मै२ - 'लोकान्' नास्ति । ३. मै२ - सस्याभावे । ४. मै. मै१. मै२. मै३. अ - 'निघ्नन्ति' नास्ति ।

१. भृ१ - 'अथ' नास्ति । २. मै - प्राभुवन् । ३-३. मै - प्रजाक्षुन्नि° । ४. अ. इ. वा. वै - क्षुधं प्रजा । ५. म - 'तदा' नास्ति । ६-६. म - 'नवरात्रेण - - - - प्राप्नुवन्ति' नास्ति । ७. भृ१ - एवम् ।

अथैता: क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान् कल्पयति तान् कल्पमानान् प्रजाभ्योऽनु कल्पते कल्पन्ते (१)ऽस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं लोकं

अथ । एताः । क्षुधम् । नीति । गच्छन्ति । इमान् । एव । आभ्यः । लोकान् । कल्पयति । तान् । कल्पमानान् । प्रजाभ्य इति प्र-जाभ्यः । अन्विति । कल्पते । कल्पन्ते (१) । अस्मै । इमे । लोकाः । ऊर्जम् । प्रजास्विति प्र-जासु । दधाति । त्रिरात्रेणेति त्रि-रात्रेण । एव । इमम् । लोकम् । कल्पयति । त्रिरात्रेणेति त्रि-रात्रेण । अन्तरिक्षम् । त्रिरात्रेणेति त्रि-रात्रेण । अमुम् । लोकम् ।

प्रजाभ्यः Vकल्पयति [५-] रक्षणाय पर्याप्तान् [-५] करोति त्रैलोक्यात्मकत्वान्नवरात्रस्य । Vतान् लोकान् [६-]Vकल्पमानान् Vअनु प्रजार्थं Vकल्पते यजमानः । Vअस्मै [७]च Vयजमानाय Vलोकाः Vकल्पन्ते सस्यादिवृद्ध्या । ततः Vऊर्जम् अन्नं Vप्रजासु Vदधाति ॥

' त्रिरात्रेण ' इत्यादि ॥ प्रथमेन Vत्रिरात्रेण Vइमं Vलोकं [-६] Vकल्पयति । द्वितीयेन Vअन्तरिक्षम् । [८-] तृतीयेन अमुम् [-८] । ' यथा ' इत्यादि । Vयथा Vगुणे रज्वाम् अवयवगुणं

Vएतासां प्रजानां क्षुन्निवारणार्थमसमर्था यदा भवन्ति तदानीम् Vएताः Vक्षुधं नितरां प्राप्नुवन्ति [-६] । नवरात्रयागेन(ण) Vइमान् Vलोकान् एतासां प्रजानां क्षुन्निवारणसमर्थान् करोति, लोकेषु सस्यं बहु निष्पद्यत इत्यर्थः । Vतान् समर्थान् लोकान् Vअनु यजमानोऽपि प्रजानां रक्षणे समर्थो भवति । ते च Vलोकाः [८-] यजमानार्थं समर्था भवन्ति यजमानस्येच्छानुसारेण सस्यं निष्पादयन्तीत्यर्थः । ततो यजमानः Vप्रजासु अन्नरसं स्थापयति ॥

त्रिरात्रेणेति ॥ अथ नवरात्रं विभज्य तदवयवैस्त्रिभिर्लोकत्रयसामर्थ्यं [९-] दर्शयन् दृष्टान्तपुरःसरं प्रशंसति [-९] ' त्रिरात्रेणैवेमं लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं [-८] लोकं यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ' इति ॥ नवरात्रमध्ये योऽयमाद्यस्त्रिरात्रस्तेन भूलोकं

५-५. मै१ - रक्षणपर्याप्तान् । ६-६. अ१ - ' कल्पमाना° - - - - लोकम् ' नास्ति । ७. मै१ - ' च ' नास्ति । ८-८. अ१ - तृतीयेनेत्यादि अमुम्, मै१ - तृतीयेनेत्याद्यामृतम् ।

८-८. मै - ' यजमानार्थं - - - - अमुम् ' नास्ति । ९-९. म - दर्शयति ।

यथा॑ गु॒णे गु॒णम॒न्वस्य॑त्ये॒वमे॒व तल्लो॒के लो॒कमन्व॑स्यति॒ धृत्या॒ अशि॑थिलंभावा॒य ज्योति॒र्गौरायु॒रिति॑ ज्ञा॒ताः स्तोमा॑ भवन्ती॒यं वाव ज्योति॑र॒न्तरि॑क्षं

यथा॑ । गु॒णे । गु॒णम् । अ॒न्वस्य॒तीत्य॑नु-अस्य॑ति । ए॒वम् । ए॒व । तत् । लो॒के । लो॒कम् । अन्विति॑ । अ॒स्य॒ति॒ । धृ॒त्यै॑ । अशि॑थिलंभा॒वा॒येत्यशि॑थिलं-भा॒वा॒य । ज्योति॑ः । गौः । आयु॑ः । इ॒ति॑ । ज्ञा॒ताः । स्तोमा॑ः । भ॒व॒न्ति॒ । इ॒यम् । वाव । ज्योति॑ः । अ॒न्तरि॑क्षम् ।

द्वितीयं तृतीयं [९-] च Vअन्वस्यति [-९] अनुक्षिपति [१०]रज्जुमुपोद्बलयति, Vएवम् एकस्मिन् Vलोके [११]Vलोकं द्वितीयं तृतीयं च Vअन्वस्यति त्रैलोक्यात्मक एकतन्त्रस्त्रिरात्रः क्रियते Vधृत्यै धारणसामर्थ्यार्थं सर्वस्य Vअशिथिलंभावाय च । [१२]च्वेरम्भावश्छन्दसः ॥

क्षुन्निवारणसमर्थं करोति । स एव त्रिरात्रो यदा [१०]द्वितीयवारमावर्त्यते [११-] तदा [१२]तेन Vअन्तरिक्षं समर्थं करोति । यदा [-११] तृतीयवारमावर्त्यते तेन तदा स्वर्गं समर्थं करोति । [१३-] तत्र दृष्टान्तः - Vयथा लोके त्रिवृद्रज्जुं सिसृक्षुः पुरुषः एकस्मिन् सूत्रे द्वितीयं सूत्रं योजयति ततस्तृतीयमपि योजयति एवमेतेन त्रिरात्रेण पुनःपुनरभ्यस्तेनैतस्मिन् Vलोके प्रथमं समर्थे सति ततो द्वितीयं तृतीयं च Vलोकं समर्थं करोति [-१३] । एतच्च सर्वासां प्रजानां धारणाय लोकानामशैथिल्याय च संपद्यते ॥

ज्योतिरिति ॥ इदानीमावर्त्यमानस्य त्रिरात्रस्यावयवभूतान्यहानि विधत्ते - 'ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां गच्छति' इति ॥ ज्योतिरादिशब्दत्रयपूर्वकाः स्तोमशब्देनाभिधीयमानाः सामगैः सर्वैर्ज्ञातास्त्रयोऽहर्विशेषा विद्यन्ते । त एवाऽत्राहर्विशेषाः कर्तव्याः । [१४-] ज्योतिष्टोमः प्रथममहः गोष्टोमो द्वितीयमहः आयुष्टोमस्तृतीयमहः [-१४] । एते चाहर्विशेषा अत्रापि गवामयनप्रसङ्गे स्पष्टीभविष्यन्ति । ज्योतिष्टोमं प्रथममुपयन्ति गोष्टोमं द्वितीयमुपयन्त्यायुष्टोमं तृतीयमुपयन्तीति ह्यभिधास्यते । एतेषां च स्तोत्रियवैषम्येण भेदः । [१५-] अत एव तस्मिन् [-१५] प्रसङ्ग आम्नायते - " एकया गौरतिरिक्तः । एकयाऽऽयुरूनः " (तैसं ७.४.१०) इति । ज्योतिष्टोमे यावत्यः स्तोत्रिया गोष्टोमे तावतीभ्योऽप्येकाऽधिका । आयुष्टोमे [१६]तु एका न्यूना । एवमस्यामपि शाखायां

९-९. अ१ - चान्नस्य । १०. मै१ - रज्ज्वाम् । ११. अ१. मै१ - 'लोकम्' नास्ति । १२. अ१ - उच्चरभावश्छान्दसः, मै१ - च्वेरभावश्छान्दसः ।

१०. भृ१ - द्विवारम् । ११-११. म - 'तदा - - - - यदा' नास्ति । १२. भृ१ - 'तेन' नास्ति । १३-१३. म - 'तत्र दृष्टान्तः - - - - करोति' नास्ति । १४-१४. म - ज्योतिष्टोमं - - - - अग्निष्टोमं - - - - आयुष्टोमं - - - - । १५-१५. अ. आ. इ. वा. वै - अत एतस्मिन् । १६. अ. आ. इ. वा. वै . म - अपि ।

गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां (२) गच्छति नवरात्रो भवत्यभिपूर्वमेवास्मिन् तेजो दधाति

गौः । असौ । आयुः । एषु । एव । लोकेषु । प्रतीति । तिष्ठन्ति । ज्ञात्रम् । प्रजानामिति प्र-जानाम् (२) । गच्छति । नवरात्र इति नव-रात्रः । भवति । अभिपूर्वमित्यभि-पूर्वम् । एव । अस्मिन् । तेजः । दधाति ।

कथं पुनस्त्रिरात्रस्य [१३]लोकत्रयात्मकत्वमित्याह - 'ज्योतिर्गौरायुः'[१४]इत्यादि ॥ Vज्ञाताः Vस्तोमाः अहानि ज्ञाता अभ्यस्ता Vभवन्ति । 'इयं वाव' इत्यादि ॥ गतम् । ज्योतिरादयः उक्थ्यविशेषाः त्रिकद्रुका नाम । Vज्ञात्रं [१५-] ख्यातिलोकप्रतिष्ठितानां Vप्रजानां मध्ये ख्यातिं गच्छति [-१५] ज्ञातस्तोमत्वान्नवरात्रस्य [-१३] । औणादिकस्तृन् प्रत्ययः (उसू ४.१६७) ॥

Vज्ञाताः प्रसिद्धाः । सामशाखायां तु त्रिकद्रुका इति [१७]ज्ञाताः प्रसिद्धाः । [१८-] त एतेऽत्रानुष्ठेयाः [-१८] । ज्योतिरादीनां लोकत्रयरूपत्वात् तेष्वयं प्रतितिष्ठति । किञ्च Vप्रजानां मध्ये Vज्ञात्रं गच्छति । [१९]क्षुन्निवर्तकोऽयमित्येवं सर्वैर्ज्ञातत्वं [२०]ज्ञात्रं ख्यातिं प्राप्नोतीत्यर्थः । ज्योतिर्गौरायुरित्ययमेव त्रिरात्र आवर्त्यमानो नवरात्रः संपद्यते । अत एव सूत्रकारेणोक्तम् - "शललीपिशङ्गेनान्नाद्यकामो ज्योतिर्गौरायुर्ज्योतिर्गौरायुरायुर्गौर्ज्योतिरतिरात्रः" (आपश्रौ २२.२३.१३-१४) इति । चतुर्विधेषु नवरात्रयागेष्विदानीमुच्यमानस्य शललीपिशङ्ग [२१]इत्येतन्नाम ॥

नवरात्र इति ॥ नवरात्रक्रतुं प्रशंसति - 'नवरात्रो भवत्यभिपूर्वमेवास्मिन् तेजो दधाति' इति ॥ योऽयं ज्योतिरादिकस्त्रिरात्रः स एवावर्त्यमानः Vनवरात्रः Vभवति । तदनुष्ठानेन Vअभिपूर्वम् Vएव अनुक्रमेण [२२]एव यजमाने Vतेजः संपादयति । सकृदनुष्ठितस्त्रिरात्रो द्विरनुष्ठितः [२३]षड्रात्रस्त्रिरनुष्ठितो नवरात्रः । एवं तेजोऽप्युत्तरोत्तरं [२४]वर्धत इत्यर्थः ॥

१३-१३. मै२ - 'लोकत्रयात्मक - - - - °न्नवरात्रस्य' नास्ति । १४. मै. मै१. मै२. मै३. अ - इति । १५-१५. [अस्माभिः कल्पितोऽयं पाठः ।] मै - ख्यातिसिलोके प्रतिष्ठिता [ख्यातिच्छाये प्रतिष्ठितं ?] नाम प्रजानां गच्छति, मै१ - ख्यातिश्लोकप्रतिष्ठा नाम प्रतिष्ठितानाम्, अ१ - प्रतिष्ठितानां प्रजानाम् ।

---

१७. मै - ज्ञाताः इति । १८-१८. भृ१ - त एव तत्रानु° । १९. म - मित्येवं विधम्,, भृ१ - इत्येव एवंविधम् । २०. मै - क्षात्रम् । २१. भृ१ - इत्येतन्नाम विहितम् । २२. म. मै. वै - 'एव' नास्ति । २३. मै - 'षड्रात्रस्त्रिरनुष्ठितः' नास्ति । २४. भृ१ - 'वर्धत' नास्ति ।

यो ज्योगामयावी स्यात् स नवरात्रेण यजेत प्राणा हि वा एतस्याधृता अथैतस्य ज्योगामयति

यः । ज्योगामयावीति ज्योक्-आमयावी । स्यात् । सः । नवरात्रेणेति नव-रात्रेण । यजेत । प्राणा इति प्र-अनाः । हि । वै । एतस्य । अधृताः । अथ । एतस्य । ज्योक् । आमयति ।

‘नवरात्रः’ [16]इत्यादि ॥ त्रिरात्रः षड्रात्रः [V]नवरात्रः इत्येव । [17]त्रिरात्रानुपूर्व्यवत्त्वात् । [V]अभिपूर्वम् अनुक्रमेण [18]यजमाने [V]तेजः दधाति । [V]ज्योगामयावी दीर्घरोगी । [V]एतस्य ज्योगामयाविनः [V]प्राणाः[V]अधृताः [V]अथ [V]एतस्य [19]ज्योगामयति । “रुजार्थानाम्°” (पा २.३.५४) इति कर्मणि षष्ठी । [20]अधारितप्राणत्वादेनं दीर्घरोगिणं करोति । तस्मात् [V]नवरात्रेण [V]अस्मिन् यजमाने [V]प्राणान् [V]दाधार धारयति । नवत्वसाम्यात्, प्राणानां च नवत्वात् । छान्दसो लिट्,

---

य इति ॥ तदेवमन्नसंपादनद्वारा क्षुन्निवारणार्थं नवरात्रो विहितः । अथ दीर्घरोगनिवृत्त्यर्थम् [25]अपि तमेव विधत्ते - ‘यो ज्योगामयावी स्यात् स नवरात्रेण यजेत प्राणा हि वा एतस्याधृता अथैतस्य ज्योगामयति प्राणानेवास्मिन् दाधारोत यदीतासुर्भवति जीवत्येव’ इति ॥ [V]ज्योगामयावी चिरकालीनरोगयुक्तः [26]तस्य पुरुषस्य [V]प्राणाः [27]यदा धातुवैषम्यात् [V]अधृताः धारयितुमशक्या भवन्ति तदानीम् [V]एतस्य पुरुषस्य [V]ज्योक् [V]आमयति दीर्घरोग उत्पद्यते । [28]नवरात्रानुष्ठानेन [29][V]प्राणान् [V]अस्मिन् धारयत्येव । अपि च

---

१६. अ१. मै१. मै२ - इति । १७. मै१ - °पूर्ववत्त्वात् । १८. मै१ - यजमानः । १९. मै२ - ज्योगामयति आमयः । २०. मै१ - °तप्रधानत्वात् ।

---

२५. मै - इति । २६. मै - एतस्य, म - सः तस्य । २७. म - ‘यदा’ नास्ति । २८. अ. आ. वै. मै - नवरात्रनु° । २९. भृ१ - प्राणाः ।

प्राणानेवास्मिन् दाधारोत यदीतासुर्भवति जीवत्येव ॥४॥

(कल्पन्ते प्रजानां त्रयस्त्रिꣳशच्च ।)

प्राणानिति प्र-अनान् । एव । अस्मिन् । दाधार । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव ॥४॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

"[२१]तुजादीनाम् " (पा ६.१.७) इति [२२]दीर्घत्वम् । [२३-]Vउत अयं Vयदि अपि Vइतासुः गतप्राणः [-२३] Vजीवति एव । "[२४]निपातैर्यद्यदिहन्त " (पा ८.१.३०) इति प्रथमस्याख्यातस्य निघाताभावः, द्वितीयस्य तिङ्परत्वात् ॥

॥ [२५]इति सप्तमे द्वितीये चतुर्थोऽनुवाकः ॥

रोगाधिक्यात् [३०]मूर्च्छया [३१]यद्यपि मुहूर्तमात्रं याममात्रं वा गतप्राणो भवति तदाप्येतत्क्रतुसामर्थ्यादयं [३२]पुनः Vजीवति Vएव ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥

---

२१. मै२ - तुजादीनामाध्यातंत्वा तुजादीनामाद्युदात्तत्वम् । २२. अ१ - दीर्घः, मै१ - दीर्घः ततो लोपः । २३-२३. अ१ - इतासुरपि गतप्राणोऽपि, मै१ - उत स्वर्गतप्राण । २४. मै१ - °यद्यदिति । २५. मै१ 'इति' नास्ति ।

---

३०. म - 'मूर्च्छया' नास्ति । ३१. अ. आ. इ. वा. म - पूर्वम् । ३२. भृ१ - 'पुनः' नास्ति ।

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रꣳ सृजते

प्रजापतिरिति प्रजा-पतिः । अकामयत । प्रेति । जायेय । इति । सः । एतम् । दशहोतारमिति दश-होतारम् । अपश्यत् । तम् । अजुहोत् । तेन । दशरात्रमिति दश-रात्रम् । असृजत । तेन । दशरात्रेणेति दश-रात्रेण । प्रेति । अजायत । दशरात्रायेति दश-रात्राय । दीक्षिष्यमाणः । दशहोतारमिति दश-होतारम् । जुहुयात् । दशहोत्रेति दश-होत्रा । एव । दशरात्रमिति दश-रात्रम् । सृजते ।

अथ चत्वारो दशरात्राः - त्रिककुत् प्रथमः । देवपुरा द्वितीयः । [1]छन्दोमवान् तृतीयः । कौसुरुबिन्दश्चतुर्थः । तत्र प्रथमो विधीयते - 'प्रजापतिः' इत्यादि ॥ [V]प्रजायेय प्रजावान् स्याम् [V]इति [V]प्रजापतिः [V]अकामयत [V]सः [2]एतं [V]दशहोतारं " चित्तिः स्रुक् " (तैआ ३.१) इत्यादिकम् [V]अपश्यत् । [3]दशभूतान्याह्वानानि " आत्मन्नात्मन् " (तैब्रा २.३.११) इति [4]स [5]दशहोता । [6]" तं वा एतं दशहूतं सन्तम् [6] । दशहोतेत्याचक्षते परोक्षेण " (तैब्रा २.३.११) [7] इति

चतुर्थेऽनुवाके नवरात्रोऽभिहितः । अथ पञ्चमे दशरात्रोऽभिधीयते ।

प्रजापतिरिति ॥ तमेतं विधित्सुरादौ तदङ्गभूतं होमं विधत्ते - 'प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रꣳसृजते तेन दशरात्रेण प्र जायते ' इति ॥ प्रजाः सिसृक्षुः [V]प्रजापतिः आदौ तत्साधनभूतं दशरात्रक्रतुमुत्पादयितुं [1] तस्यापि साधनभूतं दशहोत्राख्यं " चित्तिः स्रुक् चित्तमाज्यम् " (तैआ ३.१) इत्यादिकं मन्त्रमारण्यकाण्डोक्तं निश्चित्य तेन मन्त्रेण हुत्वा क्रतुं च सृष्ट्वा प्रजा असृजत [1] । तस्मिन् मन्त्रे ' चित्तिः स्रुक् ' इत्यारभ्य ' सामाध्वर्युः ' इत्यन्तैर्वाक्यैर्होमनिष्पादकानां स्रुगादीनां दशानामभिधानादयं मन्त्रो दशहोता । [2]यद्वा - [3]तन्मन्त्राभिमानी पुरुषो दशवारमाहूतः प्रत्यशृणोत् । तस्मादयं

---

१. अ१. मै१ - चतुर्थवान् । २. मै१ - 'एतम्' नास्ति । ३. मै२ - °ह्वानादि, मै१ - दशहोतानि° । ४. मै१ - 'सः' नास्ति । ५. अ१. मै१ - दशहोतारम् । ६-६. मै१ - वा एतं सन्तम् । ७. मै१ - 'इति' नास्ति ।

१-१. इ. - 'तस्यापि - - - - असृजत' नास्ति । २. शृ१ - यदा । ३. पा. इ. वा. वै - तस्मिन् मन्त्राभिमानी, अ - तस्मिन् मन्त्राभिमानिनी, मै - तन्मन्त्रोऽभिमानी ।

तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान् दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रो (१) य एवं विद्वान् दशरात्रेण यजते प्रैव जायते

तेन । दशरात्रेणेति दश-रात्रेण । प्रेति । जायते । वैराजः । वै । एषः । यज्ञः । यत् । दशरात्र इति दशरात्रः । यः । एवम् । विद्वान् । दशरात्रेणेति दश-रात्रेण । यजते । विराजमिति वि-राजम् । एव । गच्छति । प्राजापत्य इति प्राजा-पत्यः । वै । एषः । यज्ञः । यत् । दशरात्र इति दश-रात्रः (१) । यः । एवम् । विद्वान् । दशरात्रेणेति दश-रात्रेण । यजते । प्रेति । एव । जायते ।

---

[8]ब्राह्मणम् । " ऋतः छन्दसि " (पा ५.४.१५८) इति कबभावः । ' तम् ' इत्यादि । गतम् । Vदशरात्राय Vदीक्षिष्यमाणः Vदशहोतारं मनसाऽनुद्रुत्य आहवनीये [9]सग्रहं जुहुयात् । तेन होमेन Vदशरात्रं सृष्ट्वा तेन Vदशरात्रेण Vप्रजायते ॥

' वैराजः ' इत्यादि ॥ गतम् । दशत्वान्वयात् Vवैराजः, [10]प्रजापतिना सृष्टत्वात् Vप्राजापत्यः । ' प्रैव जायते ' इति । प्रजापतिवत् प्राजापत्यस्यापि प्रजाहेतुत्वात् ॥

दशहोता । तथा च होतृब्राह्मणे समाम्नायते - " आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशम९ हूतः प्रत्यशृणोत् । स दशहूतोऽभवत् । दशहूतो ह वै नामैषः । तं वा एतं दशहूत९ सन्तम् । दशहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः " (तैब्रा २.३.११) इति ॥ तमेतं मन्त्रं [4]दशरात्रदीक्षार्थं जुहुयात् । [5]Vतेन होमेन दशरात्रक्रतुं सृष्ट्वा Vतेन Vदशरात्रेण प्रजामुत्पादयति ॥

वैराज इति ॥ अथ दशसंख्यामुपजीव्य [6]क्रतुं प्रशंसति - " वैराजो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान् दशरात्रेण यजते विराजमेव गच्छति " इति । [7]दशसंख्याया विराट्संबन्धित्वात् [7] विराड्छन्दःसाध्यमन्त्रं प्राप्नोतीत्यर्थः ॥

प्राजापत्य इति ॥ प्रजापतिसृष्टत्वेन क्रतोस्तत्संबन्धमुपजीव्य प्रशंसति - ' प्राजापत्यो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान् दशरात्रेण यजते प्रैव जायते ' इति ॥

---

८. मै१. अ१ - ' ब्राह्मणम् ' नास्ति । ९. मै. मै२. मै३. अ. अ१ - ' सग्रहम् ' नास्ति । १०-१०. मै२ - '°पतिना -- -- सदृशः ' नास्ति ।

---

४. अ. आ. पा. इ. वा. वै - °दीक्षार्थे, मै - °दीक्षार्थी । ५. म - ' तेन ' नास्ति । ६. अ. आ. पा. इ. वा. वै - क्रमम् । ७-७. शृ१ - दशसंख्याकाया विराजसंबन्धत्वात्, अ. पा. इ. वा. मै. वै - दशसंख्याया विराड्संबन्धत्वात् ।

इन्द्रो वै सदृङ्देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं दशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान् दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति

इन्द्रः । वै । सदृङ्ङिति स-दृङ् । देवताभिः । आसीत् । सः । न । व्यावृतमिति वि-आवृतम् । अगच्छत् । सः । प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् । दशरात्रमिति दश-रात्रम् । प्रेति । अयच्छत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । अन्याभिः । देवताभिः । व्यावृतमिति वि-आवृतम् । अगच्छत् । यः । एवम् । विद्वान् । दशरात्रेणेति दश-रात्रेण । यजते । व्यावृतमिति वि-आवृतम् । एव । पाप्मना । भ्रातृव्येण । गच्छति ।

'इन्द्रो वै' इत्यादि ॥ ★Vसदृक् सदृशः[१०] - - - - Vदेवताभिः । व्यावृत्तिः★ तत्साधारणधर्मनिवृत्तिः । पाप्मना तु व्यावृत्तिः, तस्यैव निवृत्तिः, [११]तस्यात्माश्रयत्वात् ॥

'त्रिककुत्' इत्यादि ॥ Vककुत् [१२]उन्नतः । [१३] निरुदकादित्वादुत्तरपदान्तोदात्तत्वम् [१३] (गणपाठ २२६, पा ६.२.१८४) अथ [१४]तान्येवोन्नतानि दर्शयति 'ककुत् पञ्चदशः' इत्यादि ॥

इन्द्र इति ॥ प्रजोत्पादनलक्षणं [८] फलमभिधाय पापक्षयलक्षणं [८] [९] फलमभिधातुं विधत्ते [९] - 'इन्द्रो वै सदृङ्देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं दशरात्रं प्रायच्छत् तमाहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान् दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति' इति ॥ पुरा कदाचित् Vइन्द्रः Vअन्याभिः Vदेवताभिः समान एव Vआसीत् Vन तु व्यावृत्तिं प्राप्तवान् । भो इन्द्र गच्छ गच्छेत्येवमेव सर्वे देवा व्यवहरन्ति, न तु [१०]कश्चिदपि राजन् स्वामिन्निति [११]वा व्यवहरति । ततः Vप्रजापतिम् उपसेव्य तन्मुखात् Vदशरात्रं क्रतुमवगत्य तदनुष्ठानेन व्यावृत्तिं प्राप्तवान् । [१२]एवमन्योऽप्येतदनुष्ठाय Vपाप्मना Vभ्रातृव्येण च वियोगं [१३]गच्छति ॥

★-★. मै - मुद्रितपुस्तके तलटिप्पण्यां 'सदृक्स्वस्वतवसामिति नुम् । व्यावृत्तिः' इत्येवं पाठः निर्दिष्टोऽस्ति । ११. मै२ - तस्मात् तदाश्रयत्वात् । १२. मै. मै१. मै३. अ. अ१ - अत्युन्नतः । १३-१३. मै२ - त्रिककुदकानि । १४. मै२ - °न्नतादि ।

८-८. मै - 'फलम° - - - - लक्षणम्' नास्ति, वै - फलमभिधाय पापलक्षणम् । ९-९. क. म - फलमभिधत्ते । १०. अ. आ. पा. इ. वा. वै - कश्चित् । ११. आ. मै - 'वा' नास्ति । १२. अ. पा. इ. वा - °मन्येऽपि° । १३. अ. पा. वा - गच्छन्ति ।

त्रिककुद्वा (२) एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकवि९ंशः ककुत् त्रयस्त्रि९ंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो

त्रिककुदिति त्रि-ककुत् । वै (२) । एषः । यज्ञः । यत् । दशरात्र इति दश-रात्रः । ककुत् । पञ्चदश इति पञ्च-दशः । ककुत् । एकवि९ंश इत्येक-वि९ंशः । ककुत् । त्रयस्त्रि९ंश इति त्रयः-त्रि९ंशः । यः । एवम् । विद्वान् । दशरात्रेणेति दश-रात्रेण । यजते । त्रिककुदिति त्रि-ककुत् । एव । समानानाम् । भवति । यजमानः । पञ्चदश इति पञ्च-दशः ।

अत्रेयमहः [१५]क्लृप्तिः - [१६]त्रिवृदग्निष्टोमावभितः [१७-] मध्ये पञ्चदश उक्थ्य उन्नतः सप्तदशावग्निष्टोमावभितः [-१७], [१८]मध्ये [१९-] एकविंश उक्थ्य उन्नतः त्रिणवाग्निष्टोमावभितः [-१९] मध्ये त्रयस्त्रिंश उक्थ्य उन्नतः ॥

त्रिककुदिति ॥ विधास्यमानेषु दशस्वहःसु त्रयाणामह्नां वृषभसंबन्धिककुत्साम्येनौन्नत्यं संपाद्य प्रशंसति - ' त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकवि९ंशः ककुत् त्रयस्त्रि९ंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकवि९ंशो यजमानस्त्रयस्त्रि९ंशः पुर इतरा ' इति ॥ [१४-] त्रीणि ककुत्सदृशानि [-१४] उन्नतस्तोमयुक्तान्यहानि यस्य दशरात्रस्य सोऽयं ᵛत्रिककुत् । किं तदुन्नतमहस्त्रयमिति तदुच्यते - यः ᵛपञ्चदशः उक्थ्यो द्वितीयमहः [१५]तदेकं ककुत्स्थानीयम् । प्रथमतृतीययोस्त्रिवृदग्निष्टोमयोरह्नोर्नीचस्तोमयुक्तत्वात् । यथा [१६]वृषभसंबन्धिककुदः पुरोवर्ती गलभागः पश्चाद्वर्ती पृष्ठभागश्चेत्युभौ निम्नौ तद्वत् । तथा ᵛएकवि९ंश उक्थ्यः पञ्चममहः । [१७]तदप्येकं ककुत्स्थानीयम् चतुर्थषष्ठयोः सप्तदशोक्थ्यरूपयोरह्नोर्निम्नस्थानीयत्वात् । तथा [१८-] ᵛत्रयस्त्रिंशः उक्थ्योऽष्टममहः [-१८] । तदप्येकं ककुत्स्थानीयम् । त्रिणवाग्निष्टोमरूपयोः सप्तमनवमयोरह्नोर्निम्नस्थानीयत्वात् ।

१५. मै२ - 'क्लृप्तिः' नास्ति । १६. मै२ - त्रिवृताग्नि॰ । १७-१७. मै१ - मध्ये - - - - वभितः ' नास्ति । १८. मै. मै१. मै२. मै३. अ - ' मध्ये ' नास्ति । १९-१९. मै२ - ' एकविंशः - - - - ॰भितः ' नास्ति ।

१४-१४. म - त्रिककुत् सदृशानि । १५. वा - तदेतम् , म - तदेतत् । १६. अ. आ. पा. वा. वै - वृषसंबन्धि॰ । १७. अ. आ. पा. इ. वा. - तदेकम् , वै - तदैकम् । १८-१८. मै - त्रयस्त्रिंशदुक्थ्योऽष्टममहः, शृ१ - त्रयस्त्रिंशोक्थ्यमहः ।

यज॑मान एकवि॒ꣳशो यज॑मानस्त्रयस्त्रि॒ꣳशः पुर॒ इत॑रा अभिच॒र्यमा॑णो दशरा॒त्रेण॑ यजेत देवपु॒रा ए॒व पर्यू॑हते॒ तस्य॒ न कुत॑श्च॒नोपा॑व्या॒धो भ॑वति॒

यज॑मानः । ए॒क॒वि॒ꣳश इत्यैक॑-वि॒ꣳशः । यज॑मानः । त्र॒य॒स्त्रि॒ꣳशः इति॑ त्रयः-त्रि॒ꣳशः । पुरः॑ । इत॑राः । अ॒भि॒च॒र्यमा॑ण इत्य॑भि-च॒र्यमा॑णः । द॒श॒रा॒त्रेणेति॑ दश-रा॒त्रेण॑ । य॒जे॒त । दे॒व॒पु॒रा इति॑ देव-पु॒राः । ए॒व । परीति॑ । ऊ॒ह॒ते॒ । तस्य॑ । न । कुतः॑ । च॒न । उ॒पा॒व्या॒ध इत्यु॑प-आ॒व्या॒धः । भ॒व॒ति॒ ।

‘ य एवम् ’ इत्यादि ।। [२०]Vसमानानां मध्ये [२१-]Vत्रिककुत् त्रिभिः[-२१] ककुद्भिरुन्नतैः [२२]विद्याप्रजाधनैर्युक्तो Vभवति । ‘ यजमानः ’ इत्यादि ।। [२३]Vयजमानः पञ्चदशादिः मध्ये राजवद्गोपनीयः । Vइतराः इतराण्यहानि तस्य Vपुरः [२४]पत्तनस्थानीयानि वर्तन्ते दुर्गाणीत्यर्थः ।।

‘ अभिचर्यमाणः ’ इत्यादि ।। Vदेवपुराः देवानां [२५-] पुरःस्थानीयानि पुरविवक्षया [२६]इतराण्यहानि [-२५] [२७]Vपर्यूहते सर्वतो [२८]नयति आत्मनो रक्षार्थम् । “[२९]ऋपूरब्धू°” (पा ५.४.७४)

---

[१९]एतं महिमानमभिज्ञायानुष्ठाने [२०-] यजमानः समानानां [-२०] मध्ये त्रिगुणेनौन्नत्येन प्रजापशुधनादिकृतेन [२१]युक्तो भवति । य [२२]एते पञ्चदशैकविꣳशत्रयस्त्रिंशाः [२३]तत्स्थानीयः यजमानः Vइतराः अहःस्थानीयाः प्रजा यजमानस्य पुरस्थानीया भवन्ति । [२४]यथा [२५]पुरां सर्वानां राजा स्वामी एवमन्यासां प्रजानां यजमानः स्वामी भवतीत्यर्थः ।।

अभिचर्यमाण इति ।। पूर्वं दशरात्रस्यान्नप्राप्तिः पापव्यावृत्तिश्चेति फलद्वयं दर्शितम् । [२६]अथाभिचारबाधनिवृत्तिरूपं फलं दर्शयितुं विधत्ते - ‘ अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते

---

२०. मै१ - समानाम् । २१-२१. मै२ - त्रिः । २२. मै२ - °धनैस्तद्वान् । २३. मै१ - अयजमानः । २४. अ१ - °स्थानीयानि पुरस्थानीयाः पुरपेक्षया इतरा°, मै१ - °स्थानीयानि इति इतराण्यहानि उच्यन्ते । २५-२५. अ१. मै१ - वासस्थानीयानि पुरपेक्षया पुरा इति अहानि । २६. मै२ - इतरा इति अहानि । २७. [संहितामादृत्यास्माभिः संशोधितोऽयं पाठः । मै - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ‘ पर्यूहन्ते ’ इत्युपलभ्यते ।] । २८. मै. मै२. मै३. अ. अ१ - [अस्माभिः शुद्धीकृतोऽयं पाठः ।] , नयन्ति । २९. मै. मै१. मै३. अ. अ१ - ऋक्पूः ।

---

१९. म - एवम् । २०-२०. इ. वै - यजमानानाम् । २१. म - वित्तः , मै - युक्तान् । २२. शृ१ - एवम् । २३. म - ककुत्स्थानीयः । २४. शृ१ - तथा । २५. शृ१ - पुरी, मै - पुरा । २६. म - °चारनिवृत्तिरूपम् ।

नैनम॒भि॒चर॑न्त्स्तृणुते देवासु॒राः संय॑त्ता आस॒न् ते दे॒वा ए॒ताः (३) दे॑वपु॒रा अ॑पश्य॒न् यद्द॑शरा॒त्रस्ताः पर्यौ॑हन्त॒ तेषा॒ं न कुत॑श्च॒नोपा॑व्या॒धो॑ऽभव॒त् ततो॑ दे॒वा अभ॑व॒न् परा॑ऽसु॑रा॒ यो भ्रातृ॑व्यवा॒न्त्स्यात् स द॑शरा॒त्रेण॑ यजेत

न । ए॒नम् । अ॒भि॒चर॒न्नित्य॑भि-चर॑न् । स्तृ॒णु॒ते॒ । दे॒वा॒सु॒रा इति॑ देव-अ॒सु॒राः । संय॑त्ता॒ इति॒ सं-य॒त्ताः॒ । आ॒स॒न् । ते । दे॒वाः । ए॒ताः (३) । दे॒व॒पु॒रा इति॑ देव-पु॒राः । अ॒प॒श्य॒न् । यत् । द॒श॒रा॒त्र इति॑ दश-रा॒त्रः । ताः । परीति॑ । औ॒ह॒न्त॒ । तेषा॑म् । न । कुत॑ः । च॒न । उ॒पा॒व्या॒ध इत्यु॑प-आ॒व्या॒धः । अ॒भ॒व॒त् । तत॑ः । दे॒वाः । अभ॑वन् । परेति॑ । असु॑राः । यः । भ्रातृ॑व्यवा॒निति॒ भ्रातृ॑व्य-वा॒न् । स्यात् । सः । द॒श॒रा॒त्रेणेति॑ दश-रा॒त्रेण॑ । य॒जे॒त॒ ।

इति समासान्तः [30]परवल्लिङ्गता [31]च, " उपसर्गादस्यत्यूह्योः°" [द्र. 'वेतेर्विभाषा', (पा ७.१.७) इत्यस्मिन् सूत्रे सिद्धान्तकौमुद्यां वार्तिकम् ।] इति आत्मनेपदम् । [V]तस्य यजमानस्य कस्मादपि [V]उपाव्याधः [32]अभिचारादिबाधा [V]न [V]भवति । [V]न च [V]एनम् [V]अभिचरन् [V]स्तृणुते छादयति ॥

'देवासुराः' इत्यादि ॥ [33-] [V]ते [V]देवाः [-33] । देवपुराख्यानि [34]दशरात्रसंबधीन्यहानि । [35]तदेवाह - 'यद्दशरात्रः' इति । दशरात्रावयवभूता इत्यर्थः । [V]ताः [36]एव [37][V]देवपुराः [V]पर्यौहन्त परितो [38]रक्षार्थं कृतवन्तः । 'तेषाम्' इत्यादि । गतम् ॥

तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृणुते' इति ॥ यमुद्दिश्य [27]शत्रुरभिचारं करोति सोऽयम् [V]अभिचर्यमाणः । स चाभिचारबाधपरिहाराय [V]दशरात्रेण [V]यजेत । तस्मिन्ननुष्ठिते सति देवानां यानि पुराणि बहुविधशूरभटभृत्यपरिपूर्णानि तानि सर्वाणि [28-] स्वरक्षार्थं परितः स्थापयति । यः शत्रुरभिचरति सोऽप्येनं न हिनस्ति, [29-] तस्य हिंसितुम् [-29] अशक्यत्वात् । [30][V]न कुतोऽपि [31-] अभिचारादेर्बाध [-28] एतस्य [-31] [32]यजमानस्य संभवति ॥

३०. अ१ - तल्लिङ्गः । ३१. मै२ - 'च' नास्ति । ३२. मै१ - °दिबाधः । ३३-३३. मै२ - एताः देवपुराः । ३४. मै२ - दशरात्रिसंबधिन्यहानि । ३५. मै२ - तदेवाह च । ३६. मै१ - 'एव' नास्ति । ३७. मै१ - देवपुरः । ३८. मै१. अ१ - रक्षणार्थम् ।

२७. मै - शत्ररभयम् । २८-२८. इ. वै - 'स्वरक्षार्थं - - - - बाधः' नास्ति । २९-२९. शृ१ - तथा शंसितुम°, [प्रायः 'तथा शसितुम्' इति भाव्यम् ।] । ३०. मै - 'न' नास्ति । ३१-३१. शृ१ - अतिचारादेनां बान्धवस्य । ३२. मै - यजमानस्य न ।

देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते जामि वा (४)

देवपुरा इति देव-पुराः । एव । परीति । ऊहते । तस्य । न । कुतः । चन । उपाव्याध इत्युप-आव्याधः । भवति । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । स्तोमः । स्तोमस्य । उपस्तिः । भवति । भ्रातृव्यम् । एव । उपस्तिम् । कुरुते ।

'स्तोमः स्तोमस्य' इत्यादि ॥ गतम् । त्रिवृदादिः Vस्तोमः अभितः स्थितः Vस्तोमस्य पञ्चदशादेर्मध्ये स्थितस्य Vउपस्तिः हीनप्राणमाधारकाष्ठं भवति । तेन उपस्तिभूतेन मध्यस्थः धार्यते । समीपे Vभवति इति उपस्तिः । अस्तेः क्तिनि "छन्दस्युभयथा" (पा ३.४.११७) इति सार्वधातुकत्वात् "[३९]श्नसोरल्लोपः" (पा ६.४.१११) इत्यकारलोपः भूभावश्च । Vभ्रातृव्यम् उपस्तिहीनं Vकरोति ॥

देवासुरा इति ॥ [३३]अभिचारबाधनिवृत्तिफलमुक्त्वा [३४]शत्रुक्षयरूपं फलमभिधातुं विधत्ते - 'देवासुराः संयत्ता आसन् ते देवा एता देवपुरा अपश्यन् यद्दशरात्रस्ता पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत् ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान् स्यात् स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते' इति[३३] ॥ देवाश्चासुराश्च यदा युद्धोद्यतास्तदानीं Vदेवाः विजयोपायं विचार्य [३५]यो दशरात्रस्तद्रूपाणि देवपुराण्युपायत्वेन निश्चित्य परितः [३६]तानि स्थापितवन्तः Vतेषां [३७]वैरिणां कुतोऽपि [३८]भ्रातृव्याभिबाधः Vन भवति[३८] । ततः Vदेवाः विजयं प्राप्ताः Vअसुराः च पराजिताः । ततः Vभ्रातृव्यवान् यजमानोऽपि Vदशरात्रेण विजयी भवति । तदीयो Vभ्रातृव्यः च पराभवति । किं चात्र ककुद्रूपस्य पञ्चदशस्तोमस्य समीपवर्ती त्रिवृदादिस्तोमः Vउपस्तिः क्षीणो भवति । तेन Vभ्रातृव्यम् Vएव क्षीणं करोति ॥

जामीति ॥ अथास्मिन् दशरात्रे कंचिद्विशेषं विधत्ते - 'जामि वा एतत् कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनीयाꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्ताच्च परस्ताच्च भवन्त्यजामित्वाय' इति ॥ यथा लोके कश्चिद्राजामात्यादिर्महतीं संपदमनुभूय पश्चाद्दारिद्र्यमनुभवन्नत्यन्तमलसः क्लिष्टो भवति तथाऽत्रापि

३९. अ१ - 'श्नसोरल्लोपः' नास्ति ।

३३-३३. वा - 'अभिचार° - - - - इति' नास्ति । ३४. अ. आ. पा. इ. वा. वै - शत्रुजयरूपम् । ३५. शृ१ - 'यः' नास्ति । ३६. म - 'तानि' नास्ति । ३७. इ. वा. वै. म - वैरिणः । ३८-३८. मै - भ्रातृव्याद्बाधो नाभवत्, वै - °भिवाध्यो न भवति ।

एतत् कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनीयाꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्ताच्च परस्ताच्च भवन्त्यजामित्वाय

जामि । वै (४) । एतत् । कुर्वन्ति । यत् । ज्यायाꣳसम् । स्तोमम् । उपेत्येत्युप-इत्य । कनीयाꣳसम् । उपयन्तीत्युप-यन्ति । यत् । अग्निष्टोमसामानीत्यग्निष्टोम-सामानि । अवस्तात् । च । परस्तात् । च । भवन्ति । अजामित्वायेत्यजामि-त्वाय ।

'जामि वै' इत्यादि ॥ [V]जामि [४०]आलस्यदोषः । [४१][V]ज्यायांसं महान्तं पञ्चदशाधिकं [४२][V]स्तोमम् [V]उपेत्य [V]कनीयांसम् [४३]अल्पं त्रिवृदादिकम् [V]उपयन्ति एतद्विपरीतं [४४]भवति । अतो जाम्येतत्कुर्वन्ति । तत्र समाधानमाह - [४५]यत् [V]अग्निष्टोमसामानि [V]अवस्तात् पुरस्तात् [V]परस्तात् उपरिष्टात् [V]च त्र्यहस्य [V]भवन्ति तत् [V]अजामित्वाय भवति । [४६]तस्य प्रकृतित्वेन [४७]प्राधान्यात् तस्योपरिभावेऽपि नास्ति दोषः इति ॥

द्वितीयेऽह्नि [V]ज्यायांसं [३९]पञ्चदशस्तोमं ककुद्रूपमनुष्ठाय ततस्तृतीयेऽह्नि [४०]पुनः [V]कनीयांसं निम्नभागस्थानीयं त्रिवृत्स्तोममनुतिष्ठन्तीति [४१-] यत् तत् [V]एतत् [V]जामि [-४१] [V]कुर्वन्ति [४२-] आलस्यम् अपरागरूपं [-४२] कुर्वन्तीत्यर्थः । [४३]दूरतः आलस्यपरिहाराय पञ्चदशोक्थ्यरूपाद्द्वितीयस्मादह्नः [V]अवस्तात् प्रथमेऽहन्युपरिष्टाच्च तृतीयेऽहनि [V]अग्निष्टोमसामानि यज्ञायज्ञीयाख्यानि कुर्यात् । तेनालस्यं परिहृतं भवति । एवमेकविंशोक्थ्यरूपात् पञ्चमादह्नः पूर्वोत्तरदिनयोः । त्रयस्त्रिंशोक्थ्यरूपादष्टमादह्नः [४४]पूर्वोत्तरदिनयोरप्यग्निष्टोमसंस्थाप्रयोजकानि [४५]यज्ञायज्ञीयसामानि कुर्यात् । तेन सर्वत्राऽऽलस्यं परिहृतं भवति ॥

त्रिवृदिति ॥ अथास्य दशरात्रस्य प्रथममहर्विधत्ते - 'त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुन्द्धे' इति ॥ [४६]अग्निविषयो यज्ञायज्ञीयसामसाध्योऽन्तिमस्तोत्रगतः स्तोमो यस्य सोऽयम्

४०. मै. मै२. मै३. अ - °दोषवत् । ४१. मै. मै१. मै३. अ. अ१ - यत् ज्यायांसम् । ४२. मै२ - 'स्तोमम्' नास्ति । ४३. मै. मै१. मै३. अ. अ१ - 'अल्पम्' नास्ति । ४४. मै२ - 'भवति' नास्ति । ४५. मै. मै१. मै३. अ. अ१ - यस्मात् । ४६. मै२ - अस्य । ४७. मै१. अ१ - प्रतिपादनात् ।

३९. म - पञ्चदशस्तोत्रम् । ४०. अ. आ. इ. पा. वा. वै - 'पुनः' नास्ति । ४१-४१. शृ१ - यत्र तदेतद् जामिम्, अ - यदेतत् तदेतद् जामि । ४२-४२. अ. आ. इ. पा. वा. वै - आलस्ययुक्तम्, म - 'आलस्यं - - - - रूपम्' नास्ति । ४३. अ. आ. इ. वा. म - अतः, पा - 'दूरतः' नास्ति । ४४. अ. आ. इ. वा. पा - °प्रयोजिकानि । ४५. म - यज्ञीयाख्यानि । ४६. शृ१ - अग्निविषये ।

त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुन्द्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्द्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव रुन्द्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या

त्रिवृदिति त्रि-वृत् । अग्निष्टोम इत्यग्नि-स्तोमः । अग्निष्टुदित्यग्नि-स्तुत् । आग्नेयीषु । भवति । तेजः । एव । अवेति । रुन्द्धे । पञ्चदश इति पञ्च-दशः । उक्थ्यः । ऐन्द्रीषु । इन्द्रियम् । एव । अवेति । रुन्द्धे । त्रिवृदिति त्रि-वृत् । अग्निष्टोम इत्यग्नि-स्तोमः । वैश्वदेवीष्विति वैश्व-देवीषु । पुष्टिम् । एव । अवेति । रुन्द्धे । सप्तदश इति सप्त-दशः । अग्निष्टोम इत्यग्नि-स्तोमः । प्राजापत्यास्विति प्राजा-पत्यासु । तीव्रसोम इति तीव्र-सोमः । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै ।

'त्रिवृत्' इत्यादि ॥ Vअग्निष्टुत् अग्निष्टोमविशेषः । [४८-] सर्वाग्नेयः त्रिवृत् [-४८] । Vआग्नेयीषु ऋक्षु Vभवति [४९]तत्प्रथममहः । Vपञ्चदशः Vउक्थ्यः Vऐन्द्रीषु ऋक्षु भवति द्वितीयमहः । त्रिवृदग्निष्टोमः Vवैश्वदेवीषु ऋक्षु भवति [५०]तत् तृतीयमहः । Vसप्तदशः Vअग्निष्टोमः Vप्राजापत्यासु ऋक्षु [५१-] भवति [५२]Vतीव्रसोमः नामोक्थ्यविशेषः, यत्र शतमाशिरे दुहन्ति तद्धर्मा स भवति

Vअग्निष्टोमः । तस्यैवावान्तरविशेषः कश्चित् [४७]Vअग्निष्टुत् इत्युच्यते । यत्र सर्वेष्वपि [४८]स्तोत्रेष्वग्निरेव [४९]स्तूयते स च सर्वोऽपि त्रिवृत्स्तोमेनैव युक्तः । सर्वत्राग्नेरेव स्तुत्यत्वात् Vआग्नेयीषु ऋक्षु सोऽग्निष्टुत् Vभवति । तदिदं प्रथममहः । तेन Vतेजः प्राप्नोति ॥

पञ्चदश इति ॥ अथ द्वितीयमहर्विधत्ते - 'पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्द्धे' इति ॥ सर्वासामृचामिन्द्रविषयत्वादिन्द्रियप्राप्तिः ॥

त्रिवृदग्निष्टोम इति ॥ [५०-] अथ तृतीयमहर्विधत्ते - 'त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव रुन्द्धे' इति ॥ सर्वासामृचां वैश्वदेवत्वेन पुष्टिप्राप्तिः [-५०] ॥

४८-४८. अ१ - सर्वत्रान्वयः, मै१ - सर्वत्रान्वयस्त्रिवृत् । ४९. मै२ - °ममहः तत् । ५०. मै. मै१. मै२. मै३. अ - 'तत्' नास्ति । ५१-५१. मै२ - 'भवति - - - - ऋक्षु' नास्ति । ५२. मै१ - इति प्रसोमः ।

---

४७. मै - अग्नित् । ४८. शृ१ - स्तोत्रेष्वप्यग्निरेव । ४९. मै - सूयते । ५०-५०. इ. वै - 'अथ - - - - पुष्टिप्राप्तिः' नास्ति ।

अथो प्रैव तेनं जायत (५) एकवि॰्श उक्थ्यः सौरीषु प्रतिंष्ठित्या अथो रुचंमेवाऽऽत्मन् धंत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्यं उपहवमेव गच्छति

अथो इतिं । प्रेतिं । एव । तेनं । जायते (५) । एकवि॰्श इत्येक-वि॰्शः । उक्थ्यः । सौरीषु । प्रतिंष्ठित्या इति प्रतिं-स्थित्यै । अथो इतिं । रुचंम् । एव । आत्मन् । धत्ते । सप्तदश इतिं सप्त-दशः । अग्निष्टोम इत्यंग्नि-स्तोमः । प्राजापत्यास्विति प्राजा-पत्यासु । उपहव्यं इत्युप-हव्यः । उपहवमित्युप-हवम् । एव । गच्छति ।

चतुर्थमहः । [V]एकविंशः [V]उक्थ्यः [V]सौरीषु ऋक्षु भवति पञ्चममहः । [V]सप्तदशः [V]अग्निष्टोमः [V]प्राजापत्यासु एव ऋक्षु [-५१] [V]उपहव्यः भवति [५३-] उपहवे साधुः [-५३] षष्ठमहः । [V]उपहवं पूजां [V]गच्छति । [V]त्रिणवौ [V]अग्निष्टोमौ [V]अभितः त्रयस्त्रिंशस्य पुरस्तात् [५४]उपरिष्टाच्च [५५]सप्तममहः । [५६]तावुभावपि [V]ऐन्द्रीषु ऋक्षु भवतः । [V]त्रयस्त्रिंशः [V]उक्थ्यः [V]वैश्वदेवीषु ऋक्षु भवति

सप्तदश इति ॥ अथ चतुर्थमहर्विधत्ते - 'सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते ' इति ॥ [V]तीव्रसोमः नाम कश्चिदुक्थ्यावान्तरविशेषः । [५१-]यस्मिन् [५२]आशिरर्थं गवां शतं दुहन्ति । तमुक्थ्यमग्निष्टोमरूपतामापाद्यानुतिष्ठेत् [-५१] । [५३-]पञ्चदशासु स्तोत्रेष्वन्तिमस्तोत्रत्रये परित्यक्ते सति द्वादशस्तोत्रत्वेनाग्निष्टोमता [-५३] संपद्यते । स्तोत्राणि च सर्वाणि [V]प्राजापत्यासु ऋक्षु प्रयोक्तव्यानि । [५४]तीव्रसोमत्वादन्नप्राप्तिर्ऋचां प्राजापत्यत्वात् प्रजोत्पत्तिश्च भवति ॥

एकवि॰्श इति ॥ अथ पञ्चममहर्विधत्ते - 'एकवि॰्श उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवात्मन् धत्ते ' इति ॥ [५५]स्तोमस्यैकवि॰्शत्वेन [५६]प्रतिष्ठाप्राप्तिः । ऋचां सौरीत्वाद्दीप्तिधारणम् ॥

सप्तदश इति ॥ अथ षष्ठमहर्विधत्ते - ' सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति ' इति ॥ [V]उपहव्यः नाम कश्चिदेकाहविशेषः । तदनुष्ठानेन अत्र [V]उपहवं सर्वेषामनुज्ञां पूजाविषयां प्राप्नोति ॥

५३-५३. मै२ - उपहवोऽस्ति सोमविशेषः । ५४. मै२ - ' उपरिष्टात् ' नास्ति । ५५. मै२ - नवममहः। ५६. मै. मै१. मै३. भ. भ१ - भावविशेषात् ।

५१-५१. म - यस्मिन्नादरार्थं गवां शतं महति तमुक्थ्येनमग्नि° । ५२. म - आदरार्थम् , मै - आशीरर्थम् । ५३-५३. इ. वै - ' पञ्चदशासु - - - - °ष्टोमता ' नास्ति । ५४. म - °त्वादन्नाद्यप्राप्तिः । ५५. शृ१ - स्तोत्रस्यै° । ५६. मै - °प्रापकत्वम् ।

त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥५॥

(प्राजापत्यो वा एष यज्ञो यद्दशरात्रस्त्रिककुद्वा एता वै जायत एकत्रिꣳशच्च ।)

त्रिणवाविति त्रि-नवौ । अग्निष्टोमावित्यग्नि-स्तोमौ । अभितः । ऐन्द्रीषु । विजित्या इति वि-जित्यै । त्रयस्त्रिꣳश इति त्रयः-त्रिꣳशः । उक्थ्यः । वैश्वदेवीष्विति वैश्व-देवीषु । प्रतिष्ठित्या इति प्रति-स्थित्यै । विश्वजिदिति विश्व-जित् । सर्वपृष्ठ इति सर्व-पृष्ठः । अतिरात्र इत्यति-रात्रः । भवति । सर्वस्य । अभिजित्या इत्यभि-जित्यै ॥५॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अष्टममहः । [V]विश्वजित् [V]सर्वपृष्ठः [V]अतिरात्रः दशममहः [V]भवति । पृष्ठसामानि रथन्तरादीनि रैवतान्तानि । विश्वजित् [५७]सहस्रदक्षिणालक्षणः ॥

॥ इति सप्तमे द्वितीये पञ्चमोऽनुवाकः ॥

त्रिणवाविति ॥ अथ सप्तमनवमेऽहनी विधत्ते - 'त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै' इति ॥ वक्ष्यमाणस्य [५७]त्रयस्त्रिंशाख्यस्याह्नः पूर्वोत्तरदिनयोस्त्रिणवस्तोमयुक्तौ [V]अग्निष्टोमौ कार्यौ । तत्र सर्वा अप्यृच ऐन्द्र्यस्तेन विजयो भवति ॥

त्रयस्त्रिꣳशा इति ॥ तयोरह्नोर्मध्यममष्टममहर्विधत्ते - 'त्रयस्त्रिꣳशो उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै' इति ॥ ऋचां सर्वासां वैश्वदेवत्वेन प्रतिष्ठासिद्धिः ॥

विश्वजिदिति ॥ अथ दशममहर्विधत्ते - 'विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै' इति ॥ [५८]गतम् ॥

[५९]इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः [५९] ॥

५७. मै. मै२. मै३. अ. अ१ - °दक्षिणादिलक्षणः ।

५७. मै - °त्रिंशस्याह्नः । ५८. मै - 'गतम्' नास्ति । ५९-५९. वै - इति द्वितीयप्रपाठके पञ्चमोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।

ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते प्रजामसृजन्त

ऋतवः । वै । प्रजाकामा इति प्रजा-कामाः । प्रजामिति प्र-जाम् । न । अविन्दन्त । ते । अकामयन्त । प्रजामिति प्र-जाम् । सृजेमहि । प्रजामिति प्र-जाम् । अवेति । रुन्धीमहि । प्रजामिति प्र-जाम् । विन्देमहि । प्रजावन्त इति प्रजा-वन्तः । स्याम । इति । ते । एतम् । एकादशरात्रमित्येकादश-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । प्रजामिति प्र-जाम् । असृजन्त ।

समाप्ता अहीनाः । अथ सत्राण्यारभन्ते उभयतोऽतिरात्राणि । तत्र [१]एकादशरात्रः, [२]तं विदधाति - 'ऋतवः' इत्यादि ॥ [V]ऋतवः वसन्तादयः [V]प्रजाकामाः [V]प्रजां [V]न [V]अविन्दन्त नालभन्त । [V]ते [V]अकामयन्त - [V]प्रजां [V]सृजेमहि [३]प्रजां स्रष्टुं समर्थाः स्याम, [V]प्रजाम् [V]अवरुन्धीमहि [४]नियन्तुं समर्थाः स्याम । [V]विन्देमहि लभेमहि । [V]प्रजावन्तः बहुप्रजाः [५]सत्प्रजाः [V]स्याम [V]इति । ततः [V]ते एकादशरात्रेण सर्वमलभन्त । [V]ततः ते ऋतवः [६]सर्वार्थहितलाभेन अभवन् भूतिमन्तः संपन्नाः । यद्वा - [V]ततः ते ऋतवः स्वैः स्वैः ऋतुधर्मैर्युक्ता

पञ्चमे दशरात्रोऽभिहितः । अथ षष्ठे एकादशरात्रोऽभिधीयते ॥

ऋतव इति ॥ तमेतं विधत्ते - ' ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै ते प्रजामसृजन्त प्रजामवारुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन् त ऋतवोऽभवन् तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मादार्तवा उच्यन्ते य एवं विद्वाꣳस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ' इति ॥ वसन्ताद्यृत्वभिमानिनो देवाः पुरा प्रजामिच्छन्तोऽपि [V]न [V]अलभन्त । [V]ते चतुर्विधां [१]कामनामकुर्वत । [V]प्रजां स्रष्टुं समर्था स्यामेत्येका कामना । ततोऽवरोद्धुं नियन्तुं समर्था स्यामेति

---

१. मै. मै१. मै२. मै३. अ - °दशरात्रम् । २. मै१ - अनु , मै मै२. मै३. अ - 'तम' नास्ति । ३. मै१ - 'प्रजाम्' नास्ति । ४. मै२ - यन्तुम् । ५. अ१ - सन् प्रजाः, मै१ - सत् प्र प्रजाः, मै२ - सत्प्रजावन्तः । ६. मै१ - सर्वाभिमतलाभेन ।

---

१. आ. - कामनावन्तः ।

प्रजामवारुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभवन् तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मा(१)दार्तवा उच्यन्ते य एवं विद्वाꣳस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते

प्रजामिति प्र-जाम् । अवेति । अरुन्धत । प्रजामिति प्र-जाम् । अविन्दन्त । प्रजावन्त इति प्रजा-वन्तः । अभवन् । ते । ऋतवः । अभवन् । तत् । आर्तवानाम् । आर्तवत्वमित्यार्तव-त्वम् । ऋतूनाम् । वै । एते । पुत्राः । तस्मात् (१) । आर्तवाः । उच्यन्ते । ये । एवम् । विद्वाꣳसः । एकादशरात्रमित्येकादश-रात्रम् । आसते । प्रजामिति प्र-जाम् । एव । सृजन्ते । प्रजामिति प्र-जाम् । अवेति । रुन्धते । प्रजामिति प्र-जाम् । विन्दन्ते ।

---

[७]ऋत्वनुरूपस्वभावभाजोऽभवन् । अथवा - [८]वसन्तादयः [९]ततः प्रभृति [V]ऋतवः [V]अभवन् । [१०]अरणात् ऋतवः एकादशरात्रेण सर्वाभिमतप्राप्त्या ऋतुव्यपदेशभाजोऽभवन्, [V]तत् [V]आर्तवानाम् [V]आर्तवत्वम् । ऋतुर्योनिगतो द्रव्यविशेषः, [११]ऋतूत्पत्तिहेतुभूतः कालो [१२]वा । यथा - " ऋत्वियात् प्रजां विन्दामहे " (तैसं २.५.१) इति । [१३]ऋतुभवाः सर्वाः [१४]प्रजाः आर्तवाः । यत्कामा इमे यज्ञमासते तेषां तत आर्तवत्वम् ऋतुप्रभवत्वम् ऋतुभ्यो [१५]वोत्पद्यमानत्वम् ॥

द्वितीया कामना । तत [२]उत्पादनेन [V]प्रजां लभेमहीति तृतीया कामना । ततः बह्वीभिः प्रशस्ताभिश्च प्रजाभिर्युक्ता अवतिष्ठेमेति चतुर्थी कामना । तेषामृतूनामेकादशरात्रेण तत् सर्वं [३]सिद्धम् । [V]ततः [V]ते वसन्ताद्या [V]ऋतवः [V]अभवन् । प्रजारूपां भूतिमैश्वर्यं प्राप्ताः । यस्मात् [V]एते सर्वे प्राणिनः [V]ऋतूनां [V]पुत्राः [V]तस्मात् [V]आर्तवाः इति [V]उच्यन्ते । ऋतुवदन्येषामपि यजमानानामेतत् सर्वं सिध्यति ॥

[४]अथ [५]चैकादशरात्रस्य सत्रलक्षणभूतयाऽपि [६-] चोदनया विधानात् [-६] सत्रत्वं द्रष्टव्यम् । नह्यत्र साध्यानां [७-] षड्रात्र इव [-७] धर्मातिदेशार्थेयमासि(?)चोदना । तद्वत् [८]अत्रातिदेश्यानां धर्मविशेषाणामश्रवणात् ।

---

७. मै२ - ऋतुत्मानृतुरूप° । ८. अ१ - वसन्तादयस्तु । ९. ['ततः ' इत्यारभ्यानुवाकसमाप्तिं यावद्भागः मै२ - कोशे नास्ति ।] १०. मै. मै२. मै३. अ. अ१ - अरणा । ११. अ१. मै१ - तदुत्पत्ति° । १२. अ१. मै१ - 'वा ' नास्ति । १३. मै१ - तद्भवाः । १४. मै२ - 'प्रजाः ' नास्ति । १५. [मै - मुद्रितपुस्तके 'ओत्पद्यमा° ' इत्यस्यानन्तर्यः अंशः त्रुटितः ।] ।

---

२. वा. उत्पादनं न । ३. म - बद्धम् । ४. अ. आ. इ. मै. वै - अस्य । ५. शृ१ - एकादश° । ६-६. शृ१. मै - सचोदनविधानात् । ७-७. शृ१ - 'षड्रात्र इव ' नास्ति । ८. मै - 'अत्र ' नास्ति ।

प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि

प्रजावन्त इति प्रजा-वन्तः । भवन्ति । ज्योतिः । अतिरात्र इत्यति-रात्रः । भवति । ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु-ख्यात्यै । पृष्ठ्यः । षडह इति षट्-अहः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि ।

[16]तदेवाह - ‘ऋतूनां वै’ इत्यादि ॥ Vएते सर्वे जन्मिनः Vपुत्राः तेषाम् Vऋतूनाम् । “ऋत्वियात् प्रजां [17]विन्दामहे” (तैसं २.५.१) । Vतस्मात् प्रजाः आर्तवशब्देन Vउच्यन्ते इति । ‘य एवं [18]विद्वांसः’ इत्यादि । गतम् ॥

‘ज्योतिः’ इत्यादिरहःक्लृप्तिः - ज्योतिःसंज्ञसमासादिलक्षणम् एकाहः तद्धर्मा Vअतिरात्रः प्रथममहः, यागारम्भ एव । ज्योतिर्धारणात् स्वर्गस्यानुक्रमेण प्रकाशः Vभवति इति ॥

‘पृष्ठ्यः’ इत्यादि ॥ द्वादशाहस्य द्वितीयदिवसप्रभृति Vपृष्ठ्यः Vषडहः । तत्र त्रिवृदग्निष्टोमो रथन्तरसामा प्रथमः । पञ्चदश उक्थ्यो बृहत्सामा द्वितीयः । सप्तदश उक्थ्यो वैरूपसामा

तस्मादयमृतूनामेकादशरात्रः सत्रम् । इतोऽन्ये शाखान्तरविहिता एकादशरात्रा अहीनाः ॥

ज्योतिरिति ॥ एतस्मिन्नृतूनामेकादशरात्रे प्रथममहर्विधत्ते - ‘ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै’ इति ॥ पूर्वं ज्योतिर्गौरायुरिति ज्योतिःशब्दाभिधेयो य एकाह उक्तस्तमेकाहमत्रातिरात्रसंस्थारूपं कुर्यात् । तथा सति प्रथममेव ज्योतिर्विधानात् स्वर्गं जिगमिषोर्यजमानस्य Vपुरस्तात् एव प्रकाशः कृतो भवति । तच्च स्वर्गलोकप्रकाशनाय भवति ॥

पृष्ठ्य इति ॥ अथ [9]द्वितीयादीनि सप्तमान्तान्यहानि विधत्ते - ‘पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति’ इति ॥ द्वादशाहे द्वितीयदिनमारभ्य सप्तमान्तेषु दिनेषु रथन्तरादिभिः षड्भिः पृष्ठैर्युक्तानि षडहानि विहितानि । [10]तानि चास्माभिः साध्यानां षड्रात्रप्रसङ्गेनोदाहृतानि । तेषां सङ्घः Vपृष्ठ्यः Vषडहः, सोऽत्र कर्तव्यः । तथा सति षट्संख्याद्वारेणर्तुप्राप्तिः । तद्द्वारा संवत्सरप्राप्तिः ॥

१६. मै. मै२. मै३. अ. अ१ - ‘तदेवाह’ नास्ति । १७. अ१ - तस्या चतुर्थभवत्वात्, मै१ - तत्त्वस्य च उक्तत्वात् ।
१८. मै. मै१. मै३. अ. अ१ - विद्वान् ।

९. अ. आ. इ. वा. वै - द्वितीयादिसप्तमा° । १०. मै - ‘तानि’ नास्ति ।

पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति चतुर्वि॒ꣳशो भवति चतुर्वि॒ꣳशत्यक्षरा गायत्री (२) गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारि॒ꣳशो भवति चतुश्चत्वारि॒ꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप्त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्यष्टाचत्वारि॒ꣳशो

पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिरित्यृतु-भिः । संवत्सरमिति सं-वत्सरम् । ते । संवत्सर इति सं-वत्सरे । एव । प्रतीति । तिष्ठन्ति । चतुर्वि॒ꣳश इति चतुः-वि॒ꣳशः । भवति । चतुर्वि॒ꣳशत्यक्षरेति चतुर्वि॒ꣳशति-अक्षरा । गायत्री (२) । गायत्रम् । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । गायत्रियाम् । एव । ब्रह्मवर्चस इति ब्रह्म-वर्चसे । प्रतीति । तिष्ठन्ति । चतुश्चत्वारि॒ꣳश इति चतुः-चत्वारि॒ꣳशः । भवति । चतुश्चत्वारि॒ꣳशदक्षरेति चतुश्चत्वारि॒ꣳशत्-अक्षरा । त्रिष्टुक् । इन्द्रियम् । त्रिष्टुप् । त्रिष्टुभि । एव । इन्द्रिये । प्रतीति । तिष्ठन्ति । अष्टाचत्वारि॒ꣳश इत्यष्टा-चत्वारि॒ꣳशः ।

तृतीयः । एकविंशः षोडशी उक्थ्यो वैराजसामा चतुर्थः । त्रिणवः उक्थ्यः शाक्वरसामा पञ्चमः । त्रयस्त्रिंश उक्थ्यो रैवतसामा षष्ठः । [V]पृष्ठानि रथन्तरादीनि । बृहत्सामा तृतीयः एकादशरात्र

चतुर्विंश इति ॥ अथाष्टममहर्विधत्ते - 'चतुर्वि॒ꣳशो भवति चतुर्वि॒ꣳशत्यक्षरा गायत्री गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति '[11]इति ॥ चतुर्विंशस्तोमयुक्तो रथन्तरसामा य उक्थ्यः सोऽयमत्राष्टममहः । [12-] तेन संख्याद्वारा गायत्रीं प्राप्य तद्द्वारा [V]ब्रह्मवर्चसे [V]प्रतितिष्ठन्ति इति [-12] ॥

चतुश्चत्वारिंश इति ॥ अथ नवममहर्विधत्ते - 'चतुश्चत्वारि॒ꣳशो भवति चतुश्चत्वारि॒ꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्ति ' इति ॥ चतुश्चत्वारिंशस्तोमयुक्तो बृहद्रथन्तरसामा य उक्थ्यः सोऽयमत्र नवममहः । तदनुष्ठानेन संख्याद्वारा त्रिष्टुप्प्राप्तिः । तद्द्वारा चेन्द्रियप्राप्तिः ॥

अष्टाचत्वारिंश इति ॥ अथ दशममहर्विधत्ते - 'अष्टाचत्वारि॒ꣳशो भवत्यष्टाचत्वारि॒ꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्ति ' इति ॥ अष्टाचत्वारिंशस्तोमयुक्तो बृहत्सामा य उक्थ्यः सोऽयमत्र दशममहः । तेन संख्याद्वारा जगतीं प्राप्य तद्द्वारा [V]पशुषु [13V]प्रतितिष्ठन्ति । तान्येतानि त्रीण्यहानि सूत्रकारेण स्पष्टमुदाहृतानि - " ततस्त्रीञ्छन्दोमानुक्थ्यान् [14]अन्वहमुपयन्ति चतुर्विंशं

---

११. वै 'इति 'नास्ति । १२-१२. अ. आ. पा. इ. वा. वै - तथा सति चतुर्विंशतिसंख्याद्वारा गायत्रीप्राप्तिः । तद्द्वारा च ब्रह्मवर्चसप्राप्तिः । १३. मै - प्रतिष्ठति । १४. मै - अहमुपयन्ति ।

भवत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्येकादशरात्रो भवति

भवति । अष्टाचत्वारिꣳशदक्षरेत्यष्टाचत्वारिꣳशत्-अक्षरा । जगती । जागताः । पशवः । जगत्याम् । एव । पशुषु । प्रतीति । तिष्ठन्ति । एकादशरात्र इत्येकादश-रात्रः । भवति ।

इति । ᵛअतिरात्रौ ᵛअभितः ᵛभवतः इति, अतिरात्रमेकादशं वक्ष्यामीति मन्यते [१९]इत्यादि ॥

चतुश्चत्वारिंशमष्टाचत्वारिंशमिति रथन्तरसामा प्रथमो बृहद्रथन्तरसामा द्वितीयो बृहत्सामा तृतीयः" (आपश्रौ २१.८.११-१२) इति । छन्दोभिर्गायत्रीत्रिष्टुब्जगतीभिरक्षरसंख्याद्वारा मीयन्ते परिच्छिद्यन्ते इति [१५]चतुर्विंशतिस्तोमश्छन्दोमाः । तत्र चतुर्विंशस्तोमस्य विष्टुतिः सामब्राह्मण एवमाम्नायते - " अष्टाभ्यो हिं करोति स तिसृभिः स चतसृभिः स एकया, अष्टाभ्यो हिं करोति स एकया स तिसृभिः स चतसृभिः, अष्टाभ्यो हिं करोति स चतसृभिः स एकया स तिसृभिः, पशवो वै छन्दोमा [१६]यदष्टाभ्यो हिं करोत्याष्टाशफाः पशवः" (तांब्रा ३.८.१-२) इति । स एकस्मिंस्तृचे प्रथमपर्याये प्रथमामृचं त्रिः पठेत् । द्वितीयां चतुः पठेत् । तृतीयां सकृत् पठेत् । द्वितीयपर्याये सकृत् त्रिश्चतुश्चेति क्रमः । तृतीयपर्याये चतुः सकृत् त्रिश्चेति क्रमः । चतुश्चत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते - " पञ्चदशभ्यो हिं करोति स तिसृभिः स एकादशभिः स एकया, चतुर्दशभ्यो हिं करोति स एकया स तिसृभिः स दशभिः, पञ्चदशभ्यो हिं करोति स एकादशभिः स एकया स तिसृभिः" (तांब्रा ३.९.१) इति । अत्र प्रथमपर्याये [१७]"त्रिरेकादशकृत्वः सकृदिति क्रमः [१७] । द्वितीयपर्याये सकृत् त्रिर्दशकृत्वः । तृतीयपर्याये एकादशकृत्वः सकृत् त्रिः । अष्टाचत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते - " षोडशभ्यो हिं करोति स तिसृभिः स द्वादशभिः स एकया, षोडशभ्यो हिं करोति स एकया स तिसृभिः स द्वादशभिः, षोडशभ्यो हिं करोति स द्वादशभिः स एकया स तिसृभिः, [१८] अन्तो वा [१८] [१९]अष्टाचत्वारिंशाः पशवश्छन्दोमाः" (तांब्रा ३.१२.१-२) इति । अत्र प्रथमपर्याये त्रिर्द्वादशकृत्वः सकृत् । द्वितीयपर्याये सकृत् त्रिर्द्वादशकृत्वः । तृतीयपर्याये द्वादशकृत्वः सकृत् त्रिः । एवं[२०]विधैः छन्दोमैरष्टमनवमदशमानि [२१]अहानि

---

१९. अ१ - जात्यादि ।

---

१५. आ - चतुर्विंशादिस्तोमाः छन्दोमाः, प - चतुर्विंशादीप्तिमा छन्दोमाः । १६. मै - यदष्टाभ्यो अष्टाभ्यो । १७-१७. म - त्रिसकृदेकादशकृत्व इति क्रमः । १८-१८. अ. पा. इ. वा - एता वा । १९. शृ१ - °रिंशात्, अ. पा. इ. वा - °रिंशाः । २०. वै - विविधैः । २१. म - उक्तानि ।

पञ्च वा ऋतवः आर्तवाः पञ्चर्तुष्वेवाऽऽर्तवेषु संवत्सरे प्रतिष्ठाय प्रजामव

~~~~~~~~~~~~~~~~~~~~

पञ्च । वै । ऋतवः । आर्तवाः । पञ्च । ऋतुषु । एव । आर्तवेषु । संवत्सर इति सं-वत्सरे । प्रतिष्ठायेति प्रति-स्थाय । प्रजामिति प्र-जाम् । अवेति ।

~~~~~~~~~~~~~~~~~~~~

'पञ्च वै '[२०]इत्यादि ॥ Vऋतवः Vपञ्च । Vआर्तवाः [२१]ऋतुस्वभावाश्च Vपञ्च । [२२]प्रजायाः उभयतः परिग्रहार्थं च यागसाध्याः प्रजाः - आद्यवसानयोः अतिरात्राभ्यां परिगृह्यते परितो रक्ष्यते इति । तस्मात् प्रजापरिग्रहार्थम् उभयतोऽतिरात्रं भवतीति ॥

॥ इति सप्तमे द्वितीये षष्ठोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

निष्पाद्यानि ॥

एकादशरात्र इति ॥ वक्ष्यमाणमेकादशम् [२२]अपि अहर्हृदि निधाय तेन सहितमेकादशरात्रं प्रशंसति - 'एकादशरात्रो भवति पञ्च वा ऋतव आर्तवा पञ्चर्तुष्वेवाऽऽर्तवेषु संवत्सरे प्रतिष्ठाय प्रजामव रुन्द्धते ' इति ॥ अस्य क्रतोर्द्रष्टारो वसन्ताद्यृतुदेवताः [२३]पञ्चसंख्याकास्तैः संपादिताः पुष्पोद्गमादयः [२४]ऋतुसंबन्धिनः स्वभावाः पञ्चसंख्याकाः । एवं मिलित्वा दश संपन्नाः । संवत्सर एकादशः । [२५]एतेषु

~~~~~~~~~~~~~~~~~~~~

२०. मै१ - इत्यादिः, अ१ - ' इत्यादि ' नास्ति । २१. मै१ - °वाच्य । २२. मै१ - प्रयाजाः ।

~~~~~~~~~~~~~~~~~~~~

२२. शृ१ - 'अपि 'नास्ति । २३. आ. शृ१ - °कास्तैर्देवैः । २४. मै - ऋतवः संबन्धिनः । २५. अ. आ. पा. इ. वा. वै - एतेन ।
~~~~~~~~~~~~~~~~~~~~

रुन्धतेऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै ॥६॥

(एते पुत्रास्तस्माद्गायत्र्येकान्नपञ्चाशच्च ।)

रुन्धते । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । प्रजाया इति प्र-जायै । परिगृहीत्या इति परि-गृहीत्यै ॥६॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

सर्वेष्वेकादशरात्रानुष्ठानेन प्रतिष्ठां प्राप्य पश्चात् [२६-] प्रजां प्राप्नुवन्ति [-२६] ॥

अतिरात्राविति ॥ अथैकादशमहर्विधत्ते - 'अतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै ' इति ॥ एकोनत्रिंशस्तोमयुक्तो योऽयमतिरात्र एकाहविशेषः [२७]सोऽयमेवैकादशमहः । ज्योतिरतिरात्रो [२८-] भवतीत्युक्तेन प्रथमेनाह्ना सह [२९]निर्देशात् [V]अतिरात्रौ इति [३०]द्विवचननिर्देशः[-२८] । [३१]सत्रलिङ्गस्योभयतोऽतिरात्रत्वस्य ख्यापनाय प्रजासाधनस्य क्रतोरुभयतोऽतिरात्रत्वे सति [३२]फलभूतायाः प्रजायाः उभयतो रक्षा परिगृहीता भवति ॥

[३३-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः[-३३] ॥

२६-२६. मै - प्रज्ञां प्राप्नोति । २७. अ. आ. पा. इ. वा. वै - सोऽयमत्रैकादशमहः । २८-२८. म - भवतीत्यस्य द्विवचनेन निर्देशः । २९. मै - निर्देशाय । ३०. शृ१. मै - द्विवचनं, स च निर्देशः । ३१. म - अत्र लिङ्गस्यो° । ३२. मै - पटलभूतायाः । ३३-३३. वै - इति सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः, मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ।

ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति

ऐन्द्रवायवाग्रानित्यैन्द्रवायव-अग्रान् । गृह्णीयात् । यः । कामयेत । यथापूर्वमिति यथा-पूर्वम् । प्रजा इति प्र-जाः । कल्पेरन् । इति । यज्ञस्य । वै । क्लृप्तिम् । अन्विति । प्रजा इति प्र-जाः । कल्पन्ते । यज्ञस्य । अक्लृप्तिम् । अन्विति । न । कल्पन्ते । यथापूर्वमिति यथा-पूर्वम् । एव । प्रजा इति प्र-जाः । कल्पयति ।

अतः परं द्वादशाहप्रकरणम् । एते काम्या [1]ग्रहाग्रताविधयः । केचिन्नैमित्तिकाः [2]- बृहत्पृष्ठपक्षे नियमार्थाः -[2] । 'ऐन्द्रवायवाग्रान्' इत्यादि ॥ ऐन्द्रवायवप्रथमान् Vगृह्णीयात्, सामर्थ्याद्ग्रहानिति गम्यते । वक्ष्यति च - 'पूर्णान् ग्रहान् गृह्णीयात्' इति । Vयथापूर्वम् पूर्वानतिवृत्त्या [3]तेन एव क्रमेण Vकल्पेरन् [4]वर्तेरन् । नासामञ्जस्येन । पदार्थानतिवृत्त्याऽव्ययीभावः । यथा सादृश्ये - यथा [5]Vपूर्वाः प्रजाः [6]पूर्वपुरुषसंबधिन्यः प्रवर्तन्ते एवं मम प्रवर्तन्तामिति विपर्ययस्याप्रसङ्गार्थं प्रसक्तस्य वा निवृत्त्यर्थम् । तेनेयं कामे निमित्ते वा ग्रहाग्रता । 'यज्ञस्य' इति । Vयज्ञस्य क्लृप्तिः

षष्ठेऽनुवाके एकादशरात्रोऽभिहितः । अथ सप्तममारभ्य दशमान्तेषु चतुर्षु [1]अनुवाकेषु द्वादशरात्रोऽभिधीयते ॥ [2]तत्रास्मिन् सप्तमे काम्यग्रहानुष्ठानप्रकारा उच्यन्ते ।

ऐन्द्रवायवाग्रानिति ॥ तत्र प्रथममेकं प्रकारं विधत्ते - 'ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायाꣳसं कनीयानति क्रामति' इति । [3]- पूर्वे पितृपितामहादयो -[3] यादृश [4]आचारे प्रवृत्तास्तादृश एवाचारे पुत्रपौत्रादीनां प्रजानां च प्रवृत्तिर्यथापूर्वत्वम् । एतत् कामयमानो द्विदेवत्यग्रहेष्वादावैन्द्रवायवग्रहं Vगृह्णीयात् । यद्यपि नित्यप्रयोगेऽपि तदग्रत्वमस्ति तथापि कामसंयोगार्थं पुनर्विधानम् । यथाऽग्निहोत्रे "[5]दध्ना जुहोति" इति सत्यपि नित्यविधौ [6]दध्नेन्द्रियकामस्येति पुनर्विधानं

---

१. मै१. गुणभूता विषयः । २-२. अ१ - बृहत्पठिता छन्दोमार्थाः । ३. अ१ - 'तेन' नास्ति । ४. मै. मै१. मै२. मै३. अ - 'वर्तेरन्' नास्ति । ५. अ१ - 'पूर्वाः' नास्ति । ६. अ१ - पूर्वसंबधिन्यः ।

---

१. वै 'अनुवाकेषु' नास्ति । २. मै - अत्रास्मिन् । ३-३. मै - 'पूर्वे - - - - महादयः' नास्ति । ४. मै - नानाचारे, वै - आचारप्रवृत्ता° । ५. मै - वह्ना । ६. मै - वह्नेन्द्रिय° ।

न ज्यायां॑ऽसं कनी॑यानति॑ क्रामत्यैन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृ॑ध्यते यस्या॑ऽऽमय॑ति प्राण ऐन्द्रवायवः प्राणेनैवैन॑ऽ सम॑र्धयति

न । ज्यायां॑ऽसम् । कनी॑यान् । अतीति॑ । क्रामति । ऐन्द्रवायवाग्रानित्यैन्द्रवायव-अग्रान् । गृह्णीयात् । आमयाविनः । प्राणेनेति॑ प्र-अनेन॑ । वै । एषः । वीति॑ । ऋध्यते । यस्य॑ । आमय॑ति । प्राण इति॑ प्र-अनः । ऐन्द्रवायव इत्यैन्द्र-वायवः । प्राणेनेति॑ प्र-अनेन॑ । एव । एनम् । समिति॑ । अर्धयति ।

सम्यक्त्वं, तेन हेतुना Vप्रजाः Vकल्पन्ते सम्यग्वर्तन्ते, यज्ञाक्लृप्त्या च Vन Vकल्पन्ते। “[७]तृतीयार्थे” (पा १.४.८५) इति हेतौ अनोः कर्मप्रवचनीयत्वम्। तस्मादैन्द्रवायवाग्रतया Vयथापूर्वं Vप्रजाः Vकल्पयति । ऐन्द्रवायवस्य [८]ग्रहाणां प्रधानत्वात् तदग्रतया न किञ्चिदसामञ्जस्यमिति । तदेवाह - ‘न ज्यायांसम्’ इति ॥

द्वितीयः [९]पक्षोऽसामञ्जस्याभावोदाहरणप्रदर्शनार्थम् । आमयावी रोगवान् । “ बहुलं छन्दसि ” (पा ५.२.१२२) इति विनिः “ अन्येषामपि दृश्यते ” (पा ६.३.१३७) इति दीर्घः । ‘यस्यामयति’ इति । आमय इति शेषः । “ रुजार्थानाम्°” (पा २.३.५४) इति कर्मणि षष्ठी । प्राणात्मन ऐन्द्रवायवस्य [१०]प्रधानत्वात् [११-]तदग्रतो ग्रहणात्[-११] प्रथमत एव प्राणवन्तमेनं करोति ॥

तद्वत् । Vयज्ञस्य सम्यक् प्रवृत्त्या तत्फलभूतानां प्रजानां [७-] प्रवृत्तिः समीचीना भवति [-७] । यज्ञस्य विपर्यये प्रजानामपि विपर्ययो भवति । [८]तस्मादैन्द्रवायवाग्रत्वे Vप्रजाः Vयथापूर्वम् Vएव प्रवर्तन्ते । Vन तु ज्यायासं पितरं पितामहं वा Vकनीयान् कश्चिदपि Vअतिक्रामति ॥

ऐन्द्रवायवाग्रानिति ॥ उक्तमेव प्रकारं रोगनिवृत्त्यर्थं विधत्ते - “ ऐन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽमयति प्राण ऐन्द्रवायवः प्राणेनैवैनऽ समर्धयति ” इति ॥ यस्य पुरुषस्य रोगो [९]वर्तते सः [१०]Vप्राणेन विमुक्तो भवति प्राणस्य निर्गन्तुमुद्युक्तत्वात् । ऐन्द्रवायवस्य प्राणरूपत्वं ‘प्राण ऐन्द्रवायवः’ इत्यादिश्रुतिबलादवगन्तव्यम् । वागपि हि प्राणविशेष एव । अत ऐन्द्रवायवस्य प्राथम्येन प्राणस्य समृद्धौ [११]सत्यां रोगो निवर्तते ॥

७. मै१. अ१ - द्वितीयार्थे । ८. अ१ - ग्रहणम् । ९. अ१ - °प्रदर्शनः । १०. अ१ - प्रथमग्रहणात् । ११-११. अ१ - ‘तदग्रतोग्रहणात्’ नास्ति ।

७-७. शृ१ - ‘प्रवृत्तिः - - - - भवति’ नास्ति । ८. मै - °न्द्रवायवत्वे । ९. आ - भवति, अ. पा. इ. वा. वै - ‘वर्तते’ नास्ति । १०. मै - प्राणो न । ११. वै - सताम् ।

मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत (१) प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान् गृह्णीताऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ

मैत्रावरुणाग्रानिति मैत्रावरुण-अग्रान् । गृह्णीरन् । येषाम् । दीक्षितानाम् । प्रमीयेतेति प्र-मीयेत (१) । प्राणापानाभ्यामिति प्राण-अपानाभ्याम् । वै । एते । वीति । ऋध्यन्ते । येषाम् । दीक्षितानाम् । प्रमीयत इति प्र-मीयते । प्राणापानाविति प्राण-अपानौ । मित्रावरुणाविति मित्रा-वरुणौ । प्राणापानाविति प्राण-अपानौ । एव । मुखतः । परीति । हरन्ते । आश्विनाग्रानित्याश्विन-अग्रान् । गृह्णीत । आनुजावर इत्यानु-जावरः । अश्विनौ । वै । देवानाम् । आनुजावरावित्यानु-जावरौ ।

मैत्रावरुणाग्रान् गृह्णीरन् ' इति ।। सत्र एव, बहुवचनात् । [V]येषां [V]दीक्षितानां मध्ये कश्चित् [V]प्रमीयेत एकस्य मरणेन सर्वे [V]प्राणापानाभ्यां [V]व्यृध्यन्ते । तस्मात् प्राणापान-भूतयोर्मित्रवरुणयोः प्राथम्यात् [V]प्राणापानौ [V]एव [V]मुखतः [V]परिहरन्ते, आरभ्य समादधते, [V]न ताभ्यां विनियुज्यन्ते ।।

मैत्रावरुणाग्रानिति ।। अथ नैमित्तिकं कंचिद्ग्रहप्रकारं विधत्ते - मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्ते ' इति ।। सत्ररूपे द्वादशाहे [V]दीक्षितानां मध्ये यदि कश्चित् म्रियेत तदा [12]तन्मरणं निमित्तीकृत्येतरे दीक्षिताः प्रथमं मैत्रावरुणं गृहीत्वा पश्चादैन्द्रवायवं प्रयुञ्जीरन् । सर्वैः सहानुष्ठातुमुपक्रान्तत्वादेकस्मिन्नपि मृते सत्यन्येषां प्राणापानौ [13]शिथिलाविव भवतः । मित्रावरुणयोः प्राणापानाभिमानित्वात् तदीयग्रहस्य प्राथम्ये सत्यादित एव [V]प्राणापानौ परितः [14]समादधते ।।

अश्विनाग्रानिति ।। अथापकर्षपरिहारार्थं प्रकारान्तरं विधत्ते - ' आश्विनाग्रान् गृह्णीता-ऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परि णयतः ' इति ।। स्वयं सर्वेषामग्रजत्वेन पूज्यः सन् [15]अपि [16]अनुजवदवरो भूत्वा यः सर्वैस्तिरस्क्रियते

१२. [अस्माभिः शुद्धीकृत्य प्रदत्तोऽयं पाठः । आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'तस्मिन्मरणम्' इति पाठ उपलभ्यते ।] । १३. अ. पा. इ. वा. वै - शिथिलानीव । १४. मै - समाधत्ते । १५. मै - 'अपि' नास्ति । १६. पा .इ. वा. वै - अनुजपदपरो, अ - अनुजपदपरा ।

पश्चेवाग्रं पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परिणयतः शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र

पश्चा । इव । अग्रम् । परीति । ऐताम् । अश्विनौ । एतस्य । देवता । यः । आनुजावर इत्यानु-जावरः । तौ । एव । एनम् । अग्रम् । परीति । नयतः । शुक्राग्रानिति शुक्र-अग्रान् । गृह्णीत । गतश्रीरिति गत-श्रीः । प्रतिष्ठाकाम इति प्रतिष्ठा-कामः । असौ । वै । आदित्यः । शुक्रः ।

'आश्विनाग्रान्' इत्यादि ॥ [V]आनुजावरः उत्तमः सन् समानानां [१२-] मध्ये यः कश्चन [-१२] पश्चाज्जातः आनुजावरः । सान्नाय्यानुजावरानुष्टुभादीनां स्वार्थिकोऽण् । [V]अश्विनौ हि [V]देवानाम् [V]आनुजावरौ । पश्चाद्देवानाम् [१३][V]अग्रं श्रैष्ठ्यं [V]पर्यैताम् [१४]अभजताम् । "पश्च पश्चा च छन्दसि" (पा ५.३.३३) इति पश्चशब्दो निपात्यते । 'अश्विनावेतस्य देवताः' इत्यादि । [१५]गतम् ॥

'शुक्राग्रान्' इत्यादि ॥ गता प्राप्ता श्रीर्येन सः [V]गतश्रीः । शुश्रुवान् ग्रामणी राजन्यः सः [V]प्रतिष्ठाकामः श्रियः स्थिरत्वं कामयमानः [१६-] न ह्रसेदियम्, अपि तु प्रकर्षकाष्ठां [-१६] गच्छेदिति । 'एषोऽन्तः' इति । [V]एषः आदित्यः श्रियः [V]अन्तः [१७]प्रकर्षकाष्ठा । [१८]तत्कारित्वात्ताच्छब्द्यम् । तस्मात् अनया शुक्राग्रतया [१९-][V]मनुष्यः श्रियः [-१९] [२०][V]अन्तं प्रकर्षकाष्ठां

सोऽयम् [V]आनुजावरः । स चाश्विनं ग्रहं प्रथमं प्रयुज्य पश्चादैन्द्रवायवादीन् प्रयुञ्जीत । [V]देवानां मध्ये [V]अश्विनौ [V]आनुजावरौ स्वयं देवत्वेन पूज्यौ सन्तावपि भिषक्त्वेनावरत्वमापन्नौ । अत एवान्यत्राऽऽम्नातम् - [१७-] " अपूतौ वा इमौ मनुष्यचरौ भिषजाविति " (तैसं ६.४.९) इति । तथाविधावश्विनौ पश्चात् कालान्तरे [V]अग्रम् [V]इव [V]पर्यैताम् श्रैष्ठ्यमेव प्राप्तवन्तौ । एतदपि तत्रैवाऽऽम्नातम् [-१७] - " तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन् " (तैसं ६.४.९) इति । एवं सति [V]यः [V]आनुजावरः [१८]अस्त्येतस्य समानस्वभावत्वादश्विनौ देवता । तदीयग्रहस्याग्रत्वे सत्यश्विनौ [V]एव [V]एनं यजमानं श्रैष्ठ्यं प्रापयतः ॥

१२-१२. मै. मै१. मै३.अ - अवरत्वेन । १३. मै१ - अग्रम् । १४. अ१ - अगच्छताम् । १५. मै१ - गतम् । गतश्रीः । १६-१६. मै१ - मम भूयसा असेदियं(?) विप्रकर्ष° । १७. मै२ - प्रविष्टकाष्ठम् । १८. मै. मै१. मै३. अ. अ१ - तत्कार्यत्वा° । १९-१९. मै२ - 'मनुष्यः श्रियः' नास्ति । २०. मै२ - अन्तः ।

१७-१७. इ. वै - 'अपूतौ वा - - - - °म्नातम्' नास्ति । १८. शृ१ - एवं तस्य ।

एषोऽन्तोऽन्तं मनुष्यः (२) श्रियै गत्वा नि वर्ततेऽन्तादेवान्तमा रभते न ततः पापीयान् भवति

एषः । अन्तः । अन्तम् । मनुष्यः (२) । श्रियै । गत्वा । नीति । वर्तते । अन्तात् । एव । अन्तम् । एति । रभते । न । ततः । पापीयान् । भवति ।

[V]गत्वा [२१-V]निवर्तते, तन्नियम[न ?]मत्र वर्तते [-२१] [२२-] यद्वा-व्यावर्तयते मनु[ष्य]मात्रात् । तदेवाह - 'अन्तात्' इति [-२२] । [२३-] [V]अन्तात् [V]एव [-२३] [२४]आदित्यादेव पुनरपि [२५V]अन्तं प्रकर्षकाष्ठाम् [V]आरभते । यद्वा - पूर्वप्रकर्षकाष्ठायाः उपरि पुनरपरां [२६]प्रकर्षकाष्ठामारभते । [२७]ततः परं [V]पापीयान् [२८V]न [V]भवति, न ह्रसतीति यावत् । अथवा गतश्रीर्दरिद्रः गता नष्टा श्रीरस्येति । [२९]सः प्रतिष्ठाकामः । 'एषोऽन्तः' इति । [V]एषः आदित्यः श्रियः [V]अन्तः अन्तकारीति [३०]पापहेतुः । तस्मात् श्रियः अन्तं दारिद्र्यकाष्ठामपि गत्वा स्थितोऽपि [३१-] मनुष्यः अनया [-३१] ग्रहाग्रतया ततो

शुक्राग्रानिति ॥ अथ प्रतिष्ठार्थं प्रकारान्तरं विधत्ते - [१९-]'शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्रः एषोऽन्तोऽन्तं मनुष्यः श्रियै गत्वा नि वर्ततेऽन्तादेवान्तमा रभते न ततः पापीयान् भवति' इति ॥ यो नष्टश्रीकः सन् पुनः प्रतिष्ठां कामयते सोऽयं शुक्रमादौ [२०]गृह्णीयात् । [२१]दीप्तिमत्त्वात् [V]असौ [V]आदित्यः [V]शुक्रः । [V]एषः एव प्रकाशानाम् [V]अन्तः [२२]काष्ठा । न ह्यादित्यादधिकः [२३-] प्रकाशः कश्चिदस्ति [-२३] । [२४]अतः शुक्राग्रत्वेन मनुष्यश्रिया [V]अन्तं काष्ठां प्राप्य पूर्वस्माद्दारिद्र्यान्निवर्तते [२५]प्रकाशपरमकाष्ठारूपादादित्यात् [V]एव [२६]संपत्परमकाष्ठां प्राप्नोति । [V]ततः ऊर्ध्वं कदाचिदपि दरिद्रः [V]न [V]भवति ॥

२१-२१. मै२ - निवर्तनाय तत्र वर्तन्ते । २२-२२. मै२ - एवं तत्तन्मनुष्यमात्राः न तेया(?) अन्तादिवन्ति । २३-२३. मै१ - अन्तादेः । २४. मै२ - 'आदित्यादेव' नास्ति । २५. मै२ - तु । २६. अ१ - °रभते न, मै१ - °रभते तेन । २७. मै२ - तत् । २८. अ१. मै१ - 'न' नास्ति । २९. अ१. मै१ - 'सः' नास्ति । ३०. अ१ - पातहेतुः, मै२ - पानहेतुः । ३१-३१. मै२ - मनुष्यान्तया ।

१९-१९. मै - 'शुक्राग्रान् - - - - विधत्ते' नास्ति । २०. अ. आ. पा. इ. वा. वै. म - °यादिति । २१. म - दीप्तिमान् । २२. अ. आ. पा. इ. वा. वै - काष्ठान्तिमः । २३-२३. अ. आ. पा. इ. वा. वै. म - प्रकाशोऽस्ति । २४. अ - 'अतः' नास्ति । २५. वै - प्रकाशकरूपा° । २६. म - सम्यक्परम° ।

मन्थ्यंग्रान् गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्छत्याग्रयणाग्रान् गृह्णीत यस्यं पिता पितामहः पुण्यः स्यादथ

मन्थ्यंग्रानिति मन्थि-अग्रान् । गृह्णीत । अभिचरन्नित्यंभि-चरन् । आर्तपात्रमित्यार्त-पात्रम् । वै । एतत् । यत् । मन्थिपात्रमिति मन्थि-पात्रम् । मृत्युना । एव । एनम् । ग्राहयति । ताजक् । आर्तिम् । एति । ऋच्छति । आग्रयणाग्रानित्याग्रयण-अग्रान् । गृह्णीत । यस्य । पिता । पितामहः । पुण्यः । स्यात् । अथ ।

निवर्तते । कुत इत्याह - अन्तादेव ततो दारिद्र्यात् [३२]निवर्तते एव । हेतुमाह - 'अन्तमारभते' इति । शुक्राग्रतया [३३-] ह्यन्तकारिणमादित्यमारभते प्रथमतो गच्छति [-३३] । तस्मात् ततः प्रभृति Vपापीयान् [३४]दरिद्रो न भवतीति ॥

'मन्थ्यग्रान्' इति ॥ 'आर्तपात्रम्' इति । [३५]आर्तकारं पात्रम् Vआर्तपात्रम् । [३६]पात्रमेवाभिचर्यमाणं मृत्युना Vग्राहयति । मन्थ्यग्रतया स तदानीमेव Vआर्तिं गच्छति, [३७]एतेन [३८-] गच्छति अन्यः आर्तिकर्मा ॥

'यस्य पिता' इत्यादि [-३८] ॥ Vयस्य [३९]Vपिता Vपितामहः Vच Vपुण्यः Vस्यात् पुण्यतरो भवति । Vअथ अपि Vतत् पुण्यतरत्वं [४०]स्वयं Vयः Vन प्राप्नुयात् ऊन एव स्याद्विद्याधनादिभिः सः Vआग्रयणाग्रान् Vगृह्णीत इति । 'वाचा' इत्यादि । Vवाचा Vइन्द्रियेण वीर्येण च [४१]Vएषः Vव्यृद्ध्यते

मन्थ्यग्रानिति ॥ अभिचारहेतुं प्रकारं विधत्ते [-१९] - 'मन्थ्यग्रान् गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्छति' इति ॥ Vअभिचरन् मन्थिनमादौ गृह्णीयात् । परस्याऽऽर्तत्वप्रापणादिदम् Vआर्तपात्रम् । तदग्रत्वेन वैरिणं मृत्युगृहीतं करोति । स च वैरी तदानीमेव मृत्युं प्राप्नोति ॥

आग्रयणाग्रानिति ॥ स्वकीयपित्रादिसमानोत्कर्षप्राप्त्यर्थं प्रकारान्तरं विधत्ते - 'आग्रयणाग्रान् गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान्

३२. मै२ - ततः । ३३-३३. मै२ - प्रथमतो यजमाने । ३४. मै२ - दरिद्री । ३५. अ१ - आर्तकारी । ३६. मै१ - एवाभि° । ३७. अ१ - एकोन, मै२ - एकः । ३८-३८. मै२ - गतिसामान्यकारी । ३९. मै२ - पिता च । ४०. मै१ - 'स्वयम्' नास्ति । ४१. मै१ - 'एषः' नास्ति ।

तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो (३) भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान् भवत्युक्थ्याग्रान् गृह्णीताभिचर्यमाणः

तत्। न। प्राप्नुयादिति प्र-आप्नुयात्। वाचा। वै। एषः। इन्द्रियेण। वीति। ऋध्यते। यस्य। पिता। पितामहः। पुण्यः (३)। भवति। अथ। तत्। न। प्राप्नोतीति प्र-आप्नोति। उरः। इव। एतत्। यज्ञस्य। वाक्। इव। यत्। आग्रयणः। वाचा। एव। एनम्। इन्द्रियेण। समिति। अर्धयति। न। ततः। पापीयान्। भवति। उक्थ्याग्रानित्युक्थ्य-अग्रान्। गृह्णीत। अभिचर्यमाण इत्यभि-चर्यमाणः।

---

[42]वियुज्यते। वाचा वीर्येण [43]च वियुक्तः पुरुषः तथा [V]भवति। 'उर इव' इत्यादि। आग्रयणग्रहोऽपि [V]उरः [44V]इव वीर्यस्थानमिव [V]यज्ञस्य [V]वाक् [V]इव, [45]तद्ग्रहणानन्तरं वाचः विसर्गात्। [46]तस्मादाग्रणाग्रतया [47]वागादिभिरेनं [V]समर्धयति, [V]ततः परं [V]पापीयान् [V]न [V]भवति, तदैव पुण्यं प्राप्नोति वागिन्द्रियसंपत्त्या ॥

'सर्वेषाम्' इत्यादि ॥ [V]सर्वेषां [48V]पात्राणाम् [49V]इन्द्रियं वीर्यम् [50V]उक्थ्यपात्रम् इन्द्रियसंबन्धात्। [V]सर्वेण वीर्येण [51V]एनम् अभिचरितारम् [V]अतिप्रयुङ्क्ते अतिक्रम्य प्रयुङ्क्ते ॥

भवति' इति ॥ [V]यस्य यजमानस्य पितृपितामहौ [27]धनविद्यादिभिर्गुणैरुत्कृष्टौ स्वयं तु [28V]तत् उत्कर्षं यदि नाऽऽप्नोति तादृश आग्रयणं प्रथमं गृह्णीयात्। पित्रादेरुत्कर्षे सति स्वयमुत्कर्षहीनः सभामध्ये वाक्पाण्डित्येनेतरव्यवहारेष्विन्द्रियसामर्थ्येन वियुक्तः [V]आग्रयणः तु [V]यज्ञस्य उरःप्रदेशवत् सामर्थ्याधारो वागिन्द्रियवदुत्कर्षहेतुश्च। अतस्तदग्रत्वेनैनं यजमानं [29]सभापाण्डित्यरूपया [V]वाचा व्यवहारान्तरसामर्थ्यरूपेण [V]इन्द्रियेण च समृद्धं करोति। तत ऊर्ध्वं कदाचिदपि तदुभयहीनः [V]न [V]भवति ॥

---

४२. मै२ - युज्यते। ४३. मै२ - 'च' नास्ति। ४४. मै१ - 'इव' नास्ति। ४५. मै२ - जनस्य ग्रहणा°। ४६. मै१ - °दाग्रयणतया। ४७. मै१ - आभ्यामेनम्। ४८. अ१. मै१ - पात्राणामुक्थ्यपात्रम्। ४९. मै२ - 'इन्द्रियम्' नास्ति। ५०. अ१. मै१ - 'उक्थ्यपात्रम्' नास्ति। ५१. अ१. मै१ - ऊनः सन्।

---

२७. अ. पा - धर्मविद्यादिभिः। २८. आ. म - तम्। २९. अ. आ. पा. वा. वै. म - सदा पाण्डित्यरूपया, इ - पाण्डित्यर्थम्।

सर्वेषां वा एतत् पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै (४) सरस्वती वाचैवैनमति प्र युङ्क्ते

सर्वेषाम् । वै । एतत् । पात्राणाम् । इन्द्रियम् । यत् । उक्थ्यपात्रमित्युक्थ्य-पात्रम् । सर्वेण । एव । एनम् । इन्द्रियेण । अति । प्रेति । युङ्क्ते । सरस्वति । अभीति । नः । नेषि । वस्यः । इति । पुरोरुचमिति पुरः-रुचम् । कुर्यात् । वाक् । वै (४) । सरस्वती । वाचा । एव । एनम् । अति । प्रेति । युङ्क्ते ।

'पुरोरुचम्' इति ॥ पुरस्ताद्रोचयति ग्रहमिति पुरोरुक् । "[५२]सरस्वत्यभि नः" (तैब्रा २.४.३) इति [V]पुरोरुचं [V]कुर्यात् । नित्यो निवर्तते, "उपयामगृहीतः" (तैसं १.४.३) [५३]इति । 'वाग्वै' इत्यादि । [५४-] मन्त्रनिर्वचनं कृतम् । तत्रार्थस्तु [-५४] - हे [V]सरस्वति अस्मानाभिमुख्येन [५५][V]वस्यः वरिष्ठं प्राणादिकं प्रापय । मा चास्मान् [५६]पस्फरीः हिंसीः । मा चास्मानागत्य पयसा

उक्थ्याग्रानिति ॥ परकीयाभिचारनिवृत्यर्थं प्रकारान्तरं विधत्ते - 'उक्थ्याग्रान् गृह्णीताभिचर्यमाणः सर्वेषां वा एतत् पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते' इति ॥ यान्येतानि सोमपात्राणि सन्ति तेषां मध्ये [V]यत् [V]उक्थ्यपात्रं तत् [V]इन्द्रियं सामर्थ्योपेतम् । अतस्तस्याग्रत्वे सत्यभिचारकर्तारम् [V]एनं [V]सर्वेण अपि सामर्थ्येनातिक्रम्य स्वयमनुतिष्ठति ॥

सरस्वतीति ॥ अथ मन्त्रविशेषं विधत्ते - 'सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै सरस्वती वाचैवैनमति प्र युङ्क्ते' इति ॥ सोमरसग्रहणात् पूर्वं पठितव्या पुरोरुक्, तां च [V]पुरोरुचम् अत्र सरस्वतीत्यादिकां पठेत् । मन्त्रोक्ता [V]सरस्वती वाग्देवता । [३०]अतः [V]वाचा [V]एव [V]एनम् [३१]अभिचरितारमेनमतिक्रम्यानुतिष्ठति । [३२]सेयमृग्ब्राह्मणग्रन्थे द्वितीयकाण्डे उपहोमाख्ये प्रपाठके एवमाम्नाता - "सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या

---

५२. [समग्रो मन्त्रपाठस्तु - 'सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या च । मा त्वत् क्षेत्राण्यरणानि गन्म' इति ।] । ५३. अ१. मै१ - इति च । ५४-५४. मै. मै३. अ - तत्र निर्वचनं कृतम् । मन्त्रार्थस्तु, अ१ - मन्त्रनिर्वचनं गतान् तत्रार्थ स तु, मै२ - निर्वचनं तन्त्रार्थस्तु । ५५. मै१ - वस्यम् । ५६. मै१ - परस्परम् ।

---

३०. म - 'अतः' नास्ति । ३१. आ - अभिचरितारमतिक्रम्य । ३२. अ. आ. पा. इ. वा. वै - इयम् ।

मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः

मा । त्वत् । क्षेत्राणि । अरणानि । गन्म । इति । आह । मृत्योः । वै । क्षेत्राणि । अरणानि । तेन । एव । मृत्योः । क्षेत्राणि । न । गच्छति । पूर्णान् । ग्रहान् । गृह्णीयात् । आमयाविनः । प्राणानिति प्र-अनान् । वै । एतस्य । शुक् । ऋच्छति । यस्य । आमयति । प्राणा इति प्र-अनाः । ग्रहाः ।

हविषा च [५७]वर्धिता [५८]धाक्षीः । अपि तु सख्येनास्मान् जुषस्व वेश्या [५९]वेश्यतया [६०]अभिगम्यतया च । [६१-] किं च [-६१] - त्वत्प्रसादात् [V]मृत्योः [६२V]क्षेत्राणि क्षपणशीलानि [६३-V]अरणानि अरणीयानि क्षेत्राणि स्थानानि [V]मा [V]गन्म इति [-६३] ॥

च । मा त्वत्क्षेत्राण्यरणानि गन्म" (तैब्रा २.८.२) इति । अस्यायमर्थः - हे सरस्वति, नोऽस्मान् वस्यो वरिष्ठं प्राणधारणरूपं जीवनमभिनेषि, आभिमुख्येन प्रापय । मा पस्फरीरस्मान् मा हिंसीः । मा न आधक्, [३३]त्वम् अस्मान् मा धाक्षीः । अपि तु [V]सख्या सख्येन [V]वेश्या च [३४]प्रवेशनीयतया च नोऽस्माञ्जुषस्वास्मासु प्रविश्य सख्यं कुर्वित्यर्थः । किं च त्वत्प्रसादात् [V]अरणानि [३५V]क्षेत्राणि अरमणीयानि [३६]स्थलानि [V]मा [V]गन्म मा प्राप्नुयामेति ॥

मेति ॥ तमिमं चतुर्थपादमनूद्य व्याचष्टे - 'मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति' इति ॥ तेन मन्त्रपाठेन मृत्युसंबन्धीनि [३७-] [V]अरणानि यानि [-३७] स्थानानि [३८]तानि [V]न प्राप्नोति, न [३९]प्रमीयत इत्यर्थः ॥

---

५७. मै१. मै२ - वर्धितः, अ१ 'वर्धिता' नास्ति । ५८. अ१ - पृक्षीः । ५९. मै२ - 'वेश्यतया' नास्ति । ६०. मै१ - अभिगतभूततया, मै२ - अभिगम्य तपदिम् । ६१-६१. मै२ - 'किं च' नास्ति । ६२. अ१ - 'क्षेत्राणि' नास्ति । ६३-६३. मै२ - मा गारणानि त्वत्क्षेत्राणि मा गान्मेति ।

---

३३. अ. आ. पा. इ. वा. वै. म - 'त्वम्' नास्ति । ३४. अ. आ. पा. इ. वा. मै. वै - प्रवेशनियतया । ३५. मै - वेत्राणि । ३६. मै. वै - स्वनानि । ३७-३७. शृ१. मै. म - अरमणीयानि । ३८. अ. पा. इ. वा. म. मै. वै - 'तानि' नास्ति । ३९. म. मै - म्रियते ।

प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान् ग्रहान् (५) गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत् प्राणान् वा एतर्हि प्रजाना९ शुगृच्छति यर्हि पर्जन्यो न वर्षति

प्राणानिति प्र-अनान् । एव । अस्य । शुचः । मुञ्चति । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव । पूर्णान् । ग्रहान् (५) । गृह्णीयात् । यर्हि । पर्जन्यः । न । वर्षेत् । प्राणानिति प्र-अनान् । वै । एतर्हि । प्रजानामिति प्र-जानाम् । शुक् । ऋच्छति । यर्हि । पर्जन्यः । न । वर्षति ।

'पूर्णान्' इत्यादि ॥ शुक् शोकः । यदा [V]प्राणान् [V]शुक् [V]प्राप्नोति तदा पुरुषस्य [V]आमयति आमयः । कर्मणि षष्ठी । तत्र [६४]प्राणात्मकानां ग्रहाणां पूर्णतया शोकाभावादामयाभावः । ततश्च गतासुरपि [V]जीवति [V]एव । "वा दान्तशान्तपूर्ण°" (पा ७.२.२७) इति [६५]णान्तो निपात्यते ॥

'यर्हि पर्जन्यः' इत्यादि ॥ पूर्ववत् । अनद्यतने र्हिल् प्रत्ययः । [६६]वर्षाभावे [V]प्रजानां [V]प्राणान् [V]शुक् [V]ऋच्छति । तत्र प्राणात्मकानां ग्रहाणां पूर्णतया [V]प्रजानां [V]प्राणान् शुचः मुञ्चन्ति,

---

पूर्णानिति ॥ अथ रोगपरिहाराय प्रकारान्तरं विधत्ते - 'पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव' इति ॥ यान्यैन्द्रवायवादीनि पात्राणि [४०]तानि सोमरसेन पूर्णानि यथा भवन्ति तथा रोगनिवृत्यर्थं [V]गृह्णीयात् । यस्य रोगो वर्तते तस्य [V]प्राणान् [V]शुक् शोकः उपद्रवः प्राप्नोति । ततः पूर्णानां ग्रहाणां प्राणरूपत्वात् [V]अस्य यजमानस्य [V]प्राणान् [४१]पूर्णग्रहैः शोकान्मोचयति । तथा सति [४२-] यद्यपि मुहूर्तमात्रं गतप्राणस्तथाऽपि पुनः [V]जीवति [V]एव ॥

पूर्णानिति ॥ एतमेव प्रकारं पुनरपि वृष्ट्यर्थं विधत्ते - 'पूर्णान् ग्रहान् गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत् प्राणान् वा एतर्हि प्रजाना९ शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः [४३]प्राणानेव प्रजाना९ शुचो मुञ्चति ताजक् प्र वर्षति' इति [-४२] ॥ यदा स्वकाले वृष्टिर्न भवेत् तदा वृष्ट्यर्थमैन्द्रवायवादिपात्राणि सोमरसेन

---

६४. मै१ - वागात्मकानाम् । ६५. मै१ - ण्यन्तः । ६६. मै. मै२. मै३. अ. अ१ - वर्षाभावेन ।

---

४०. अ. आ. पा. इ. वा. वै - 'तानि' नास्ति । ४१. मै - पूर्णग्रहात्, अ. पा. इ. म. वै - पूर्णग्रहः । ४२. इ. वै - 'यद्यपि ---- इति' नास्ति । ४३. मै - प्राणा न च ।

प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक् प्र वर्षति (५) ॥७॥

(प्रमीयेत मनुष्यं ऋध्यते यस्यं पिता पितामहः पुण्यो वाग्वा एव पूर्णान् ग्रहान् पञ्चविꣳशतिश्च) ॥७॥

प्राणा इति प्र-अनाः । ग्रहाः । प्राणानिति प्र-अनान् । एव । प्रजानामिति प्र-जानाम् । शुचः । मुञ्चति । ताजक् । प्रेति । वर्षति ॥७॥

[कासं ३०.२.३ ; कपिसं ४६.५-६ ; मैसं ४.८.९ ; शब्रा ४.५.९ १-१३]

प्रकर्षेण वर्षति [V]पर्जन्यः । एवं [६७]द्वादशाह एव ग्रहाग्रता विहिता । अन्ये आहुः - [६८]खनित्रादिवत् पात्रेषु यत्र [६९]ग्रहणं [७०-] तत्र वाक्येन ग्रहाग्रता [-७०] [७१]गच्छति इति ज्योतिष्टोम एव विधीयते । उत्तरानुवाकप्रभृति द्वादशाह [७२]एव [७३]इति ॥

॥ इति सप्तमे द्वितीये सप्तमोऽनुवाकः ॥

पूरणीयानि । यदा वृष्ट्यभावस्तदा [V]प्रजानां प्राणा अन्नाभावाच्छोकेन [४४]व्यथ्यन्ते । ग्रहपूरणेन शोको निवर्तते । तदानीमेव प्रकर्षेण [४५]वर्षणात् ॥

[४६-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः [-४६] ॥

---

६७. मै१ - द्वादश । ६८. मै. मै१. मै३. अ. अ१ - खादिरादिवत् । ६९. मै१. मै२ - ग्रहाः । ७०. मै२ - तथैव । ७१. मै२ - गच्छन्ति । ७२. मै२ - 'एव' नास्ति । ७३. अ१. मै१ - 'इति' नास्ति ।

---

४४. अ. आ. पा. इ. वा. वै - प्राप्यन्ते । ४५. म- कर्षति । ४६-४६. वै - इति सप्तमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः , मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः ।

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहस्तस्मात् प्रायणीयेऽहन्नैन्द्रवायवो

गायत्रः । वै । ऐन्द्रवायव इत्यैन्द्र-वायवः । गायत्रम् । प्रायणीयमिति प्र-अयनीयम् । अहः । तस्मात् । प्रायणीय इति प्र-अयनीये । अहन् । ऐन्द्रवायव इत्यैन्द्र-वायवः ।

अधुना द्वादशाहस्य नित्यग्रहाग्रताक्लृप्तिः प्रदर्श्यते । तत्र द्विविधो द्वादशाहः - अव्यूढो व्यूढश्च तद्विकार इति । तत्र प्रथमो यथा ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ [१]दशमं [२]चाहः । अथेतरेषां नवानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम् , अथाग्रयणाग्रम् , एवं [३]- विहिता त्रिस्त्र्यनीका परिवर्तते यद्यव्यूढः इति -[३] । अथ व्यूढो यथा - ऐन्द्रवायवाग्रौ [४]- प्रायणीयोदयनीयौ । अथ -[४] इतरेषां [५]दशानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम् , [६]अथ [७]द्वे [८]आग्रयणाग्रे अथ ऐन्द्रवायवाग्रम् , अथ द्वे शुक्राग्रे, [९]अथ आग्रयणाग्रम् , अथ [१०]व्यूढे ऐन्द्रवायवाग्रे इति । [११]विवहनक्रमश्च [१२]एषामनुवाकान्ते दर्शयिष्यते ॥

सप्तमेऽनुवाके द्वादशाहगताः काम्यग्रहप्रकारा उक्ताः । स च द्वादशाहो द्विविधः - समूढो व्यूढश्च । तत्र समूढप्रकारः सूत्रकारेण दर्शितः - " त्र्यनीकां व्याख्यास्यामः ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः । [१]अथेतरेषां नवानामैन्द्रवायवाग्रं प्रथममहः । अथ शुक्राग्रमथाऽऽग्रयणाग्रम् [२]एवं विहिता त्रिस्त्र्यनीका परिवर्तते यद्यव्यूढः " (आपश्रौ २१.१४.१-४) इति । एवं समूढप्रकारमुक्त्वा व्यूढप्रकारोऽपि तेनैव दर्शितः - " व्यूढे त्वैन्द्रवायवाग्रौ प्रायणीयोदयनीयौ [३]अथेतरेषां दशानामैन्द्रवायवाग्रं प्रथममहः । अथ शुक्राग्रमथ द्वे आग्रयणाग्रे अथेन्द्रवायवाग्रमथ द्वे शुक्राग्रे अथाग्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे " (आपश्रौ २१.१४.५) इति । तत्रास्मिन्नष्टमेऽनुवाके व्यूढप्रकारोऽभिधीयते ॥

---

१. मै२ - 'दशमम् ' नास्ति । २. मै२ - त्राहः । ३-३. [सूत्रमवलम्ब्यास्माभिः शुद्धीकृतः पाठो द्रष्टव्यः ।] , मै - विहित ---- निका ---- इति, मै१ - विहित ---- निका परीतित इति(?) अ१ - विहितात् त्यहीको परिवर्तत इति, मै२ - विहिताद्वनीका परिवर्तत इति । ४-४. अ१ - 'प्रायणी° ---- अथ ' नास्ति । ५. अ१ - नवानामैन्द्र° । ६. मै२ - 'अथ ' नास्ति । ७. अ१ - 'द्वे ' नास्ति । ८. अ१ - आग्रयणाग्रे विहितात्यहीको परिवर्तत इति । ९. अ१ - 'अथ ' नास्ति । १०. मै. मै१. मै२. मै३. अ - द्वे । ११. मै२ - विवधनक्रमम् । १२. मै१ - एवैषोऽनु°, मै२ - अनु° ।

---

१. शृ१ - अन्येतरेषाम् । २. मै - एनम् । ३. शृ१ - अर्थान्तरेषाम् ।

गृह्यते स्व एवैनमायतने गृह्णाति

गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति ।

आदौ तु [१३]व्यूढान्यहानि क्रमेण दर्शयति - 'गायत्रो वै' इत्यादि ॥ [V]ऐन्द्रवायवः ग्रहः [V]गायत्रं [१४]गायत्रीभक्तिं, प्राथम्यात्। तथा [V]प्रायणीयम् [V]अहः प्राथम्यादेव गायत्रम्। [V]तस्मात् [V]प्रायणीये दशरात्रस्य प्रथमे [V]★अहनि प्राथम्यादेव [१५]प्रायणीयव्यपदेशभाजित्वात्, [१६]द्वादशाहस्य द्वितीये★ऽहनि । यद्वा - प्रथमस्यातिरात्रस्य प्रथमत्वात् प्रायणीयेऽहनि [V]ऐन्द्रवायवः [V]गृह्यते प्रथममिति भावः, अन्यथा वचनानर्थक्यात् , यत्र क्वचन ग्रहणस्य [१७]वचनमन्तरेणपि सिद्धत्वात् । एवं सर्वत्र द्रष्टव्यम् । प्रायणं प्रारम्भः, तत्र भवः प्रायणीयः । [१८]दिगादित्वाच्छः (गणपाठ १११ पा ४.३.५४) । यद्वा - प्रायणं स्वर्गगमनादिकर्म, [१९]तत्प्रयोजनमस्येति । अनुप्रवचनादित्वाच्छः (गणपाठ-१५७ पा ५.१.१११) । [V]स्वे [V]एव [V]आयतने स्थाने [V]एनं [V]गृह्णाति गायत्रं गायत्रेण, गायत्रत्वात् द्वयोः ॥

गायत्र इति ॥ तत्र प्रायणीयोदयनीयौ परित्यज्य यानीतराण्यहानि मध्यवर्तीनि दशसंख्याकानि तेषु प्रथमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते - 'गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहस्तस्मात् प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति' इति ॥ यानि मुख्यानि च्छन्दांसि गायत्रीत्रिष्टुप्जगतीरूपाणि तेषां मध्ये गायत्री प्रथमा । अग्रत्वेन चात्रैन्द्रवायवशुक्राग्रयणा [४]विकल्पन्ते । तेषां च मध्ये [V]ऐन्द्रवायवः प्राथम्येन प्रकृतावाम्नातः । ततः प्राथम्यसाम्यादैन्द्रवायवः [V]गायत्रः । निरूपणीयानां दशानामह्नां मध्ये यत् [V]प्रायणीयं[५-] प्रथमभावि [V]अहः[-५] [६]तदपि [७-] प्राथम्यस्य साम्यात्[-७] [V]गायत्रम् । एवं च सति तस्मिन् [V]प्रायणीये दशानां मध्ये प्रथमे अहनि [८][V]ऐन्द्रवायवः आदौ ग्रहीतव्यः । [९]ऐन्द्रवायवस्य [१०]गायत्रत्वसाम्यात् । एवं च सति स्वसंबन्धिनि [V]एव [V]आयतने [११]प्रथमाहःस्वरूपस्थाने तमैन्द्रवायवं [V]गृह्णाति ॥

१३. मै१ - °न्यङ्गानि । १४. मै. मै१. मै२. मै३. अ - गायत्रभक्तम् । ★ [मै१ पुस्तके सर्वत्र 'अहनि' इत्यस्य स्थाने 'अह्नि' इत्युपलभ्यते ।] १५. मै२ - °देशभागित्वात् । १६. मै२ - 'द्वादशाहस्य' नास्ति । १७. मै. मै१ - अन्तरेणापि वचनम् । १८. अ१ - गर्ह्यादित्वाच्छः । १९. मै२ - °त्प्रयोजनता अस्य° ।

४. क. मै - विकल्प्यन्ते । ५-५. मै - प्रथमभाव्यः, वै - प्रथमभाव्यतः । ६. शृ१. मै. म - तथापि । ७-७. शृ१. इ. म. वै. मै - प्राथम्यसाम्यात् । ८. मै - °वायवः च । ९. म - ऐन्द्रवायवस्याम्नाश्च । १०. वै - गायत्रत्वासाम्यात् । ११. शृ१. मै - स्वरूपे स्थाने ।

त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहस्तस्माद्द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै (१) यज्ञमापद्यच्छन्दाꣳस्याप्नोति

त्रैष्टुभः । वै । शुक्रः । त्रैष्टुभम् । द्वितीयम् । अहः । तस्मात् । द्वितीये । अहन् । शुक्रः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति । जागतः । वै । आग्रयणः । जागतम् । तृतीयम् । अहः । तस्मात् । तृतीये । अहन् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति । एतत् । वै (१) । यज्ञम् । आपत् । यत् । छन्दाꣳसि । आप्नोति ।

[V]त्रैष्टुभः [२०][V]शुक्रः [२१]त्रिष्टुब्भक्तित्वात् । [V]त्रैष्टुभं [V]द्वितीयम् [V]अहः गायत्र्या अनन्तरत्वात् । [V]तस्मात् [V]द्वितीये [V]अहनि दशरात्रस्य [V]शुक्रः प्रथमं [V]गृह्यते इति पूर्ववत् [२२]तद् द्रष्टव्यम् ॥

[V]जागतः [V]आग्रयणः । उभयोस्तृतीयसवने साहचर्यात् [२३]एव तृतीयत्वसाम्यात् [V]जागतं [२४-V]तृतीयम् [V]अहः [-२४] । 'तस्मात्' इत्यादि । गतम् ॥

त्रैष्टुभ इति ॥ अथ दशस्वहःसु द्वितीयेऽहनि शुक्राग्रत्वं विधत्ते - 'त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहस्तस्माद्द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतनेन गृह्णाति' इति ॥ त्रिष्टुप्छन्दसः शुक्रस्य [१२]द्वितीयस्य अह्नश्च पूर्वन्यायेन [१३]द्वितीयत्वसाम्यं योजयित्वा [१४]वाक्यं व्याख्येयम् ॥

जागत इति ॥ अथ तृतीयेऽहन्याग्रयणाग्रत्वं विधत्ते - 'जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति' इति ॥ [१५]पूर्ववद्व्याख्येयम् ॥

---

२०. अ१ - इति । २१. मै१ - त्रिष्टुप्शक्तित्वात् । २२. मै२ - 'तद्' नास्ति । २३. मै. मै१. मै३. अ. अ१ - 'एव' नास्ति । २४-२४. मै२ - तृतीयसवमहः ।

---

१२. म - 'द्वितीयस्य' नास्ति, मै - ग्रहस्य । १३. वा - द्वितीयसाम्यम् । १४. अ. आ. पा. इ.वा.वै. म - 'वाक्यम्' नास्ति । १५. अ. आ. पा. इ. वा. वै. मै - °वद्योजनीयम् ।

यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत

यत् । आग्रयणः । श्वः । गृह्यते । यत्र । एव । यज्ञम् । अदृशन् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । जगन्मुख इति जगत्-मुखः । वै । द्वितीयः । त्रिरात्र इति त्रि-रात्रः । जागतः ।

'एतत् वै 'इत्यादि ॥ Vएतत् [25]आग्रयणग्रहाग्रतावत्तृतीयमहः Vयज्ञं त्रिरात्रम् Vआपत् [26]अवाप्नोत् । यस्मात् Vवै एतत् Vछन्दांसि जगत्यन्तानि सर्वाणि Vआप्नोति - छन्दःसमाप्तौ हि यागसमाप्तिः, तत्राग्रयणे [27]यज्ञावाप्तिरभूदिति - ततश्चतुर्थेऽह्नि द्वितीयस्य यज्ञस्य प्रथमे आग्रयणं प्रथमं गृह्यते । [28]यस्मादेवम् [29]Vआग्रयणः Vश्वः Vगृह्यते तत् Vयज्ञं Vयत्र Vअदृशन् उदपादयन् छन्दांस्यपश्यन् Vततः Vएव आग्रयणादारभ्य Vएनं यज्ञं पुनः Vप्रयुङ्क्ते, आग्रयणाग्रता पुनरावर्तते इति यावत् , यज्ञदर्शनाधारत्वेन तस्य प्रशस्तत्वात् । दृशेर्लुङि इरित्वाच्च्लेरङादेशः (पा ३.१.५७), 'ऋदृशोऽङि गुणः ' (पा ७.४.१६) [30]इति व्यत्ययेन न प्रवर्तते ॥

एतद्वा इति ॥ [16]एतदेवाग्रयणाग्रत्वं प्रशंसति - 'एतद्वै यज्ञमापद्यच्छन्दाꣳस्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते ' इति ॥ यदाग्रयणाग्रत्वं Vछन्दांसि Vआप्नोति गायत्र्यादिछन्दोरूपाणि त्रीण्यहानि [17]व्याप्नोति त्रयाणामह्नामनेनाऽऽग्रयणाग्रत्वेन समाप्तत्वात् । [18]एतदेव [19]आग्रयणाग्रत्वं Vयज्ञम् Vआपत् प्रथमत्र्यनीकारूपं त्रिरात्रं यज्ञं [20]प्राप्नोति । त्रीण्यनीकान्यग्रत्वान्यैन्द्रवायवाग्रत्वशुक्राग्रत्वाग्रयणाग्रत्वरूपाणि यस्यां क्रियायां सा क्रिया त्र्यनीका । [21]तद्रूपत्रिरात्रयज्ञोऽनेनाग्रयणाग्रत्वेन समाप्यते । किं [22]चोत्तरस्मिन् चतुर्थेऽहन्याग्रयण एवादौ गृह्यते । यस्मादेवं तस्माद्यत्रैवाऽऽग्रयणाग्रत्वे [23]Vयज्ञम् Vअदृशन् त्रिरात्रसमाप्तिं दृष्टवन्तः, [24-]Vततः Vएव [-24] आग्रयणाग्रत्वात् Vएनं यज्ञं Vपुनः प्रयुक्तवान् भवति । तस्मादिदं प्रशस्तम् ॥

२५. मै१ - °ग्रहणान्तवत्°, मै२ - ग्रहाग्रतातृतीय° । २६. मै२ - अवाप्तवान् । २७. मै२ - °रभूदियम् । २८. मै२ - यस्मादेतत् । २९. मै२ - आग्रयणम् । ३०. मै१ - 'इति 'नास्ति ।

१६. म - तदेव, मै. वै - तदेतदेव । १७. मै - वाप्नोति । १८. मै - एतत्, शृ१ - 'एतदेव 'नास्ति । १९. अ. पा - आग्रयणत्वम् , शृ१ - °णाग्रत्वं प्रथमम् । २०. मै - प्राप्नोत् । २१. मै - तद्रूपसत्रयज्ञो° । २२. शृ१ - स्वस्वदुत्तरस्मिन् , मै - स्वदुत्तरस्मिन् । २३. मै - यत्सम् (?) । २४-२४. मै - तदेव ।

आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते

आग्रयणः । यत् । चतुर्थे । अहन् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या- - यतने । गृह्णाति । अथो इति । स्वम् । एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते ।

'जगन्मुखः' [31]इत्यादि ॥ जागतराथन्तरबार्हतत्वात् [32-]Vद्वितीयः Vत्रिरात्रः[-32] [33]Vजगन्मुखः । [34]जगत्सामप्रधानत्वात् जागतत्वमाग्रयणस्योक्तम् । Vस्वे Vएव जागते Vआयतने Vएनम् आग्रयणं गृह्णाति । अथो अपि च Vस्वयम् । Vएव Vछन्दः जगतीमनुपर्यावर्तते [35]द्वितीयत्रिरात्रसंबधीन्यहानि स्वेन छन्दसा Vअनुपर्यावर्तन्ते इत्यर्थः । पूर्ववद्गतिनिघातसमासौ, "तृतीयार्थे" (पा १.४.८६) अनोः कर्मप्रवचनीयत्वम् । यद्वा - [36-]स्वयमेव पर्यावर्तन्ते[-36] ॥

[37-]Vराथन्तरः Vवै Vऐन्द्रवायवः[-37], द्वयोरपि प्राथम्यात् साहचर्याच्च । Vराथन्तरं Vपञ्चमम् Vअहः रथन्तरप्रधानत्वात् । 'तस्मात्' इत्यादि । गतम् ॥

जगन्मुख इति ॥ अथ [25]चतुर्थेऽहन्याग्रयणाग्रत्वमेव विधत्ते - 'जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते' इति ॥ समूढे द्वादशाहे त्र्यनीका [26]त्रिरावृत्ता । तत्रैकावृत्तिः प्रथमस्त्रिरात्रो द्वितीयावृत्तिः Vद्वितीयः Vत्रिरात्रः । स च यद्यपि [27]समूढे द्वादशाहे [28]ऐन्द्रवायवोपक्रमत्वादैन्द्रवायवस्य च गायत्रत्वाद्गायत्रीमुखो भवति, तथाऽप्यत्र Vजगन्मुखः जगत्युपक्रमः [29-] कर्तव्यः । [30]आग्रयणाग्रश्च [31]जागतः इति पूर्वमेवोपपादितम् । तस्मात् चतुर्थेऽहन्नाग्रयणाग्रत्वे गृहीते सति स्वकीय एव स्थाने[-29] तद्गृहीतं भवति । अपि चाग्रयणाग्रत्वं स्वकीयम् Vएव जगतीछन्दोऽनुसृत्य पुनरावृत्तं भवति ॥

---

३१. मै१. मै३ - इति । ३२-३२. मै१. अ१ - द्वितीयस्य त्रिरात्रस्य, मै२ - द्वितीयत्रिरात्रस्य । ३३. मै२ - जगन्मुखत्वम् । ३४. अ१ - °प्रधानात् । ३५. मै१ - द्वितीयं त्रिरात्र° । ३६-३६. मै२ - स्वमेव च छन्दोऽस्तु तदेव पर्यावर्तते । ३७-३७. मै२ - राथन्तर ऐन्द्रवायवः ।

---

२५. शृ१ - °ग्रत्वमेवम् । २६. मै - त्रिरात्रा । २७. शृ१ - समूहो । २८. शृ१. म. मै - °वोपक्रमादै° । २९-२९. वै - 'कर्तव्यः - - - - स्थाने' नास्ति । ३०. मै - आग्रयणश्च । ३१. मै - जायत ।

राथन्तरो वा ऐन्द्रवायवो राथन्तरं पञ्चममहस्तस्मात् पञ्चमेऽह(न्)न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हत९ षष्ठमहस्तस्मात् षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यज्ञमापद्यच्छन्दा९स्याप्नोति

राथन्तर इति राथं-तरः । वै । ऐन्द्रवायव इत्यैन्द्र-वायवः । राथन्तरमिति राथं-तरम् । पञ्चमम् । अहः । तस्मात् । पञ्चमे । अहन् (२) । ऐन्द्रवायव इत्यैन्द्र-वायवः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति । बार्हतः । वै । शुक्रः । बार्हतम् । षष्ठम् । अहः । तस्मात् । षष्ठे । अहन् । शुक्रः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति । एतत् । वै । द्वितीयम् । यज्ञम् । आपत् । यत् । छन्दा९सि । आप्नोति ।

[३८-]Vबार्हतः Vशुक्रः [-३८] [३९]बृहद्भक्तित्वात् । Vबार्हतं Vषष्ठम् Vअहः क्रमात् । ‘तस्मात्’ इत्यादि । Vस्वे Vएव बार्हते Vएनं Vगृह्णाति ॥

राथन्तर इति ॥ अथ पञ्चमेऽहन्यैन्द्रवायवाग्रत्वं [३२-]विधत्ते - ‘राथन्तरो वा ऐन्द्रवायवो राथन्तरं पञ्चममहस्तस्मात् पञ्चमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति’ इति ॥ प्रकृतिरूपे ज्योतिष्टोमे यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयादित्यैन्द्रवायवाग्रत्वं [-३२] प्रति रथन्तरसाम्नो निमित्तत्वश्रवणादैन्द्रवायवस्य राथन्तरत्वम् । पञ्चमस्याह्नो रथन्तरसंबन्धस्य शाखान्तरे प्रसिद्धत्वाद्राथन्तरत्वम् । Vतस्मात् ऐन्द्रवायवस्याह्नश्च राथन्तरत्वसाम्यात् Vपञ्चमे अहनि Vऐन्द्रवायवः प्रथमं Vगृह्यते । तथा सति Vएनम् ऐन्द्रवायवं स्वकीये [३३]Vएव स्थाने गृह्णाति ॥

बार्हत इति ॥ अथ षष्ठेऽहनि शुक्राग्रत्वं विधत्ते - ‘बार्हतो वै शुक्रो बार्हत९ षष्ठमहस्तस्मात् षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति’ इति ॥ शुक्रग्रहस्य [३४]षष्ठस्याह्नश्च बृहत्सामसंबन्धः शाखान्तरे प्रसिद्धः । शेषं पूर्ववद्व्याख्येयम् ॥

३८-३८. अ१ - बार्हतं शुक्लम्, मै१ - बार्हतं शुक्रम् । ३९. मै१. अ१ - °द्भक्तिकत्वात् ।

३२-३२. वै - ‘विधत्ते - - - - °वाग्रत्वम्’ नास्ति । ३३. मै - एवम् । ३४. मै - षष्ठाह्नस्य ।

यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् ततं एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः (३) शुक्रो यत् सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने

यत् । शुक्रः । श्वः । गृह्यते । यत्रं । एव । यज्ञम् । अदृशन् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । त्रिष्टुङ्मुख इति त्रिष्टुक्-मुखः । वै । तृतीयः । त्रिरात्र इति त्रि-रात्रः । त्रैष्टुभः (३) । शुक्रः । यत् । सप्तमे । अहन् । शुक्रः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने ।

'एतद्वै' इत्यादि ॥ [४०]Vद्वितीयं त्रिरात्रं Vयज्ञं [४१-] शुक्राग्रतावत् अहः Vआपत् [-४१] [४२]Vयत् Vछन्दांसि [४३]बृहत्यन्तानि । 'यच्छुक्रः' इत्यादि । [४४]गतम् ॥

'त्रिष्टुङ्मुखः' [४५]इत्यादि ॥ [४६]त्रिष्टुग्वाक्प्राणसंबन्धित्वात् [४७-] तृतीयः त्रिरात्रः [-४७] । Vत्रैष्टुभः Vशुक्रः, द्वितीयत्वाद्द्वयोः । '[४८-] यत्सप्तमेऽहन् [-४८]' इत्यादि । तृतीयं त्रिरात्रं यज्ञम् । 'छन्दांसि' इत्यादि । गतम् ॥

एतद्वा इति ॥ तदेतच्छुक्राग्रत्वं प्रशंसति - 'एतद्वै द्वितीयं यज्ञमापद्यच्छन्दाꣳस्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्ते' इति ॥ त्र्यनीकायाः द्वितीयावृत्तिरूपस्त्रिरात्रो द्वितीयो यज्ञः । शेषमाग्रयणवाक्यवद्व्याख्येयम् ॥

त्रिष्टुङ्मुख इति ॥ अथ सप्तमेऽहन्यपि शुक्राग्रत्वमेव विधत्ते - 'त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः शुक्रो यत् सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते' इति ॥ यद्यपि समूढे तृतीयस्य त्रिरात्रस्याद्येऽहन्यैन्द्रवायवाग्रत्वाद्गायत्रीमुख एवायं त्रिरात्रस्तथाप्यत्र Vत्रिष्टुङ्मुखः कर्तव्यः । शुक्रश्चत्रैष्टुभ इति पूर्वमेवोपपादितम् । तस्मात् Vसप्तमे अहनि Vशुक्रः प्रथमो गृह्यते । शेषं पूर्ववद्व्याख्येयम् ॥

---

४०. अ१. मै१ - तृतीयम् , मै३ - यज्ञम् । ४१-४१. मै१. मै२ - शुक्राग्रतापत् अहरवाप । ४२. मै. मै१. मै३. अ. अ१ - 'यत्' नास्ति, मै२ - तत् । ४३. मै१. अ१ - जगत्यन्तानि । ४४. मै२ - 'गतम्' नास्ति । ४५. मै. मै१. मै३. अ. अ१ - इति । ४६. मै२ - त्रिष्टुप्त्वात् प्राण°, अ१. मै१ - त्रिष्टुब्ब्राह्मणसं° । ४७-४७. मै. मै१. मै३. अ. अ१ - तृतीयत्रिरात्रसंबन्धिनामह्नाम् । ४८-४८. मै२ - एतद्वै तृतीयमित्यादि, अ१ - यत्सप्तमेऽहन् गृह्यते ।

गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्माद-ष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने

गृह्णाति । अथो इति । स्वम् । एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते । वाक् । वै । आग्रयणः । वाक् । अष्टमम् । अहः । तस्मात् । अष्टमे । अहन् । आग्रयणः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने । गृह्णाति । प्राण इति प्र-अनः । वै । ऐन्द्रवायव इत्यैन्द्र-वायवः । प्राण इति प्र-अनः । नवमम् । अहः । तस्मात् । नवमे । अहन् । ऐन्द्रवायव इत्यैन्द्र-वायवः । गृह्यते । स्वे । एव । एनम् । आयतन इत्या-यतने ।

‘वाक् वै’ [४९]इति ॥ [५०-]Vप्राणः Vऐन्द्रवायवः, तत्संबन्धात् Vप्राणः Vनवमम् Vअहः [५१]नवमत्वान्वयात् , प्राणानां च नवत्वान्वयात् ॥

वाग्वै इति ॥ अथाष्टमेऽहन्याग्रयणाग्रत्वं विधत्ते - ‘वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति’ इति ॥ षष्ठकाण्डे आग्रयणग्रहब्राह्मणे “वाग्वै देवेभ्योऽपाक्रामत्” (तैसं ६.४.११) इत्युपक्रम्य “साऽऽग्रयणं प्रत्यागच्छत्” (तैसं ६.४.११) इत्युक्तत्वादाग्रयणस्य [३५-] वाग्रूपत्वम् । अष्टमस्याह्नोऽपि [-३५] वाग्रूपत्वमर्थवादान्तरे द्रष्टव्यम् । अतो वाग्रूपत्वसामान्यात् Vअष्टमे अहनि Vआग्रयणः प्रथमं प्रयोक्तव्यः ॥

प्राण इति ॥ अथ नवमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते - ‘प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति’ इति ॥ प्रकृतौ ग्रहब्राह्मणे “वाग्वा एषा यदैन्द्रवायवः” (तैसं ६.४.७) इत्युक्तत्वाद्वागिन्द्रियस्य च प्राणावान्तरभेदत्वादैन्द्रवायवस्य प्राणत्वम् । नवमस्याह्नोऽपि प्राणत्वेन स्तुतिरन्यत्र द्रष्टव्या । अतः प्राणत्वसाम्यात् Vनवमे अहनि Vऐन्द्रवायवः प्रथमं गृहीतव्यः ॥

---

४९. अ१. मै१ - अनुष्टुप् इति । ५०-५०. मै२ - ‘प्राण - - - - गतम्’ नास्ति । ५१. अ१ - नवत्वान्वयात् ।

३५-३५. म - अष्टमस्याऽह्नो वाग्रूपत्वम् , अ. आ. पा. इ. वा. वै - ‘वाग्रूपत्वमष्टमस्याह्नोऽपि’ नास्ति ।

गृह्णात्येत(४)द्वै तृतीयं यज्ञमापद्यच्छन्दाꣳस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात्

गृह्णाति । एतत् (४) । वै । तृतीयम् । यज्ञम् । आपत् । यत् । छन्दाꣳसि । आप्नोति । यत् । ऐन्द्रवायव इत्यैन्द्र-वायवः । श्वः । गृह्यते । यत्र । एव । यज्ञम् । अदृशन् । ततः । एव । एनम् । पुनः । प्रेति । युङ्क्ते । अथो इति । स्वम् । एव । छन्दः । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते । पथः । वै । एते । अधीति । अपथेन । यन्ति । ये । अन्येन । ऐन्द्रवायवादित्यैन्द्र-वायवात् ।

[५२]‘ एतद्वै ’ इत्यादि ॥ Vतृतीयं त्रिरात्रम् । ‘ छन्दांसि ’ इत्यादि गतम् [-५०] ॥
‘ पथो वै ’ इत्यादि ॥ Vएते खलु Vपथः [५३]मार्गादपेत्य [५४-] अपथेन गच्छन्ति Vये [-५४] [५५]Vअन्येन Vऐन्द्रवायवात् Vप्रतिपद्यन्ते अस्य प्रकृतौ प्रज्ञातत्वात् । ‘ अन्तः ’ इत्यादि । [५६]यज्ञान्ते

एतद्वा इति ॥ तदेतदैन्द्रवायवाग्रत्वं प्रशंसति - ‘ एतद्वै तृतीयं यज्ञमापद्यच्छन्दाꣳस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् तत एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते ’ इति ॥ त्र्यनीकायास्तृतीयावृत्तिरूपस्त्रिरात्रस्तृतीयो यज्ञः । शेषमाग्रयणवाक्यवद्व्याख्येयम् ॥

पथ इति ॥ अथ दशमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते - ‘पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात् प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यैवान्तं गत्वा पथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं वहन्ति तादृगेव तत् ’ इति ॥ द्वादशाहस्य प्रायणीयोदयनीययोर्मध्यवर्ती योऽयं दशरात्रस्तं दशरात्रं Vये यजमानाः ऐन्द्रवायवाग्रत्वात् [३६-] अन्येन शुक्राग्रत्वादिना Vप्रतिपद्यन्ते प्रारभन्ते [३७]ते [३८]Vएते यजमानाः Vपथः सकाशाद्भ्रष्टा अधिकेनाऽपथा कुमार्गेण गच्छन्ति । तस्मादैन्द्रवायवाग्रत्वेनैव [-३६]

५२. अ१ - तद्वै । ५३. अ१ - °दुपेत्य । ५४-५४. मै२ - ‘ अपथेन - - - - ये ’ नास्ति । ५५. मै१ - अन्ये । ५६. अ१ - ‘ यज्ञान्ते ’ नास्ति ।

३६-३६. वै - ‘ अन्येन - - - - °ग्रत्वेनैव ’ नास्ति । ३७. शृ१. मै - ‘ ते ’ नास्ति । ३८. मै - एके ।

प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै(५)वान्तं गत्वा पथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं वहन्ति तादृगेव

प्रतिपद्यन्त इति प्रति-पद्यन्ते । अन्तः । खलु । वै । एषः । यज्ञस्य । यत् । दशमम् । अहः । दशमे । अहन् । ऐन्द्रवायव इत्यैन्द्र-वायवः । गृह्यते । यज्ञस्य (५) । एव । अन्तम् । गत्वा । अपथात् । पन्थाम् । अपीति । यन्ति । अथो इति । यथा । वहीयसा । प्रतिसारमिति प्रति-सारम् । वहन्ति । तादृक् । एव ।

[57-] ऐन्द्रवायवान्वये Vयज्ञस्य सम्यक् निर्वृत्या Vअपथात् Vपन्थानम् एव प्रतिपद्यन्ते । द्वितीयायामपि व्यत्ययेनात्वम् । अथो अपि च Vयथा Vवहीयसा [58]वोढृतरेण अनडुहा Vप्रतिसारं वरिष्ठद्रव्यं Vवहन्ति Vतादृक् तद्दशमं वरिष्ठतमं वोढृतरेण [-57] ऐन्द्रवायवेन [59-] वहन्ति । वोढृशब्दात् ' तुश्छन्दसि ' (पा ६.३.५९) इतीयसुन् [-59], " तुरिष्ठेमेयस्सु " (पा ६.४.१५४) इति [60]तृशब्दलोपः ॥

दशरात्र उपक्रान्तव्यः । तथैव ह्यनुवाकादौ वर्णितम् । Vयत् एतत् Vदशमम् Vअहः अस्ति सः Vएषः ऐन्द्रवायवाग्रत्वेनोपक्रान्तस्य दशरात्राख्यस्य यज्ञस्य Vअन्तः Vखलु Vवै समाप्तिभूमिरेव । ततः प्रथमदिनवदन्तिमदिनेऽपि Vऐन्द्रवायवः [39]एव प्रथमं ग्रहीतव्यः । तथा सति Vयज्ञस्य [40]अस्य [41]परिसमाप्तिपर्यन्तं कुमार्गं परित्यज्य [42]सम्यङ्मार्गमेव प्राप्नुवन्ति । [43-] अपि च [-43] Vयथा लोके Vवहीयसा प्रौढभारवाहिना बलीवर्दसमूहेन युक्ता वणिजः Vप्रतिसारं Vवहन्ति पार्श्वद्वयगतान् क्षुद्रमार्गान् परित्यज्य प्रसिद्धे एव राजमार्गे बलीवर्दो [44]पङ्क्त्याकारो यथा भवति तथा नयन्ति तद्वदत्राप्यैन्द्रवायवोपक्रमोपसंहारौ द्रष्टव्यौ ॥

५७-५७. मैर - 'ऐन्द्रवायवा° ----वोढृतरेण 'नास्ति । ५८. मै - वोढृतरणे । ५९-५९. मैर - भवति वामदेशशन्दात्तु छन्दसीतीयसुन् । ६०. मैर - तृशब्दस्य लोपः ।

३९. शृ१. म - ' एव ' नास्ति । ४०. अ. आ. क. पा. हा. इ. वा. वै. म. मै - ' अस्य नास्ति । ४१. मै - समाप्तिपर्यन्तम् । ४२. अ. आ. क. पा. हा. इ. वा. वै. म. मै - सम्यङ्मार्गार्धमेव । ४३-४३. शृ१ - 'अपि च 'नास्ति । ४४. मै - पथाकारः ।

तच्छन्दा॑ꣳस्यन्यो॑ऽन्यस्य॑ लो॒कम॒भ्य॑ध्याय॒न् ता॒न्ये॒तेनै॒व दे॒वा व्य॑वाहय॒न्नैन्द्रवाय॒वस्य॒ वा ए॒तदा॒यत॑नं॒ यच्च॑तु॒र्थम॒हस्तस्मि॑न्नाग्रय॒णो गृ॑ह्यते॒

तत् । छन्दा॑ꣳसि । अ॒न्यः । अ॒न्यस्य॑ । लो॒कम् । अ॒भीति॑ । अ॒ध्याय॒न् । तानि॑ । ए॒तेन॑ । ए॒व । दे॒वाः । वीति॑ । अ॒वा॒ह॒य॒न् । ऐ॒न्द्र॒वा॒य॒वस्येत्यै॑न्द्र-वा॒य॒वस्य॑ । वै । ए॒तत् । आ॒यत॑नमित्या॑- - यत॑नम् । यत् । च॒तु॒र्थम् । अहः॑ । तस्मि॑न् । आ॒ग्र॒य॒णः । गृ॒ह्य॒ते ।

इदानीम् [61]अह्नां विवहनक्रमं दर्शयति - 'छन्दांसि' इत्यादि ॥ [V]अन्यः [V]अन्यस्य [62-V]लोकं स्थानम् [V]अभ्यध्यायन् [-62] कथं नामैनं गच्छेमेति । [63]कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः । असमासपक्षे प्रथमैकवचनं च पूर्वपदस्य । [64]अन्योऽन्यस्येत्यर्थः । [V]तानि [V]छन्दांसि [V]देवाः [V]एतेन वक्ष्यमाणेन [65]क्रमेण [V]व्यवाहयन् व्यत्यासेन प्रापयन् स्थानानि । कथमित्याह - 'ऐन्द्रवायवस्य' इत्यादि ॥ [V]ऐन्द्रवायवस्य [V]चतुर्थम् [V]अहः [V]आयतनं स्थानम् [66]अव्यूढे ऐन्द्रवायवशुक्राग्रयणानां [67]पुनः पुनः प्रवृत्तेः । [V]तस्मिन् चतुर्थेऽहनि [V]आग्रयणः

छन्दांसीति ॥ [45]तमिममैन्द्रवायवाग्रत्वादिरूपं व्यूढप्रकारं लोकप्रसिद्धविवाहसाम्येन प्रशंसति - 'छन्दांस्यन्योऽन्यस्य लोकमभ्यध्यायन् तान्येतेनैव देवा व्यवाहयन्' इति ॥ यथा लोके काश्यपगोत्रोत्पन्नाः पुरुषाः विवाहार्थं भारद्वाजगोत्रोत्पन्नां कन्यकामभितो विचारयन्ति, भारद्वाजगोत्रोत्पन्नाश्चेतरां विचार्य [46]तथैव विवाहं कुर्वन्ति, एवमत्रापि [47-]छन्दोभिमानिनो [V]देवाः [-47] स्वकीयानामैन्द्रवायवाग्रत्वादीनाम् [V]अन्योन्यस्य [48-]स्थानमभिध्यायन्तः [V]तानि [-48] सर्वाण्यैन्द्रवायवत्वादीनि [V]एतेन [V]एव पूर्वोक्तप्रकारेण विवाहयन्ति विवाहं कारयन्ति स्थानविपर्यासेन प्रापयन्तीत्यर्थः ॥

ऐन्द्रवायवस्येति ॥ [49]तत्रैन्द्रवायवाग्रयणयोरन्योन्यस्थानविपर्यासं दर्शयति - 'ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने नवमेऽहन्नैन्द्रवायवो गृह्यते' इति ॥ समूढो हि द्वादशाहो व्यूढस्य प्रकृतिः । समूढे हि प्रायणीयोदयनीयदशमाहानि परित्यज्य अवशिष्टेषु

६१. मै. मै१. मै३. अ. अ१ - तेषाम् । ६२-६२. मै२ - लाक्षणिकत्वस्याध्यायन् । ६३. मै२ - 'कर्मव्यतिहारे' नास्ति । ६४. मै२ - अन्योन्यमन्यस्येत्यर्थः । ६५. मै२ - 'क्रमेण' नास्ति । ६६. मै२ - व्यूढे । ६७. मै२ - क्रमेण पुनः पुनः ।

४५. शृ१ - °मैन्द्रवायवादि° । ४६. अ. आ. क. पा. इ. वा. वै - तद्वदेव । ४७-४७. मै - छन्दोभिमानी देवता । ४८-४८. शृ१ - अभिधाय तस्मात्, मै - अभिधायं तज्ज्ञानि । ४९. आ - तथैन्द्र° ।

तस्मादाग्रयणस्याऽऽयतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं यत् पञ्चम(६)महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं

तस्मात् । आग्रयणस्य । आयतन इत्या-यतने । नवमे । अहन् । ऐन्द्रवायव इत्यैन्द्र- - वायवः । गृह्यते । शुक्रस्य । वै । एतत् । आयतनमित्या-यतनम् । यत् । पञ्चमम् (६) । अहः । तस्मिन् । ऐन्द्रवायव इत्यैन्द्र-वायवः । गृह्यते । तस्मात् । ऐन्द्रवायवस्येत्यैन्द्र-वायवस्य । आयतन इत्या-यतने । सप्तमे । अहन् । शुक्रः । गृह्यते । आग्रयणस्य । वै । एतत् । आयतनमित्या-यतनम् ।

Vगृह्यते । व्यूढे तच्च प्रदर्शितम् । Vतस्मात् स्वस्थानापहारिणः Vआग्रयणस्य स्थाने Vनवमे अहनि Vऐन्द्रवायवः Vगृह्यते । Vएतेन Vएव [६८] शुक्रस्य वै ' [६९]इत्यादि व्याख्यातम् । तत्र प्रथमं शुक्रैन्द्रवायवयोः [७०]विवाहः [७१]ततः आग्रयणशुक्रयोः ॥

नवसु दिनेषु त्र्यनीका त्रिरावृत्ता । तत्र द्वितीयायास्त्र्यनीकायाः मध्यवर्तिनो नवरात्रस्य चतुर्थेऽहन्युपक्रान्तरूपत्वात्तदहः Vऐन्द्रवायवस्य आयतने Vतस्मिन् अहनि पूर्वोक्तव्यूढप्रकारेण द्वितीयः Vआग्रयणः गृहीतः । नवमं चाहः समूढ आग्रयणस्यायतनम् । तत्र व्यूढप्रकारेण [५०]द्वितीयः Vऐन्द्रवायवः गृहीतः । सोऽयमैन्द्रवायवाग्रयणयोः परस्परं विवाहः ॥

शुक्रस्येति ॥ अथ शुक्रैन्द्रवायवयोः परस्परं विवाहं दर्शयति - ' शुक्रस्य वा एतदायतनं यत् पञ्चममहस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहञ्छुक्रो गृह्यते ' इति ॥ समूढगते नवरात्रे Vयत् Vपञ्चमम् Vअहः तदेतद् [५१]द्वितीयायाः त्र्यनीकाया मध्यवर्तित्वात् Vशुक्रस्य Vआयतनम् । Vतस्मिन् अहनि व्यूढप्रकारेण Vऐन्द्रवायवः गृहीतः । यत्तु सप्तममहस्तदेतत् तृतीयायास्त्र्यनीकायाः प्रथमदिनत्वात् Vऐन्द्रवायवस्य आयतनम् । तस्मिन्नहनि द्वितीयवारमावर्त्यमानः Vशुक्रः गृहीतः । सोऽयं शुक्रैन्द्रवायवयोर्विवाहः ।

६८. अ१ - ' शुक्रस्य ' नास्ति । ६९. मै२ - इति । ७०. मै. मै१. मै३. अ. अ१ - ' विवाहः ' नास्ति । ७१. मै२ - तत्र ।

५०. म - प्रथमम् । ५१. मै - ' द्वितीयायाः ' नास्ति ।

यत् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो गृह्यते छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति

यत् । षष्ठम् । अहः । तस्मिन् । शुक्रः । गृह्यते । तस्मात् । शुक्रस्य । आयतन इत्या-यतने । अष्टमे । अहन् । आग्रयणः । गृह्यते । छन्दाꣳसि । एव । तत् । वीति । वाहयति । प्रेति । वस्यसः । विवाहमिति वि-वाहम् । आप्नोति ।

‘ छन्दांस्येव ’ इत्यादि ।। [V]तत् तथा कुर्वन् [V]छन्दांसि [V]एव [V]विवाहयति [७२]परस्परेणाभिसंबन्धीनि करोति, तत्प्रधानत्वादह्नाम् । एवं छन्दसां [७३]विवहनस्य वेदिता [७४][V]वस्यसः प्रकृष्टात् कुलात् [V]विवाहं [७५]प्राप्नोति दारिकां परिणयति । वसुमच्छब्दादीयसुनि “ विन्मतोर्लुक् ” (पा ५.३.६५) इति लुक् । टिलोपे छान्दसः प्रत्ययादेर्लोपः । [७६-] अथो अपि च देवार्थं [V]यज्ञे यज्ञनिर्वृत्तये [V]संविदं [V]दधाति संधारयति व्यूढं यज्ञं निर्वर्तयिष्यामीति । तस्मात् [-७६] [V]इदम् अनेन क्रमेण छन्दांसि [V]अन्यः [V]अन्यस्मै [V]ददाति [७७-] अन्यच्छन्दसः स्थानम् [-७७]

आग्रयणस्येति ।। अथ शुक्राग्रयणाग्रयोः परस्परं विवाहं [५२-] दर्शयति - ‘आग्रयणस्य वा एतदायतनं यत् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो गृह्यते ’ इति ।। [V]यत् एतत् [V]षष्ठम् [V]अहः तदेतत् द्वितीयायास्त्र्यनीकायाः अन्तिमत्वात् [V]आग्रयणस्य [V]आयतनं, [V]तस्मिन् अहनि [-५२] व्यूढप्रकारेणावर्त्यमानः प्रथमः [V]शुक्रः गृहीतः । यत्त्वष्टममहस्तदेतत्तृतीयायास्त्र्यनीकायाः मध्यवर्तित्वात् [V]शुक्रस्य आयतनं तस्मिन्नहनि व्यूढप्रकारेण [V]आग्रयणः गृहीतः । सोऽयं शुक्राग्रयणयोर्विवाहः ।।

छन्दाꣳसीति ।। [५३]एतद्वेदनं प्रशंसति - ‘छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं वेदाथो देवताभ्य एव यज्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै ददाति ’ इति ।। यः पुमानेवमैन्द्रवायवाग्रत्वादीनां विवाहं जानाति स तेन वेदनेन छन्दोदेवतानामेव विवाहं कृतवान् भवति । स्वयं च [५४-] धनिकतमात् कुलात् [-५४] [V]विवाहं [V]प्राप्नोति । अपि च यज्ञानुष्ठानकाले देवताविषयमभिज्ञानं

७२. मै२ - °रेणसंबन्धीनि, अ१ - परेणाभि° । ७३. अ१. मै१ - विवाहनस्य । ७४. मै२ - च सः । ७५. मै२ - आप्नोति । ७६-७६. मै२ - अथो अपि च छन्दांसि विवहनस्य वेदिता च स प्रकृष्टताल्या द्वितीयं प्राप्नोति । ७७-७७. मै१ - अन्यच्च स्वस्थानम् ।

५२-५२. वा - ‘दर्शयति - - - - अहनि ’नास्ति । ५३. म - ‘एतत् ’नास्ति । ५४-५४. अ. पा. इ. वा - धनिकतमाच्च कुलात् , म - वसुमत्तमाच्छ्वशुरात् , मै - धनिकतमात् शुक्रात् ।

य एवं वेदाथो देवताभ्य एव यज्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै(७)ददाति ॥८॥

(एवद्वै पञ्चमेऽहन् त्रैष्टुभ एतद्गृह्यते यज्ञस्य पञ्चममन्यस्मा एकं च ।)

यः । एवम् । वेद । अथो इति । देवताभ्यः । एव । यज्ञे । संविदमिति सं-विदम् । दधाति । तस्मात् । इदम् । अन्यः । अन्यस्मै (७) । ददाति ॥८॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अन्यस्मै ददाति, अन्यदपि चान्यस्मै । पूर्ववद्द्विर्वचनादि । यद्वा - [७८]Vतस्मात् Vअन्यः पुरुषः [७९]अन्यस्मै अन्यगोत्राय [८०]स्वदारिकां [८१]ददाति [८२]यस्मादेवं छन्दांसि अन्योऽन्यस्मै स्वस्थानं प्रादुरिति । [८३]इदमिति सामान्येन लोकप्रसिद्धिं दर्शयति । इदमेव विवहनं [८४]प्रतिपादनं लिङ्गं [८५]अव्यूढो व्यूढस्य प्रकृतिरिति । असत्यां हि [८६]तस्यां ऐन्द्रवायवस्य [८७]वा [८८]इत्याद्यघटमानं स्यात् , न हि कस्यचित् किञ्चित् स्थानं नियतं [८९]स्यात् ॥

॥ इति सप्तमे द्वितीये अष्टमोऽनुवाकः ॥

[५५]Vदधाति [५६]धारयति । यस्मादेवं छन्दसां विवाहः प्रवृत्तः Vतस्मात् लोकेऽपि Vइदं कन्यकारूपमपत्यम् Vअन्यः पिता Vअन्यस्मै जामात्रे Vददाति ॥

अथ मीमांसा -

दशमाध्यायस्य [५७]पञ्चमपादे चिन्तितम् -

"[५८-] त्र्यनीकायामैन्द्रवायवशुक्राग्रानुवादता ।
परिसंख्या वाऽर्थवादो वा विधिर्वा न हि त्रयम् [-५८] ॥

७८. मै२ - 'तस्मात्' नास्ति । ७९. मै२ - 'अन्यस्मै' नास्ति । ८०. मै१ - स्वदुहितृकाम् । ८१. मै. मै१. मै३. अ. अ१ - करोति । ८२. मै२ - यस्मादेव । ८३. मै१. अ१ - 'इदमिति' नास्ति । ८४. मै१ - प्रवृत्तिवादनम् । ८५. [भाष्यारम्भगतविवेचनमनुरुन्ध्यास्माभिः स्वीकृतः पाठः, मै - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'समूढः' इति पाठ उपलभ्यते ।] । ८६. मै२ - तस्मात् । ८७. मै२ - वा एतत् । ८८. मै१. अ१ - °द्यघटनम् । ८९. मै२ - अस्तीति ।

५५. वै - ददति, शृ१. म. मै - 'दधाति' नास्ति ॥ ५६. मै - कारयति । ५७. आ. क - °पादे त्रयोविंशाधिकरणे । ५८-५८. म - त्र्यणीदावैन्द्रवायवाग्रशुक्राग्रते विधिः । परिसंख्यार्थवादो वा विधिर्वा न हि ते त्रयः ॥

वैयर्थ्येन "[५९]त्रिदोषत्वाल्लक्षणापत्तितस्तथा ।

विधिराग्रयणाग्रत्व इवानैमित्तिको हि सः" ॥ (जैन्या १०.५.२३.३६-३७)

अस्ति द्वादशाहे त्र्यनीका। ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः। अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः । अथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमिति । [६०]तत्र द्वादशाहगतेषु द्वितीयतृतीयचतुर्थेषु त्रिष्वहःसु [६१]क्रमेणैन्द्रवायवाग्रत्व-शुक्राग्रत्वाग्रयणाग्रत्वानि विहितानि । तेष्वाद्यं [६२]रथन्तरनिमित्तम् । [६३]द्वितीयं बृहन्निमित्तम् । एतच्च प्रकृतौ व्यवस्थितम् । तदुभयमत्र चोदकेन प्राप्तम् । [६४]तत्र चतुर्धा संशयः - अनुवादो वा परिसंख्या वाऽर्थवादो विधिर्वेति । [६५]तत्र प्राप्तत्वादनुवाद इति चेत् । न । वैयर्थ्यापत्तेः । तर्हि गुणान्तरपरिसंख्याऽस्त्विति चेत् । [६६]न । दोषत्रयापत्तेः । [६७] चतुर्थेऽहन्यप्राप्तस्याऽऽग्रयणाग्रत्वस्य विधित्सितस्य प्रशंसार्थोऽयमर्थवाद इति चेत् । न । लक्षणावृत्तिप्रसङ्गात् । तस्मादाग्रयणाग्रत्वे यथा विधिस्तथेतरयोरपि द्रष्टव्यः । न च प्राप्तत्वादविधिरिति वाच्यम् । तस्य [६८]विधेरनैमित्तिकत्वाभ्युपगमात् । रथन्तरादिनिमित्तकयोरेव हि चोदकेन प्राप्तिः । प्रयोजनं तु द्वादशाहविकृतिषु यत्र क्वापि रथन्तरादिनिमित्तत्वाभावेऽपि [६९]ऐन्द्रवायवाग्रत्वादिसिद्धिः [६७] ॥

तत्रैवान्यचिन्तितम् -

" व्यूढोऽपि प्रकृतिः किं वा विकृतिः स्याद्धि पृष्ठवत् ।

विधिसाम्यादादिमोऽन्त्यो लिङ्गात् कामे विधेरपि " ॥ (जैन्या १०.५.२४.३८) ।

द्विविधो हि द्वादशाहः - समूढो व्यूढश्च । तत्र समूढः पूर्वमुदाहृतः । अथ व्यूढः उदाह्रियते - ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ । अथेतरेषां [७०]दशानामह्नामैन्द्रवायवाग्रं प्रथममहः । अथ शुक्राग्रमथ द्वे आग्रयणाग्रे । अथैन्द्रवायवाग्रमथ द्वे शुक्राग्रे । अथाग्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे इति । तत्र समूढस्य तावत् प्रकृतित्वमविवादम् तद्वद्व्यूढोऽपि किं प्रकृतिः किं वा विकृतिरिति संशये प्रकृतिरिति प्राप्तम् । कुतः ? विधिसाम्यात् । यथा समूढप्रकारः क्रत्वर्थो विहितस्तथा व्यूढप्रकारोऽपि । न चात्र कश्चिद्विशेषोऽस्ति येन

---

५९. अ. पा. इ. वा. वै - °त्वाल्लक्षणावर्तितः, मै - त्वाल्लक्षणापत्तिः । ६०. अ. पा. इ.वा - सत्रद्वादशाह° । ६१. इ. वा. वै - °ग्रत्वाग्रयणाग्रत्वमिति, म - शुक्राग्रणग्रत्वानि (?) । ६२. शृ१ - रथन्तरं विहितं निमित्तम् । ६३. शृ१ - द्वितीये । ६४. म - 'तत्र 'नास्ति । ६५. शृ१ - त्रयः । ६६. वै - ना । ६७-६७. शृ१ - 'चतुर्थे° ---- °सिद्धिः 'नास्ति । ६८. मै - विधेरन्तिकत्वा° । ६९. इ. वा. वै - ऐन्द्रवायवसिद्धिः, म. आ - °वायवाग्रत्वसिद्धिः । ७०. अ - द्वादशानामह्ना° ।

तयोः प्रकृतिविकृतिभावो निश्चीयेत । न च प्रकारद्वयस्य प्रकृतित्वमदृष्टचरम् । रथन्तरबृहत्पृष्ठयोर्ज्योतिष्टोमप्रकारयोस्तद्दर्शनादिति पूर्वः पक्षः । व्यूढः समूढस्य विकृतिः । कुतः । लिङ्गदर्शनात् । "ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः" (तैसं ७.२.८) इति व्यूढे श्रूयते । एतच्च विकृतित्वे सति भवति, नान्यथा । तथा हि [७१]व्यूढे [७२]प्रायणीयोदयनीयव्यतिरिक्तेषु दशस्वहःसु यच्चतुर्थं [७३]तदाग्रयणाग्रत्वादैन्द्रवायवस्यायतनम् । [७४]समूढे तु तदहर्नवानामह्नां मध्ये द्वितीयत्रिकादित्वादैन्द्रवायवाग्रम् । तच्च व्यूढस्य विकृतितायां चोदकेन प्राप्यमाणं विधित्सिताग्रयणाग्रत्वस्तुतये [७५-] अनूद्यत इति युक्तम् [-७५] । किंच यः कामयेत बहु स्यां प्रजायेयेति कामाय व्यूढो विधीयते । तथा च सति समूढवत् क्रत्वर्थे विध्यभावाद्रथन्तरबृहत्पृष्ठवैषम्येण [७६]विकल्पितप्रकृतित्वं नास्ति । ततः समूढस्य [७७]द्वादशाहस्य विकृतिः । अहर्गणेष्वनयोरन्यतरस्य [७८-] अतिदेशः पूर्वपक्षिणः [-७८] प्रयोजनम् । समूढस्यैवातिदेशः [७९]सिद्धान्तः ॥

तत्रैवान्यच्चिन्तितम् -

"[८०]व्यूढे भक्षादिमन्त्राणामर्थानां च व्यतिक्रमः ।
मन्त्राणामेव [८१]वाऽऽद्यः स्यादविशेषेण कीर्तनात् ॥
छन्दसां व्यत्ययः प्रोक्तो नार्थानां तेन मन्त्रगाः ।
गायत्र्याद्या विपर्यास्या अर्थेषूक्तिः [८२]प्रशस्तये" ॥ (जैन्या १०.५.२६.४१-४२)

व्यूढे द्वादशाहे भक्षपवमानतदुभयमन्त्रपरिधिकपालानि चोदकप्राप्तानि । तत्र भक्षमन्त्रेषु [८३]सवनत्रयगतेषु [८४]गायत्रीछन्दसस्त्रिष्टुप्छन्दसो [८५]जगतीछन्दस इति पदत्रयं श्रुतम् । तथा पवमानत्रयविषयेष्वन्वारोहमन्त्रेषु [८६]गायत्रीछन्दाः त्रिष्टुप्छन्दा जगतीछन्दा इति [८७]श्रुतम् । [८८-] तथा परिधिस्तावके अर्थवादे पठ्यते - "गायत्रो मध्यमः परिधिस्त्रैष्टुभो दक्षिणो जागत उत्तरः" इति । तथा कपालविषयं वाक्यं पठ्यते -

---

७१. म - 'व्यूढे' नास्ति । ७२. म - °नीयव्यतिरिक्तस्थलेषु । ७३. मै - दशाग्र° । ७४. अ. पा. इ. वा - षडहे । ७५-७५. मै - अनु अत्र इत्युक्तम् । ७६. मै - विकलितप्रकृ°, अ. पा. इ. वा. वै - एकत्ववत्प्र° । ७७. अ. पा. इ. वा. वै. शृ१. म. मै - 'द्वादशाहस्य' नास्ति । ७८-७८. अ. पा. इ. वा. वै - अतिदेशः पूर्वपक्षेण, शृ१ - 'अतिदेशः पूर्वपक्षिणः' नास्ति । ७९. इ. वा. म. मै - सिध्यति, वै - सिद्धान्ते । ८०. अ - व्यूढम् । ८१. अ. पा. इ. वा. वै - बाधः, म. मै - वादः । ८२. शृ१ - प्रशस्यते । ८३. म - सवनत्रयेषु । ८४. अ. पा. म. वै - गायत्रछन्द° । ८५. मै - जगतीछन्दोभिः, वै - 'जगतीछन्दसः' नास्ति । ८६. शृ१. अ. पा. इ. वा. म. वै - गायत्रच्छ°, मै - गायत्रम् । ८७. म- श्रुतिः । ८८-८८. अ. पा. इ. वा. म. वै - 'तथा - - - - तिसृभिः' नास्ति ।

"अष्टाकपालः [८९]प्रातःसवनिकः एकादशकपालो माध्यन्दिनीयो [९०]द्वादशकपालस्तृतीयसवनिकः" इति। अत्राष्टत्वादिभिः [९१]तिसृभिः[९१] संख्याभिर्गायत्र्यादिच्छन्दांसि [९२]तत्तत्पादाक्षरस्मृतिद्वारेणोपस्थाप्यन्ते । एवं स्थिते सति व्यूढप्रकरणे छन्दोव्यतिक्रमः पठ्यते - "[९३]छन्दांसि वा अन्योन्यस्य लोकमभ्यध्यायन्[९३] गायत्री त्रिष्टुभस्त्रिष्टुब्जगत्या जगती गायत्र्याः" (तैसं ७.२.८) इति । तत्र संशयः - सोऽयं छन्दोव्यतिक्रमः भक्षपवमानपरिधिकपालरूपाणामर्थानामुभयविधमन्त्रगतछन्दोवाचिशब्दानां [९४]च कर्तव्यः । किं वा तेषां शब्दानामेवेति । तत्र मन्त्रगतानामेवेति [९५]विशेषाश्रवणात् सर्वत्र व्यतिक्रम इत्याद्यः पक्षः । तेन [९६]गायत्रीशब्दनिर्दिष्टः प्रातःसवनीयो भक्षस्त्रिष्टुब्शब्दितस्य [९७]माध्यन्दिनीयस्य [९८]भक्षस्य स्थाने । स च तृतीयसवनीयस्य स्थाने, सोऽपि प्रातःसवनीयस्य स्थाने । [९९]तथा बहिष्पवमानो [१००]माध्यन्दिनसवने, माध्यन्दिनपवमानस्तृतीयसवने, आर्भवपवमानः प्रातः[१०१]सवने । तथा[१०१] [१०२]मध्यमः स्थविष्ठः परिधिर्दक्षिणतः, अणीयान् द्राघीयानुत्तरतः, अणिष्ठो ह्रसिष्ठो [१०३] मध्यतः । तथाऽष्टाकपालो माध्यन्दिने सवने, एकादशकपालस्तृतीयसवने, द्वादशकपालः प्रातसवने । सोऽयमर्थव्यतिक्रमः । मन्त्रद्वयशब्देष्वप्येवं योजनीयमिति प्राप्ते ब्रूमः - [१०४]छन्दांसीति [१०५]वाक्येऽर्थानां व्यतिक्रमो नोक्तः । अतो मन्त्रगतगायत्र्यादिशब्दानामेव व्यतिक्रमः । यस्त्वर्थेषु गायत्र्यादिशब्दप्रयोगः स प्रशंसार्थः । भक्षाद्यर्थानां [१०६]मुख्यच्छन्दस्त्वाभावादिति राद्धान्तः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥

---

८९. अ. आ. क - प्रातःसवनीयः, मै - प्रातःसवनी । ९०. शृ१ - °तृतीयसवनः । ९१. अ. आ. इ. वा. वै. मै - त्रिभिः । ९२. मै - °स्थाप्यन्ते एते । ९३-९३. शृ१. अ. पा. इ. वा. वै. म. मै - 'छन्दसि - - - - °मभ्यध्यायन्' नास्ति । ९४. अ. पा. म. मै - 'च' नास्ति । ९५. मै - विशेषश्रवणात् । ९६. शृ१. अ. इ. वा. म. मै - गायत्रशब्दनिर्दिष्टः । ९७. शृ१ - माध्यन्दिनस्य सवनीयस्य, म - माध्यन्दिनभक्षस्य । ९८. मै - 'भक्षस्य' नास्ति । ९९. शृ१ - 'तथा' नास्ति । १००. अ. आ. क. पा. इ. वा. हा. म - माध्यन्दिनपवमाने, वै - 'माध्यन्दिनसवने' नास्ति । १०१-१०१. इ. वै - 'सवने । तथा' नास्ति । १०२. शृ१. अ. पा. इ. वा. वै. मै - 'मध्यमः' नास्ति । १०३. शृ१ - मध्यमतः । १०४. म - छन्दांस्येवेति । १०५. अ. पा. इ. वा. वै - वाक्यार्थानाम् । १०६. म - °छन्दस्त्वेति ।

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत् तमाहरत् तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः

प्रजापतिरिति प्रजा-पतिः । अकामयत । प्रेति । जायेय । इति । सः । एतम् । द्वादशरात्रमिति द्वादश-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । प्रेति । अजायत । यः । कामयेत । प्रेति । जायेय । इति । सः । द्वादशरात्रेणेति द्वादश-रात्रेण । यजेत । प्रेति । एव । जायते । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । अग्निष्टोमप्रायणा इत्यग्निष्टोम-प्रायणाः । यज्ञाः । अथ । कस्मात् । अतिरात्र इत्यति-रात्रः ।

इदानीं [१-]द्वादशाहो विधीयते[-१] - 'प्रजापतिः' इत्यादि । गतम् (तैसं ७.२.५) ॥ 'ब्रह्मवादिनः' इत्यादि ॥ [V]अग्निष्टोमप्रायणाः [V]यज्ञाः अग्निष्टोमारम्भणा भवन्ति [२]सर्वे [३]संगताः, [V]अथ [V]कस्मात् कारणात् [४]तत्र द्वादशाहे [V]अतिरात्रः [V]पूर्वः [V]प्रयुज्यते [V]इति [V]ब्रह्मवादिनः पर्यनुयोगं कुर्वन्ति । तत्रैवं ब्रूयादित्याह - 'चक्षुषी वै' इत्यादि । [V]यज्ञस्य चक्षुःस्थानीयौ [V]अतिरात्रौ । कनीनिका चक्षुःस्थं कृष्णमण्डलं, तस्थानीयौ [V]अग्निष्टोमौ यज्ञस्य । तथा सति [V]यदि [V]अग्निष्टोमं [V]पूर्वं [V]प्रयुञ्जीरन् [V]बहिर्धा चक्षुषः बहिः [V]कनीनिके [V]दध्युः स्थापयेयुः ।

अष्टमेऽनुवाके द्वादशाहस्य व्यूढप्रकारो निरूपितः । अथ नवमे द्वादशाहस्याहर्विशेषा उच्यन्ते ॥

प्रजापतिरिति ॥ तत्रादौ द्वादशाहं विधत्ते - 'प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत् तमाहरत् तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते' इति ॥

ब्रह्मवादिन इति ॥ अथ प्रश्नोत्तरमुखेन(ण) प्रथममहर्विधत्ते - 'ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ यदग्निष्टोमं पूर्वं प्रयुञ्जीरन् बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति' इति ॥ अग्निष्टोमः प्रायणं [१]प्रथमभावी येषां सोमयागानां ते

१-१. मै२ - द्वादशाहा विधीयन्ते । २. मै१ - इति सर्वे, अ१ - इति पूर्वम्, मै२ - इतः पूर्वम् । ३. मै२ - गताः । ४. अ१. मै१ - अत्र ।

१. क. मै - प्रथमभावि ।

पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य(१)दग्निष्टोमं पूर्वं प्रयुञ्जीरन् बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति

पूर्वः । प्रेति । युज्यते । इति । चक्षुषी इति । वै । एते इति । यज्ञस्य । यत् । अतिरात्रावित्यति-रात्रौ । कनीनिके इति । अग्निष्टोमावित्यग्नि-स्तोमौ । यत् (१) । अग्निष्टोममित्यग्नि-स्तोमम् । पूर्वम् । प्रयुञ्जीरन्निति प्र-युञ्जीरन् । बहिर्धेति बहिः-धा । कनीनिके इति । दध्युः । तस्मात् । अतिरात्र इत्यति-रात्रः । पूर्वः । प्रेति । युज्यते । चक्षुषी इति । एव । यज्ञे । धित्वा । मध्यतः । कनीनिके इति । प्रतीति । दधति ।

छान्दसो धाप्रत्ययः । Vतस्मात् Vअतिरात्रः एव प्रथमः प्रयोक्तव्य इति । एवं हि सति Vचक्षुषी Vयज्ञे Vधित्वा स्थापयित्वा अविनष्टे कृत्वा । विपर्यये हि [५] चक्षुः Vएव न स्यादिति । धारणेन ततस्तयोः चक्षुषोर्मध्यतः Vकनीनिके Vप्रतिदधाति प्रतिष्ठापयन्ति ॥

Vअग्निष्टोमप्रायणाः । अत एवास्य काण्डस्याद्यानुवाकेऽभिहितम् - "तस्मादाहुर्ज्येष्ठयज्ञ इति" (तैसं ७.१.१) इति । एवं सति तमग्निष्टोमं परित्यज्य द्वादशाहस्य प्रथमेऽह्नि कस्मात् कारणात् Vअतिरात्रः Vप्रयुज्यते Vइति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा उत्तरमेवमाहुः - पुरुषस्थानीयस्य द्वादशाहयज्ञस्य चक्षुर्गोलकस्थानीयौ Vअतिरात्रौ । कनीनिकास्थानीयौ Vअग्निष्टोमौ । कृष्णमण्डलस्य मध्ये यदवान्तरं पृथङ्मण्डलमतिकृष्णं [२]तद्दर्शनशक्तिस्थानं सेयं कनीनिकेत्युच्यते । एवं सति यदि यजमानाः प्रथमम् Vअग्निष्टोमं Vप्रयुञ्जीरन् [३] तदानीमाधारभूतं गोलकं विना बहिरेवाऽऽकाशप्रदेशे Vकनीनिके स्थापयेयुः । Vतस्मात् कारणात् Vअतिरात्रः एव प्रथमेऽह्नि प्रयोक्तव्यः । तथा सति [४]पुरुषरूपे द्वादशाहयज्ञे गोलकद्वयं प्रथमं स्थापयित्वा तन्मध्ये कनीनिकाद्वयं स्थापयन्ति ॥

यो वा इति ॥ [५]तदेवं प्रथममहर्विधायानन्तरभावीनि दशाहानि [६] पक्षिरूपं परिकल्प्य [६] विधत्ते - 'यो वै गायत्रीं ज्योतिः[३]पक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ

५-५. मै२ - 'चक्षुः ---- °मेव' नास्ति ।

---

२. म. मै - दर्शनशक्तिस्थानम् । ३-३. मै - 'तदानीं ---- ज्योतिः' नास्ति । ४. म - पुरुषे । ५. अ - तदेव । ६-६. शृ१ - यज्ञरूपं परिकल्प्यम्, अ. क. इ. वा. वै - पक्षरूपं परिकल्प्य ।

यो वै गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गं लोक(२)मेति

यः । वै । गायत्रीम् । ज्योतिःपक्षामिति ज्योतिः-पक्षाम् । वेद । ज्योतिषा । भासा । सुवर्गमिति सुवः-गम् । लोकम् । एति । यौ । अग्निष्टोमावित्यग्नि-स्तोमौ । तौ । पक्षौ । ये । अन्तरे । अष्टौ । उक्थ्याः । सः । आत्मा । एषा । वै । गायत्री । ज्योतिःपक्षेति ज्योतिः-पक्षा । यः । एवम् । वेद । ज्योतिषा । भासा । सुवर्गमिति सुवः-गम् । लोकम् (२) । एति ।

'यो वै गायत्रीम्' इत्यादि ॥ Vज्योतिःपक्षां ज्योतिष्टोमपक्षां पक्षिरूपां Vगायत्रीं Vयः वेद सः Vज्योतिषा द्योतमानया Vभासा स्वर्गं गच्छति । तमेव दर्शयति - [६]Vयौ Vअग्निष्टोमौ दशरात्रस्याद्यन्तौ Vतौ अस्याः Vपक्षौ, Vये मध्यस्थिताः Vअष्टौ Vउक्थ्याः Vसः अस्याः Vआत्मा । 'एषा' इत्यादि । गतम् । अस्याश्चक्षुषी अतिरात्रावित्युक्तमेव [-५] ॥

एवं गायत्र्याः [७-] पक्षित्वेन रूपणं [-७] सिद्धम् । [८]अस्याः [९]सोमाहरणादौ पक्षित्वमिति [१०]तद्रूपो द्वादशाहो रूपितः । इदानीं प्रजापतित्वेन रूप्यते - 'प्रजापतिर्वै' इत्यादि । Vद्वादशधा

येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गं लोकमेति' इति ॥ अष्टाक्षरपादां गायत्रीमष्टसंख्योपेतमुक्थ्यरूपमहरष्टकं पक्षिरूपत्वं परिकल्प्य तद्रूपं गायत्रीत्युच्यते ज्योतीरूपौ पक्षौ यस्या गायत्र्याः सा ज्योतिःपक्षा । तादृशीं यो यजमानः Vवेद स यजमानः पक्षरूपं ज्योतिरेव [७]स्वर्गमार्गप्रदर्शनाय भासकं [८]दीपं कृत्वा तेनानुष्ठितज्योतिराख्येन प्रकाशेन स्वर्गं प्राप्नोति । कौ तौ पक्षौ किं तस्याः पक्षिरूपाया गायत्र्याः स्वरूपमिति तदुभयमुच्यते - द्वादशाहस्य प्रायणीयोदयनीयाख्ये प्रथमोत्तमे [९]अहनी [१०]विहाय मध्यवर्तिनो दशरात्रस्याऽद्यन्तयोरह्नोरनुष्ठेयौ Vयौ Vअग्निष्टोमौ Vतौ पक्षस्थानीयौ । Vये च तयोरग्निष्टोमयोरभ्यन्तरेष्वष्टसंख्याकेष्वहःस्वनुष्ठेयाः Vअष्टौ Vउक्थ्याः सोऽयमुक्थ्यसंघः पक्षिरूपायाः गायत्र्याः Vआत्मा शरीरम् । एतादृशानि दशाहानि कुर्यादित्यर्थः । [११]'एषा [१२]वा' इत्यादिः प्रतिपादितस्यार्थस्योपसंहारः ॥

६. मै१ - यावत् । ७-७. मै२ - प्रकृष्टत्वानुरूपणम् , मै१ - °त्वेनानुरूपम् । ८. मै२ - तस्याः । ९. मै२ - सोमाभरणादौ । १०. मै२ - तत्र रूपाय ।

७. पा - स्वर्गप्रदर्शनाय । ८. अ. आ. पा. इ. वा. म. वै - दीपकम् । ९. मै - 'अहनी' नास्ति । १०. मै - अपहाय । ११. शृ१. म. मै - एषः । १२. म - 'वै' नास्ति ।

प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति

प्रजापतिरिति प्रजा-पतिः । वै । एषः । द्वादशधेति द्वादश-धा । विहित इति वि-हितः । यत् । द्वादशरात्र इति द्वादश-रात्रः । यौ । अतिरात्रावित्यति-रात्रौ । तौ । पक्षौ । ये । अन्तरे । अष्टौ । उक्थ्याः । सः । आत्मा । प्रजापतिरिति प्रजा-पतिः । वाव । एषः । सन् । सत् । ह । वै । सत्रेण । स्पृणोति । प्राणा इति प्र-अनाः । वै । सत् । प्राणानिति प्र-अनान् । एव । स्पृणोति ।

द्वादशात्मा विवक्षितः। तस्य Vअतिरात्रौ Vपक्षौ पार्श्वे [११]अन्तःस्थिताः Vअष्टौ Vउक्थ्याः Vआत्मा, सकनीनिके [१२]तस्य चक्षुषी उक्ते ॥

'प्रजापतिर्वाव' इत्यादि ॥ Vएषः द्वादशाहेन यष्टा Vप्रजापतिः एव [१३]Vसन् प्रकृष्टं प्रशस्तम् अविनाशं फलं Vसत्रेण अनेन Vस्पृणोति लभते। "स्पृ प्रीत्यादौ" (धापा १२८४) सौवादिकः। किं च [१४]Vप्राणाः एव स्वयं[१४] Vसत् फलं तस्मात् Vप्राणान् Vएव Vस्पृणोति ॥

प्रजापतिरिति ॥ सोऽयं द्वादशरात्रो द्विविधः सत्ररूपोऽहीनरूपश्च। तत्र [१३]सत्ररूपं तावद्विधातुं प्रस्तौति - 'प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति' इति ॥ [१४]योऽयं Vद्वादशरात्रः अस्ति सोऽयं द्वादशभिः [१५]प्रकारैराविर्भूतः Vप्रजापतिः Vएव। तस्य च प्रजापतेः पक्षिरूपत्वं परिकल्प्यते। पूर्वं पक्षत्वेन निरूपितयोरग्निष्टोमयोः समीपवर्तिनौ प्रथमद्वादशयोरह्नोरनुष्ठेयौ प्रायणीयोदयनीयाख्यौ Vयौ Vअतिरात्रौ Vतौ अपि पक्षाग्रस्थानीयत्वात् Vपक्षौ एव। [१६]अग्निष्टोमसहितयोरतिरात्रयोः पक्षयोर्मध्ये Vये Vअष्टौ Vउक्थ्याः Vसः अयमुक्थ्यसंघः पक्षिरूपस्य प्रजापतेः शरीरम्। एष एवंविधो द्वादशरात्रो यथोक्तकल्पनया द्वादशविधः। Vप्रजापतिः एव [१७]Vसन् स्वकीयेन

---

११. अ१ - एव सत् प्रकृष्टमविनाशम्। १२. मै. मै१. मै३. अ. अ१ - अस्य। १३. मै२ - सन् सत्। १४-१४. अ१ - प्राणा वै स्वयम्, मै१ - प्रजाः स्वयमेव।

---

१३. मै - सत्ररूपता। १४. मै - एवम्। १५. वा - प्रकारेण विभूतः। १६. शृ१ - अग्निष्टोमरहितयोर°। १७. अ. आ. क. पा. हा. इ. वा - 'सन्' नास्ति।

सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण इति प्रियः

सर्वासाम् । वै । एते । प्रजानामिति प्र-जानाम् । प्राणैरिति प्र-अनैः । आसते । ये । सत्रम् । आसते । तस्मात् । पृच्छन्ति । किम् । एते । सत्रिणः । इति । प्रियः ।

'सर्वासाम्' इत्यादि ॥ Vएते हि सत्रिणः Vसर्वासां [१५]Vप्रजानां Vप्राणैः सह Vआसते प्राणान् रक्षन्तः Vआसते तस्मात् प्राणान् स्पृणोति प्रीणयतीति । Vतस्मात् एव च Vपृच्छन्ति लौकिकास्तुष्टाः Vकिम् Vएते Vसत्रिणः ये प्रजानां प्राणान् [१६]स्पृण्वन्ति [१७]इति अहो भाग्यमेतेषां धिगस्मानिति [१८]इति भावः । Vएवं वेदिता Vप्रजानां Vप्रियः च Vभवति । Vउत्थितः लोकेषु [१९]पूजितश्च भवति । एवं प्रशस्तत्वाद्द्वादशाहेन यजेतेति विधिः । अन्ये [२०]तु अन्यथा वर्णयन्ति, स्पृणोतिः हिंसाकर्मा, व्यत्ययेन [२१]श्नुः । प्रजापतिरेव सन् [२२]एष यजमानः सत्फलं [२३]सत्रासनेन स्पृणोति [२४]हिनस्ति, प्राणांश्च स्पृणोत्येव, तस्मात् सर्वासां प्रजानां [२५]प्राणैरेते आसते न

सत्ररूपप्रयोगेण Vसत् Vह Vस्पृणोति [१८-] सच्छब्दवाच्यं यदस्ति [-१८] तत् प्रीणयत्येव ॥ किं तद्वाच्यमिति तदुच्यते - प्रजानां Vप्राणाः एव सच्छब्दवाच्याः । जन्मान्तरेऽप्यनपायेन सद्भावात् । अतः सच्छब्दवाच्यान् Vप्राणान् Vएव प्रीणयति ॥

सर्वासामिति ॥ अथ प्रस्तुतं [१९]सत्ररूपं विधत्ते - 'सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण इति' इति ॥ Vये यजमाना द्वादशाहरूपं Vसत्रम् Vआसते अनुतिष्ठन्ति । आसिधातुः [२०]सत्रविषये अनुष्ठानमुपलक्षयति । ते यजमानाः Vसर्वासां Vप्रजानां Vप्राणैः एव निमित्तभूतैरनुतिष्ठन्ति । एतदनुष्ठानेनैव जगन्निर्वाहहेतुना प्राणाः प्रीता भवन्तीत्यर्थः । यस्मात् सत्रानुष्ठानं [२१-] प्राणानां [२२]प्रीतिहेतुः Vतस्मात् सर्वे जना अनुष्ठातृन् दृष्ट्वा Vकिम् एते Vसत्रिणः Vइति एवमादरेण साश्चर्याः Vपृच्छन्ति । [२३-] अतः प्रशस्तमिदं सत्रमनुष्ठेयमित्यर्थः ॥

---

१५. मै२ - 'प्रजानाम्' नास्ति । १६. अ१ - स्पृणोति । १७. मै. मै२. मै३. अ. अ१ - 'इति' नास्ति । १८. मै१. मै२ - 'इति' नास्ति । १९. अ१ - पूजिता, मै२ - ततश्च । २०. मै२ - 'तु' नास्ति । २१. मै१ - श्नुः, अ१ - 'श्नुः' नास्ति । २२. अ१ - 'एषः' नास्ति । २३. मै२ - सत्रेणासतः । २४. मै२ - भिनत्ति । २५. मै२ - प्राणैरेव ।

१८-१८. शृ१ - यच्छब्दवाच्यं सदस्ति । १९. शृ१. म. मै - सत्ररूपत्वम् । २०. म - सत्रविषयानु° । २१-२१. वा - 'प्राणानां - - - - वेदनम्' नास्ति । २२. म - धृतिहेतुः । २३-२३. इ. वै - 'अतः - - - - °वतिष्ठते' नास्ति ।

प्रजाना(३)मुत्थितो भवति य एवं वेद ॥९॥

(अग्निष्टोमौ यत्सुवर्गं लोकं प्रियः प्रजानां पञ्च च ।)

प्रजानामिति प्र-जानाम् (३) । उत्थित इत्युत्-स्थितः । भवति । यः । एवम् । वेद ॥९॥

[कासं ३४.८ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

केवलमात्मीयैरेव सत्रमासते ये मूर्खाः सत्रासनं कुर्वन्ति । [२६]यद्वा - [२७]लोके विरुद्धमाचरन्नुच्यते प्राणैः संक्रीडतीति । एवमेते प्रजानां [२८]प्राणविनाशार्थमासते इति । तस्मात् पृच्छन्ति लौकिकाः जुगुप्समानाः 'किमेते सत्रिणः' इति अहो मौर्ख्यमेषां ये विनाशहेतुं कुर्वन्ति धिगेतान् जितमस्माभिरिति । एवं विदित्वा [२९]य उत्थितः सत्राद्भवति सत्रासनं जहाति [३०]स [३१-] प्रजानां प्रियो भवति [-३१] अनिष्टव्यावृत्तेः । तस्मात् सत्रेण द्वादशाहेन यष्टव्यमित्यत्रैव योज्यम् । सत्रादुत्थितः प्रजानां [३२] प्रियो [३३]भवतीति [३४-] य एवं वेद सोऽपि प्रियो भवति प्रजानाम् [-३४] ॥

॥ इति सप्तमे द्वितीये नवमोऽनुवाकः ॥

प्रिय इति ॥ अथ वेदनं [-२१] प्रशंसति - 'प्रियः प्रजानामुत्थितो भवति य एवं वेद' इति ॥ सत्रस्य वेदिता सर्वासां [V]प्रजानां [V]प्रियः भूत्वा जगत्युत्कृष्टोऽवतिष्ठते [-२३] ॥

॥ [२४-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः [-२४] ॥

---

२६. मै२ - यथा । २७. मै. मै३. अ. अ१ - 'लोके' नास्ति । २८. मै१ - °विनाशनार्थ° । २९. मै२ - 'यः' नास्ति । ३०. मै२ - 'सः' नास्ति । ३१-३१. मै१. अ१ - 'प्रजानां - - - - भवति' नास्ति । ३२. मै२ - आत्ययः । ३३. अ१. मै१ - भवति । ३४-३४. मै२ - प्रजानां प्रियो भवति ।

२४-२४. मै - इति माधवीये वेदार्थप्रकाशे सप्तमकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः ।

न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवदूर्ध्वो ह वा एष आतत आसीत् ते देवा एतं वैश्वानरं पर्यौहन्त्सुवर्गस्य लोकस्य प्रभूत्या

न । वै । एषः । अन्यतोवैश्वानर इत्यन्यतः-वैश्वानरः । सुवर्गायेति सुवः-गाय । लोकाय । प्रेति । अभवत् । ऊर्ध्वः । ह । वै । एषः । आतत इत्या-ततः । आसीत् । ते । देवाः । एतम् । वैश्वानरम् । परीति । औहन् । सुवर्गस्येति सुवः-गस्य । लोकस्य । प्रभूत्या इति प्र-भूत्यै ।

पुनरपि द्वादशाह एव गुणविधयः [1]क्रियन्ते - 'न वा एषः' इत्यादि ॥ [V]एषः द्वादशाहः [V]अन्यतोवैश्वानरः, एकतोऽतिरात्रः । आदावेवातिरात्रवान् [V]सुवर्गाय [V]लोकाय [V]न [V]प्राभवत् स्वर्गं प्रापयितुं न समर्थोऽभवत् । कुत इत्याह - [V]एषः हि स्वर्गः [V]ऊर्ध्वः [V]आततः [2]विस्तीर्णः [V]आसीत्, तस्माद्यावत् स्वर्गप्रापणाय [3]पर्याप्तो नाभवत् । ततः [V]ते [V]देवाः [4]द्वादशाहं दृष्टवन्तः । [V]एतम् [5]एव [V]वैश्वानरं [V]पर्यौहन् परित आदावन्ते चानयन् । ततोऽसौ महत्त्वात् स्वर्गस्य [V]प्रभूत्यै प्रभूतये यावत्स्वर्गं [6] प्रजाः प्रापयितुं प्राभवत् [6] प्रापयितुं प्रभुरभवत् ॥

[1] नवमेऽनुवाके द्वादशाहगतान्येकादशाहानि विहितानि ।

न वा एष इति ॥ अथ दशमे द्वादशमहर्विधत्ते - 'न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवदूर्ध्वो ह वा एष आतत आसीत् ते देवा एतं वैश्वानरं पर्यौहन्त्सुवर्गस्य लोकस्य प्रभूत्यै' इति ॥ वैश्वानराख्येनाऽग्निना दृष्टत्वादतिरात्रो वैश्वानरः । अन्यत [2]एकस्मिन्नेव यागे वैश्वानरशब्दवाच्योऽतिरात्रो [1] यस्य द्वादशाहस्य सोऽयम् [V]अन्यतोवैश्वानरः । आदावेवातिरात्रयुक्तो न त्ववसान इत्यर्थः । एतादृश एव द्वादशाहः स्वर्गलोकं संपादयितुं न समर्थः । कुतो न समर्थ इति तदुच्यते - [V]एषः द्वादशाहः ऊर्ध्वाभिमुखोऽतिविस्तृतः आसीत् । तस्यावसाननियामकाभावात् । अतोऽयमपर्यवसितः सन् स्वर्गस्य [3]प्रभुः नासीत् । तदानीं [V]देवाः [V]एतं वैश्वानरशब्दवाच्यमतिरात्रं [V]पर्यौहन् परितोऽवसानस्थाने नियामकत्वेन स्थापितवन्तः । अतोऽतिरात्रेण नियमितत्वादेतावानयं द्वादशाह इति तत्परिमाणस्य पर्यवसितत्वात् स्वर्गलोकं संपादयितुमयं प्रभुर्भवति । तस्मादुपरिष्टादतिरात्रः कर्तव्य इति विध्युन्नयः ॥

१. मै२ - विधत्ते । २. मै. मै२. मै३. अ - विस्तीर्णः आस्तीर्णः । ३. मै१ - पर्याप्तम् । ४. मै. मै१. मै३. अ. अ१ - °शाहं तथा । ५. अ१. मै२ - 'एव' नास्ति । ६-६. मै. मै२. मै३. अ. अ१ - 'प्रजाः प्रापयितुं प्राभवत्' नास्ति ।

१. इ. वै - 'नवमे - - - - रात्रः' नास्ति । २. म - एकस्मिन् । ३. इ. वै - 'प्रभुः' नास्ति ।

ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वार्ध्नोदधि तदृध्नोति ह वा ऋत्विक्षु य एवं विद्वान् द्वादशाहेन यजते तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छ(१)द्यवं ग्रीष्मायौषधीर्वर्षाभ्यो

ऋतवः । वै । एतेन । प्रजापतिमिति प्रजा-पतिम् । अयाजयत् । तेषु । आर्ध्नोत् । अधीति । तत् । ऋध्नोति । ह । वै । ऋत्विक्षु । यः । एवम् । विद्वान् । द्वादशाहेनेति द्वादश-अहेन । यजते । ते । अस्मिन् । ऐच्छन्त । सः । रसम् । अह । वसन्ताय । प्रेति । अयच्छत् (१) । यवम् । ग्रीष्माय । ओषधीः । वर्षाभ्यः ।

---

[7]'ऋतवो वै' इत्यादि ॥ Vएतेन द्वादशाहेन पूर्वं Vऋतवः ऋत्विजो भूत्वा Vप्रजापतिम् Vअयाजयन् । ततः Vतत् तस्मात् तेन कर्मणा वा Vतेषु निमित्तभूतेषु प्रजापतिरधिकम् Vआर्ध्नोत् ॥

'ऋध्नोति' इत्यादि ॥ [8]तस्मात् Vएवं विदित्वा Vद्वादशाहेन यष्टा Vऋत्विक्षु निमित्तेषु Vऋध्नोति एव ॥

ऋतव इति ॥ अथैतस्य द्वादशाहस्याहीनरूपतां विधत्ते - 'ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वार्ध्नोदधि तदृध्नोति ह वा ऋत्विक्षु य एवं विद्वान् द्वादशाहेन यजते' इति ॥ पुरा कदाचिद्वसन्ताद्यृतवो देवा ऋत्विजो भूत्वा Vप्रजापतिं यजमानम् [4]Vएतेन द्वादशाहेन Vअयाजयन् [5]Vतत् तेन द्वादशाहेन स प्रजापतिः Vतेषु ऋतुषु मध्येऽधिकां समृद्धिं [6]प्राप्नोत् । तद्वदन्योऽपि Vऋत्विक्षु मध्ये [7]द्वादशाहयागेन समृद्धिं प्राप्नोति । पूर्वत्र यजमानबहुत्वादासिचोदानया विधानाच्च द्वादशाहस्य [8]सत्रत्वम् । इह तु [9]यजमानैकत्वाद्यजतिचोदनया विधानाच्चाहीनत्वमिति [10]विशेषः ॥

त इति ॥ तमिमं द्वादशाहं प्रशंसितु पूर्वोक्तामेव प्रजापतेः समृद्धिं प्रपञ्चयति - 'तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छद्यवं ग्रीष्मायौषधीर्वर्षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्याम्' इति ।

---

७. मै२ - 'ऋतवः' नास्ति । ८. मै१ - यस्मात् ।

---

४. मै - एकेन । ५. अ. आ. पा. इ. वा. वै - 'तत्' नास्ति । ६. मै - प्राप्नोति । ७. मै - द्वादशयागस्य । ८. शृ१ - सत्रत्वे । ९. म - यजमानकर्तृकत्वात् । १०. शृ१ - शेषः ।

व्रीहीञ्छरदे माषतिलौ हैमन्तशिशिराभ्यां तेनेन्द्रं प्रजापतिरयाजयत्
ततो वा इन्द्र इन्द्रोऽभवत् तस्मादाहुरानुजावरस्य यज्ञ इति

व्रीहीन् । शरदे । माषतिलाविति माष-तिलौ । हेमन्तशिशिराभ्यामिति हेमन्त-शिशिराभ्याम् । तेन । इन्द्रम् । प्रजापतिरिति प्रजा-पतिः । अयाजयत् । ततः । वै । इन्द्रः । इन्द्रः । अभवत् । तस्मात् । आहुः । आनुजावरस्येत्यानु-जावरस्य । यज्ञः । इति ।

'ते' इत्यादि ॥ ततः Vते ऋतवः Vअस्मिन् प्रजापतौ Vऐच्छन्त दक्षिणामलिप्सन्त । Vसः च प्रजापतिः अनन्तरं Vवसन्ताय Vरसं मध्वादि Vप्रायच्छत् पुष्पादिसंबन्धेन मधुमानभूत् वसन्तः । 'यवं ग्रीष्माय' इत्यादि । गतम् ॥

'तेनेन्द्रम्' इत्यादि ॥ Vइन्द्रम् अनुजावरं Vप्रजापतिः [१०]अनेन Vअयाजयत्, Vततः Vइन्द्रः Vइन्द्रः Vअभवत् अनुजावरत्वमपास्य प्रागिवेश्वरोऽभवत् । Vतस्मात् [११]Vआहुः Vआनुजावरस्य Vयज्ञः Vइति । य उत्कृष्टः सन् अवरभावं गतः Vसः Vएतेन यजेतेति, यस्मात् स तादृश इन्द्र एतेन Vअग्रे प्रथमम् [१२]Vअयजत अनुजावरत्वनिवृत्तये, ईश्वरश्च संपन्न इति ॥

Vते वसन्ताद्या ऋतवः Vअस्मिन् [११]समृद्धे प्रजापतौ भागमैच्छन् । Vसः च प्रजापतिः Vवसन्ताय [१२-]Vरसम् Vअह सर्वमपि [-१२] भोग्यवस्तुजातं [१३]सारं दत्तवान् । वसन्तकाले हि भोगातिशयः प्रसिद्धः । तथा यवादीन् धान्यविशेषान् ग्रीष्मादिभ्यः प्रायच्छत् । ते हि तत्तत्काले प्रभूताः भवन्ति ॥

तेनेति ॥ एवमुत्कर्षहेतुत्वेन द्वादशाहः प्रशस्तः । अथाऽपकर्षनिवारकत्वेन द्वादशाहं प्रशंसति - 'तेनेन्द्रं प्रजापतिरयाजयत् ततो वा इन्द्र इन्द्रोऽभवत् तस्मादाहुरनुजावरस्य यज्ञ इति स ह्येतेनाग्रेऽयजत्' [१४]इति ॥ इन्द्रः [१५]उत्तमत्वेनाग्रजभ्रातृवत् पूज्योऽपि [१६]सन् [१७]पुरा [१८]कदाचिदनुजवदवरः [१९]सर्वैर्देवैस्तिरस्क्रियमाणो भूत्वा तत्परिहारोपायं वेदितुं प्रजापतिमुपसेवितवानित्येतावदत्र बहिरेव द्रष्टव्यम् । अत एवाऽन्यत्राऽऽम्नातम् - "इन्द्रो वै देवानामनुजावर आसीत् स प्रजापतिमुपाधावत्" (तैसं २.३.४) इति । स च Vप्रजापतिः Vतेन

९. मै२ - मधुच्छदवा, [मै१ - तलटिप्पण्यां 'मधुअधवा' इति ।] । १०. मै. मै१. मै३. अ. अ१ - 'अनेन' नास्ति । ११. मै२ - अहम् । १२. अ१ - अयाजत ।

११. शृ१ - समृद्धम् । १२-१२. म - सरसमहः रसमपि, शृ१ - रसमहः सर्वमहः सर्वमपि । १३. म - सोऽशम्, ['स्वांशम्' इति संभाव्यते ।] । १४. मै - प्रति । १५. मै - अयजत् भ्रातृवत्, शृ१ - अग्रजः भ्रातृव्यवत् । १६. म - सः । १७. अ. पा - 'पुरा' नास्ति । १८. शृ१ - °नुजावरः सन् । १९. शृ१. म - सर्वैस्तिरस्क्रियमाणः ।

स ह्येतेनाग्रेऽयजतैष ह वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं

सः । हि । एतेन । अग्रे । अयजत । एषः । ह । वै । कुणपम् । अत्ति । यः । सत्रे । प्रतिगृह्णातीति प्रति-गृह्णाति । पुरुषकुणपमिति पुरुष-कुणपम् । अश्वकुणपमित्यश्व-कुणपम् । गौः । वै । अन्नम् ।

संप्रति [१३]अहीनयाजकदूषणेन अहीनमेव दूषयितुमाह - 'एष ह वै' इत्यादि ।। Vकुपणम् [१४]Vअत्ति मांसमत्ति, [१५-] अकार्यं करोतीति यावत् [-१५] Vयः Vसत्रे [१६]Vप्रतिगृह्णाति अहःसमूहे Vप्रतिगृह्यति याजयित्वा । कुणपं विशिनष्टि - 'पुरुषकुणपम्' इत्यादि [१७]अत्तीत्येव । [१८]पुरुषादिग्रहणेन [१९]अभक्ष्यत्वं दर्शयति । न मांसमात्रम् , अपितु [२०]पुरुषादिमांसमेव, अभक्ष्यमत्तीति । 'गौर्वा अन्नम्' इति । [२१]गोशब्देन [२२]दक्षिणोच्यते । [२३-] अन्नस्थानीया दक्षिणा [-२३],

---

द्वादशाहेन Vइन्द्रम् Vअयाजयत् । Vततः द्वादशाहप्रभावादयं Vइन्द्रः तदानीम् Vइन्द्रः अभवत् स्वकीयपरमैश्वर्यलक्षणमिन्द्रत्वं प्राप्तवान् । Vतस्मात् [२०]याज्ञिकाः Vअनुजावरस्य Vयज्ञः Vइति द्वादशाहमाचक्षते । यस्मादिन्द्र आनुजावरो भूत्वा तन्निवृत्तये प्रथमम् [२१]Vएतेन द्वादशाहेन Vअयजत तस्मादानुजावरयज्ञत्वमस्योपपन्नम् ।।

एष इति ।। इदानीं सत्ररूपे द्वादशाहप्रयोगे [२२]दक्षिणानिषेधं निन्दयोन्नयति - 'एष ह वै कुणपमत्रि यः सत्रे प्रतिगृह्णति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं येन पात्रेणान्नं बिभ्रति यत् तन्न निर्णेनिजति ततोऽधि मलं जायते' इति ।। सत्रे हि ये यजमानास्त ऋत्विज इत्येवं [२३]यजमानत्वव्यवहारवदृत्विक्त्वव्यवहारोऽप्यस्ति । अत एव शाखान्तरे - " अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति " (द्र. शब्रा १२.१.१.१-११, गोब्रा १.४.१-६) इत्यादावध्वर्युब्रह्मादिशब्दैर्व्यवह्रियन्ते । [२४-] एवं सति ऋत्विक्त्वबुद्ध्या यागान्तरवदत्र Vयः दक्षिणां

---

१३. मै२ - अभिन्नयाज° । १४. मै२ - 'अत्ति' नास्ति । १५-१५. मै२ - 'अकार्यं - - - - यावत्' नास्ति । १६. मै. मै२. मै३. अ - 'प्रतिगृह्णाति' नास्ति । १७. मै. मै१. मै३. अ. अ१ - 'अत्तीत्येव' नास्ति । १८. मै२ - पुरुषमादिग्रह° । १९. मै२ - अतृप्यत्वम् । २०. मै२ - °मांसभक्षमेवात्तीति° । २१. मै२ - गोशब्दात् । २२. मै - दक्षिणोच्यते । उच्यतेऽन्नम् । २३-२३. मै१ - अन्नस्थानीयां दक्षिणाम् ।

---

२०. म - याजकाः । २१. म - तेन । २२. म - दक्षिणानिवेदनम् । २३. म - °रवदुक्तव्यवहारोऽपि । २४-२४. इ. वै - 'एवं - - - - पञ्चनखशवः' नास्ति ।

इ॒ह धृति॒ः स्वाहे॒ह विधृ॑ति॒ः स्वाहे॒ह रन्ति॒ः स्वाहे॒ह रम॑ति॒ः स्वाहा॑

इ॒ह । धृतिः॑ । स्वाहा॑ । इ॒ह । विधृ॑ति॒रिति॒ वि-धृ॒ति॒ः । स्वाहा॑ । इ॒ह । रन्तिः॑ । स्वाहा॑ । इ॒ह । रम॑तिः । स्वाहा॑ ।

'इह धृतिः स्वाहा' इत्यादयो धृतयः "विभूर्मात्रा" (तैसं ७.१.१२) इत्यत्र व्याख्याताः ॥

"महीमू षु मातरम्" (तैसं १.५.११) "सुत्रामाणं पृथिवीम्" (तैसं १.५.११) इति च "वैश्वानरो न [40]ऊत्या" (तैसं १.५.११) इत्यत्र [41]व्याख्याते । [V]महीम् एव सुव्रतानां मातृस्थानीयाम् ऋतस्य यज्ञस्य [42]सत्यस्य वा [43]पालयित्रीः रक्षणार्थमाह्वयामः, प्रवृद्धबलामजरन्तीम् उरुगमनां शोभनां सुखहेतुम् अखण्डितां [44]शोभनप्रणयामिति प्रथमा ॥

---

[21]गतस्ताः [V]शिवाः [V]सतीः बहुक्षीरादिप्रदानेन [22]कल्याणरूपाः सतीः [23-] एताः गाः [-23] [V]नः [V]गोष्ठम् अस्मदीयगोशालाम् [V]उपाकः [24]उपाकरोतु प्रापयत्वित्यर्थः । [V]वयं [25]च [V]तासां गवां [V]प्रजया वत्सरूपया [V]संसदेम संगतास्तिष्ठामः (ष्ठेम) ॥

इहेति ॥ अथ चत्वारि यजूंष्याह - 'इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा' इति ॥ एतानि च "विभूर्मात्रा" (तैसं ७.१.१२) इत्यनुवाकेऽश्वस्य [26]पादचतुष्टयस्थानविषयत्वेन व्याख्यातानि । [27-] इह तु गोपदस्थानविषयत्वेन व्याख्यातानि [-27] ।

---

४०. मै. मै१. मै३. अ. अ१ - 'उत्या' नास्ति । ४१. अ - व्याख्यातौ । ४२. मै. मै१. मै३. अ. अ१ - सत्रस्य । ४३. मै. मै१. मै३. अ. अ१ - पालयित्रीः । ४४. मै२ - °प्रणियामिति ।

---

२१. मै - गतोऽस्तु । २२. शृ१. मै - कल्याणाः । २३-२३. म - ताः गावः । २४. म - उपाकरणम् । २५. अ. आ. क. पा. हा. इ. वा. वै. म - 'च' नास्ति । २६. शृ१ - °ष्टयस्थाने विषय° । २७-२७. अ. आ. क. पा. हा. इ. वा. वै. म - 'इह - - - - °ख्यातानि' नास्ति ।

महीमू षु सुत्रामाणम् ॥१७॥

(इन्द्राष्टात्रिँशच्च ।)

महीम् । उ । स्विति । सुत्रामाणमिति
सु-त्रामाणम् ॥१७॥

[कासं, अश्वमेध ४.६; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[४५]सुत्रामाणम् '[४६]इति । पृथिवीं विस्तीर्णां द्यामपापां सुशर्माणमदितिं [४७]सुप्रणीतिं दैवीं नावं [४८] नौस्थानीयां शोभनतरणामनेहसमनवद्याम् [४८] अच्छिद्राम् अविनाशार्थम् आरूढा भूयास्मेति द्वितीया ॥

॥ इति सप्तमे चतुर्थे सप्तदशोऽनुवाकः ॥

महीमिति ॥ अथ द्वयोः [२८]ऋचोः प्रतीके दर्शयति - " महीमू षु " (तैसं १.५.११), " सुत्रामाणम् " (तैसं १.५.११) इति ॥ एतच्चोभयं " वैश्वानरो न ऊत्या " (तैसं १.५.११) इत्यत्र व्याख्यातम् । एतैर्दशभिर्गव्याख्यैर्मन्त्रैरन्नहोमाञ्जुहुयात् ॥

॥ [२९] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके सप्तदशोऽनुवाकः[२९] ॥

४५. मै - सुत्रामणम् , अ - सुपुमात्रीम् । ४६. मै. मै१. मै३. अ. अ१ - ' इति ' नास्ति । ४७. मै. मै१. मै२. मै३ - ' सुप्रणीतिम् ' नास्ति । ४८-४८. अ - नौस्थानीयामेनस्तरणादग्धाम् ।

२८. मै - ' ऋचोः ' नास्ति । २९-२९. मै - इति सप्तदशोऽनुवाकः ।

तस्मा॑द्द्वादशा॒हेन॒ (४) न याज्यं॑ पा॒प्मनो॒ व्यावृ॑त्त्यै ॥१०॥

(अयं॑च्छ॒दर्धिं रभते द्वादशा॒हेनं च॒त्वारि॑ च ।)

तस्मा॑त् । द्वा॒द॒शा॒हेनेति॑ द्वादश-अ॒हेनं (४) । न । याज्य॑म् । पा॒प्मनः॑ । व्यावृ॑त्त्या॒ इति॑ वि-आवृ॑त्त्यै ॥१०॥

[कासं ३४.११-१२; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

^{V}द्वादशाहेन ^{V}न ^{V}याज्यम् । ऋत्विक्त्वम् [४०]इदं निषिध्यत [४१]इत्येके । अहीनस्य निषेध इत्यन्ये । यजेर्ण्यन्तात् अचो यत् । "यतोऽनावः" (पा ६.१.२१३) इत्याद्युदात्तत्वम् । ^{V}पाप्मनः ^{V}व्यावृत्त्यै [४२]पृथग्भावार्थम् । [४३-] "तादौ च°" [-४३] (पा ६.२.५०) इत्यनन्तरस्य गतेः प्रकृतिस्वरत्वम् ॥

॥ इति सप्तमे द्वितीये दशमोऽनुवाकः ॥

संपद्यते । याजने तु शास्त्रोक्तं [५३]प्रायश्चित्तं कर्तव्यम् । सत्राहीनयोरेतावान् विशेषः - सत्रे तु [५४]स्वस्यापि यजमानत्वात् प्रतिग्रह एव नास्ति । अहीने तु विद्यमानस्य प्रतिग्रहस्य दुष्टत्वात् [५५]प्रतिगृह्य प्रायश्चित्तं कर्तव्यम् [५६]इति ॥

अत्र मीमांसा ।

[५७-]दशमाध्यायस्य [५८]षष्ठपादे चिन्तितम् [-५७] ।

[५९]"अहीनसत्रयोर्लक्ष्मभेदो नास्त्यस्ति वा न हि ।

[६०-] आवृत्तिसाम्यादाद्यः स्याद्यज्यासिभ्यां तयोर्भिदा" [-६०] (जैन्या १०.६.२०) ॥

अस्ति द्वादशाहस्याहीनत्वं सत्रत्वं च । [६१]तत्रैतत् चिन्त्यते - किमहीनसत्रयोर्लक्षणभेदो नास्त्युतास्तीति । तत्र नास्तीति तावत् प्राप्तम् । [६२]कुतः - ज्योतिष्टोमावृत्तिरूपस्य समानत्वात् । यथा

४०. मै२ - 'इदम्' नास्ति । ४१. मै२ - इत्येते । ४२. अ१. मै१ - 'पृथग्भावार्थम्' नास्ति । ४३-४३. मै२ - तावेतानिति ।

५३. मै - पापप्रायश्चित्तम् । ५४-५४. शृ१ - स्वयमेव, मै - स्वयमपि । ५५. शृ१ - प्रति । ५६. म - 'इति' नास्ति । ५७-५७. मै - 'दशमा° - - - - चिन्तितम्' नास्ति । ५८. आ. क - °पादे षोडशाधिकरणे । ५९. अ. आ. क. पा. हा. इ. वा. वै. म - °र्लक्ष्मभिदा, मै - °लक्ष्यभेदः । ६०-६०. मै - आवृत्तिसादास्यादि यज्ञादिभ्यां तयोर्भिदा, शृ१. म - आवृत्तिसाम्यादास्यादियज्यादिभ्यां तयोर्भिदा, अ. पा. इ. वा - आवृत्तिसाम्यादाद्यादियज्यादिभ्यां तयोर्भिदा, आ - स्यादिज्या° । ६१. मै - तत्रैव, क - तत्रैवम् । ६२. मै - क्रतुम् ।

[६३]द्विरात्रादीनामेकादशरात्रान्तानामहीनानामावृत्तौ [६४]ज्योतिष्टोमस्वरूपं तथा त्रयोदशरात्रादीनां सत्राणामिति प्राप्ते ब्रूमः - आसीरन् [६५]उपेयुरिति चोदनाद्वयं यजमानबहुत्वं च सत्रलक्षणं , [६६-] यजतिचोदना यजमानबहुत्वचोदनाभावश्चाहीनलक्षणम् [-६६] । [६७]वैदिकप्रयोगेषु तयोरव्यभिचारादिति [-६७] राद्धान्तः ॥

तत्रैवान्यच्चिन्तितम् -

[६८]" सत्रमेकः करोत्याहो बहवः [६९]प्रकृताविव ।

एकः कुर्यादिहाऽऽसीरन्नित्युक्त्या बहवो मताः " (जैन्या १०.६.१८) ॥

द्वादशाहादिसत्रस्य ज्योतिष्टोमः प्रकृतिः । [७०]तत्र कर्त्रैक्याच्चोदकेन सत्रेऽपि कर्त्रैक्ये प्राप्ते प्रत्यक्षवचनाद्बहवोऽभ्युपेयाः ।

तत्रैवान्यच्चिन्तितम् -

" ऋत्विजोऽन्येऽत्र यष्टृभ्यः स्युस्त एवोत [७१]चोदकात् ।

अन्ये यष्टार एव स्युः प्रत्यक्षवचनादिभिः " (जैन्या १०.६.१९) ॥

अत्र सत्रे किं यजमानेभ्यो व्यतिरिक्ता ऋत्विजः कर्तव्याः । किं वा यजमाना एवर्त्विजः । [७२]ज्योतिष्टोमे यजमानादन्येषामृत्विक्त्वादत्राप्यन्ये स्युरिति प्राप्ते ब्रूमः - ये यजमानास्त ऋत्विजः इति प्रत्यक्षवचनाददक्षिणानि सत्राणीत्याहुरिति दक्षिणाराहित्यश्रवणात् " अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारम् " (द्र.शब्रा १२.१.१.१-११, गोब्रा १.४.१-६)इत्यादिना ब्रह्मोद्गात्रादिसमाख्यासंयोगदीक्षासंयोगयोः [७३]आर्त्विज्ययाजमानद्योतकयोः प्रतिभानाच्च यजमाना एवर्त्विजः ॥

तत्रैव [७४]द्वितीयपादे चिन्तितम् -

" ऋत्विजां वरणं सत्रे कार्यं नो वाऽत्र सोमवत् ।

कार्यं मैवं स्वकर्मत्वात् [७५]क्रयार्था [७६]प्रकृतौ [७७]वृतिः " (जैन्या १०.२.१३) ॥

अग्निर्होतेत्यादिमन्त्रैः [७८]सोमे वरणमृत्विजामाम्नातम् । सोमवत् सत्रेऽपि तत् कार्यम् । अन्यथा वरणरहितानामृत्विक्त्वाभावात् सत्रं न सिध्येत् । अत एव तत्सिद्धये सत्रप्रकरणे ये यजमानास्त ऋत्विज इति [७९-] स्वतः प्रवृत्तानपि [-७९] [८०]यजमानाननूद्य वरणसाध्यमृत्विक्त्वं तेष्वाधातव्यमिति विदधाति । तस्मादृत्विग्वरणं सत्रे कार्यम् । मैवम् । [८१]सत्रं ह्यनुष्ठातॄणां सर्वेषां स्वकर्म । न हि स्वकर्मणि [८२]क्रयार्थं

६३. मै - हि रात्रा° । ६४. शृ१ - ज्योतिष्टोमस्य स्वरूपम् । ६५. शृ१ - जपेयुरिति । ६६-६६. म. मै. क - यजतिचोदनात् यजमानबहुत्वनियमाभावाच्च° । ६७-६७. वै - °प्रयोगमतयोरव्य° । ६८-६८. शृ१ - ' सत्रमेकः - - - - °चिन्तितम् ' नास्ति । ६९. इ. वा. वै - प्रकृतावपि । ७०. अ. पा. इ. वा - तदत्र, मै - सत्र । ७१. मै - चोदकाभ्यः । ७२. आ - ज्योतिष्टोमः । ७३. अ. पा. इ. वा. म. मै - आर्त्विज्ययजमान° । ७४. आ. क - °पादे दशमाधिकरणे । ७५. मै - कृशार्था । ७६. इ. वै - प्रकृते । ७७. वै. मै - वृत्तिः । ७८. वै - स्तोमे । ७९-७९. अ. पा. इ. वा. म. वै - अतः प्रकृतावपि । ८०. म - यजमानानाम् , मै - यजमानाभविष्यन् । ८१. अ - सत्रे । ८२. अ. पा. इ. वा. वै. म - क्रियार्थम् ।

वरणपेक्ष्यते। [८३]क्रयार्थं हि प्रकृतौ वरणम्। [८४-] दानमेव [८५]क्रयार्थं, वरणं [-८४] त्वदृष्टार्थमिति चेन्न। वरणस्य भविष्यद्दानसूचनेनोत्साहजननार्थत्वात्। अन्यथा वरणकाले [८६-] कच्चित् कल्याण्यो [-८६] दक्षिणा इत्यृत्विजां प्रश्नः [८७]कथं संगच्छेत। न च [८८]ऋत्विक्त्वासिद्धिः शङ्कनीया। तत्र वक्तव्यं, ऋत्विक्त्वं नाम किं कर्मकरत्वमुत यागकर्तृत्वमिति। आद्ये कर्मकाराणां स्वामित्वाभावेन ये यजमानास्त ऋत्विज इति वचनं विरुध्येत। द्वितीये तु स्वत एव यागं कर्तुं प्रवृत्तत्वाद्वरणमन्तरेणाप्यृत्विक्त्वं सिध्यति। ईदृशमेव [८९]आर्त्विज्यं वचनेन विधीयते। तस्माद्दानवद्वरणं सत्रे लुप्यते।

तत्रैवान्यच्चिन्तितम् [-६८] -

" क्रयः कार्यो न वा सत्रे निषेधात् [९०]क्रीतिकल्पनम्।

नित्यानुवादेनाक्लृप्तेर्न क्रयो वरणं यथा " (जैन्या १०.२.१४)॥

[९१]सर्वादरपुरःसरमग्निर्होतेत्यादिमन्त्रेण प्रार्थना वरणम्। तच्च वरणं चिकीर्षुर्यजमानो [९२]वरणीयेभ्यो ब्राह्मणेभ्यः सोमं ब्रूयात्। " तेभ्यः सोमं प्राह " (आपश्रौ १०.१.२) इत्यापस्तम्बवचनात्। [९३]सोमाभिधानप्रकारस्त्वत्र कल्पे दर्शितः - 'ज्योतिष्टोमेनाऽग्निष्टोमसंस्थेन रथन्तरपृष्ठेन गवां द्वादशशतदक्षिणेनाहं यक्ष्ये। तत्र मे त्वमुद्गाता भव ' इति। तत्र [९४]देयदक्षिणाद्रव्यनिश्चयेन ब्राह्मणाः स्वकीयाः [९५]कर्मविशेषे [९६]नियोक्तुं योग्या भवन्ति। सोऽयं क्रयः। स च प्रकृताविव सत्रे कार्यः। न च दक्षिणादानस्य निराकृतत्वेन देयद्रव्यनिश्चये [९७]लुप्ते सति तत्साध्यः [९८-] क्रयोऽपि लुप्येत [-९८] इति शङ्कनीयम्। [९९]निषेधमुपजीव्य क्रयानुष्ठानस्य कल्पयितुं शक्यत्वात्। तथा हि " न ह्यत्र [१००]गौर्दीयते। [१०१-] न वासो [-१०१] न हिरण्यम् " (वाश्रौ ३.२.१.३४) इति सत्रे गवादिदानं निषिध्यते। स च [-९९] [१०२]निषेधोऽसत्यां प्रसक्तौ [१०३]न संभवति। ततः सोमे देयद्रव्याणां सत्रे

---

८३. अ. पा. इ. वा. वै - क्रियार्थे, म - क्रियार्थम्। ८४-८४. इ. वा. वै - ' दानमेव - - - - °वरणम् ' नास्ति। ८५. म - क्रियार्थम्। ८६-८६. अ. पा. इ. वा. वै - कश्चित् कल्याणी, म - कश्चित् कल्याण्यः। ८७. म - ' कथम् ' नास्ति। ८८. अ. पा. इ. वा. वै. म. मै - सत्रासिद्धिः। ८९. इ. वा. वै - ' आर्त्विज्यम् ' नास्ति, म - अन्यम्, मै - अभिज्ञम्। ९०. इ. वा. म. वै - कृतिकल्पनम्। ९१. आ. क. मै - सत्कारपुरःसरम्, अ. पा. इ. वा - यथा नत्वादरपुरःसरम्। ९२. मै - ' वरणीयेभ्यः ' नास्ति। ९३. अ. पा. इ. वा. वै. म. मै - °कारस्त्वनुकल्पे। ९४. अ. पा. इ. वा. वै - °क्षिणाप्रत्यनिश्चयेन (?)। ९५. मै - °विशेषं वरणीयेभ्यः। ९६. अ. पा. इ. वा. म - योक्तुम्। ९७. अ. पा. इ. वा. वै - उक्ते, म - ' लुप्ते ' नास्ति। ९८-९८. शृ१. म - क्रयो लुप्येत, म - क्रयो न कल्प्येत, अ. पा. इ. वा. वै - क्रयोऽनुकल्प्येत। ९९-९९. इ. वै - ' निषेधमुप° - - - - स च ' नास्ति। १००. अ. पा. वा - गौर्विधीयते। १०१-१०१. अ. पा. वा. म - ' न वासः ' नास्ति। १०२. मै - निषेधः सत्याम्। १०३. म. क - ' न ' नास्ति।

[१०४]दानप्रसक्तिरभ्युपेया । सोमे [१०५]च देयद्रव्याण्येवं श्रूयन्ते - " गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च [१०६]यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा " (तांब्रा १६.१.१०.११) इति । तत्र [१०७]गोवासोहिरण्यादीनां विशेषतो निषेधेन द्रव्यान्तराणां [१०८-] चोदकप्राप्तानामभ्यनुज्ञा प्रतीयते । ततो देयद्रव्यसद्भावाद् क्रयः कर्तव्य इति पूर्वः पक्षः । 'न ह्यत्र गौर्दीयते ' इत्यनेन निषेधो [१०९]न विधीयते [-१०८] किं तु पूर्वोक्तेन निर्णयेन प्राप्त [११०-] एव दानाभावो [-११०] अनूद्यते । " अदक्षिणानि सत्राणीत्याहुः न ह्यत्र गौर्दीयते " (वाराश्रौ ३.२.१.३४) इति श्रुतौ [१११]परोक्त्युपन्यासस्य प्रसिद्धिवाचकहिशब्दस्य [११२]च प्राप्तिगमकत्वात् । [११३-] तस्मान्नित्यानुवादस्य कल्पकत्वाभावाद्वरणवत्तदविनाभूतः [-११३] क्रयोऽपि [११४]न कर्तव्यः ॥

[११५-] तत्रैवान्यच्चिन्तितम् -

"[११६]आत्रेयदानर्तुयाज्यावृती [११७-] सत्रेषु नाचरेत् [-११७] ।
कुर्याद्वाऽनतिलोपान्नो धर्मार्थं क्रियतां द्वयम् " (जैन्या १०.२.३०) ॥

प्रकृतौ - " हिरण्यमात्रेयाय ददाति " (शब्रा ४.३.४२.१) इति श्रुतम् । ऋतुयाज्यावरणं चास्ति । तदुभयं सत्रेषु न कर्तव्यम् । द्वारभूताया आनतेर्लुप्तत्वात् । यद्यप्यात्रेयः कर्मकरेभ्यो बहिर्भूतस्तथाऽपि तद्दानेन यजमानस्यौदार्यं पश्यन्तो धनकामा ऋत्विज आनता भवन्ति । वरणस्य [११८]चाऽऽनत्यर्थत्वम् ऋत्विग्वरणे [११९]प्रारम्भकालीने प्रसिद्धम् । तस्मादाऽऽनत्यर्थमुभयं नाचरेदिति पूर्वः पक्षः । प्रथमवरणेनैवाऽऽनतिसिद्धेः कालान्तरे वरणमदृष्टार्थम् । धनकामानामपि कर्मकराणां प्रारम्भकाले स्वयमङ्गीकृताया भृतेरधिकं धनं [१२०]न [१२१]लभ्यत इत्यात्रेयदानदर्शनं नाऽऽनतिकरम् । तस्माददृष्टार्थमुभयं कर्तव्यम् [-११५] ।

षष्ठाध्यायस्य [१२२]षष्ठपादे चिन्तितम् -

" सत्रं वर्णत्रयस्योत विप्रस्यैवाविशेषतः ।
त्रयस्य मैवं स्वामित्वं विप्राणामृत्विजां यतः " ॥ (जैन्या ६.६.६) ॥

---

१०४. इ. वा. वै - °भ्युपेया सोमे च देया । १०५. मै - वा । १०६. अ. पा. इ. वा. म - ' यवाश्च ' नास्ति । १०७. शृ१ - गोहिरण्य°, अ. पा - गोवस्तहिरण्य° । १०८-१०८. इ. वै - ' चोदकप्राप्तानां - - - - विधीयते ' नास्ति । १०९. वा. म - ' न ' नास्ति । ११०-११०. अ. पा. इ. वा. वै - एवानुभावः, म - एवासंभवः । १११. शृ१ - परोपन्यासस्य । ११२. अ. पा. इ. वा. म - ' च ' नास्ति । [आ - मुद्रितावृत्तौ पाठोऽयं संसूचितः ।] । ११३-११३. अ. पा. इ. वा. वै. म - °त्यानुवादकत्वाभावात्, शृ१ - °वादकस्य कल्पकत्वा° । ११४. अ. पा. इ. वा. वै - ' न ' नास्ति । ११५-११५. शृ१ - ' तत्रैवा° - - - - कर्तव्यम् ' नास्ति । ११६. मै - °याज्यावृत्ती । ११७-११७. अ. पा. इ. वा - सत्रेष्वनाचरेत् । ११८. मै. वै - अनर्थम् । ११९. अ. पा. इ. वा. वै. म. मै - प्रारम्भकाले न । १२०. म - ' न ' नास्ति । १२१. इ. वा. वै - लभ्येत । १२२. आ. क - °पादे तृतीयाधिकरणे ।

ऋद्धिकामाः सत्रमासीरन्नित्यत्र विप्रा इति विशेषो न श्रूयते। तस्माद्वर्णत्रयस्य सत्राधिकार इति चेन्मैवम्। विप्राणामेवार्त्विज्यमिति द्वादशे वक्ष्यते। ऋत्विक्कार्ये यजमानाः सत्रे समाम्नाताः - "ये यजमानास्त ऋत्विजः" (आपश्रौ २१.१२.१६) [१२३-] इति। तस्माद्विप्राणामेव [१२४]सत्रम्॥

तत्रैवान्यच्चिन्तितम् -

"भिन्नप्रयाजादिकल्पा अपि सत्रेऽधिकारिणः।
तुल्यकल्पा एव [१२५-] वाऽऽद्यो वसिष्ठादिविधानतः॥
नाराशंसाद्यङ्गतायां स्वामित्वोद्देशपूर्वकम्।
नाराशंसविधौ [-१२३] संनिकर्षात् साद्गुण्यतोऽन्तिमः"॥ (जैन्या ६.६.१-२)

प्रयाजेषु पुरुषभेदेनाऽनुष्ठानप्रकारो भिद्यते - [१२६]राजन्यवसिष्ठादीनां [-१२५] नाराशंसो द्वितीयः प्रयाजः। तनूनपादन्येषाम्। तत्र वसिष्ठात्रिवध्र्यश्वशुनककण्वकश्यपसंकृतिगोत्रोत्पन्ना ये नाराशंसप्रयाजवन्तः [१२७-] ये चान्ये तनूनपात्प्रयाजवन्तः [-१२७] त एते भिन्नकल्पा अपि मिलित्वा सप्तदशावराः सत्रेऽधिकारिणः स्युः। कुतः नाराशंसमुद्दिश्य तदङ्गत्वेन वसिष्ठादिविधानात्। तथा सति सत्रिणां मध्ये केषाञ्चिद्वसिष्ठादिगोत्रजत्वेऽपि तदङ्गत्वं सिध्यतीति प्राप्ते ब्रूमः - वसिष्ठादीन् यजमानानुद्दिश्य नाराशंसो विधीयते। तथा सति विधायकपदगतस्य धात्वर्थस्य विधेयत्वात् संनिकर्षः। [१२८-] वसिष्ठादिविधौ तु पदान्तरोपात्तत्वाद्विप्रकर्षः। अतो वसिष्ठाद्युद्देशेन नाराशंसविधौ नाराशंसानुष्ठाने वसिष्ठादीनां साद्गुण्यमितरेषां तु वैगुण्यम्, तनूनपादनुष्ठाने तु वैपरीत्यम् [-१२८]। सर्वथा भिन्नकल्पानां सर्वेषां साद्गुण्यं न सिध्यति। अतः साद्गुण्याय तुल्यकल्पा एवाधिकारिणः॥

तत्रैवान्यच्चिन्तितम् -

"विप्रस्य सत्रं सर्वस्य वासिष्ठस्यैव वा भवेत्।
वैश्वामित्रस्यैव वाऽऽद्य ऋद्धीच्छुत्वेन मध्यमः॥
ब्रह्मत्वाय [१२९]ह्यवासिष्ठो [१३०-] ब्रह्मा वा [-१३०] स्तोमभागतः।
[१३१]वैश्वामित्रसमानानामेव होतृत्वसिद्धये"॥ (जैन्या ६.६.७-८)॥

ऋद्धिकामस्य सत्रं [१३२]विहितम्। ब्राह्मणाश्च सर्वे [१३३]ऋद्धिं वाञ्छन्ति। तस्माद्विप्रस्य [१३४-] सर्वस्य सत्राधिकार [-१३४]

१२३-१२३. इ. वै - 'इति ---- °विधौ' नास्ति। १२४. अ. पा. वा - सूत्रम्। १२५-१२५. वा - 'वाऽऽद्यो --- वसिष्ठादीनाम्' नास्ति। १२६. अ. पा. इ. वा - °वसिष्ठानाम्। १२७-१२७. अ. पा. इ. वा - 'ये ---- °वन्तः' नास्ति, आ. क - ये चान्ये तनूनपात्प्रयाजकाः। १२८-१२८. शृ१. अ. पा. इ. वा. वै. म. मै - 'वसिष्ठादि° ---- वैपरीत्यम्' नास्ति। १२९. मै - वाशिष्ठे। १३०-१३०. मै - ब्रह्मता। १३१. मै - °नानामव। १३२. अ. पा. इ. वा. वै. म - 'विहितम्' नास्ति। १३३. मै - बुद्धिम्। १३४-१३४. अ. पा. इ. वा. वै - सर्वाधिकारः, शृ१. म. मै - सर्वस्याधिकारः।

इत्याद्यः पक्षः । " वासिष्ठो ब्रह्मा भवति " (तैब्रा ३.५.२) इति वचनादत्रासिष्ठस्य ब्रह्मत्वासंभवाद्ब्रह्मत्वाय वासिष्ठस्याधिकारो वाच्यः । तथा सति भिन्नकल्पत्ववारणाय तत्तुल्यकल्पा [१३५]एवाधिक्रियन्त इति द्वितीयः पक्षः । [१३६-] वासिष्ठो ब्रह्मेति वाक्यान्न वासिष्ठस्य ब्रह्मता [-१३६] । " रश्मिरसि क्षयाय त्वा " (तैसं ५.५.२) इत्यादयो मन्त्राः [१३७] स्तोमभागास्तानधीयानः स्वयमवासिष्ठोऽपि ब्रह्मतामर्हतीति स्तोमभागप्रशंसारूपेऽर्थवादे वासिष्ठो ब्रह्मेति पठितत्वात् । तस्माद्वैश्वामित्रो होतेति विहितस्य होतृत्वसिद्धये वैश्वामित्रस्य [१३८]तत्समानकल्पानां [१३९] चाऽधिकारो नान्येषाम् ॥

तत्रैवान्यच्चिन्तितम् -

" अनाधातुश्च तत् किं [१४०]वाऽऽधातुरेवाग्रिमो यतः ।
एकस्याग्निषु तत्सिद्धिर्न स्वाग्निष्वात्मनेपदात् " ॥ (जैन्या ६.६.९) ॥

[१४१]सत्रमग्न्याधानरहितस्यापि संभवति । कुतः, सत्रिणां मध्ये कस्यचिदाहिताग्नित्वे तदीयेष्वग्निषु तेन सह [१४२]प्रवृत्तैरनाहिताग्निभिरपि तस्य सत्रस्य साधयितुं शक्यत्वादिति चेन्मैवम् । आदधीतेत्यात्मनेपदमाधानफलस्य कर्तृगामितां दर्शयति । तत्फलं चाग्नीनां कर्मयोग्यता । ततो येऽनाहिताग्नयो [१४३-] न तेऽधिकारिणः । यश्चाऽऽहिताग्निः [-१४३] तस्यैव कर्मयोग्यता नान्यस्य । किं च सोमविकृतीनामिष्टिपूर्वकत्वं निर्णीतम् । इष्टिश्चाऽऽधानपूर्विका । तस्मादाधातुरेव [१४४]सत्राधिकारः ॥

[१४५-] तत्रैवान्यच्चिन्तितम् -

" जुह्वादयो यस्य कस्य कार्या साधारणा [१४६]उत ।
अविरोधादग्रिमोऽन्त्यो [१४७]मृतदाहे विरोधतः " ॥ (जैन्या ६.६.१०) ॥

सत्रिणां मध्ये यस्य कस्यचित् संबन्धिभिर्जुह्वादिपात्रैः सत्रं प्रयोक्तव्यम् । कुतः, अविरोधात् । अन्यदीयेष्वग्निष्वात्मनेपदं यथा विरुध्यते नैवमत्र विरोधः कश्चिदुपलभ्यत इति प्राप्ते ब्रूमः - यस्य जुह्वादयः स चेत् सत्रमध्ये म्रियते तदा मृतेन सह जुह्वादयो दह्यन्ते । " आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च दक्षिणहस्ते जुहूमासादयति " (शब्रा १२.५.२.१) इत्यादिवचनैस्तदवगमात् । पात्रदाहे चाऽवशिष्टः [१४८]सत्रप्रयोगो विगुणः स्यात् । तस्मात् साधारणा [१४९-] भिन्ना एव [-१४९] जुह्वादयः सत्रे संपादनीयाः [-१४५] ॥

---

१३५. अ - एवाधिक्रियते, वै - एवाधिह्रियन्ते । १३६-१३६. अ. पा. इ. वा. म. मै. वै - 'वासिष्ठो - - - - ब्रह्मता' नास्ति । १३७. अ. पा. इ. वा. वै. म - स्तोमगतास्ता° । १३८. अ. पा. इ. वा. वै - °मानकल्पनात् । १३९. मै - वाधिकारः, म - अधिकारः । १४०. म. इ. वा - च धातुरेवा° । १४१. आ. मै. क - तत्सत्रम् । १४२. म - प्रवृत्ति°, अ. पा. इ. वा. वै. क - प्रवृत्ते° । १४३-१४३. शृ१. अ. पा. इ. वा. वै. म - 'न ते - - - - °ग्निः' नास्ति । १४४. वै - तत्राधिकारः । १४५-१४५. शृ१ - 'तत्रैवा° - - - - °दनीयाः' त्रुटितम् । १४६. अ. पा. इ. वा. म - इति । १४७. शृ१. इ. वा. वै. म - न तु दाहे । १४८. अ. पा. इ. वा - तत्र प्रयोगः । १४९-१४९. अ. पा. इ. वा. म - 'भिन्ना एव' नास्ति ।

एकादशाध्यायस्य [150]चतुर्थपादे चिन्तितम् -

“ द्वादशाहे [151]सदीक्षोपसदहःसु दिनानि किम् ।
शतत्रयं [152]- द्वादश वा -[152] षट्त्रिंशद्वाऽग्रिमो यतः ॥
एकैककर्मणोऽह्नोऽस्य ज्योतिष्टोमविकारता ।
एकैकं [153]तदनुष्ठातुं दिनानां पञ्चविंशतिः ॥
अह्नां द्वादशता श्रुत्या [154]मध्यपक्षस्तदाऽपि किम् ।
कार्या द्वादश साद्यस्क्राश्चतुष्काणामुत त्रिकम् ॥
[155]एकैकस्यैव [156]साङ्गस्य विकृतित्वादिहाऽऽदिमः ।
[157]अमुख्यकालाङ्गबाधाच्चतुष्कं [158]भिद्यते त्रिधा ॥
दीक्षा उपसदः सुत्याः प्रत्येकं द्वादश [159]श्रुताः ।
ततः साङ्गस्य मुख्यस्य षट्त्रिंशद्दिवसा मताः ” ॥ (जैन्या ११.४.६-१०) ॥

द्वादशाहस्यैकैकमहः पृथक् कर्म । तस्मिंश्च सदीक्षस्य [160]सोमसत्कस्य ससुत्यस्य ज्योतिष्टोमस्य विध्यन्तोऽतिदिष्टः । अतिदिष्टानां [161]- दीक्षाणामुपसदां च -[161] प्राकृतसंख्याबाधनाय पृथग्द्वादशत्वं श्रुतम् । ततो दीक्षोपसदर्थं चतुर्विंशतिर्दिनानि सुत्यार्थमेकं दिनमिति पञ्चविंशतिः । ईदृशस्य कर्मविशेषस्याह्नां द्वादशभिरावृत्तिभिः शतत्रयं स्यादित्याद्यः पक्षः । तथा सति अह्नां द्वादशत्वं श्रूयमाणं बाध्येत । [162]तस्माद्द्वादशैव दिवसा इति मध्यमः पक्षः । [163]- तथा सति -[163] दीक्षोपसद्भ्यामङ्गाभ्यामुपेतस्यैकैकस्याह्नः [164]साङ्गज्योतिष्टोमविकारत्वात् तत् सर्वं सद्य एव कर्तव्यमित्येकः पक्षः । प्रकृतौ दीक्षोपसदोर्मुख्यकालात् प्रागेवानुष्ठितत्वादिहापि [165]तदैवानुष्ठानं प्राप्तम् । [166]तच्च मुख्यकाले तदनुष्ठाने बाध्येत । तस्मादङ्गद्वयस्य प्रधानस्य [167]च द्वादश दिनानि [168]विभज्यानुष्ठानमिति पक्षान्तरम् । द्वादशाहस्य द्वादश दीक्षा द्वादशोपसद [169]इत्यङ्गयोर्मुख्यस्य च पृथक् [170]द्वादशत्वश्रुत्या षट्त्रिंशदिति [171]राद्धान्तः ॥

---

१५०. आ. क - °पादे पञ्चमाधिकरणे । १५१. वै - न दीक्षो° । १५२-१५२. अ. पा. इ. वा. म - द्वादशाह । १५३. क. म - तदनुष्ठानम् । १५४. अ. पा. वा. म - °स्तथापि । १५५. म - एवैकस्यैक । १५६. अ. आ. पा - यागस्य । १५७. अ. आ. पा - °धाच्चतुष्ट्वम् । १५८. अ. पा. इ. वा. वै. म. मै - भिद्यताम् । १५९. आ - स्मृताः । १६०. म - उपसत्कस्य, मै - सोपसदस्य । १६१-१६१. शृ१ - °मुपसदा तत् । १६२. शृ१ - तस्य द्वाद° । १६३-१६३. आ. क - तदापि, अ. पा. इ. वा. वै - तथापि । १६४. शृ१ - °विकास्यार्थत्वात् । १६५. शृ१. म. मै - तथैवानु° । १६६. मै - तत्र । १६७. मै - तत् । १६८. मै - विभज्यानुमानमिति । १६९. अ. आ. क. पा. इ. वा. म. वै - °योर्मुख्ये, मै - °योर्मुख्यत्वे । १७०. इ. वा. वै - द्वादशश्रुत्या । १७१. मै - सिद्धान्तः ।

नवमाध्यायस्य [१७२]प्रथमपादे चिन्तितम् -

"[१७३]पत्नीसंयाजसंस्थत्वं [१७४-] सर्वेष्वन्येतरेषु वा [-१७४] ।
अविशेषादादिमोऽन्त्योऽसंस्थितत्वोक्तिलिङ्गतः " ॥ (जैन्या ९.१.१३) ॥

द्वादशाहे [१७५]श्रूयते - " पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते " (द्र.आपश्रौ १०.४.७) इति। तत्र [१७६]द्वादशसंख्येषु सर्वेष्वप्यहःसु पत्नीसंयाजान्तं कर्मानुष्ठायावशिष्टं [१७७]पिष्टलेपादिकं [१७८]त्याज्यम्। कुतः [१७९-] एतावत्सु पत्नीसंयाजैः समाप्तिः [-१७९] नेतरेष्विति [१८०]विशेषनियामकाभावादिति चेत् [१८१]मैवम्। [१८२]असंस्थितत्ववाक्योक्तलिङ्गेन प्रागुत्तमादह्नो यानीतराण्यहानि तेषु [१८३-] पत्नीसंयाजान्तत्वं व्यवतिष्ठते। तथाहि " पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते " (द्र. आपश्रौ १.४.७) इत्यस्य [१८४-] विधेः शेषः [-१८४] [१८५]एवमाम्नायते - " न [१८६]बर्हिरनुप्रहरति असंस्थितो हि तर्हि यज्ञः " (तैब्रा २.१.४) इति। तत्र [-१८३] [१८७]पत्नीसंयाजैः [१८८]सर्वेषामह्नां समाप्तावसंस्थितत्वं व्याहन्येत। तस्मात् संतिष्ठन्त इति शब्दो न समाप्तिवचनः। किं तर्हि? [१८९-] सत्येव तदहःसंबन्धिकर्तव्यशेषे व्यापारोपरममात्रं [-१८९] ब्रूते। अयं च [१९०]कर्तव्यशेषश्चरमेऽहन्यनुष्ठातव्यः। तथा सति द्वादशानामह्नां विहितः सहप्रयोगोऽनुगृहीतो भवति। तथा हि-द्वादशाहेन यजेतेति सहप्रयोगो विहितः। अत एव दीक्षोपसदादिकं तन्त्रेणानुष्ठीयते। तत्र प्रथममहः पत्नीसंयाजान्तमनुष्ठाय [१९१]पिष्टलेपादिकं [१९२]बर्हिष्प्रहरणान्तं कर्तव्यत्वेनावस्थाप्य द्वितीयमहः [१९३]प्रक्रमते। [१९४]एवमुत्तरत्रापि। तत्र सर्वत्रावशिष्टं कर्तव्यमुत्तमेऽहन्यनुष्ठातव्यम्। तथा [१९५]सत्युपक्रमैक्यवदुपसंहारस्याप्येकत्वात् [१९६]विहितः सहप्रयोगः सिध्यति। एकैकस्याह्नः पत्नीसंयाजैः समाप्तौ भिन्नाः प्रयोगाः प्रसज्येरन्। यत्तु दशमस्याह्नो मानसग्रहेण [१९७]समापनं तद्वाचनिकम्। तस्मादुत्तमव्यतिरिक्तानामेवाह्नां पत्नीसंयाजानन्तरं व्यापारोपरमः ॥

---

१७२. म. वै - तृतीयपादे, आ. क - °पादे नवमाधिकरणे। १७३. मै - °संयाज्यसं°, आ - °जसंस्था किम्, वै - °संस्थात्वे। १७४-१७४. शृ१ - °तरेति वा। १७५. मै - सूयते। १७६. मै - °संख्याकेषु। १७७. क - हारियोजनादिकम्। १७८. अ. आ. पा. हा. इ. वा. वै - न कार्यम्। १७९-१७९. अ. पा. इ. वा - एषा च पत्नीसंयाजम°, म - एषा पत्नीसंयाजम°। १८०. वै - विशेषनियमा°, मै - विषयनियामका°। १८१. म - 'मैवम्' नास्ति। १८२. अ. पा. इ. वा - असंस्थितत्वं वाक्यैकलिङ्गेन, म - असंस्थितत्ववाक्ये न लिङ्गेन। १८३-१८३. वा - 'पत्नीसंयाजा - - - - तत्र' नास्ति। १८४-१८४. अ. पा. इ. वै - विशेषः। १८५. मै - एव नाम्नायते। १८६. शृ१ - °प्रस्तरति, मै - °प्रहरेत्। १८७. शृ१ - °संयाजे, म - °संयाज्याक्षैः। १८८. शृ१. अ. पा. इ. वा. वै. म. मै - 'सर्वेषामह्नाम्' नास्ति। १८९-१८९. म - सर्वेष्वप्यहःसु कर्तव्यविशेषव्यापारो°। १९०. अ. पा. इ. वा. मै - कर्तव्यविशेषश्च°। १९१. क - हारियोजनादिकम्। १९२. शृ१. मै - बर्हिः प्रहर°, अ. पा. इ. वा. वै - °प्रहरणाय, म - °प्रहरणादि। १९३. शृ१. मै - प्रक्रमेत्, वै - प्रक्तम्। १९४. मै - एवमुभयत्रापि। १९५. शृ१ - सत्युपक्रमैक्यादु°। १९६. मै - विहितस्य। १९७. मै - समापन्नम्।

षष्ठाध्यायस्य [198]द्वितीयपादे चिन्तितम् -

" सत्रे फलांशः प्रत्येकं सर्वं [199-] वाऽद्यः समूहके [-199] ।
कर्तृत्वादन्त्य एकैकस्यापि तत्त्वाद्बहुत्वतः " ॥ (जैन्या ६.२.१) ॥

इदमाम्नायते - " ऋद्धिकामाः सत्रमासीरन् " (तांब्रा २३.१.५) इति । [200]तत्र सत्रे बहूनां समुदायस्य कर्तृत्वमवगतम् । " सप्तदशावराः सत्रमासीरन् " (आश्वश्रौ ४.१.८) इति श्रवणात् । कर्तृत्वेन समुदायस्यैव [201]फलित्वात् पुरुषाणां प्रत्येकं फलांश [202]एव, न तु सर्वं फलमेकैकस्येति चेन्मैवम् । एकैकस्यापि समुदायान्तःपातिनः कर्तृत्वसद्भावात् । अन्यथा समुदायस्यैकत्वेन सत्रमासीरन्निति श्रुतं कर्तृबहुत्वं नोपपद्येत । तस्मादेकैकस्य कर्तुः सर्वफलसद्भावात् सर्वफलकामिनामेवाऽत्राधिकारो न [203]त्वंशफलकामिनाम् ॥

[204-] **इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके दशमोऽनुवाकः** [-204] ॥

१९८. इ. वा. म. वै - तृतीयपादे, आ. क - °पादे प्रथमाधिकरणे । १९९-१९९. अ. पा. इ. वा. वै - त्वाद्यः समापिके, म - त्वाद्यः समापके, मै - वाद्यः समूहकौ । २००. अ. पा. इ. वा. वै - 'तत्र' नास्ति । २०१. शृ१. अ. पा. इ. वा. वै म - फलत्वात् । २०२. अ. पा. इ. वा. वै - 'एव' नास्ति । २०३. मै - °शकामिनी, अ. पा. वा - °शकामिनाम् । २०४-२०४. इ - 'इति ---- °मोऽनुवाकः' नास्ति ।

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः

एकस्मै । स्वाहा । द्वाभ्याम् । स्वाहा । त्रिभ्य इति त्रि-भ्यः । स्वाहा । चतुर्भ्य इति चतुः-भ्यः । स्वाहा । पञ्चभ्य इति पञ्च-भ्यः । स्वाहा । षड्भ्य इति षट्-भ्यः । स्वाहा । सप्तभ्य इति सप्त-भ्यः । स्वाहा । अष्टाभ्यः । स्वाहा । नवभ्य इति नव-भ्यः । स्वाहा । दशभ्य इति दश-भ्यः ।

अथ [1]अश्वमेधाः । रात्रिहोमाः - ‘ एकस्मै स्वाहा ’ इत्यादयो दशानुवाकाः । यथोक्तम् - “ एकस्मै स्वाहेत्येताननुवाकान् पुनः पुनरभ्यासं रात्रिशेषं हुत्वा ” [2]इत्यादि ॥ “ स एतान् प्रजापतिर्नक्तं होमानपश्यत् ” (तैब्रा ३.८.१२) [3]इत्यादि ब्राह्मणम् । [4]तत्र आदशभ्यः सङ्ख्या सङ्ख्येये वर्तन्ते, ततः परं [5]सङ्ख्याने सङ्ख्येये च । ततश्च सर्वत्र [6] सङ्ख्यातविशिष्टाः [6] सङ्ख्येया [7]देवताः । [8] ब्राह्मणं च - “ प्रजापतिर्वा एषः ” (तैब्रा ३.८.१६) इति । [9]तत्परिमाणा

[1-1]दशमेनुवाके द्वादशाहस्यान्तिममहर्दीक्षादिविशेषश्चोक्तः । [2-2] अथ अवशिष्टेषु [2-2] दशास्वनुवाकेष्वश्वमेधगता मन्त्रा उच्यन्ते ॥

[3]कल्पः - “ संस्थितेऽहन्यभित आहवनीयं [4]षट्त्रिंशतमाश्वत्थानुपतल्पान् [5]Vमिन्वन्त्यस्तमित आदित्य षट्त्रिंशतमाध्वर्यव [6]उपतल्पानधिरुह्य खादिरैः स्रुवैः सर्वाꣳ रात्रिमन्नहोमाञ्जुहृत्याज्यं [7]मधुतंडुलान् पृथुकान् [8]लाजान् करम्भान् धानाः सक्तून् मसूस्यानि प्रियंगुतंडुलानित्येकस्मै स्वाहेत्येतेषामनुवाकानाममयुज आज्येन युजोऽन्नेनाऽऽज्येनाऽन्ततः ” (आपश्रौ २०.१०.४.५-७) इति ॥

---

१. मै. मै१. मै३. अ. अ१ - °मेघे एव । २. मै१. मै२ - इति । ३. मै. मै१. मै३. अ. अ१ - इति । ४. मै. मै१. मै३. अ. अ१ - ‘ तत्र ’ नास्ति । ५. अ१ - संख्या संस्थाने । ६. मै. मै१. मै३. अ - संख्यानोपसृष्टः, अ१ - संख्यानत्रसृष्टः । ७. मै. मै१. मै३. अ. अ१ - देवता । ८. मै१. अ१ - प्रमाणम् । ९. मै. मै२. मै३. अ - तत्परिणामाः ।

१-१. इ - ‘ दशमे - - - - °नुपतल्पान् ’ नास्ति । २-२. मै - अथवा वसिष्टेषु , आ. क. अत्र शिष्टेषु , अ. पा. बा. म - अथ शिष्टेषु । ३. मै - कला म - ‘ कल्पः ’ नास्ति । ४. अ - °तमाश्वस्यानु°, म. क. शृ१ - °थानुपतल्प्यान् । ५. म - पिन्वन्तोस्तमित, आ. क - विमिन्वन्त्यस्तमित । ६. मै° - तल्पावधिचतुर्थाभ्र्यः, शृ१ उपतल्प्यान° । ७. शृ१ - मधुतंडुलपृथु° । ८. शृ१ - ‘ लाजान् नास्ति ।

स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा

स्वाहा । एकादशभ्य इत्येकादश-भ्यः । स्वाहा । द्वादशभ्य इति द्वादश-भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश-भ्यः । स्वाहा । चतुर्दशभ्य इति चतुर्दश-भ्यः । स्वाहा ।

अन्ये । [१०-] एकस्मा इत्यादि ब्राह्मणं चोपपद्यते [-१०] । [११-] सङ्ख्या एवैकत्वादयः । [१२-] एकादयोऽपि [-१२] सङ्ख्याप्रधानाः [-११] [१३]प्रधाना भवन्ति । यथा – " द्व्येकयोः " इति । तत्र [१४-] एकं दश [-१४] च शतं च [१५]सहस्रमयुतनियुते तथा प्रयुतम् । कोट्यर्बुदं च वृन्दं स्थानात् स्थानं दशगुणं स्यात् । ततश्च पूर्वस्थानावगाहिन्यो दशसङ्ख्या [१६]भूत्वा [१७]उत्तरोत्तरस्थानमवगाहन्ते । तत्र [१८-] प्रथमे एकवृद्धिः [-१८] । [१९-] द्वितीये दशवृद्धिः [-१९] । तृतीयादिषु शतादिवृद्धिः । तत्र [२०]एकस्थानावगाहिन्य एकादिनवान्ताः नवसङ्ख्याः प्रथममाम्नायन्ते [२१-] याः द्वितीयस्थानावगाहिन्यः [-२१] [२२]एकादशद्वादशाधिकमारभन्ते । अथ तामपि दशसङ्ख्यामाम्नाय तया सह पुनरपि एकादिनवान्ताः [२३]प्रथमस्थानावगाहिन्यः नवसङ्ख्याः [२४]समाम्नाताः द्वितीयस्थानावगाहिन्य द्वितीयं दशवर्षम् [२५]उत्पादयन्ति । सर्वत्र [२६]वा [२७]स्थानात् स्थाने परमा वृद्धिः । [२८]एवं दशवर्गोपचयेन विंशत्यादयः सङ्ख्या जायन्ते । आहुश्च -

---

एकस्मा इति ॥ तत्रादौ युजामयुजां च मिश्रितानां संघमाह - 'एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पंचदशभ्यः स्वाहा

१०-१०. मै. मै२. मै३. अ - °सर्वस्मा इत्यादि चोपपद्यते, मै१ - अस्मा इत्यादि ब्राह्मणोपपद्यते । ११-११. मै२ - ' सङ्ख्या - - - - °प्रधानाः ' नास्ति । १२-१२. अ१ - एकत्वादयोऽपि । १३. अ१ - ' प्रधानाः ' नास्ति । १४-१४. अ१ - एकादश, मै१ - एको दश । १५. मै. मै१. मै३. अ. अ१ - सहस्रमयुतम् । १६. मै२ - भूता । १७. मै१. अ१ - °वगाहते । १८-१८. मै२ - प्रथममेक° । १९-१९. मै२ - ' द्वितीये दशवृद्धिः ' नास्ति । २०. मै२ - एवस्थाना° । २१-२१. मै. मै३. अ - यावद्द्वितीय°, मै२ - °द्वितीयावस्थानावगाहिनम् । २२. मै१ - °दशद्वादशमार°, मै. मै२. मै३. अ - °कादशवर्गमा° । २३. मै१ - °वगाहिनम् । २४. मै२ - ता आम्नाताः । २५. मै१ - उत्पादयति । २६. मै. मै१. मै३. अ. अ१ - च । २७. मै२ - ' स्थानात् ' नास्ति । २८. मै. मै१. मै३. अ - नव एकवत्वम् , मै२ - नवभागम् ।

पञ्चद॒शभ्य॑ः स्वाहा॑ षोड॒शभ्य॑ः स्वाहा॑ सप्तद॒शभ्य॑ः स्वाहा॑ऽष्टाद॒शभ्य॑ः स्वाहै॑कान्न विꣳश॒त्यै स्वाहा॒ नव॑विꣳश॒त्यै स्वाहै॑कान्न च॑त्वारि॒ꣳश॒ते स्वाहा॒

पञ्चद॒शभ्य इति॑ पञ्चद॒श-भ्य॑ः । स्वाहा॑ । षो॒ड॒शभ्य॒ इति॑ षोड॒श-भ्य॑ः । स्वाहा॑ । स॒प्त॒द॒शभ्य॒ इति॑ सप्तद॒श-भ्य॑ः । स्वाहा॑ । अ॒ष्टा॒द॒शभ्य॒ इत्य॑ष्टाद॒श-भ्य॑ः । स्वाहा॑ । एका॑त् । न । विꣳश॒त्यै । स्वाहा॑ । नव॑विꣳशत्या॒ इति॒ नव॑-विꣳश॒त्यै । स्वाहा॑ । एका॑त् । न । च॒त्वा॒रि॒ꣳश॒ते॑ । स्वाहा॑ ।

[29-] द्वयोर्दशानां विंशभावः तिश्च [-29] प्रत्ययः [30]विंशतिः । त्रयाणां दशानां [31]त्रिंभावः शञ्च [32]प्रत्ययः त्रिंशत् ★- इत्यादि । [33-] एवमयं मध्यस्थो दशवर्गः द्विप्रकारः प्रथममेकम् [34]अन्ततो [35]नव दश सप्तदशन्भावो नवतिरधिकं च । उभयथा नवसप्तद्वित्वा आम्नाताः [-33] । तत्र एकस्यागमे [36]तदुभयविपर्ययेन सङ्ख्याद्वयोक्तिरित्यनेन अभिप्रायेण रीतिसाम्ये एकोननवाधिकतमाया विश्वेत्यादिना -★ [37]निर्देशः [38]अकरोत् " शतायुर्वै पुरुषः शतवीर्यः " (तैब्रा ३.८.१६) इति दर्शनात् । सर्वेषु [39]चानुवाकेषु शतारोहिणी सङ्ख्यागतिः तस्मात् [40]शतस्य [41]कण्ठोक्तये ' एकोनशताय स्वाहा नवशताय स्वाहा ' इति नोक्तम् । [42-] शतस्थानेऽपि स्थानक्रमेण इममेव सङ्ख्योपचयप्रकारं दर्शयितुं [-42] द्वाभ्यां शताभ्यामित्युक्तम् । तस्य च उपलक्षणत्वात् सहस्रादेरपि

षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा स्वाहैकान्नविꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्नचत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्नशष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा सर्वस्मै स्वाहा ' इति ॥ [9]अत्र

२९-२९. अ१ - °र्दशतोः विंशभवम् अतिश्च, मै२ - °र्दशतयोर्विशेषभावः अतिश्च । ३०. अ१ - ' विंशतिः ' नासित । ३१. अ१. मै२ - त्रिंशद्भावः । ३२. अ१ - शत् । ★-★. मै२ - ' इत्यादि - - - - °त्यादिना ' नास्ति । ३३-३३. यथायथं संयोजितः पाठो द्रष्टव्यः । पाठोऽयं न स्पष्टार्थमभिव्यञ्जयति । । ३४. मै. मै३. अ - ततः । ३५. मै१ - नवा । ३६. मै. मै३. अ - °विपर्यासेन । ३७. मै२ - निर्देशान् । ३८. मै२ - करोति अथ, मै. मै१. मै३. अ. अ१ - संख्याद्वयत्वमकरोत् । ३९. मै२ - चार्थं पादेषु । ४०. अ१ - ऋतस्य । ४१. मै२ - कर्णोक्तये । ४२-४२. अ१.मै१ - शतस्थानेवा व्यतिक्रमेण इयं(मै१) संख्योपचयप्रकारं दर्शयिता ।

---

९. म. अ. ' तत्र ' नास्ति ।

नवचत्वारिँशते स्वाहैकान्न(१)षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा

नवचत्वारिँशत इति नव-चत्वारिँशते । स्वाहा । एकात् । न (१) । षष्ट्यै । स्वाहा । नवषष्ट्या इति नव-षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै । स्वाहा । नवाशीत्या इति नव-अशीत्यै । स्वाहा । एकात् । न । शताय । स्वाहा ।

योज्यम् । एवम् [43]अपरार्धीयाः सङ्ख्या [44]युग्मस्वरूपाः सर्वा अपि प्रथमेऽनुवाके प्रतिपादिता एव । अत एव [45]अनुक्तसङ्ख्यापरिग्रहस्पष्टतार्थं सर्वस्मा इत्युक्तम् । [46]अथ तमेव [47]सङ्ख्यावृद्धिक्रमं दर्शयितुं द्वितीयादिषु अनुवाकेषु [48]युग्मयुग्मविभागेन नवसङ्ख्यावृद्धिहेतवः [49]सङ्ख्यासंयोगविशेषप्रभवा सङ्ख्याविशेषा गृह्यन्ते । अनुक्ततत्तत्सङ्ख्याविशेषपरिग्रहार्थं [50]तत्रतत्र सर्वस्मा इत्युच्यते । [51-]'एकस्मै' इति [-51] । "इण्भीका°" (उसू ३.४३) इति कन्प्रत्यये [52]नित्त्वात् आद्युदात्तत्वं द्वाभ्याम् । यद्यपि कथंचित् सावेकाच्त्वं स्यात्, तथापि "न गोश्वन् साववर्ण" (पा ६.१.१८२) इति [53]विभक्तेरुदात्तत्वप्रतिषेधः । त्रिभ्यः "षट्त्रिचतुर्भ्यो हलादिः" (पा ६.१.१७९) इति [54]विभक्तेरुदात्तत्वम् । चतुर्भ्यः । "झल्युपोत्तमम्" (पा ६.१.१८०) [55-] इति उपोत्तमस्य उदात्तत्वम् । एवं पञ्चादीनामपि द्रष्टव्यम् । एतेषु [56]च "सङ्ख्यायाः" इत्युदात्तत्वं [57]बाध्यते । षड्भ्यः । पूर्ववद्विभक्तेरुदात्तत्वम् । अष्टाभ्यः ।

[10]एकशब्देन सर्वात्मकः प्रजापतिरुच्यते । अत एव ब्राह्मणे [11]समाम्नायते - "एकस्मै स्वाहेत्याह । प्रजापतिर्वा [12]एकः । तमेवाऽऽप्नोति" इति । अस्य च सर्वात्मकत्वाद्ये ये द्वित्वादि संख्याविशेषाः पदार्थास्ते सर्वेऽपि

४३. मैर - अपरार्धा । ४४. मैर - युग्मश्च रूपाः । ४५. मैर - उक्तसंस्था° । ४६. अ१ - 'अथ' नास्ति । ४७. मैर - संख्याविक्रमम् । ४८. मैर - युग्मायुग्मादिवि° । ४९. अ१ - प्रभावाः । ५०. अ१ - तत्र । ५१. मै१ - एकस्मै, अ१ - 'एकस्मै इति' नास्ति । ५२. मै१ - 'नित्वात्' नास्ति । ५३. मैर - प्रतिषेधः । ५४. मै१ - °दात्तत्वम् । पितादशादीनां पूर्ववदुपोत्तमस्य उदात्तत्वम् । ५५-५५. अ१ - 'इति - - - - सर्वस्मै' नास्ति । ५६. मैर - 'च' नास्ति । ५७. मै१ - 'बाध्यते' नास्ति ।

१०. अ. आ. क. पा. वा. हा. इ. वै - त्वेक°, म - एकस्मै एक° । ११. आ. क. म - समाम्नास्यते, अ. पा. इ. वा. वै - समाम्नास्यन्ते । १२. मै - एकम् ।

शताय स्वाहा द्वाभ्यां॑ शताभ्या॑ स्वाहा सर्वस्मै स्वाहा ॥११॥

(नवचत्वारिं॑शते स्वाहैकान्नैकविं॑शतिश्च) ॥११॥

शताय । स्वाहा । द्वाभ्याम् । शताभ्याम् । स्वाहा । सर्वस्मै । स्वाहा ॥११॥

[कासं ३४.९ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

" अष्टनो दीर्घात् " (पा ६.१.१७२) इति [58]विभक्तेरुदात्तत्वम् । एकादशादीनां पूर्ववदुपोत्तमस्योदात्तत्वम् । [59-] एतेषु च [-59] " सङ्ख्या " (पा ६.२.३५) इति पूर्ववद्प्रकृतिस्वरत्वं बाध्यते । एकोनविंशतिः [60-] एकान्नविंशतिः [-60] " एकादिश्चैकस्य चादुक् " (पा ६.३.७७६६) इति नलोपाभावः, [61]आदुगागमश्च ! नानास्वरत्वात् [62-] असमासं मन्यन्ते पदकाराः [-62] । " उदात्तयणः " (पा ६.१.१७४) इति तस्या उदात्तत्वम् । [63]नवविंशत्यै नव [64]च विंशतिश्च नवविंशतिः [65-] इति [66]संख्यापूर्वपदप्रकृतिस्वरत्वम् । एवमुत्तरत्रापि द्रष्टव्यम् । सर्वस्यै [-65] [67-] " सर्वस्य सुपि [-67] " (पा ६.१.१९१) इत्याद्युदात्तत्वम् ॥

॥ इति सप्तमे द्वितीये एकादशोऽनुवाकः ॥

प्रजापतिरूपाः तस्मात् प्रजापतिरूपान् [13]एतान् सर्वान् पदार्थानुदिश्येदं स्वाहुतमस्त्वित्येवं यथाम्नातं त्रिंशदाहुतीर्जुहुयात् । [14]अनुक्तपदार्थसंग्रहार्थः सर्वशब्दः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके एकादशोनुवाकः ॥

५८. मैर - °दात्तत्वम् न । ५९-५९. मैर - तेषु । ६०. मैर - ' एकान्नविंशतिः ' नास्ति । ६१. मै१ - आमश्च । ६२-६२. मै१ - असमासो दृश्यते पदकारैः । ६३. मैर - °विंशत्या । ६४. मैर - ' च ' नास्ति । ६५. मैर - ' इति ' नास्ति । ६६. मै१ - पूर्वपदप्रकृति° । ६७-६७. मैर - सर्वस्मा ।

१३. मै – तान् । १४. आ. क - °संग्रहार्थं, वै - ' संग्रहार्थः ' नास्ति । १५. वै - इति सप्तदशोनुवाकः ।

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा

एकस्मै । स्वाहा । त्रिभ्य इति त्रि-भ्यः । स्वाहा । पञ्चभ्य इति पञ्च-भ्यः । स्वाहा । सप्तभ्य इति सप्त-भ्यः । स्वाहा । नवभ्य इति नव-भ्यः । स्वाहा । एकादशभ्य इत्येकादश-भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश-भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश-भ्यः । स्वाहा । सप्तदशभ्य इति सप्तदश-भ्यः । स्वाहा । एकात् । न । विꣳशत्यै । स्वाहा । नवविꣳशत्या इति नव-विꣳशत्यै । स्वाहा । एकात् । न । चत्वारिꣳशते । स्वाहा । नवचत्वारिꣳशत इति नव-चत्वारिꣳशते । स्वाहा । एकात् । न । षष्ट्यै । स्वाहा ।

[1]अथ [2]अयुग्माः सङ्ख्याः[2] एकादिद्व्युत्तरा उपादीयन्ते - 'एकस्मै' इत्यादि ॥ गतम् । युग्मत्वेऽपि शतसङ्ख्याया उपादाने हेतुरुक्तः । द्वाभ्यां शताभ्यामित्यपि नोक्तं,

[1]अथायुजामेकाधिकानां संघमाह - 'एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्नविꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्नचत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्नषष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा' इति ॥

१. मै२ - 'अथ' नास्ति । २-२. मै२ - अयुग्मसंख्याः ।

१. मै - अथायुजाम् ।

नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१२॥

(एकस्मै पञ्चाशत्)

नवषष्ट्या इति नव-षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै । स्वाहा । नवाशीत्या इति नव-अशीत्यै । स्वाहा । एकात् । न । शताय । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१२॥

[कासं अश्वमेध २.२; कपिसं - - - -; मैसं - - - -; वासं - - - -]

युग्मत्वादेव । सर्वस्मा इति [३]अनुक्तसंख्यार्थमुक्तम् ॥

॥ इति सप्तमे द्वितीये द्वादशोऽनुवाकः ॥

---

[२]एतैरयुक्संख्याकैर्मन्त्रैर्विंशत्याहुतीर्जुहुयात् । न चात्र पूर्वानुवाकेन सह पुनरुक्तिः शङ्कनीया । यथावचनमनुष्ठेयत्वात् । [३]अथवाऽनन्तेषु [४]प्रजापत्यवयवेषु यथामति विषयभेदः कल्पनीयः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥

---

३. मै. मै३. अ. अ१ - चानुक्तसमुच्चयार्थ° ।

---

२. अ. आ. क. पा. इ. वा. वै. म - °रयुक्संख्यैर्म°, मै - °रयुक्संख्याम° । ३. शृ१ - °वानेनैषु° । ४. अ. पा - प्राजापत्य° ।

द्वाभ्या९ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा वि९शत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१३॥

(द्वाभ्यामष्टानवत्यै षड्वि९शतिः ।)

द्वाभ्याम् । स्वाहा । चतुर्भ्य इति चतुः-भ्यः । स्वाहा । षड्भ्य इति षट्-भ्यः । स्वाहा । अष्टाभ्यः । स्वाहा । दशभ्य इति दश-भ्यः । स्वाहा । द्वादशभ्य इति द्वादश-भ्यः । स्वाहा । चतुर्दशभ्य इति चतुर्दश-भ्यः । स्वाहा । षोडशभ्य इति षोडश-भ्यः । स्वाहा । अष्टादशभ्य इत्यष्टादश-भ्यः । स्वाहा । वि९शत्यै । स्वाहा । अष्टानवत्या इत्यष्टा-नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१३॥

[कासं, अश्वमेध २.३ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ युग्माः [१] 'द्वाभ्याम्' इत्याद्या उपादीयन्ते [१] [२]विंशत्यन्तमाम्नानं द्वितीयेऽपि स्थाने सङ्ख्याद्वयप्रदर्शनार्थम् । अथ सङ्ग्रहिष्यन् तत्पूर्वां [३]युग्मसंख्यां गृह्णाति द्वाभ्यां [४]शतपूर्तिं ख्यापयितुं [५]सर्वयुग्मविच्छेदान्वयप्रदर्शनार्थम् । सर्वग्रहणं च [६]अनुक्तसमस्तयुग्मसङ्ग्रहार्थम् ॥

॥ इति सप्तमे द्वितीये त्रयोदशोऽनुवाकः ॥

द्वाभ्यामिति ॥ अथ द्विसंख्यामारभ्य युग्मसंख्यानां संघमाह 'द्वाभ्या९ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्गाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा वि९शत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा' इति ॥ तैरेतैर्मन्त्रैस्त्रयोदश [१]आज्याहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके त्रयोदशोऽनुवाकः ॥

१-१. मै२ - द्वाभ्यामित्यादीनुत्तरे उपादीयन्ते । २. मै. मै१. मै३. अ. अ१ - विंशत्याम्नानम् । ३. मै. मै१. मै३. अ. अ१ - सङ्ख्याम् । ४. मै२ - शताभ्यां पूर्तिम् । ५. मै१ - °विच्छेदार्थद्वयप्र° । ६. मै२ - अनुक्ते समस्तयुग्म° ।

१. शृ१. म. मै - आहुतीः ।

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा

त्रिभ्य इति त्रि-भ्यः । स्वाहा । पञ्चभ्य इति पञ्च-भ्यः । स्वाहा । सप्तभ्य इति सप्त-भ्यः । स्वाहा । नवभ्य इति नव-भ्यः । स्वाहा । एकादशभ्य इत्येकादश-भ्यः । स्वाहा । त्रयोदशभ्य इति त्रयोदश-भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश-भ्यः । स्वाहा । सप्तदशभ्य इति सप्तदश-भ्यः । स्वाहा । एकात् । न । विꣳशत्यै । स्वाहा । नवविꣳशत्या इति नव-विꣳशत्यै । स्वाहा । एकात् । न । चत्वारिꣳशते । स्वाहा । नवचत्वारिꣳशत इति नव-चत्वारिꣳशते । स्वाहा । एकात् । न । षष्ट्यै । स्वाहा ।

अथ त्र्याद्युत्तरा अयुग्मा एव गृह्यन्ते - 'त्रिभ्यः' इत्यादि ॥ उपात्तया[१-] सह उत्तरायुग्मार्थं पुनर्वचनम्[-१] । क्रमभेदाद्विशेषः । [२]गतमन्यत् ॥

॥ इति सप्तमे द्वितीये चतुर्दशोऽनुवाकः ॥

अथ [१]त्रिसंख्यामारभ्य विषमसंख्यानां संघमाह - 'त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्नविꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्नचत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्नषष्ट्यै स्वाहा नवषष्ट्यै

१-१. मै२ - आर्त्वमिति किं विशेषणम् । अथाप्युत्तर एवायुग्मार्थं पुनर्वचनम् । २. मै२ - 'गतमन्यत्' नास्ति ।

---

१. मै - तृतीयसंख्या° ।

नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१४॥

(त्रिभ्योऽष्टाचत्वारिꣳशत् ।)

नवषष्ट्या इति नव-षष्ट्यै । स्वाहा । एकात् । न । अशीत्यै । स्वाहा । नवाशीत्या इति नव-अशीत्यै । स्वाहा । एकात् । न । शताय । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१४॥

[कासं, अश्वमेध २.४ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ' इति ॥ [2]तैरेतैर्मन्त्रैरेकोनविंशतिसंख्याका आहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके चतुर्दशोऽनुवाकः ॥

---

२. मै - तैरेव मन्त्रै° ।

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१५॥

(चतुर्भ्यः षण्णवत्यै षोडश ।)

चतुर्भ्य इति चतुःऽभ्यः । स्वाहा । अष्टाभ्यः । स्वाहा । द्वादशभ्य इति द्वादशऽभ्यः । स्वाहा । षोडशभ्य इति षोडशऽभ्यः । स्वाहा । विꣳशत्यै । स्वाहा । षण्णवत्या इति षट्ऽनवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१५॥

[कासं, अश्वमेध २.५ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ चतुरादिचतुरुत्तरा युग्मा गृह्यन्ते - 'चतुर्भ्यः' इत्यादि ॥ त्रिंशत्यन्तानां ग्रहणं [१]उपात्तस्य [२]चतुष्कपञ्चकस्य विंशत्यन्तरेऽप्यविशिष्टत्वात् । षण्णवतिग्रहणं [३]यावच्छतमव्यवच्छेदेन [४]चतुष्कान्वयप्रदर्शनार्थं चतुर्भिः शतपूरणख्यापनार्थं च ॥

॥ इति सप्तमे द्वितीये पञ्चदशोऽनुवाकः ॥

चतुर्भ्य इति ॥ अथ चतुःसंख्यामारभ्य चतुरुत्तराणां समसंख्यानां संघमाह - 'चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा' इति ॥ एतैर्मन्त्रैरष्टावाहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके पञ्चदशोऽनुवाकः ॥

---

१. मै१ - उपात्तस्य च । २. मै१ - चतुर्षु पञ्च° । ३. मै१ - यदादशतमव्यवच्छेदे । ४. मै१ - चतुर्षु अन्वय° ।

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१६॥

(पञ्चभ्यः पञ्चनवत्यै चतुर्दश ।)

पञ्चभ्य इति पञ्च-भ्यः । स्वाहा । दशभ्य इति दश-भ्यः । स्वाहा । पञ्चदशभ्य इति पञ्चदश-भ्यः । स्वाहा । विꣳशत्यै । स्वाहा । पञ्चनवत्या इति पञ्च-नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१६॥

[कासं, अश्वमेध २.६ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ पञ्चादिपञ्चोत्तरा गृह्यन्ते - 'पञ्चभ्यः' इत्यादि ॥ पूर्वेण समानम् । अत्र [1]अपि पञ्चनवतिग्रहणं पञ्चकेन [2]शतपूरणं प्रदर्शयितुम् ॥

॥ इति सप्तमे द्वितीये षोडशोऽनुवाकः ॥

पञ्चभ्य इति ॥ अथ पञ्चमसंख्यामारभ्य पञ्चोत्तराणां [1]समविषमसंख्यानां संघमाह - 'पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा' इति ॥ एतैर्मन्त्रैः [2]सप्ताहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षोडशोऽनुवाकः ॥

---

१. मै२ - नवति । २. मै२ - शतं पूरणार्थम् ।

---

१. इ. वै - समसंख्यानाम् , म - समविषमसंख्यासंघ° । २. म - षोडशाहुती° ।

दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१७॥

(दशभ्यो द्वाविꣳशतिः ।)

दशभ्य इति दश-भ्यः । स्वाहा । विꣳशत्यै । स्वाहा । त्रिꣳशते । स्वाहा । चत्वारिꣳशते । स्वाहा । पञ्चाशते । स्वाहा । षष्ट्यै । स्वाहा । सप्तत्यै । स्वाहा । अशीत्यै । स्वाहा । नवत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१७॥

[कासं, अश्वमेध २.७ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ दशादिदशोत्तरा गृह्यन्ते - ' दशभ्यः ' इति ॥ पङ्क्तिविंशत्यादौ विंशत्यादयो निपातिताः । अत्र शतस्य [1]क्रमप्राप्तिः स्पष्टा ॥

॥ इति सप्तमे द्वितीये सप्तदशोऽनुवाकः ॥

दशभ्य इति ॥ [1] अथ दशसंख्यामारभ्य दशोत्तराणां [2]संख्यानां संघं दर्शयति - ' दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ' इति [1] ॥ एतैर्मन्त्रैरेकादशाहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥

१. मै२ - क्रमप्राप्तिः दर्शिता ।

१-१. वा - ' अथ - - - - इति ' नास्ति । २. आ. क. इ. म. वै. मै - ' संख्यानाम् ' नास्ति ।

विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥१८॥

(विꣳशत्यै द्वादश)

विꣳशत्यै । स्वाहा । चत्वारिꣳशते । स्वाहा । षष्ट्यै । स्वाहा । अशीत्यै । स्वाहा । शताय । स्वाहा । सर्वस्मै । स्वाहा ॥१८॥

[कासं, अश्वमेध २.८ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ [1]दशादिद्विगुणकया [2]विंशत्या शतान्ता[2] गृह्यन्ते - [3]'विंशत्यै' [4]इत्यादि ॥ अत्रापि शतस्य क्रमप्राप्तिः स्पष्टा ॥

॥ इति सप्तमे द्वितीये अष्टादशोऽनुवाकः ॥

विꣳशत्या इति ॥ अथ [1]विंशतिसंख्यामारभ्य विंशत्युत्तराणां [2]संख्यानां संघमाह - 'विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा' इति ॥ [3]एतैर्मन्त्रैः षडाहुतीर्जुहुयात्[1] ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः ॥

---

१. मैर - °गुणतया। २-२. मैर - विंशत्युत्तरा, मै१ - विंशत्यादि शतान्ता। ३. मैर - विंशः। ४. मै. मै१. मै३. अ. अ१ - इति।

१-१. म - 'विंशति° - - - - जुहुयात्' नास्ति। २. शृ१ - 'संख्यानाम्' नास्ति। ३. मै - तैर्मन्त्रैः।

**पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ
शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः
स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा
पञ्चभ्यः शतेभ्यः स्वाहा
षड्भ्यः शतेभ्यः स्वाहा**

**पञ्चाशते । स्वाहा । शताय । स्वाहा । द्वाभ्याम् । शताभ्याम् ।
स्वाहा । त्रिभ्य इति त्रि-भ्यः । शतेभ्यः । स्वाहा । चतुर्भ्य
इति चतुः-भ्यः । शतेभ्यः । स्वाहा । पञ्चभ्य इति
पञ्च-भ्यः । शतेभ्यः । स्वाहा । षड्भ्य इति
षट्-भ्यः । शतेभ्यः । स्वाहा ।**

अथ क्रमप्राप्तं विंशतिद्वैगुण्यं [१]शतान्वयाभावेन हित्वा [२]पञ्चाशदादिपञ्चाशदुत्तरा गृह्यन्ते - ‘पञ्चाशते स्वाहा शताय स्वाहा’ इति ॥ तत ऊर्ध्वं शतवृद्धिः ‘द्वाभ्यान् शताभ्यां’ इत्यादिकं कृतं भवति । एवं [३]दशस्थानाभिवृद्धिभिः विकल्पैः बहुधा शतपूरणप्रतिपादनेन [४]शतस्थाने

पञ्चाशत इति ॥ [१-] अथ पञ्चाशत्संख्यामारभ्य [-१] [२]पञ्चाशदुत्तराणां शतोत्तराणां [३]च संघं दर्शयति - ‘पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः

---

१. मै१ - शतद्वयाभावेन । २. मै१ - पञ्चाशदादिभिः पञ्चाशदु° । ३. मै१ - द्वादशस्थानभावि हि वृद्धि, मै२ - द्वादशस्थानाभवैः वाहिवृद्धिः । ४. मै१ - ‘शतस्थाने’ नास्ति ।

१-१. म - ‘अथ ---- °मारभ्य’ नास्ति । २. शृ१ - ‘पञ्चाशदुत्तराणाम्’ नास्ति । ३. वै - ‘च’ नास्ति ।

सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा
नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा
सर्वस्मै स्वाहा ॥१९॥

(पञ्चाशते द्वात्रिंशत् ।)

सप्तभ्य इति सप्त-भ्यः । शतेभ्यः । स्वाहा । अष्टाभ्यः । शतेभ्यः । स्वाहा ।
नवभ्य इति नव-भ्यः । शतेभ्यः । स्वाहा । सहस्राय ।
स्वाहा । सर्वस्मै । स्वाहा ॥१९॥

[कासं, अश्वमेध २.९ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

एकत्वसङ्ख्या समर्थिता । इदानीं [५] तु शतद्वित्वादिसंपादनक्रमेण [५] सहस्रस्थाने [६]एकत्वसंख्यामारोहयति - 'सर्वस्मै' इति ॥

॥ इति सप्तमे द्वितीये एकोनविंशोऽनुवाकः ॥

स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ' इति ॥ एतैर्मन्त्रैर्द्वादशाहुतीर्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके एकोनविंशोऽनुवाक ॥

५-५. मै१ - तद्गतद्वित्वादि° । ६. मै१ - °मारोपयति ।

शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहाऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा

शताय । स्वाहा । सहस्राय । स्वाहा । अयुताय । स्वाहा । नियुतायेति नि-युताय । स्वाहा । प्रयुतायेति प्र-युताय । स्वाहा । अर्बुदाय । स्वाहा । न्यर्बुदायेति नि-अर्बुदाय । स्वाहा । समुद्राय । स्वाहा । मध्याय । स्वाहा । अन्ताय । स्वाहा । परार्धायेति पर-अर्धाय । स्वाहा । उषसे । स्वाहा ।

अधुना परार्ध्यात् शतात् दशोत्तरस्थानावगाहिनीं संख्यावृद्धिं दर्शयति - 'शताय' इति ॥ ननु पूर्वानुवाके सहस्रस्थाने प्रवेशिता सङ्ख्या, तत्किं शतग्रहणेन ? [१]दत्तमत्रोत्तरं - 'शताय स्वाहा' [२]इत्यादि । [३]आह - "शतायुर्वै पुरुषः शतवीर्यः" (तैब्रा ३.८.१६) इति सर्वेष्वनुवाकेषु शतवती सङ्ख्येति । "[४]युतान्यण्यन्तानाम्" (फिसू ५६) इति [५]अयुतादीनां त्रयाणां [६]मध्योदात्तत्वम् । [७]न्यर्बुदाय । पूर्वपदप्रकृतिस्वरत्वम् । परस्यार्धं परार्धं, [८]समासान्तोदात्तत्वम् ।

शतायेति ॥ [१]अथ [२]शतसंख्यामारभ्योत्तरोत्तरदशगुणवृद्धियुक्तानां संख्यानां संघमाह - 'शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहाऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्टयै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा' इति ॥ अत्र [३]अयुतादिशब्दाः सर्वे [४]शतसाहस्रादिशब्दवदुत्तरोत्तरदशगुणसंख्यावाचिन एव । परार्धब्रह्मण [५]आयुष्यार्धस्याऽऽवृत्तानां मानुषसंवत्सराणामवधिभूता चरमसंख्या । न ह्यतोऽधिका काचित् संख्या क्वचिद्विद्यते । परार्धस्य द्वैगुण्ये तु परार्धद्वयमित्येव [६]व्यवहरन्ति । तस्मात् संख्यावृद्धिविश्रान्तिस्तत्र द्रष्टव्या ॥

---

१. मै२ - दत्तमन्तोत्तरम् । २. मै२ - इति । ३. मै. मै२. मै३. अ. अ१ - 'आह' नास्ति । ४. अ१ - व्रताद्यणन्तानाम्, मै१ - व्रताद्यन्तानाम् । ५. मै१ - अत्र तादीनाम् । ६. मै१ - अन्तोदात्त° । ७. मै१ - 'न्यर्बुदाय' नास्ति । ८. अ१ - समासेत्यन्तोदात्त° ।

---

१. म - 'अथ' नास्ति । २. शृ१ - °त्तरोत्तरगुणवृद्धि°, म - °त्तरोत्तरशतगुणवृद्धि°, वै - °त्तरोत्तरदशगुणवृद्धि° । ३. अ. आ. क. पा. हा. इ. वा. वै. म - समुद्रादि° । ४. शृ१ - °त्तरगुणसंख्या°, म - °त्तरोत्तरदशसंख्या । ५. मै - आयुष्यर्थस्या, वै - आयुष्यर्धस्या । ६. अ. पा. इ. वा - व्यवहरति ।

व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥२०॥

(शतायाष्टात्रिꣳशत् ।)

व्युष्ट्या इति वि-उष्ट्यै । स्वाहा । उदेष्यत इत्युत्-एष्यते । स्वाहा । उद्यत इत्युत्-यते । स्वाहा । उदितायेत्युत्-इताय । स्वाहा । सुवर्गायेति सुवः-गाय । स्वाहा । लोकाय । स्वाहा । सर्वस्मै । स्वाहा ॥२०॥

[कासं, अश्वमेध २.१०; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ [९]उषस इत्यादयः चतस्रः अनुदिते होतव्याः । [१०]उदितायेत्यादयः चतस्रः उदिते होतव्याः । " अहोरात्रयोरव्यतिमोहाय " (तैब्रा ३.८.१६) इति ब्राह्मणम् । तत्र [११]उषः प्रभृतयः रात्रिसन्ध्यवयवा [१२]इति । उदितादयः अहःसन्ध्यवयवाः । [१३-] उषा प्रकाशवती [-१३] । व्युष्टिः [१४]व्यक्तप्रकाशः । [१५]" उच्छ विवासे " (द्र. धापा २१६), क्तिनि " तादौ°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् , " उदात्तस्वरितयोः [१६]यणः " (पा ८.२.४) इत्युकारः स्वर्यते । Vउदेष्यते प्रारम्भोन्मुखाय

कल्पः - " एताननुवाकान् पुनः पुनरभ्यासं रात्रिशेषं हुत्वोषसे स्वाहेत्युषसि व्युच्छन्त्यै स्वाहेति व्युच्छन्त्यां व्युष्ट्यै स्वाहेति व्युष्ट्यायामुदेष्यते स्वाहेत्युपोदयमुद्यते स्वाहेत्युद्यति उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते हुत्वा " इति । अत्र " व्युच्छन्त्यै स्वाहा " (तैब्रा २.११.६) इति शाखान्तरमन्त्रः । इतरे अत्रत्या एव । अत्र [७]ब्रह्मणो [८]रात्र्यवसाने सति तदीया उषःकालादयोऽत्र विवक्षिताः । यद्वा [९]मनुष्यप्रसिद्धाः । एवं [१०]सत्युषःशब्देन प्रभातोपक्रम उक्तः । व्युष्टिशब्देन सम्यक्प्रभातदशोक्ता । [११]उदेष्यच्छब्देन सूर्योदयात् [१२]प्राचीनसमीपदशा । उद्यच्छब्देनोदयकालीनदशा । उदितशब्देनोदयादूर्ध्वभाविनी दशा ।

९. मैर - षोडश । १०. मै. मैर. मै३. अ. अ१ - °त्यादयश्च । ११. मै. मै१. मैर. मै३. अ - प्रभृतयो ब्रह्मणः । १२. मैर - ' इति ' नास्ति । १३-१३. अ१ - प्रकाशति, मै१ - प्रकाशयति, मै. मै३. अ - प्रकाशः उषाः । १४. [लिपिसाधर्म्यादस्माभिः शुद्धीकृतः । सायणभाष्यमवलम्ब्य अस्माभिः पाठोऽयं संशोधितः । मै - मुद्रितपुस्तके लिखितपुस्तकेषुच सर्वेषु ' उक्तप्रकाशः ' इति पाठ उपलभ्यते ।] । १५. मैर - उच्छति । १६. मै. मै१. मै३. अ - ' यणः ' नास्ति, अ१ - यण् ।

७. अ. आ. क. पा. हा. इ. वा. म - ब्राह्मणो । ८. वै - रात्रवसति, राज्यवसाने । ९. म - प्रसिद्धाऽपि । १०. मै - सन्त्युषः° । ११. शृ१ - उदयशब्देन । १२. म - प्राचीनदशा ।

साध्याः षड्रात्रं कुसुरुविन्दः सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिस्ताः क्षुधं नवरात्रं प्रजापतिरकामयत दशहोतारमृतवं ऐन्द्रवायवाग्रान् गायत्रो वै प्रजापतिः स द्वादशरात्रं न वा एकस्मा एकस्मै द्वाभ्यां त्रिभ्यश्चतुर्भ्यः पञ्चभ्यो दशभ्यो विꣳशत्यै पञ्चाशते शताय विꣳशतिः ॥

साध्या अस्मा इमे लोका गायत्रं वै तृतीयमेकस्मै पञ्चाशत् ॥

~~~~~~~~~~~~~~~~~~~~

ब्रह्मणोऽह्ने । "शतुरनुमः°" (पा६.१.१७३) इति विभक्तेरुदात्तत्वम् । ᐯउद्यते प्रारभमाणाय । इणो यण् , पूर्ववद्विभक्तेरुदात्त्वम् , ᐯउदिताय प्रारब्धाय अह्ने । "गतिरनन्तरः" (पा ६.२.४९) इति प्रकृतिस्वरत्वं, [17]अकर्मकस्यापि व्यत्ययेन । [18]ᐯसुवर्गाय सुवरादित्यः, तद्गामिने [19]- अह्नो मध्याय -[19] दीप्तादित्यत्वात् । ᐯलोकाय [20]अह्ने । [21]ᐯसर्वस्मै परतोऽपि [22]महसे । सर्वत्र [23]तत्तत्कालाभिमानिनी सङ्ख्या [24]गृह्यते ॥

॥ इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये सप्तमे काण्डे द्वितीयप्रश्ने विंशोऽनुवाकः ॥

॥ समाप्तश्च प्रपाठकः ॥

~~~~~~~~~~~~~~~~~~~~

स्वर्गशब्देन द्युलोको विवक्षितः । लोकशब्देन प्रकाशयुक्तो [13]भूरादिः । [14]अत्रानुक्तसर्वविशेषसंग्रहार्थं सर्वस्मै स्वाहेत्यन्ते समाम्नातम् ॥

अत्र प्रपाठकस्य विनियोगसंग्रहः -

षड्रात्रः स्याद्द्वितीयाद्ये द्वितीये सप्तरात्रकः ।
अष्टरात्रस्तृतीये स्याच्चतुर्थे नवरात्रकः ॥
दशरात्रः पञ्चमेऽथ स्यादेकादशरात्रकः ।
षष्ठे काम्यग्रहाः सप्तमे [15]स्युर्व्यूढोऽष्टमः श्रुतः ॥

~~~~~~~~~~~~~~~~~~~~

१७. मै. मै१. मै३. अ. अ१ - कर्मण्यपि । १८. मै. मै१. मै३. अ. अ१ - 'सुवर्गाय' नास्ति । १९-१९. मै२ - अह्नाय । २०. अ१ - आत्मने । २१. मै२ - सर्वस्मै स्वाहेति । २२. मै२ - महते । २३. मै. मै३. अ. अ१ - तत्काला°, मै२ - °त्कालभवनीयसंख्या । २४. मै२ - गृह्यन्ते ।

~~~~~~~~~~~~~~~~~~~~

१३. आ. क - भूतादिः, शृ१ - भूरादीन् । १४. म - °नुक्तसर्गविशेष° । १५. अ. आ. क. पा. हा. इ. वा. मै. म - समूढोऽष्टमे ।

द्वादशाहगतानि [16]स्युरहान्येकादशादितः ।
नवमे दशमे तस्य शेषः सर्व उदीरितः ॥
अथाऽश्वमेधशेषाः स्युर्मन्त्राः सर्वान्नहोमगाः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके विंशोऽनुवाकः ॥

**[17] वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥**

॥ इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयः प्रपाठकः[17] ॥

---

१६. अ. आ. क. पा. हा. इ. वा. मै. म. मै - °कादशानि तु । १७-१७. शृ१. मै - समाप्तश्च द्वितीयः प्रपाठकः, वा - वेदार्थस्य - - - - महेश्वरः । इति विंशोऽनुवाकः, समाप्तः प्रपाठकः, इ. वै - इति विंशोऽनुवाकः समाप्तः प्रश्नः ।

(तृतीयः प्रपाठकः)

हरिः ॐ ॥

प्रजवं वा एतेनं यन्ति यद्दशममहः पापावहीयं वा एतेनं भवन्ति

प्रजवमितिं प्र-जवम् । वै । एतेनं । यन्ति । यत् । दशमम् । अहः ।
पापावहीयमितिं पाप-अवहीयम् । वै । एतेनं । भवन्ति ।

अथ द्वादशाहीनस्य दशरात्रस्य दशममहः अधिकृत्योच्यते - 'प्रजवं वै' इत्यादि ॥ प्रायणीयोदयनीयौ [१-] विना दशाहत्वम् । तत्र Vदशमम् Vअहः[-१] अविवाक्यम्, ★Vएतेन Vप्रजवं प्रकृष्टवेगं Vयन्ति प्रवर्तन्ते । [२]क्रियाविशेषणम् । "परादिश्छन्दसि" (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् । शैघ्र्ये हेतुमाह - 'पापावहीयं वै' [३]इत्यादि । [४]पापस्यावहतिः Vपापावहीयम् । [५]भावे छान्दसः क्यप्, कृदुत्तरपदप्रकृतिस्वरत्वम् । दशमेन हि अह्ना पापस्य समस्तस्य विनाशं प्राप्नुवन्ति, सद्य एव सर्वं पापं नश्यति [६]तत्किमिति विलम्ब्यते इति । [७-] प्राप्तिकर्मा भवतिः [-७] । कर्मणि वा [८]क्यप्प्रत्ययः, क्रियाविशेषणं [९]पापमवहीनं यथा भवति तथा [१०]Vभवन्ति भूतिमन्तः संपद्यन्ते ॥

[१-] यस्य [२]निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् [-१] ॥
षड्रात्राद्या द्वादशाहपर्यन्ता वर्णिताः क्रमात् ।
द्वितीयेऽथ तृतीयेऽस्मिन् [३]सत्रजातमुदीर्यते ॥

तत्र [४]प्रथमेऽनुवाके पूर्वोक्तद्वादशाहशेषत्वेन दशमेऽह्नि [५]कियानपि विशेषोऽभिधीयते ॥

प्रजवमिति ॥ प्रथमं तावत् प्रमादाद्विस्मृतस्य कस्यचिदङ्गस्य [६]स्मारणायान्येन वचनं प्रतिषेधति - 'प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवं यतामपथेन प्रतिपद्यते यः स्थाणुं हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवाऽन्वारभ्य समश्नुतेऽथ यो व्याह स हीयते तस्माद्दशमेऽहन्नविवाक्य

१-१. मै२ - हित्वा यो दशाहस्तस्य यद्दशममहः । ★ अ१ - एकेन । २. मै१ - °विशेषे । ३. मै२ - इति । ४. मै१ - °स्यावहना । ५. मै१ - भूते । ६. मै२ - इति किमिति । ७-७. मै२ - प्राप्तिर्भावे क्तिः । ८. मै२ - कृत्यः । ९. मै१ - पापवहीयम्, मै२ - पापहीनम् । १०. अ१ - भवति, मै२ - 'भवन्ति' नास्ति ।

१-१. शृ१ - 'यस्य - - - - महेश्वरम्' नास्ति । २. मै - निःश्वसिता । ३. मै - सत्रज्ञात° । ४. अ. आ. पा. क. इ. वा. वै. म - प्रथमेनानुवाकेन । ५. मै - क्रियाऽपि । ६. मै - स्मारणोऽन्येन ।

यद्दशममहर्यो वै प्रजवं यतामपंथेन प्रतिपद्यते यः स्थाणुं हन्ति यो भ्रेषं

यत् । दशमम् । अहः । यः । वै । प्रजवमिति प्र-जवम् । यताम् । अपंथेन । प्रतिपद्यत इति प्रति-पद्यते । यः । स्थाणुम् । हन्ति । यः । भ्रेषम् ।

'यो वै' इत्यादि ॥ लोके [११]हि Vप्रजवं शीघ्रं गच्छतां मध्ये Vयः Vअपथेन [१२]अमार्गेण Vप्रतिपद्यते ★सार्थं हित्वा गच्छति, Vयः वा [१३-]Vस्थाणुं Vहन्ति विघ्नं गच्छति, तदस्य निरोधादिकम् । यो वा Vभ्रेषं कण्टकादिना [१४-] गत्यसामर्थ्यं, Vव्येति [-१४] गच्छति [-१३] Vसः Vहीयते तस्मात् *सार्थात् भ्रष्टो भवति । तस्मात् Vसः [१५-]Vयः Vवै [-१५] [१६-] एतादृशे Vदशमे अहनि [-१६] Vअविवाक्ये [१७]विवाक्यरहिते Vउपहन्यते [१८]स्मृतिविनाशादिना [१९]दुष्यति Vसः Vहीयते एव

उपहताय न व्युच्यम्' इति ॥ Vयत् इदं Vदशमम् Vअहः अस्ति Vएतेन Vप्रजवं Vयन्ति, अत्रानुष्ठेयाङ्गबाहुल्यात् तस्मिन्नेवाह्नि कृत्स्नसमाप्तये प्रकृष्टो जवो वेगो यथा भवति तथैवानुतिष्ठन्ति । इयता प्रयासेनैतदनुष्ठाने कारणमुच्यते - [७]Vयत् Vदशमम् Vअहः अस्ति Vएतेन [८]Vपापावहीयम् [९]Vभवन्ति पापस्यावहीयम् [१०]अवहानिः पापक्षयम् , एतेनाह्ना भवन्ति प्राप्नुवन्ति । तस्मात् [११-] प्रयासं सोढ्वा अपि [-११] त्वरया तदहरनुष्ठेयम् । [१२]त्वरयाऽनुष्ठातुः [१३]स्खलने लौकिको दृष्टान्त उच्यते - चोरव्याघ्रादिभयाकुलमहारण्ये Vप्रजवं [१४]Vयतां प्रकर्षेण वेगो यथा भवति तथा गच्छतां पुरुषाणां मध्ये यः कोऽपि मन्दबुद्धिः पुरुषः पण्डितंमन्यः [१५]सन् सर्वेषां पुरतस्त्वरया गच्छन् [१६]बुद्ध्यपराधाद्राजमार्गं परित्यज्य [१७]कनिष्ठमार्गेण गच्छति । Vयः च [१८]अन्यः पुरुषः

११. मैर - यः । १२. मैर - मार्गेण । ★[अस्माभिः शुद्धीकृतोऽयं पाठः । 'मार्गात्' इत्यपि पाठः संभाव्यते । मै - मुद्रितपुस्तके लिखितपुस्तकेषु सर्वेषु 'सार्धम्' इत्युपलभ्यते ।] । १३-१३. मै - स्थाणुं हन्ति गच्छति, न्येति रोधादिकं नित्य इत्यस्य भूयो विरोधिः ? भ्रेषं कण्टकादिना गत्यसामर्थ्यं न्येति गच्छति । १४-१४. मैर - गत्यसामर्थ्यान्न्येति इत्यादिना । [*'मार्गात्' इति पाठः संभाव्यते]१५-१५. मैर - 'यो वै' नास्ति । १६-१६. मैर - एतादृशे यो दशरात्रमे(?)हनि ! १७. अ१ - विवाहर° । १८. मैर - शान्तिविना° । १९. मै - द्रुष्यति, मैर - दूष्यति ।

७. उ - 'यत्' नास्ति । ८. मै - पापवहीयम् । ९. शृ१. उ. अ. पा. इ. बा. म - भवति, मै. वै - 'भवन्ति' नास्ति । १०. अ. आ. क. पा. इ. उ. बा. म - हानिः, वै - हातिः । ११-११. म - प्रयोङ्गनापि, बा - प्रयासं मुष्ट्वापि । १२. अ. आ. क. पा. इ. बा. उ - त्वयाऽनुष्ठातुः । १३. मै - स एव । १४. शृ१ - यान्ति ताम् , म - यन्ताम् । १५. शृ१ - स तु , म - 'सन्' नास्ति । १६. म - °द्राजकुलम् । १७. अ. आ. क. पा. इ. बा. वै. म. मै - केनाप्यमार्गेण । १८. म - 'अन्यः' नास्ति ।

न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य

न्येतीति नि-एति । सः । हीयते । सः । यः । वै । दशमे । अहन् । अविवाक्य इत्यवि-वाक्ये । उपहन्यत इत्युप-हन्यते । सः । हीयते । तस्मै । यः । उपहतायेत्युप-हताय । व्याहेति वि-आह । तम् । एव । अन्वारभ्येत्यनु-आरभ्य ।

---

[२०]कर्मणि । किं [२१]तु [V]तस्मै [V]उपहताय योऽन्यो [२२V]व्याह विरुद्धमाह [२३]स्खलितं व्याकरोति [२४V]तं स्खलितस्य व्याकर्तारम् [V]अन्वारभ्य अवलम्ब्य [V]समश्नुते व्याप्नोति कर्मसिद्धिं, न तु हीयते [२५]उपहतस्खलितदोषव्यपगमात् । [V]अथ [V]यः [२६]अप्राप्तकारी [२७]अविवाक्येऽहनि [V]व्याह [V]सः [२८]एव [V]हीयते । [V]तस्मात् [V]दशमे अह्नि [२९-V]अविवाक्ये द्रुतगतित्वेन [-२९] [३०]अविवचनार्हे

सहसा गच्छन् पुरोवर्तिनं स्थाणुम् अदृष्ट्वा पादेन [१९]एतं [V]स्थाणुं [V]हन्ति । [V]यः अप्यन्यः पुरुषः कण्टकादिना रोगेण वा पीडितः सन् [V]भ्रेषं [V]न्येति, गन्तुमशक्तो गमनभ्रंशं नितरां प्राप्नोति । [२०V]सः त्रिविधोऽपि पुरुषः [V]हीयते रक्षाहेतोः सहायभूताद्गच्छतो जनसंघाद्धीनो भवति । यथाऽयं त्रिविधः पुरुषो हीनस्तथा दशमेऽहन्यपि विस्मृताङ्गानुष्ठानः पुरुषः ऋत्विक्संघाताद्धीयते । [२१-] सोऽयं दार्ष्टान्तिकः इहाभिधीयते [-२१] । [V]सः [V]यः [२२V]वै एतेषां मध्ये यः [२३]कोऽपि ऋत्विक् [V]दशमे अहनि [२४V]उपहन्यते-अस्मिन्नहन्यङ्गानुष्ठानविस्मृतिलक्षणमुपघातं प्राप्नोति । [V]सः अयमृत्विक् सम्यगनुष्ठातृभ्य ऋत्विग्भ्यो हीनो भवति । अविवाक्य [२५]इत्यनेन दशममहर्विशेष्यते । अन्येषु यागेषु यत् [२६]प्रमादादेकेन विस्मृतमङ्गं तदन्येन [२७-] स्मारयितुं वक्तव्यं [-२७] भवति । विकलं च तद्वाक्यं वक्तव्यं [२८]चेति [२९-] विवाक्यं न विद्यते [-२९] ।

---

२०. मै. मै१. मै३. अ. अ१ - 'कर्मणि' नास्ति । २१. मै. मै१. मै३. अ. अ१ - च । २२. मै१ - प्याह । २३. मै. मै२. मै३. अ. अ१ - तस्य स्खलितम् । २४. मै१ - इति यातम् । २५. मै. मै२. मै३ - °स्खलितभ्रेषव्यप° । २६. मै२ - व्याप्तकारी । २७. मै. मै१. मै३. अ. अ१ - °क्येनाह्ना । २८. मै२ - 'एव' नास्ति । २९-२९. मै२ - अविवाक्येन द्रुत°, मै१ - वाक्यदूतगति° । ३०. अ१ - अविवचनाहे, मै१ - अचगाहे, मै२ - अविवहगाहे ।

---

१९. आ. क. पा. इ. वा. वै. म. मै - तम्, शृ१ - 'एतम्' नास्ति । २०. मै - तत् । २१. इ. वै - 'सोऽयं - - - - °धीयते' नास्ति । २२. अ. आ. क. पा. इ. वा. वै. मै - वा । २३. म - 'कोऽपि' नास्ति । २४. शृ१ - अवहन्यते । २५. शृ१. आ. क. मै. वै - इत्येतेन । २६. म - प्रमादेन । २७-२७. शृ१ - स्मारितं कर्तव्यम् । २८. मै - वेति । २९-२९. म - 'विवाक्यं न विद्यते' नास्ति ।

समश्नुतेऽथ यो व्याह स(१) हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यमथो खल्वाहुर्यज्ञस्य वै समृद्धेन

समिति । अश्नुते । अथ । यः । व्याहेति वि-आह । सः (१) । हीयते । तस्मात् । दशमे । अहन् । अविवाक्य इत्यवि-वाक्ये । उपहतायेत्युप-हताय । न । व्युच्यमिति वि-उच्यम् । अथो इति । खलु । आहुः । यज्ञस्य । वै । समृद्धेनेति सम्-ऋद्धेन ।

[V]उपहताय [V]न [V]व्युच्यम् । छान्दसः स्यप्, न विवक्तव्यम् [31]अस्मिन् [32]इति अविवाक्यम्, अधिकरणे ण्यत्, " ययतोश्चातदर्थे " (पा ६.२.१५६) इत्युत्तरपदान्तोदात्तत्वम् । यद्वा-विवक्तव्यं [33]विवाक्यं तदस्मिन्नास्तीति अविवाक्यं, बहुव्रीहौ " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् ॥

'अथो खल्वाहुः' इत्यादि ॥ [34-] अविकलं पुष्कलं यज्ञफलं [-34] [V]यजमानस्य [35]विकलं यज्ञफलम् [36]अस्य शत्रोरित्यर्थः । एवं स्थिते [V]सः एषः [V]दशमे अहनि [V]अविवाक्ये [V]उपहन्यते । [V]सः [V]अतिरेचयति [V]एव यज्ञं यज्ञांशं [37]किञ्चिच्छेषयति तस्याकृतत्वात् । तस्य

[30]विवाक्यमस्मिन्नहनि तदहरविवाक्यम्, एकेन विस्मृतमङ्गं जानताऽप्यन्येनास्मिन्नहनि न वक्तव्यमित्यर्थः । एवं सति [V]उपहताय स्खलितानुष्ठानाय तस्मा ऋत्विजे योऽन्यः कश्चिदृत्विक् [V]व्याह विस्मृतं त्वयेदमिति ब्रूते [V]तम् [V]एव वक्तारम् [V]अन्वारभ्य अवलम्ब्य स्खलितानुष्ठान स ऋत्विक् [V]समश्नुते सम्यगनुतिष्ठति । [V]अथ अनन्तरं [V]यः अन्यः [V]व्याह विकलं ब्रूते [V]सः अयं [31]विवचनेनापराधेन सम्यगनुष्ठातृभ्य ऋत्विग्भ्यः [V]हीयते । तस्मात् कारणादविवाक्येऽस्मिन् [V]दशमे अहनि [V]उपहताय स्खलितानुष्ठानाय [V]न [V]व्युच्यं विकलमङ्गं न वक्तव्यम् ॥

अथो खल्विति ॥ पक्षान्तरमाह - 'अथो खल्वाहुर्यज्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराभावयन्निति यत् खलु वै यज्ञस्य समृद्धं तद्यजमानस्य यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवाति रेचयति ते ये बाह्या दृशीकवः स्युस्ते विब्रूयुः' इति ॥ अभिज्ञास्त्वेवम्

३१. मै२ -'अस्मिन्' नास्ति । ३२. मै१ -'इति' नास्ति । ३३. मै१ - वाक्यम् । ३४-३४. मै२ - अविकलफलम् । ३५. अ१ - यज्ञफलं विकल्पः । ३६. मै२ -'अस्य' नास्ति । ३७. मै२ - कश्चिच्छेष° ।

३०. शृ१ - वाक्यं यस्मिन्° । ३१. अ. पा. क. इ. वा. वै - विवचना°, म. मै - वचनेना° ।

देवाः सुवर्गं लोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराऽभावयन्निति
यत् खलु वै यज्ञस्य समृद्धं तद्यजमानस्य
यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै
दशमेऽहन्नविवाक्य

देवाः । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । यज्ञस्य । व्यृद्धेनेति वि-ऋद्धेन । असुरान् । परेति । अभावयन् । इति । यत् । खलु । वै । यज्ञस्य । समृद्धमिति सम्-ऋद्धम् । तत् । यजमानस्य । यत् । व्यृद्धमिति वि-ऋद्धम् । तत् । भ्रातृव्यस्य । सः । यः । वै । दशमे । अहन् । अविवाक्य इत्यवि-वाक्ये ।

---

[३८]विकलत्वात् यज्ञफलं भ्रातृव्यस्य स्यात् , तत् मा भूदेष दोष इति [३९]विवचनं [४०]कर्तव्यमेव विकलांशपूरणाय । तस्मादत्र [V]ये [V]बाह्याः [४१]बहिर्भवाः ऋत्विग्भ्योऽन्ये [V]दृशीकवः [४२]येऽन्ये प्रेक्षका वर्तन्ते [V]ते अपि [V]ब्रूयुः, [V]यदि [V]तत्र [४३]बहिर्वक्तॄन् स्खलितस्य [४४]वदितॄन् [V]न [V]विन्देयुः न लभेरन् । " विद्लृ लाभे " (धापा १४५७) [V]अन्तःसदसात् सदसोऽन्तरधितिष्ठद्भिः [४५]विवाच्यम् ऋत्विग्भिरेव । सदो यज्ञगृहं तस्यान्तर्मध्यम् अन्तःसदसम् " अव्ययीभावे शरत्प्रभृतिभ्यः (पा १.१.१०७) इत्यच् समासान्तः, ततो ल्यब्लोपे कर्मणि पञ्चमी । [V]यदि [V]तत्र अपि [४६-] स्खलितज्ञातॄन्

[V]आहुः - [V]यज्ञस्य यत् संपूर्णमनुष्ठानं तेन [V]देवाः स्वर्गं गताः । [V]यज्ञस्य यदनुष्ठानं विकलं तेन [V]असुरान् पराभावयन् पराभवं प्रापितवन्तः । संपूर्णफलं यजमानगामि, विकलं तु भ्रातृव्यगामि । एवं सति [V]दशमे अहनि [V]यः यजमानः [V]उपहन्यते स्खलितानुष्ठानो भवति [V]सः एव यजमानः [V]अतिरेचयति शास्त्रीयमनुष्ठानमतिलङ्घयति । तथा सति अनुष्ठानस्य विकलत्वेन न्यूनफलत्वात् तत् फलं भ्रातृव्यगामि स्यात् । अतः तत्परिहाराय विरुद्धं वक्तव्यमेव । तदाऽप्यृत्विजो वक्तुः पूर्वोक्तरीत्या प्रत्यवायो भविष्यतीति

---

३८. मै. मै२. मै३. अ. अ१ - अविकलत्वात् । ३९. मै२ - वचनम् । ४०. मै. मै३. अ. अ१ - वक्तव्यमेव, मै२ - कर्तुमेव । ४१. मै२ - बहिर्भूताः । ४२. मै२ - 'येऽन्ये' नास्ति । ४३. मै२ - बहुविवक्तॄन् । ४४. मै३ - विवक्तॄन् । ४५. मै२ - वाच्यम् । ४६-४६. मै२ - स्खलितज्ञो न स्खलितज्ञाने ।

उपहन्यते स एवार्तिं रेचयति ते ये बाह्या दृशीकवः (२) स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं यदि तत्र न विन्देयुर्गृहपतिना व्युच्यं

उपहन्यत इत्युप-हन्यते । सः । एव । अतीर्ति । रेचयति । ते । ये । बाह्याः । दृशीकवः (२) । स्युः । ते । वीति । ब्रूयुः । यदि । तत्र । न । विन्देयुः । अन्तःसदसादित्यन्तः-सदसात् । व्युच्यमिति वि-उच्यम् । यदि । तत्र । न । विन्देयुः । गृहपतिनेति गृह-पतिना । व्युच्यमिति वि-उच्यम् ।

Vन [-४६] Vविन्देयुः Vगृहपतिना यजमानेनैव Vव्युच्यम् । किं बहुना येन केनापि [४७]स्खलितविदा विवक्तव्यं [४८]न [४९]अविवाक्यमिति कथं नाम अविवाक्यमहः स्यात् , [५०]विवक्तव्यम् [५१]अस्मिन् नास्तीत्यविवाक्यं यथा विवक्तव्यमत्र न भवति [५२]तथाऽवहितैः कर्तव्यमिति [५३-] सति तु [-५३] स्खलिते [५४-] विवक्तव्यमत्र भवत्येवेति [-५४] ॥

[३२]तत्परिहाराय यज्ञाङ्गभूतेभ्यः ऋत्विग्भ्यो [३३]बहिर्भूता यज्ञं द्रष्टुमागताः Vये केचित् पुरुषाः सन्ति Vते अत्र [३४]विकलमङ्गं Vब्रूयुः । एवं सत्यृत्विजः प्रत्यवायो न भविष्यति, विकलमङ्गं च [३५]समाहितं भवति ॥

यदीति ॥ अथ पक्षान्तरमाह - 'यदि तत्र न विन्देयुरन्तःसदसाद्व्युच्यम्' इति ॥ Vतत्र तेषु द्रष्टुमागतेषु पुरुषेषु [३६]स्खलितप्रयोगाभिज्ञान् [३७]पुरुषान् ऋत्विग्यजमानाः [३८]Vयदि Vन [३९]लभेरंस्तदानीम् Vअन्तःसदसात् सदसो यज्ञभूमेरन्तर्मध्ये वर्तमानैरेवर्त्विग्भिस्तद्विकलमङ्गं वक्तव्यम् ॥

यदीति ॥ पुनरपि पक्षान्तरमाह - 'यदि तत्र न विन्देयुर्गृहपतिना व्युच्यम्' इति ॥ Vतत्र [४०]तेष्वप्यृत्विक्षु वैकल्याभिज्ञान् पुरुषान् Vयदि Vन [४१]लभेरंस्तदानीं यजमानेन तद्विकलाङ्गं वक्तव्यम् ॥

४७. मै. मै३. अ - स्खलितभावविदा । ४८. मै२ - 'न' नास्ति । ४९. मै२ - विवाक्यम् । ५०. मै१ - वक्तव्यम् । ५१. मै१ - अत्र । ५२. मै१. अ१ - तथाऽपि तैः, अ - तथा तैः । ५३-५३. अ१ - सति, अ - स तु किल, मै१ - स कित् । ५४-५४. मै. मै१. मै३. अ. अ१ - विवक्तव्यमेवेति ।

३२. शृ१. अ. आ. मै. वै - °रिहाराय ये । ३३. अ. आ. क. पा - बर्हिर्भूताः । ३४. मै - विफलमङ्गम् । ३५. म - समापितम् । ३६. अ. आ. पा. इ. वा. वै - °प्रयोगाभिज्ञाः । ३७. अ. आ. क. पा. हा. इ. वा. वै. म - 'पुरुषान्' नास्ति । ३८. उ - 'यदि' नास्ति । ३९. शृ१ - भजेरंस्तदानीम् । ४०. अ. आ. क. पा. हा. उ. इ. वा. वै. म - 'अपि' नास्ति । ४१. म - लभेत तदानीम् ।

तद्व्युच्यमेवाथ वा एतत् सर्पराज्ञिया ऋग्भिः स्तुवन्तीयं वै सर्पतो राज्ञी यद्वा अस्यां किं चार्चन्ति

तत् । व्युच्यमिति वि-उच्यम् । एव । अथ । वै । एतत् । सर्पराज्ञिया इति सर्प-राज्ञियाः । ऋग्भिरित्यृक्-भिः । स्तुवन्ति । इयम् । वै । सर्पतः । राज्ञी । यत् । वै । अस्याम् । किम् । च । अर्चन्ति ।

'अथ वा' इत्यादि ॥ [V]अथ [V]वा तस्मिन्नहनि समाप्तिकाले [V]सर्पराज्ञियाः [V]ऋग्भिः सा एतं मन्त्रमपश्यदिति सर्पराज्ञियाः पृथिव्याः अष्टाभिः "भूमिर्भूम्ना" (तैसं १.५.३) इत्यादिभिः ऋग्भिः [V]स्तुवन्ति । का पुनः सर्पराज्ञी ? कथं पुनः [५५]सा सर्पराज्ञी ? इत्याह - 'इयम्' इत्यादि । [V]इयं पृथिवी [५६-] सर्पतः गतिमतः [-५६] सर्पस्य [V]राज्ञी स्वामिनी । कथमित्याह - 'यद्वा' इत्यादि । [V]यत् किञ्चित् [V]अर्चन्ति [५७]तत् अर्चनीयम् तत्सर्वम् [V]अस्यां [५८]निवर्तते । तदिदमेकं

तदिति ॥ सर्वेषां पक्षाणां तात्पर्यं निगमयति - 'तद्व्युच्यमेव' इति ॥ किंबहुना द्रष्टुमागतैः पुरुषैर्वा तत्रत्यैर्ऋत्विग्भिर्वा यजमानेन वा सर्वथाऽपि [V]तत् विकलमङ्गं वक्तव्यमेव । एवं तर्हि विकलस्यावश्यवक्तव्यत्वादविवाक्यत्वविशेषणमयुक्तमिति चेन्नैवम् । अन्यथा योजयितुं शक्यत्वात् । विवाक्यं विकलाङ्गवचनं यथा प्रसक्तं न भवति तथा सावधानैरनुष्ठेयत्वादिदमहरविवाक्यम् । इतरेष्वहःसु कथंचिद्वैकल्येऽप्यनायासेन समाधातुं शक्यम् । अत्र तु समाधानं दुःशकमिति [४२]अवश्यम् अप्रमत्तैर्भवितव्यमित्यर्थः ॥

अथेति ॥ अस्मिन्नहनि मानसग्रहकाले स्तोत्रविशेषं विधत्ते - 'अथ वा एतत् सर्पराज्ञिया ऋग्भिः स्तुवन्तीयं वै सर्पतो राज्ञी यद्वा अस्यां किं चाऽर्चन्ति यदानृचुस्तेनेयं सर्पराज्ञी ते यदेव किं च वाचाऽऽनृचुर्यदतोऽध्यर्चितारस्तदुभयमाप्त्वाऽवरुध्योत्तिष्ठामेति' इति ॥ [४३-V]अथ [V]वै [-४३] अनन्तरमेव मानसग्रहकाल इत्यर्थः । [V]एतत् एतस्मिन्नहनि [V]सर्पराज्ञियाः सर्पस्वामिन्याः भूमेः संबन्धिनीभिः [V]ऋग्भिः भूमेः स्तुतिं कुर्युः । का सा सर्पराज्ञी कथं वा तस्याः सर्पराज्ञित्वमिति तदुभयमुच्यते । [V]इयम् एव [४४]भूमिः [४५V]सर्पतः संचारं कुर्वतः [४६]सर्वस्य प्राणिनो [V]राज्ञी । एतेन का सेत्यस्योत्तरं संपन्नम् । अथ कथं

५५. मै१ - 'सा' नास्ति । ५६-५६. मै१ - सर्पतो गतिः अन्ततः । ५७. मै१ - 'तत्' नास्ति । ५८. मै१ - वर्तते ।

४२. म - 'अवश्यम्' नास्ति । ४३-४३. आ. क. वै - अथ वा । ४४. शृ१. म. मै - पृथिवी, अ. पा. इ. वा. वै - वृद्धिः । ४५. शृ१. अ. पा. इ. वा. वै. म. मै - सर्वतः । ४६. म - सर्पतः ।

यदानृचुस्तेनेयꣳ सर्पराज्ञी ते यदेव किं च वाचाऽऽनृचुर्यदतोध्यर्चितार(३)स्तदुभयमाप्त्वाऽवरुध्योत्तिष्ठामेति

यत् । आनृचुः । तेन । इयम् । सर्पराज्ञीति सर्प-राज्ञी । ते । यत् । एव । किम् । च । वाचा । आनृचुः । यत् । अतोधि । अर्चितारः (३) । तत् । उभयम् । आप्त्वा । अवरुध्येत्यव-रुध्य । उदिति । तिष्ठाम । इति ।

कारणम् । यच्चेमां पृथिवीं सर्वेऽपि [V]आनृचुः अर्चयन्ति वाचा पूजयन्ति अतश्च [V]इयं स्वामिनी [५९-] सर्पस्य सर्वतः [-५९] [V]सर्पराज्ञी इत्युच्यते । " अपस्पृधेथाम् " (तैसं २.२.११) इत्यादौ अर्चयतेर्लिटि आनृचुरिति निपात्यते । राजनशीला राज्ञी स्वामिनी । " कनिन्युवृष°" इति कनिन् , " ऋन्नेभ्यो ङीप् " (पा ४.१.५) । [६०]सर्पाणां राज्ञीति षष्ठीतत्पुरुषे समासान्तोदात्तत्वम् ॥

' ते यदेव ' इत्यादि ॥ [V]यत् किञ्चित् [६१]अस्याः पृथिव्याः संबन्धि वस्तु [V]वाचा अर्चयन्ति [६२][V]अतः अस्यां पृथिव्याम् [V]अधि उपरि, [६३]अनर्थको वा अधिशब्दः, सर्वथा अनवग्रहः ।

सर्पराज्ञीत्वमित्यस्योत्तरमुच्यते - प्राणिनां [४७]तु मध्ये [४८]परस्परोपकार्योपकारित्वस्य सद्भावात् केचिदर्चकाः [४९][अर्चनीयाश्च] तत्र यत् किञ्चित् [५०]प्राणिजातमर्चनीयमन्ये पुरुषाः [५१]सर्वम् [५२][V]अर्चन्ति, [V]यत् [५३][V]आनृचुः येऽपि पुरुषा अर्चयितारः तदुभयमप्यर्चनीयार्चयितृप्राणिस्वरूपमस्यां पृथिव्यामेव वर्तते । तस्मात् [५४]सर्वतोऽर्चनादिव्यवहारं कुर्वतः प्राणिजातस्याधार इति भूमिः [V]इयं [V]सर्पराज्ञी इत्युच्यते । तस्याः सर्पराज्ञियाः संबन्धिन्यः [५५]ऋचः " भूमिर्भूम्ना " (तैसं १.५.३) इत्यादयः । एते [५६]च मन्त्राः प्रथमकाण्डे पुनराधानप्रकरणे समाम्नाताः । ताश्च तत्रत्ये ब्राह्मण एतन्नाम्ना व्याहृताः - " सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधाति " (तैसं १.५.४) इति । तस्मात् " भूमिर्भूम्ना " (तैसं १.५.३) इत्यादिभिरत्र स्तुतिं कुर्युः । स्तोतॄणाम् [५७]अत्र कोऽभिप्राय इति सोऽयमुच्यते - [V]यत् [V]एव किञ्चित् प्राणिजातमन्ये पुरुषाः अस्यां भूमौ [V]वाचा पूजितवन्तः ये चास्या

५९-५९. मै. मै१. मै३ - सर्वस्य अतः, मै२ - सर्वस्य अतश्चेयम् । ६०. मै. मै१. मै२. मै३. अ - ततः सर्पाणाम् । ६१. मै. मै१. मै२. मै३ - तस्याः । ६२. मै२ - अथ, अ - ' अतः ' नास्ति । ६३. मै. मै१. मै३ - अनर्थतः ।

४७. अ. आ. क. पा. इ. वा. वै. मै - ' तु ' नास्ति । ४८. म - °रोपकार्यकारित्व° । ४९. [आ - मुद्रितावृत्तौ संसूचितः पाठः । कुत्रापि लिखितपुस्तकेषु नोपलभ्यते ।] । ५०. अ. आ. क. पा. इ. वा. म - प्राणिजातमन्ये । ५१. अ. आ. क. पा. इ. वा. म - ' सर्वम् ' नास्ति । ५२. शृ१ - अर्चयन्ति । ५३. म - आनृपचुः । ५४. म - सर्वत्रार्चनादि° । ५५. मै - क्रतो । ५६. उ - ' च ' नास्ति । ५७. मै - मन्त्र ।

ताभिर्मनसा स्तुवते न वा इमामश्वरथो नाश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमा९ सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ

ताभिः । मनसा । स्तुवते । न । वै । इमाम् । अश्वरथ इत्यश्व-रथः । न । अश्वतरीरथ इत्यश्वतरी-रथः । सद्यः । पर्याप्तुमिति परि-आप्तुम् । अर्हति । मनः । वै । इमाम् । सद्यः । पर्याप्तुमिति परि-आप्तुम् । अर्हति । मनः । परिभवितुमिति परि-भवितुम् । अथ ।

" परादिश्छन्दसि " (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् । [६४]अस्या यद्वस्तु [V]अर्चितारः पूजयन्ति जनाः [V]तत् [V]उभयम् अपि [V]आप्त्वा लब्ध्वा [V]अवरुध्य विधेयीकृत्य च [V]ते वयम्★ [V]उत्तिष्ठाम [६५]उच्छ्रिता भूयास्म [V]इति [६६]अनेन अभिप्रायेण सर्पराज्ञिया ऋग्भिः [६७]स्तुवन्ति । [६८]ते इत्यस्योत्तिष्ठामेत्यनेन संबन्धः । ' ताभिः ' [६९]इत्यादि ॥

हेतुमाह - ' न वा ' इत्यादि ॥ अश्वयुक्तो रथः अश्वतरीयुक्तो [V]वा [V]इमां पृथिवीं [V]सद्यः एव [V]पर्याप्तुं [७०]सर्वतोऽवाप्तुं नार्हति [V]मनः एव [V]अर्हति [७१-] तथा कर्तुं [७२-V]परिभवितुम् अतिव्याप्तुं [V]मनः एव [-७२] [V]अर्हति [-७१] तस्मात् [V]मनसा स्तोतव्यमिति । [७३]गर्दभेन वडवायामुत्पन्ना अश्वतरी अश्वादपि शीघ्रगामिनी । " वत्सोक्षाश्वर्षभेभ्यः " (पा ५.३.९१) इति ष्टरच् ॥

भूमेरुपरि [५८V]अर्चितारः [५९]तदुभयस्वरूपमपि स्तोतारो वयं प्राप्य तच्च स्वाधीनं कृत्वा पश्चात् [V]उत्तिष्ठाम [६०]इत्येवमेताभिर्ऋग्भिः स्तोतॄणामयमभिप्रायः ॥

ताभिर्मनसेति ॥ स्तोत्रान्तरेभ्यः कंश्चिद्विशेषं विधत्ते - ' ताभिर्मनसा स्तुवते न वा इमामश्वरथो नाश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमा९ सद्यः पर्याप्तुमर्हति मनः परिभवितुम् ' इति ॥ इतरैः स्तोत्रैर्वाचिकी स्तुतिः क्रियते । [V]ताभिः तु [६१]सार्पराज्ञीभिरत्र मानसग्रहस्य प्रवर्तमानत्वात् [V]मनसा स्तुतिं कुर्युः । तत्रायं हेतुरुच्यते - बलवद्भिरश्वैर्युक्तो [६२]रथः [V]अश्वरथः । अश्वतर्यः [६३]तु संकीर्णजातयोऽत्यन्तबलयुक्तास्ताभिर्युक्तः

६४. मै. मै१. मै२. मै३. अ - तस्याः । ★संभावितः पाठः । मै मुद्रितपुस्तके, सर्वेष्वपि लिखितपुस्तकेषु ' वशाम् ' इत्युपलभ्यते । ६५. मै२ - उत्थिता, मै१ - उद्धृत्य । ६६. अ - ' अनेन ' नास्ति । ६७. अ१ - स्तुवन्तु । ६८. मै. मै१. मै३. अ - तेभ्यः । ६९. मै१ - इत्याह । ७०. मै२ - सर्वतो व्याप्तुम् । ७१-७१. अ१ - ' तथा कर्तुं - - - - °र्हति ' नास्ति । ७२-७२. मै२ - परिभवितुमर्हवितिव्याप्तुं च न । ७३. मै२ - गदितेन गर्दभे° ।

५८. शृ१ . उ. पा. वै. इ. वा. म. मै - अर्चयितारः । ५९. मै - °रूपमपि ते । ६०. शृ१. मै - इत्ययमे°, म - इत्ययमेतावान् स्तोतृ° । ६१. आ. क. म. मै. वै - सर्पराज्ञी° । ६२. मै - ' रथः ' नास्ति । ६३. म - ' तु ' नास्ति ।

ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूꣳष्यथैतस्यैवान्तो नास्ति

ब्रह्म । वदन्ति । परिमिता इति परि-मिताः । वै । ऋचः । परिमितानीति परि-मितानि । सामानि । परिमितानीति परि-मितानि । यजूꣳषि । अथ । एतस्य । एव । अन्तः । न । अस्ति ।

'अथ' इत्यादि ॥ [V]अथ [७४]स्तोत्रान्ते शस्त्रारम्भे [V]ब्रह्म [७५][V]वदन्ति चतुर्होत्रं जपन्ति । " ब्रह्म वै चतुर्होतारः " (तैब्रा ३.१२.५) इति ब्राह्मणम् । सर्वेऽपि दशहोत्रादयश्चतुर्होतारः; यथोक्तम् - " दशहोता चतुर्होता पञ्चहोता षड्ढोता सप्तहोता । अथ कस्माच्चतुर्होतार उच्यन्ते " (तैसं २.३.१) इति । 'परिमिता वै' इत्यादि । ऋगादीनि [V]परिमितानि परिच्छिन्नानि, " गतिरनन्तरः " (पा ६.२.४९) इति गतेः प्रकृतिस्वरत्वम् । [V]ब्रह्म एव [७६-] अनन्तम् अपरिमितं [-७६] [V]तत् [V]प्रतिगृणते अध्वर्यवे होता [V]आचक्षीत [V]सः एव [V]प्रतिगरः भवति, न [७७]प्रतिगरोऽन्य इति ।

[V]अश्वतरीरथः । तयोरन्यतरोऽप्येकस्मिन्नेव दिने भूमिमिमां कृत्स्नां व्याप्तुं नार्हति । [V]मनः त्वेकस्मिन्नेव क्षणे [६४]सर्वां भूमिं व्याप्तुमर्हति । अनिष्टं [६५-] च सर्वं [-६५] तिरस्कर्तुमर्हति । तस्माद्भूमिविषयाभिर्ऋग्भिः मनसैव स्तोतव्यम् ॥

अथेति ॥ यदुक्तं सूत्रकारेण - " होता चतुर्होतॄन् व्याचष्टे " (आपश्रौ २१.१०.६) इति, तदिदं विधत्ते - ' अथ ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूꣳष्यथैतस्यैवान्तो नास्ति यद्ब्रह्म तत् प्रतिगृणत आचक्षीत स प्रतिगरः ' इति ॥ पूर्वोक्ताभिर्ऋग्भिः शंसनकाले यत्र यत्राध्वर्युः प्रतिगरं प्रयुङ्क्ते तत्र तत्र प्रतिगरकाले होता ब्रह्मशब्दाभिधेयं चतुर्होतृमन्त्रं ब्रूयात् । " ब्रह्म वै चतुर्होतारः " (तैब्रा ३.१२.५) इति श्रुत्यन्तरात् तस्य [६६]मन्त्रस्य ब्रह्मत्वम् । " पृथिवी होता द्यौरध्वर्युः " (तैआ ३.२) इत्यादिकम् आरण्यकाण्डाम्नातश्चतुर्होतृमन्त्रः । एतेन सर्वेऽपि होतृमन्त्रा उपलक्षिताः । अत एव सर्वेषां होतृमन्त्राणां पृथक्प्रतिगरं सूत्रकारो दर्शयति - "ओमिति दशहोतुः प्रतिगरस्तथेति चतुर्होतुरोमिति पञ्चहोतुस्तथेति [६७]षड्ढोतुररात्स्म होतरिति सप्तहोतुः " (आपश्रौ २१.१०.७) इति । शंसितुः प्रोत्साहजननं प्रतिगरः ।

७४. मै२ - अथोक्त । ७५. मै२ - 'वदन्ति' नास्ति । ७६-७६. मै२ - अनन्तपरिमितम् । ७७. मै२ - प्रतिगरार्हसाम्य ।

६४. शृ१. म. मै - ' सर्वाम् ' नास्ति । ६५-६५. म - तत्सर्वम् । ६६. शृ१ - ' मन्त्रस्य ' नास्ति । ६७. मै - ढोतुरवात्स्म ।

यद्ब्रह्म तत् प्रतिगृणत आचक्षीत स (४) प्रतिगरः ॥१॥

(व्याह स द्वंशीकवोऽर्चितारः स एकं च ।)

यत् । ब्रह्म । तत् । प्रतिगृणत इति प्रति-गृणते । एति । चक्षीत । सः (४) ।
प्रतिगर इति प्रति-गरः ॥१॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[७८]प्रतिगृणतेः " शतुरनुमः°" (पा ६.१.१७३) इति विभक्तेरुदात्तत्वम् । [७९-] प्रतिगरः थाथादिनोत्तरपदान्तोदात्तत्वम् [-७९] । शंसितुः प्रोत्साहनं प्रतिगरः ॥

॥ इति सप्तमे तृतीये प्रथमोऽनुवाकः ॥

तत्प्रतिगरविषयत्वेनारण्यकाण्डोक्ताः सर्वे दशहोत्रादिमन्त्रा [६८]होत्रा वक्तव्याः । तत्सर्वमत्र संगृह्य ' ब्रह्म वदन्ति ' इत्येतेन वाक्येन विधीयते । मन्त्रान्तरपरित्यागेन [६९]ब्रह्मण एव वदने हेतुरुच्यते - य ऋग्रूपा मन्त्रास्ते परिमिताः, [७०]क्वचित् क्वचिदेव [७१]प्रयोक्तव्यत्वात् । एवं यजुषां साम्नां च परिमितत्वम् । यत्तु ब्रह्मशब्दाभिधेयं होतृमन्त्रजातमेतस्यैवान्तःपरिमितत्वं नास्ति बहुषु प्रदेशेषु प्रयोक्तव्यत्वात् । [७२]तस्माद्ब्रह्मशब्दाभिधेयं होतृमन्त्रजातं Vप्रतिगृणते प्रतिगरार्थमुद्युक्तायाध्वर्यवे होता ब्रूयात् । सोऽयं होतृमन्त्रसंघः, प्रतिगीर्यत इति Vप्रतिगरः अध्वर्युकर्तृकायाः प्रतिगरणक्रियायाः कर्मभूत इत्यर्थः ॥

अत्र मीमांसा ।

दशमाध्यायस्य [७३]षष्ठपादे चिन्तितम् -

" मानसं किमहर्भिन्नमङ्गं वा दशमेऽहनि ।
भिन्नं स्तुत्यादिनाङ्गं [७४-] तद्विसर्गोक्त्यादिभिर्भवेत् " ॥ (जैन्या १०.६.१७)

द्वादशाहे मानसग्रहणं श्रूयते - " अनया त्वा पृथिव्याः पात्रेण समुद्रं रसया प्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृह्णाति " (आपश्रौ २१.१०.२) इति । अयमर्थः - पृथिवी पात्रं समुद्रः सोमस्तद्रसः

७८. मैर - 'प्रतिगृणतेः ' नास्ति । ७९-७९. मैर - प्रतिगरं थाथादिस्वरेणो° ।

६८. म - ' होत्रा ' नास्ति । ६९. अ. पा. इ. वा - ब्राह्मणः । ७०. वै - ' क्वचित् ' नास्ति । ७१. आ. क - प्रायोज्यत्वात्, उ. अ. पा. इ. वा. वै. म. मै - प्रयोज्यत्वात् । ७२. शृ१. उ. इ. वा. म - तस्मात्तद्ब्र° । ७३. आ. क. - °पादे त्रयोदशाधिकरणे । ७४-७४. वै - ' विसर्गोक्त्या - - - - साधनम् ' नास्ति ।

प्रजापतिर्देवता । एवं विशिष्टस्य ग्रहस्य ग्रहणे [७५]मनः साधनम् [७५] । तदिदं मानसमिति । [७६]एतच्च द्वादशभ्यः [७७]अहोभ्यो भिन्नमहस्त्रयोदशेऽहनि कर्तव्यो यागविशेषः, [७८]कुतः ? स्तुत्यादिभ्यः । मानसेन द्वादशाहस्य स्तुतिरेवमाम्नायते - " द्वादशाहस्य हृतरसानि च्छन्दांसि तानि मानसेनाऽऽप्याययन्ति " (द्र. तांब्रा ४.९.९) इति । स्तुतिसाधनं च मानसं स्तोतव्याद्भिन्नं भवितुं युक्तम् । तथा [७९]व्यपदेशभेदः [८०]अपि श्रूयते - " वाग्वै द्वादशाहो [८१]मनो मानसम् " (तैसं ७.४.५) इति । एवमाद्युपपत्तिभिर्भिन्नमहरिति प्राप्ते ब्रूमः - दशमस्याह्नोऽङ्गं तत्स्याद्विसर्गोक्त्यादिभ्यः । एष वै दशमस्याह्नो विसर्गो यन्मानसम्, इति विसर्गोक्तिः । इयं च [८२]दशमाहाङ्गत्वं गमयति । अहरनन्तरत्वे [८३]द्वादशाहसमाख्या [८४]च विरुध्यते । [८५]अङ्गभूतेनापि मानसेन [८६]स्तुतिव्यपदेशभेदादिकमुपपद्यते । तस्मादङ्गम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ॥

७५. उ. आ. पा. इ. वा. वै - तु न । ७६. मै - तच्च । ७७. म - होतृभ्यः । ७८. मै - कृतः । ७९. अ. इ. उ. पा. वा - अप्यपदेश° । ८०. शृ१. अ. इ. उ. म. वा. वै - 'अपि 'नास्ति । ८१. मै - मनो सा । ८२. मै - दशमासाङ्गत्वम् । ८३. आ - °समाररव्या ? । ८४. म - 'च 'नास्ति । ८५. मै - सङ्गभू° । ८६. अ. इ. उ. पा. वा - स्तुतिव्यपदेशो भेदा° ।

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाह्नर्त्विजां यजमानो वृङ्क्त इति तेज इन्द्रियमिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमाँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । किम् । द्वादशाहस्येति द्वादश-अहस्य । प्रथमेन । अह्ना । ऋत्विजाम् । यजमानः । वृङ्क्ते । इति । तेजः । इन्द्रियम् । इति । किम् । द्वितीयेन । इति । प्राणानिति प्र-अनान् । अन्नाद्यमित्यन्न-अद्यम् । इति । किम् । तृतीयेन । इति । त्रीन् । इमान् । लोकान् । इति । किम् । चतुर्थेन । इति । चतुष्पद इति चतुः-पदः । पशून् । इति ।

" द्वादशाहेन न याज्यम् " (तैसं ७.२.१०) इति यदुक्तं तत्र [1]हेत्वन्तरं चाह - 'ब्रह्मवादिनः' इत्यादि ॥ ऋत्विक्प्रतिषेधात् [2]-अहीन एव निषेधः-[2] । द्वादशाहसंबन्धिना Vप्रथमेन Vअह्ना [3]- ऋत्विजां संबन्धि -[3] Vकिं Vयजमानः Vवृङ्क्ते आदत्ते Vइति Vब्रह्मवादिनः पृच्छन्ति Vतेजः Vइन्द्रियं च वृङ्क्ते Vइति [4]- उत्तरं ब्रूयात् -[4] । एवं द्वितीयादिष्वपि द्रष्टव्यं प्रश्नः प्रतिवचनं च । अन्नस्यादनम् Vअन्नाद्यम् । छान्दसः क्यप् । Vचतुष्पदः " संख्यासुपूर्वस्य " (पा ५.४.१४०)

प्रथमेऽनुवाके द्वादशाहगतमविवाक्यमहः [1]प्रतिपादितम् ।

ब्रह्मवादिन इति ॥ अथ द्वितीये [2]प्रश्नोत्तराभ्यामहीने द्वादशाहे आर्त्विज्यनिन्दामुखेन तद्याजिनं यजमानं प्रशंसति - 'ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाह्नर्त्विजां यजमानो वृङ्क्त इति, तेज इन्द्रियमिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमांल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति कि९ षष्ठेनेति षड्तूनिति कि९ सप्तमेनेति सप्तपदा९ शक्वरीमिति किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृत९ स्तोममिति किं दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते ' इति ॥ अहीनस्य द्वादशाहस्यानुष्ठाता Vयजमानः ऋत्विजां संबन्धि

१. मै - होत्वन्तरम् । २-२. मै१. अ - ' अहीन - - - - निषेधः ' नास्ति । ३. मै. मै१. मै३. अ. अ१ - ऋत्विकूसंबन्धि । ४-४. अ१ - प्रतिब्रूयात् ।

१. अ. आ. क. पा. हा. इ. वा. वै. म. मै - प्रपञ्चितम् । २. म - °भ्यामहीने द्वादशाहः ।

किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति किꣳ षष्ठेनेति षडृतूनिति किꣳ सप्तमेनेति सप्तपदाꣳ शक्वरीमिति (१) किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतꣳ स्तोममिति किं दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति

किम् । पञ्चमेन । इति । पञ्चाक्षरामिति पञ्च-अक्षराम् । पङ्क्तिम् । इति । किम् । षष्ठेन । इति । षट् । ऋतून् । इति । किम् । सप्तमेन । इति । सप्तपदामिति सप्त-पदाम् । शक्वरीम् । इति (१) । किम् । अष्टमेन । इति । अष्टाक्षरामित्यष्टा-अक्षराम् । गायत्रीम् । इति । किम् । नवमेन । इति । त्रिवृतमिति त्रि-वृतम् । स्तोमम् । इति । किम् । दशमेन । इति । दशाक्षरामिति दश-अक्षराम् । विराजमिति वि-राजम् । इति । किम् । एकादशेन । इति । एकादशाक्षरामित्येकादश-अक्षराम् । त्रिष्टुभम् । इति ।

इति पादस्य लोपः [५-]समासान्तः " पादः[-५] पत् " (पा ६.४.१३०) इति [६]पद्भावः । Vपञ्चाक्षरां [७]पञ्चाक्षरपदाम् । ' एतावद्वा ' इत्यादि । Vयावत् [८]इदं तदनुक्रान्तम् इव यत् Vएव [९]हि तेषाम्

यच्छ्रेयोऽस्ति तत्सर्वं तैर्वर्जितं यथा भवति तथा स्वयं सर्वमादत्त [३]इत्येतमर्थं [४-] सिद्धवत्कृत्य केनाहर्विशेषेण कं फलविशेषमादत्त इत्येवं [-४] Vब्रह्मवादिनः पप्रच्छुः । तत्राभिज्ञः [५]कश्चित्तेज आदिकं क्रमेणाऽऽदत्त [६]इत्याद्युत्तरं ब्रूते । [७]पञ्चाक्षरपादोपेतं यत् पङ्क्तिच्छन्दस्तेन साध्यं फलं वृङ्क्ते । एवं तत्र तत्र यथायोगमुन्नेयम् ।

५-५. अ - ' समासान्तः पादः ' नास्ति । ६. मै. मै१. मै३. अ. अ१ - पत् । ७. मै२ - पञ्चाक्षरां पदाम् । ८. मै१ - इति । ९. मै२ - ' हि ' नास्ति ।

---

३. म - इत्येवमर्थम् । ४-४. म - °वत्कृत्यानेकाहर्विशेषेण किं फलमादत्त इत्येतमर्थम् , इ. क. वा. वै - ' °सिद्धव - - - - इत्येवम् ' नास्ति । ५. मै - °तेजसादिकम् । ६. [शृ१ लिखितपुस्तकमादृत्यास्माभिः शुद्धीकृतः पाठः ।] अ. आ. क. पा. हा. इ. वा. म - इत्युत्तरम् , शृ१ - इत्यादिकम् । ७. अ. आ. क. पा. हा. इ. वा. वै - °पादान्वितम् , उ - °पदान्वितम् ।

किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा
अस्ति यावदेतद्यावदेवास्ति
तदेषां वृङ्क्ते ॥२॥

(शक्वरीमित्येकचत्वारिꣳशच्च ।)

किम् । द्वादशेन । इति । द्वादशाक्षरामिति द्वादश-अक्षराम् । जगतीम् ।
इति । एतावत् । वै । अस्ति । यावत् । एतत् । यावत् ।
एव । अस्ति । तत् । एषाम् । वृङ्क्ते ॥२॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

[V]अस्ति [१०]यत् [V]यावत् च तेषाम् [V]अस्ति [V]तत् सर्वं [V]वृङ्क्ते द्वादशाहेन । [११-] तस्मात् द्वादशाहेन [-११] न याज्यमिति ॥

॥ इति सप्तमे तृतीये द्वितीयोऽनुवाकः ॥

एतैरुक्तैर्द्वादशभिर्वाक्यैः [V]यावत् [V]एतत् श्रेय उक्तमेतावदेवर्त्विजां विद्यमानं श्रेयः । अतः [V]यावत् [V]एषाम् [V]अस्ति तत्सर्वं यजमान आदत्ते ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥

१०. मै२ - 'यत्' नास्ति । ११-११. अ१ - 'तस्मात् द्वादशाहेन' नास्ति ।

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रः समानꣳ ह्येतदहर्यत् प्रायणीयश्चोदयनीयश्च त्र्यतिरात्रो भवति त्रय इमे लोका

एषः । वै । आप्तः । द्वादशाह इति द्वादश-अहः । यत् । त्रयोदशरात्र इति त्रयोदश-रात्रः । समानम् । हि । एतत् । अहः । यत् । प्रायणीय इति प्र-अयनीयः । च । उदयनीय इत्युत्-अयनीयः । च । त्र्यतिरात्र इति त्रि-अतिरात्रः । भवति । त्रयः । इमे । लोकाः ।

अथ द्वौ त्रयोदशरात्रौ । तत्रायं [1]प्रथमः अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोऽतिरात्रश्चत्वारश्छन्दोमा अतिरात्रश्चेति । इममधिकृत्योच्यते - 'एष वै' इत्यादि ॥ [V]एषः [V]आप्तः पूर्णः [2][V]द्वादशाहः [3]यत् [V]त्रयोदशरात्रः । कथमित्याह - [V]समानम् एकम् [V]एतत् [V]अहः [V]यत् प्रायणीयोदयनीयौ [4]- अतिरात्रद्वयम् । तस्माद्द्वादशाह -[4] एवायमिति द्वादशाहत्वेन स्तुतिः । [5]द्वादशानामह्नां [6]प्राप्त्यर्थमित्यर्थः ॥

'त्र्यतिरात्रः' इति ॥ अतिरात्रत्रयवानयं त्रयोदशरात्रः कर्तव्यः । [7]'यन्मध्येऽतिरात्रं कुर्युः' इति दोषवचनान्मध्ये तृतीयोऽतिरात्रः, आदावन्ते च अन्याविति गम्यते,

द्वितीये द्वादशाहयाजिनः प्रशंसाऽभिहिता । अथ तृतीये त्रयोदशरात्रोऽभिधीयते ।

एष वा इति ॥ [1]- तत्र कंचिद्विशेषं विधातुं प्रस्तौति -[1] - 'एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रः समानꣳ ह्येतदहर्यत् प्रायणीयश्चोदयनीयश्च' इति ॥ योऽयं [V]त्रयोदशरात्रः विधास्यमानः [V]एषः एव संपूर्णः [V]द्वादशाहः । [2]- पूर्वस्माद्द्वादशाहादेकदिनाधिक्ये सति -[2] केन साम्येन द्वादशाहत्वमिति चेत् [3]उच्यते- [V]प्रायणीयः [V]उदयनीयः [V]च [4]इत्येतदुभयं द्वादशाहे यादृशं तादृशमेवाऽत्राऽपीति द्विविधस्याह्नः समानत्वाद्द्वादशाहत्वोपचारः ॥

त्र्यतिरात्र इति ॥ अथ विशेषं विधत्ते - 'त्र्यतिरात्रो भवति त्रय इमे लोका एषां लोकानामाप्त्यै' इति ॥ द्वादशाहे प्रायणीयोदयनीयौ द्वावेवातिरात्रौ । [5]अत्र तु मध्येऽपि कश्चिदतिरात्रः । तेन

१. मै१ - प्रथमम् । २. मै२ - द्वादशाहम् । ३. मै. मै१. मै३. अ१ - यज्ञः, अ - 'यत्' नास्ति । ४-४. मै१ - °रात्रिद्वयं तस्माद्द्वा°, अ - रात्रि द्वादशाहः । ५. मै२ - द्वादशाहामह्नाम् । ६. मै२ - प्राप्त्यर्थम् । ७. मै१ - तन्मध्ये त्रिरात्रम् ।

१-१. अ. आ. इ. पा. हा. उ. वा. वै - 'तत्र - - - - प्रस्तौति' नास्ति । २-२. आ. क. मै. वै - °हादेकदिनाधिक्येन फलाधिक्याद्दिनाधिक्ये सति, अ. पा. हा. इ. वा - °हादेकादिनाधिक्येन फलाधिक्यदिनाधिक्ये° । ३. अ. आ. क. पा. हा. इ. वा. मै. वै - तदुच्यते । ४. अ. आ. क. पा. हा. इ. वा. वै - इत्युभयम् । ५. शृ१ - न ।

एषां लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं विद्वा९ँसस्त्रयोदशरात्रमासते तदाहुर्वाग्वा एषा वितता (१)

एषाम् । लोकानाम् । आप्त्यै । प्राण इति प्र-अनः । वै । प्रथमः । अतिरात्र इत्यति-रात्रः । व्यान इति वि-अनः । द्वितीयः । अपान इत्यप-अनः । तृतीयः । प्राणापानोदानेष्विति प्राणापान-उदानेषु । एव । अन्नाद्य इत्यन्न-अद्ये । प्रतीति । तिष्ठन्ति । सर्वम् । आयुः । यन्ति । ये । एवम् । विद्वा९ँसः । त्रयोदशरात्रमिति त्रयोदश-रात्रम् । आसते । तत् । आहुः । वाक् । वै । एषा । वितेति वि-तता (१) ।

लोकत्रयसाम्यात् । तत्र चाष्टममहरतिरात्रः कार्यः, पृष्ठ्ये षडहे समावृत्त इति वेदितव्यम् [8]‘त्रयः’ इत्यादि गतम् [8] (तैसं २.४.११) ॥

‘प्राणो वै’ इत्यादि ॥ व्यानग्रहणं [9]प्राणापानव्यतिरिक्तसर्वप्राणवृत्त्युपलक्षणार्थम् । ‘प्राणापानोदानेषु’ इत्यादि । अत्राप्युदानग्रहणं पूर्ववदुपलक्षणार्थम् । अयमर्थः प्राणापानयोः उदानादिषु च तत्कार्ये च [10]अन्नाद्ये प्रतितिष्ठन्ति । [11]गतमन्यत् ॥

लोकत्रयप्राप्तिः । [6]अत्राहःक्लृप्तिं सूत्रकारो दर्शयति - “अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोऽतिरात्रश्चत्वारश्छन्दोमा अतिरात्रः” (आपश्रौ २३.१.९) इति । यद्यपि चतुर्विंशश्चतुश्चत्वारिंशाष्टाचत्वारिंशाख्यास्त्रय एव छन्दोमा विद्यमानास्तथाप्यन्ताल्लोपो [7]वृद्धिर्वेति न्यायेनाष्टाचत्वारिंशस्य [8]आवृत्त्या चतुःसंख्या पूरणीया ॥

प्राणो वै इति ॥ अथ त्रयोदशरात्रं विधत्ते - ‘प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रतितिष्ठन्ति सर्वमायुर्यन्ति य एवं विद्वा९ँसस्त्रयोदशरात्रमासते’ इति । व्यानेनोदानादीनामप्युपलक्षितत्वादुदानेनोपसंहारो [9]न विरुद्धः ॥

तदाहुरिति ॥ योऽयं [10]मध्यमोऽतिरात्रस्तत्र छन्दोमानामधस्तात् सूत्रकारः शाखान्तरानुसारेण स्थानं निर्दिदेश । तदिदं दूषयित्वा छन्दोमानामुपरिस्थानं विधत्ते - ‘तदाहुर्वाग्वा एषा वितता यद्द्वादशाहस्तां

८-८. मै२ - तं प्रत्यादि मम । ९. मै२ - °रिक्तसमस्तप्राण° । १०. मै१ - अन्नाद्ये च । ११. मै२ - ‘गतमन्यत्’ नास्ति ।

६. म - तत्राहः° । ७. शृ१. उ. इ. मै. म - विवृद्धिर्वेति । ८. मै - आहरणीया । ९. हा - ‘न’ नास्ति । १०. अ. आ. क. पा. हा. इ. उ. वा. वै. म - °तिरात्रस्तस्य ।

यद्द्वादशाहस्तां वि च्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक् स्यादुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति

यत् । द्वादशाह इति द्वादश-अहः । ताम् । वीति । छिन्द्युः । यत् । मध्ये । अतिरात्रमित्यति-रात्रम् । कुर्युः । उपदासुकेत्युप-दासुका । गृहपतेरिति गृह-पतेः । वाक् । स्यात् । उपरिष्टात् । छन्दोमानामिति छन्दः-मानाम् । महाव्रतमिति महा-व्रतम् । कुर्वन्ति । संततामिति सं-तताम् । एव । वाचम् । अवेति । रुन्धते । अनुपदासुकेत्यनुप-दासुका । गृहपतेरिति गृह-पतेः । वाक् । भवति ।

'तदाहुः' इत्यादि ॥ [V]द्वादशाहः [12]नाम [V]वाक् [V]वितता सन्तता तत्र यदि [V]मध्ये [13]अतिरात्रः स्यात् [14]वाग्विच्छेदः स्यात् ततश्च [V]गृहपतेः [V]वाक् [V]उपदासुका क्षयशीला [V]स्यात् । छान्दस उकञ् । तस्मात् [V]छन्दोमानाम् [V]उपरिष्टात् अविवाक्येन सह महाव्रतधर्माणमतिरात्रं [V]कुर्वन्ति, न मध्ये, [V]सन्तताम् अविच्छिन्नां [V]वाचम् अवरुन्धे । [15]ततः [V]गृहपतेः च [V]वाक् [V]अनुपदासुका [V]भवति ॥

विच्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक् स्यादुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति' इति ॥ योऽयं [V]द्वादशाहः अस्ति सोऽयं [11-] विस्तीर्णवाक्स्वरूपः । तत्रत्येष्वहःसु विद्यमानानां स्तोत्रशस्त्राणामविच्छेदस्य प्रकृतिभूते तस्मिन् द्वादशाहे क्लृप्तत्वात् । एवं च सति षडहस्य [12-] च्छन्दोमानां च [-12] [V]मध्ये यदि कश्चिदन्यः सर्वस्तोमोऽतिरात्रोऽनुष्ठीयेत तदानीं द्वादशाहगतां क्लृप्तां संततां वाचमनुष्ठातारः [V]विच्छिन्द्युः । तथा सति यजमानस्य [V]वाक् उपक्षयशीला [V]स्यात् । अतस्तत्परिहाराय [V]छन्दोमानाम् उपरि यदविवाक्यमहर्द्वादशाहगतं तदेवाहः सर्वस्तोमातिरात्ररूपं कुर्यात् । तस्मिंश्च महाव्रतधर्मातिदेशाभिप्रायेण महाव्रतशब्दप्रयोगः । एवमुपरिष्टादनुष्ठाने सति [V]संतताम् [V]एव [V]वाचं प्राप्नोति । न तु यजमानस्य [V] वाक् उपक्षीयते ॥

पशवो वा इति ॥ तदेवोपरिष्टादनुष्ठानं प्रकारान्तरेण प्रशंसति - 'पशवो वै छन्दोमा अन्नं महाव्रतं

१२. अ१ - 'नाम' नास्ति । १३. मै१ - त्रिरात्रः । १४. मै१ - वाग्विछिन्ना । १५. मै२ - 'ततः' नास्ति ।

११. शृ१ - विस्तीर्णवाक्स्वरूपः, उ. पा. अ. इ. वा. वै - विस्तीर्णताकस्वरूपः, हा - विस्तीर्णतास्वरूपः । १२. म - छन्दोमानीव ।

पशवो वै छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति ॥३॥

(विततां त्रिचत्वारिꣳशच्च ।)

पशवः । वै । छन्दोमा इति छन्दः-माः । अन्नम् । महाव्रतमिति महा-व्रतम् । यत् । उपरिष्टात् । छन्दोमानामिति छन्दः-मानाम् । महाव्रतमिति महा-व्रतम् । कुर्वन्ति । पशुषु । च । एव । अन्नाद्य इत्यन्न-अद्ये । च । प्रतीति । तिष्ठन्ति ॥३॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

किञ्च - ‘ पशवो वै छन्दोमाः ’ इत्यादि ॥ तत्साधनत्वात्ताच्छब्द्यम् । व्याख्याताः Vछन्दोमाः Vमहाव्रतं च । एवमुभयत्र विधानादुभयत्र च फलश्रुतेर्विकल्पः - पृष्ठानां वोपरि स्यात् [१६-]Vछन्दोमानां वेति [-१६] ॥

॥ इति सप्तमे तृतीये तृतीयोऽनुवाकः ॥

यदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति ’ इति ॥ सत्सु प्रथमं पशुषु पश्चाद्घृतक्षीरादिरूपमन्नाद्यं युक्तम् । तस्मादन्नरूपस्य महाव्रतधर्मकस्यातिरात्रस्योपरिष्टादेवानुष्ठानं [१३]न्याय्यम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः ॥

१६-१६. मैर - छन्दोमा न भवति ।

१३. आ - न्यायम् ।

आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै त उभयोर्लोकयोराध्नुवन्नस्मि१ँश्चामुष्मि१ँश्च य एवं विद्वा१ँसश्चतुर्दशरात्रमासत उभयोरेव लोकयो - र्ऋध्नुवन्त्यस्मि१ँश्चामुष्मि१ँश्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै

आदित्याः । अकामयन्त । उभयोः । लोकयोः । ऋध्नुयाम । इति । ते । एतम् । चतुर्दशरात्रमिति चतुर्दश-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । उभयोः । लोकयोः । आर्ध्नुवन् । अस्मिन् । च । अमुष्मिन् । च । ये । एवम् । विद्वा१ँसः । चतुर्दशरात्रमिति चतुर्दश-रात्रम् । आसते । उभयोः । एव । लोकयोः । ऋध्नुवन्ति । अस्मिन् । च । अमुष्मिन् । च । चतुर्दशरात्र इति चतुर्दश-रात्रः । भवति । सप्त । ग्राम्याः । ओषधयः । सप्त । आरण्याः । उभयीषाम् । अवरुद्ध्या इत्यव-रुद्ध्यै ।

त्रयश्चतुर्दशरात्रास्तत्रायं प्रथमोऽतिरात्रः पृष्ठ्यः षडहः आवृत्तः । पृष्ठ्यः षडहोऽतिरात्र इति ॥ तं विदधाति ' आदित्याः ' इत्यादि ॥ [१]सप्तग्राम्यावरोधः ॥

तृतीयेऽनुवाके त्रयोदशरात्रोऽभिहितः । अथ चतुर्थे चतुर्दशरात्रोऽभिधीयते ॥

आदित्या इति ॥ तमेतं विधत्ते - ' आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै त उभयोर्लोकयोराध्नुवन्नस्मि१ँश्चामुष्मि१ँश्च य एवं विद्वा१ँसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मि१ँश्चामुष्मि१ँश्च ' इति ॥

चतुर्दशरात्र इति ॥ तत्राह्नां संख्यां प्रशंसति - ' चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्तारण्या उभयीषामवरुद्ध्यै ' इति ॥ [V]ग्राम्याः च [V]आरण्याः चासकृद्व्याख्याताः ॥

यदिति ॥ प्रायणीयोदयनीययोर्मध्यवर्तीनि द्वादशसंख्याकान्यहानि विधत्ते - ' यत् पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति '

---

१. मै१ - °ग्राम्याभ्यामवरोधः ।

यत् पराचीनानि पृष्ठानि(१) भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रिꣳशौ मध्यतः स्तोमौ भवतः

यत् । पराचीनानि । पृष्ठानि (१) । भवन्ति । अमुम् । एव । तैः । लोकम् । अभीति । जयन्ति । यत् । प्रतीचीनानि । पृष्ठानि । भवन्ति । इमम् । एव । तैः । लोकम् । अभीति । जयन्ति । त्रयस्त्रिꣳशाविति त्रयः-त्रिꣳशौ । मध्यतः । स्तोमौ । भवतः ।

'यत्पराचीनानि' इत्यादि ॥ [2-] ऊर्ध्वमुखानि त्रिवृदादीनि [-2] त्रयस्त्रिंशान्तानि [V]पृष्ठानि [V]भवन्ति । तस्मात् [V]तैः [V]अमुं [V]लोकम् [3][V]अभिजयन्ति । तस्मात्तदनन्तरं [4-] मध्ये समृद्धत्वात् [-4] [V]प्रतीचीनानि प्रत्यङ्मुखानि [5]त्रयस्त्रिंशादीनि त्रिवृदन्तानि [V]पृष्ठानि [V]भवन्ति तस्मात् [V]तैः [V]इमं मनुष्यलोकम् [V]अभिजयन्ति एव । [6]एवं त्रयस्त्रिंशास्तोमौ [V]मध्यतः मध्यमौ दिवसौ

इति ॥ रथन्तरबृहद्वैरूपवैराजशाक्वररैवतसामसाध्यैः [1]पृष्ठस्तोत्रैरुक्तान्यहानि [V]पृष्ठानि इत्युच्यन्ते । तेषामुक्तोऽनुक्रमः पराचीनत्वं, विपरीतक्रमः प्रतीचीनत्वम् । तेन द्वैविध्येन [2]लोकद्वयप्राप्तिः ॥

त्रयस्त्रिंशाविति ॥ [3]एतमेव [4]आरोहावरोहप्रकारं पुनः प्रशंसति - 'त्रयस्त्रिꣳशौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्ति' इति ॥ त्रिवृत्पञ्चदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिꣳश इत्येष स्तोमानां [5-] षट्सु अहःसु आरोहक्रमः [-5] । त्रयस्त्रिꣳशस्त्रिणव एकविंशः सप्तदशः पञ्चदशस्त्रिवृदित्ययमवरोहक्रमः । एवं च सत्येषु द्वादशस्वहःसु [6-] मध्ये षष्ठसप्तमयोरह्नोर्नैरन्तर्येण [-6]

२-२. मै२ - ऊर्ध्वानि मुखानि क्तादीनि । ३. मै१. अ - जयन्तीत्येव, मै२ - जयत्येव । ४-४. मै३ - 'मध्ये समृद्धत्वात्' नास्ति । ५. अ१ - त्रयस्त्रिंशानीत्यादि, मै२ - त्रयस्त्रिंशानि च । ६. मै१ - एवं च, मै२ - 'एवम्' नास्ति ।

---

१. इ - पृथुस्तोत्रै° । २. शृ१ - लोकद्वयं तत्र प्राप्तिः । ३. शृ१ - एवमेव । ४. उ. इ - आरोहप्रकारम् , म - आरोहणावरोहणप्रकारम् । ५-५. अ. आ. क. पा. हा. इ. वा. वै - षट्स्विहारो° । ६-६. शृ१ - मध्ये षष्ठमयो° ।

साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥४॥

(पृष्ठानि चतुस्त्रि॰शच्च ।)

साम्राज्यमिति साम्-राज्यम् । एव । गच्छन्ति । अधिराजावित्यधि-रात्रौ । भवतः । अधिराजा इत्यधि-राजाः । एव । समानानाम् । भवन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । परिगृहीत्या इति परि-गृहीत्यै ॥४॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[७]सप्तमाष्टमौ [V]भवतः । तेन [V]साम्राज्यं [V]गच्छन्ति । [८-] मध्ये समृद्धत्वात् [-८] । यस्मादेवं [९]तस्माच्चतुर्दशरात्रयाजिनः [V]अधिराजाः स्वामिनः [१०][V]समानानां [V]भवन्ति समानैः परिगृहीता भवन्ति ॥

॥ इति सप्तमे तृतीये चतुर्थोऽनुवाकः ॥

त्रयस्त्रिंशस्तोमौ संपद्येते । तेन च यजमानाः [V]साम्राज्यं [V]गच्छन्ति । किञ्चैतावन्त्येषां स्तोमानाम् [७-][V]अधिराजौ अर्वाचीनानां [८]तत्रान्तर्भावात् । अतो यजमानाः सर्वेषामन्येषाम् [V]अधिराजाः [V]भवन्ति ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयावहर्विशेषौ विधत्ते [-७] - 'अतिरात्रावभितो भवतः परिगृहीत्यै ' इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥

७. मै२ - सप्तमाष्टमे वा । ८-८. मै१ - ' मध्ये समृद्धत्वात् ' नास्ति । ९. मै२ - °चतुर्दशरात्रयावधिराजौ । १०. मै१ - समानानाम् इति ।

७-७. इ - °अधिराज - - - - विधत्ते ' नास्ति । ८. म - तत्रान्तर्धानात् ।

प्रजापतिः सुवर्गं लोकमैत् तं देवा अन्वायन् तानादित्याश्च पशवश्चान्वायन् ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतं चतुर्दशरात्रं प्रत्यौहन्

प्रजापतिरिति प्रजा-पतिः । सुवर्गमिति सुवः-गम् । लोकम् । ऐत् । तम् । देवाः । अन्विति । आयन् । तान् । आदित्याः । च । पशवः । च । अन्विति । आयन् । ते । देवाः । अब्रुवन् । यान् । पशून् । उपाजीविष्मेत्युप-अजीविष्म । ते । इमे । अन्वाग्मन्नित्यनु-आग्मन् । इति । तेभ्यः । एतम् । चतुर्दशरात्रमिति चतुर्दश-रात्रम् । प्रतीति । औहन् ।

अथ द्वितीयश्चतुर्दशरात्रो विधीयते - 'प्रजापतिः' इत्यादि ॥ अत्रेयमहःक्लृप्तिः - अतिरात्रो ज्योतिर्गौरायुः । पृष्ठ्यः षडहः, [1]आयुर्गौर्ज्योतिरतिरात्र इति । [2V]प्रजापतिः [3]स्वर्गमगच्छत् । [4V]तं [5-V]देवाः [V]आदित्याः[5] [V]पशवः च अन्वगच्छन् । [V]ते [V]देवाः [V]अब्रुवन् [V]यान् [V]पशून् [V]उपाजीविष्म [V]ते अप्यमी अस्मान् [V]अन्वाग्मन् अन्वागच्छन्ति । छान्दसे लुङि " मन्त्रे घस°" (पा २.४.८०) इति च्लेर्लुक् । " गतिर्गतौ " (पा ८.१.७०) इति [6]निघाताभावः, समासश्च । तत्रादित्याः स्वर्गं गच्छन्तु , [V]इमे तु पशवः सर्वभूतोपजीव्या अस्मिन्नेव लोके ऋद्धिमन्तः

चतुर्थेऽनुवाके एकश्चतुर्दशरात्रोऽभिहितः ॥ अथ पञ्चमेऽन्यश्चतुर्दशरात्रोऽभिधीयते ॥

प्रजापतिरिति ॥ [1]तमेतं विधातुं प्रस्तौति - 'प्रजापतिः सुवर्गं लोकमैत् तं देवा अन्वायन् तानादित्याश्च पशवश्चान्वायन् ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतं चतुर्दशरात्रं प्रत्यौहन् त आदित्याः पृष्ठैः सुवर्गं लोकमारोहन् त्र्यहाभ्यामस्मिँल्लोके पशून् प्रत्यौहन् पृष्ठैरादित्या अमुष्मिँल्लोक आर्ध्नुवन् त्र्यहाभ्यामस्मिँल्लोके पशवः ' इति ॥ यदा [V]प्रजापतिः स्वर्गं गतस्तदा [2]तं प्रजापतिमनु सर्वेऽपि [3V]देवाः गताः । [V]तान् देवाननु पश्चात् [V]आदित्याः [V]पशवः [V]च गताः । तानादित्यान् पशूनुभयविधान् दृष्ट्वा [V]ते [V]देवाः परस्परमिदम् [V]अब्रुवन् [V]यान् पशून् उपेत्य मनुष्यैः सहिता सर्वे वयम् अजीविष्म [V]ते पशवः

---

१. अ१ - °ज्योतिरात्रः । २. मै२ - प्रजापतिम् । ३. मै२ - °मगच्छन्तम् । ४. मै१. अ - 'तम्' नास्ति । ५-५. मै२ - देवाः तान् आदित्याश्च । ६. मै१ - निघातः, [" गतिर्गतौ " (पा ८.१.७०) इत्यनेन प्राप्तस्य निघातस्याभावः । 'न्वा' इत्यस्योदात्तत्वम् ।] ।

---

१. इ. वा - तमेवम् ; अ. आ. क. पा. हा. वै - तमेव । २. अ. आ. क. पा. हा. इ. वा. वै - 'तं' नास्ति । ३. हा - देवताः ।

चतुर्दशरात्रयोः विधिः]

त आदित्याः पृष्ठैः सुवर्गं लोकमाऽरोहन् त्र्यहाभ्यामस्मिँल्लोके पशून् प्रत्यौहन् पृष्ठैरादित्या अमुष्मिँल्लोक आर्ध्नुवन् त्र्यहाभ्यामस्मिं(१)ल्लोके पशवो

ते । आदित्याः । पृष्ठैः । सुवर्गमिति सुवः-गम् । लोकम् । एति । अरोहन् । त्र्यहाभ्यामिति त्रि-अहाभ्याम् । अस्मिन् । लोके । पशून् । प्रतीति । औहन् । पृष्ठैः । आदित्याः । अमुष्मिन् । लोके । आर्ध्नुवन् । त्र्यहाभ्यामिति त्रि-अहाभ्याम् । अस्मिन् (१) । लोके । पशवः ।

[७-] कार्याः । अत्र [-७] पृष्ठवानेव [८]चतुर्दशरात्र [९]आदित्यानां स्वर्गगमनहेतुः, पश्वर्थं [१०]तु यतितव्यमिति कृताध्यवसाया देवाः तेभ्यः पशुभ्यः Vचतुर्दशरात्रं Vप्रत्यौहन् प्रत्यावृत्त्य गतिमकुर्वन्, प्रथमत्रिरात्रं कृत्वा ततः पृष्ठानन्तरं भूयोऽपि तत्रैव त्रिरात्रे प्रत्यवरोहणं [११]प्रत्यूहः । [१२]ततश्चतुर्दशरात्रमकुर्वन् पशूनां प्रत्यवरोहणाय । अवयवधर्मेण समुदायव्यपदेशः, यथा अवयवव्यूढतया द्वादशाहो व्यूढः । तत्र [१३]Vआदित्याः देवसकाशं समासादितचतुर्दशरात्राः Vपृष्ठैः एव पृष्ठवत्तयैव स्वर्गम् Vआरोहन् । Vपशून् तु Vअस्मिन् एव Vलोके Vत्र्यहाभ्यां [१४-] प्रत्यावृत्त्य अस्मान् [-१४] देवाः Vप्रत्यौहन् प्रत्यावर्तयन् । Vपृष्ठैः एव Vआदित्याः Vअमुष्मिन् Vआर्ध्नुवन् । Vत्र्यहाभ्यां यथोक्तलक्षणाभ्याम् Vअस्मिन् Vपशवः आर्ध्नुवन्नित्येव ॥

सर्वेऽप्यस्माकं पृष्ठत एव समागताः । आगतानामादित्यानां पशूनां च मध्ये आदित्याः स्वर्गम् आरोहन्तु, पशवः प्रतिनिवृत्य भूमौ गच्छन्तु, तत्र क उपाय इति विचार्य Vएतं Vचतुर्दशरात्रं प्रत्यावृत्तिगुणयुक्तमनुष्ठितवन्तः । तत्रेयमहःक्लृप्तिः - आदावेकोऽतिरात्रः । ततो ज्योतिर्गौरायुरित्यारोहरूपस्त्रिरात्रः । ततः पृष्ठ्यः षडहः । तत आयुर्गौर्ज्योतिरित्यवरोहरूपस्त्रिरात्रः । ततोऽतिरात्र इति । तस्मिन्ननुष्ठिते सति पृष्ठशब्दाभिधेयैः षड्भिरहोभिः Vआदित्याः स्वर्गम् Vआरोहन् । प्रत्यावृत्तियुक्ताभ्यां Vत्र्यहाभ्यां देवाः Vपशून् Vअस्मिन् Vलोके [४]प्रतिनिवर्तितवन्तः । तत्र Vआदित्याः Vपृष्ठैः स्वर्गं [५]प्राप्य समृद्धिं गताः । Vपशवः तु Vत्र्यहाभ्याम् Vअस्मिन् Vलोके समृद्धिं गताः ॥

७-७. अ१ - अत्र कार्या, मै१ - कार्या । ८. मै१ - चतुर्दशातिरात्रः । ९. मै२ - आदित्यानाम् आदित्यानाम् । १०. मै१. मै२ - 'तु' नास्ति । ११. मै२ - प्रत्यूहम् । १२. मै२ - °रात्रकुर्वन् । १३. मै१. अ - 'आदित्याः' नास्ति । १४-१४. मै१ - प्रत्यावृत्तिमद्भ्याम् ।

---

४. म - प्रवर्तितवन्तः । ५. शृ१ - प्राप्यते; अ. आ. क. पा. हा. इ. वा. म - प्राप्य तत्र ।

[चतुर्दशरात्रयोः विधिः

य एवं विद्वा२ँ संश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मि२ँश्चामुष्मि२ँश्च पृष्ठैरेवामुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिँल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति

ये । एवम् । विद्वा२ँसः । चतुर्दशरात्रमिति चतुर्दश-रात्रम् । आसते । उभयोः । एव । लोकयोः । ऋध्नुवन्ति । अस्मिन् । च । अमुष्मिन् । च । पृष्ठैः । एव । अमुष्मिन् । लोके । ऋध्नुवन्ति । त्र्यहाभ्यामिति त्रि-अहाभ्याम् । अस्मिन् । लोके । ज्योतिः । गौः । आयुः । इति । त्र्यह इति त्रि-अहः । भवति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि-आरोहन्ति ।

'य एवम्' इत्यादि ॥ गतम् ॥

कः पुनरसौ [15]त्र्यह इत्याह - '[16]ज्योतिः' इत्यादि ॥

कः पुनरस्य विशेष इत्याह - 'इयं [17]वाव' इत्यादि ॥ 'इमान्' इति । इमम् [V]अन्तरिक्षम् अमुं च प्रत्यूहेन पुनरिमां प्राप्य ऋद्धा भवन्ति । 'यदन्यतः' इत्यादि । [V]यत् [V]अन्यतः एकतः [V]पृष्ठानि [V]स्युः [18]सामर्थ्यादेकतस्त्र्यहाविति गम्यते । [19-] तत् [V]विविवधं [-19] [V]स्यात् । [20]उभयतोवलम्बक्षीरादिवहनयन्त्रविशेषो विवधः, तद्विरुद्धं स्यात् विषमं स्यात्, एकतोल्पं भारं

य एवमिति ॥ [6]तदिदानीं विधत्ते - 'य एवं विद्वा२ँसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मि२ँश्चामुष्मि२ँश्च पृष्ठैरेवामुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिँल्लोके' इति ॥

ज्योतिरिति ॥ अथाऽऽरोहरूपं प्रथमं त्र्यहं विधत्ते - 'ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति' इति ॥ [7]ज्योतिष्टोमगोष्टोमायुष्टोमरूपा अहर्विशेषा मिलित्वा [V]त्र्यहः । तेन च त्रित्वसाम्यात् लोकत्रयप्राप्तिर्भवति ॥

यदन्यत इति ॥ अथ षडहगतान्यहानि विधत्ते - 'यदन्यतः पृष्ठानि स्युर्विविवध२ँ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते' इति ॥ विवधशब्देनोभयतः

---

१५. मै१ - त्रिरात्रः । १६. मै१. अ. अ१ - ज्योतिर्गौरायुः । १७. मै१. मै२. अ१ - वा, अ - वा यदन्यतम । १८. मै. मै२. मै३. अ. अ१ - °स्त्र्यहाविति । १९. मै१ - तद्विवधम्, अ - तद्विविधम्, अ१ - तद्विधम् । २०. मै२ - उभयत्येवलम्बकठषिराद्विहन(?)यत्रविशेषः ।

---

६. अ. पा. इ. वा. म - इदानीम् । ७. म - ज्योतिष्टोमस्य; हा - ज्योतिष्टोमानुष्टोमरूपा ।

चतुर्दशरात्रयोः विधिः]

यदन्यतः पृष्ठानि स्युर्विविवधः स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौ(२)जो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो

यत् । अन्यतः । पृष्ठानि । स्युः । विविवधमिति वि-विवधम् । स्यात् । मध्ये । पृष्ठानि । भवन्ति । सविवधत्वायेति सविवध-त्वाय (२) । ओजः । वै । वीर्यम् । पृष्ठानि । ओजः । एव । वीर्यम् । मध्यतः । दधते । बृहद्रथंतराभ्यामिति बृहत्-रथंतराभ्याम् । यन्ति । इयम् । वाव । रथंतरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति ।

एकतो महाभारमिति । [२१]तस्मात् ^V^मध्ये ^V^पृष्ठानि ^V^भवन्ति सामर्थ्यादभितस्त्र्यहाविति गम्यते । ^V^सविवधत्वाय विवधसदृशत्वाय [२२]समभारत्वायेति यावत् । सहशब्दस्य सादृश्येऽव्ययीभावः । " अव्ययीभावे चाकाले " (पा ६.३.८१) इति सभावः । ' ओजो वै ' इत्यादि गतम् ॥

शिक्योपेतः क्षीराज्यादिवाही काष्ठविशेष उच्यते । तस्य चोभयतो भारः समानः । एवं सत्यत्रायं पृष्ठ्यः षडहः आदावन्ते वा यद्येकस्मिन् पार्श्वे भवेत् तदा [८]भारद्वयसाम्याभावाद्विविवधलक्षणमिदं कर्म स्यात् । [९]अतो [१०]विवधसदृशत्वाय पृष्ठाख्यान्यहानि मध्ये कर्तव्यानि । [११]किञ्चैतानि ^V^पृष्ठानि शरीरबलस्येन्द्रियसामर्थ्यस्य च हेतुत्वात् [१२]तद्रूपाणि । तस्मात् तेषां मध्यतोऽनुष्ठाने सति ^V^ओजः ^V^वीर्यं च मध्ये धृतं भवति ॥

बृहदिति ॥ अथ तेष्वहःसु चोदकप्राप्तानि [१३]वैरूपवैराजादिसामान्यपवदितुं विधत्ते - ' बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति ' इति ॥ प्रथमतृतीयपञ्चमेष्वहःसु रथन्तरसाम्ना पृष्ठस्तोत्रं निष्पादनीयम् । [१४] द्वितीयचतुर्थषष्ठेष्वहःसु बृहत्साम्नेति विवेकः । अवशिष्टं वाक्यम् " साध्या वै देवाः सुवर्गकामाः " (तै.सं.७.२.१) इत्यस्मिन्ननुवाके व्याख्यातम् ॥

---

२१. मै२ - तस्याम् । २२. मै१ - संभारत्वाये°, मै२ - समाहारत्वाये° ।

---

८. उ. हा. म - °भवद्विविधविलक्षणम् , शृ१. फ. इ. वा - भवद्विवधविलक्षणम् , अ - भवद्विविविधलक्षणम् । ९. म - ' अतः ' नास्ति । १०. उ. अ - विविधसा° । ११. शृ१ - ' किञ्चैतानि ' नास्ति । १२. म - ' तद्रूपाणि ' नास्ति । १३. हा. वा - ' वैरूपवैराजादिसामान्यपवदितुम् ' नास्ति । १४-१४. उ - ' द्वितीय° - - - - विधत्ते ' नास्ति ।

अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या(३) उभयोर्लोकयोर्ऋध्वोत्तिष्ठन्ति

अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । पराञ्चः । वै । एते । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । ये । पराचीनानि । पृष्ठानि । उपयन्तीत्युप-यन्ति । प्रत्यङ् । त्र्यह इति त्रि-अहः । भवति । प्रत्यवरूढ्या इति प्रति-अवरूढ्यै । अथो इति । प्रतिष्ठित्या इति प्रति-स्थित्यै (३) । उभयोः । लोकयोः । ऋद्ध्वा । उदिति । तिष्ठन्ति ।

' बृहद्रथन्तराभ्याम् ' इत्यादि ॥ दिवसेषु एकान्तराभ्यां Vयन्ति । गतमन्यत् (तैसं ७.२.१) ' पराञ्चः' इत्यादि । अपुनरावृत्ता एव स्वर्गं गच्छन्ति, [२३]पराचीनपृष्ठोपयानात् । " विभाषाञ्चेरदिक्स्त्रियाम् " (पा ५.४.८) इति खः । तस्मात् Vप्रत्यङ् [२४]प्रतीचीनगतिः द्वितीयस्त्र्यहः Vभवति, आयुर्गौर्ज्योतिरिरिति । Vप्रत्यवरूढ्यै प्रत्यवरोहणाय आत्मनो भवति । पृथिव्यामवरोहणाय प्रतिष्ठार्थं च भवति । उभयत्र " तादौ च° " (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । [२५]एवम् Vउभयोः Vलोकयोः ऋद्धिं प्राप्य Vउत्तिष्ठन्ति ॥

पराञ्च इति ॥ [१५]अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते [१४] - ' पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति ' इति ॥ ये यजमाना अनुक्रमगतानि पृष्ठाख्यान्यहान्यनुतिष्ठन्ति [१६]एते यजमानाः प्रत्यावृत्तिरहिताः स्वर्गमारोहन्ति । अतः स्वर्गात् प्रत्यवरोहाय प्रत्यावृत्य आयुर्गौर्ज्योतिरित्येवंविधस्त्र्यहः कर्तव्यः । अपि [१७]चायं Vत्र्यहः अस्मिँल्लोके प्रतिष्ठायै संपद्यते । तस्मात् Vउभयोः अपि Vलोकयोः समृद्धिं प्राप्योत्कर्षेण तिष्ठन्ति ॥

---

२३. मै१ - °पृष्ठोपायनात् । २४. मै२ - प्रतीचीनमिति । २५. अ१ - ' एवम् ' नास्ति ।

---

१५. शृ१ - ' अथ ' नास्ति । १६. हा - ' एते ' नास्ति । १७. हा - वायम् ।

चतुर्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमवं रुन्धते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥५॥

(आर्ध्नुवन्त्यहाभ्यामस्मिन्त्संविवधत्वाय प्रतिष्ठित्या एकत्रिꣳशच्च ।)

चतुर्दशेति चतुः-दश । एताः । तासाम् । याः । दश । दशाक्षरेति दश-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजेति वि-राजा । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । याः । चतस्रः । चतस्रः । दिशः । दिक्षु । एव । प्रतीति । तिष्ठन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । परिगृहीत्या इति परि-गृहीत्यै ॥५॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

'चतुर्दशैताः' इत्यादि ॥ Vएताः चतुर्दशरात्र्यः Vतासां मध्ये Vयाः Vदश ताभिः [26]दशत्वान्वयात् [27]विराडात्मकान्नलाभः । Vयाः ततः पराः Vचतस्रः ताभिश्चतुष्ट्वान्वयात् Vदिक्षु प्रतिष्ठिता भवन्ति । Vअतिरात्रौ Vअभितः Vभवतः उभयलोकवेदिभिः परिग्रहाय ॥

॥ इति सप्तमे तृतीये पञ्चमोनुवाकः ॥

चतुर्दश इति ॥ अहर्गतां संख्यां प्रशंसति - 'चतुर्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठन्ति' इति ॥ चतुर्दशरात्रक्रतुगता या रात्रयः Vएताः चतुर्दशसंख्याकाः Vतासां मध्ये Vयाः रात्रयो दशसंख्याकास्ताभिः संख्यासाम्यात् विराड्द्वाराऽन्नप्राप्तिः । यास्तूपरिष्टाच्चतस्रो रात्रयस्ताभिः संख्यासाम्यात् चतुर्दिक्षु Vप्रतितिष्ठन्ति ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवतः परिगृहीत्यै' इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥

२६. मैर - दशतान्वयात् । २७. मैर - विराडात्मकलाभः ।

इन्द्रो वै सदृङ्देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वाꣳसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति

इन्द्रः । वै । सदृङ्ङिति स-दृङ् । देवताभिः । आसीत् । सः । न । व्यावृतमिति वि-आवृतम् । अगच्छत् । सः । प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् । पञ्चदशरात्रमिति पञ्चदश-रात्रम् । प्रेति । अयच्छत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । अन्याभिः । देवताभिः । व्यावृतमिति वि-आवृतम् । अगच्छत् । ये । एवम् । विद्वाꣳसः । पञ्चदशरात्रमिति पञ्चदश-रात्रम् । आसते । व्यावृतमिति वि-आवृतम् । एव । पाप्मना । भ्रातृव्येण । गच्छन्ति ।

अथ चत्वारः पञ्चदशरात्रा भवन्ति । तत्र द्वौ छन्दोमवन्तौ, तत्र [1]छन्दोमवतोरप्येकः [2]सत्राहीनात्मना [3]पुनरतिरात्रादिः, यथा त्रिवृदग्निष्टोमो ज्योतिर्गौरायुस्त्रयो द्वादशाहस्य दशाहान्यतिरात्र इति । इतरः सत्रमेवोभयतोऽतिरात्रः, यथाऽतिरात्रो ज्योतिर्गौरायुस्त्रयो [4]द्वादशाहस्य दशाहान्यतिरात्र [5]इति । एतदिदानीं विदधाति - 'इन्द्रो वै' इत्यादि ।

पञ्चमे द्वितीयश्चतुर्दशरात्रोऽभिहितः । अथ षष्ठे पञ्चदशरात्रोऽभिधीयते ॥

इन्द्र इति ॥ तमेतं विधत्ते - 'इन्द्रो वै सदृङ् देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं प्रायच्छत् तमाहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वाꣳसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ' इति ॥ देवस्वामित्वार्हः [1]अपि [V]इन्द्रः स्वामित्वमलभमानोऽन्याभिः [V]देवताभिः समान एव [V]आसीत् । [V]न तु व्यावृत्तिं प्राप्तवान् । ततः [2-V]प्रजापतिं गत्वा [-2] प्रजापत्युपदेशात् [V]पञ्चदशरात्रम् अनुष्ठाय व्यावृत्तिं [3]प्राप्नोत् । तद्वदन्येऽपि तमनुष्ठाय [V]पाप्मना [V]भ्रातृव्येण च व्यावृत्ता भवन्ति ॥

---

१. मै२ - °वतोरेकः । २. मै. मै१. मै३. अ. अ१ - °हीनात्मा । ३. मै१ - अनतिरात्राभिः । ४. मै१. अ१ - दशाहस्य । ५. मै१. अ१ - इति एतदित्यादि ।

---

१. म - 'अपि' नास्ति । २-२. शृ१. म - 'प्रजापतिं गत्वा' नास्ति । ३. शृ१ - प्राप्नोति ।

ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं (१) गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्त्यसत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति

ज्योतिः । गौः । आयुः । इति । त्र्यह इति त्रि-अहः । भवति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् (१) । गौः । असौ । आयुः । एषु । एव । लोकेषु । प्रतीति । तिष्ठन्ति । असत्रम् । वै । एतत् । यत् । अछन्दोममित्यछन्दः-मम् । यत् । छन्दोमा इति छन्दः-माः । भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः-मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः । छन्दोमा इति छन्दः-माः । ओजसि । एव । वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति ।

इन्द्रः अन्याभिः देवताभिः सदङ् सम आसीत् । "दृक्सवः स्वतवसाम्" (पा ७.१.८३) इति नुमि "क्विन्प्रत्ययस्य कुः" (पा ८.२.६२) इति कुत्वम् । सः व्यावृतं व्यावृत्तिं वैलक्षण्यं [६-]न अगच्छत् [-६] । वृतेः संपदादिलक्षणः क्विप् । 'स प्रजापतिम्' इत्यादि । गतम् (तैसं ७.२.५) । 'ज्योतिः' इत्यादि । व्याख्यातम् (तैसं ७.३.५) ॥

ज्योतिरिति ॥ तत्रैकं त्र्यहं विधत्ते - 'ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति' इति ॥

असत्रमिति ॥ अथ चतुरश्छन्दोमान् पृष्ठ्यं षडहं च विधत्ते - 'असत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरवरुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्यं पशुषु प्रति तिष्ठन्ति' इति ॥ नात्र छन्दोमरहितस्य सत्रत्वनिषेधे तात्पर्यं, किन्तु छन्दोमवतः प्रशंसायां [४]तात्पर्यम् । [५-] अत एतस्य छन्दोमसत्त्वे [-५] सति प्रशस्तं सत्रं भवति । किञ्च पृष्ठसंज्ञकैरहोभिः देवताः प्राप्नुवन्ति । छन्दोमैः चतुर्भिः पशून् प्राप्नुवन्ति । किञ्च पृष्ठानां षण्णामह्नामोजोवीर्यरूपत्वाच्छन्दोमानां चतुर्णामह्नां पशुरूपत्वाच्च [६]तदनुष्ठानेन ओज आदिषु प्रतितिष्ठन्ति । तस्मात् पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येतानि दशाहान्यनुष्ठेयानीत्यर्थः ॥

६-६. अ१ - अवगच्छत् ।

४. शृ१ - मत्यर्थम् । ५-५. म - तस्य छन्दोगत्वे; आ - °मवत्वे । ६. अ. आ. क. पा. हा. इ. वा - तदनुष्ठानेनोभे ।

पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यतिरात्रावभितो भवत इन्द्रियस्य (२) परिगृहीत्यै ॥६॥

(अन्तरिक्षमिन्द्रियस्यैकं च ।)

पञ्चदशरात्र-इति पञ्चदश-रात्रः । भवति । पञ्चदश इति पञ्च-दशः । वज्रः । वज्रम् । एव । भ्रातृव्येभ्यः । प्रेति । हरन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । इन्द्रियस्य (२) । परिगृहीत्या इति परि-गृहीत्यै ॥६॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'असत्रम्' इत्यादि ॥ [७]नेदमच्छन्दोमस्य सत्रस्य प्रतिषेधार्थम्, अपि [८]तु छन्दोमवतः प्रशंसार्थं, छन्दोमवतः सकाशे [V]अच्छन्दोमं सत्रव्यपदेशं नार्हतीति । [V]ओजसि [९-V]एव [V]वीर्ये [V]पशुषु [१०]च [११-V]प्रतितिष्ठन्ति प्रतिष्ठां [१२-] गच्छन्ति [-११] । 'पञ्चदशरात्रः' इति [-१२] । छन्दोमविधिः । 'पञ्चदशो वज्रः' इति । वीर्यवत्त्वात् । 'अतिरात्रौ' इत्यादि । गतम् । (तैसं ७.३.५) इन्द्रियपरिग्रहो विशेषः ॥

॥ इति सप्तमे तृतीये षष्ठोनुवाकः ॥

पञ्चदशरात्र इति ॥ [७]अथ [८]क्रतुगतामहःसंख्यां प्रशंसति - 'पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति' इति ॥ पञ्चदशस्तोमस्य हिंसाहेतुत्वाद्वज्रत्वम् । तद्धेतुत्वं च होतृब्राह्मणे समाम्नातम् - "तं पञ्चदशस्तोमो मध्यत उदतृणत्" (तैब्रा २.२.३) इति । [९]एतत् संख्यासाम्येन पञ्चदशरात्रस्यापि वज्ररूपत्वात् तदनुष्ठातारो भ्रातृव्येभ्यो वज्रं प्रहरन्त्येव ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै' इति ॥ अस्य क्रतोरिन्द्रेणानुष्ठितत्वादत्रेन्द्रियपरिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ॥

७. मै२ - नेदमहीनस्य । ८. मै२ - यत् । ९. मै. मै१. मै२. मै३. अ - 'एव' नास्ति । १०. मै. मै१. मै३. अ. अ१ - 'च' नास्ति । ११-११. मै१ - प्रतितिष्ठति गच्छति । १२-१२. अ. अ१ - 'गच्छन्ति - - - - इति' नास्ति ।

७. म - 'अथ' नास्ति । ८. शृ१. आ - अहःसंख्या । ९. म - 'एतत्' नास्ति ।

इन्द्रो वै शिथिल इवाप्रतिष्ठित आसीत् सोऽसुरेभ्योऽबिभेत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं वज्रं प्रायच्छत् तेनासुरान् पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता

इन्द्रः । वै । शिथिलः । इव । अप्रतिष्ठित इत्यप्रति-स्थितः । आसीत् । सः । असुरेभ्यः । अबिभेत् । सः । प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् । पञ्चदशरात्रमिति पञ्चदश-रात्रम् । वज्रम् । प्रेति । अयच्छत् । तेन । असुरान् । पराभाव्येति परा-भाव्य । विजित्येति वि-जित्य । श्रियम् । अगच्छत् । अग्निष्टुतेत्यग्नि-स्तुता ।

---

[1]अथ [2]छन्दोमवान् पञ्चदशरात्रयोरेकतरः पृष्ठावृत्तिमानितरः त्र्यहावृत्तिमान् । तयोर्द्वितीयं विदधाति - ' इन्द्रो वै शिथिल इव ' [3]इत्यादि ॥ इन्द्रः शिथिलः इव वित्तेन दुर्बल इव आसीत् । हेतुमाह - अप्रतिष्ठितः हतराज्यः । 'सोऽसुरेभ्यः' इत्यादि । गतम् (तैसं ७.३.६) । ' पञ्चदशरात्रं वज्रम् ' इति । वज्रसादृश्यमसुराणां मारणत्वात् । तेन असुरान् पराभाव्य अभिभूय विजित्य [4]सेनादिकमपहृत्य तत् श्रियं [5]राज्यमपि तेषाम् अगच्छत् [6]प्राप्नोत् ॥

षष्ठेऽनुवाके प्रथमः पञ्चदशरात्रोऽभिहितः । अथ सप्तमे द्वितीयः पञ्चदशरात्रोऽभिधीयते ॥

इन्द्र इति ॥ तमेतं विधत्ते – ' इन्द्रो वै शिथिल इवाप्रतिष्ठित आसीत् सोऽसुरेभ्योऽविभेत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं वज्रं प्रायच्छत् तेनासुरान् पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्नधत्त ' इति ॥ इन्द्रः कदाचित् शिथिलः योद्धुमसमर्थः सेनारहितः एकाकी दरिद्रः इव एकत्रावस्थातुमसुरोपद्रवरहितं स्थानमलभमानः आसीत् । सः असुरेभ्यः भीतः सन् प्रजापत्युपदेशाद्वज्रसमानं वक्ष्यमाणं [1-] पञ्चदशरात्रं क्रतुमनुष्ठाय [-1] तेन तान् असुरान् पराभूतान् कृत्वा स्वयं विजित्य श्रियम् [2]आप्नोत् तस्मिन् क्रतौ यदिदमग्निष्टुदाख्यं द्वितीयमहस्तेन स्वशैथिल्यहेतुं पाप्मानं निर्दग्धवान् । अवशिष्टेन पञ्चदशरात्रक्रतुभागेन बलहेतुमोजोरूपं सप्तमधातुं [3]शारीरं बलम् इन्द्रियपाटवं युद्धे विजयोत्साहं च स्वस्मिन् संपादितवान् ॥

---

१. मै२ - ' अथ ' नास्ति । २. मै२ - छन्दोमयाः । ३. मै२ - इत्यादिरेतः । ४. मै१ - सेनानीकम् । ५. मै२ - राष्ट्रमिति । ६. मै२ - अप्राप्नोत् ।

१-१. अ. आ. क. पा. हा. इ. वा. बै - °दशरात्रक्रतुं । २. शृ१ - प्राप्नोत् । ३. उ - शरीरम् ।

पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्नधत्त य एवं विद्वाꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं नि(१)र्दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन् दधत एता एव पशव्याः पञ्चदश वा अर्धमासस्य

पाप्मानम् । निरिति । अदहत । पञ्चदशरात्रेणेति पञ्चदश-रात्रेण । ओजः । बलम् । इन्द्रियम् । वीर्यम् । आत्मन् । अधत्त । ये । एवम् । विद्वाꣳसः । पञ्चदशरात्रमिति पञ्चदश-रात्रम् । आसते । भ्रातृव्यान् । एव । पराभाव्येति परा-भाव्य । विजित्येति वि-जित्य । श्रियम् । गच्छन्ति । अग्निष्टुतेत्यग्नि-स्तुता । पाप्मानम् । निरिति (१) । दहन्ते । पञ्चदशरात्रेणेति पञ्चदश-रात्रेण । ओजः । बलम् । इन्द्रियम् । वीर्यम् । आत्मन् । दधते । एताः । एव । पशव्याः । पञ्चदशेति पञ्च-दश । वै । अर्धमासस्येत्यर्ध-मासस्य ।

'अग्निष्टुता' इति ॥ सर्वाग्नेयस्त्रिवृदेकाहविशेषः [V]अग्निष्टुत् । तेन द्वितीयेनाह्ना [V]पाप्मानं निरदहत् । [V]पञ्चदशरात्रेण समुदायेन तत्सहितेन ओज आदिचतुष्टयम् आत्मनि [V]अधत्त अधारयत् । 'य एवम्' इत्यादि । गतम् । 'एताः एव पशव्याः' [७]इत्यादि । [८-V]एताः [V]पञ्चदशरात्रयः [-८] [९]ओजआदिप्रदत्वात् [V]पशव्याः पशुभ्यो [१०]हिता भवन्ति । गवादिभ्यो यत् (गणपाठ १४४, पा ५.१.२) । यद्वा - पशूनां प्राप्तिनिमित्तानि । "गोद्व्यचः॰" (पा ५.१.३९) इति यत् ॥

य एवमिति ॥ [४-] वेदनं प्रशंसति - 'य एवं विद्वाꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं निर्दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन् दधते' इति [-४] ॥ इन्द्रवदन्येऽपि यजमानाः फलं प्राप्नुवन्ति ॥

एता इति ॥ एतस्मिन् क्रतौ विद्यमानाः पञ्चदशसंख्याका रात्रीः प्रशंसति - 'एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरं पशवोऽनु प्र जायन्ते तस्मात् पशव्याः' इति ॥ अस्मिन् क्रतौ या रात्रयः [V]एताः पशुभ्यो हितास्तत्प्राप्तिहेतुत्वात् । कथमिति तदुच्यते - एकस्य

७. अ१. मै२ - इति । ८-८. मै२ - 'एताः पञ्चदशरात्रयः' नास्ति । ९. मै२ - ०दत्वात् एता एव पञ्चदशरात्रयः । १०. अ१ - हिता हीना ।

४-४. शृ१. उ. म - 'वेदनं - - - - इति' नास्ति ।

रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरं पशवोऽनु प्र जायन्ते तस्मात् पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरः सुवर्गो लोकस्तस्मात् सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो

रात्रयः । अर्धमासश इत्यर्धमास-शः । संवत्सर इति सं-वत्सरः । आप्यते । संवत्सरमिति सं-वत्सरम् । पशवः । अनु । प्रेति । जायन्ते । तस्मात् । पशव्याः । एताः । एव । सुवर्ग्या इति सुवः-ग्याः । पञ्चदशेति पञ्च-दश । वै । अर्धमासस्येत्यर्ध-मासस्य । रात्रयः । अर्धमासश इत्यर्धमास-शः । संवत्सर इति सं-वत्सरः । आप्यते । संवत्सर इति सं-वत्सरः । सुवर्ग इति सुवः-गः । लोकः । तस्मात् । सुवर्ग्या इति सुवः-ग्याः । ज्योतिः । गौः । आयुः । इति । त्र्यह इति त्रि-अहः ।

इदानीं सङ्ख्यातोऽपि स्तौति - 'पञ्चदश' इत्यादि ॥ [V]अर्धमासशः अर्धमासेनार्धमासेन । " सङ्ख्यैकवचनाच्च°" (पा ५.४.४३) इति शस् । [V]सुवर्ग्याः सुवर्गाय हिताः स्वर्गप्राप्तेर्वा निमित्तानि एताः [V]पञ्चदश [V]रात्रयः [११]त्रिवृदादयः । [१२]पूर्ववद्यत् (पा ५.१.३९) । 'ज्योतिः' इत्यादि । व्याख्यातम् (तैसं ७.३.५) । अत्रेयमहःक्लृप्तिः - अतिरात्रस्त्रिवृदग्निष्टुत् [V]ज्योतिः [V]गौः [V]आयुः पृष्ठ्यः [१३]षडहः [V]प्रत्यङ् [V]त्र्यहः [V]आयुः [V]गौः ज्योतिरतिरात्र इति ॥

[V]अर्धमासस्य [V]पञ्चदश [V]रात्रयः सन्ति । स चार्धमासः क्रमेण वर्तमानः संवत्सरत्वमापद्यते । [V]पशवः च [५]संवत्सरमात्रं गर्भे स्थित्वा [६]पश्चात् प्रजायन्ते । [V]तस्मात् ताः रात्रयः संख्याद्वारा पशुहेतुभूताः ॥

एता इति ॥ पुनरपि प्रकारान्तरेण प्रशंसति - ' एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरः सुवर्गो लोकस्तस्मात् सुवर्ग्याः ' इति ॥ [७] पूर्वोक्तरीत्या संख्याद्वारा [८] संवत्सरसंपत्तौ सत्यां स [८] संवत्सरो वसन्तकालीनज्योतिष्टोमानुष्ठानद्वारा स्वर्गप्राप्तिहेतुः । [V]तस्मात् एताः रात्रयः स्वर्गाय हिताः[७] ॥

११. अ१. मै१ - ०दादयः पञ्चदशरात्रयः, मै२ - 'त्रिवृदादयः' नास्ति । १२. मै२ - पूर्ववत् । १३. मै२ - षडहम् ।

५. शृ१ - संवत्सरत्वमात्रम् । ६. अ. आ. क. पा. हा. बा - 'पश्चात्' नास्ति । ७-७. इ - 'पूर्वोक्त° - - - - हिताः' नास्ति । ८-८. म - 'संवत्सरसंपत्तौ सत्यां सः' नास्ति ।

भवतीयं वाव ज्योतिरन्तरिक्षं(२) गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध९ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी

भवति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् (२) गौः । असौ । आयुः । इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि-आरोहन्ति । यत् । अन्यतः । पृष्ठानि । स्युः । विविवधमिति वि-विवधम् । स्यात् । मध्ये । पृष्ठानि । भवन्ति । सविवधत्वायेति सविवध-त्वाय ।
ओजः । वै । वीर्यम् । पृष्ठानि । ओजः । एव । वीर्यम् । मध्यतः । दधते ।
बृहद्रथंतराभ्यामिति बृहत्-रथंतराभ्याम् । यन्ति । इयम् । वाव ।
रथंतरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति ।
अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति ।
वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी ।

'यदन्यतः' इत्यादि ॥ तस्मात् त्र्यहयोः [V]मध्ये पृष्ठ्यः पडहः ॥

'बृहद्रथन्तराभ्याम्' इत्यादि ॥ [१४]व्याख्यातम् (तैसं ७.३.५) ।

[१५]पराञ्चः'[१६] इत्यादि ॥ द्वितीयस्य त्र्यहस्य प्रत्यक्त्वविधानं व्याख्यातमेव (तैसं ७.३.५) ॥

ज्योतिरिति ॥ अथाहर्विशेषा [९]विधातव्याः । तत्राग्निष्टुदाख्यमेकमहः स्तुत्यैवोन्नीतविधिकमिति द्रष्टव्यम् । 'अग्निष्टुता पाप्मानं [१०] निरदहत्' इति स्तुतिः पूर्वमुदाहृता । [११]अत ऊर्ध्वं त्र्यहं विधत्ते - 'ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकनभ्यारोहन्ति' इति । पूर्ववद्व्याख्येयम् ॥

यदन्यत इति ॥ [१२] अथ [१३]पृष्ठ्यषडहगतान्यहानि विधत्ते - 'यदन्यतः पृष्ठानि स्युर्विविवध९स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथन्तराभ्यां यन्तीयं वाव

१४. मैर - व्यक्तम् । १५. मैर - परोवतु । १६-१६. मैर - 'इत्यादि - - - - भवतः' नास्ति ।

९. म - विहितः । १०. अ. आ. पा. इ. बा. म - निरदहत । ११. शृ१. अ. क. पा. हा. इ. वा - ततः, म - तत्र । १२-१२. उ - 'अथ - - - - °व्याख्येयम्' नास्ति । १३. म - षडहगतानि, शृ१ - पृष्ठ्यषडहानि ।

स्रुती ताभ्यामेव सुवर्गं लोकं(३)यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋध्वोत्तिष्ठन्ति पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते

स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् (३) । यन्ति । पराञ्चः । वै । एते । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । ये । पराचीनानि । पृष्ठानि । उपयन्तीत्युप-यन्ति । प्रत्यङ् । त्र्यह इति त्रि-अहः । भवति । प्रत्यवरूढ्या इति प्रति-अवरूढ्यै । अथो इति । प्रतिष्ठित्या इति प्रति-स्थित्यै । उभयोः । लोकयोः । ऋद्ध्वा । उदिति । तिष्ठन्ति । पञ्चदशेति पञ्च-दश । एताः । तासाम् । याः । दश । दशाक्षरेति दश-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजेति वि-राजा । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते ।

---

[१७] पञ्चदशैताः ' इत्यादि ॥ इदानीं सङ्ख्याविशेषान्वयेन अवयवस्तुतिः । ' पञ्च दिशः' इत्यादि । ऊर्ध्वया सह । Vअतिरात्रौ Vअभितः Vभवतः इन्द्रियादिचतुष्टयस्य लाभाय भवतः [-१६] ॥

॥ इति सप्तमे तृतीये सप्तमोऽनुवाकः ॥

रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति ' इति ॥ एतदपि पूर्ववद्व्याख्येयम् [-१२] ॥

पराञ्च इति ॥ आरोहरूपस्त्र्यहः पूर्वं विहितः । इदानीमवरोहरूपं त्र्यहं विधत्ते - ' पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति ' इति ॥ एतदपि पूर्ववद्व्याख्येयम् ॥

पञ्चदश इति ॥ अथ क्रतुगतां रात्रिसंख्यां प्रशंसति - ' पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते या पञ्च पञ्च दिशः दिक्ष्वेव प्रति तिष्ठन्ति ' इति ॥ ऊर्ध्वया सह दिशां पञ्चत्वम् । अन्यत् पूर्ववद्व्याख्येयम् ॥

---

१७. अ१ - पक्षञ्चदशैताः ।

याः पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै (४) पशूनां परिगृहीत्यै ॥७॥

(गच्छन्त्यग्निष्टुता पाप्मानं निरन्तरिक्षं लोकं प्रजायै द्वे च ।)

याः । पञ्च । पञ्च । दिशः । दिक्षु । एव । प्रतीति । तिष्ठन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । इन्द्रियस्य । वीर्यस्य । प्रजाया इति प्र-जायै (४) । पशूनाम् । परिगृहीत्या इति परि-गृहीत्यै ॥७॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

अतिरात्राविति ॥ प्रायणीयोदयनीयौ विधत्ते - ' अतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै पशूनां परिगृहीत्यै ' इति ॥ इन्द्रेणानुष्ठितत्वादिन्द्रियहेतुत्वं वज्ररूपत्वाच्च वीर्यहेतुत्वं, [१४]पशव्यत्वस्य च पूर्वमुक्तत्वात् तस्य चोपलक्षणत्वात् प्रजापशुहेतुत्वम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥

---

१४. म - पशव्यस्य ।

प्रजापतिरकामयतान्नादः स्यामिति स एत९ँ सप्तदशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वा९ँसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः संवत्सर

प्रजापतिरिति प्रजा-पतिः । अकामयत । अन्नाद इत्यन्न-अदः । स्याम् । इति । सः । एतम् । सप्तदशरात्रमिति सप्तदश-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । अन्नाद इत्यन्न-अदः । अभवत् । ये । एवम् । विद्वा९ँसः । सप्तदशरात्रमिति सप्तदश-रात्रम् । आसते । अन्नादा इत्यन्न-अदाः । एव । भवन्ति । पञ्चाह इति पञ्च-अहः । भवति । पञ्च । वै । ऋतवः । संवत्सर इति सं-वत्सरः ।

अथ सप्तदशरात्रो विधीयते - ‘ प्रजापतिरकामयत ’ इत्यादि ॥ गतम् । तस्य चैतान्यहानि - अतिरात्रो ज्योतिर्गौरायुः पञ्चाहो द्वादशाहस्य दशाहान्यतिरात्र इति । [1]‘ पञ्चाहः ’ इति [1] । कानि पुनरिमान्यहानि ? - “ आभिप्लविकानामयमविच्छेदः ” इत्याचार्यः । तत्र वचनसामर्थ्यात् प्राकृतान्यपि पृष्ठ्याहानि गृह्यन्ते । [2]अभिप्लवषडहस्याद्यानि पञ्च गृह्यन्ते । कानि पुनस्तानि ? ज्योतिरग्निष्टोमो रथन्तरसामा [3]प्रथमः, गौरुक्थ्यो बृहत्सामा द्वितीयः, आयुरुक्थ्यो रथन्तरसामा तृतीयः, गौरुक्थ्यो बृहत्सामा चतुर्थः, आयुरुक्थ्यो रथन्तरसामा

सप्तमे द्वितीयः पञ्चदशरात्रोऽभिहितः । अथाष्टमे सप्तदशरात्रोऽभिधीयते ॥

प्रजापतिरिति ॥ तमेतं विधत्ते - ‘प्रजापतिरकामयतान्नादः स्यामिति स एत९ँ सप्तदशरात्रमपश्यत् तमाऽऽहरत् तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वा९ँसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति ’ इति ॥

पञ्चाह इति ॥ अथैतदीयेष्वहःसु ज्योतिर्गौरायुरित्येवंविधमह्नां [1]पञ्चकं विधत्ते - ‘ पञ्चाहो भवति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते ’ इति ॥ द्विरावृत्ते त्र्यहे [2]द्वितीयज्योतिर्वर्जितः अवशिष्टः पञ्चाहः । हेमन्तशिशिरयोरेकीभावादृतूनां पञ्चत्वम् ॥

१-१. अ. मै१ - ‘पञ्चाहः इति ’नास्ति । २. मै२ - °स्यान्यानि । ३. मै२ - ‘प्रथमः ’नास्ति ।

१. म - पञ्चमम् । २. उ. अ. इ. वा - ज्योतिर्वज्रतः°, पा - ज्योतिर्वर्जतः ।

ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धतेऽसत्रं वा एत(१)द्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति

ऋतुषु । एव । संवत्सर इति सं-वत्सरे । प्रतीति । तिष्ठन्ति । अथो इति । पञ्चाक्षरेति पञ्च-अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति । रुन्धते । असत्रम् । वै । एतत् (१) । यत् । अछन्दोममित्यछन्दः-मम् । यत् । छन्दोमा इति छन्दः-माः । भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः-मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः । छन्दोमा इति छन्दः-माः । ओजसि । एव । वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति । सप्तदशरात्र इति सप्तदश-रात्रः । भवति । सप्तदश इति

पञ्चमः [4]इति । ज्योतिरग्निष्टोमो बृहत्सामा षष्ठः, [5]स तु त्यज्यते । 'पञ्च वै' इत्यादि । गतम् (तैसं ७.१.१८) । हेमन्तशिशिरयोरेकत्वात् पञ्चत्वम् । [V]अथो अपि च [6]पञ्चत्वान्वयेन [7]पाङ्क्तयज्ञावरोधः । [8]पङ्क्तिप्रभवत्वाद्वा [9]धानादिपञ्चकसाधनत्वाद्वा [10]पाङ्क्तत्वं यज्ञस्य । [11]पङ्क्तिशब्द उत्सादिरित्युक्तम् (गणपाठ ५२, पा ४.१.८६) ॥

'असत्रं वै' इत्यादि ॥ व्याख्यातम् (तैसं ७.३.६) । तेन [12]पञ्चाहादुपरि द्वादशाहीयो दशरात्रो [13]विधीयते ॥

असत्रमिति ॥ अथ पृष्ठ्यं षडहं [3]चतुरश्छन्दोमांश्च विधत्ते - 'असत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति' इति ॥ पूर्ववद्व्याख्येयम् ॥

सप्तदशरात्र इति ॥ [4]ऋतुगतां रात्रिसंख्यां प्रशंसति - 'सप्तदशरात्रो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्यै' इति ॥ आश्रावयेत्यादिसप्तदशाक्षरात्मकत्वात् प्रजापतेः सप्तदशत्वम् ॥

---

४. मै१ - 'इति' नास्ति । ५. मै१ - 'सः' नास्ति । ६. अ - °त्वान्वयात्, मै२ - °त्वान्वये । ७. मै२ - °यज्ञाविरोधः । ८. मै२ - °प्रधानत्वाद्वा । ९. मै२ - °पञ्चसाधन° । १०. मै२ - पञ्चत्वम् । ११. मै२ - शब्दः । १२. मै२ - पञ्चाशदुपरिपरित्वात् । १३. मै. मै१. मै३. अ. अ१ - गृह्यते ।

---

३. उ. इ - चतस्र°, म - तत्° । ४. आ - ऋतुगतान् ।

सप्तदशः प्रजापतिः प्रजापतेराप्त्यां अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥८॥

(एतत् सप्तत्रिꣳशच्च ।)

~~~~~~~~~~

सप्त-दशः । प्रजापतिरिति प्रजा-पतिः । प्रजापतेरिति प्रजा-पतेः । आप्त्यै । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । अन्नाद्यस्येत्यन्न-अद्यस्य । परिगृहीत्या इति परि-गृहीत्यै ॥८॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

~~~~~~~~~~

'सप्तदशरात्रः' इत्यादि ॥ सप्तदशस्य प्रजासाधनत्वात् [V]सप्तदशः [V]प्रजापतिः । अतिरात्राभ्याम् [V]अन्नाद्यस्य परिग्रहः, अन्नाद्यकामो हि प्रजापतिः [१४]अन्नाद्यर्हतीति ॥

॥ इति सप्तमे तृतीये अष्टमोऽनुवाकः ॥

~~~~~~~~~~

अतिरात्राविति ॥ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै' इति ॥ [V]अन्नाद्यस्य फलत्वं विधिवाक्ये स्पष्टम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके अष्टमोऽनुवाकः ॥

~~~~~~~~~~

१४. मै - अन्नाद्यङ्गतेति [मै - तलटिप्पण्याम् अन्नाद्यहतेति (अन्नाद्यहेतुरिति ?)] ।

सा विराड्विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभय९ सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता विं९शति९ रात्रीरपश्यन् ततो वै त उभय९ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं विद्वा९स एता

सा । विराडिति वि-राट् । विक्रम्येति वि-क्रम्य । अतिष्ठत् । ब्रह्मणा । देवेषु । अन्नेन । असुरेषु । ते । देवाः । अकामयन्त । उभयम् । समिति । वृञ्जीमहि । ब्रह्म । च । अन्नम् । च । इति । ते । एताः । विं९शतिम् । रात्रीः । अपश्यन् । ततः । वै । ते । उभयम् । समिति । अवृञ्जत । ब्रह्म । च । अन्नम् । च । ब्रह्मवर्चसिन इति ब्रह्म-वर्चसिनः । अन्नादा इत्यन्न-अदाः । अभवन् । ये । एवम् । विद्वा९सः । एताः ।

अथ विंशतिरात्र आरभ्यते - 'सा विराट्' इत्यादि ॥ या द्वादशाहीया [1]दशाक्षरा Vविराट् Vविक्रम्य [2]विविधां क्रान्तिम् आस्थाय [-2] Vअतिष्ठत् । [3] कथं ? Vदेवेषु [-3] Vब्रह्मणा ब्रह्मवर्चसेनातिष्ठत् Vअसुरेषु Vअन्नेन । तत्तत्साधनभावेन [4] तेषु तेषु [-4] नियतमवर्तत इत्यर्थः । ततः Vते Vदेवाः Vअकामयन्त Vब्रह्म Vचान्नं Vच Vउभयं [5]Vसंवृञ्जीमहि । वयमेव सम्यक्

अष्टमे सप्तदशरात्रोऽभिहितः । अथ नवमे विंशतिरात्रोऽभिधीयते ।

सेति ॥ तमेतं विधत्ते - 'सा विराड् विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभय९ सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता वि९शति९रात्रीरपश्यन् ततो वै त उभय९ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं विद्वा९स एता आसत उभयमेव संवृञ्जते ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा भवन्ति' इति ॥ दशरात्राभिमानिनी काचिद्विराड्देवता रूपद्वयेन विभज्य Vअतिष्ठत् - Vदेवेषु ब्रह्मवर्चसरूपेण Vअसुरेषु चान्नरूपेण । तदानीं Vदेवाः असुरेभ्योऽन्नमपनीय [1]तदेतत् Vउभयं वयमेव लभेमहीति Vअकामयन्त । ततस्तत्साधनत्वेन वक्ष्यमाणा विंशतिसंख्याका रात्रीर्निश्चित्य तदनुष्ठानेनासुरेभ्यस्तदपनीय स्वयमेवाधिकेन ब्रह्मवर्चसेनाऽन्नेन च संपन्ना [2]अभूवन् । एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नुवन्ति । [3] पूर्वत्र

१. मै२ - दशरात्रकः । २-२. अ१ - विधिक्रान्तिमायास्थाय । ३-३. मै - अथ वेदेषु । ४-४. मै१ - तेषु । ५. मै२ - वृञ्जीमहि ।

१. हा - तत् । २. अ. आ. इ. क. हा. उ. वा. म - अभवन् । ३-३. [अस्माभिः शुद्धीकृत्योत्प्रेक्षितः पाठः ।] अ. आ. पा. हा. इ. वा - पूर्वसंत्राहःसंघ° ।

आसंत उभयमेव सं वृञ्जते ब्रह्म चान्नं च (१) ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत्तिष्ठन्ति

आसते । उभयम् । एव । समिति । वृञ्जते । ब्रह्म । च । अन्नम् । च । (१) ब्रह्मवर्चसिन इति ब्रह्म-वर्चसिनः । अन्नादा इत्यन्न-अदाः । भवन्ति । द्वे इति । वै । एते इति । विराजाविति वि-राजौ । तयोः । एव । नाना । प्रतीति । तिष्ठन्ति । विꣳशः । वै । पुरुषः । दश । हस्त्याः । अङ्गुलयः । दश । पद्याः । यावान् । एव । पुरुषः । तम् । आप्त्वा । उदिति । तिष्ठन्ति ।

[6]लभेमहीति । 'ते एताः' इत्यादि । गतम् । ब्रह्मवर्चसिनः महाब्रह्मवर्चसाः, [7]Vअन्नादाः [8]अन्नादनसमर्थाश्चाभवन् । 'य एवम्' इत्यादि । गतम् ॥

'द्वे वा [9]एते' इत्यादि ॥ [10]एकविंशतिरात्रे दशरात्रावित्यर्थः । [11]दशकयोस्तु विराट्त्वेन स्तुतिः Vतयोः विराजोः Vनाना पृथक् पृथक् प्रतिष्ठिता भवन्ति । निराडन्नम् । यद्वा - [12]दशकाभ्यां तयोः ब्रह्मवर्चसान्नाद्ययोः [13-] पृथक् [14]प्रतिष्ठिता भवन्ति ॥

सत्राहःसंघप्राधान्येन [-3] सप्तदशरात्रपञ्चदशरात्रादीनामेकवचनेन निर्देशः । [4]इह तु क्रत्ववयवभूतरात्रिप्राधान्येन बहुवचननिर्देशः ॥

द्वे इति ॥ क्रतुगतां विंशतिरात्रिसंख्यां प्रशंसति - '[5-] द्वे वा एते विराजौ तयोरेव नाना प्रतितिष्ठन्ति विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेन पुरुषस्तमाप्त्वोत्तिष्ठन्ति' [-5] इति ॥ दशसंख्यया विभज्यमाने Vद्वे एते Vविराजौ संपद्येते । तयोश्च ब्रह्मवर्चसान्नसाधनभूतयोः पृथगेव Vप्रतितिष्ठन्ति, एकैकं फलमितरनिरपेक्षत्वेनैव संपूर्णं लभत इत्यर्थः । अथवा विद्वत्सभायामुपयुक्तं ब्रह्मवर्चसम् । धनिकसभायामुपयुक्ताऽन्नसमृद्धिः । एवं नानाविधा प्रतिष्ठा । किञ्च पुरुषस्य हस्तपादगताङ्गुलिसंख्यासाम्याद्यावान् गुणसंघः पुरुषे संभावितः [6]Vतं सर्वं प्राप्नोति ॥

६. मै२ - लभेम इति । ७. मै. मै२. मै३. अ. अ१ - अभवन् । अन्नाद्याः । ८. मै२ - °समर्था अभवन् । ९. मै. मै१. मै३. अ. अ१ - 'एते' नास्ति । १०. मै२ - °शतिरात्रः । ११. मै२ - °कयोश्च । १२. मै२ - द्वाभ्याम् । १३-१३. मै२ - 'पृथक् - - - - पृथग्वीर्याः' नास्ति । १४. अ१ - प्रतिषिद्धता ।

४. अ. आ. क. पा. हा. इ. वा - अत्र । ५-५. वा - 'द्वे वा - - - - उत्तिष्ठन्ति' नास्ति । ६. म - 'तं' नास्ति ।

ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं (२) लोकमभ्यारोहन्ति

ज्योतिः । गौः । आयुः । इति । त्र्यहा इति त्रि-अहाः । भवन्ति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि-आरोहन्ति । अभिपूर्वमित्यभि-पूर्वम् । त्र्यहा इति त्रि-अहाः । भवन्ति । अभिपूर्वमित्यभि-पूर्वम् । एव । सुवर्गमिति सुवः-गम् (२) । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति ।

'विंशः' इति ॥ विंशतेः पूरणः [V]विंशः "तस्य पूरणे डट्" (पा ५.२.४८) [१५-] इति डट् [-१५], "विंशतेर्डिति" इति टिलोपः । [V]दश हस्त्याः हस्तयोर्भवाः । [१६-V]पद्याः पदयोर्भवाः [-१६] । "शरीरावयवाच्च" (पा ४.३.५५) इति [१७]यत् । "पद्यत्यतदर्थे" (पा ६.३.५३) पद्भावः । एताः पृथग्वीर्याः [-१३] विंशतिः अङ्गुलयः पुरुषजाः तदधीनप्रवृत्तित्वात् । [१८-] तत्रावयवापेक्षया विंशत्वम् , अवयवव्यपेक्षया एकत्वम् [-१८] । 'यावान्' [१९]इत्यादि । यत्परिमाणं पुरुषसामर्थ्यं तत्सर्वम् [V]आप्त्वा उत्तिष्ठन्ति लोके उच्छ्रितं भजन्ते । सत्राद्वा उत्तिष्ठन्ति [२०]उदवस्यन्ति ॥

ज्योतिरिति ॥ अथात्र [७]नवाहानि विधत्ते - 'ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति' [८-] इति । ज्योतिरादिकः संघः एव त्रिरावृत्त्या संघत्रयं संपद्यते । तान्येतानि नवाहानि । एतेषु त्रिष्वपि त्र्यहेष्वानुलोम्यानियमं विधत्ते [-८] - 'अभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति' इति । यथा प्रथमस्त्र्यहो ज्योतिरादिकः एवं द्वितीयतृतीयावपि ज्योतिरादिकौ न त्वत्र कश्चिदप्यायुरादिकोऽस्ति । एवं सत्यनुक्रमेणैव स्वर्गम् [V]अभ्यारोहन्ति ॥

१५-१५. अ१ - 'इति डट्' नास्ति । १६-१६. अ१ - 'पद्याः पदयोर्भवाः' नास्ति । १७. अ - यत् पदर्थ, अ१ - यत् पादार्धाभ्याम् । १८-१८. अ१ - विंशतेरवयवस्त्र्यपेक्षया एकत्वम् । १९. मै२ - इत्यादि । गतम् । २०. मै१ - उदस्यन्ति ।

---

७. म - सर्वाहानि । ८-८. अ. आ. क. पा. हा. इ. वा - 'इति ज्योतिरादिकः - - - - विधत्ते' नास्ति ।

यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथन्तराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति

यत् । अन्यतः । पृष्ठानि । स्युः । विविवधमिति वि-विवधम् । स्यात् । मध्ये । पृष्ठानि । भवन्ति । सविवधत्वायेति सविवध-त्वाय । ओजः । वै । वीर्यम् । पृष्ठानि । ओजः । एव । वीर्यम् । मध्यतः । दधते । बृहद्रथन्तराभ्यामिति बृहत्-रथन्तराभ्याम् । यन्ति । इयम् । वाव । रथन्तरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति ।

[२१-] अथाहानि विदधाति [-२१] – ‘ज्योतिः’ इत्यादि ॥ अयं तावदहःक्रमः – अतिरात्रः ᐯज्योतिः ᐯगौः ᐯआयुः ᐯइति त्र्यहः त्रिरभ्यस्तः नवपृष्ठ्यः षडहः [२२]पुनरपि त्र्यहः [२३]प्रतीचीन [२४]आयुर्गौर्ज्योतिरतिरात्र इति । एष प्रतिपाद्यते ‘त्र्यहाः’ इति । त्रय एव बहुत्वस्य कृतार्थत्वात्तद्व्यतिरेकेण च एकादशानाम् [२५]अह्नां प्रतिपादनात् । ‘अभिपूर्वम्’ इति आनुपूर्व्येणाविच्छेदेन ॥

यदन्यत इति ॥ एतेषां त्र्यहाणां वक्ष्यमाणत्र्यहस्य च मध्ये पृष्ठं विधत्ते - ‘यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति’ इति ॥ पूर्वोक्तेषु त्र्यहेषु योऽयमन्त्यस्त्र्यहो [९-] यश्च भावी त्र्यहः [-९] [१०]एतयोरुभयोर्मध्यवर्तित्वेन [११]विवधसाम्यम् । अन्यत् पूर्ववद्व्याख्येयम् ॥

२१-२१. मै१ - अथाहीनविधानि, अ१ - तत्राहःक्लृप्तिं विदधाति । २२. मै२ - पुनः । २३. मै२ - प्रतीची । २४. मै२ - °गौर्ज्योतिः । २५. अ - ‘अह्नाम्’ नास्ति ।

९-९. उ - यश्च भावी त्र्यहः’ नास्ति । १०. शृ१ - °योर्मध्यमानत्वेन, आ - तयोरुभ° । ११. शृ१. इ. वा - विविध° ।

पराञ्चो वा एते सुवर्गं (३) लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै ॥९॥

(वृञ्जते ब्रह्म चान्नं च सुवर्गमेते सुवर्गं त्रयोविꣳशतिश्च)

पराञ्चः । वै । एते । सुवर्गमिति सुवः-गम् (३) । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । ये । पराचीनानि । पृष्ठानि । उपयन्तीत्युप-यन्ति । प्रत्यङ् । त्र्यह इति त्रि-अहः । भवति । प्रत्यवरूढ्या इति प्रति-अवरुढ्यै । अथो इति । प्रतिष्ठित्या इति प्रति-स्थित्यै । उभयोः । लोकयोः । ऋद्ध्वा । उदिति । तिष्ठन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य । अन्नाद्यस्येत्यन्न-अद्यस्य । परिगृहीत्या इति-परि-गृहीत्यै ॥९॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'यदन्यतः' इत्यादि ॥ गतम् (तैसं ७.३.७) । 'प्रत्यङ्' इति [२६]पृष्ठेभ्यः पर एकः [V]त्र्यहः प्रतीचीनः [V]भवति । [२७]अतिरात्राभ्यां [२८]ब्रह्मवर्चसान्नाद्ययोः परिग्रहः ॥

॥ इति सप्तमे तृतीये नवमोऽनुवाकः ॥

पराञ्च इति ॥ अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते - 'पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति' इति ॥ पूर्ववद्व्याख्येयम् ॥

अतिरात्राविति ॥ [१२]अथ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै' इति ॥ फलद्वयं विधिवाक्य एव [१३]विस्पष्टम् ॥

अत्र मीमांसा -

चतुर्थाध्यायस्य [१४]तृतीयपादे चिन्तितम् -

२६. मैर - प्रतिष्ठे । २७. अ - अतिरात्रायाः । २८. अ - °सान्तात् द्ययोः ।

१२. अ. आ. क. पा. हा. इ. वा. म - 'अथ' नास्ति । १३. म - स्पष्टम् । १४. आ. क - °पादेऽष्टमाधिकरणे ।

“ स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहाग्रिमः ।
पूर्ववत् स्यात् प्रतिष्ठाऽत्र श्रुतौ [15]तेनाश्रुताद्वरम् ” ॥ (जैन्या ४.३.१७)

सत्रकाण्डे श्रूयते - “ प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति ” इति, “ ब्रह्मवर्चसिनोऽन्नादा भवन्ति ” (तैसं ७.३.९) [16]इति, “ य एता उपयन्ति ” (तांब्रा २३.२.४) इति च । [17]द्वादशाहादूर्ध्वभाविनस्त्रयोदश-चतुर्दशरात्रादयः सर्वे सत्रविशेषाः । [18]त्रयोदशसंख्याका रात्रयो यस्मिन् सत्रविशेषे सोऽयं त्रयोदशरात्र इति समुदायप्राधान्येनैकवचनान्ततया प्रायेण निर्देशो भवति । क्वचित्तु समुदायिनां रात्रिविशेषाणां [19]प्रत्येकं प्राधान्यमभ्युपेत्यैक एव [20]सत्रविशेषो [21]बहुवचनान्तेन [22]रात्रिशब्देनाऽऽम्नायते । तद्यथा “ त एता विꣳशतिꣳ रात्रीरपश्यन् ” (तैसं ७.३.९) इति । तादृशे रात्रिसत्रे विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति प्राप्ते ब्रूमः - अस्य रात्रिसत्रविधेः [23]स्तावकेऽर्थवादे प्रतिष्ठा श्रुता । [24]सा चाऽस्मिन् [25]वाक्येऽत्यन्तमश्रुतात् स्वर्गात् [26]प्रत्यासन्ना । तस्मात् प्रतिष्ठाकामो रात्रिसत्रं कुर्यादित्येवं प्रतिष्ठैव फलत्वेन कल्पनीया ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

१५. अ. पा. हा. इ. वा - नेहाश्रुतात्परम्, म - नैवाश्रुताद्वरम् । १६. मै - ‘ इति ’ नास्ति । १७. अ. आ - °स्त्रयादशः चतुर्दश° । १८. अ. पा. हा. उ. इ. वा - किं वा दशसंख्याका । १९. अ. आ. क. हा. इ. वा - ‘ प्रत्येकम् ’ नास्ति । २०. वा - ‘ सत्रविशेषः ’ नास्ति । २१. शृ१ - षड्वचनान्तेन । २२. मै - सत्रशब्देन । २३. अ. आ. पा. इ. वा. वै - स्तावदर्थवादे । २४. शृ१. उ. इ. वा - सः । २५. आ - वाक्येऽत्यन्तश्रुतात् । २६. मै - ‘ प्रत्यासन्ना ’ नास्ति ।
~~~~~~~~~~~~~~~~~~~~

असावादित्योऽस्मिँल्लोक आसीत् तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन्

असौ । आदित्यः । अस्मिन् । लोके । आसीत् । तम् । देवाः । पृष्ठैः । परिगृह्येति परि-गृह्य । सुवर्गमिति सुवः-गम् । लोकम् । अगमयन् । परैः । अवस्तात् । परीति । अगृह्णन् । दिवाकीर्त्येनेति दिवा-कीर्त्येन । सुवर्ग इति सुवः-गे । लोके । प्रतीति । अस्थापयन् ।

अथैकविंशतिरात्रः [१]प्रस्तूयते - [२-]असावादित्यः' इत्यादि ॥ [३]इदानीमुपरि वर्तमानः [V]असौ [V]आदित्यः [४-] पूर्वम् अस्मिन् [-४] मनुष्यलोके [V]आसीत् । अथ [V]देवाः [V]तं [V]पृष्ठैः पृष्ठस्थानीयैः षड्भिरहोभिः [V]परिगृह्य अस्माल्लोकात् स्वर्गं [५][V]लोकम् [V]अगमयन् [६-][V]दिवाकीर्त्येन [V]प्रत्यस्थापयन् [-६] प्रतिष्ठापितवन्तः । दिवाकीर्त्यं नाम सामविशेषः । तत्सामकमहरपि दिवाकीर्त्यम् । [७-] यत्रोदित आदित्ये [-७] प्रातरनुवाकमुपाकरोति । अथ पुनरपि [V]परैः परःसामभिः

नवमेऽनुवाके विंशतिरात्रोऽभिहितः । अथ दशमे एकविंशतिरात्रोऽभिधीयते । तत्र तावदियमहः[१]क्लृप्तिः - आदावतिरात्रः । ततः पृष्ठ्यः षडहः । ततः स्वरसामानस्त्रयोऽहर्विशेषाः । ततो दिवाकीर्त्यमेकमहः । पुनरपि [२]त्रयः स्वरसामानः । पुनरपि पृष्ठ्यः षडहः । ततोऽतिरात्र इति ॥

असाविति ॥ तमिमं विधातुं प्रस्तौति - 'असावादित्योऽस्मिँल्लोक आसीत् तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन् परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मिँल्लोके परैरुभयतः परिगृहीतः' इति ॥ [३][V]असौ स्वर्गे दृश्यमानः [४-] [V]आदित्यः पुरा [-४] भूलोक एव तिष्ठति [५]स्म । [V]तम् आदित्यम् [६][V]देवाः [V]परिगृह्य पृष्ठाख्यैः षड्भिरहोभिः स्वर्गं प्रापितवन्तः । तत्र च परशब्देन स्वरसामशब्देन च [७-] तत्र तत्र [-७] व्यवह्रियमाणैस्त्रिभिरहोभिः [८][V]अवस्तात् [V]पर्यगृह्णन् , आदित्यो यथाऽधस्तान्नाऽऽगच्छति तथा व्यवधानं कृतवन्तः । परशब्दाभिधेयं किञ्चित् साम,

---

१. मै२ - प्रस्तूयन्ते । २. मै. मै१. मै३. अ. अ१ - असौ । ३. मै. मै१. मै३. अ. अ१ - असौ इदानीम् । ४-४. [अस्माभिः संभावितोऽयं पाठो द्रष्टव्यः ।] , मै. मै१. मै३. अ. अ१ - पूर्वस्मिन् , मै२ - अस्मिन् । ५. अ१ - 'लोकम्' नास्ति । ६-६. मै२ - 'दिवाकी° - - - - °मयन्' नास्ति । ७-७. मै२ - यत्रेत्यादि तत्र ।

---

१. शृ१ - 'क्लृप्तिः' नास्ति । २. मै - अहस्त्रयः । ३. अ. पा. हा. इ. वा - अयम् । ४-४. म - 'आदित्यः पुरा' नास्ति । ५. अ. पा. हा. इ. उ. वा. म. मै - 'स्म' नास्ति । ६. शृ१ - देवताः । ७-७. मै - तत्र पुनः । ८. शृ१. उ - अधस्तात् , मै. वै - अधस्थात् ।

परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मिंल्लोके परैरुभयतः परिगृहीतो यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात् परिगृह्णन्ति दिवाकीर्त्येन (१) सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परिगृह्णन्ति पृष्ठैरुपावरोहन्ति

परैः । परस्तात् । परीति । अगृह्णन् । पृष्ठैः । उपावारोहन्नित्युप-अवारोहन् । सः । वै । असौ । आदित्यः । अमुष्मिन् । लोके । परैः । उभयतः । परिगृहीत इति परि-गृहीतः । यत् । पृष्ठानि । भवन्ति । सुवर्गमिति सुवः गम् । एव । तैः । लोकम् । यजमानाः । यन्ति । परैः । अवस्तात् । परीति । गृह्णन्ति । दिवाकीर्त्येनेति दिवा-कीर्त्येन (१) । सुवर्ग इति सुवः-गे । लोके । प्रतीति । तिष्ठन्ति । परैः । परस्तात् । परीति । गृह्णन्ति । पृष्ठैः । उपावरोहन्तीत्युप-अवरोहन्ति ।

त्रिभिरहोभिः तं [V]परस्तात् उपरि [V]पर्यगृह्णन् । अथ [V]पृष्ठैः [८]उपरितनैः तैः षड्भिरहोभिः आवृतैः [V]उपावारोहन् [८] [९]स्वर्गलोकात् [१०]पृथिवीम् [११]उपावारोहन् [९] तस्मात् [V]सः अयम् [१२][V]असौ [V]आदित्यः [V]अमुष्मिन् [V]लोके [V]परैः परःसामभिः [V]उभयतः परस्तात् [V]अवस्तात् च परिगृहीतः ॥

तेन साम्ना निष्पद्यमाना अहर्विशेषाः परा इत्युच्यन्ते । तथा दिवैव कीर्तनीयं किञ्चित् साम, तेन च निष्पाद्यमहरपि दिवाकीर्त्यमित्युच्यते । तेन चाह्ना तमादित्यं स्वर्गे प्रतिष्ठापितवन्तः । पुनरप्यनुष्ठीयमानैः परशब्दाभिधेयैरहोभिः [९][V]परस्तात् आदित्यं [V]पर्यगृह्णन्, यथा तत ऊर्ध्वमादित्यो न गच्छति तथा प्रतिबन्धं कृतवन्तः । एवं कृत्वा पुनरनुष्ठीयमानैः पृष्ठाख्यैः षड्भिरहोभिः [१०]स्वयं स्वर्गात् [V]उपावारोहन् । [V]सः [V]असौ [११] दिवि दृश्यमानः [११] [V]आदित्यः स्वर्गे लोके पराख्यैरहोभिः [V]उभयतः नियमितत्वान्नोर्ध्वं गच्छति, नाप्यधस्तादागच्छति ॥

यदिति ॥ तान्येतान्यहानि विधत्ते - ' यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात् परिगृह्णन्ति दिवाकीर्त्येन सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परि गृह्णन्ति पृष्ठैरुपावरोहन्ति ' इति ॥ आदित्यवाक्यवद्यजमानवाक्यं व्याख्येयम् ॥

८. मै. मै१. मै३. अ - उपरि, मै२ - ' उपरितनैः ' नास्ति । ९-९. अ१ - ' स्वर्ग° - - - - उपावारोहन् ' नास्ति । १०. मै२ - पृथिव्याम् । ११. मै२ - उपावातरन् । १२. मै२ - ' असौ ' नास्ति ।

९. शृ१ - अवस्तात् । १०. अ. आ. क. पा. हा. इ. वा - ' स्वयम् ' नास्ति । ११-११. इ - ' दिवि दृश्यमानः ' नास्ति ।

यत् परे परस्तान्नः स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन् यदवस्तान्नः स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति

यत् । परे । परस्तात् । न । स्युः । पराञ्चः । सुवर्गादिति सुवः-गात् । लोकात् । निरिति । पद्येरन् । यत् । अवस्तात् । न । स्युः । प्रजा इति प्र-जाः । निरिति । दहेयुः । अभितः । दिवाकीर्त्यमिति दिवा-कीर्त्यम् । परःसामान इति परः-सामानः । भवन्ति । सुवर्ग इति सुवः-गे । एव । एनान् । लोके । उभयतः । परीति । गृह्णन्ति ।

'यत्पृष्ठानि' इत्यादि ॥ गतम् । [13]'यत्परे' इत्यादि । [14]यदि परःसामानः V परस्तात् उपरिष्टात् V न V स्युः । संज्ञायां व्यत्ययेन [15]सर्वनामत्वम् । V पराञ्चः परागताः स्वर्गात् [16] V निष्पद्येरन् निर्गच्छेरन् स्वर्गमतीत्योपरि गच्छेयुः । अथ यदि V अवस्तात् [17]अधस्तात् परःसामानः V न V स्युः V प्रजाः पृथिवीस्थानं V निर्दहेयुः आदित्यनामानो यजमानाः तस्मात् V अभितः V दिवाकीर्त्यं [18]विषुवन्तं [19]उभयतः V परःसामानः स्वर्गस्थितान् यजमानान् V उभयतः V परिगृह्णन्ति ऊर्ध्वाधः-पातभीतान् धारयन्ति । "अभितः परितः°" (पा १.४.४७ वा) इति द्वितीया ॥

यदिति ॥ दिवाकीर्त्यस्योभयतोऽनुष्ठेयान् पराख्यानहर्विशेषान् व्यतिरेकमुखेन(ण) प्रशंसति - यत् परे परस्तान्न स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन् यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति' इति ॥ यद्युपरितनाः पराख्या अहर्विशेषाः V न V स्युः तदानीं स्वर्गं गताः यजमानास्ततोऽप्यूर्ध्वं गमनस्य निवारकाभावात् स्वर्गादूर्ध्वं निर्गच्छेयुः । यदि [12]वाऽधस्तनाः पराख्या [13-]V न अनुष्ठीयेरंस्तदानीं व्यवधायकाभावादादित्यात्मकाः सर्वे यजमानाः भूमिवर्तिनः V प्रजाः [14]सर्वा निमिषेण दहेयुः । तस्माद्दिवाकीर्त्यस्य पुरस्ताच्चोपरिष्टाच्च V परःसामानः अनुष्ठेयाः । [15]तेन चैनान् यजमानान् [16-] स्वर्गे एव [-16] अधस्तादुपरिष्टाच्च निरुध्य [-13] स्थापयन्ति ॥

१३. मैर - यत् परैः । १४. मैर - यदि पर । १५. मैर - सर्वात्मनामत्वम् । १६. मैर - निष्ठाद्येरन् अन्येषु सर्वेषु लिखितपुस्तकेषु, मै - मुद्रितपुस्तके च 'निष्ठद्येरन्; [अस्माभिः संहितामाश्रित्य शुद्धीकृतः पाठः ।] । १७. मैर - 'अधस्तात्' नास्ति । १८. मैर - विषुवतः । १९. मैर - उत यतः ।

१२. अ. आ. क. पा. हा. इ. वा. वै. म - चाधस्तनाः । १३-१३. मै - 'न - - - - निरुध्य' नास्ति । १४. म - 'सर्वा' नास्ति । १५. आ. क - ते । १६-१६. अ. आ. क. पा. हा. इ. वा. वै - स्वर्गमिवाध° ।

यजमाना वै दिवाकीर्त्यꣳ संवत्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति संवत्सर एवोभयतः (२) प्रति तिष्ठन्ति पृष्ठं वै दिवाकीर्त्यं पार्श्वे परःसामानोऽभितो

यजमानाः । वै । दिवाकीर्त्यमिति दिवा-कीर्त्यम् । संवत्सर इति सं-वत्सरः । परःसामान इति परः-सामानः । अभितः । दिवाकीर्त्यमिति दिवा-कीर्त्यम् । परःसामान इति परः-सामानः । भवन्ति । संवत्सर इति सं-वत्सरे । एव । उभयतः (२) । प्रतीति । तिष्ठन्ति । पृष्ठम् । वै । दिवाकीर्त्यमिति दिवा-कीर्त्यम् । पार्श्वे इति । परःसामान इति परः-सामानः । अभितः ।

‘यजमाना [२०]वै’ इत्यादि ॥ गतम् । ‘पृष्ठं वै’ इत्यादि । [V]पृष्ठं पार्श्वस्थानीयत्वात् [V]तस्मात् [V]पृष्ठम् [V]अभितः [V]पार्श्वे क्लृप्ते प्रजानाम् । ‘भूयिष्ठाः’ [२१]इत्यादि । [२२]बहुतमा

यजमाना इति ॥ प्रकारान्तरेण दिवाकीर्त्यं परःसामाख्यानि [१७]चाहानि प्रशंसति - ‘यजमाना वै दिवाकीर्त्यꣳ संवत्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति संवत्सर एवोभयतः प्रति तिष्ठन्ति’ इति ॥ दिवाकीर्त्यस्य [१८]यजमानस्थानीयत्वात् परःसाम्नां च संवत्सरस्थानीयत्वादुभयतस्तदनुष्ठाने यजमाना अधस्ताच्चोपरिष्टाच्च संवत्सरदेवतायाम् [V]एव [V]प्रतितिष्ठन्ति ॥

पृष्ठमिति ॥ पुनरपि प्रकारान्तरेण प्रशंसति - “पृष्ठं वै दिवाकीर्त्यं पार्श्वे परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठꣳ शस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्रꣳसाय” इति ॥ यथा [१९]लोके पुरुषस्य पृष्ठभागो [१९] मध्यवर्ती पार्श्वभागावुभयतो [२०]वर्तिनावेवमत्रापि [V]दिवाकीर्त्यं पृष्ठस्थानीयं [२१]परःसामानस्तूभयपार्श्वस्थानीयाः । किं चैतस्मिन् दिवाकीर्त्ये [२२] परःसामाननु चातिग्राह्या [२२] ग्रहा अपि भूयिष्ठा गृह्यन्ते । तथा हि दिवाकीर्त्यं परःसामानश्च गवामयने

२०. मै. मै१. मै३. अ. अ१ - ‘वै’ नास्ति । २१. मै२ – इत्याह । २२. मै२ - बहुतया ।

१७. अ. आ. क. पा. हा. इ. वा. वै - अहानि, म - ‘चाहानि’ नास्ति । १८. मै - °मानस्थानत्वात् । १९-१९. वा - लोकेषु पुरुषः स्वपृष्ठभागे, इ - लोके पुरुषः° । २०. मै - नावेवात्रापि । २१. अ. इ. उ. पा. वा. हा - °पार्श्वस्थानीयौ । २२-२२. क - परःसामयुता अतिग्राह्या ।

दिवाकीर्त्यं परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठ९ शस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्र९साय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः

दिवाकीर्त्यमिति दिवा-कीर्त्यम् । परःसामान इति परः-सामानः । भवन्ति । तस्मात् । अभितः । पृष्ठम् । पार्श्वे इति । भूयिष्ठाः । ग्रहाः । गृह्यन्ते । भूयिष्ठम् । शस्यते । यज्ञस्य । एव । तत् । मध्यतः । ग्रन्थिम् । ग्रथ्नन्ति । अविस्र९सायेत्यवि-स्र९साय । सप्त । गृह्यन्ते । सप्त । वै । शीर्षण्याः । प्राणा इति प्र-अनाः ।

[२३-] अतिग्राह्याः मध्येषु [-२३]सप्तस्वहःसु [V]गृह्यन्ते । भूयांसोऽस्य [V]यज्ञस्य मध्ये [V]ग्रन्थिं [२४]बन्धनं कुर्वन्ति । यज्ञस्य [V]अविस्रंसाय अनधःपतनाय ॥

'सप्त गृह्यन्ते' इति । त्रिषु परःसामसु त्रीनतिग्राह्यान् गृह्णाति "उपयामगृहीतोऽसि" "★अद्भ्यस्त्वौषधीभ्यः" (तैब्रा ३.८.७, तैसं ७.१.११) [२५]इत्यादिभिः त्रिभिः । [२६]एतानेवावृत्तानर्वाक्-उत्पन्नाः । तत्र हि चोदकप्राप्तेभ्योऽतिग्राह्येभ्योऽधिकास्त्रयोऽतिग्राह्याः [२३]तृतीयकाण्डोक्ताः ★"अद्भ्यस्त्वौषधीभ्यः" (तैब्रा ३.८.७) इत्यादिमन्त्रसाध्या विहिताः सन्ति । [२४]तत्प्रकृतित्वादत्रापि तेऽधिकाः [V]ग्रहाः [V]गृह्यन्ते । [२५]अत एव शस्त्रमप्यधिकं [V]शस्यते । [२६]तेनाधिकानुष्ठानेन [V]यज्ञस्य एकविंशतिरात्ररूपस्य [V]ग्रन्थिं [V]ग्रथ्नन्ति दृढबन्धनं कुर्वन्ति । तच्च यज्ञस्य विस्रंसनपरिहाराय भवति ॥

सप्त इति ॥ पुनरपि दिवाकीर्त्ये विशेषं दर्शयति - 'सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधति' इति ॥ दिवाकीर्त्यात् [२७]प्रतीचीनेषु दिनेष्वेकैकस्मिन्नेकैकोऽतिग्राह्य इत्यनुक्रमेण त्रयो गृह्यन्ते । [२८-] उत्तरेषु [२९-] तु दिनेषु ते [-२९] [३०]एवावरोहक्रमेण गृह्यन्ते । [३१]त एते षडपि दिवाकीर्त्यदिने तथैव गृह्यन्ते । तेषां मध्ये सौर्यम् "उदु त्यं जातवेदसम्" (तैसं १.२.८.७) इति मन्त्रसाध्यः सप्तमो

"★अद्भ्यस्त्वौषधीभ्यः" इत्ययं मन्त्रभागः भट्टभास्करीयभाष्ये मैसूरुमुद्रितावृत्तौ "उपयामगृहीतोऽस्यद्भ्यस्त्वौषधीभ्यः" इति स्वीकृत्य सप्तकाण्डगतः सन्दर्भः प्रदर्शितः । सायणीयभाष्ये तावत् साक्षात् भाष्यकृद्भिः ब्राह्मणगतः तृतीयकाण्डीयः संदर्भः प्रदर्शितः । तत्रोभयत्र अश्वमेधसम्बन्धी विषयः प्रवर्तते । प्रकृते तावत् अतिग्राह्यग्रहग्रहणविचारः प्रस्तुतः । अतः कथमेतत् सङ्गच्छत इति तावत् चिन्त्यम् । पुनश्च प्रकृतानुवाकविषयः एकविंशतिरात्रात्मकः । भाष्यकृद्भ्यामुद्धृतसंदर्भावाश्वमेधसम्बधिनौ वर्तेते ।

२३-२३. मै. मै१. मै३. अ. अ१ - अतिग्राह्यमध्यमेषु २४. मै. मै३. अ१ - ग्रथ्नन्ति, अ - ब्रबध्नाम् , मै१ - बध्नम् । २५. मै२ - इत्येत्यादिभिः । २६. मै१ - एतानेव ।

२३. शृ१ - तृतीयकाण्डे । २४. अ. आ. इ. वा. म. मै - तद्विकृति° । २५. शृ१ - अत्र । २६. अ. आ. पा. हा. इ. वा. म. मै - तत्तेन । २७. म - प्राक् । २८-२८. वा - 'उत्तरेषु - - - - गृह्यते' नास्ति । २९-२९. अ. आ. क. पा. हा. इ. वै - दिनेषु ते, म - 'तु - - - - ते' नास्ति । ३०. उ - एवारोह°; हा - एवाहोरात्र° । ३१. म - 'ते' नास्ति ।

प्राणानेव यजमानेषु दधति यत् पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न (३) प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः

प्राणानिति प्र-अनान् । एव । यजमानेषु । दधति । यत् । पराचीनानि । पृष्ठानि । भवन्ति । अमुम् । एव । तैः । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । यत् । इमम् । लोकम् । न (३) । प्रत्यवरोहेयुरिति प्रति-अवरोहेयुः । उदिति । वा । माद्येयुः । यजमानाः ।

सामसु तानूर्ध्वानावृत्तांश्च [27]विषुवति । तेषां मध्ये [28]सूर्यम् " उदु त्यं जातवेदसम् " (तैसं १.२.८.७) इति । शीर्षण्याः शिरसि भवाः । " शरीरावयवाच्च " (पा ४.३.५५) इति यत्, " ये च तद्धिते " (पा ६.१.६१) इति शीर्षन्भावः ॥

'यत्पराचीनानि' इत्यादि ॥ [V]पराचीनानि ऊर्ध्वान्येव यद्युभयतोऽपि पृष्ठानि भवन्ति अमुम् [V]एव लोकम् [V]अभ्यारोहन्ति, [V]तैः तथाविधैः । ततश्च यत् इमं लोकं न प्रत्यवरोहेयुः उन्माद्येयुर्वा प्रमीयेरन् यजमानाः तस्मात् [V]यत् [V]प्रतीचीनानि आवृत्तानि [V]पृष्ठानि [V]भवन्ति तेन [29V]इमं [V]लोकं यजमानाः [V]प्रत्यवरोहन्ति । अपि च [30]अमुष्मात् प्रत्यवरुह्य [31V]अस्मिन्

गृह्यते [28] । [32]तदेवं तस्मिन् दिने सप्ताधिकाः ग्रहाः । ते च [33]संख्यया ऊर्ध्वगतसप्तच्छिद्रवर्तिप्राणसमाः । अतस्तदनुष्ठानेन यजमानेषु प्राणान् स्थापयन्ति । तदेवं दिवाकीर्त्यमहः प्रशस्तम् । यद्वा 'भूयिष्ठा ग्रहाः' इत्यादि गवामयनगतानामत्रत्यानां चाह्नां प्रकृतिविकृतिभावद्योतनाय तल्लिङ्गं दर्शयितुं विधिरेवास्तु ॥

यदिति ॥ अथावरोहरूपं पृष्ठ्यषडहं विधत्ते - 'यत् पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन् यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादाय' इति ॥ दिवाकीर्त्यसदृशेभ्यः परःसामेभ्यः पूर्वमनुष्ठितानि [V]पराचीनानि आरोहरूपाणि यानि पृष्ठसामान्यहानि सन्ति [V]तैः यजमानाः स्वर्गं [V]लोकम् आरोहन्त्येव । [34]अत ऊर्ध्वम् [V]इमं [V]लोकं प्रति यद्यवरोहसाधनानि कानिचिदहानि

२७. मै१ - आविष्मति, अ१ - विष्मतीति । २८. अ - 'सूर्यम्' नास्ति । २९. मै२ - अमुम् । ३०. मै२ - 'अमुष्मात्' नास्ति । ३१. मै२ - यस्मिन् ।

३२. म - 'तदेवम्' नास्ति । ३३. [अस्माभिः शुद्धतामापादितोऽयं पाठः ।] अ. आ. क. पा. हा. इ. वा. म - संख्यायाम्, शृ१ - संख्यागतम् । ३४. शृ१ - ततः, म - तत् ।

प्र वा मीयेरन् यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहयन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीत् स प्रजापतिमुपाधावत् तस्मा एतमेकविंशतिरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै स प्रत्यतिष्ठद्ये

प्रेति । वा । मीयेरन् । यत् । प्रतीचीनानि । पृष्ठानि । भवन्ति । इमम् । एव । तैः । लोकम् । प्रत्यवरोहन्तीति प्रति-अवरोहन्ति । अथो इति । अस्मिन् । एव । लोके । प्रतीति । तिष्ठन्ति । अनुन्मादायेत्यनुत्-मादाय । इन्द्रः । वै । अप्रतिष्ठित इत्यप्रति-स्थितः । आसीत् । सः । प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् । एकविंशतिरात्रमित्येकविंशति-रात्रम् । प्रेति । अयच्छत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । प्रतीति । अतिष्ठत् । ये ।

Vलोके Vप्रतितिष्ठन्ति । तच्च [३२]Vअनुन्मादय भवति । [३३]" विभाषाऽश्वेरदिक् स्त्रियाम् " (पा ५.४.८) इति खः । " गतिर्गतौ " (पा ८.१.७०) इति पूर्वस्य गतेर्निघातः, " तिङि चोदात्तवति " (पा ८.१.७१) इति परस्य तिङ उदात्तत्वम् ॥

[३४-] " इन्द्रो वै " इत्यादि । गतम् ॥

नानुतिष्ठेयुस्तदानीं ते Vयजमानाः एतं लोकव्यवहारक्रमं विस्मृत्य उन्मत्ता मृता वा भवेयुः । तस्मात् Vप्रतीचीनानि अवरोहरूपाणि पृष्ठाख्यान्यहान्यनुष्ठेयानि । तैः अहोभिः Vइमं Vलोकं Vप्रत्यवरोहन्ति । अपि च Vअस्मिन् Vलोके प्रतिष्ठिता अनुन्मत्ताश्च इव भवन्ति ॥

इन्द्र इति ॥ [३५]पूर्वं ' सुवर्गमेव तैर्लोकं यजमाना यन्ति ' इत्यादिना क्रत्ववयवानामहर्विशेषाणां फलोपन्यासमुखेन स्वर्गार्थमयं क्रतुर्विहितः । अथ प्रतिष्ठार्थमिमं क्रतुं विधत्ते - ' इन्द्रो वा अप्रतिष्ठित आसीत् स प्रजापतिमुपाधावत् तस्मा एतमेकविंशतिरात्रं प्रायच्छत् तमाहरत् तेनायजत ततो वै स प्रत्यतिष्ठद्ये बहुयाजिनोऽप्रतिष्ठिताः स्युस्त एकविंशतिरात्रमासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य

---

३२. अ१ - अनून्यादाय । ३३. मै. मै१. अ - विभाषाश्वेः, अ१ - विभाषाश्वेति । ३४-३४. मै२ - ' इन्द्रो - - - - गतम् ' नास्ति ।

---

३५. म - ' पूर्वम् ' नास्ति ।

बहुयाजिनोऽप्रतिष्ठिताः (४) स्युस्त एकविꣳशतिरात्रमासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो

बहुयाजिन इति बहु-याजिनः । अप्रतिष्ठिता इत्यप्रति-स्थिताः (४) । स्युः । ते । एकविꣳशतिरात्रमित्येकविꣳशति-रात्रम् । आसीरन् । द्वादश । मासाः । पञ्च । ऋतवः । त्रयः । इमे । लोकाः । असौ । आदित्यः । एकविꣳश इत्येक विꣳशः । एतावन्तः । वै । देवलोका इति देव-लोकाः । तेषु । एव । यथापूर्वमिति यथा-पूर्वम् । प्रतीति । तिष्ठन्ति । असौ । आदित्यः ।

‘ये बहुयाजिनः ’इत्यादि । Vये बहुभिः यज्ञैः इष्टवन्तोऽपि Vअप्रतिष्ठिताः एव Vस्युः । ‘ते ’इत्यादि । मासर्तुलोकादयः आत्मनो योगस्थानानि । Vएतावन्तः Vदेवलोकाः Vतेषु सर्वेषु Vयथापूर्वम् अनुक्रमेण प्रतिष्ठां गच्छन्ति ॥

[३५]‘ असौ ’इत्यादि । [३६]गतम् -[३५] ॥

एकविꣳश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्ति ’इति ॥ पुरा [३६]यथा Vइन्द्रः प्रजापत्युपदेशादिमं क्रतुमनुष्ठाय Vप्रत्यतिष्ठत् एवं बहुयागान् कृत्वाऽपि Vअप्रतिष्ठिताः यजमाना एतं क्रतुमनुष्ठायाह-र्गतैकविंशतिसंख्यासाम्याद्द्वादशमासाभिमानिदेवस्थानेषु पञ्चस्वृत्वभिमानिदेवस्थानेषु त्रिषु पृथिव्यादिलोकेष्वेकस्मिन्नादित्यलोके च [३७]इत्येतेष्वेकविंशतिस्थानेषु Vयथापूर्वं Vप्रतितिष्ठन्ति तल्लोकवासिनः सर्वे प्राणिनो यथा प्रतिष्ठितास्तद्वत् प्रतितिष्ठन्ति इत्यर्थः ॥

असाविति ॥ एवं प्रतिष्ठार्थं क्रतुं विधाय फलान्तरार्थं पुनर्विधत्ते - ‘असावादित्यो न व्यरोचत स प्रजापतिमुपाधावत् तस्मा एतमेकविꣳशतिरात्रं प्रायच्छत् तमाहरत् तेनायजत ततो वै सोऽरोचत य एवं विद्वाꣳस एकविꣳशतिरात्रमासते रोचन्त एवैकविꣳशतिरात्रो भवति रुग्वा एकविꣳशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविꣳशः ’इति ॥ पुरा कदाचित् आदित्यः स्वर्भान्वाख्येनासुरेण तमसा विद्धोऽन्येन वा मेघहिमादिना निरन्तरमावृतः सन् विशेषेण नादीप्यत । ततः प्रजापत्युपदेशादेतं क्रतुमनुष्ठायादीप्यत ।

३५. मै१. अ१ - असौ वै । ३६. अ - ‘गतम् ’नास्ति ।

३६. इ. वा - यदा । ३७. आ - तेष्व॰, इ. उ. क. म. हा - एतेष्व॰, पा. वा - त एतेष्व॰ ।

न व्यरोचत स प्रजापतिमुपाधावत् तस्मा एतमेकविꣳशतिरात्रं
प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽरोचत य एवं
विद्वाꣳस एकविꣳशतिरात्रमासते (५) रोचन्त
एवैकविꣳशतिरात्रो भवति रुग्वा
एकविꣳशो रुचमेव गच्छन्त्यथो
प्रतिष्ठामेव प्रतिष्ठा

न । वीति । अरोचत । सः । प्रजापतिमिति प्रजा-पतिम् । उपेति । अधावत् । तस्मै । एतम् ।
एकविꣳशतिरात्र-मित्येकविꣳशति-रात्रम् । प्रेति । अयच्छत् । तम् । एति ।
अहरत् । तेन । अयजत । ततः । वै । सः । अरोचत । ये । एवम् ।
विद्वाꣳसः । एकविꣳशतिरात्रमित्येकविꣳशति-रात्रम् ।
आसते (५) । रोचन्ते । एव । एकविꣳशतिरात्र
इत्येकविꣳशति-रात्रः । भवति । रुक् । वै ।
एकविꣳश इत्येक-विꣳशः । रुचम् ।
एव । गच्छन्ति । अथो इति ।
प्रतिष्ठामिति प्रति-स्थाम् ।
एव । प्रतिष्ठेति प्रति-स्था ।

[37]‘रुक्’ इत्यादि । रोचनशीलत्वात् तस्मात् [V]रुचं दीप्तिं प्राप्नुवन्ति । अपि च एकविंशस्य [38]प्रतिष्ठात्वात् [V]प्रतिष्ठाम् अपि [V]गच्छन्ति [V]एव । ‘अतिरात्रौ’ इत्यादि गतम् ।

तद्वदन्येऽपि यजमानाः पूर्वं विद्याधनादिभिर्मनुष्येष्वप्रकाशमाना एतं क्रतुमनुष्ठाय पश्चात् प्रकाशन्ते । किञ्चात्राह्नामेकविंशतिसंख्यासद्भावात् [38]तेनैकविंशस्तोमेन ऋद्धिप्रकाशहेतुत्वाद्ब्रह्मवर्चसं परिगृहीतम् । स च त्रिवृदाद्यपेक्षया प्रौढत्वाद्दीप्यमान इव । अतस्तत्साम्यादेतदनुष्ठायिनोऽपि प्रकाशं प्राप्नुवन्ति, [39-] अपि च प्रतिष्ठामपि प्राप्नुवन्ति [-39] । [40]एकविंशस्तोमस्येतरप्रतिष्ठाधारत्वात् ॥

३७. मैर - रुतव । ३८. अ१ - प्रतिष्ठत्वात् ।

३८. अ. आ. क. पा. हा. इ. वा. म - °विंशतिस्तो° ।

ह्यैकवि॒ꣳशौऽतिरा॒त्राव॒भितौ॑
भवतो॒ ब्रह्मवर्च॒सस्य॑
परि॑गृहीत्यै ॥१०॥

(गृह्ण॒न्ति॒ दि॒वा॒की॒र्त्य॑मे॒वोभय॒तो॒ नाप्र॑तिष्ठिता॒ आस॑त॒ एक॑वि॒ꣳश॒तिश्च॑ ।)

हि । एकवि॒ꣳश इत्येक॑-वि॒ꣳशः । अ॒ति॒रा॒त्रावित्य॑ति-रा॒त्रौ ।
अ॒भितः॑ । भ॒व॒तः॒ । ब्र॒ह्म॒व॒र्च॒सस्येति॑
ब्रह्म-व॒र्च॒सस्य॑ । परि॑गृहीत्या॒
इति॒ परि॑-गृ॒ही॒त्यै॒ ॥१०॥

[कासं ३३.४.६; कपिसं - - - -; मैसं - - - -; वासं - - - -]

ब्रह्मवर्चसपरिग्रहो विशेषः । [39]यथाऽतिरात्रः पृष्ठ्यः षडहः परःसामानस्त्रयः विषूवान् आवृत्ताः परःसामानः प्रतीचीनाः पृष्ठ्यः षडहोऽतिरात्रः इति ॥

॥ इति सप्तमे तृतीये दशमोऽनुवाकः ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै' इति ॥ अस्य विद्यादिप्रकाशहेतुत्वाद्ब्रह्मवर्चसमत्र परिगृहीतं भवति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः ॥

---

३९. मैर - अत्र रात्रः ।

३९-३९. अ. आ. क. पा. हा. इ. वा - 'अपि - - - - प्राप्नुवन्ति' नास्ति । ४०. अ. आ. क. पा. हा. इ. वा. म - °विंशतिस्तोमस्य° ।

अर्वाङ्यज्ञः सं क्रा॑मत्वमुष्मादधि मामभि ।
ऋषीणां यः पुरोहितः ।

अर्वाङ् । यज्ञः । समिति । क्रामतु । अमुष्मात् । अधीति । माम् । अभि ।
ऋषीणाम् । यः । पुरोहित इति पुरः-हितः ।

अथाश्वमेधे [१]अष्टावाप्तीः जुहोति - ' अर्वाङ् ' इत्यादि ॥ प्रथमा गायत्री त्रिपदा । [V]अर्वाङ् इतोमुखः [V]यज्ञः [V]संक्रामतु [२]यजमानं [३]समागच्छतु । कीदृशः ? [V]ऋषीणां ज्ञानवतां यजमानानां [V]यः [V]पुरोहितः सर्वार्थेषु [४]सर्वसाधनभावेन पुरस्तान्निहितः, " पुरोऽव्ययम् " (पा १.४.६७) इति गतित्वात्, " गतिरनन्तरः " (पा ६.२.४९) इति [५]गतेः प्रकृतिस्वरत्वम् । सोऽयं यज्ञः [V]माम् [V]अभि मामेव लक्षीकृत्य अधिकमर्वाक् संक्रामतु [६]अर्वाक् [७]आगच्छतु । [८]अर्वागञ्चतीति " ऋत्विक्° " (पा ३.२.५९) इत्यादिना क्विन्, " क्विन्प्रत्ययस्य कुः " (पा ८.२.६२) इति कुत्वम् । अमुष्मात् [९]देवदत्तादेरपक्रम्य यो मां द्वेष्टि तं हित्वा मामभि संक्रामतु ॥

दशमेऽनुवाके एकविंशतिरात्रोऽभिहितः । [१]अथावशिष्टेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते । तत्रास्मिन्ननुवाके [२]आप्त्याख्यानामष्टानामाहुतीनां मन्त्रा उच्यन्ते । अत एव [३-] ब्राह्मणे विनियोगः[३] पठ्यते - " अर्वाङ्यज्ञः संक्रामत्वित्याप्तीर्जुहोति " (तैब्रा ३.८.१७) इति ॥

अर्वाङिति ॥ तत्र प्रथमामाह - ' अर्वाङ्यज्ञः सं क्रामत्वमुष्मादधि मामभि । ऋषीणां यः पुरोहितः ' इति ॥ [V]यः अश्वमेधाख्यः [V]यज्ञः सः [V]ऋषीणां ज्ञानवतां पूर्वसिद्धानां यजमानानां [V]पुरोहितः सर्वार्थसाधनभावेन [४]पुरस्तादवस्थापितः । स यज्ञः [५V]अमुष्मात् मद्व्यतिरिक्ताद्देवदत्तादेर्यजमानादपक्रम्य [V]माम् [V]अभि मामुद्दिश्य [V]अर्वाङ् अभिमुखः सन् [V]अधिसंक्रामतु आधिक्येनाऽऽदरातिशयेन सम्यगागच्छतु ॥

१. मै. मै१. मै३. अ. अ१ - अष्टावाहुतीः । २. अ. मै१ - ' यजमानम् ' नास्ति । ३. मै२ - गच्छतु । ४. मै. मै२. मै३. अ. अ१ - साधनभावेन । ५. मै. मै१. मै३. अ - ' गतेः ' नास्ति । ६. मै. मै१. मै३. अ. अ१ - ' अर्वाक् ' नास्ति । ७. अ१. मै१ - ' आगच्छतु ' नास्ति । ८. मै२ - ' अर्वागञ्चतीति ' नास्ति । ९. अ१ - देवदत्तारवक्रम्य, मै१ - देवदत्तादपक्रम्य ।

१. अ. आ. क. पा. हा. इ. वा - °श्वमेधगता मन्त्रा । २. अ. आ. क. पा. हा. इ. उ. वा - °मष्टाहुतीनाम् । ३-३. उ - ब्राह्मणः प्रयोगः, शृ१ - ब्राह्मणे विनियोगम् । ४. म - °दवस्थाहितः । ५. इ - अमुष्मिन् ।

निर्दे॑वं॒ निर्वी॑रं कृ॒त्वा विष्क॑न्धं॒ तस्मि॑न् हीयतां॒ यो॑ऽस्मान् द्वेष्टि॑ ।
शरी॑रं यज्ञशम॒लं कुसी॑दं॒ तस्मि॑न्त्सीदतु॒ यो॑ऽस्मान् द्वेष्टि॑ ।

निर्दे॑वमिति॒ निः॒-दे॒वम् । निर्वी॑रमिति॒ निः॒-वी॒रम् । कृ॒त्वा । विष्क॑न्धमिति॒ वि-स्क॒न्ध॒म् । तस्मि॑न् । ही॒यता॒म् । यः । अ॒स्मान् । द्वेष्टि॑ । शरी॑रम् । य॒ज्ञ॒श॒म॒लमिति॑ यज्ञ-श॒म॒लम् । कुसी॑दम् । तस्मि॑न् । सी॒द॒तु । यः । अ॒स्मान् । द्वेष्टि॑ ।

अथ द्वितीया - ‘ निर्देवम् ’ इति ॥ पङ्क्तिविशेषः । [10]Vनिर्देवं निर्गता देवा यस्मात् [11]तं निःस्वाहाकारवषट्कारतया देवैर्बहिष्कृतं Vनिर्वीरं निर्गतवीरं [12]दैवेन पुरुषकारेण [13]च [14]विरहितं Vकृत्वा Vविष्कन्धं [15]विविधशोषं शरीरं कृपणं [16]Vतस्मिन् Vहीयतां स्थाप्यताम् । “ हि गतौ ” (धापा १२८२), दधातेर्वा छान्दसो हिभावः । उत्तरार्धर्चे स्थितं शरीरग्रहणमिह संबध्यते । यद्वा - द्वेष्टरि निर्देवादिगुणे कृते तस्मिन् तस्य शरीरं [17]विविधशोषं हीयतां [18]क्षीयताम् । [19]जहातेः “ घुमास्था° ” (पा ६.४.६६) [20]आदिना [21]ईत्वम् । स्कन्धेर्घञ् । “ वेस्कन्देरनिष्ठायाम् ” (पा ७.३.७३) [22]इति षत्वम् । व्यत्ययेन धत्वम् । सर्वत्राव्ययपूर्वपदप्रकृतिस्वरत्वम् । यद्वा - विरूपस्कन्धावयवं [23]शरीरम् । सुषामादित्वात् (गणपाठ २५४, पा ८.३.४८) षत्वम् । तद्द्वेष्टरि स्थाप्यताम् । तादृशं वा तत् क्षीयतां प्रवृत्त्यभावेन ।

निर्देवमिति ॥ अथ द्वितीयामाह - ‘ निर्देवं निर्वीरं कृत्वा विष्कन्धं तस्मिन् हीयतां योऽस्मान् द्वेष्टि । शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान् द्वेष्टि ’ इति ॥ Vयः पुरुषः Vअस्मान् Vद्वेष्टि तस्य Vशरीरं निर्देवादिविशेषणविशिष्टं Vकृत्वा Vतस्मिन् द्वेषिणि पुरुषे Vहीयतां हीनत्वेनावस्थाप्यताम् । कीदृशं शरीरम् । Vनिर्देवं निर्गता यज्ञाङ्गभूता देवा यस्मात् तन्निर्देवं देवताभक्तिरहितमित्यर्थः । निर्गता वीराः पुत्राः [6]भ्रातरश्च यस्मात् तत् Vनिर्वीरम् । विरूपाः स्कन्धाद्यवयवा यस्य तत् Vविष्कन्धम् । किञ्च Vयः Vअस्मान् Vद्वेष्टि Vतस्मिन् द्वेषिणि पुरुषे [7]Vयज्ञशमलं यज्ञानुष्ठाने मलिनं कदाचिदप्य-

---

१०. अ१. मै१ - ‘ निर्देवम् ’ नास्ति । ११. मै२ - ‘ तम् ’ नास्ति । १२. मै२ - देवेन । १३. अ१ - ‘ च ’ नास्ति । १४. मै२ - रहितमपि । १५. मै. मै२. मै३. अ - विविधशोषणम् । १६. मै१ - तस्मिन् तस्य विविधशोषम् । १७. मै२ - विविधशोषणम् । १८. मै२ - हीयताम् । १९. मै२ - जह्वतेः । २०. अ - आदीनि । २१. अ - नत्वम्, मै१ - षुत्वम् । २२. अ - लिति । २३. मै२ - शरीरत्वात् । २४. मै२ - तत्तदाह ।

---

६. अ. आ. क. पा. हा. उ. इ. वा. वै - भृत्याश्च । ७. म - यज्ञमलम् ।

[आप्तिहोममन्त्राः

यज्ञं यज्ञस्य यत् तेजस्तेन सं क्राम मामभि ।
ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा ते सवाहमा हुवे ।

यज्ञं । यज्ञस्यं । यत् । तेजः । तेनं । समितिं । क्राम । माम् । अभि । ब्राह्मणान् । ऋत्विजः । देवान् । यज्ञस्यं । तपसा । ते । सव । अहम् । एतिं । हुवे ।

---

[२४]तदेवाह - [V]यज्ञशमलं यमेरौणादिको लप्रत्ययः (उसू १.१११) । [२५]अगागमश्च । [V]कुसीदं [२६]वृद्धिप्रयोगजीवनं यज्ञशमलं यज्ञानर्हत्वनिमित्तं [V]तस्मिन् [V]सीदतु [२७]जीविकात्वेन वर्तताम् । [२८]ततश्चायज्ञीयत्वात् " यज्ञेन देवेभ्यः " (तैसं ७.३.१०) इति वचनात् [२९]न कदाचिदप्यनृणः स्यात् । यज्ञनिमित्तानि [३०]च श्रेयांसि न प्राप्नुयात् । [V]यः [V]अस्मान् [V]द्वेष्टि इति ॥

अथ तृतीया - 'यज्ञ यज्ञस्य' इति ॥ उपरिष्टाद्बृहती । [३१-] चतुर्थस्य द्वादशाक्षरत्वात् [-३१] अन्येषां चाष्टाक्षरत्वात् । उक्तं यज्ञो मामभिसंक्रामत्विति, अधुना यज्ञं प्रत्यक्षवदाह - हे [V]यज्ञ [V]यज्ञस्य सम्यगनुष्ठितस्य [३२]तव [V]यत् [V]तेजः [V]तेन [V]माम् [V]अभि [३३][V]संक्राम यथा [३४]मय्यपि [३५-] तेजः स्यात् [-३५] यथा चाहं [V]ब्राह्मणान् [V]ऋत्विजः [३६-][V]देवान् च [-३६] [V]यज्ञस्य [३७]तव [V]तपसा

नुष्ठानरहितमित्यर्थः । तादृशं यत् [V]कुसीदं निरन्तरं [८-]धनवृद्ध्यार्जनरूपं यज्जीवनं [-८] तत् सीदतु, द्वेषी पुमान् यज्ञे विमुखः केवलो वणिग्भूत्वा यथाकथंचित् तिष्ठत्वित्यर्थः ॥

यज्ञ इति ॥ अथ तृतीयामाह - 'यज्ञ यज्ञस्य यत् तेजस्तेन सं क्राम मामभि । ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा ते सवाहमा हुवे' इति ॥ हे अश्वमेधाख्य [V]यज्ञ, सम्यगनुष्ठितस्य[V]यज्ञस्य तव [V]यत् [V]तेजः फलं [V]तेन फलेन सह [V]माम् [V]अभिसंक्राम अभिमुखो भूत्वा मां प्रविश । सूयतेऽभिषिच्यतेऽत्रेत्यभिषेकयुक्तो यज्ञः सवः । हे [V]सव, सम्यगनुष्ठितस्य [V]यज्ञस्य [V]ते तव [V]तपसा सामर्थ्येनानुग्रहरूपेणानुगृहीतः [V]अहं [V]ब्राह्मणान् सदस्यान् [V]ऋत्विजः अध्वर्युप्रभृतीन् [V]देवान् यष्टव्यान् [V]आहुवे इह कर्मण्याह्वयामि ॥

---

२५. मैर - 'अगागमश्च' नास्ति । २६. अ१ - °जीविनम् । २७. अ - जीवित्वात् तेन । २८. मै. मै१. मै२. अ. अ१ - °यज्ञीयत्वम् । २९. मैर - 'न' नास्ति । ३०. मैर - वा । ३१-३१. मैर - चतुर्थत्वादसमानाक्षरत्वात् , अ१ - °क्षरत्वम् । ३२. मैर - 'तव' नास्ति । ३३. मै१ - संक्रामय । ३४. मैर - अहमपि । ३५-३५. मैर - तेजस्वी स्याम् । ३६-३६. मैर - 'देवांश्च' नास्ति । ३७. मैर - 'तव' नास्ति ।

८-८. आ. क - °र्यर्जनेन यज्जी°, अ. पा. इ - °विद्यार्जनं जीवनम् ; हा - विद्यार्जनसमर्थे जीवनम् , म - पुष्ट्यार्जनरूपं जीवनम् ।

इष्टेनं पुक्वमुपं (१) ते हुवे सवाहम् ।
सं तें वृञ्जे सुकृतं सं प्रजां पशून् ।
प्रैषान्त्सामिधेनीराघारावाज्यभागावाश्रुतं

इष्टेनं । पुक्वम् । उपेतिं (१) । ते । हुवे । सव । अहम् । समितिं । ते । वृञ्जे । सुकृतमितिं सु-कृतम् । समितिं । प्रजामितिं प्र-जाम् । पशून् । प्रैषानितिं प्र-एषान् । सामिधेनीरितिं साम्-इधेनीः । आघारावित्यां-घारौ । आज्यभागावित्याज्य-भागौ । आश्रुतमित्या-श्रुतम् ।

[38]इह अस्मिन् प्रयोगे आह्वये आह्वयामि, [39]तव हि तेजसा निर्भयोऽहम् इमान् आह्वातुमर्हामि । हे [40]Vसव महायज्ञ । ह्वयतेर्लटि शपो लुक् । " बहुलं छन्दसि " (पा ६.१.३४) इति संप्रसारणम् ॥

अथ चतुर्थी - 'इष्टेन' इति ॥ द्विपदा जगती [41]द्व्यक्षराधिका । [42]अहमादिः द्वितीयः ★पादः । [43]पादमध्येऽवस्यति, छन्दोविचितिव्यत्ययोऽयम् । हे Vसव त्वयि [44]मामभिसंक्रान्ते Vअहं तव Vइष्टेन त्वत्संबन्धिना [45]यजमानेन [46-]Vपक्वम् Vउपहुवे उपह्वयामि [-46] [47-] मम भोगार्थम् [-47] [48]आकाङ्क्षामि । किं च तवेष्टेन Vसुकृतं Vप्रजां Vपशून् Vसंवृजे [49]समाकर्षामि ॥

इष्टेनेति ॥ अथ चतुर्थीमाह - 'इष्टेन पक्वमुप ते हुवे सवाहम् । सं ते वृञ्जे सुकृतं सं प्रजां पशून्' इति ॥ हे Vसव यज्ञ, Vते Vइष्टेन [9-] त्वदीयेन यजनेन [-9] Vअहं Vपक्वम् Vअन्नम् उपहुवे समीप आह्वयामि । Vते तवानुग्रहात् Vसुकृतं Vसंवृञ्जे सम्यगावर्जितं कुर्वे पुण्यं संपादयामीत्यर्थः । तथा Vप्रजां Vपशून् संपादयामि ॥

३८. मै२ - अनुभावेन । ३९. मै२ - तदैव । ४०. मै२ - सव च । ४१. अ१. मै१ - 'द्व्यक्षराधिका' नास्ति । ४२. मै२ - सनादिः । ★ अ. अ१ - 'पादः' नास्ति । ४३. मै२ - मध्येवस्यति, अ१ - °वसति । ४४. मै. मै१. मै२. मै३. अ - मयि संक्रान्ते । ४५. अ. मै१ - 'यजमानेन' नास्ति । ४६-४६. अ. अ१ - 'पक्व° ---- °ह्वयामि' नास्ति, मै१ - 'उपह्वयामि' नास्ति । ४७-४७. अ - ममारार्थम् (?) । ४८. मै२ - आकर्षामि । ४९. अ१ - समाकाङ्क्षामि, मै१ - समाक्षामि ।

९-९. शृ१ - तदीयेन यजमानेन ।

प्र॒त्याश्रु॑त॒मा शृ॑णामि ते । प्र॒या॒जा॒नू॒या॒जान्त्स्वि॑ष्ट॒कृत॒मिडा॑मा॒शिष॒ आ वृ॑ञ्जे॒ सुवः॑ ।

प्र॒त्याश्रु॑त॒मिति॑ प्रति-आश्रु॑तम् । एति॑ । शृ॒णा॒मि॒ । ते॒ । प्र॒या॒जा॒नू॒या॒जानिति॑ प्रयाज-अ॒नू॒या॒जान् । स्वि॒ष्ट॒कृत॒मिति॑ स्विष्ट-कृत॑म् । इडा॑म् । आ॒शिष॒ इत्या॑-शिषः॑ । एति॑ । वृ॒ञ्जे॒ । सुवः॑ ।

अथ पञ्चमी - 'प्रैषान्' [५०-] इति । उपरिष्टाज्ज्योतिर्जगती, चतुर्थस्य पादस्याष्टाक्षरत्वात् । प्रैषादयः प्रसिद्धाः । [५१]तान् त्वदर्थमाशृणोमि आश्रयामि । श्रयतेर्विकरणव्यत्ययः, [५२]संप्रसारणं छान्दसम् । धात्वन्तरं वा द्रष्टव्यम् । [५३]प्रैष्यन्ते एभिरिति प्रैषाः[-५०] । "प्रादूहोढोढ्येषैष्येषु" (पा ६.२.८९ वा) इति वृद्धिः । थाथादिनोत्तरपदान्तोदात्तत्वम् । [५४]Vसामिधेनीः, [५५-]"समिधामाधाने षेण्यः" (४.३.२० वा) इति षित्वात् ङीष् । आघार्येते इति Vआघारौ । आज्यं भागो ययोः । Vआश्रुतम् आश्रावितम् । "गतिरनन्तरः" (पा ६.२.४९) इति [५६-] गतेः प्रकृतिस्वरत्वम् [-५६] [५७]Vप्रत्याश्रुतम् प्रत्याश्रावितम् । पूर्वेणानन्तरस्य गतेः स्वरः । प्रयाजाः प्रथमयागाः । [५८-] अनूयाजाः पश्चाद्यागाः [-५८] । "प्रयाजानुयाजौ यज्ञाङ्गे" (पा ७.३.६२) इति कुत्वाभावः । स्विष्टं करोतीति स्विष्टकृत् । इडा प्रसिद्धा । एतानाश्रित्य Vआशिषः ★आशंसनीयानि फलानि । "आशासः क्वौ°" (पा ८.४.२० वा) इतीत्वम् । Vसुवः स्वर्गं च Vआवृञ्जे आवृञ्जामि । स्वर्गस्य प्राधान्यात् पुनरुपादानम् यथा - [५९-] ब्राह्मणा आयाता [-५९] वसिष्ठोऽप्यायातः इति [-५५] ।

प्रैषानिति ॥ अथ पञ्चमीमाह - 'प्रैषान्त्सामिधेनीराघारावाज्यभागावाश्रुतं प्रत्याश्रुतमा शृणामि ते । प्रयाजानूयाजान् स्विष्टकृतमिडामाशिष आ वृञ्जे सुवः' इति ॥ प्रैषादीनि यज्ञाङ्गानि प्रसिद्धानि, तानि सर्वाणि तद्वत् सिद्ध्यर्थम् [१०]Vआशृणामि, शास्त्रमुखाच्छ्रुत्वा संपादयामि । तथा प्रयाजादीनि यज्ञाङ्गानि Vसुवः फलरूपं स्वर्गं च Vआवृञ्जे सर्वतः संपादयामि ॥

५०-५०. मै२ - 'इति - - - - प्रैषाः' नास्ति । ५१. मै१ - त्वाम् । ५२. अ१ - प्रसारणम् । ५३. अ१ - प्रेष्यन्ते । ५४. मै. मै१. मै३. अ - 'सामिधेनीः' नास्ति । ५५-५५. मै२ - 'समिधा° - - - - इति' नास्ति । ५६-५६. मै२ - कृतिगतेः स्वरः । ५७. मै१ - प्रत्याश्रितम् । ५८-५८. मै. मै१. मै३. अ. अ१ - 'अनूयाजाः पश्चाद्यागाः' नास्ति । ★ मै. मै२. मै३. अ - आशासनीयानि, अ१ - आशंसति यानि । ५९-५९. मै१ - ब्राह्मण आयातः ।

१०. अ. आ. पा. इ. वा. म - °णामि सर्वतः ।

अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः ।
याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यज्ञमा ददे ते वषट्कृतम् ।

अग्निना । इन्द्रेण । सोमेन । सरस्वत्या । विष्णुना । देवताभिः ।
याज्यानुवाक्याभ्यामिति याज्या-अनुवाक्याभ्याम् ।
उपेति । ते । हुवे । सव । अहम् । यज्ञम् । एति ।
ददे । ते । वषट्कृतमिति वषट्-कृतम् ।

अथ षष्ठी - ‘ अग्निना ’ इति ॥ पुरस्ताज्ज्योतिर्जगती [६०]प्रथमस्याष्टाक्षरत्वात् । अहमादिश्चतुर्थः पादः । अग्न्यादिभिः [६१]हविर्भाग्भिः देवताभिः Vयाज्यानुवाक्याभ्यां च [६२]Vते हविषां [६३]विधिप्रधानाभ्यां च त्वदर्थमहम् Vउप [६४]Vहुवे उपजुहोमि । [६५-] हे Vसव [-६५], पूर्ववच्छपो लुक् । ततश्च Vयज्ञं Vवषट्कृतं कृतवषट्कारम् [६६]अपि [६७]त्वत्प्रसादात् अहम् Vआददे उत्पादयामि । वषट्छब्दस्यौर्यादित्वेन (गणपाठ ५ - पा १.४.६१) गतित्वात् “ गतिरनन्तरः ” (पा ६.२.४९) इति गतेः स्वरः ॥

अग्निनेति ॥ अथ षष्ठीमाह - ‘ अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः । याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यज्ञमा ददे ते वषट्कृतम् ’ इति ॥ हे Vसव, यज्ञाग्न्यादयो ये देवा उक्ता याश्चानुक्ता अन्याः सर्वा देवताः ये च तद्देवताविषये याज्यानुवाक्ये तैः सर्वैः सहितः Vअहं Vते [११]त्वत्सिद्ध्यर्थम् Vउपहुवे समीप एवाध्वर्युप्रभृतीननुष्ठातॄनाह्वयामि । तथा Vते [१२]त्वत्सिद्ध्यर्थं Vवषट्कृतं वषट्कारसहितं Vयज्ञं कृत्स्नप्रयोगम् आददे स्वीकरोमि ॥

---

६०. मै२ - पादस्थाष्टा° । ६१. मै१. अ१ - हविर्भागिभिः । ६२. मै. मै१. मै३. अ. अ१ - ‘ते’ नास्ति । ६३. मै२ - विनाप्रधानाभ्याम् , मै१ - विधिप्रदानाभ्याम् । ६४. मै. मै२. मै३. अ - हवे । ६५-६५. अ. अ१ - ‘हे सव’ नास्ति । ६६. मै. मै१. मै३. अ. अ१ - विलक्षणम् ते । ६७. अ१ - न त्वत्प्रसादात् ।

---

११. म - तव सिद्ध्यर्थम् , इ. वा - त्वां सिद्ध्यर्थम् । १२. अ. हा. पा. इ. उ. वा. म - तव सिद्ध्यर्थम् ।

स्तुत९ँ शस्त्रं प्रतिगरं ग्रहमिडामाशिष (२) आ वृञ्जे सुवः ।
पत्नीसंयाजानुप ते हुवे सवाह९ँ समिष्टयजुरा ददे तव ।
पशून्त्सुतं पुरोडाशान्त्सवनान्योत यज्ञम् ।

स्तुतम् । शस्त्रम् । प्रतिगरमिति प्रति-गरम् । ग्रहम् । इडाम् । आशिष इत्या-शिषः(२) । एति । वृञ्जे । सुवः । पत्नीसंयाजानिति पत्नी-संयाजान् । उपेति । ते । हुवे । सव । अहम् । समिष्टयजुरिति समिष्ट-यजुः । एति । ददे । तव । पशून् । सुतम् । पुरोडाशान् । सवनानि । एति । उत । यज्ञम् ।

अथ सप्तमी - 'स्तुतम्' इत्यादि ॥ [६८]इयमपि [६९]पुरस्ताज्ज्योतिर्जगती । पूर्ववदहमादिः चतुर्थः [७०]पादः । Vस्तुतं स्तोत्रं [७१]तदादीनि [७२]इडान्तानि Vआवृञ्जे आकर्षामि । ततः एतैः Vआशिषः स्वर्गं च आवृञ्जे । किञ्च Vपत्नीसंयाजान् Vते त्वदर्थम् Vअहम् Vउपहुवे [७३]उपजुहोमि । हे Vसव । किञ्च त्वदर्थं Vसमिष्टयजुः [७४]च Vआददे [७५]निर्वर्तयामि ॥

अथाष्टमी - 'पशून्' इति ॥ [७६]आस्तारपङ्क्तिः प्रथमयोरष्टाक्षरत्वात् । उक्तः सामान्येन यज्ञः, अधुना तद्विशेषा उच्यन्ते - Vपशून् अग्नीषोमीयादीन् Vसुतं सोमं Vपुरोडाशान् [७७]सवनीयान्

स्तुतमिति ॥ अथ सप्तमीमाह - 'स्तुत९ँ शस्त्रं प्रतिगरं ग्रहमिडामाशिष आ वृञ्जे सुवः । पत्नीसंयाजावुप ते हुवे सवाह९ँ समिष्टयजुरा ददे तव' इति ॥ [१३-] स्तोत्रशस्त्रादीनि यज्ञाङ्गानि Vसुवः फलरूपं स्वर्गं व Vआवृञ्जे सर्वतः संपादयामि । स्वर्गस्य प्राधान्यात् [१४]पुनरभिधानम् । हे Vसव, त्वत्सिद्ध्यर्थं Vपत्नीसंयाजान् उद्दिश्य Vउपहुवे ऋत्विजः समीपमाह्वयामि । [१५-] तथा तव त्वत्सिद्ध्यर्थम् Vसमिष्टयजुः स्वीकरोमि [-१३] ॥

पशूनिति ॥ अथाष्टमीमाह - 'पशून्त्सुतं पुरोडाशान्त्सवनान्योत यज्ञम् । देवान्त्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्त्सोमवतो ये च विश्वे' इति ॥ येऽग्नीषोमीयादयः पशवः, यश्चाभिषुतः सोमो, ये च

६८. अ१ - द्वयमपि । ६९. अ. मै१ - °र्जगती इति । ७०. मै१. मै२. अ. अ१ - 'पादः' नास्ति । ७१. अ. अ१ - तदादन्येति । ७२. मै२ - एतानि । ७३. मै२ - 'उपजुहोमि' नास्ति । ७४. मै. मै१. मै३. अ - 'च' नास्ति । ७५. अ१ - निवर्तयामि । ७६. मै. मै२. मै३. अ - अस्तारपङ्क्तिः ।

१३-१३. म - 'स्तोत्र° - - - - °करोमि' नास्ति । १४. शृ१ - पुनः पुनरभि° । १५-१५. उ - 'तथा - - - - आह्वयामि' नास्ति ।

देवान्त्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्त्सोमवतो ये च विश्वे ॥११॥

(उप ग्रहमिडामाशिवो द्वात्रिꣳशच्च ।)

देवान् । सेन्द्रानिति स-इन्द्रान् । उपेति । ते । हुवे । सव । अहम् । अग्निमुखानित्यग्नि-मुखान् । सोमवत इति सोम-वतः । ये । च । विश्वे ॥११॥

[कासं, अश्वमेध ३.१ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[V]सवनानि प्रातःसवनादीनि उत अपि च [V]यज्ञं [V]देवान् च [V]सेन्द्रान् [V]ते त्वदर्थम् [V]उपहुवे [७८-]तव समीपे [-७८] आह्वयामि । हे [V]सव, [V]अग्निमुखान् देवान् [V]सोमवतः [V]च, ये [V]च [V]विश्वे देवाः [७९]तांश्चाहमाह्वयामि ॥

॥ इति सप्तमे तृतीये एकादशोऽनुवाकः ॥

सवनीयपुरोडाशा, यानि च प्रातःसवनादीनि, यश्च तैर्निष्पाद्यः कृत्स्नो यज्ञस्तान् सर्वानावृञ्ज इत्यनुवर्तते । हे [V]सव [V]ते त्वत्सिद्ध्यर्थम् [V]अहं [V]देवान् [V]उपहुवे [१६]समीप आह्वयामि [-१६] । कीदृशान् देवान् इन्द्रेण सह वर्तन्त इति [V]सेन्द्रान् । अग्निर्मुखं येषां तेऽग्निमुखास्तान् । सोमो येषामस्ति ते सोमवन्तस्तान् । अपि [V]च ये अन्ये [१७-][V]विश्वेदेवास्तान् सर्वानप्युपहुवे [-१७] ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके एकादशोऽनुवाकः ॥

७७. अ - 'सवनीयान्' नास्ति । ७८-७८. अ. मै१ - त्वत्समीपे । ७९. अ. मै१ - वयमाह्वयामः ।

१६-१६. शृ१. म - 'समीप आह्वयामि' नास्ति । १७-१७. शृ१ - सर्वदेवताः तानप्युपहुवे ।

भूतं भव्यं भविष्यद्वषट्त्स्वाहा नम ऋक् साम यजुर्वषट्त्स्वाहा नमो
गायत्री त्रिष्टुब्जगती वषट्त्स्वाहा नमः पृथिव्यन्तरिक्षं
द्यौर्वषट्त्स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्स्वाहा
नमः प्राणो व्यानोऽपानो
वषट्स्वाहा

भूतम् । भव्यम् । भविष्यत् । वषट् । स्वाहा । नमः । ऋक् । साम । यजुः ।
वषट् । स्वाहा । नमः । गायत्री । त्रिष्टुप् । जगती । वषट् । स्वाहा ।
नमः । पृथिवी । अन्तरिक्षम् । द्यौः । वषट् । स्वाहा । नमः ।
अग्निः । वायुः । सूर्यः । वषट् । स्वाहा । नमः । प्राण
इति प्र-अनः । व्यान इति वि-अनः । अपान
इत्यप-अनः । वषट् । स्वाहा ।

अथ पर्याप्तीर्जुहोति - 'भूतम्' इत्यादि ॥ [V]वषट् [V]स्वाहा [V]नमः इति ब्रह्मणो नामानि । एतैश्च भूतानां सत्यत्वमाख्यायते । एतानि सत्यानीत्यर्थः । एतेभ्यः सत्येभ्यः [V]स्वाहा इति शेषः । सत्यविशेषाणां भूतादीनां [1]वाचकविशेषा वषडादयः । विलक्षणवाचकाभिसंबन्धेन

एकादश आप्त्याख्या मन्त्रा उक्ताः । अथ द्वादशे पर्याप्त्याख्या मन्त्रा उच्यन्ते । तथा च ब्राह्मणे विनियोगः श्रूयते - "भूतं भव्यं भविष्यदिति पर्याप्तीर्जुहोति" (तैब्रा३.८.१७) इति ॥

भूतमिति ॥ तत्र प्रथममन्त्रमाह - 'भूतं भव्यं भविष्यत् वषट्स्वाहा नमः' इति ॥ [1]वषट्कारादीनि त्रीणि ब्रह्मणो नामानि । एभिश्च सत्यत्वमाख्यायते । तथा सति कालत्रयवर्तीनि [2]वस्तूनि सत्यानीति [3]वाक्यार्थो भवति । आदरार्थमेकार्थवाचिनां वषडादीनां त्रयाणां प्रयोगः । एतेभ्यः [V]स्वाहा इति शेषः । एवमुत्तरेष्वपि योजनीयम् ॥

---

१. मै२ - पावकविशेषाः ।

---

१. म - वषडादीनि । २. अ. आ. क. पा. हा. इ. वा - 'वस्तूनि' नास्ति । ३. म - वा अन्यथा ।

नमोऽन्नं कृषिर्वृष्टिर्वषट्त्स्वाहा नमः पिता पुत्रः पौत्रो वषट्त्स्वाहा नमो भूर्भुवः (१) सुवर्वषट्त्स्वाहा नमः ॥१२॥

(भुवश्चत्वारि च ।)

नमः । अन्नम् । कृषिः । वृष्टिः । वषट् । स्वाहा । नमः । पिता । पुत्रः । पौत्रः । वषट् । स्वाहा । नमः । भूः । भुवः (१) । सुवः । वषट् । स्वाहा । नमः ॥१२॥

[कासं-अश्वमेध ३.२; कपिसं ---; मैसं ----; वासं ----]

च एतेषां वैलक्षण्यं व्याख्यायते। सर्वे निगदसिद्धाः। [2]कालवेदच्छन्दोलोकदेवताप्राणजीवनात्मव्याहृतयः [3]क्रमेण सत्याः प्रतिपाद्यन्ते ॥

॥ इति सप्तमे तृतीये द्वादशोऽनुवाकः ॥

ऋक्सामेति ॥ तानेतानुत्तरान् मन्त्रानाह - 'ऋक्साम यजुर्वषट्त्स्वाहा नमो गायत्री त्रिष्टुब् जगती वषट्त्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्त्स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्त्स्वाहा नमः प्राणो व्यानोऽपानो वषट्त्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्त्स्वाहा नमः पिता पुत्रः पौत्रो वषट्त्स्वाहा नमो भूर्भुवः सुवर्वषट्त्स्वाहा नमः' इति ॥ वेदच्छन्दोलोकदेवप्राणान्नपितृव्याहृतिविषया एतेऽष्टौ मन्त्राः। पूर्वेण मन्त्रेण [4]सहितैर्नवभिर्मन्त्रैः पर्याप्त्याख्या आहुतयो होतव्याः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥

२. अ१ - °नात्माव्याहृतयः। ३. अ१ - करणे।

४. अ. आ. क. पा. हा. वा - सहितैर्मन्त्रैर्नवभिः, इ. उ. शृ१. म - सहितैर्नवभिः।

**आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् ।
आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ।**

एति । मे । गृहाः । भवन्तु । एति । प्रजेति प्र-जा । मे । एति । मा । यज्ञः । विशतु । वीर्यावानिति वीर्य-वान् । आपः । देवीः । यज्ञियाः । मा । एति । विशन्तु । सहस्रस्य । मा । भूमा । मा । प्रेति । हासीत् ।

अथ [1]आभूर्जुहोति - 'आ मे गृहाः' इत्यादि ॥ तिस्रस्त्रिष्टुभः [2]जगत्यो [3]वा । प्रथमा - [V]मे मम [V]गृहाः [V]आभवन्तु आभिमुख्येन [4]मम भवन्तु मां प्राप्नुवन्तु । [5][V]प्रजा च [V]मे [V]आभवतु आभिमुख्येन [6]जायताम् । [7][V]यज्ञः माम् [V]आविशतु [V]वीर्यावान् फलदानसमर्थः शक्तिमान् । "अन्येषाम्°" (पा ६.३.१३७) इति दीर्घत्वम् । [V]आपः च देव्यः [V]यज्ञियाः यज्ञसंपादनार्थाः मां [V]विशन्तु । "यज्ञर्त्विग्भ्याम्°" (पा ५.१.७१) इति घः । किञ्च - [V]सहस्रस्य [V]भूमा सहस्रसंबन्धि यत् -[7] [8]बहुतरं [9]- सहस्रगृहात् अन्यूनपदपादादेः -[9] । [10]- सः मां -[10] कदाचिदपि [V]मा [V]प्रहासीत् मा त्याक्षीत् [11]सहस्रादूनर्द्धिभूमिः मा कदाचित् भूवम् । [12]- बहोर्लोपो भू च बहोः "-[12] (पा ६.४.१५८) ॥

पर्याप्तिनामका मन्त्रा द्वादशोऽभिहिताः । अथाऽऽभूनामका होममन्त्रास्त्रयोदशोऽभिधीयन्ते । तथा च ब्राह्मणे विनियोगः - "आ मे गृहा भवन्त्वित्याभूर्जुहोति" (तैब्रा ३.८.१७) इति ॥

आ म इति ॥ तत्र [1]प्रथममाह - 'आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् । आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत्' इति ॥ [2][V]मे मदर्थं [V]गृहाः समीचीना [V]आभवन्तु सर्वतः संपद्यन्ताम् । तथा [V]प्रजा पुत्रादिरूपाऽपि [V]मे [3]मदर्थमाभवतु । तथा [V]वीर्यावान् बलोपेतः [V]यज्ञः च माम् [V]आविशतु । तथा [V]यज्ञियाः यज्ञार्हाः [V]आपः [V]देवीः जलदेवता माम् [V]आविशन्तु । [V]सहस्रस्य [V]भूमा सहस्रसंख्याकस्य धनस्य बाहुल्यं मां कदाचिदपि [V]मा [V]प्रहासीत् मा परित्यजतु ॥

१. मै. मै१. मै३. अ. अ१ - आभूतीः । २. मै. मै१. मै३. अ. आ - जगती । ३. मै. मै१. मै२. अ - 'वा' नास्ति । ४. मै२ - 'मम' नास्ति । ५. मै२ - ताः प्रजाः । ६. मै१. मै२. अ. अ१ - प्रजायताम् । ७-७. मै२ - 'यज्ञः - - - - यत्' नास्ति । ८. मै२ - बहुतरत्वम् । ९-९. मै२ - सह्यप्रधानत्वं नादेशः । १०-१०. अ. अ१. मै१ - समानं न, मै - स मा । ११. मै. मै२. मै३. अ - सहस्रादूनविभूतिः । १२-१२. मै२ - 'बहो° - - - - बहोः' नास्ति ।

१. शृ१. क. हा - प्रथमाम् । २. इ - 'मे' नास्ति । ३. क. हा. पा. अ. इ. वा - °माभवन्तु, म - °मावतु ।

आ मे ग्रहो भवत्वा पुरोरुक् स्तुतशस्त्रे माऽऽविशता᳸ समीची ।
आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत् ।

एति । मे । ग्रहः । भवतु । एति । पुरोरुगिति पुरः-रुक् । स्तुतशस्त्रे
इति स्तुत-शस्त्रे । मा । एति । विशताम् । समीची इति ।
आदित्याः । रुद्राः । वसवः । मे । सदस्याः । सहस्रस्य ।
मा । भूमा । मा । प्रेति । हासीत् ।

अथ द्वितीया - ‘आ मे ग्रहः’ [१३]इति । [१४]Vग्रहः ऐन्द्रवायवादिः [१५]Vमे Vआभवतु । स एवार्थः । Vपुरोरुक् [१६]ग्रहग्रहणमन्त्रश्च मामाविशतु । Vस्तुतशस्त्रे च Vमाम् Vआविशताम् । समीची सम्यङ्निर्वृत्ते । सम्यादेशस्य “चौ” (पा ६.३.१३८) इति दीर्घत्वं, “नपुंसकाच्च” (पा ७.१.१९) इति [१७]शिभावः । आदित्यादयश्च [१८]Vमे मम Vसदस्याः भवन्तु नित्यं यष्टा [१९]ब्रह्म [२०]भूयासम् इत्यर्थः । यद्वा - आदित्यादयः सर्वेऽपि मामाविशन्तु । ‘सहस्रस्य[२१]मा’ इत्यादि । गतम् ॥

आ म इति ॥ अथ [४]द्वितीयमाह - ‘आ मे ग्रहो भवत्वा पुरोरुक् स्तुतशस्त्रे माऽऽविशता᳸ समीची । आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत्’ इति । [५]यागेषु Vमे मदर्थं Vग्रहः [६]अप्यैन्द्रवायवादिः Vआभवतु [६] सर्वतः संपद्यताम् । तथा Vपुरोरुक् ग्रहं ग्रहीतुं पुरतः पठ्यमानो [७]मन्त्रोऽप्याभवतु । तथा स्तोत्रशस्त्रे अपि Vसमीची अनुकूले माम् Vआविशताम् । तथा आदित्याद्या [८]देवाः Vसदस्याः ब्राह्मणाश्च मामाविशन्तु । ‘सहस्रस्य’ इत्यादि पूर्ववत् ॥

आ मा इति ॥ अथ [९]तृतीयमाह - ‘आ माऽग्निष्टोमो विशतूक्थ्यश्चातिरात्रो माऽऽविशत्वापिशर्वरः । तिरोअह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत्” इति ॥ सोमयागेषु

१३. मै१ - ‘इति’ नास्ति । १४. मै१. अ१ - ‘ग्रहः’ नास्ति । १५. मै. मै१. मै३. अ. अ१ - मम । १६. मै. मै१. मै३. अ. अ१ - ग्रहणमन्त्रश्च । १७. मै. मै१. मै३. अ. अ१ - शिः । १८. मै२ - ‘मे’ नास्ति । १९. मै. मै१. मै३. अ. अ१ - ‘ब्रह्म’ नास्ति । २०. मै२ - भूयांसम् । २१. मै. मै२. मै३. अ. अ१ - ‘मा’ नास्ति ।

४. शृ१. क. हा. पा. अ. इ. वा - द्वितीयाम् । ५. अ. आ. क. पा. हा. इ. उ. वा. वै - ‘यागेषु’ नास्ति । ६-६. अ. आ. क. पा. हा. इ. वा. वै - °वादिकः स आभवतु । ७. हा - मन्त्रः आ° म - अपि मन्त्रोऽपि । ८. म - देवताः । ९. शृ१. क. हा. पा. अ. इ. वा - तृतीयामाह ।

आ माऽग्निष्टोमो विंशतू(१)क्थ्यंश्चातिरात्रो माऽऽविंशत्वापिशर्वरः । तिरोअंह्निया मा सुहुता आ विंशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥१३॥

(अग्निष्टोमो विंशत्वष्टादश च ।)

एतिं । मा । अग्निष्टोम इत्यग्नि-स्तोमः । विशतु (१) । उक्थ्यः । च । अतिरात्र इत्यति-रात्रः । मा । एतिं । विशतु । आपिशर्वर इत्यापि-शर्वरः । तिरोअंह्निया इति तिरः-अह्नियाः । मा । सुहुता इति सु-हुताः । एतिं । विशन्तु । सहस्रस्य । मा । भूमा । मा । प्रेति । हासीत् ॥१३॥

[कासं, अश्वमेध ३.३; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

तृतीया - Vअग्निष्टोमः माम् Vआविशतु । [२२]Vउक्थ्यः Vच Vअतिरात्रः[-२२] Vच माम् [२३]Vआविशतु । अतिरात्रो विशेष्यते - Vआपिशर्वरः । [२४-] आपिशर्वरो रात्रिपर्यायो वा [-२४], समुच्चितरात्रिपर्यायो वा । स्वार्थिकोऽण् । Vतिरोअह्नियाः [२५-] रात्रिः सा [-२५] मामाविशतु । Vसुहुताः सुष्ठु हुताः । [२६-] अहनि तिरोभवाः [-२६] [२७]Vतिरोअह्नियाः । " अह्नोऽह्न एतेभ्यः" (पा ५.४.८८) इत्यह्नादेशः, स्वार्थिको यत् । 'सहस्रस्य' इत्यादि । गतम् ॥

॥ इति सप्तमे तृतीये त्रयोदशोऽनुवाकः ॥

प्रथमसंस्थारूपो योऽयम् Vअग्निष्टोमः स माम् Vआविशतु । यश्च द्वितीयसंस्थारूपः Vउक्थ्यः [१०]सोऽपि माम् Vआविशतु । यश्चतुर्थसंस्थारूपः Vअतिरात्रः सोऽपि मामाविशतु । कीदृशोऽतिरात्रः ? Vअपिशर्वरः अपि गतानि प्राप्तानि शर्वर्यां पठितव्यानि स्तोत्राणि यस्यासावपिशर्वरः । तथा Vतिरोअह्नियाः [११]अहः तिरस्कृत्य रात्रौ प्रयोक्तव्या अतिरात्रगताः स्तोमविशेषाः । ते च सुष्ठु हुताः सन्तो माम् Vआविशन्तु । 'सहस्रस्य' इत्यादि ॥ पूर्ववत् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥

२२-२२. अ१ - उक्थ्यश्चतुरात्रः । २३. मै. मै१. मै३. अ. अ१ - आविशत्वेव । २४-२४. मै. मै२. मै३ - °शर्वरी रात्रिपर्यायः । २५-२५. मै१ - रात्रमसौ । २६-२६. मै. मै१. मै३. अ. अ१ - अह्नः तिरोहिताः । २७. मै२ - तिरोअह्नाः ।

१०. अ. आ. क. पा. हा. इ. उ. वा. वै - सोऽयम् । ११. अ. आ. क. पा. हा. इ. वा. म - अह्नस्तिर° ।

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्त्सूर्येण द्यां चन्द्रमसा नक्षत्राणि यमेन पितॄन् राज्ञा मनुष्यान् फलेन नादेयानजगरेण सर्पान् व्याघ्रेणाऽऽरण्यान् पशूञ्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा

अग्निना । तपः । अन्विति । अभवत् । वाचा । ब्रह्म । मणिना । रूपाणि । इन्द्रेण । देवान् । वातेन । प्राणानिति प्र-अनान् । सूर्येण । द्याम् । चन्द्रमसा । नक्षत्राणि । यमेन । पितॄन् । राज्ञा । मनुष्यान् । फलेन । नादेयान् । अजगरेण । सर्पान् । व्याघ्रेण । आरण्यान् । पशून् । श्येनेन । पतत्रिणः । वृष्णा । अश्वान् । ऋषभेण । गाः ।

अथानुभूतीर्जुहोति - ‘ अग्निना ’ [1]इत्यादि ॥ [V]अग्निना [2-V]तपः ऊष्म [-2] [V]अन्वभवत् अनुभवतु स्वीकरोतु, यजमानः अग्न्यात्मा भूत्वा [3]स्वसामर्थ्येन सर्वं तपो व्याप्नोतु । वाग्रूपो भूत्वा सर्वं [4-V]ब्रह्म मन्त्रजातम् [-4] [5]अन्वभवदित्येव । एवं [6]सर्वत्र । छान्दसो [7]लङ् । [V]मणिना

आभूनामका मन्त्रास्त्रयोदशोऽभिहिताः । [1]अथ अनुभूनामकाश्चतुर्दशोऽभिधीयन्ते । तथा च ब्राह्मणे विनियोगः “ अग्निना तपोऽन्वभवदित्यनुभूर्जुहोति ” (तैब्रा ३.८.१७) इति ॥

अग्निनेति ॥ पाठस्तु - ‘ अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्त्सूर्येण द्यां चन्द्रमसा नक्षत्राणि यमेन पितॄन् राज्ञा मनुष्यान् फलेन नादेयानजगरेण सर्पान् व्याघ्रेणाऽरण्यान् पशूञ्छ्येनेन पतत्रिणो वृष्णाश्वानृषभेण गा बस्तेनाजा वृष्णिनाऽवीर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान् ब्राह्मणेन वाचम् ’ इति ॥ अयं यजमानः [V]अग्निना [V]तपः [V]अन्वभवत् अग्निरूपो भूत्वा तत्सामर्थ्येन सर्वं तपो व्याप्नोति । एवमुत्तरेष्वपि त्रयोविंशतिमन्त्रेषु

---

१. अ१ - इत्यादि गतम् । २-२. अ१ - तपो पोषम् , अ - तपोऽन्वभवत् । ३. अ१ - स्वसामर्थ्ये । ४-४. मै१. अ. अ१ - ब्रह्मज्ञानम् , मै२ - ब्रह्म मन्त्रं जातम् । ५. अ२ - अभवदित्येव । ६. अ१ - सर्वम् । ७. अ. मै१ - लुङ् ।

---

१. म - ‘ अथ ’ नास्ति ।

बस्तेनाजा वृष्णिनाऽवीर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान् ब्राह्मणेन (१) वाचम् ॥१४॥

(ब्राह्मणेनैकं च ।)

बस्तेन । अजाः । वृष्णिना । अवीः । व्रीहिणा । अन्नानि । यवेन । ओषधीः । न्यग्रोधेन । वनस्पतीन् । उदुम्बरेण । ऊर्जम् । गायत्रिया । छन्दाꣳसि । त्रिवृतेति त्रि-वृता । स्तोमान् । ब्राह्मणेन (१) । वाचम् ॥१४॥

[कासं, अश्वमेध ३.४ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[८]Vरूपाणि रूपवन्ति । Vफलेन Vनादेयान् रसवतोऽर्थान् । " नद्यादिभ्यो०" (पा ४.२.९७) [९]एयादेशः । Vउदुम्बरेण Vऊर्जं [१०]क्षीरवन्ति [११]वस्तूनि । Vब्राह्मणेन Vवाचं वेदात्मिकाम् ॥

॥ इति सप्तमे तृतीये चतुर्दशोऽनुवाकः ॥

व्याख्येयम् । तृतीयान्तैस्तत्तदात्मकत्वं यजमानस्येत्युच्यते । द्वितीयान्तैर्व्याप्यं वस्तु । अन्वभवदिति सर्वत्रानुषज्यते । Vब्रह्म मन्त्रजातम् । Vरूपाणि प्रतिबिम्बात्मकानि । Vफलेन वृक्षगतेन पक्वेन । Vनादेयान् नदीवत् संपूर्णान् रसान् । [२] मण्डूकादीनामिव मनुष्याणां निगरणे समर्थः प्रौढः सर्पोऽजगरः । वृषा [३] प्रौढः पुरुषोऽश्वः [३] । वाचं [४]वेदात्मिकाम् । स्पष्टमन्यत् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः[२] ॥

८. मै१. अ - रूपाणि मणिना । ९. मै. मै२. मै३. अ. अ१ - ढक् । १०. मै. मै१. मै३. अ. अ१ - वस्तूनि । ११. मै१ - क्षीरवतीम् ।

२-२. वा - ' मण्डूका - - - - चतुर्दशोऽनुवाकः ' नास्ति । ३-३. अ. आ. क. पा. हा. इ. उ. वा. वै - प्रौढोऽश्वः । ४. म - ब्राह्मणधर्मेण ।

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै

स्वाहा । आधिमित्या-धिम् । आधीतायेत्या-धीताय । स्वाहा । स्वाहा । आधीतमित्या-धीतम् । मनसे । स्वाहा । स्वाहा । मनः । प्रजापतय इति प्रजा-पतये । स्वाहा । काय । स्वाहा । कस्मै । स्वाहा । कतमस्मै । स्वाहा । अदित्यै ।

अथ वैश्वदेवानि जुहोति - ‘ स्वाहाऽऽधिम् ’ [१]इत्यादि ॥ अत्र [२-] त्रीणि पूर्वाणि [-२] [३-] दीक्षायां समस्तानि [-३] रात्रिहोमेषु । आधीयतेऽनेनेत्याधिः बुद्धिः । “ उपसर्गे घोः किः ” (पा ३.३.९२) व्यत्ययेन द्वितीया । [V]आधीताय आध्यानाय [४]पर्याप्तो [५]भवतु । ध्यायतेः [६-] छान्दसं संप्रसारणम् । किमर्थम् अस्थाने इदं स्वाहाकारं करोति । उभयतः[७-] स्वाहाकारा मन्त्राः[-७] । यद्वा - प्रथमे स्वाहाकारे जुहोतिः आदानार्थे वर्तते, सुष्ठु आददे इति । तेन कर्मण्येव द्वितीया । अयमर्थः [V]आधिम् [V]स्वाहा जुहोमि । आधीतार्थम् आधीतस्य सिद्धये [८]जुहोमि [-६] । जुहोतेः शपो लुक् मिपो [९]ढादेशः । “ गतिर्गतौ ” (पा ८.१.७०) इति निघातः, [१०-] गतिना च [-१०]

---

[१]अनुभूनामका मन्त्राश्चतुर्दशोऽभिहिताः । अथ पञ्चदशे वैश्वदेवाख्या आहुतिमन्त्रा उच्यन्ते ॥

कल्पः - “ आकूत्यै प्रयुजेऽग्नये स्वाहेति चत्वार्यौद्ग्रहणानि जुहोति स्वाहाऽऽधिमाधीताय स्वाहेति त्रीणि [२]वैश्वदेवानि, [३]सोऽयं दीक्षाहुतिकालो विवृद्धः सप्ताहमन्वहमौद्ग्रहणैर्वैश्वदेवैश्च [४]उत्तरैः प्रचरति षडुत्तमेऽहन्यौद्ग्रहणनि जुहोति सर्वस्मै स्वाहेति पूर्णाहुतिमुत्तमाम् ” (आपश्रौ २०.८.५-९) इति ॥

तत्रौद्ग्रहणमन्त्राः प्रथमकाण्डे समाम्नाताः । वैश्वदेवमन्त्रा इहाम्नायन्ते ।

स्वाहेति ॥ तत्र प्रथमदिन[[५]गतान्] मन्त्रानाह - ‘ स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा ’ इति ॥ एते च मन्त्रा उभयतःस्वाहाकाराः । तत्राऽन्तिमस्वाहाकारो

---

१. अ१ - आदीनि । २-२. मै२ - पूर्वाणि त्रीणि । ३-३. मै१. अ. अ१ - दीक्षासमस्तानि । ४. मै२ - पर्याप्तये । ५. मै२ - ‘ भवतु ’ नास्ति । ६-६. मै२ - ‘ छान्दसं - - - - जुहोमि ’ नास्ति । ७-७. अ१ - °स्वाहाकारमन्त्राः । ८. मै. मै१. मै२. मै३. अ - ‘ जुहोमि ’ नास्ति । ९. अ - थाथादेशः । १०-१०. मै२ - गतिश्चेति ।

---

१. वा - ‘ अनुभूनामका ’ नास्ति । २. अ. आ. इ. वा. म - °देवानि इति । ३. म - नायम् । ४. [कल्पमादृत्यास्माभिः शुद्धीकृतोऽयं पाठः ।] आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ‘ उत्तरोत्तरैः ’ इति पाठो लभ्यते । ५. [भाष्यकारशैलीमभिवीक्ष्यास्माभिः प्रपूरितोऽयमंशो द्रष्टव्यः ।] ।

स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे

स्वाहा । अदित्यै । मह्यै । स्वाहा । अदित्यै । सुमृडीकाया इति सु-मृडीकायै । स्वाहा । सरस्वत्यै । स्वाहा । सरस्वत्यै । बृहत्यै । स्वाहा । सरस्वत्यै । पावकायै । स्वाहा । पूष्णे । स्वाहा । पूष्णे । प्रपथ्यायेति प्र-पथ्याय । स्वाहा । पूष्णे । नरन्धिषाय । स्वाहा । त्वष्ट्रे ।

समासः । व्युत्पत्त्यनवधारणादनवग्रहः । द्वितीयस्वाहाकारः [११]प्रदानार्थः । एवं सर्वत्र । [V]आधीतम् आध्यातं [V]मनसे पर्याप्तं [१२]भवतु । [V]मनः च [V]प्रजापतये यजमानाय वा पर्याप्तं भवतु । [V]काय प्रजापतये । संज्ञात्वात् सर्वनामत्वाभावः । [१३][V]कस्मै [१४]अविज्ञातशीलाय । सर्वात्म्यात् सर्वनामत्वम् । [V]कतमस्मै अनिर्धारितविशेषात्मने । [V]अदित्यै पृथिव्यै [१५]देवमात्रे वा । [V]मह्यै महत्यै [V]सुमृडीकायै सुसुखायै सुष्ठु वा मुखयित्र्यै । [V]पावकायै शोधयित्र्यै । " पावकादीनां छन्दसि " (पा ७.२.६९ वा) इतीत्वाभावः । [V]पूष्णे । उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता ।

---

[६]हविःप्रदाने वर्तते । प्रथमस्तु स्वाहाकारो निपाता अनेकार्था इति न्यायेनोचितार्थे योजनीयः । आ समन्ताद्धीयते स्थाप्यते मन्त्राद्यनुष्ठाननिर्णयोऽस्यां बुद्धावित्याधिर्बुद्धिस्तां बुद्धिं [V]स्वाहा संपादयामीत्यत्रोचितार्थः । [V]आधीताय तस्यां बुद्धौ स्थापिताय मन्त्राभिमानिने देवाय [७][V]स्वाहा स्वाहुतमिदमस्तु । तथा [८][V]आधीतं बुद्धौ संगृहीतं [९]मन्त्रादिकं स्वाहा विस्मरणमन्तरेण धारयामि । [V]मनसे तद्धारणसमर्थायान्तःकरणाय स्वाहुतमिदमस्तु । तथा [V]मनः तथाविधमन्तःकरणं [V]स्वाहा संपादितवानस्मि । [V]प्रजापतये तस्य मनसः प्रेरकाय स्वाहुतमिदमस्तु ॥

कायेति ॥ अथ [१०]द्वितीयदिनगतान् मन्त्रानाह - 'काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा' - इति ॥ प्रथममन्त्रगतः कशब्दः [११]प्रजापतिवाचकः । " को ह वै नाम प्रजापतिः " (तैब्रा २.१०.२) इति

---

११. अ१ - प्रदानार्थमेवम् । १२. मै२ - एवं च । १३. मै२ - यस्मै । १४. मै. मै१. मै३. अ. अ१ - अज्ञातस्वरूपाय । १५. मै१. अ. अ१ - देवमाता ।

---

६. आ - हविष्प्रदाने । ७. अ. आ. पा. म - 'स्वाहा' नास्ति । ८. शृ१ - आधीतबुद्धौ । ९. अ. आ. क. पा. हा. इ. वा. वै - 'मन्त्रादिकम्' नास्ति । १०. अ. आ. पा. हा. इ. वा. म - °दिनमन्त्रान् । ११. म - प्रजापतिवाची ।

स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा (१) विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा ॥१५॥

(पुरुरूपाय स्वाहा दश च ।)

स्वाहा । त्वष्ट्रे । तुरीपाय । स्वाहा । त्वष्ट्रे । पुरुरूपायेति पुरु-रूपाय । स्वाहा (१) । विष्णवे । स्वाहा । विष्णवे । निखुर्यपायेति निखुर्य-पाय । स्वाहा । विष्णवे । निभूयपायेति निभूय-पाय । स्वाहा । सर्वस्मै । स्वाहा ॥१५॥

[कासं, अश्वमेध ३.५; कपिसं - - - - ; मैसं - - - - ; वासं ३०.१-५]

Vप्रपथ्याय प्रकृष्टः पन्थाः प्रपथः तस्मै हिताय । [१६-] तत्र भवाय [-१६] वा । Vनरन्धिषाय नराणां धारयित्रे । दधातेः छान्दसः खच् , [१७]धिषिभावश्च । पूर्वपदान्तोदात्तत्वं [१८]च । Vतुरीपाय तूर्णमाप्नुवते । पृषोदरादिः । Vपुरुरूपाय " परादिश्छन्दसि°" (पा ६.२.१९९)

श्रुत्यन्तरात् । द्वितीयमन्त्रगतस्तु कशब्दः सर्वनामत्वात् प्रशस्तवाची । तेन चाविज्ञातं लक्ष्यते । ईदृशोऽयमिति केनापि ज्ञातुमशक्य इत्यर्थः । कतमशब्दो बहूनां मध्ये निर्धारणप्रश्ने वर्तते । तेन [१२]च सर्वेषु [१३]देवेषु मध्ये [१४-]शास्त्रविचारेण निर्धारणस्वरूप [-१४] इत्युक्तं भवति ॥

अदित्या इति ॥ अथ तृतीयदिनगतान् मन्त्रानाह - ' अदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा ' इति ॥ अदितिर्भूमिः । मही विस्तीर्णा । सुमृडीका सुखप्रदा ॥

सरस्वत्या इति ॥ अथ चतुर्थदिनगतान् मन्त्रानाह - ' सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा ' इति ॥ Vपावकायै शोधयित्र्यै ॥

पूष्ण इति ॥ [१५]अथ पञ्चमदिनगतान् मन्त्रानाह - ' पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिपाय स्वाहा ' इति ॥ प्रकृष्टाय श्रौतस्मार्तमार्गाय हितः प्रपथ्यः । नराणां धारयिता नरंधिषः ॥

त्वष्ट्र इति ॥ अथ षष्ठदिनगतान् मन्त्रानाह - ' त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा ' इति ॥ तूर्णं प्राप्तस्तुरीपः । बहुमूर्तिविशेषैर्युक्तः पुरुरूपः ॥

१६-१६. मैर - ' तत्र भवाय ' नास्ति । १७. मै. मै१. मैर. मै३ - भष्भावश्च, अ - धिषभावावश्च । १८. मैर - ' च ' नास्ति ।

१२. इ. वा - ' च ' नास्ति । १३. वा - देशेषु , शृ१. इ. म - ' देवेषु ' नास्ति । १४. अ. आ. पा. हा. इ. वा - शास्त्रविवरणनिर्धा° । १५. अ. पा. हा. इ. वा. म - ' अथ ' नास्ति ।

इत्युत्तरपदाद्युदात्तत्वम् । [V]निखुर्यपाय [१९]खुरच्छेदने नियमेन पापरोगादिभिः [२०]बाध्यमानानां [२१]जनानां पात्रे । छान्दसः [२२]क्यप् । [V]निभूयपाय [२३]न्यग्भवनीयाः कर्मभिः निभूयाः तेषां पात्रे । पूर्ववत् क्यप् । गतमन्यत् ॥

॥ इति सप्तमे तृतीये पञ्चदशोऽनुवाकः ॥

विष्णव इति ॥ अथ सप्तमदिनगतान् मन्त्रानाह - 'विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा ' इति ॥ नितरां खुरं [१६]पापरोगादिबाधमर्हन्तीति निखुर्याः । तेषां पाता निखुर्यपः । विद्यैश्वर्यादिराहित्येन न्यग्भावयोग्या निभूयास्तेषां पाता निभूयपः ॥

सर्वस्मा इति ॥ अथ पूर्णाहुतिमन्त्रमाह - ' सर्वस्मै स्वाहा ' इति ॥ सर्वप्रकारपालकाय स्वाहुतमित्यर्थः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके पञ्चदशोऽनुवाकः ॥

---

१९. मै१ - खुरभेदने । २०. अ१ - बाधमानानाम् । २१. मै१. अ. अ१ - 'जनानाम् ' नास्ति । २२. अ - क्विप् । २३. मै१. अ. अ१ - सम्यग्भवनीयाः ।

---

१६. शृ१ - °रोगदिना बाध°, क - पापपादतोगोविबाध°, अ. पा. हा. इ. वा -पापपादतोगाविबाध° ।

दद्भ्यः स्वाहा हनूभ्या९ँ स्वाहोष्ठाभ्या९ँस्वाहा मुखाय स्वाहा नासिकाभ्या९ँ स्वाहाऽक्षीभ्या९ँ स्वाहा कर्णाभ्या९ँ स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्या९ँ स्वाहा

दद्भ्य इति दत्-भ्यः । स्वाहा । हनूभ्यामिति हनू-भ्याम् । स्वाहा । ओष्ठाभ्याम् । स्वाहा । मुखाय । स्वाहा । नासिकाभ्याम् । स्वाहा । अक्षीभ्याम् । स्वाहा । कर्णाभ्याम् । स्वाहा । पारे । इक्षवः । अवार्येभ्यः । पक्ष्मभ्य इति पक्ष्म-भ्यः । स्वाहा । अवारे । इक्षवः । पार्येभ्यः । पक्ष्मभ्य इति पक्ष्म-भ्यः । स्वाहा । शीर्ष्णे । स्वाहा । भ्रूभ्याम् । स्वाहा ।

अथाश्वस्याङ्गानि जुहोति - 'दद्भ्यः स्वाहा ' [1]इत्यादि ॥ " पद्दन्° " (पा ६.१.६३) इत्यादिना [2]दद्भावः, " ऊडिदम्° " (पा ६.१.१७१) इत्यादिना विभक्तेरुदात्तत्वम् । [V]हनूभ्याम्, [3]स्वाङ्गदीर्घत्वम् । [V]अक्षीभ्याम् । " ई च द्विवचने " (पा ७.१.७७) इतीकारः, स चोदात्तः । ' पार इक्षवः ' इत्यादि । [V]इक्षवः अक्षिरोमाणि [V]पारे [4]अक्ष्युपरिपुटे ये इक्षवः ते [V]अवार्येभ्यः [5]अधराक्षिपुटस्थेभ्यः पक्ष्मरोमभ्यः प्रवर्तन्ते तदर्थं, तानि वा अपेक्ष्येत्यर्थः । तेभ्यः [V]स्वाहा इति । एवम् [6]अधरे अधरपुटे [7] ये इक्षवः ते [V]पार्येभ्यः उत्तराक्षिपुटस्थेभ्यः [8]पक्ष्मरोमभ्यः प्रवर्तन्ते तदर्थं

पञ्चदशे [1]वैश्वदेवाहुतिमन्त्रा उक्ताः । षोडशे पश्वङ्गहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम् - " दद्भ्यः स्वाहा हनूभ्या९ँ स्वाहेत्यङ्गहोमाञ्जुहोति " (तैब्रा ३.८.१७) इति ॥

दद्भ्य इति ॥ पाठस्तु - 'दद्भ्यः स्वाहा हनूभ्या९ँ स्वाहोष्ठाभ्या९ँस्वाहा मुखाय स्वाहा नासिकाभ्या९ँ स्वाहाऽक्षीभ्या९ँ स्वाहा कर्णाभ्या९ँ स्वाहा पारइक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवारइक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्या९ँ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्या९ँ स्वाहाऽ९ँसाभ्या९ँ स्वाहा दोषभ्या९ँ स्वाहा बाहुभ्या९ँ स्वाहा जङ्घाभ्या९ँ स्वाहा श्रोणीभ्या९ँ

१. अ१ - इत्यादीनि । २. अ१ - पद्भावः । ३. अ१ - स्वाहाङ्गदीर्घत्वम्, मै२ - स्वाङ्गहूतिकं दीर्घत्वम् । ४. अ१ - अक्षीणि उपरिपुटे । ५. मै२ - अधोक्षि° । ६. मै१. मै२ - अवारे । ७. मै२ - 'ये ' नास्ति । ८. मै२ - पक्ष्मभ्योऽक्षिरोमेभ्यः, मै१ - पक्ष्मलोमभ्यः ।

१. शृ१ - वैश्वकर्माहुति°, म - वैश्वदेवकर्माहुति° ।

ल॒लाटा॑य॒ स्वाहा॑ मू॒र्ध्ने स्वाहा॑ म॒स्तिष्का॑य॒ स्वाहा॒ केशे॑भ्यः॒ स्वाहा॒ वहा॑य॒ स्वाहा॑ ग्री॒वाभ्यः॒ स्वाहा॑ स्क॒न्धेभ्यः॒ स्वाहा॒ कीक॑साभ्यः॒ स्वाहा॑ पृ॒ष्टीभ्यः॒ स्वाहा॑ पाज॒स्या॑य॒ स्वाहा॑ पा॒र्श्वाभ्याꣳ॒ स्वाहा॑ (१) अꣳसाभ्याꣳ॒ स्वाहा॑ दो॒षभ्याꣳ॒ स्वाहा॑

ल॒लाटा॑य । स्वाहा॑ । मू॒र्ध्ने । स्वाहा॑ । म॒स्तिष्का॑य । स्वाहा॑ । केशे॑भ्यः । स्वाहा॑ । वहा॑य । स्वाहा॑ । ग्री॒वाभ्यः॑ । स्वाहा॑ । स्क॒न्धेभ्यः॑ । स्वाहा॑ । कीक॑साभ्यः । स्वाहा॑ । पृ॒ष्टीभ्य॒ इति॑ पृ॒ष्टि-भ्यः॒ । स्वाहा॑ । पा॒ज॒स्या॑य । स्वाहा॑ । पा॒र्श्वाभ्या॑म् । स्वाहा॑ (१) । अꣳसाभ्या॑म् । स्वाहा॑ । दो॒षभ्या॒मिति॑ दो॒ष-भ्या॒म् । स्वाहा॑ ।

तानि वा अपेक्ष्य तेभ्यः [V]स्वाहा इति । एवं [९]परस्परोपकारपरत्वमुभयेषां पक्ष्मणामुक्तम् , पक्ष्मनिमित्तत्वात् [१०]अक्ष्णोः ईक्षणसामर्थ्यस्य । उभयत्रापि दिगादित्वाद्यत् (गणपाठ १११, पा ४.३.५४) । [११]द्वितीये व्यत्ययेन “ यतोऽनावः ” (पा ६.१.२१३) इत्याद्युदात्तत्वाभावः । [V]शीर्ष्णे उदात्तनिवृत्तिस्वरेण [१२]विभक्तेरुदात्तत्वम् । [V]भ्रूभ्याम् । उक्तं विभक्त्युदात्तत्वम् । “ सावेकाचः° ” (पा ६.१.१६८) इति । [V]मूर्ध्ने [१३]पूर्ववदुदात्तनिवृत्तिस्वरत्वम् । [V]मस्तिष्काय शिरोमांसाय । [V]वहाय वहनदेशाय । [V]ग्रीवाभ्यः धमनीभ्यः । [V]कीकसाभ्यः ग्रीवाया आरभ्य पृष्ठवंशास्थिगुलिकाभ्यः ।

स्वाहोरुभ्याꣳ स्वाहाऽष्ठीवद्भ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा भसदे स्वाहा शिखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽण्डाभ्याꣳ स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माꣳसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहाऽङ्गेभ्यः स्वाहाऽऽत्मने स्वाहा सर्वस्मै स्वाहा ' इति ॥ अत्र दन्तहन्वादयोऽश्वस्यावयवाः प्रसिद्धाः । [V]इक्षवः अक्षिरोमाणि । ते च [V]पारे उपरिभागे [२]वर्तन्ते । कस्मात् पार इति तदुच्यते, [V]अवार्येभ्यः [V]पक्ष्मभ्यः अधोभागवर्तिभ्यो रोमभ्य उपरि वर्तन्ते । एतादृशा ये [३]सन्ति तेभ्यः [V]स्वाहा इति योजनीयम् । एवं [४][V]पार्येभ्यः पक्ष्मभ्योऽवारेऽधोभागे [५]यानि कानिचित् पक्ष्मरोमणि [५]वर्तन्ते । अत्र शिरःशब्देन [६]ललाटमध्यभागो

९. मै. मै१. मै३. अ. अ१ - °रोपकारित्व° । १०. मै२ - ‘अक्ष्णोः’ नास्ति । ११. मै१ - द्वितीयेन [संहितास्थपार्येभ्यः इति शब्दस्य ।] १२. मै२ - °रुदात्ता । १३. मै२ - °निवृत्तिस्वरः ।

२. म - वर्तन्ते इति । ३. पा. अ - ‘ सन्ति ’ नास्ति । ४. शृ१ - पार्श्वेभ्यः । ५-५. अ. आ. क. पा. हा. इ. वा - ये केचिदिक्षवः । ६. अ. आ. क. पा. हा. इ. वा. म - ललाटादधोभागः ।

अश्वाङ्गहोममन्त्राः]

बाहुभ्यां स्वाहा जङ्घाभ्यां स्वाहा श्रोणीभ्यां स्वाहोरुभ्यां स्वाहाऽष्ठीवद्भ्यां स्वाहा जङ्घाभ्यां स्वाहा भसदे स्वाहा शिखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽण्डाभ्यां स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः स्वाहा लोमभ्यः

बाहुभ्यामिति बाहु-भ्याम् । स्वाहा । जङ्घाभ्याम् । स्वाहा । श्रोणीभ्यामिति श्रोणि-भ्याम् । स्वाहा । ऊरुभ्यामित्यूरु-भ्याम् । स्वाहा । अष्ठीवद्भ्यामित्यष्ठीवत्-भ्याम् । स्वाहा । जङ्घाभ्याम् । स्वाहा । भसदे । स्वाहा । शिखण्डेभ्यः । स्वाहा । वालधानायेति वाल-धानाय । स्वाहा । अण्डाभ्याम् । स्वाहा । शेपाय । स्वाहा । रेतसे । स्वाहा । प्रजाभ्य इति प्र-जाभ्यः । स्वाहा । प्रजननायेति प्र-जननाय । स्वाहा । पद्भ्य इति पत्-भ्यः । स्वाहा । शफेभ्यः । स्वाहा । लोमभ्य इति लोम-भ्यः ।

Vपृष्टीभ्यः, हस्तयोरुपरि पृष्ठवंशस्योभयतः स्थितानि अस्थीनि पृष्टयः । सांहितिकं दीर्घत्वं छान्दसम् । Vपाजस्याय पाजो बलं तत्र भवाय हृदयाय । Vदोषभ्याम् । "पद्दन्°" (६.१.६३) इत्यादिना दोषन्भावः । १४-Vजङ्घाभ्यां Vश्रोणीभ्यां-१४, छान्दसं संहितायां दीर्घत्वम् ।

विवक्षितः । मूर्धशब्देन ७चोपरिभागः । तत्रत्यं मांसं मस्तिष्कम् । वहशब्देन रथयुगस्य वाहकप्रदेश उच्यते । ग्रीवाशब्देन गलगता नाड्यः । स्कन्धशब्देन गलस्योपरिभागावयवाः । कीकसाशब्देन पृष्ठास्थिगता गुलिकाः । पृष्टिशब्देनोभयपार्श्वगता अस्थिविशेषाः । पाजो बलं तत्स्थानं हृदयं पाजस्यम् । दोःशब्देन बाहुशब्देन च पूर्वपदयोरुत्तराधरभागावुच्येते । जङ्घाशब्देन मध्यभागः । श्रोण्यादिशब्दैश्चतुर्भिः पृष्ठगतयोः पादयोश्चत्वार ऊर्ध्वाधोभागा उच्यन्ते । ८भसच्छब्देन अपानप्रदेशः । शिखण्डा ऊर्ध्वकेशाः । वालधानं पुच्छदण्डः ।

१४-१४. मै१ - 'जङ्घाभ्यां श्रोणीभ्याम्' नास्ति ।

---

७. शृ१ - य उपरिभागः । ८. शृ१ - सर्वशब्देन, म - भसदिशब्देन ।

स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माꣳसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहा (२)ऽङ्गेभ्यः स्वाहाऽऽत्मने स्वाहा सर्वस्मै स्वाहा ॥१६॥

(पार्श्वाभ्याꣳ स्वाहा मज्जभ्यः स्वाहा षट् च ।)

स्वाहा । त्वचे । स्वाहा । लोहिताय । स्वाहा । माꣳसाय । स्वाहा । स्नावभ्य इति स्नाव-भ्यः । स्वाहा । अस्थभ्य इत्यस्थ-भ्यः । स्वाहा । मज्जभ्य इति मज्ज-भ्यः । स्वाहा (२) । अङ्गेभ्यः । स्वाहा । आत्मने । स्वाहा । सर्वस्मै । स्वाहा ॥१६॥

[कासं, अश्वमेध ३.६; कपिसं - - - -; मैसं - - - -; वासं - - - -]

जङ्घाभ्यामपराभ्याम् । [V]भसदे अपानप्रदेशाय । [V]शिखण्डेभ्यः [१५]चूडेभ्यः । [V]वालधानाय पुच्छाय । [१६][V]अण्डाभ्यां [१७]वृषणाभ्याम् । [V]प्रजननाय [१८]शेपस्येवैकदेशाय । [V]पद्भ्यः, पूर्ववत् पद्भावः (पा ६.१.६३) स्वरश्च ।

॥ इति सप्तमे तृतीये षोडशोऽनुवाकः ॥

प्रजननमुत्पादनसामर्थ्यम् । अङ्गान्यनुक्तावयवाः । आत्मा [९-] तत्रत्यो जीवः [-९] । सर्वं कृत्स्नशरीरम् । एतैः पञ्चाशन्मन्त्रैरङ्गहोमान् कुर्यात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके षोडशोऽनुवाकः ॥

१५. अ. अ१ - जटाभ्यः, मै१ - भटाभ्यः । १६. अ. अ१ - अण्ड्याभ्याम् । १७. मै. मै१. मै३ - 'वृषणाभ्याम्' नास्ति । १८. [संहितामनुरुध्यास्माभिः शुद्धीकृतः पाठः, मै - मुद्रितपुस्तके सर्वेष्वपि लिखितपुस्तकेषु 'शफस्यै°' इति लभ्यते ।] ।

९-९. क - तत्र जीवः, म - तत्रतोवयवमः ।

सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा (१) सर्वस्मै स्वाहा ॥१७॥

(रूपाय स्वाहा द्वे च ।)

सदृशाय । स्वाहा । विसदृशायेति वि-सदृशाय । स्वाहा । सुसदृशायेति सु-सदृशाय । स्वाहा । रूपाय । स्वाहा (२) । सर्वस्मै । स्वाहा ॥

[कासं-अश्वमेध ३.७ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

श्वेतशरीरप्रकाशायेत्यन्ये । [V]अञ्जये सर्वशुक्लाय । [V]ललामाय [12]ललामवते । [V]असितज्ञवे, छान्दसो ज्ञुभावो जानुनः । [V]कृष्णैताय कृष्णश्चासावेतश्च, स्वरसमासौ [13]पूर्ववेव (पा ६.२.३, २.१.६९) । एवमुत्तरयोरपि । [14]रोहितः शुक्लाधिको रक्तः । [V]ईदृशाय इदमिव पश्यत्यात्मानमिति " त्यदादिषु दृशः°" (पा ३.२.६०) इति कन्प्रत्ययः, " इदंकिमोरीश्की " (पा ६.३.९०) । एवं [V]कीदृशाय [V]सदृशाय " समानान्ययोश्च°" (पा ३.२.६० वा) इति कन् । योगविभागात् अन्यत्रापीष्यते इति समानस्य सभावः । [V]रूपाय रूपमात्राय । [V]सर्वस्मै अनुक्तायापि ॥

॥ इति सप्तमे तृतीये सप्तदशोऽनुवाकः ॥

ईदृशः । किमिति अनिश्चितत्वेन [9]अवभासमानः कीदृशः । दूरस्थदृष्टान्तेनोपमीयमानस्तादृशः । समीपस्थदृष्टान्तेनोपमीयमानः सदृशः । उपमारहितो विसदृशः । सुखेनोपमातुं शक्यः सुसदृशः । आकारसामान्यं रूपम् । अनुक्तसंग्रहार्थः सर्वशब्दः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥

१२. अ१ - ललामवर्णाय । १३. मै२ - पूर्ववत् । १४. मै. मै१. मै३. अ. अ१ - लोहितः ।

९. म - अवभासः ।

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा

कृष्णाय । स्वाहा । श्वेताय । स्वाहा । पिशङ्गाय । स्वाहा । सारङ्गाय । स्वाहा । अरुणाय । स्वाहा । गौराय । स्वाहा । बभ्रवे । स्वाहा । नकुलाय । स्वाहा । रोहिताय । स्वाहा । शोणाय । स्वाहा । श्यावाय । स्वाहा । श्यामाय । स्वाहा । पाकलाय । स्वाहा । सुरूपायेति सु-रूपाय । स्वाहा । अनुरूपायेत्यनु-रूपाय । स्वाहा ।

पुनरप्यश्वरूपाणि [1-] जुहोति - 'कृष्णाय' [2]इति ॥ अवयवरूपाणि [-1] प्रायशः पूर्वत्र, इह तु अवयविरूपाणीति पृथगारम्भः । कृष्णादयः प्रसिद्धाः । [V]पिशङ्गाय गोरोचनवर्णाय । [V]सारङ्गाय चातकवर्णाय । [V]अरुणाय अरुणवर्णाय । [V]गौराय शुक्लाय । [V]बभ्रवे कपिलपाण्डराय । [V]नकुलाय नकुलवर्णाय । [V]रोहिताय लोहितवर्णाय अतिरक्ताय । [V]शोणाय पीतलोहिताय । [V]श्यावाय पीतकृष्णाय । [V]श्यामाय नीलाय । [V]पाकलाय अव्यक्तकृष्णाय, [3]पाकजकृष्णसवर्णायेति केचित् । [V]सुरूपाय शोभनरूपाय । [4-V]अनुरूपाय अनुकूलरूपाय ।

सप्तदशोऽश्वावयवरूपमन्त्रा उक्ताः । [1]अथ अष्टादशे [2]त्ववयविरूपमन्त्रा उच्यन्ते । विनियोगस्तु पूर्वमेवोदाहृतः ॥

कृष्णायेति ॥ पाठस्तु - 'कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्याबाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा' इति ॥ कृत्स्नेऽपि शरीरे कार्ष्ण्ययुक्तः कृष्णः । एवं श्वेतादयः । पिशङ्गो गोरोचनवर्णः । सारङ्गश्चातकवर्णः ।

१-१. अ१ - 'जुहोति - - - - °रूपाणि' नास्ति, मै१ - 'जुहोति' नास्ति । २. मै२ - इत्यादि । ३. मै१. अ. अ१ - पाकजकृष्णायेति । ४-४. मै. मै३ - 'अनुरूपाय - - - - °रूपाय' नास्ति, मै१ - अनुरूपाय अनुकूलरूपाय प्रतिरूपाय प्रतिकूलरूपाय, अ - अनुरूपाय अनुकूलरूपाय प्रतिकूलरूपाय ।

१. अ. आ. हा. पा. इ. वा. म - 'अथ' नास्ति । २. शृ१ - त्ववयवविरूप° ।

रूपहोममन्त्राः]

विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा ॥१८॥

(कृष्णाय षट्चत्वारिंशत् ।)

विरूपायेति वि-रूपाय । स्वाहा । सरूपायेति स-रूपाय । स्वाहा । प्रतिरूपायेति प्रति-रूपाय । स्वाहा । शबलाय । स्वाहा । कमलाय । स्वाहा । पृश्नये । स्वाहा । पृश्निसक्थायेति पृश्नि-सक्थाय । स्वाहा । सर्वस्मै । स्वाहा ॥१८॥

[कासं, अश्वमेध ३.७ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

Vसरूपाय समानरूपाय । Vविरूपाय विगतरूपाय । Vप्रतिरूपाय प्रतिकूलरूपाय [-४] । Vशबलाय व्यामिश्ररूपाय । [५-]Vकमलाय कमलवर्णाय [-५] । Vपृश्नये [६]चित्रवर्णाय । Vपृश्निसक्थाय, उक्तौ स्वरसमासान्तौ । Vसर्वस्मै [७-] अनुक्तायापि रूपाय [-७] ॥

॥ इति सप्तमे तृतीये अष्टादशोऽनुवाकः ॥

ईषद्रक्तोऽरुणः । गौरोऽत्यन्तश्वेतः । बभ्रुः कपिलः । नकुलो नकुलवर्णः । रोहितोऽत्यन्तरक्तः । शोणः पीतलोहितः । श्यावः [३-] पीतकृष्णवर्णः । श्यामो नीलः । [४]अत्यन्तकृष्णः पाकलः [-३] । शोभनरूपः सुरूपः । अनुकूलरूपोऽनुरूपः । विविधरूपो विरूपः । समानरूपः सरूपः, नात्यन्तं सुरूपो नात्यन्तं कुरूप इत्यर्थः । प्रतिकूलरूपः प्रतिरूपः । मिश्रवर्णः शबलः । कमलवर्णः कमलः । चित्रवर्णः पृश्निः । तथाविधाभ्यां सक्थिभ्यामुपेतः पृश्निसक्थः । अनुक्तसंग्रहार्थः सर्वशब्दः । पूर्वानुवाकोक्तैः षड्विंशतिमन्त्रैरेतदनुवाकोक्तैस्त्रयोविंशतिमन्त्रैश्चेत्येवमेकोनपञ्चाशन्मन्त्रैरश्वरूपाणि जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकेऽष्टादशोऽनुवाकः ॥

५-५. अ - 'कमलाय कमलवर्णाय' नास्ति । ६. अ - चित्रवर्णरूपाय । ७-७. अ. अ१ - अनुक्तरूपाय ।

३-३. म - पीतः कृष्णः श्यामलो नीलः अत्यन्तकृष्णः पालकः । ४. शृ१ - अव्यक्तकृष्णः ।

**ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा
काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा
पुष्पेभ्यः स्वाहा फलेभ्यः
स्वाहा गृहीतेभ्यः**

**ओषधीभ्य इत्योषधि-भ्यः । स्वाहा । मूलेभ्यः । स्वाहा ।
तूलेभ्यः । स्वाहा । काण्डेभ्यः । स्वाहा । वल्शेभ्यः ।
स्वाहा । पुष्पेभ्यः । स्वाहा । फलेभ्यः ।
स्वाहा । गृहीतेभ्यः ।**

अथ ओषधिहोमाः - 'ओषधीभ्यः' इत्याद्याः ॥ [V]ओषधीभ्यः [1]फलपाकावसानाभ्यः । " ओषधेश्च विभक्तावप्रथमायाम् " (पा ६.३.१३२) इति दीर्घत्वम् । [2]मूलानि प्रसिद्धानि । [V]तूलेभ्यः अग्रेभ्यः । [V]वल्शेभ्यः प्ररोहेभ्यः । [V]गृहीतेभ्यः प्राणिभिरुपयुक्तेभ्यः पुष्पफलेभ्यः ।

---

[1]अवयविरूपमन्त्रा अष्टादशे प्रोक्ताः । [2]अथ ओषधिमन्त्रा एकोनविंशेऽभिधीयन्ते । तथा च ब्राह्मणम् - " ओषधीभ्यः स्वाहा [3]- मूलेभ्यः स्वाहा -[3] इत्योषधिहोमाञ्जुहोति " (तैब्रा ३.८.१७) इति ॥

ओषधीभ्य इति ॥ पाठस्तु - ' ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा ' इति ॥ तूलान्यग्राणि काण्डानि [4]- दण्डसदृशा भागाः -[4] । वल्शानि

---

१. अ. अ१ - फलपाकान्ताभ्यः, मै१ - फलपाकान्तेभ्यः । २. मै२ - मूलादीनि ।

---

१. इ - अवयवरूप° । २. इ. वा - ' अथ ' नास्ति । ३-३. शृ१ - ' मूलेभ्यः स्वाहा ' नास्ति । ४-४. क. हा - °सदृशाभागाः ।

स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा ॥१९॥

(ओषधीभ्यश्चतुर्विꣳशतिः ।)

~~~~~~~~~~~~~~~~~~~~~~~~

स्वाहा । अगृहीतेभ्यः । स्वाहा । अवपन्नेभ्य इत्यव-पन्नेभ्यः । स्वाहा । शयानेभ्यः । स्वाहा । सर्वस्मै । स्वाहा ॥१९॥

[कासं-अश्वमेध ३.७ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

~~~~~~~~~~~~~~~~~~~~~~~~

Vअगृहीतेभ्यः [3]स्वयंनिपतितेभ्यः । Vअवपन्नेभ्यः [4]विपन्नेभ्यः । Vशयानेभ्यः स्तम्बशुष्केभ्यः ॥

॥ इति सप्तमे तृतीये एकोनविंशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~~~~~

द्वैधीभावसंधयः । गृहीतानि प्राणिभिरुपयुक्तानि । अगृहीतानि प्राणिभिरनुपयुक्तानि । अवपन्नानि स्तम्बेभ्यो वियुज्य भूमौ पतितानि । शयानानि स्तम्बैः सह भूमौ पतितानि । अनुक्तसंग्रहार्थः सर्वशब्दः । एतैर्द्वादशभिर्मन्त्रैरोषधिहोमाञ्जुहुयात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठक एकोनविंशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~~~~~

३. मै१. अ. अ१ - 'स्वयंनिपतितेभ्यः' नास्ति । ४. मै१. अ. अ१ - विभिन्नेभ्यः ।

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा

वनस्पतिभ्य इति वनस्पति-भ्यः । स्वाहा । मूलेभ्यः । स्वाहा । तूलेभ्यः । स्वाहा । स्कन्धोभ्य इति स्कन्धः-भ्यः । स्वाहा । शाखाभ्यः । स्वाहा । पर्णेभ्यः । स्वाहा । पुष्पेभ्यः । स्वाहा । फलेभ्यः । स्वाहा । गृहीतेभ्यः । स्वाहा । अगृहीतेभ्यः । स्वाहा । अवपन्नेभ्य इत्यव-पन्नेभ्यः । स्वाहा । शयानेभ्यः । स्वाहा । शिष्टाय । स्वाहा । अतिशिष्टायेत्यति-शिष्टाय । स्वाहा ।

अथ वनस्पतिहोमाः - 'वनस्पतिभ्यः' इत्याद्याः ॥ वनस्पतयः फलिनः, उपलक्षणत्वात् सर्वेऽपि शाखिनो गृह्यन्ते, पारस्करादित्वात्सुट् (गणपाठ २०६, पा ६.१.१५७) " उभे वनस्पत्यादिषु युगपत् " (पा ६.२.१४०) इति पूर्वोत्तरयोर्युगपत्प्रकृतिस्वरत्वम् । [1]Vस्कन्धोभ्यः । वर्णव्यत्ययः, सकारान्त एव वा । [2]गृहीतादीनि व्याख्यातानि (तैसं ७.३.१९) । Vशिष्टाय क्रियासूपयुक्ताय । Vअतिशिष्टाय उपयुज्य स्थापितैकदेशाय । Vपरिशिष्टाय उपयोगातिरिक्ताय । Vसंशिष्टाय संपूर्णमुपयुज्य त्यक्ताय । [3-]Vउच्छिष्टाय उपयुज्य त्यक्ताय [-3] । Vरिक्ताय पुष्पफलै-

---

औषधिहोममन्त्रा एकोनविंशेऽभिहिताः । वृक्षमन्त्रा विंशेऽभिधीयन्ते । तथा च ब्राह्मणम् - " वनस्पतिभ्यः स्वाहेति वनस्पतिहोमाञ्जुहोति " (तैब्रा ३.८.१७) इति ॥

वनस्पतिभ्य इति ॥ पाठस्तु - 'वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा स९ँशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा स९ँरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ' इति ॥ स्कन्धांसि द्वैधीभावसंधयः । एकस्मिन् कर्मणीदानीमुपयुक्तादन्यः, कालान्तर

---

१. अ - स्कन्धेभ्यः । २. मै२ - गृहीतानीति, अ. अ१ - गृहीतानि । ३-३. मै. मै१. मै२.. मै३ - ' उच्छिष्टाय - - - - त्यक्ताय ' नास्ति ।

परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ॥२०॥

(वनस्पतिभ्यः षट्चत्वारिꣳशत् ।)

(प्रजवं ब्रह्मवादिनः किमेष वा आप्त आदित्या उभयोः प्रजापतिरन्वायन्निन्द्रो वै सदृङ्ङिन्द्रो वै शिथिलः प्रजापतिरकामयतान्नादः सा विराडसावादित्योऽर्वाङ्भूतमा मेऽग्निना तपः स्वाहाऽधिं दद्भ्योऽञ्ज्येताय कृष्णायौषधीभ्यो वनस्पतिभ्यो विꣳशतिः ॥)

(प्रजवं प्रजापतिर्यदछन्दोमं ते हुवे सवाहमोषधीभ्यो द्विचत्वारिꣳशत् ॥)

परिशिष्टायेति-परि-शिष्टाय । स्वाहा । सꣳशिष्टायेति सं-शिष्टाय । स्वाहा । उच्छिष्टायेत्युत्-शिष्टाय । स्वाहा । रिक्ताय । स्वाहा । अरिक्ताय । स्वाहा । प्ररिक्तायेति प्र-रिक्ताय । स्वाहा । सꣳरिक्तायेति सं-रिक्ताय । स्वाहा । उद्रिक्तायेत्युत्-रिक्ताय । स्वाहा । सर्वस्मै । स्वाहा ॥२०॥

वर्जिताय । [4]Vअतिरिक्तनय [5]अन्यतरयुक्ताय । Vप्ररिक्ताय पुष्पफलैः सर्वथा वर्जिताय । [6]Vसंरिक्ताय पर्णैश्च वर्जिताय । Vउद्रिक्ताय [7]सर्वैः समृद्धाय । [8]अत्र प्रादिसमासे व्यत्ययेन [9]अव्ययपूर्वपदप्रकृतिस्वरत्वम् । [10-] गतिसमासे " गतिरनन्तरः " (पा ६.२.४९) इति गतेः प्रकृतिस्वरत्वम् [-10] ॥

॥ इति भट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये सप्तमे काण्डे तृतीयप्रश्ने विंशोऽनुवाकः ॥

॥ समाप्तश्च प्रपाठकः ॥

उपयोक्ष्यमाणः शिष्टः । कालान्तरेऽपि [1]तत्तद्कर्मोपयुक्तादन्योऽतिशिष्टः । कर्मान्तरेष्वप्युपयुक्तादन्यः परिशिष्टः । [2-] लोकव्यवहारेऽप्युपयुक्तादन्यः संशिष्टः[-2] । उपयुज्य त्यक्तः उच्छिष्टः । इदानीं पूर्वैः (पुष्पैः?) फलैर्वर्जितो [3]रिक्तः । तद्युक्तस्त्वरिक्तः । सर्वदा(था?) तद्वर्जितः प्ररिक्तः । पर्णैरपि [4]विवर्जितः संरिक्तः । [5]सर्वैः सर्वदा

---

४. मै१. अ - अतिक्ताय, मै३. अ१ - अरिक्ताय । ५. मै३. अ. अ१ - अन्यतो युक्ताय, मै१ - अन्यतरोपयुक्ताय । ६. अ - संरक्ताय । ७. मै१ - 'सर्वैः' नास्ति । ८. अ. अ१ - 'अत्र' नास्ति । ९. अ - पूर्वपद° । १०-१०. मै१. अ - 'गतिसमासे - - - - °स्वरत्वम्' नास्ति ।

---

१. अ. आ. क. पा. हा. शृ१. म - तत्कर्मो० । २-२. म - 'लोकव्यव - - - - संशिष्टः' नास्ति । ३. उ. म - अतिरिक्तः । ४. अ. आ. म - वर्जितः । ५. अ. इ. उ. पा. वा - 'सर्वैः' नास्ति; क. हा - सर्वेषु ।

समृद्धः उद्रिक्तः। अनुक्तसंग्रहार्थः सर्वशब्दः। [६]एतैस्त्रयोविंशतिमन्त्रैर्वनस्पतिहोमाञ्जुहुयात् ॥

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः -

अविवाक्यं तृतीयाद्ये द्वितीये क्रतुसंस्तवः।
यस्त्रयोदशरात्रोऽसौ तृतीयेऽथ चतुर्थके ॥१॥
स्याच्चतुर्दशरात्रोऽथ पञ्चमेऽन्यश्च तादृशः।
षष्ठसप्तमयोः स्यातां द्वौ पञ्चदशरात्रकौ ॥२॥
यः सप्तदशरात्रोऽयमष्टमे नवमे पुनः।
भवेद्विंशतिरात्रोऽथ दशमे समुदीरितः ॥३॥
एकविंशतिरात्रोऽथ मन्त्राः सर्वेऽश्वमेधगाः।
अर्वाङ्ष्टावाप्तिमन्त्रा भूतं पर्याप्तयो नव ॥४॥
[७]आभूमन्त्रास्त्रयो ह्या मे ह्यनुभूमन्त्रकाः पुनः।
चतुर्विंशतिसंख्याः स्युरग्निनेत्येवमादयः ॥५॥
दीक्षाहोमार्थमन्त्रास्तु स्वाहा द्वाविंशतिर्मताः।
दद्भ्योऽङ्गमन्त्राः पञ्चाशदञ्जि षड्विंशतिस्तथा ॥६॥
कृष्णा त्रयोविंशति [८]स्युर्मिलित्वा रूपमन्त्रकाः।
द्वादशौषधिमन्त्राः स्युस्त्रयोविंशतिरीरिताः ॥७॥
वनस्पतिभ्यो वृक्षाख्यमन्त्रा [९] उक्ताः प्रपाठके [९] ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके विंशोऽनुवाकः ॥

**वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥**

॥ इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकः ॥

---

६. इ. म - ०स्त्रयोविंशतिभिर्मन्त्रैः, शृ१ - ०स्त्रयोदशभिर्मन्त्रैः। ७. शृ१ - अत्र मन्त्रा०। ८. उ - तु मिलित्वा। ९-९. शृ१ - उक्तः प्रपाठकः।

(चतुर्थः प्रपाठक :)

हरिः ॐ ॥

बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्वि॒ꣳशतिरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत् पुरोधां य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां

बृहस्पतिः । अकामयत । श्रत् । मे । देवाः । दधीरन् । गच्छेयम् । पुरोधामिति पुरः-धाम् । इति । सः । एतम् । चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति-रात्रम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । तस्मै । श्रत् । देवाः । अदधत । अगच्छत् । पुरोधामिति पुरः-धाम् । ये । एवम् । विद्वाꣳसः । चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति-रात्रम् । आसते । श्रत् । एभ्यः । मनुष्याः । दधते । गच्छन्ति । पुरोधामिति पुरः-धाम् ।

अथ द्वौ चतुर्विंशतिरात्रौ । तत्रायं प्रथमः अतिरात्रो ज्योतिरादिस्त्र्यहः [१-] च त्रिरात्रः । उक्तं च त्रिरात्रः द्वादशाहस्य [-१] दशाहानि पृष्ठ्यश्छन्दोमात्मकानि अतिरात्र इति । अयमधुना विधीयते - ' बृहस्पतिः' इत्यादि ॥ [२]बृहस्पतिशब्दे सुट्स्वरावुक्तौ । [V]देवाः [V]मे मम [V]श्रत्

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
एकविंशतिरात्रान्तं सत्रमुक्तं तृतीयके ।
चतुर्विंशतिरात्रादि चतुर्थेऽथ [१]प्रवक्ष्यते ॥

बृहस्पतिरिति ॥ द्वौ चतुर्विंशतिरात्रौ तयोराद्यं प्रथमेऽनुवाके विधत्ते - ' बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्विꣳशतिरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत् पुरोधां य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधाम् ' इति ॥ पुरा कदाचित् [V]बृहस्पतिः देवैः [२]इन्द्रादिभिरविश्वसनीयः सन् मनस्येवम् [V]अकामयत एते [V]देवाः [V]मे मदर्थं [V]श्रत् [V]दधीरन् अयं बृहस्पतिरस्मभ्यं हित इति विश्वासं धारयन्तु । [३-] ततोऽहं [V]पुरोधां

१-१. अ - चतूरात्रमुक्तं च त्रिरात्रः द्वादशाहस्य, अ१ - चतुरात्रस्यतूरात्रः द्वादशाहस्य । २. मै१. अ. अ१ - °शब्देऽस्मिन् ।

१. शृ१ - प्रवृज्यते । २. शृ१. म - ' इन्द्रादिभिः ' नास्ति । ३-३. शृ१ - ' ततोऽहं - - - - पुरोधाम् ' नास्ति ।

ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायु(१)रिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्त्यसंत्रं

ज्योतिः । गौः । आयुः । इति । त्र्यहा इति त्रि-अहाः । भवन्ति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । (१) । इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि-आरोहन्ति । अभिपूर्वमित्यभि-पूर्वम् । त्र्यहा इति त्रि-अहाः । भवन्ति । अभिपूर्वमित्यभि-पूर्वम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति ।

[V]दधीरन् श्रद्धां कुर्वन्तु सत्योऽयमिति । गच्छेयं [३]च [V]पुरोधां प्राधान्यं पौरोहित्यं वा । पुरःशब्दस्य उपसर्गवद्भावात् “आतश्चोपसर्गे” (पा ३.१.१३६) इत्यङ् । भिदादिर्वा द्रष्टव्यः (गणपाठ ४१, पा ३.३.१०४) । ‘स एतम्’ इत्यादि । गतम् ॥

‘त्र्यहाः’[४]इत्यादि ॥ चत्वारः, तथा सङ्ख्यापूरणात् । ‘इयं वाव’ इत्यादि । व्याख्यातम् (तैसं ७.३.७) ॥

[४]पौरोहित्यमाचार्यत्वरूपं मुख्यत्वं वा [V]गच्छेयम् [V]इति । ततस्तदुपायं विचार्य शास्त्रमुखेन(ण) [V]चतुर्विंशतिरात्रं निश्चित्य [५]तमनुष्ठाय देवैर्विश्वसनीयः सन् [V]पुरोधां प्राप्तवान् । एवमन्येऽपि यजमाना एतदनुष्ठानेन मनुष्यैर्विश्वसनीयाः सन्तः [V]पुरोधां [-३] प्राप्नुवन्ति ॥

ज्योतिरिति ॥ तत्र कानिचिदहानि विधत्ते - ‘ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति’ इति ॥ अत्र चत्वारस्त्र्यहा विज्ञेयाः । तावता [६]विवक्षितसंख्यायाः पूरणात् ॥

अभिपूर्वमिति ॥ तत्र चतुर्णां त्र्यहाणामानुपूर्व्यं विधत्ते - ‘अभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति’ इति ॥ इतो निर्गतानामानुपूर्व्येणैव [७]स्वर्गलोकारोहणम् ॥

३. अ१ - ‘च’ नास्ति । ४. अ - इति ।

४. हा - °माचार्यरूपम् । ५. अ. पा. हा. इ. वा. म - तदनुष्ठाय । ६. म - अपेक्षितसं° । ७. क - स्वर्गारोहणम् ।

वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव(२) यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति चतुर्विꣳशतिरात्रो भवति

असत्रम् । वै । एतत् । यत् । अच्छन्दोममित्यछन्दः-मम् । यत् । छन्दोमा इति छन्दः-माः । भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः-मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः । छन्दोमा इति छन्दः-माः । ओजसि । एव । वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति । बृहद्रथन्तराभ्यामिति बृहत्-रथन्तराभ्याम् । यन्ति । इयम् । वाव । रथन्तरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव (२) । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । चतुर्विꣳशतिरात्र इति चतुःविꣳशति-रात्रः । भवति ।

'असत्रं वै' इत्यादि ॥ द्वादशाहीयस्य द्वादशरात्रस्य विधिः । पृष्ठ्यः षडहश्छन्दोमा इत्यादि । ते च गताः (तैसं ७.३.८) ॥

'बृहद्रथन्तराभ्याम्' इत्यादि ॥ गतम् (तैसं ७.२.१) ॥

असत्रमिति ॥ अथ पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येवं द्वादशाहगतानि दशाहानि विधत्ते - 'असत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति' इति ॥ पूर्ववद्व्याख्येयम् ॥

---

५. अ. अ१ - इति ।

चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥१॥

(अन्तरिक्षं गौरसावायुराभ्यामेव पञ्चचत्वारिꣳशच्च ।)

चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासा इत्यर्ध-मासाः । संवत्सर इति सं-वत्सरः । संवत्सर इति सं-वत्सरः । सुवर्ग इति सुवः-गः । लोकः । संवत्सर इति सं-वत्सरे । एव । सुवर्ग इति सुवः-गे । लोके । प्रतीति । तिष्ठन्ति । अथो इति । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति-अक्षरा । गायत्री । गायत्री । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । गायत्रिया । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अवेति । रुन्धते । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य । परिगृहीत्या इति परि-गृहीत्यै ॥१॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'चतुर्विंशतिरात्रः' इत्यादि ॥ चतुर्विंशतिसंख्यान्वयात् चतुर्विंशत्यर्धमासात्मके संवत्सरे स्वर्गस्थानीये प्रतितिष्ठन्ति । अपि च चतुर्विंशत्यक्षरा गायत्री, [6]तल्लाभेन गायत्र्यात्मकब्रह्मवर्चसलाभः । अतिरात्राभ्यां च [V]अभितः [V]ब्रह्मवर्चसस्य परिग्रहः ॥

॥ [7]इति सप्तमे चतुर्थे प्रथमोऽनुवाकः ॥

चतुर्विꣳशतिरात्र इति ॥ [8]अथ एतत्क्रतुगतामहःसंख्यां प्रशंसति - 'चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धते' इति ॥ संख्यासाम्यादर्धमासद्वारा संवत्सरं प्राप्य तत्कालीनकर्मानुष्ठानद्वारा स्वर्गे [V]प्रतितिष्ठन्ति । तथा गायत्रीद्वारा [V]ब्रह्मवर्चसं प्राप्नुवन्ति ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विधत्ते - 'अतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै' इति ॥ गायत्रीद्वारा ब्रह्मवर्चसप्राप्तेरुक्तवान् [9]तत्परिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥

६. मै१. मै२. अ. अ१ - लाभेन । ७. मै१ - 'इति' नास्ति ।

८. शृ१. म - 'अथ' नास्ति । ९. हा - परिग्रहः ।

यथा वै मनुष्या एवं देवा अग्र आसन् तेऽकामयन्तावर्तिं पाप्मानं मृत्युमपहत्य दैवी॒ꣳ स॒ꣳसदं गच्छेमेति त एतं चतुर्वि॒ꣳशतिरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य दैवी॒ꣳ स॒ꣳसदमगच्छन्

यथा । वै । मनुष्याः । एवम् । देवाः । अग्रे । आसन् । ते । अकामयन्त । अवर्तिम् । पाप्मानम् । मृत्युम् । अपहत्येत्यप-हत्य । दैवीम् । स॒ꣳसदमिति सं-सदम् । गच्छेम । इति । ते । एतम् । चतुर्वि॒ꣳशतिरात्रमिति चतुर्वि॒ꣳशति-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । अवर्तिम् । पाप्मानम् । मृत्युम् । अपहत्येत्यप-हत्य । दैवीम् । स॒ꣳसदमिति सं-सदम् । अगच्छन् ।

अथ संसदाख्यो द्वितीयश्चतुर्वि॒ꣳशतिरात्रो विधीयते - 'यथा वै [1]मनुष्याः' इत्यादि ॥ [V]यथा [2V]मनुष्याः जरामृत्युदारिद्र्यपापयुक्ताः [3]एवंधर्माणः [4]पूर्वं [V]देवाः अपि [V]आसन् । [V]ते देवाः [V]अकामयन्त [V]अवर्तिं दारिद्र्यं [V]पाप्मानं [V]मृत्युं च [V]अपहत्य [V]दैवीं देवसंबन्धिनीं

प्रथमेऽनुवाके कश्चित् चतुर्विंशतिरात्रः[1-] अभिहितः । अथ द्वितीयेऽन्यश्चतुर्विंशतिरात्रः[-1] अभिधीयते ॥

यथेति ॥ तमेतं विधत्ते - 'यथा वै मनुष्या एवं देवा अग्र आसन् तेऽकामयन्तावर्तिं पाप्मानं मृत्युमपहत्य दैवी॒ꣳ स॒ꣳसदं गच्छेमेति त एतं चतुर्वि॒ꣳशतिरात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य दैवी॒ꣳ स॒ꣳसदमगच्छन् य एवं विद्वा॒ꣳसश्चतुर्वि॒ꣳशतिरात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियं गच्छन्ति श्रीर्हि मनुष्यस्य दैवी स॒ꣳसत्' इति ॥ [V]यथा [V]मनुष्याः [2]दरिद्राः दारिद्र्यहेतुभूतपापयुक्ताः [V]एवं [V]देवाः अपि [3-] पूर्वम् [V]आसन् [-3] । [V]ते च देवाः कदाचिदेवम् [V]अकामयन्त । [4]वर्तिर्वृत्तिर्जीवनोपायो धनसंपत् । [5]तद्रहितोऽवर्तिः । तत्र हेतुः पाप्मा, दारिद्र्यहेतुर्जन्मान्तरकृतः पापविशेषः । स एव क्लेशहेतुत्वात् मृत्युः । तमेतादृशम् [6V]अवर्तिं [V]पाप्मानं [V]मृत्युं केनापि सुकृतानुष्ठानेन [7-V]अपहत्य देवसंबन्धिनीं संपत्तिं

१. मै. मै१. मै३. अ. अ१ - 'मनुष्याः' नास्ति । २. मै२ - 'मनुष्याः' नास्ति । ३. मै२ - एवधर्माणः । ४. [अस्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः, मै मुद्रितपुस्तके लिखितपुस्तकेषु च 'पूर्वमेव' इति लभ्यते ।] ।

१-१. वा - 'अभिहितः - - - - °रात्रः' नास्ति । २. आ - 'दरिद्राः' नास्ति । ३-३. अ. उ. पा. हा. इ. वा - आसन्, म. क. आ. शृ१ - पुरा दारिद्र्यहेतुभूतपापयुक्ता आसन् । ४. शृ१ - अवर्ति° । ५. अ. आ. पा. हा. इ. वा - 'तद्रहितोऽवर्तिः' नास्ति, आ. क - तदभावोऽ° । ६. इ - अपवर्तिम् । ७-७. इ. वा - 'अपहत्य - - - - तदनुष्ठानेन' नास्ति ।

य एवं विद्वा९ंसश्चतुर्वि९ंशतिरात्रमासतेऽर्वर्तिमेव पाप्मानमपहत्य श्रियं गच्छन्ति श्रीर्हि मनुष्यस्य (१) दैवी स९ंसज्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै

ये । एवम् । विद्वा९ंसः । चतुर्वि९ंशतिरात्रमिति चतुर्वि९ंशति-रात्रम् । आसते । अर्वर्तिम् । एव । पाप्मानम् । अपहत्येत्यप-हत्य । श्रियम् । गच्छन्ति । श्रीः । हि । मनुष्यस्य (१) । दैवी । स९ंसदिति सं-सत् । ज्योतिः । अतिरात्र इत्यति-रात्रः । भवति । सुवर्गस्येति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु-ख्यात्यै ।

[5]Vसंसदं [6]संसीदन्ति देवा यत्र तत्स्थानं Vगच्छेम Vइति । " देवाद्यञञौ " (पा ४.१.८५ वा) इत्यञ् । 'त एतम्' इत्यादि । गतम् । [7-]Vश्रीर् Vहि [-7] [8]Vदैवसंसत् [9]दैवसंसदा सदृश्यत्वात् ॥

[10]' ज्योतिरतिरात्रः ' इत्यादि ॥ अत्रेयमहःक्लृप्तिः - [11-]' अतिरात्रः चतुर्विंशः उक्थ्यः [-11] [12]आरम्भणीयः, त्रिवृद्वा पृष्ठ्यस्तोमः षडहः, [13]त्रयस्त्रिंशमहरनिरुक्तं त्रयस्त्रिंशं निरुक्तं, त्रिणवं [14-] द्वे एकविंशे, त्रिणवं त्रयस्त्रिंशमहः निरुक्तं त्रयस्त्रिंशमनिरुक्तं [-14], पृष्ठ्यस्तोमः षडहः प्रत्यङ् [15]त्रिवृदहरनिरुक्तं ज्योतिष्टोमो [16]वैश्वानरोऽतिरात्रः' [17]इति । इयमिह प्रतिपाद्यते । ज्योतिरतिरात्रः

प्राप्नुयाम Vइति विचार्य Vचतुर्विंशतिरात्रं तदुपायं शास्त्रमुखान्निश्चित्य तदनुष्ठानेन [-7] तत्फलं प्राप्ताः । Vएवं मनुष्या अपि तदनुष्ठानेन दारिद्र्यहेतुपापनिवृत्तिद्वारा देवसंबन्धिनीं संसदं प्राप्नुवन्ति । देवाः सम्यक् सीदन्ति सुखेनावतिष्ठन्ते यस्यां [8]श्रियां सा Vश्रीः एव Vदैवी [9]Vसंसत् । मनुष्या हि श्रियमेव देवसभां मन्यन्ते ॥

ज्योतिरिति ॥ तत्र प्रथममहर्विधत्ते - ' ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै ' इति ॥ ज्योतिष्टोमविशेषो योऽयम् Vअतिरात्रः स एव प्रथममहस्तेन ज्योतिषा स्वर्गः प्रकाश्यते ॥

५. मै - संदसम्, मैर - सुसदसम् । ६. मै१. अ - सीदन्ति । ७-७. मै१ - श्रीवस्ति, अ - श्रीचास्ति, मैर - श्रीर्हीति । ८. अ. अ१ - 'दैवसंसत्' नास्ति, मैर - देवसंसत् । ९. अ. अ१ - देवसंसदा, मैर - 'दैवसंसदा' नास्ति । १०. मै१ - ज्योतिरात्रः । ११-११. मैर - अतिरात्रं चतुर्विंशतिरुक्थ्यम् । १२. मै१ - आरम्भणीयाः । १३. मै१ - °महर्निरुक्तम् । १४-१४. मैर - द्वे एकविंशत् त्रिणव त्रयस्त्रिंशन्निरुक्तमहस्त्रयस्त्रिंशमनिरुक्तम् । १५. मैर - त्रिवृदग्निरुक्थ्यम् । १६. मै१ - °नरोतिरात्रम्, मैर - °नरोज्योतिरतिरात्रः । १७. मै१. अ. अ१ - 'इति' नास्ति ।

८. म - सत्याम् । ९. अ. पा. क. इ. वा. म - संपत् ; हा - संपत्ती ।

पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवत्सरस्तं मासा अर्धमासा ऋतवः प्रविश्य दैवी॑ स॑सदमगच्छन् य एवं विद्वा॑सश्चतुर्वि॑शतिरात्रमासते संवत्सरमेव प्रविश्य वस्यसी॑ स॑सदं गच्छन्ति

पृष्ठ्यः । षडह इति षट्-अहः । भवति । षट् । वै । ऋतवः । संवत्सर इति सं-वत्सरः । तम् । मासाः । अर्धमासा इत्यर्ध-मासाः । ऋतवः । प्रविश्येति प्र-विश्य । दैवीम् । स॑सदमिति सं-सदम् । अगच्छन् । ये । एवम् । विद्वा॑सः । चतुर्वि॑शतिरात्रमिति चतुर्वि॑शति-रात्रम् । आसते । संवत्सरमिति सं-वत्सरम् । एव । प्रविश्येति प्र-विश्य । वस्यसीम् । स॑सदमिति सं-सदम् । गच्छन्ति ।

प्रथममहर्भवति स्वर्गस्यानुक्रमेण ख्यात्यै प्रकाशाय तद्भवति । 'पृष्ठ्यः' इत्यादि । षडहविधिः [१८]षड्त्वात्मकसंवत्सरं प्रविश्य Vमासाः Vअर्धमासाः Vऋतवः च Vदैवीं Vसंसदम् Vअगच्छन् तस्मात् Vएवं विदित्वा Vचतुर्विंशतिरात्रम् आसीनाः Vसंवत्सरम् Vएव Vप्रविश्य Vवस्यसीं वरिष्ठां Vसंसदं [१९]श्लाघ्यां श्रियं Vगच्छन्ति । वसुमच्छब्दादीयसुनि " विन्मतोर्लुक् " (पा ५.३.६५) इति [२०-] मतुब्लोपे कृते प्रत्ययाद्यक्षरलोपश्छान्दसः [-२०] ।

पृष्ठ्य इति ॥ अनन्तरभावीनि षडहानि विधत्ते - 'पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवत्सरस्तं मासा अर्धमासा ऋतवः प्रविश्य दैवी॑ स॑सदमगच्छन् य एवं विद्वा॑सश्चतुर्वि॑शतिरात्रमासते संवत्सरमेव प्रविश्य वस्यसी॑ स॑सदं गच्छन्ति ' इति ॥ षड्विधैः पृष्ठस्तोत्रैर्निष्पाद्यः Vपृष्ठ्यः Vषडहः [१०]सोऽत्रानुष्ठेयः । षट्संख्याकाः Vऋतवः [११-] ते च [-११] संभूय संवत्सरीभवन्ति । तं च Vसंवत्सरं द्वादश Vमासाः चतुर्विंशतिः Vअर्धमासाः Vषट् Vऋतवः चावयवत्वेन प्रविश्य अतिशयेन धनसमृद्धां सभां प्राप्नुवन्ति । मनुष्या अपि तथैव पृष्ठ्यषडहयुक्तेन चतुर्विंशतिरात्रेण फलं प्राप्नुवन्ति ॥

त्रय इति ॥ [१२]अथाऽन्यान्यपि षडहानि विधत्ते - 'त्रयस्त्रयस्त्रि॑शा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रि॑शाः परस्तात् त्रयस्त्रि॑शैरेवोभयतोऽवर्ति पाप्मानमपहत्य दैवी॑ स॑सदं मध्यतो गच्छन्ति पृष्ठानि हि दैवी

---

१८. मै२ - °त्वात्मकं संवत्सरम् । १९. मै२. अ१ - श्रियाख्याम् । २०-२०. मै१. अ - मतुब्लोपे प्रत्यया°, अ१ - लोपे प्रत्यया°, मै२ - लोपे कृते प्रत्यया° ।

---

१०. [अस्माभिः संभावितोऽयं पाठः, आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ' स्तोत्रानुष्ठेयः ' इति पाठो लभ्यते ।] । ११-११. म - एवम् । १२. शृ१. हा. क - तथा° ।

**त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तात्
त्रयस्त्रिꣳशैरेवोभयतोऽवर्तिं पाप्मानमपहत्य दैवीꣳ
सꣳसदं मध्यतो(२) गच्छन्ति**

त्रयः । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । अवस्तात् । भवन्ति । त्रयः । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । परस्तात् । त्रयस्त्रिꣳशैरिति त्रयः-त्रिꣳशैः । एव । उभयतः । अवर्तिम् । पाप्मानम् । अपहत्येत्यप-हत्य । दैवीम् । सꣳसदमिति सं-सदम् । मध्यतः (२) । गच्छन्ति ।

---

[21] 'त्रयः त्रयस्त्रिंशा अवस्तात्' इति ॥ मध्यमषडहारम्भे Vत्रयस्त्रिंशाः Vभवन्ति । कथम्? प्रथमस्य षडहस्य षष्ठमहः एकस्त्रयस्त्रिंशः त्रिवृदादिस्त्रयस्त्रिंशान्तत्वात् पृष्ठानाम् । ततः षडहयोर्मध्ये [22]अनिरुक्तो [23-]द्वितीयस्त्रयस्त्रिंशः । ततो द्वितीयस्य षडहस्य आद्यस्त्रयस्त्रिंशः[-23] [24]तृतीयः । त्रयस्त्रिंशत्रिणवैकविंशानां षडहावराध्यानां क्रमात् [25]व्युत्क्रमजन्यत्वात् [26]मध्यमषडहस्यैव

सꣳसत्' इति ॥ अत्रेयमहःक्लृप्तिः सूत्रकारेण दर्शिता - "संसदा चतुर्विंशतिरात्रेण स्वर्गे लोके सीदन्त्यतिरात्रश्चतुर्विंशः उक्थ्य आरम्भणीयस्त्रिवृद्धा पृष्ठ्यस्तोमः षडहस्त्रयस्त्रिंशमहरनिरुक्तं त्रयस्त्रिंशं [13]निरुक्तं त्रिणवं द्वे एकविंशे त्रिणवं त्रयस्त्रिंशमहर्निरुक्तं त्रयस्त्रिंशमनिरुक्तं पृष्ठ्यस्तोमः षडहः प्रत्यङ् त्रिवृदहरनिरुक्तं ज्योतिष्टोमो वैश्वानरोऽतिरात्रः" (आपश्रौ २३.४.१-२) इति । यदिदमतिरात्ररूपं प्रथममहः सूत्रेऽभिहितं [14]तदत्र "ज्योतिरतिरात्रो भवति" (तैसं ७.२.६) इति वाक्येनाम्नातम् । यत्त्वारम्भणीयरूपं द्वितीयमहस्तच्छाखान्तरगतम् । [15]तृतीयमहरारभ्याष्टमान्तः पराग्रूपः पृष्ठ्यः षडहः । तत्र षष्ठमहस्त्रयस्त्रिंशरूपम् । [16]तच्चादित आरम्भ गणनायामष्टममहः । ततो नवममहरनिरुक्तं त्रयस्त्रिंशं, [17]स्पष्टलिङ्गैर्मन्त्रैर्गानं [18-]निरुक्तं तद्विपरीतमनिरुक्तम् । ततो दशममहर्निरुक्तं त्रयस्त्रिंशम् । [19]ते एतेऽष्टमनवमदशमा अहर्विशेषास्त्रयः Vअवस्तात् अधोभागे वर्तमानास्त्रयस्त्रिंशाः[-18] । तत एकादशद्वादशत्रयोदशचतुर्दशाख्यान्यहानि त्रिणवैकविंशद्वयत्रिणवरूपाणि मध्यवर्तीनि पृष्ठानीत्युच्यन्ते ।

---

२१. मै१. अ१ - 'त्रयः' नास्ति । २२. मै. मै१. मै२. मै३. अ - निरुक्तः । २३. अ - °स्त्रयस्त्रिंशः । ततो द्वितीयस्तृतीयस्त्रयस्त्रिंशः । २४. मै१. अ. अ१ - 'तृतीयः' नास्ति । २५. मै१ - क्रमजन्य° । २६. अ. अ१ - मध्यमस्य षडहस्यैव, मै१ - मध्यमस्य षडहस्यैवम् ।

---

१३. अ. क. पा. हा. उ. इ. वा. म - 'निरुक्तम्' नास्ति । १४. आ. क - तत्, उ. अ. पा. हा. वा. म - तत्र, इ - तत्र यत् । १५. शृ१ - तृतीयमहरात्रस्याष्टमान्तः, म - ०ष्टमांशः । १६. आ - यश्चाऽऽ(च्चाऽऽ)दितः, अ. क. पा. हा. इ. वा - यश्चादितः । १७. शृ१ - स्पष्टं लिङ्गै° । १८-१८. उ - 'निरुक्तं ---- °स्त्रयस्त्रिंशाः' नास्ति ।

पृष्ठानि हि दैवी स२ंसज्जामि वा एतत् कुर्वन्ति यत् त्रयस्त्रयस्त्रि२ंशा अन्वञ्चो मध्येऽनिरुक्तो भवति

~~~~~~~~~~~~~~~~~~~~

पृष्ठानि । हि । दैवी । स२ंसदिति सं-सत् । जामि । वै । एतत् । कुर्वन्ति । यत् । त्रयः । त्रयस्त्रि२ंशा इति त्रयः-त्रि२ंशाः । अन्वञ्चः । मध्ये । अनिरुक्त इत्यनिः-उक्तः । भवति ।

~~~~~~~~~~~~~~~~~~~~

[V]त्रयस्त्रिंशाः [V]तस्मात् [27]मध्यममषडहावसाने [28-] अपि भवन्ति [-28] । कथम् ? उक्तेन न्यायेन मध्यमस्य षडहस्य [29]षष्ठमहरेकस्त्रयस्त्रिंशः ततः षडहयोर्मध्ये अनिरुक्तो द्वितीयस्त्रयस्त्रिंशः, तत [30]उत्तमस्य षडहस्य प्रतीचीनस्य [31]आद्यमहस्तृतीयः त्रयस्त्रिंशः इति । एवम् [V]अवस्तात् [V]परस्तात् च [V]त्रयस्त्रिंशैः [32]एव [33]स्थितैः [34]तद्दिव्यसंख्यानैः [V]अवर्ति [35]च [V]पाप्मानं च [V]अपहत्य [V]दैवीं [V]संसदं [V]मध्यतः अवस्थितां गच्छन्ति । का पुनः [36]सेत्याह - 'पृष्ठानि [37]हि' इत्यादि ॥

~~~~~~~~~~~~~~~~~~~~

ततः पञ्चदशषोडशसप्तदशा [20]अहर्विशेषास्त्रिसंख्याकाः [V]परस्तात् ऊर्ध्वभागे वर्तमानास्त्रयस्त्रि२ंशाः । तेषु त्रिषु [21]मध्यमं [22]निरुक्तं त्रयस्त्रिंशम् । तस्मादुपरितनं [23]त्रयस्त्रिंशस्तोमयुतमनिरुक्तम् । सप्तदशसंख्यापूरकं दिनमारभ्य द्वाविंशदिनपर्यन्तमावृत्तः पृष्ठ्यः षडहः । अत एवायं प्रत्यङ्ङिति [24]निर्दिश्यते । तत ऊर्ध्वमुपान्तिममहस्त्रिवृदनिरुक्तं ज्योतिरग्निष्टोमरूपम् । तत ऊर्ध्वमतिरात्रोऽन्तिमः । एवं स्थिते सत्येकादशादिचतुर्दशान्तान्मध्यवर्तिनोऽहश्चतुष्टयादध उपदिष्टाच्च ये त्रिसंख्याकास्त्रयस्त्रिंशास्तैरुभयतोऽवस्थितैर्द्वारिद्र्यहेतुं [V]पाप्मनम् [V]अपहत्य [V]दैवीं सभां मध्यवर्तिनीं [V]गच्छन्ति । [25]यानि मध्यवर्तीनि चत्वारि पृष्ठाख्यान्यहानि [26]तान्येवात्र [V]दैवी [V]संसत् इत्युच्यते । तस्मादुभयतस्त्रयस्त्रिंशयुक्तान्यहानि कुर्यादिति [27]विधिरुन्नेयः ॥

जामीति ॥ अथाऽधोवर्तिषु त्रिषु त्रयस्त्रिंशेषु यो मध्यमो यश्चोर्ध्ववर्तिषु त्रिषु मध्यमस्तस्योभयविधस्य [28]मध्यमस्यानिरुक्ततां विधत्ते - 'जामि वा एतत् कुर्वन्ति यत् त्रयस्त्रयस्त्रि२ंशा अन्वञ्चो मध्येऽनिरुक्तो

~~~~~~~~~~~~~~~~~~~~

२७. अ. अ१ - मध्यषडहाव° । २८-२८. अ - विभवन्ति । २९. अ - पृष्ठमह° । ३०. मै. मै२. मै३ - उत्तरस्य । ३१. मै२ - अन्यमह° । ३२. मै. मै२. मै३ - अव । ३३. मै१. अ. अ१ - स्थिरैः । ३४. मै२ - °संख्यातैः । ३५. अ१ - 'च' नास्ति । ३६. मै२ - हीत्याह । ३७. मै२ - 'हि' नास्ति ।

~~~~~~~~~~~~~~~~~~~~

१९. म - 'ते' नास्ति । २०. शृ१ - विशेषाः सप्ता स्त्रिसंख्याकाः । २१. म. हा. इ. वा - मध्यम । २२. शृ१. क. अ. पा - अनिरुक्तम् । २३. म - °युक्तं निरुक्तम् , आ - युक्तं(क्तम)निरुक्तम् । २४. उ. शृ१. इ - निर्देक्ष्यते; वा - निर्दिश्यन्ते । २५. शृ१ - यानीमान्त्रिरग्निष्टोमरूपं तत ऊर्ध्वम् । २६. अ. आ. पा. हा. उ. इ. वा. वै - एतान्येव । २७. अ. आ. पा. हा. उ. इ. वा. वै - विध्युन्नयः । २८. आ- °स्यानिरुक्तम् ।
~~~~~~~~~~~~~~~~~~~~

तेनाजाम्यूर्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्या९ रूपाभ्या९ सुवर्गं लोकं यन्त्यसंत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति

तेन । अजामि । ऊर्ध्वानि । पृष्ठानि । भवन्ति । ऊर्ध्वाः । छन्दोमा इति छन्दः-माः । उभाभ्याम् । रूपाभ्याम् । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । असंत्रम् । वै । एतत् । यत् । अछन्दोममित्यछन्दः-मम् । यत् । छन्दोमा इति छन्दः-माः । भवन्ति ।

'जामि वै' इत्यादि ॥ [३८]आलस्यजननमिदं क्रियते ॥ तस्मात् [V]मध्ये, त्रयाणां [३९]मध्ये [४०]मध्यमस्त्रिंशः [V]अनिरुक्तः [V]भवति [४१]अव्यक्तनामा भवति । [V]तेन [V]अजामि भवति । मध्यमः षडहः निरुक्तः इत्येके । [४२-V]ऊर्ध्वानि रथन्तरादिक्रमेण [-४२] वर्तन्ते ॥

'ऊर्ध्वाश्छन्दोमाः' इति ॥ तान्येवाहानि चतुर्विंशतिक्रमेण वर्तन्ते । 'उभाभ्यां रूपाभ्याम्' इति । [४३]एतस्य षडहस्य [४४]पृष्ठ्यश्छन्दोमात्मके द्वे रूपे संपाद्ये इति दर्शितं [४५]भवति । तद्धर्मानुगमात् [४६]भाक्तो व्यपदेश [४७]इत्युक्तं भवति । यथोक्तम् [४८]आचार्येण - [४९]"अथेदम् [५०]संसदामयनम् छन्दोमं [५१]भवतीति [५२]विज्ञायत उ खल्वस्य छन्दोमभक्तयश्चतुर्वि९शं [५३]चतुश्चत्वारि९शम् अष्टाचत्वारि९शम्"

भवति तेनाजामि' इति ॥ [२९-] यदा अनुक्रमवर्तिनः [-२९] सर्वेऽपि त्रयस्त्रि९शा एकविधाः स्युस्तदानीमनुष्ठातार आलस्यं कुर्वन्ति । तस्मान्मध्ये वर्तमानमहर्विशेषमनिरुक्तत्वेनेतरस्मान्निरुक्ताद्विलक्षणं [३०]कुर्युः । तेन वैलक्षण्येनाऽऽलस्यं परिहृतं [३१]भवति ॥

ऊर्ध्वानीति ॥ उभयतोऽवस्थितानां त्रयस्त्रिंशानां मध्यवर्तिषु चतुर्ष्वहःसु कंचिद्विशेषं विधत्ते - 'ऊर्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्या९ रूपाभ्या९ सुवर्गं लोकं यन्ति' इति ॥ रथन्तरबृहदाद्यनुक्रमगतानि पृष्ठस्तोत्राणि निष्पादनीयानि । तथा चतुर्विंशश्चतुश्चत्वारिंशाद्यनुक्रमगताश्छन्दोमा निष्पादनीयाः ।

---

३८. मै२ - आलस्यमिदम् । ३९. मै. मै२. मै३. अ. अ१ - 'मध्ये' नास्ति । ४०. मै१ - मध्यस्त्रिंशः । ४१. मै२ - अव्यक्तसमा । ४२-४२. मै१. अ१ - ऊर्ध्वा निरन्तरक्रमेण, मै२ - ऊर्ध्वा इत्यादि रथन्तरादिक्रमेण । ४३. अ१ - तद्धि । ४४. मै२ - °छन्दोमा नामके । ४५. मै. मै१. मै३. अ. अ१ - 'भवति' नास्ति । ४६. अ. अ१ - भक्तः । ४७. अ१ - इत्युक्तः । ४८. मै२ - आचार्येण इति । ४९. मै१. अ. अ१ - अथैनम् । ५०. मै१. अ१ - संसदामयम् । ५१. मै१ - भवन्ति । ५२. मै१. अ१ - विज्ञायत इति । ५३. मै१. अ१ - चत्वारिंशम् ।

२९-२९. अ. आ. क. पा. हा. इ. वा. म - यद्यनुक्रम° । ३०. शृ१. म - कुर्यात् । ३१. अ. आ. क. पा. हा. इ. वा. वै. म - भवेत् ।

तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छंदोमैरोजो वै वीर्यं पृष्ठानि पशवं(३)श्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति

तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः-मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः (३) । छन्दोमा इति छन्दः-माः । ओजसि । एव । वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति ।

(बौश्रौ २६.२१) इति । अत्रैवं जानीयात् आद्ये त्रिवृत आयतने त्रयस्त्रिंशोऽग्निष्टोमश्चतुर्विंशाः पवमानाः, [५४] द्वितीये पञ्चदशस्यायतने [५४] त्रिणवः अष्टाविंशाः पवमानाः । तृतीये सप्तदशस्यायतने [५५] एकविंशः द्वाविंशाः[५५] पवमानाः, चतुर्थेऽस्मिन् आयतने एकविंशः षड्त्रिंशाः पवमानाः, [५६]पञ्चमेऽस्मिन्नायतने त्रिणवश्चत्वारिंशाः पवमानाः, षष्ठे स्व आयतने त्रयस्त्रिंशः [५७]चतुश्चत्वारिंशाः पवमानाः [५८] ततः त्रयस्त्रिंशः अष्टाचत्वारिंशाः पवमाना इति [५८] ॥

अथैवं संपाद्यत्वे हेतुमाह - 'असत्रम्' इत्यादि ॥ गतम् (तैसं ७.३.८) । 'पृष्ठैः' इति । पृष्ठरूपेण ॥

[५९] 'त्रयस्त्रयस्त्रिंशाः' इत्यादि (तैसं ७.३.५) ॥

यद्यपि त्रिणवैकविंशद्वयत्रिणवस्तोमैस्तान्यहानि [३२]निष्पाद्यानीति शाखान्तरानुसारेण सूत्रेऽभिहितं [३३]तथाऽप्यत्रत्यवचनबलात् पवमानादिषु केषुचित् स्तोत्रेषु चतुर्विंशादयश्छन्दोमा अनुक्रमेण प्रयोक्तव्याः । एवं सत्युभाभ्यां पृष्ठ्यछन्दोमरूपाभ्यां स्वर्गं प्राप्नुवन्ति ॥

असत्रमिति ॥ तमेतं पृष्ठ्यच्छन्दोमविधिं प्रशंसति - 'असत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति' इति ॥ पूर्ववद्व्याख्येयम् ॥

त्रयस्त्रयस्त्रिꣳशा इति ॥ तान्येतानि मध्यवर्तीनि पृष्ठान्युभयतोऽवस्थितांस्त्रयस्त्रिंशांश्च [३४]प्रकारान्तरेण प्रशंसति - 'त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशा परस्तान्मध्ये पृष्ठान्युरो वै

५४-५४. मै१ - द्वितीयपञ्चदश° । ५५-५५. मै१. अ. अ१ - एकविंशाः द्वात्त्रिंशाः । ५६. मै२ - पञ्चमस्यास्मिन् । ५७. मै२. अ. अ१ - चत्वारिंशाः । ५८-५८. अ - 'ततः - - - - इति' नास्ति, मै२ - 'ततः' नास्ति । ५९. मै१. मै२ - त्रयस्त्रिंशाः ।

---

३२. क - निष्पादनीयानीति । ३३. आ. इ. वा. म - तथाप्यत्रवचन° । ३४. शृ१ - त्रयस्त्रिंशप्रकारान्तरेण; हा - 'प्रकारान्तरेण' नास्ति ।

त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तान्मध्ये पृष्ठान्युरो वै त्रयस्त्रिꣳशा आत्मा पृष्ठान्यात्मन एव तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव (४) सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति

त्रयः । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । अवस्तात् । भवन्ति । त्रयः । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । परस्तात् । मध्ये । पृष्ठानि । उरः । वै । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । आत्मा । पृष्ठानि । आत्मने । एव । तत् । यजमानाः । शर्म । नह्यन्ते । अनार्त्यै । बृहद्रथन्तराभ्यामिति बृहत्-रथन्तराभ्याम् । यन्ति । इयम् । वाव । रथन्तरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव (४) । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । पराञ्चः । वै । एते । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति ।

त्रयस्त्रिꣳशा आत्मा पृष्ठान्यात्मन एव तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै' इति ॥ य एतेऽधोवर्तिनः ᐯत्रयस्त्रिꣳशाः ये चोपरिवर्तिनस्ते सर्वेऽपि पुरुषशरीररूपस्योरोदेशस्थानीयाः । यानि तु मध्यवर्तीनि पृष्ठानि तानि जीवात्मस्थानीयानि । तत्तेनोभयविधानुष्ठानेन ᐯयजमानाः स्वार्थं शर्म नह्यन्ते [३५]सुखं [३६]बध्नन्ति संपादयन्तीत्यर्थः । तच्च ᐯअनार्त्यै दुःखविनाशाय भवति ॥

बृहदिति ॥ उक्तेषु पृष्ठस्तोत्रेषु पर्यायेण सामद्वयमेव विधत्ते - 'बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति' [३७]इति ॥ पूर्ववद्व्याख्येयम् ॥

पराञ्च इति ॥ अथ सप्तदशमारभ्य द्वाविंशान्तेषु षट्सु दिनेषु आवृत्तं पृष्ठ्यं षडहं विधत्ते -[३७] - '[३८]- पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति' -[३८] इति ॥ पूर्ववद्व्याख्येयम् ॥

---

३५. उ. हा. अ. पा. इ. वा. म - 'सुखम्' नास्ति । ३६. अ. पा. हा. इ. वा. म - बध्नन्ति सुखम् । ३७-३७. अ. आ. क. पा. हा. म - 'इति - - - - विधत्ते' नास्ति । ३८-३८. म - 'पराञ्चो - - - - तिष्ठन्ति' नास्ति ।

ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋध्वोत्तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमाना॒ँ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स क्षयोऽस्मादेव तेन क्षयान्न यन्ति चतुर्वि॒ँशतिरात्रो भवति

ये । पराचीनानि । पृष्ठानि । उपयन्तीत्युप-यन्ति । प्रत्यङ् । षडह इति षट्-अहः । भवति । प्रत्यवरूढ्या इति प्रति-अवरूढ्यै । अथो इति । प्रतिष्ठित्या इति प्रति-स्थित्यै । उभयोः । लोकयोः । ऋद्ध्वा । उदिति । तिष्ठन्ति । त्रिवृत इति त्रि-वृतः । अधीति । त्रिवृतमिति त्रि-वृतम् । उपेति । यन्ति । स्तोमानाम् । संपत्त्या इति सं-पत्त्यै । प्रभवायेति प्र-भवाय । ज्योतिः । अग्निष्टोम इत्यग्नि-स्तोमः । भवति । अयम् । वाव । सः । क्षयः । अस्मात् । एव । तेन । क्षयात् । न । यन्ति । चतुर्वि॒ँशतिरात्र इति चतुर्वि॒ँशति-रात्रः । भवति ।

[V]अयं मनुष्यलोकः खलु [V]सः [V]क्षयः तदग्निष्टोमाख्यमायतनम् । तस्मात् [V]तेन अग्निष्टोमेन अस्मात् [V]क्षयात् [६०]लोकात् [६१-V]न [V]यन्ति न गच्छन्ति न नश्यन्तीत्यर्थः [-६१] । " क्षयो निवासे " (पा ६.१.२०१) इत्याद्युदात्तत्वम् ॥

त्रिवृत इति ॥ अथोपान्त्यं त्रयोविंशमहर्विधत्ते - ' त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमाना॒ँ संपत्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स क्षयोऽस्मादेव तेन क्षयान्न यन्ति ' इति ॥ आवृत्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशादिस्त्रिवृदन्तः । तथा सति द्वाविंशे दिने त्रिवृत्स्तोमः प्राप्नोति । तस्मात् त्रिवृत्स्तोम-युक्तादह्नोऽप्यध्यूर्ध्वं त्रयोविंशादिने [V]त्रिवृतम् [V]एव अनुतिष्ठेयुः । तथा सति त्रिवृत्स्तोमस्य ' सांतत्यादेषां स्तोमानां संपत्तिर्भवति । सा च संपत्तिर्यजमानस्य पुत्रादिप्रभवाय संपद्यते । स च त्रिवृत्स्तोमयुक्ताहर्विशेषो ज्योतिष्टोमः कार्यः सप्तसंस्थारूपेऽग्निष्टोमे प्रथमसंस्थारूपं कुर्यादित्यर्थः । अयमेव मनुष्यलोकः सोऽग्निष्टोमरूपः क्षयो निवासार्थो गृहविशेषः । तेनाग्निष्टोमानुष्ठानेनास्माद्भूलोकवर्तिनः [V]क्षयात् [३९-] गृहात् [V]न [V]यन्ति [-३९] न विनश्यन्तीत्यर्थः ॥

---

६०. मै१. अ. अ१ - ' लोकात् ' नास्ति । ६१-६१. मै१ - यन्ति क्षयान्न गच्छन्ति न नश्यन्तीत्यर्थः, अ - यान्ति क्षयान्तः गच्छन्ति न पश्यन्तीत्युक्तः ।

३९-३९. आ - गृहान्नयन्ति, वा - गृहात् नयन्ति ।

चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सरः एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै (५) ॥

(मनुष्यस्य मध्यतः पशवस्ताभ्यामेव संवत्सरश्चतुर्विꣳशतिश्च ।)

चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासा इत्यर्ध-मासाः । संवत्सर इति सं-वत्सरः । संवत्सर इति सं-वत्सरः । सुवर्ग इति सुवः-गः । लोकः । संवत्सर इति सं-वत्सरे । एव । सुवर्ग इति सुवः-गे । लोके । प्रतीति । तिष्ठन्ति । अथो इति । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति-अक्षरा । गायत्री । गायत्री । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । गायत्रिया । एव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अवेति । रुन्धते । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य । परिगृहीत्या इति परि-गृहीत्यै (५) ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'चतुर्विंशतिरात्रः' इत्यादि ॥ गतम् (तैसं ७.४.१) । [६२]अतिरात्राभ्याम् [V]अभितः ब्रह्मवर्चसस्य [६३]परिग्रहः ॥

॥ इति सप्तमे चतुर्थे द्वितीयोऽनुवाकः ॥

चतुर्विꣳशतिरात्र इति ॥ अथ क्रतुगतामहःसंख्यां प्रशंसति - 'चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धते' इति ॥ पूर्ववद्व्याख्येयम् ॥

अतिरात्राविति ॥ अथोदयनीयमहर्विधत्ते - 'अतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै' इति ॥ पूर्वं विहितेन "ज्योतिरतिरात्रो भवति" (तैसं ७.२.६) इत्यनेन प्रायणीयेन सह [४०]निर्देष्टुं द्विवचनम् । [४१]संख्यायाः गायत्रीसाम्यात् [४२]ब्रह्मवर्चसफलत्वेन तत्परिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥

---

६२. मै१. अ१ - अतिरात्रम् । ६३. मै२ - ग्रहाः ।

---

४०. अ. क. हा - निर्दिष्टम् । ४१. अ. आ. क. पा. हा. इ. बा - वर्णसंख्यया । ४२. शृ१ - ब्रह्मचर्य° ।

ऋक्षा वा इयमलोमकाऽऽसीत् साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैतास्त्रिꣳशतꣳ रात्रीरपश्यत् ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिरियं वा अक्षुध्यत् सैतां विराजमपश्यत्

ऋक्षा । वै । इयम् । अलोमका । आसीत् । सा । अकामयत । ओषधीभिरित्योषधि-भिः । वनस्पतिभिरिति वनस्पति-भिः । प्रेति । जायेय । इति । सा । एताः । त्रिꣳशतम् । रात्रीः । अपश्यत् । ततः । वै । इयम् । ओषधीभिरित्योषधि-भिः । वनस्पतिभिरिति वनस्पति-भिः । प्रेति । अजायत । ये । प्रजाकामा इति प्रजा-कामाः । पशुकामा इति पशु-कामाः । स्युः । ते । एताः । आसीरन् । प्रेति । एव । जायन्ते । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः । इयम् । वै । अक्षुध्यत् । सा । एताम् । विराजमिति वि-राजम् । अपश्यत् ।

अथ त्रिंशद्रात्र आरभ्यते - 'ऋक्षा वै' इत्यादि ॥ तृणादिरहिता [1-] स्थली [V]ऋक्षा [-1], [V]इयं पृथिवी पूर्वम् [V]अलोमका [2V]आसीत् वृक्षाद्यभावात् । [3]पावकादित्वादित्वाभावः (द्र. पा ७.२.६९वा) । गतमन्यत् । 'आसीरन्' इति । [4-V]एताः [V]त्रिंशतं [-4] [V]रात्रीः [V]आसीरन् ॥

द्वितीये द्वितीयश्चतुर्विंशतिरात्रः [1-] अभिहितः । अथ तृतीये त्रिंशद्रात्रः [-1] अभिधीयते ॥

ऋक्षा इति ॥ [2-] तमेतं विधत्ते [-2] - 'ऋक्षा वा इयमलोमकाऽऽसीत् साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैतां त्रिꣳशतꣳ रात्रीरपश्यत् ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिः' इति ॥ ओषधयः वनस्पतयश्च पृथिव्या लोमानि, तद्रहितत्वात् कदाचित् [V]इयम् [V]ऋक्षा [3]परुषा [V]आसीत् । तत ओषधिवनस्पत्युत्पादनं कामयित्वा त्रिंशद्रात्रयागानुष्ठानेनोत्पादयामास । एवमन्येऽपि तदनुष्ठानेन प्रजाः पशूंश्चोत्पादयन्ति । समुदायप्राधान्यं परित्यज्य प्रत्येकप्राधान्यविवक्षया रात्रीरिति बहुवचननिर्देशः ॥

इयमिति ॥ अथाऽन्नप्राप्त्यर्थं तमेव क्रतुं विधत्ते - 'इयं वा अक्षुध्यत् सैतां विराजमपश्यत् तामात्मन् धित्वाऽन्नाद्यमवारुन्धौषधीर्वनस्पतीन् प्रजां पशून् तेनाऽवर्धत सा जेमानं महिमानमगच्छद्य एवं विद्वाꣳस

१-१. मै२ - 'स्थली ऋक्षा' नास्ति । २. मै१ - पृक्षा आसीत्, अ१ - वृक्षा आसीत् । ३. अ१ - पावकादिकत्वादिनि भावः । ४-४. मै२ - एकत्रिंशतम् ।

१-१. इ. वै - 'अभिहितः - - - - त्रिंशद्रात्रः' नास्ति । २-२. शृ१. उ. म - 'तमेतं विधत्ते' नास्ति । ३. म - परुषा ।

तामात्मन् धित्वाऽन्नाद्यमवारुन्धौषधी(१)र्वनस्पतीन् प्रजां पशून् तेनावर्धत सा जेमानं महिमानमगच्छद्य एवं विद्वाꣳस एता आसते विराजमेवाऽऽत्मन् धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति

ताम् । आत्मन् । धित्वा । अन्नाद्यमित्यन्न-अद्यम् । अवेति । अरुन्ध । ओषधीः (१) । वनस्पतीन् । प्रजामिति प्र-जाम् । पशून् । तेन । अवर्धत । सा । जेमानम् । महिमानम् । अगच्छत् । ये । एवम् । विद्वाꣳसः । एताः । आसते । विराजमिति वि-राजम् । एव । आत्मन् । धित्वा । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । वर्धन्ते । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः । जेमानम् । महिमानम् । गच्छन्ति ॥

'इयं वै 'इत्यादि ॥ Vइयं पृथिवी पूर्वम् Vअक्षुध्यत् क्षुत्पीडिताऽभवत् । Vसा त्रिंशद्रात्रेण Vएतां Vविराजम् [5]अन्नम् Vअपश्यत् । ततः सा Vताम् आत्मनि स्थापयित्वा Vअन्नाद्यम् अन्नादनसामर्थ्यम् [6]ओषध्यादींश्च Vअवारुन्धत । [7]ततस्तदवरोधेन Vअवर्धत पृथिवी । ततः Vजेमानं जयं Vमहिमानं महत्त्वं च Vअगच्छत् । जयतेर्महतेश्च औणादिको मनिन्प्रत्ययः । यद्वा-जेतृमहितृशब्दाभ्यां "तुश्छन्दसि" (पा ६.३.५९) [8]इतीयसुनि "तुरिष्ठेमेयःसु" (पा ६.४.१५४) इति [9]टिलोपः । पूर्वत्र प्रत्ययादेर्लोपः । 'य एवम्' इत्यादि । गतम् ॥

एता आसते विराजमेवाऽत्मन् धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति' इति ॥ Vइयं भूमिरन्नाभावात् कदाचित् क्षुधिताऽभूत् । ततस्तत् परिहारं विचार्य Vएतां त्रिंशद्रात्रिरूपां Vविराजम् Vअपश्यत् । त्रिंशदक्षरसाम्याद्विराड्त्वम् । Vतां च विराजं स्वमनसि स्थापयित्वा तदनुष्ठानेनान्नं प्राप्तवती । तच्चान्नमुदकतृणौदनरूपेण [4]बहुविधम् । Vतेन ओषध्यादीनवर्धयत् । वर्धयित्वा च [5]सर्वत्र [6]नेतृत्वं [7]पूज्यत्वलक्षणं [8]महित्वं च प्राप्नोत् । एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नुवन्ति ॥

---

५. मै२ - 'अन्नम्' नास्ति । ६. मै२ - ओषधीश्च । ७. अ१ - ततः पुरोधेन । ८. [पाणिनिसूत्रमवलम्ब्यास्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः । मै मुद्रितपुस्तके सर्वेष्वपि लिखितपुस्तकेषु च 'इतीमनचि' इति पाठो लभ्यते ।], मै१ - इतीमनिच । ९. मै२ - लोपः ।

---

४. हा - बहुधा । ५. म - सर्व । ६. अ. आ. क. पा. हा. इ. वा. म - 'नेतृत्वं' नास्ति । ७. अ. क. हा - पूज्यलक्षणम्, म - प्रजोत्पत्तिलक्षणम् । ८. शृ१. म - महत्त्वम् ।

ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव (२) प्रति तिष्ठन्ति त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽऽरभन्ते प्रतिष्ठित्यै

ज्योतिः । अतिरात्र इत्यति-रात्रः । भवति । सुवर्गस्येति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु-ख्यात्यै । पृष्ठ्यः । षडह इति षट्-अहः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि । पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिरित्यृतु-भिः । संवत्सरमिति सं-वत्सरम् । ते । संवत्सर इति सं-वत्सरे । एव (२) । प्रतीति । तिष्ठन्ति । त्रयस्त्रिꣳशादिति त्रयः-त्रिꣳशात् । त्रयस्त्रिꣳशमिति त्रयः-त्रिꣳशम् । उपेति । यन्ति । यज्ञस्य । संतत्या इति सं-तत्यै । अथो इति । प्रजापतिरिति प्रजा-पतिः । वै । त्रयस्त्रिꣳश इति त्रयः-त्रिꣳशः । प्रजापतिमिति प्रजा-पतिम् । एव । एति । रभन्ते । प्रतिष्ठित्या इति प्रति-स्थित्यै ।

'ज्योतिरतिरात्रः' इत्यादि ॥ व्याख्यातम् (तैसं ७.४.२) व्यक्ताऽहःक्लृप्तिः ॥

'पृष्ठ्यः षडहः' इत्यादि ॥ षट्त्वान्वयात् पृष्ठैः [10][V]ऋतून् ऋतुभिः च [V]संवत्सरम् आरुह्य तत्र [V]प्रतितिष्ठन्ति ॥

ज्योतिरिति ॥ तत्र प्रथममहर्विधत्ते - 'ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै' इति ॥

पृष्ठ्य इति ॥ अथानन्तरभावीनि षट्संख्याकान्यहानि विधत्ते - 'पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति' इति ॥ गतम् ॥

त्रय इति ॥ अथाष्टममहर्विधत्ते - 'त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽरभन्ते प्रतिष्ठित्यै' इति ॥ पृष्ठ्यषडहे यदन्तिममहः [9]तदेतत् त्रयस्त्रिंशम् । तस्मादूर्ध्वं [10]पुनस्त्रयस्त्रिंशानुष्ठाने [11]सजातीयत्वेन [V]यज्ञस्य सांतत्यं भवति । अपि च त्रयस्त्रिंशस्य

१०. मै२ - 'ऋतून्' नास्ति ।

९. शृ१ - तदेव । १०. आ. क - °नुष्ठानेन । ११. शृ१ - जातीयत्वेन ।

त्रिणवो भवति विजित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत् तेज एवाऽऽत्मन् दधते

त्रिणव इति त्रि-नवः । भवति । विजित्या इति वि-जित्यै । एकविꣳश इत्येक विꣳशः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् । दधते । त्रिवृदिति त्रि-वृत् । अग्निष्टुदित्यग्नि-स्तुत् । भवति । पाप्मानम् । एव । तेन । निरिति । दहन्ते । अथो इति । तेजः । वै । त्रिवृदिति त्रि-वृत् । तेजः । एव । आत्मन् । दधते ।

[११-] 'त्रयस्त्रिंशात्' इति [-११] ॥ [V]त्रयस्त्रिंशात् पृष्ठात् परं पुनरपि [V]त्रयस्त्रिंशम् [V]उपयन्ति [V]यज्ञस्य [V]सन्तत्यै अविच्छेदाय [V]अथो अपि च प्रजापतिः [V]त्रयस्त्रिंशः सर्वदेवतामयत्वात् । [१२-] एतासां च [-१२] [१३]त्रयस्त्रिंशत्वात् तम् [V]एव [V]आरभन्ते । तत्प्रतिष्ठार्थं भवति । [V]त्रिणवः तदनन्तरं [V]भवति । विजयार्थं तद्भवति, तस्य तत्साधनत्वात् । ततः [१४][V]एकविंशः [V]भवति प्रतिष्ठार्थम्, तत्प्रतिष्ठायास्तत्र [१५]जातत्वात् । सर्वत्र "तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । [V]अथो अपि च [V]रुचं दीप्तिम् [V]आत्मनि [V]दधते, एकविंशस्यादित्यत्वात् । [१६]एवमेतानि दशाहानि ॥

प्रजापतिना सृष्टत्वात् तद्रूपत्वं तेन [१२]तदनुष्ठायिनः [V]प्रजापतिम् [V]एव अनुतिष्ठन्ति । [१३]तच्च प्रतिष्ठार्थं भवति ॥

त्रिणव इति ॥ अथ नवममहर्विधत्ते - 'त्रिणवो भवति विजित्यै' इति ॥ अन्यत्र "त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान् प्राणुदन्त' (तैब्रा २.२.४) इति श्रवणात् त्रिणवो जयहेतुः ॥

एकविꣳश इति ॥ अथ दशममहर्विधत्ते - 'एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन् दधते' इति ॥ अन्यत्र "प्रतिष्ठा वा एकविꣳशः" (तैसं ७.३.१०) । "रुग्वा एकविꣳशः" (तैसं ७.३.१०) इति श्रवणादुभयप्राप्तिः ॥

त्रिवृदिति ॥ अथैकादशमहर्विधत्ते - 'त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत् तेज एवाऽऽत्मन् दधते' इति ॥ अग्निरेव यत्र स्तूयते सः [V]अग्निष्टुत् । अतोऽग्निसामर्थ्यात् पापदाहः । त्रिवृत्सामर्थ्यात् कान्तिप्राप्तिः ॥

११-११. मै१ - 'त्रयस्त्रिंशात् इति' नास्ति । १२-१२. अ१ - स तावतोऽपि, मै१ - एतावताऽपि, मै२ - तासां च । १३. मै२ - त्रयस्त्रिंशात् । १४. मै१. अ१ - एकविंशम् । १५. मै२ - अज्ञातत्वात् । १६. अ१ - एवमेताहानि ।

१२. अ. आ. क. पा. हा. इ. वा - °ष्ठायिनस्तेन । १३. उ - तत्र ।

पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव (३) रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते चतुर्विꣳशो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः

~~~~~~~~~~~~~~~~~~~~

पञ्चदश इति पञ्च-दशः । इन्द्रस्तोम इतीन्द्र-स्तोमः । भवति । इन्द्रियम् । एव । अवेति (३) । रुन्धते । सप्तदश इति सप्त-दशः । भवति । अन्नाद्यस्येत्यन्न अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायन्ते । एकविꣳश इत्येक-विꣳशः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् । दधते । चतुर्विꣳश इति चतुः-विꣳशः । भवति । चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासा इत्यर्ध-मासाः । संवत्सर इति सं-वत्सरः । संवत्सर इति सं-वत्सरः । सुवर्ग इति सुवः-गः । लोकः ।

~~~~~~~~~~~~~~~~~~~~

[१७]अथ 'त्रिवृदग्निष्टुत्' सर्वाग्नेयः ॥ गतमन्यत् । [१८]ततः [V]पञ्चदशः [V]इन्द्रस्तोमः [१९-] यत्र इन्द्रः [-१९] स्तूयते । ततः [V]सप्तदशः [२०]अन्नप्रभवत्वात् अन्नाद्याय [V]भवति । [V]अथो अपि च [V]तेन [२१][V]प्रजायन्ते सप्तदशस्य प्राजापत्यत्वात् । अथ - 'एकविंशो भवति' इत्यादि । गतम् । तस्य प्रतिष्ठाहेतुत्वमुक्तं रुचो हेतुत्वं च ॥

~~~~~~~~~~~~~~~~~~~~

पञ्चदश इति ॥ अथ द्वादशमहर्विधत्ते - "पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव रुन्धते" इति ॥ इन्द्र एव यत्र स्तूयते सोऽयम् [V]इन्द्रस्तोमः तेनेन्द्रियप्राप्तिः ॥

सप्तदश इति ॥ अथ त्रयोदशमहर्विधत्ते - 'सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्ते' इति ॥ सप्तदशस्तोमस्यान्नप्रजाहेतुत्वादुभयप्राप्तिः ॥

एकविꣳश इति ॥ अथ चतुर्दशमहर्विधत्ते - 'एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते' इति ॥ पूर्ववद्व्याख्येयम् ॥

~~~~~~~~~~~~~~~~~~~~

१७. मै१ - अत्र । १८. अ१ - 'ततः' नास्ति । १९-१९. अ१ - इन्द्रियत्वेन । २०. अ१. मै२ - अन्नधानप्रभवत्वात्, मै१ - अन्नवानत्रभवत्वाय, २१. मै. मै१. मै३. अ - प्रजायते, मै२ - प्रजायते एकविंशस्यादित्यत्वात् एवमेतानि दशाहानि ।

संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान् विषूवन्तो भवन्ति य एवं विद्वाꣳस एता आसते चतुर्विꣳशात् पृष्ठान्युप यन्ति संवत्सर एव प्रतिष्ठाय (४) देवता अभ्यारोहन्ति

संवत्सर इति सं-वत्सरे । एव । सुवर्ग इति सुवः-गे । लोके । प्रतीति । तिष्ठन्ति । अथो इति । एषः । वै । विषूवानिति विषु-वान् । विषूवन्त इति विषु-वन्तः । भवन्ति । ये । एवम् । विद्वाꣳसः । एताः । आसते । चतुर्विꣳशादिति चतुः-विꣳशात् । पृष्ठानि । उपेति । यन्ति । संवत्सर इति सं-वत्सरे । एव । प्रतिष्ठायेति प्रति-स्थाय (४) । देवताः । अभ्यारोहन्तीत्यभि-आरोहन्ति ॥

अथ चतुर्विंशः । 'चतुर्विंशतिरर्धमासाः' इत्यादि । गतम् (तैसं ७.४.१) । [V]अथो अपि च [V]एषः चतुर्विंशः [V]विषूवान् [२२]विविधस्वरूपाणामह्नां मध्यस्थः पञ्चदशत्वाद्विविधैरहोभिः तद्वान् विषूवान् । " ह्रस्वनुड्भ्यां [२३]मतुप् (पा ६.१.१७६) इति मतुप उदात्तत्वम् । एवं विदित्वा आसीना [V]विषूवन्तः (विषुवतो) मध्यस्थाः सर्वैः सेव्यः भवन्ति ॥

अथ [२४]चतुर्विंशानन्तरं पृष्ठान्युपयन्ति ॥ 'संवत्सर एव' इत्यादि । 'चतुर्विंशतिरर्धमासाः

चतुर्विꣳश इति ॥ अथ पञ्चदशमहर्विधत्ते - 'चतुर्विꣳशो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान् विषूवन्तो भवन्ति य एवं विद्वाꣳस एता आसते' इति ॥ संख्यासाम्यादर्धमाससंवत्सरद्वारा स्वर्गे प्रतिष्ठा । अपि [१४]चाऽयमहर्विशेषो [V]विषूवान् विविधा [१५]सूतिः फलोत्पत्तिरिति विषूस्तद्वानयम् । तस्मादेवं विदित्वाऽनुष्ठातारोऽपि विविधफलोत्पत्तिमन्तो भवन्ति ॥

चतुर्विꣳशदिति ॥ अथ षोडशमारभ्यैकविंशतिपर्यन्तानि षट्संख्याकान्यहानि विधत्ते - 'चतुर्विꣳशात्पृष्ठान्युपयन्ति संवत्सर एव प्रतिष्ठाय देवता अभ्यारोहन्ति' इति ॥ प्रतिष्ठाहेतुसंवत्सरात्मकचतुर्विंशस्तोमयुक्तादह्न ऊर्ध्वं पृष्ठ्यषडहानुष्ठाने [१६-] सति प्रथमसंवत्सरे प्रतिष्ठां प्राप्य पश्चात् षड्भिरहोभिरारभ्य देवताः प्राप्नोति ॥

---

२२. मै२ - °धस्त्रवाणामह्नाम् । २३. मै. मै१. मै३. अ. अ१ - 'मतुप्' नास्ति । २४. मै२ - चतुर्विंशात् एवम् ।

---

१४. हा. अ - वायमह° । १५. इ. बा - स्तुतिः । १६-१६. ग्र१ - 'सति - - - - °शानुष्ठाने' नास्ति ।

त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते

त्रयस्त्रिꣳशादिति त्रयः-त्रिꣳशात् । त्रयस्त्रिꣳशमिति त्रयः-त्रिꣳशम् । उपेति । यन्ति । त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत् । वै । देवताः । देवतासु । एव । प्रतीति । तिष्ठन्ति । त्रिणव इति त्रि-नवः । भवति । इमे । वै । लोकाः । त्रिणव इति त्रि-नवः । एषु । एव । लोकेषु । प्रतीति । तिष्ठन्ति । द्वौ । एकविꣳशावित्येक-विꣳशौ । भवतः । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् । दधते ।

---

[२५]संवत्सरः ' इत्यादि कृत्वा । अथ [२६]त्रयस्त्रिंशान्तात् [२७]पृष्ठात् ^V^त्रयस्त्रिंशम् ^V^उप ^V^यन्ति । ' त्रयस्त्रिंशद्वै ' इत्यादि । गतम् ॥

अथ [२८]त्रिणवः - ' इमे वै ' इत्यादि । [२९]व्याख्यातम् । [३०-] अथ ' द्वावेकविंशौ

त्रयस्त्रिꣳशादिति ॥ अथ द्वाविंशं दिनं विधत्ते - 'त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति ' इति ॥ पृष्ठ्ये षडहेऽन्तिमं त्रयस्त्रिंशमहस्तस्मादूर्ध्वं पुनरपि त्रयस्त्रिंशानुष्ठाने [-१६] " ये देवा दिव्येकादश स्थ " (तैसं १.४.१०) [१७-] इत्यादिमन्त्रोक्ता त्रयस्त्रिंशत्संख्याकाः या देवताः तासु [-१७] एव प्रतिष्ठिता भवन्ति ॥

त्रिणव इति ॥ अथ [१८-] त्रयोविंशं दिनं [-१८] विधत्ते - ' त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति ' इति ॥ नवसंख्याविषयया त्रिसंख्यया समानत्वात् लोकत्रये प्रतिष्ठा ॥

द्वाविति ॥ अथ [१९]त्रयोविंशचतुर्विंशदिने विधत्ते - ' द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवात्मन् दधते ' इति ॥ पूर्ववद्व्याख्येयम् ॥

---

२५. मै. मै१. मै२. मै३. अ - ' संवत्सरः ' नास्ति । २६. मै१. मै२. अ१ - त्रयस्त्रिंशात् । २७. मै१. अ१ - पृष्ठान्तात् । २८. मै१ - त्रिणवम् । २९. मै२ - ' व्याख्यातम् ' नास्ति । ३०-३०. अ१ - अथैकविंशो भवतीत्यादि, मै२ - ' अथ - - - - इत्यादि ' नास्ति ।

१७-१७. अ. आ. क. पा. हा. इ. वा. म. उ - इत्यादिमन्त्रोक्तासु त्रयस्त्रिंशत्संख्याकासु देवतास्वेव । १८-१८. शृ१. म - द्वाविंशं दिनम् , हा - त्रयोविंशदिनम् । १९. अ. इ. उ. क. पा. हा. वा. म - °दिने द्वे ।

बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता (५) व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳसं एता

बहवः । षोडशिनः । भवन्ति । तस्मात् । बहवः । प्रजास्विति प्र-जासु । वृषाणः । यत् । एते । स्तोमाः । व्यतिषक्ता इति वि-अतिषक्ताः । भवन्ति । तस्मात् । इयम् । ओषधीभिरित्योषधि-भिः । वनस्पतिभिरिति-वनस्पति-भिः । व्यतिषक्तेति वि-अतिषक्ता (५) । व्यतिषज्यन्त इति वि-अतिषज्यन्ते । प्रजयेति प्र-जया । पशुभिरिति पशु-भिः । ये । एवम् । विद्वाꣳसः । एताः ।

---

[31]भवतः ' इत्यादि -[31] । एवं [V]षोडशिनः एकविंशः [V]बहवः [32][V]भवन्ति । [V]तस्मात् [V]प्रजासु [33][V]बहवः [V]वृषाणः सेक्तारः ॥

' यदेते ' इत्यादि ॥ [V]व्यतिषक्ताः व्यत्यासेन परस्परानुषक्ताः । [34-] ' तस्मादियम् ' इत्यादि -[34] । गतम् ॥

बहव इति ॥ अथ पञ्चविंशादिनमारभ्यैकोनत्रिंशपर्यन्तानि पञ्चाहानि विधत्ते - ' बहवः [20]षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणः ' इति ॥ षोडशस्तोत्रयुक्ता अहर्विशेषाः [V]षोडशिनः । ते च [V]बहवः नैरन्तर्येणात्र पञ्चैवानुष्ठेयाः । तावतैवापेक्षितसंख्यायाः पूरितत्वात् । यस्मात् प्रजोत्पत्तिहेतवः षोडशिनोऽत्र [V]बहवः अनुष्ठितास्तस्माल्लोके [V]प्रजासु मध्ये [V]वृषाणः पुंस्त्वधर्मयुक्ता बहवो दृश्यन्ते ।

यदिति ॥ एतेभ्यः षोडशिभ्यः ऊर्ध्वदिनेष्वनुष्ठितान् परस्परविलक्षणान् स्तोमान् प्रशंसति - ' यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ताः ' इति ॥ यस्मात् [V]एते [V]स्तोमाः न्यूनाधिकभावेन संकीर्णाः [V]तस्मात् भूमिरपि व्यवस्थामन्तरेण [V]ओषधीभिः [V]वनस्पतिभिः च सर्वत्र संकीर्णा दृश्यते ॥

व्यतिषज्यन्त इति ॥ स्तोमव्यतिषङ्गवेदनं प्रशंसति - ' व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳस एता आसते ' इति ॥ [V]एताः [21]त्रिंशद्रात्रीर्येऽनुतिष्ठन्ति तेषां मध्ये एकस्य प्रजा अपरस्य पशवः एवेति व्यवस्था नास्ति, किन्तु सर्वेऽपि [V]प्रजया [V]पशुभिः च संकीर्णा भवन्ति ॥

---

३१. [अस्माभिः शुद्धतामापादितोऽयमंशः । मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ' बहवः ' इति ।] । ३२. मै२ - भवन्ति । तस्मात् प्रजासु बहवो भवन्ति । ३३. मै. मै१. मै३. अ. अ१ - च बहवः । ३४-३४. मै१. अ - व्यतिरिक्तादि ।

---

२०. इ - °स्तोमयुक्ताः । २१. म - °रात्रिरप्यनु° ।

आसतेऽक्लृप्ता वा एते सुवर्गं लोकं यन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते

आसते । अक्लृप्ताः । वै । एते । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । उच्चावचान् । हि । स्तोमान् । उपयन्तीत्युप-यन्ति । यत् । एते । ऊर्ध्वाः । क्लृप्ताः । स्तोमाः । भवन्ति । क्लृप्ताः । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । उभयोः । एभ्यः । लोकयोः । कल्पते ॥

'अक्लृप्ता वै '[35]इत्यादि ॥ उच्चावचस्तोमानाम् अह्नाम् उपायनात् [V]एते अक्लृप्ताः असंपन्नाः एव [V]सुवर्गं गच्छन्ति । तस्मादित [V]ऊर्ध्वा [V]एते [V]स्तोमाः चतुष्टोमात्मकाः [V]क्लृप्ताः अव्यतिषक्ताः [V]भवन्ति चत्वारः । [36]तेन यजमानाः [V]क्लृप्ताः [V]एव [V]सुवर्गं लोकं गच्छन्ति । तस्मात् [V]उभयोः [V]लोकयोः [37-] त्रिंशद्रात्रं [V]कल्पते [-37], संपन्नं [38]भवतीति । 'त्रिंशदेताः ' इत्यादि । गतम् । अतिरात्राभ्याम् [V]अन्नाद्यस्य परिग्रहः ॥

॥ इति सप्तमे चतुर्थे तृतीयोऽनुवाकः ॥

अक्लृप्ता इति ॥ अथ षोडशिष्वहःस्वेकविधस्तोमान् प्रशंसति - 'अक्लृप्ता वा एते सुवर्गं लोकं यन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लृप्ता स्तोमा भवन्ति क्लृप्ता एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते ' इति ॥ ये यजमानाः पूर्वेषु दिनेषु [V]उच्चावचान् परस्परविलक्षणान् [V]स्तोमान् अनुतिष्ठन्ति ते यजमानाः [V]अक्लृप्ताः [22]वा इदमेतावत्तव भोग्यमित्येवं निश्चयरहिता एव स्वर्गं प्राप्नुवन्ति । [23-] अतस्तत्परिहाराय यदूर्ध्वषोडशिदिनेषु अनुष्ठेयाः स्तोमाः क्लृप्ताः सर्वेऽपि समानपरिमाणत्वेन निश्चिताः स्युस्तदानीं यजमानाः क्लृप्ताः इदमेतावद्भोग्यमित्येवं निश्चययुक्ताः सन्तः स्वर्गं प्राप्नुवन्ति [-23] । तस्मात् [24]क्लृप्ताऽक्लृप्तोभयविषयस्तोमानुष्ठानादेव यजमानार्थम् [V]उभयोः लोकयोः भोग्यं क्लृप्तं भवति ॥

३५. मै२ - इत्यादि गतम् । ३६. मै२. अ - ते, अ१ - 'तेन ' नास्ति । ३७-३७. अ१ - त्रिंशद्रात्रः कल्पः । ३८. मै१ - °तीति त्रयः, अ१ - °तीति यः ।

२२. म - वै, शृ१. उ. इ. वा - एव । २३-२३. अ. आ. क. पा. हा. इ. वा. वै. म. उ - 'अतः - - - - प्राप्नुवन्ति ' नास्ति । २४. अ. आ. क. पा. हा. इ. वा. वै. उ - क्लृप्ताः क्लृप्तोभयविधस्तोमा°।

त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (३) ॥

(ओषधीः संवत्सर एवाव प्रतिष्ठाय व्यतिषक्तैकान्न पञ्चाशच्च)

त्रिꣳशत् । एताः । त्रिꣳशदक्षरेति त्रिꣳशत्-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजेति वि-राजा । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । अन्नाद्यस्येत्यन्न-अद्यस्य । परिगृहीत्या इति परि-गृहीत्यै (३) ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

त्रिꣳशदिति ॥ अथ क्रतुगतामहःसंख्यां प्रशंसति - ' त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराट् विराजैवान्नाद्यमव रुन्धते ' इति ॥ [२५]गतम् ॥

अतिरात्राविति ॥ अथान्तिममहर्विधत्ते - ' अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ' इति ॥ प्रायणीयेन सह निर्देशाद्द्विवचनम् । अन्नाद्यफलस्य विधिवाक्ये [२६]दृष्टत्वात् तत्परिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥

२५. शृ१ - ' गतम् ' नास्ति । २६. अ. आ. पा. हा. इ. वा. म. उ - स्पष्टत्वात् ।

प्रजापतिः सुवर्गं लोकमैत् तं देवा येनयेन छन्दसाऽनु प्रायुञ्जत तेन नाऽऽप्नुवन्त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन् द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुह्य सुवर्गं लोकमायन्

प्रजापतिरिति प्रजा-पतिः । सुवर्गमिति सुवः-गम् । लोकम् । ऐत् । तम् । देवाः । येनयेनेति येन-येन । छन्दसा । अनु । प्रेति । अयुञ्जत । तेन । न । आप्नुवन् । ते । एताः । द्वात्रिꣳशतम् । रात्रीः । अपश्यन् । द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत्-अक्षरा । अनुष्टुगित्यनु-स्तुक् । आनुष्टुभ इत्यानु-स्तुभः । प्रजापतिरिति प्रजा-पतिः । स्वेन । एव । छन्दसा । प्रजापतिमिति प्रजा-पतिम् । आप्त्वा । अभ्यारुह्येत्यभि-आरुह्य । सुवर्गमिति सुवः-गम् । लोकम् । आयन् ।

अथ द्वात्रिंशद्रात्रो विधीयते - 'प्रजापतिः' इत्यादि ॥ स्वर्गं [1]गतवन्तं प्रजापतिं [2]नानुप्राप्तवन्तः । [3]ते [V]देवाः [4][V]येनयेन छन्दसा गायत्र्यादिना प्रजापतिम् [V]अनुप्रायुञ्जत [5]प्रयुज्यमानेन [6]येन [V]प्रजापतिम् [7] उपासीदन् तेन [7] सर्वेणापि [8]न प्रजापतिम् आप्नुवन् स्वर्गं [9]च नागच्छन् । 'ते एताः' इत्यादि गतम् । 'आनुष्टुभः प्रजापतिः' इति । सर्वविकल्पात्मकत्वात् तस्य । अनुष्टुप्छब्द उत्सादिः (गणपाठ -५२, पा ४.१.८६) । 'स्वैनैव' इति । प्राजापत्येन [V]अभ्यारुह्य उपरि गत्वा ।

तृतीयेऽनुवाके त्रिंशद्रात्रोऽभिहितः । अथ चतुर्थे द्वात्रिंशद्रात्रोऽभिधीयते ॥

प्रजापतिरिति ॥ [1]तमिमं विधत्ते - 'प्रजापतिः सुवर्गं लोकमैत् तं देवा येनयेन छन्दसाऽनु प्रायुञ्जत तेन नाऽऽप्नुवन् त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन् द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुह्य सुवर्गं लोकमायन् य एवं विद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति श्रीर्हि मनुष्यस्य सुवर्गो लोकः' इति ॥ यदा [V]प्रजापतिः स्वर्गं प्राप्नोत् तदा प्रजापतिं स्वर्गं गच्छन्तं वयमप्यनु [2]प्राप्नुम इति

१. मै. मै१. मै३. अ१ - गतवन्तः । २. [अस्माभिः संभावितोऽयं पाठः ।] मै. मै२. मै३. अ१ - नाप्नुवन् , मै१ - अनुप्राप्नुवन्तः, अ - अनुप्राप्तवन्तः । ३. मै१. मै२. अ - 'ते' नास्ति । ४. मै२ - येन । ५. मै१ - °मानेन प्रजापतिः । ६. अ१ - 'येन' नास्ति, मै१. अ - प्रजाः । ७-७. अ - उपसदन्तः । ८. मै१. अ - 'न' नास्ति । ९. मै१ - 'च' नास्ति ।

१. मै. म - तमेतम् । २. म - प्राप्नुवाम् ।

य एवं विद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति (१) श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वागनुष्टुप् सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति

ये । एवम् । विद्वाꣳसः । एताः । आसते । द्वात्रिꣳशत् । एताः । द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत्-अक्षरा । अनुष्टुगित्यनु-स्तुक् । आनुष्टुभ इत्यानु-स्तुभः । प्रजापतिरिति प्रजा-पतिः । स्वेन । एव । छन्दसा । प्रजापतिमिति प्रजा-पतिम् । आप्त्वा । श्रियम् । गच्छन्ति (१) । श्रीः । हि । मनुष्यस्य । सुवर्ग इति सुवः-गः । लोकः । द्वात्रिꣳशत् । एताः । द्वात्रिꣳशदक्षरेति द्वात्रिꣳशत्-अक्षरा । अनुष्टुगित्यनु-स्तुक् । वाक् । अनुष्टुबित्यनु-स्तुप् । सर्वाम् । एव । वाचम् । आप्नुवन्ति । सर्वे । वाचः । वदितारः । भवन्ति । सर्वे । हि । श्रियम् । गच्छन्ति ।

'एता आसते' इति । द्वात्रिंशतं रात्रीः । 'द्वात्रिंशदेताः' इत्यादि । गतम् । सर्वेऽपि यजमानाः वाचो वदितारः वाग्मिनो भवन्ति । [10]यस्मात् सर्वेऽपि श्रीमन्तो भवन्ति अनेन द्वात्रिंशद्रात्रेण ॥

[3]मन्यमाना [V]देवाः [4V]येनयेन [V]छन्दसा युक्तं [5] यज्ञमन्वतिष्ठन् [V]तेन [5] सर्वेण [6] अपि [V]न [V]आप्नुवन् [6] ततः [V]ते देवाः द्वात्रिंशद्रात्रं तत्साधनत्वेनानुष्ठितवन्तः । तत्संख्याया अनुष्टुभि विद्यमानत्वात् प्रजापतेश्च मन्त्रराजानुष्टुभा सर्वस्रष्टृत्वस्य तापनीये श्रुतत्वादेनमानुष्टुभं प्रजापतिं तदीयेनैव द्वात्रिंशदक्षरेण [V]छन्दसा प्राप्य स्वर्गमप्यारुह्य तत्र भोगान् प्राप्नुवन्तः । एवमन्येऽपि यजमानास्तदनुष्ठानेन [V]प्रजापतिं प्राप्य तदनुग्रहात् [V]श्रियं [V]गच्छन्ति । न चात्र स्वर्गोऽनुक्त इति शङ्कनीयम् । [7]यस्मान्मनुष्यस्य [8] श्रीर्देवता स्वर्गः [8] ॥

द्वात्रिꣳशदिति ॥ क्रतुगतामहःसंख्यां प्रशंसति - 'द्वात्रीशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वागनुष्टुप् सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति' इति ॥ एताः क्रतुगता रात्रयो

१०. मै१ - तस्मात् ।

३. मै - मन्वाना । ४. शृ१ - येन । ५-५. म - यज्ञमन्यमिष्टवन्तस्तेन, शृ१. मै - °मन्वतिष्ठन्त, उ. क. हा. अ.पा. इ. वा - °मन्वतिष्ठन्त तेन । ६-६. मै - 'अपि नाऽप्नुवन्' नास्ति । ७. हा - यस्य मनुष्यस्य । ८-८. शृ१. म - श्रीरेव भूस्वर्गः, उ. क - श्रीरेव देवता स्वर्गः, मै - श्रीरेव न स्वर्गः, आ - श्रीदेवता स्वर्गः ।

ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति बृहद्रथन्तराभ्यां यन्ती(२)यं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव

ज्योतिः । गौः । आयुः । इति । त्र्यहा इति त्रि-अहाः । भवन्ति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि-आरोहन्ति । अभिपूर्वमित्यभि-पूर्वम् । त्र्यहा इति त्रि-अहाः । भवन्ति । अभिपूर्वमित्यभि-पूर्वम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । बृहद्रथन्तराभ्यामिति बृहत्-रथंतराभ्याम् । यन्ति (२) । इयम् । वाव । रथंतरमिति रथं-तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति । अनयोः । एव ।

'ज्योतिः' इत्यादिना अह्नां क्लृप्तिं दर्शयति । ज्योतिरादयः उक्ताः (तैसं ७.४.१) । [11-]'त्र्यहा' इति । एतस्य प्रतीचः[-11] त्र्यहस्य त्रिरात्रयोश्च पृथग्वचनान्नव [V]त्र्यहाः इति गम्यते । 'इयम्' इत्यादि । व्याख्यातम् (तैसं ७.४.१) ॥

'बृहद्रथन्तराभ्याम्' इत्यादि ॥ गतम् (तैसं ७.४.२) ॥

द्वात्रिंशत्संख्याकाः । [9-] अनुष्टुबक्षरसंख्याऽपि तावती [-9] । [10][V]अनुष्टुप् [11]च वाग्विशेषरूपत्वात् [V]वाक् एव । तस्मादेतदनुष्ठानेन [V]वाचं वेदशास्त्रादिरूपां सर्वामपि प्राप्नुवन्ति । [12]अतः सर्वेऽपि यजमानाः सभारञ्जनाय वाचं वदितुं समर्था भवन्ति । तेन वक्तृत्वेन पूज्यत्वलक्षणां [V]श्रियम् अपि प्राप्नुवन्ति ॥

ज्योतिरिति ॥ अथाऽहानि विधत्ते - 'ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति' इति ॥ त्र्यहा इति बहुवचननिर्देशाद्यावद्भिरपेक्षितसंख्यापूर्तिस्तावन्तोऽनुष्ठेयाः । अत्र च नवसंख्यया तत्पूर्तेर्नवैवानुष्ठेयाः । ते सर्वेऽप्यानुलोम्येनानुष्ठेयाः । तथा सत्यनुक्रमेणैव स्वर्गं प्राप्नुवन्ति ॥

बृहदिति ॥ अथैतेषु सप्तविंशतिदिनेषु पृष्ठस्तोत्रार्थं सामद्वयमेव [13-] पर्यायेण विधत्ते [-13] - 'बृहद्रथन्तराभ्यां यन्तीयं वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी

११-११. अ१ - 'त्र्यहा - - - - प्रतीचः' नास्ति ।

९-९. म - अनुष्टुबपि तत्संख्यावति । १०. मै - अनुष्टुभः, शृ१ - अनुष्टुपि । ११. मै. शृ१. वा - 'च' नास्ति । १२. अ. आ. क. पा. हा. इ. वा. म. उ - 'अतः' नास्ति । १३-१३. मै - 'पर्यायेण विधत्ते' नास्ति ।

प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋध्वोत्तिष्ठन्ति द्वात्रिंशदेतास्तासां यास्त्रिंशत् त्रिंशदक्षरा विराडन्नं

~~~~~~~~~~~~~~~~

प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा-अयनी । स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । पराञ्चः । वै । एते । सुवर्गमिति सुवः-गम् । लोकम् । अभ्यारोहन्तीत्यभि-आरोहन्ति । ये । पराचः । त्र्यहानिति त्रि-अहान् । उपयन्तीत्युप-यन्ति । प्रत्यङ् । त्र्यह इति त्रि-अहः । भवति । प्रत्यवरूढ्या इति प्रति-अवरूढ्यै । अथो इति । प्रतिष्ठित्या इति प्रति-स्थित्यै । उभयोः । लोकयोः । ऋद्ध्वा । उदिति । तिष्ठन्ति । द्वात्रिंशत् । एताः । तासाम् । याः । त्रिंशत् । त्रिंशदक्षरेति त्रिंशत्-अक्षरा । विराडिति वि-राट् । अन्नम् ।

~~~~~~~~~~~~~~~~

'पराञ्चः' इत्यादि ॥ ऊर्ध्वानेव ये सर्वान् V त्र्यहान् V उपयन्ति ते V पराञ्चः [१२]एव स्वर्गमभ्यारोहेयुः । तस्मादन्त्यः V त्र्यहः V प्रत्यङ् [१३]प्रत्यावृतो V भवति । तत् V प्रत्यवरूढ्यै V प्रतिष्ठित्यै च भवति । 'उभयोः' इति । नवभिरमुत्र एकेनात्र [१४]ऋद्धिं प्राप्य V उत्तिष्ठन्ति यज्ञादुच्छ्रिता भवन्ति ॥

'द्वात्रिंशदेताः' इत्यादि । द्वात्रिंशत्संख्यानां रात्रीणां मध्ये त्रिंशतां विराड्रूपत्वादन्नावरोधः । अथेतरे V द्वे [१५]अहोरात्ररूपे, तस्मादस्य द्वात्रिंशद्रात्रस्य स्वे रूपे, [१६]विराट् अहोरात्रलक्षणं च ।

~~~~~~~~~~~~~~~~

स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति ' इति ॥ [१४]पूर्ववद्व्याख्येयम् ॥

पराञ्च इति ॥ अथ प्रातिलोम्येनानुष्ठेयमेकं त्र्यहं विधत्ते - 'पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति ' इति ॥ [१५]पूर्ववद्व्याख्येयम् ॥

द्वात्रिंशदिति ॥ क्रतुगतदिनसंख्या पूर्वं [१६]समूहरूपेण प्रशस्ता । इदानीं विभज्य प्रशंसति -

~~~~~~~~~~~~~~~~

१२. अ - 'एव' नास्ति । १३. मै१. मै३. अ. अ१ - प्रत्यावृत्तः । १४. मै१ - बुद्धिम् । १५. मै२ - अह्ने रात्ररूपे । १६. मै१ - विलक्षणम् ।

~~~~~~~~~~~~~~~~

१४. अ. आ. क. पा. हा. इ. वा. वै. उ - 'पूर्ववद्व्याख्येयम्' नास्ति । १५. मै - °द्व्याख्येयः । १६. म - समुदायरूपेण ।
~~~~~~~~~~~~~~~~

विराड्विराजैवान्नाद्यमवं रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं लोकं यन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥४॥

(गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वाविꣳशतिश्च ।)

विराडिति वि-राट् । विराजेति वि-राजा । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । ये इति । द्वे इति । अहोरात्रे इत्यहः-रात्रे । एव । ते इति । उभाभ्याम् । रूपाभ्याम् । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । परिगृहीत्या इति परि-गृहीत्यै (३) ॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[१७-] तेन अहोरात्राभ्यां [-१७] स्वर्गं गच्छन्ति । [V]अतिरात्रौ [V]अभितः [V]भवतः परिग्रहाय । [१८]कस्य ? [१९]विशेषावचनात् स्वर्गस्य । " हेमन्तशिशिरावहोरात्रे च " (पा२.४.२८) इति नपुंसकत्वम् ॥

॥ इति सप्तमे चतुर्थे चतुर्थोऽनुवाकः ॥

' द्वात्रिꣳशदेतास्तासां यास्त्रिꣳशत् त्रिꣳशदक्षरा विराडन्नं विराट् विराजैवान्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं लोकं यन्ति ' इति ॥ अत्र [१७]त्रिंशत्संख्यया विराड्द्वाराऽन्नप्राप्तिः । उपरितनया द्विसंख्ययाऽहोरात्ररूपाभ्यां स्वर्गप्राप्तिः ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विधत्ते - ' अतिरात्रावभितो भवतः परिगृहीत्यै ' इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥

१७-१७. मै२ - ताभ्याम् । १८. अ१ - अन्यस्थाः, अ - अस्याः, मै१ - तस्य । १९. अ - विशेषवचनात् ।

---

१७. शृ१. हा - त्रिंशत्संख्यायाः ।

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रि९शदहश्च य एवं विद्वा९सं-स्त्रयस्त्रि९शदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति

द्वे इति । वाव । देवसत्रे इति देव-सत्रे । द्वादशाह इति द्वादश-अहः । च । एव । त्रयस्त्रि९शदह इति त्रयस्त्रि९शत्-अहः । च । ये । एवम् । विद्वा९सः । त्रयस्त्रि९शदहमिति त्रयस्त्रि९शत्-अहम् । आसते । साक्षादिति स-अक्षात् । एव । देवताः । अभ्यारोहन्तीत्यभि-आरोहन्ति । यथा । खलु । वै । श्रेयान् । अभ्यारूढ इत्यभि-आरूढः । कामयते । तथा । करोति ।

अथ त्रयस्त्रिंशद्रात्राः । तत्र प्रथमः [1]प्रस्तूयते - 'द्वे वाव' इत्यादि ॥ [2V]देवसत्रे देवानां प्रधानभूते अभिमते सत्रे अत एव [3]देवप्राप्तौ [4]मुख्यसाधनभूते, तस्मादेतेन त्रयस्त्रिंशदहेन [V]साक्षात् अव्यवधानेन [V]देवताः [V]अभ्यारोहन्ति [5]सर्वपापनिवृत्तिहेतुत्वादस्य । "गतिर्गतौ" (पा ८.१.७०) इति पूर्वस्य [6]निघातः, समासश्च । तदेवाह - 'यथा खलु' इत्यादि । [V]यथा लोके कश्चित् [V]श्रेयान् पुरुषः [V]अभ्यारूढः [V]कामयते पुनरप्युच्छ्रितो भवितुं कामयते [V]तथा च [V]करोति तदनुरूपं च यागादि कर्मारभते, तथा कुर्वन्नसौ [V]यदि [V]अवविध्यति तन्निर्वहणाशक्तौ [7]यद्यवहीयते [V]पापीयान्

चतुर्थेऽनुवाके द्वात्रिंशद्रात्रोऽभिहितः । अथ पञ्चमे त्रयस्त्रिंशद्रात्रोऽभिधीयते ॥

द्वे इति ॥ तमिमं विधत्ते - 'द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रि९शदहश्च य एवं विद्वा९सस्त्रयस्त्रिं९शदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान् भवति यदि नावविध्यति सदृङ् य एवं विद्वा९सस्त्रयस्त्रिंशदहमासते वि पाप्मना भ्रातृव्येणाऽऽवर्तन्ते' इति ॥ देवानां प्रिये सत्रे [1-]द्वे एव[-1], योऽयं [V]द्वादशाहः, यः [V]च अयं [2V]त्रयस्त्रि९शदहः, [3]एतयोरुभयोरतिप्रीतिः । एतां प्रीतिं ज्ञात्वा [4V]ये [5]अनुतिष्ठन्ति [6]ते विलम्बमन्तरेण [V]एव [V]देवताः प्राप्नुवन्ति । न केवलं [7]देवताप्राप्तिः किन्तु पापव्यावृत्तिरपि । तत्र कश्चित् व्यतिरेकदृष्टान्तः - [V]यथा लोके [V]श्रेयान् राजाऽमात्यादिः प्रशस्तः पुरुषो राज्यम् [8V]अभ्यारूढः पुनरप्यधिकं राज्यं कामयमानस्तथा करोति,

१. अ१ - सूयते । २. मै२ - देवानां सत्रे । ३. मै२ - प्राप्तौ । ४. मै२ - °भूतेन । ५. अ१ - पापनिवृत्ति° । ६. मै२ - दीर्घत्वम् । ७. अ१ - यद्यवव्यधयते ।

१-१. शृ१ - 'द्वे एव' नास्ति । २. मै - °शद्रात्राः । ३. म - °योरपि प्रीतिः । ४. शृ१. मै - 'ये' नास्ति । ५. शृ१ - अनुतिष्ठन्तः । ६. मै - 'ते' नास्ति । ७. शृ१ - देवताप्रीतिः । ८. म - अभ्यारूढोऽपि ।

यद्यंवविध्यंति पापीयान् भवति यदि नावविध्यंति सदृङ् य एवं विद्वाꣳसंस्त्रयस्त्रिꣳशदहमासंते वि पाप्मना भ्रातृंव्येणाऽऽवर्तन्तेऽहर्भाजो वा एता देवा अग्र

~~~~~~~~~~~~~~~~~~~~~~

यदि । अवविध्यतीत्यंव-विध्यंति । पापीयान् । भवति । यदि । न । अवविध्यतीत्यंव-विध्यंति । सदृङ्ङितिं स-दृङ् । ये । एवम् । विद्वाꣳसः । त्रयस्त्रिꣳशदहमितिं त्रयस्त्रिꣳशत्-अहम् । आसंते । वीतिं । पाप्मनां । भ्रातृंव्येण । एतिं । वर्तन्ते । अहर्भाज इत्यंहः-भाजंः । वै । एताः । देवाः । अग्रे ।

~~~~~~~~~~~~~~~~~~~~~~

पापतरः Vभवति [8]अश्रेयानेव स्यात् । अथ Vयदि कश्चित् Vन [9]Vअवविध्यति Vसदृङ् समानरूप एव स्यात् नोत्कर्षलाभः, [10]प्रमादसम्भावनया निर्दोषत्वनिश्चयाभावात् । त्रयस्त्रिंशदहस्तु तमपि दोषं निवर्तयति [11]इति भ्रातृव्यभूतेन [12-] सर्वेण Vपाप्मना [-12] व्यावर्तन्ते व्यावृत्तिं [13]गच्छन्ति । तस्मादनेन साक्षाद्देवता [14]अभ्यारोहन्त्येवेति स्तुत्या विधीयते ॥

~~~~~~~~~~~~~~~~~~~~~~

यादृशेन सामभेदाद्युपायेन तद्राज्यान्तरं [9]प्रसिध्यति तादृशं करोति । Vयदि Vअवविध्यति तस्मिन्नुपाये प्रमाद्यति तदानीं Vपापीयान् Vभवति । [10]पूर्वं विद्यमानमपि [11]श्रैष्ठ्यमपगच्छतीत्यर्थः । Vयदि Vन [12]Vअवविध्यति न प्रमाद्यति तदाऽपि Vसदृङ् भवति, पुरा यादृशः श्रेयान् पश्चादपि तादृश एव भवति । पूर्वं राजेति व्यवहरन्तः प्राणिनः पश्चादपि राजेत्येव व्यवहरन्ति न तु तस्मादुत्कृष्टः कश्चिद्व्यवहारस्तस्मिन् विद्यते । सोऽयं व्यतिरेकदृष्टान्तः । इह तु पूर्वं [13]विद्यैश्वर्यादिसंपन्ना अपि मनुष्या यजमानास्त्रयस्त्रिंशद्रात्रस्य महिमानं जानन्तोऽनुष्ठाय [14]देवत्वप्राप्तिप्रतिबन्धकपापरूपेण Vभ्रातृव्येण वियुक्ताः सन्तः [15]पूर्वसिद्धात् मनुष्यत्वादप्यधिकं देवत्वं प्राप्नुवन्तीति विशेषः ॥

अहर्भाज इति ॥ पुनरपि प्रकारान्तरेण प्रशंसति - 'अहर्भाजो वा एता देवा अग्र आहरन्नहरेकोऽभजताहरेकस्ताभिर्वै ते प्रबाहुगार्ध्नुवन् य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासते सर्व एव

~~~~~~~~~~~~~~~~~~~~~~

८. मै. मै२. मै३. अ. अ१ - श्रेयानेव । ९. मै१ - अपविद्ध्यति । १०. मै२ - °संभावनायाम् । ११. अ१ - 'इति' नास्ति । १२-१२. मै२ - पाप्मना सर्वेण । १३. मै२ गच्छन्ते । १४. मै. मै२. मै३. अ. अ१ - ०रोहत्येवेति ।

~~~~~~~~~~~~~~~~~~~~~~

९. म - सिद्ध्यति । १०. क. हा - पूर्वविद्यः, वा - 'पूर्वम्' नास्ति । ११. म - श्रेयोप° । १२. उ. पा. हा - अपविद्ध्यति, वा - 'अवविद्ध्यति' नास्ति । १३. मै - विद्यैश्वर्यसंपन्नाः । १४. शृ१. मै - प्राप्तिप्रतिबन्धकेन रूपेण । १५. शृ१. मै - पूर्वसिद्धम् ।
~~~~~~~~~~~~~~~~~~~~~~

आऽहर(१)न्नहरेकोऽभजताहरेकस्ताभिर्वै ते प्रबाहुगार्ध्नुवन् य एवं विद्वा९ंसस्त्रयस्त्रि९ंशदहमासते सर्वं एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति

एति । अहरन् (१) । अहः । एकः । अभजत । अहः । एकः । ताभिः । वै । ते । प्रबाहुगिति प्र-बाहुक् । आर्ध्नुवन् । ये । एवम् । विद्वा९ंसः । त्रयस्त्रि९ंशदहमिति त्रयस्त्रि९ंशत्-अहम् । आसते । सर्वे । एव । प्रबाहुगिति प्र-बाहुक् । ऋध्नुवन्ति । सर्वे । ग्रामणीयमिति ग्राम-नीयम् । प्रेति । आप्नुवन्ति । पञ्चाहा इति पञ्च-अहाः । भवन्ति । पञ्च । वै । ऋतवः । संवत्सर इति सं-वत्सरः । ऋतुषु । एव । संवत्सर इति सं-वत्सरे ।

---

[१५]' अहर्भाजः' इत्यादि । एकमहरेको भजते [१६-] इतरमितर इति [-१६] एकैकमहर्भजमाना [V]देवाः [१७][V]एताः त्रयस्त्रिंशतं [१८]रात्रीः [१९][V]आहरन् । ' अहरेकोऽभजताहरेकः ' [२०]इति [२१]वीप्सा [२२]विस्पष्टं दर्शयति । अथ [V]ताभिः ते [V]प्रबाहुक् समम् [V]आर्ध्नुवन् [V]सर्वे । ' य एवम् ' इत्यादि । गतम् । [V]ग्रामणीयं सङ्घातस्य नेतृत्वम् । ब्राह्मणादित्वात् ष्यञ् (गणपाठ १६२,पा ५.१.१२४) । '[卐]यस्येति°' (पा ६.४.१४८) लोपाभावश्छान्दसः । ङित्वादाद्युदात्तत्वम् ॥

प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राप्नुवन्ति ' इति ॥ अहानि भजन्ते [१६]अनुतिष्ठन्तीति [V]अहर्भाजः । तादृशाः [V]देवाः [V]एताः त्रयस्त्रिंशत्संख्याका रात्रीः संपादितवन्तः । कथमिति तदुच्यते - [V]एकः देवः [V]एकम् [V]अहः अन्वतिष्ठत् । पुनरपि [V]एकः देवः अन्यत् [V]अहः अन्वतिष्ठत् । एवं त्रयस्त्रिंशत्संख्याका [१७]देवास्तत्संख्याकान्यहान्यन्वतिष्ठन्, ताभिः अनुष्ठिताभी रात्रिभिरेव ते सर्वेऽपि देवाः [V]प्रबाहुक् [V]आर्ध्नुवन् समं यथा भवति तथा समृद्धिं [१८]प्राप्नुवन् [१९-] न त्वेकोऽपि [-१९] [२०]तन्मध्ये समृद्धिविकलः । एवं यजमाना अपि सर्वे साम्येन समृद्धिं प्राप्नुवन्ति । सैव समृद्धिः स्पष्टीक्रियते - सर्वे [V]ग्रामणीयं ग्रामस्वामित्वं प्राप्नुवन्ति ॥

पञ्चाहा इति ॥ अथाहानि विधत्ते - ' पञ्चाहा भवन्ति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते ' इति ॥ ज्योतिर्गौरायुरित्येवंविधो

---

१५. अ१ - अजर्भजः । १६-१६. अ१ - इत्यादि, मै१ - इत्यादितः । १७. मै१ - एतान् । १८. अ१ - ' रात्रीः ' नास्ति । १९. मै२ - अभवत् । २०. मै१ - उक्ताम् । २१. मै२ - ' वीप्सा ' नास्ति । २२. अ. अ१ - ' विस्पष्टम् ' नास्ति ।
卐 यस्येति च ' इत्यनेन लोपे प्राप्ते लोपाभावः छान्दस इत्यर्थः ।

---

१६. शृ१. मै - तिष्ठत इति, अ. क. पा. हा. इ. वा. म - °तिष्ठन्त इति । १७. मै - °न्यहान्यन्वतिष्ठत । १८. शृ१. मै - प्राप्ताः । १९-१९. उ - कोऽपि, वा - सत्रे कोऽपि, इ - सत्रे न त्वेकोऽपि । २०. उ. हा. अ. पा. वा - तन्मध्ये न ।

तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका एष्वे(२)व लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते

प्रतीति । तिष्ठन्ति । अथो इति । पञ्चाक्षरेति पञ्च-अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति । रुन्धते । त्रीणि । आश्विनानि । भवन्ति । त्रयः । इमे । लोकाः । एषु (२) । एव । लोकेषु । प्रतीति । तिष्ठन्ति । अथो इति । त्रीणि । वै । यज्ञस्य । इन्द्रियाणि । तानि । एव । अवेति । रुन्धते ।

'पञ्चाहा' इत्यादि ॥ अह्नां प्रदर्शनम् । पञ्चाह उक्तः । आभिप्लाविका ज्योतिरादयः अन्त्येन विधिना गृह्यन्ते । सामर्थ्यात् [23]च चत्वारः [V]पञ्चाहाः [V]भवन्ति, तथाऽभिमतसङ्ख्या-पूरणात् । 'पञ्च वा ऋतवः' इत्यादि । व्याख्यातम् (तैसं ७.३.८) ॥

'त्रीण्याश्विनानि' इत्यादि ॥ आश्विनेन शस्त्रेण लक्षितानि [V]त्रीणि [24]अहानि अतिरात्राख्यानि । आद्यं मध्यममन्त्यं च । तैः त्रिषु [V]लोकेषु प्रतिष्ठिता भवन्ति [25]त्रित्वान्वयात् । [V]अथो अपि च [V]यज्ञस्य [V]इन्द्रियाणि त्रीणि [26]ऋगादीनि [27]गायत्रादीनि वा

द्विरावृत्तस्त्र्यहो [21]द्वितीयज्योतिर्विवर्जितः पञ्चाहः । तादृशाश्च [V]पञ्चाहाः यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः । इह तु चतुर्भिरपेक्षितसंख्यापूरणाच्चत्वारो विधीयन्ते । हेमन्तशिशिरयोरैक्यात् पञ्चसंख्याका [V]ऋतवः तद्द्वारेण [V]संवत्सरे प्रतितिष्ठन्ति । [22] किञ्च [22] [23]पञ्चसंख्यया पङ्क्तिद्वारेण यज्ञं प्राप्नुवन्ति ॥

त्रीणीति ॥ प्रायणीयोदयनीययोरतिरात्रयोर्मध्यमे चातिरात्रे शस्त्राणि विधत्ते - 'त्रीण्याश्विनानि भवन्ति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते' इति ॥ आश्विनेन शस्त्रेणोपलक्षितान्यहानि [V]त्रीणि अनुष्ठेयानि तेन लोकत्रये प्रतिष्ठिता भवन्ति । किञ्च [V]यज्ञस्य इन्द्रियस्थानानि [24][V]त्रीणि, [V]तानि अपि प्राप्नुवन्ति ॥

---

२३. मै. मै२. मै३. अ. अ१ - 'च' नास्ति । २४. अ१ - यानि । २५. मै२ - इति । २६. मै२ - 'ऋगादीनि' नास्ति । २७. मै. मै२. अ. अ१ - गायत्र्यादीनि ।

---

२१. शृ१. म. मै - °ज्योतिर्वर्जितः । २२-२२. हा - 'किं च' नास्ति । २३. शृ१. मै - संख्यायाः । २४. अ. आ. क. पा. हा. वा. म - सवनानि त्रीणि ।

विश्वजिद्भ॑वत्यन्नाद्य॑स्या॒व॑रुद्ध्यै सर्व॑पृष्ठो भवति॒ सर्व॑स्याभि॒जित्यै॒ वाग्वै द्वा॑दशा॒हो यत् पु॒रस्ता॑द्द्वादशा॒हमु॑पे॒युरना॑प्तां वाच॒मुपे॑युरुप॒दासु॑कैषां॒ वाक्

वि॒श्वजि॒दिति॑ विश्व-जित् । भ॒व॒ति॒ । अ॒न्ना॒द्य॑स्येत्य॑न्न-अद्य॑स्य । अव॑रुद्ध्या॒ इत्यव॑-रु॒द्ध्यै॒ । सर्व॑पृष्ठ॒ इति॒ सर्व॑-पृ॒ष्ठः । भ॒व॒ति॒ । सर्व॑स्य । अ॒भिजि॑त्या॒ इत्य॒भि-जि॒त्यै॒ । वाक् । वै । द्वा॒द॒शा॒ह इति॑ द्वादश-अ॒हः । यत् । पु॒रस्ता॑त् । द्वा॒द॒शा॒हमिति॑ द्वादश-अ॒हम् । उ॒पे॒यु॒रित्यु॑प-इ॒युः । अना॑प्ताम् । वाच॑म् । उ॒पेति॑ । इ॒युः । उ॒प॒दा॒सु॒केत्यु॑प-दासु॑का । ए॒षा॒म् । वाक् ॥

---

[28]सवनानि Vतानि Vएव [29]Vअवरुन्धते । [30]Vविश्वजित् [31]मध्यममहः Vसर्वपृष्ठः च Vभवति । [32]तत्र विश्वजिद्धर्मतया [33]अन्नाद्यावरोधः । सर्वपृष्ठत्वगुणेन सर्वस्य जयः । ततश्च त्रिषु पञ्चाहेषु व्यतीतेषु विश्वजित् अतिरात्रः तत [34-] एकाहः पञ्चाह [-34] इति [35](आद्यन्तातिरात्रौ) [36]इत्थं त्रयोविंशतिरहानि भवन्ति ॥

[37]अथ [38-] द्वादशाहः परिशिष्यते [-38] [39]तं [40]विधातुमाह - 'वाग्वै' इत्यादि ॥ तद्धेतुत्वात्ताच्छब्द्यम् । विश्वजितोऽतिरात्रात् [-40] Vपुरस्तात् यदि Vद्वादशाहम् Vउपेयुः Vअनाप्ताम्

विश्वजिदिति ॥ अन्यदहर्विधत्ते - 'विश्वजिद् भवत्यन्नाद्यस्यावरुद्ध्यै' इति ॥ विश्वजयहेतोरन्नहेतुत्वं सुलभम् ॥

सर्वपृष्ठ इति ॥ तमेव विश्वजितं विशिनष्टि - 'सर्वपृष्ठो भवति सर्वस्याभिजित्यै' इति ॥ रथन्तर-बृहदादीनि षट्संख्याकानि पृष्ठानि सर्वाण्यपि यस्यासौ Vसर्वपृष्ठः । तेन सर्वमपि फलं भवति ॥

वागिति ॥ अथान्यान्यहानि विधत्ते - 'वाग्वै द्वादशाहो यत् पुरस्ताद्द्वादशाहमुपेयुरनाप्तां वाचमुपेयुरुपदासुकैषां वाक् स्यादुपरिष्टाद्द्वादशाहमुपयन्त्याप्तामेव वाचमुपयन्ति तस्मादुपरिष्टाद्वाचा वदामः' इति ॥

---

२८. अ१ - सवनानि वा । २९. मै१. अ - अवरुन्धे, अ१ - °न्धते विश्वजिदित्येताम् । ३०. मै१ - विश्वजितम् । ३१. मै१. अ. अ१ - मध्यममहः मध्यममहः विश्वजिति विश्वजित् । ३२. अ - 'तत्र' नास्ति । ३३. अ - अवरोधम् । ३४. मै१ - एकः पञ्चाहः, अ - एकपञ्चाहः । ३५. मै२. अ१ - '(आद्यन्तातिरात्रौ)' नास्ति । ३६. अ१ - उक्थ्य । ३७. अ - 'अथ' नास्ति । ३८-३८. मै२ - दशाहः स विशिष्यते, अ. अ१ - दशाहः परिशिष्यते । ३९. मै. मै१. मै३. अ. अ१ - 'तम्' नास्ति । ४०-४०. अ - 'विधातु° ---- °रात्रात्' नास्ति ।

स्यादुपरिष्टाद्द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरिष्टाद्वाचा वदामोऽवान्तरं (३) वै दशरात्रेण प्रजापतिः प्रजा असृजत

स्यात् । उपरिष्टात् । द्वादशाहमिति द्वादश-अहम् । उपेति । यन्ति । आप्ताम् । एव । वाचम् । उपेति । यन्ति । तस्मात् । उपरिष्टात् । वाचा । वदामः । अवान्तरमित्यव-अन्तरम् (३) । वै । दशरात्रेणेति दश-रात्रेण । प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत ।

अपर्याप्तां [४१]मन्त्रैः [४२]क्षीणाम् [V]उपेयुः । ततश्च [V]उपदासुका उपक्षयशीला यजमानानां [V]वाक् [V]स्यात् । छान्दस उकञ् । तस्मात् [V]उपरिष्टात् एव [V]द्वादशाहम् [४३][V]उपयन्ति । [V]आप्ताम् [V]एव [V]वाचम् [V]उपयन्ति । [V]तस्मात् [V]उपरिष्टात् ऊर्ध्वं नाभेर्वर्तमानतया [४४]उच्छ्रिततया सर्वेऽपि वयं [V]वदामः ॥

इदानीं द्वादशाहीयं [४५]दशरात्रमुपादित्समानः स्तौति - 'अवान्तरम्' इत्यादि ॥ द्वादशाहावयवभूतेन [V]दशरात्रेण इत्यर्थः । पुनरपि स्तौति - 'एताम्' इत्यादि । शुल्बस्य [४६-V]उदङ्कः नाम पुत्रः [V]एताम् एव [-४६] दशरात्रात्मिकां [V]सत्रस्य द्वादशाहस्य ऋद्धिं [४७-] सत्रफलस्य

बहुविधस्तोत्रशस्त्रोपेतत्वात् [V]द्वादशाहः वाग्रूपः । तथाविधं द्वादशाहं यद्युक्तेभ्योऽहोभ्यः [२५]पूर्वमनुतिष्ठेयुस्तदानीं [२६]तत्रत्यानां [२७]स्तोत्रशस्त्राणामनुक्तत्वात् [२८-V]अनाप्ताम् असंपूर्णां [V]वाचम् [-२८] [२९]उपेयुः प्राप्नुयुः । तेषां यजमानानां [३०-V]वाक् उपक्षयशीला स्यात् [-३०] । तस्मादुक्तेभ्योऽहोभ्य ऊर्ध्वं [V]द्वादशाहम् अनुतिष्ठेयुः । तस्मात् [V]आप्तां संपूर्णाम् [V]एव [V]वाचं प्राप्नुवन्ति । यस्मादूर्ध्वभागे वाग्रूपस्य द्वादशाहस्यानुष्ठानं [V]तस्मात् कारणात् नाभेः [V]उपरिष्टात् [३१]मुखेन वयं [३२-] वाचा वदामः[-३२] ॥

अवान्तरमिति ॥ अत्र द्वादशाहशब्देन प्रायणीयोदयनीयौ वर्जयित्वाऽवशिष्टस्य [३३]दशरात्रस्य विवक्षां दर्शयति - 'अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः

४१. मै१ - अत्रैव, अ. अ१ - मन्त्रैश्च । ४२. अ - वीक्षमाणा । ४३. मै१ - यन्ति । ४४. अ - 'उच्छ्रिततया' नास्ति । ४५. मै२ - °रात्रमुपादित्, अ - °दित्समाना । ४६-४६. मै१ - उदङ्को नाम प्रशस्तवतामेव, अ१ - पुत्र उदङ्को नाम प्रशस्ताम् । ४७-४७. मै२ - 'सत्रफलस्य - - - - ऋद्धिम्' नास्ति ।

२५. वा - पूर्वमनुष्ठेयः, इ. म. मै - पूर्वमनुष्ठेयुः । २६. शृ१ - 'तत्रत्यानाम्' नास्ति । २७. म - स्तोत्राणामनु° । २८-२८. शृ१ - अनाप्तसंपूर्णवाचम् । २९. शृ१. म - 'उपेयुः' नास्ति । ३०-३०. शृ१ - वागुपजयशीला ना(?) स्यात् । ३१. म - मुखे । ३२-३२. हा - वाचमुपवदामः । ३३. हा - 'दशरात्रस्य' नास्ति ।

यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका वा एता रात्रयो

यत् । दशरात्र इति दश-रात्रः । भवति । प्रजा इति प्र-जाः । एव । तत् । यजमानाः । सृजन्ते । एताम् । ह । वै । उदङ्कः । शौल्बायनः । सत्रस्य । ऋद्धिम् । उवाच । यत् । दशरात्र इति दश-रात्रः । यत् । दशरात्र इति दश-रात्रः । भवति । सत्रस्य । ऋद्ध्यै । अथो इति । यत् । एव । पूर्वेषु । अहःस्वित्यहः-सु । विलोमेति वि-लोम । क्रियते । तस्य । एव । एषा । शान्तिः । द्व्यनीका इति द्वि-अनीकाः । वै । एताः । रात्रयः ।

वाचः समृद्धिं समृद्धिहेतुम् Vउवाच । यद्वा - Vसत्रस्य त्रयस्त्रिंशद्रात्रस्य ऋद्धिं -४७ फलसमृद्धिहेतुम् एतद्दशरात्रम् Vउवाच । तस्मात् Vदशरात्रः Vसत्रस्य Vऋद्ध्यै Vभवति ४८इति । ४९- अथो अपि च -४९ Vयत् ५०पूर्वेषु अहःसु प्रमादात् Vविलोम विगुणं Vक्रियते Vतस्य Vशान्तिः Vएषा Vएव इति वेदितव्यम् ॥

'द्व्यनीकाः' इत्यादि ॥ ५१Vद्व्यनीकाः द्विव्यूहाः । निरुदकादित्वादुत्तरपदान्तोदात्तत्वम् (गणपाठ २२६, पा ६.२.१८४) । तत्र ५२अतिरात्रादिषोडशक आद्यो व्यूहः । ५३अतिरात्रान्त

सृजन्ते' इति ॥ Vअवान्तरं Vवै द्वादशाहरात्रस्यावयवभूतेनैव Vदशरात्रेण पुरा कदाचित् Vप्रजापतिः Vप्रजाः Vअसृजत । अतो यद्यत्र Vदशरात्रः भवेत्तदा तेन Vयजमानाः Vप्रजाः ३४Vसृजन्ते ॥

एतामिति ॥ तमेव दशरात्रं पुनः प्रशंसति - 'एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्द्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवेषा शान्तिः' इति ॥ Vउदङ्कः नामतः स च शुल्बस्यापत्यभूतः । एतस्य Vसत्रस्य अङ्गभूतो योऽयं Vदशरात्रः अस्त्येतेन कृत्स्नस्य Vसत्रस्य एतामृद्धिं फलमुदङ्क उवाच । अतो यदि Vदशरात्रः अनुष्ठीयते तर्हि कृत्स्नसमृद्धिस्तेन भवति । अपि च Vपूर्वेषु Vअहःसु यदेवाङ्गं विकलमनुष्ठीयते Vतस्य सर्वस्य Vएषा दशरात्रानुष्ठितिरुपशमहेतुर्भवति ॥

४८. मै. मै१. मै३. अ. अ१ - 'इति' नास्ति । ४९-४९. मै२ - अत्रेरपियच । ५०. मै२ - सर्वेषु । ५१. मै२ - द्वि अनीकाः । ५२. मै१ - °षोडशकाः । ५३. अ१ - °न्तरम्, मै२ - °रात्रान्त्यः ।

३४. शृ१ - असृजन्त ।

यजमाना विश्वजित्सहातिरात्रेण पूर्वाः षोडश सहा(४)तिरात्रेणोत्तराः षोडश य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासत

यजमानाः । विश्वजिदिति विश्व-जित् । सह । अतिरात्रेणेत्यति-रात्रेण । पूर्वाः । षोडश । सह । अतिरात्रेणेत्यति-रात्रेण । उत्तरा इत्युत्-तराः । षोडश । ये । एवम् । विद्वाꣳसः । त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्-अहम् । आसत ।

अन्यो व्यूहः । तयोरन्तर्विश्वजिदतिरात्रः [54-] यजमानात्मा । तदिदमाह [-54] - 'यजमाना विश्वजित्' इत्यादि । Vद्व्यनीका [55]स्त्रीपुंसात्मकव्यूहद्वयवती [56-]Vप्रजा आजायते [-56] [57-] सर्वतो [58]जायते [-57]। [59]Vअभितः Vअतिरात्रौ सामर्थ्यात् उक्तानां फलानां परिग्रहाय भवतः ॥

॥ इति सप्तमे चतुर्थे पञ्चमोनुवाकः ॥

द्व्यनीकेति ॥ इदानीं योऽयं विश्वजित्सर्वपृष्ठो विहितस्तस्य स्थानविशेषं विधत्ते - 'द्व्यनीका वा एता रात्रयो यजमाना विश्वजित्सहातिरात्रेण पूर्वाः षोडश सहातिरात्रेणोत्तराः षोडश य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासत एषां द्व्यनीका प्रजा जायते' इति ॥ अनीकं सेना द्वे अनीके सेनारूपे यासां रात्रीणां ताः Vद्व्यनीकाः सेनाद्वयसमाना इत्यर्थः । तत्र प्रायणीयातिरात्रेण सह त्रयः पञ्चाहाः Vषोडश पूर्वभाविन्यो रात्रयः एका सेना । उदयनीयेनातिरात्रेण सहैकः पञ्चाहो दशरात्रं चेत्युत्तरभाविन्यः एताः Vषोडश रात्रयो द्वितीया सेना । विश्वजिद्यजमानस्थानीयत्वादुभयपार्श्ववर्तिन्योः सेनयोर्मध्येऽवस्थितो राजेव

५४-५४. मै२ - यजमानादिदमाह । ५५. मै२ - स्त्रीपुंसमेकव्यूह° । ५६-५६. मै२ - प्रजा न जायते । ५७-५७. मै२ - 'सर्वतो जायते' नास्ति । ५८. अ - जायते अतो जायते । ५९. अ - अतः ।

ऐषां द्व्यनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै ॥५॥

(अहरन्नेर्ष्वावान्तर९ षोडश सह सप्तदश च ।)

एति । एषाम् । द्व्यनीकेति द्वि-अनीका । प्रजेति प्र-जा । जायते । अतिरात्रावित्यति-रात्रौ । अभितः । भवतः । परिगृहीत्या इति परि-गृहीत्यै ॥५॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

सप्तदशसंख्यापूरके मध्यमदिने प्रयोक्तव्यः । एवं विदित्वा क्रतुमनुतिष्ठतां यजमानानां बहुपुत्ररूपा बहुकन्यकारूपा च द्विविधा प्रजा सर्वतो जायते ॥

अतिरात्राविति ॥ अथ प्रायणीयोदयनीयौ विदत्ते - ' अतिरात्रावभितो भवतः परिगृहीत्यै ' इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥

आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन् न सुवर्गं लोकमायन् त एतꣳ षट्त्रिꣳशद्रात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्त्सुवर्गं लोकमायन् य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति

आदित्याः । अकामयन्त । सुवर्गमिति सुवः-गम् । लोकम् । इयाम । इति । ते । सुवर्गमिति सुवः-गम् । लोकम् । न । प्रेति । अजानन् । न । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । ते । एतम् । षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत्-रात्रम् । अपश्यन् । तम् । एति । अहरन् । तेन । अयजन्त । ततः । वै । ते । सुवर्गमिति सुवः-गम् । लोकम् । प्रेति । अजानन् । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । ये । एवम् । विद्वाꣳसः । षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत्-रात्रम् । आसते । सुवर्गमिति सुवः-गम् । एव । लोकम् । प्रेति । जानन्ति । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति ।

अथ षट्त्रिंशरात्रो विधीयते - 'आदित्याः' इत्यादि ॥ गतम् । [1]Vते [2-]Vसुवर्गं Vलोकं Vन Vप्राजानन् [-2] न [3]चागच्छन् । 'ज्योतिः' इत्यादि व्याख्यातम् (तैसं ७.२.६) ॥

पञ्चमेऽनुवाके त्रयस्त्रिंशद्रात्रोऽभिहितः । अथ षष्ठे षट्त्रिंशद्रात्रोऽभिधीयते ॥

आदित्या इति ॥ [1-] तमेतं विधत्ते [-1] - 'आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन् न सुवर्गं लोकमायन् त एतꣳ षट्त्रिꣳशद्रात्रमपश्यन् तमाहरन् तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्त्सुवर्गं लोकमायन् य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति' इति ॥ पुरा कदाचित् Vआदित्याः स्वर्गं Vलोकं गन्तुकामा मार्गमप्यज्ञात्वा स्वर्गं न प्राप्ताः । ततस्तदुपायं विचार्य Vषट्त्रिंशद्रात्रं निश्चित्य तदनुष्ठानेन मार्गमवगत्य स्वर्गं प्राप्ताः । एवमन्येऽपि यजमानाः स्वर्गं प्राप्नुवन्ति ॥

१. अ१ - 'ते' नास्ति । २-२. मै२ - स्वर्गं प्राजानन् । ३. मै१ - वागच्छन् ।

१-१. उ. इ - 'तमेतं विधत्ते' नास्ति, म. मै - तमिमं विधत्ते ।

ज्योतिरतिरात्रो (१) भवति ज्योतिरिव पुरस्तादुदधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन

ज्योतिः । अतिरात्र इत्यति-रात्रः (१) । भवति । ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु-ख्यात्यै । षडहा इति षट्-अहाः । भवन्ति । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठन्ति । चत्वारः । भवन्ति । चतस्रः । दिशः । दिक्षु । एव । प्रतीति । तिष्ठन्ति । असत्रम् । वै । एतत् । यत् । अच्छन्दोममित्यछन्दः-मम् । यत् । छन्दोमा इति छन्दः-माः । भवन्ति । तेन ।

'षडहाः' इति ॥ अभिप्लवाः । ते चोक्ताः । 'चत्वारः' इति । तेनातिरात्रेण सह पञ्चविंशतिः ॥

'असत्रं वै' इत्यादि ॥ [४] द्वादशाहीयस्य दशरात्रस्य विधिर्गतः (तैसं ७.३.८) ॥

ज्योतिरिति ॥ प्रायणीयमहर्विधत्ते - 'ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्तादुदधते सुवर्गस्य लोकस्यानुख्यात्यै' इति ॥

षडहा इति ॥ अथोत्तराणि कानिचिदहानि विधत्ते - 'षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति' इति ॥ [२] ज्योतिर्गौरायुरायुर्गौर्ज्योतिरित्ययमेकोऽभिप्लवः षडहः । तादृशा षडहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः ॥

चत्वार इति ॥ तेषां संख्यां विधत्ते - 'चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्ति' इति [२] ॥ चतुर्भिः षडहैरत्रापेक्षिता संख्या पूर्यते ॥

असत्रमिति ॥ अथ पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येवंविधं द्वादशाहस्य दशरात्रं विधत्ते - 'असत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं

४-४. मैर - 'द्वादशा° - - - - इत्यादि' नास्ति ।

२-२. उ - 'ज्योति° - - - - इति' नास्ति ।

सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव (२) वीर्ये पशुषु प्रति तिष्ठन्ति षट्त्रि९शद्रात्रो भवति षट्त्रि९शदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसा९ स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं य एवं विद्वा९सः षट्त्रि९शद्रात्रमासते

सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः-मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः । छन्दोमा इति छन्दः-माः । ओजसि । एव (२) । वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति । षट्त्रि९शद्रात्र इति षट्त्रि९शत्-रात्रः । भवति । षट्त्रि९शदक्षरेति षट्त्रि९शत्-अक्षरा । बृहती । बार्हताः । पशवः । बृहत्या । एव । पशून् । अवेति । रुन्धते । बृहती । छन्दसाम् । स्वाराज्यमिति स्व-राज्यम् । आश्नुत । अश्नुवते । स्वाराज्यमिति स्व-राज्यम् । ये । एवम् । विद्वा९सः । षट्त्रि९शद्रात्रमिति षट्त्रि९शत्-रात्रम् । आसते ।

'षट्त्रिंशद्रात्रः' इति ॥ वक्ष्यमाणेन अतिरात्रेण सह । Vबार्हताः Vपशवः इति तस्याः पशुसिद्धिहेतुत्वात् । तेन च षट्त्रिंशत्संख्यान्वयेन बार्हतान् Vपशून् [५-]Vअवरुन्धते । बृहतीशब्द [-५] उत्सादिरित्युक्तम् । 'बृहती छन्दसाम्' इत्यादि [-४] । यस्माद् Vबृहती Vछन्दसां Vस्वाराज्यम् Vआश्नुत अधिपत्यं प्राप्तवती तस्मात् Vएवं Vविद्वांसः यजमानाः [६]स्वाराज्यम् Vअश्नुवते स्वर्गं च गच्छन्ति । [७-]Vअतिरात्रौ च Vअभितः Vभवतः [-७] [८-] स्वर्गस्य [९]परिग्रहाय [-८] ।

पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्यं पशुषु प्रति तिष्ठन्ति' इति ॥ पूर्ववद्व्याख्येयम् ॥

षडिति ॥ क्रतुगतामहःसंख्यां प्रशंसति - 'षट्त्रि९शद्रात्रो भवति षट्त्रि९शदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसा९ स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं य एवं विद्वा९सः षट्त्रि९शद्रात्रमासते सुवर्गमेव लोकं यन्ति' इति ॥ पशूनां बार्हतत्वं चयनब्राह्मणे स्पष्टमाम्नातम् - "छन्दा९सि पशुष्वाजिमयुस्तान् बृहत्युदजयत् तस्माद्बार्हताः पशव उच्यन्ते" (तैसं ५.३.२) इति । किं च Vछन्दसां मध्ये Vबृहती Vस्वाराज्यं प्राप्तवती । तस्मादेतदनुष्ठायिन इह Vस्वाराज्यं प्राप्य परत्र स्वर्गं प्राप्नुवन्ति ॥

५-५. अ - अवरुन्धे बार्हतीशब्दः । ६. मै. मै१. मै३. अ. अ१ - राज्यम् । ७-७. अ - 'अतिरात्रौ - - - - भवतः' नास्ति । ८-८. मै. मै१. मै३. अ१ - स्वर्गस्यैव परिग्रहाय, अ - स्वपरिग्रहाय । ९. मै१ - परिग्रहाय भवतः ।

सुवर्गमेव लोकं यन्त्यतिरात्रावभितो
भवतः सुवर्गस्यं लोकस्य
परिगृहीत्यै ॥६॥

(अतिरात्र ओजंस्येव षट्त्रिंꣳशच ।)

सुवर्गमिति सुवः-गम् । एव । लोकम् । यन्ति । अतिरात्रावित्यति-रात्रौ ।
अभितः । भवतः । सुवर्गस्येति सुवः-गस्यं । लोकस्यं ।
परिगृहीत्या इति परि-गृहीत्यै (३) ॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

समानवाक्ये पदात्परत्वाभावात्तिङ्परत्वाद्वा अश्नुवत इति न निहन्यते । [10]Vस्वाराज्यं स्वराट्छब्दात् [11]"गुणवचनब्राह्मणादिभ्यः°" (पा ५.१.१२४) इति ष्यङ् ॥

॥ इति सप्तमे चतुर्थे षष्ठोनुवाकः ॥

अतिरात्राविति ॥ अथोदयनीयं विधत्ते - ' अतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै ' इति ॥ प्रायणीयेन सह निर्देष्टुं द्विर्वचनम् । स्वर्गहेतुत्वस्यं विधिवाक्ये स्पष्टत्वात् [3]तत्परिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥

---

१०. मै१. अ. अ१ - ' स्वाराज्यम् ' नास्ति । ११. अ - गुणवचनात् ब्राह्म° ।

---

३. शृ१ - ' तत् ' नास्ति ।

एकस्मान्नपञ्चाशद्रात्रः]

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान् भवेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत् तमाहरत् तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति

वसिष्ठः । हतपुत्र इति हत-पुत्रः । अकामयत । विन्देय । प्रजामिति प्र-जाम् । अभीति । सौदासान् । भवेयम् । इति । सः । एतम् । एकस्मान्नपञ्चाशमित्येकस्मात्-नपञ्चाशम् । अपश्यत् । तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । अविन्दत । प्रजामिति प्र-जाम् । अभीति । सौदासान् । अभवत् । ये । एवम् । विद्वाꣳसः । एकस्मान्नपञ्चाशमित्येकस्मात्-नपञ्चाशम् । आसते । विन्दन्ते । प्रजामिति प्र-जाम् । अभीति । भ्रातृव्यान् । भवन्ति ।

---

[1]अथैकस्मान्नपञ्चाशद्रात्राः । तत्रायं प्रथमो विधीयते - 'वसिष्ठः' इत्यादि ॥ [V]वसिष्ठः सौदासैः [V]हतपुत्रः [V]अकामयत [V]प्रजां [V]विन्देय [2]लप्सीय [V]सौदासान् च [V]अभिभवेयम् [V]इति । [3]सुदासस्यापत्यानि [4]सौदासाः, ऋष्यण् । 'एकस्मान्नपञ्चाशम्' इति । [5]एकेन [6]ऊनेन पञ्चाशन्न भवतीति [7]एकान्नपञ्चाशत् । "एकादिश्चैकस्य चादुक्" (पा ६.३.७६) इति [8-] नञः

षष्ठे षट्त्रिंशद्रात्रोऽभिहितः । अथ सप्तम एकोनपञ्चाशद्रात्रोऽभिधीयते ॥

वसिष्ठ इति ॥ तमेतं विधत्ते - 'वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान् भवेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत् तमाहरत् तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति' इति ॥ विश्वामित्रशापेन हतेषु पुत्रेषु प्रजां शत्रुक्षयं च कामयमानः [V]वसिष्ठः तदुपायत्वेन [V]एकस्मान्नपञ्चाशं निश्चित्य तदनुष्ठानेन [V]प्रजां लब्ध्वा [V]सौदासान् [V]अभ्यभवत् । सुदासस्य पुत्राः सौदासास्ते च वसिष्ठस्य शत्रवः । वसिष्ठवद्यजमाना अपि तदनुष्ठानेन [V]प्रजां लब्ध्वा [V]भ्रातृव्यान् [V]अभिभवन्ति ॥

त्रय इति ॥ अथाहानि विधत्ते - 'त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति' इति ॥ त्रिवृत्स्तोमयुक्ता अग्निष्टोमरूपा अहर्विशेषास्त्रयः कर्तव्याः । "त्रिवृतमेव वज्रं संभृत्य भ्रातृव्याय

---

१. मै२ - सप्तैकस्मात्, अ१ - सप्तमात् । २. मै. मै१. मै३ - लिप्सीय । ३. मै२ - सदासर्वापत्यानि । ४. अ१ - सौदासेयाः । ५. अ - 'एकेन' नास्ति । ६. मै२ - ऊने । ७. मै१ - एकं न पञ्चाशत्, मै२ - एतमेकस्मान्नपञ्चाशत्, अ१ - एकान्नपञ्चाशः । ८-८. मै१ - नञ् प्रकृत्या भवति, अ - नञि पत्या भवन्ति ।

त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रो (१) वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति

त्रयः । त्रिवृत इति त्रि-वृतः । अग्निष्टोमा इत्यग्नि-स्तोमाः । भवन्ति । वज्रस्य । एव । मुखम् । समिति । श्यन्ति । दश । पञ्चदशा इति पञ्च-दशाः । भवन्ति । पञ्चदश इति पञ्च-दशः । वज्रः (१) । वज्रम् । एव । भ्रातृव्येभ्यः । प्रेति । हरन्ति ।

प्रकृत्या [९-] भावः [-८] [१०]आदुगागमश्च । [११](सकारमकारावुपसर्जनौ) । अलुग्वा पञ्चम्याः [१२]छान्दसः । " तस्य [१३]पूरणे [१४-] डट् " (पा ५.२.४८) इति डट् । अवयवधर्मेण समुदायो व्यपदिश्यते । [१५-] परिमाणो वा छन्दसो [-१५] डः । [१६]' य एवं विद्वांसः ' इत्यादि । गतम् ॥

'त्रयस्त्रिवृतः' इति ॥ त्रिवृत्-स्तोमकाः Vत्रयः Vअग्निष्टोमाः [-९ -१४], [१७]Vभवन्ति Vत्रिवृतः [१८]वज्रत्वात् [१९]तस्य Vमुखं [२०]Vसंश्यन्ति [२१]तीक्ष्णीकुर्वन्ति पौनःपुन्येन । यद्वा-भ्रातृव्याभिभवहेतुतया [२२]वज्रस्थानीयस्यास्य सत्रस्य मुखं [२३]त्रिभिस्त्रिवृद्भिः तीक्ष्णीकुर्वन्तीति । ' दश [२४]पञ्चदश ' इति । पञ्चदशस्तोमकानि दशाहानि Vभवन्ति [२५]अग्निष्टोमा [२६]इत्यधिकृत्य [२७]पञ्चदश उक्थ्याः इत्याचार्यः । ' पञ्चदशः ' [२८]इत्यादि । वीर्यवत्त्वेन [२९]वज्रवत् भ्रातृव्याभिभवहेतुत्वात् ॥

प्रहरति " (तैसं २.६.२) इति श्रुत्यन्तरात् त्रिवृद्रूपस्य वज्रस्य मुखमनेन तीक्ष्णीकुर्वन्ति ॥

दशेति ॥ अथान्यानि कानिचिदहानि विधत्ते - ' दश पञ्चदशा भवन्ति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति ' इति ॥ पञ्चदशस्तोमयुक्ता [१]अहर्विशेषा दशसंख्याकाः कर्तव्याः । " तं पञ्चदशस्तोमो मध्यत उदतृणत् " (तैब्रा २.२.३) इत्येवमन्यत्र हिंसाहेतुत्वश्रवणात् पञ्चदशस्य वज्रत्वम् ॥

९-९. अ१ - ' भावः - - - - अग्निष्टोमाः ' नास्ति । १०. मै१ - आनुगागमश्च । ११. [अस्माभिः संभावितोयमंशः], मै. मै१. मै३. अ. अ१ - सकारमकारावुपजातौ । १२. मै२ - छन्दस्यः । १३. मै२ - पूरणमिति । १४-१४. अ - ' डट् - - - अग्निष्टोमाः ' नास्ति । १५-१५. मै. मै१. मै३. अ. अ१ - परिमाणे वा छान्दसः । १६. मै२ - ' यः ' नास्ति । १७. अ१ - भवति । १८. मै२ - यज्ञत्वात् । १९. मै. मै१. मै२. मै३. अ - तत्र । २०. मै. मै१. मै३ - श्यन्ति, मै२ - संश्यन्तीति । २१. मै२ - क्लृप्तिं कुर्वन्ति । २२. मै२ - यज्ञस्थानीयस्यास्य । २३. मै२ - तिसृभिस्त्रि° । २४. मै. मै१. मै३. अ. अ१ - ' पञ्चदश ' नास्ति । २५. मै१ - अग्निष्टोमः । २६. मै१. अ. अ१ - इत्यधिकृतम् । २७. मै१ - पञ्चदशा । २८. मै२ - इत्याचार्याः । २९. अ१ - वज्रवत् भ्रातृव्याभिभूत्यै भवति, भ्रातृव्यभि° ।

---

१. हा - अहर्विशेषा दशस्तोमयुक्ता अहर्विशेषाः ।

एकस्मान्नपञ्चाशद्रात्रः]

षोडशिमद्दशममहर्भवति वज्रं एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि

षोडशिमदिति षोडशि-मत् । दशमम् । अहः । भवति । वज्रे । एव । वीर्यम् । दधति । द्वादश । सप्तदशा इति सप्त-दशाः । भवन्ति । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तैः । जायन्ते । पृष्ठ्यः । षडह इति षट्-अहः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि ।

---

[30]षोडशिमत् दशमम् ' इति ॥ एषां [V]दशमम् [V]अहः [31-V]षोडशिमत् [V]भवति, [32]षोडशधर्मवत् । [V]वज्रः वीर्यं ससामर्थ्यं [33]दधति [34]जनयति । 'द्वादश' इति । सप्तदशस्तोमकानि [V]द्वादश अहानि [V]भवन्ति । 'अन्नाद्यस्य' इति । सप्तदशस्य [35]अन्नाद्यहेतुत्वात् [-31] । [V]अथो अपि च [V]तैः सप्तदशैः [36-V]प्रजायन्ते, प्रजासाधनत्वात् सप्तदशस्य ॥

'पृष्ठ्यः' इत्यादि ॥ व्याख्यातम् (तैसं ७.४.३) । 'द्वादश' इति । [37]एकविंशस्तोमकानि [V]द्वादश अहानि [V]भवन्ति [38]इति । [39]'प्रतिष्ठित्यै' इत्यादि । एकविंशस्य [40]प्रतिष्ठाहेतुत्वमुक्तम् ।

षोडशिमदिति ॥ अथान्यदहर्विधत्ते - 'षोडशिमद्दशममहर्भवति वज्र एव वीर्यं दधति' इति ॥ [2]षोडशिस्तोत्रयुक्तं दशरात्रस्य दशममविवाक्यमेकमहः कार्यम् । तेन [3-]पूर्वोक्ते [V]वज्रे [-3V]वीर्यं स्थापयन्ति ॥

द्वादश इति ॥ अथान्यानि कानिचिदहानि विधत्ते - 'द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तैर्जायन्ते' इति ॥ सप्तदशस्तोमयुक्ता अहर्विशेषा द्वादशसंख्याकाः कार्याः । [4]सप्तदशस्तोमस्योदरभागजन्यत्वादन्नहेतुत्वम् । [5]सप्तदशस्य [6]प्रजापतिरूपत्वाच्च प्रजाहेतुत्वम् ॥

---

३०. मै१ - षोडशिनः, मै. मै३. अ१ - षोडशिमत् षोडशिमत्, अ - षोडशिनम् । ३१-३१. अ१ - 'षोडशिमत् - - - - °हेतुत्वात्' नास्ति । ३२. मै२ - 'षोडशधर्मवत्' नास्ति । ३३. मै१. अ - दधाति । ३४. मै२ - 'जनयति' नास्ति, अ - जनं जनयति । ३५. मै२ - अन्नाद्यत्वात् हेतुत्वात् । ३६. मै. मै१. मै३. अ - प्रजायन्ते च । ३७. मै२ - एकविंशति स्तोमानि । ३८. मै२ - 'इति' नास्ति । ३९. अ१ - प्रतिष्ठिता । ४०. मै२ - °त्वमुक्त्वा ।

---

२. अ. उ. पा. हा - षोडशीस्तोत्र°, म. मै - षोडशस्तोत्र° । ३-३. मै - पूर्वोक्तेन जीवीर्यम् (?) । ४. मै - भागजन्यतादन्ये हेतुत्वम् । ५. मै - सप्तदशाक्षरप्रजा°, अ. आ. क. पा. हा. इ. वा. वै - सप्तदशाक्षरस्य । ६. वा - 'प्रजापतिरूपत्वाच्च' नास्ति ।

पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति द्वादशैकवि॒ꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् (२) दधते बहवः षोडशिनो भवन्ति विजित्यै

पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिरित्यृतु-भिः । संवत्सरमिति सं-वत्सरम् । ते । संवत्सर इति सं-वत्सरे । एव । प्रतीति । तिष्ठन्ति । द्वादश । एकवि॒ꣳशा इत्येक वि॒ꣳशाः । भवन्ति । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो इति । रुचम् । एव । आत्मन् (२) । दधते । बहवः । षोडशिनः । भवन्ति । विजित्या इति वि-जित्यै ।

Vअथो अपि च [४१]Vरुचं दीप्तिं Vआत्मनि [४२]Vएव [४३]Vदधते । [४४]'रुग्वा एकविंशः' [४५]इत्यादि । तत्साधनत्वात्तस्य ॥

[४६]'बहवः' इति[-४६] ॥ [४७]अनन्तरोक्तेष्वेकविंशेषु अनन्तरं वक्ष्यमाणेषु वा Vबहवः Vषोडशिनः Vभवन्ति विजयाय । षडाश्विनानि [४८]भवन्ति । अतिरात्रा अन्ते [४९]पञ्च आदौ

पृष्ठ्य इति ॥ [७]अथ षट्संख्याकान्यहानि विधत्ते[-७] - 'पृष्ठ्यः षडहो भवति षट् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति' इति ॥

द्वादश इति ॥ अथान्यानि कानिचिदहानि विधत्ते - 'द्वादशैकवि॒ꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवात्मन् दधते' इति ॥ एकविंशस्तोमयुक्ता अहर्विशेषाः द्वादश कर्तव्याः । एकविंशस्तोमस्य प्रतिष्ठाहेतुत्वं कान्तिहेतुत्वं [८]च असकृदुक्तम् ।

बहव इति ॥ अथान्यानि कानिचिदहानि विधत्ते - 'बहवः षोडशिनो भवन्ति विजित्यै' इति ॥ [९]षोडशिस्तोत्रयुक्ता अहर्विशेषा यावन्तोऽपेक्षितास्तावन्तः कार्याः । [१०]अत्र [११-]त्रिभिरपेक्षितसंख्यायाः पूरणात्[-११] त्रयः कार्याः ।

---

४१. अ - 'रुचम्' नास्ति । ४२. मैर - 'एव' नास्ति । ४३. मैर - विदधे । ४४. मैर - वाग्वा । ४५. मैर. अ१ - इति । ४६-४६. मैर - भवति । ४७. मैर - अनन्तरेष्वेकविंशतिषु । ४८. मै. मै१. मै३. अ. अ१ - इति । ४९. मैर - प्रथमः ।

७-७. मै - षट्संख्याकानि दधते । ८. मै - वा । ९. शृ१. मै - षोडशस्तोत्र°, उ. अ. पा. हा. इ. वा - षोडशीस्तोत्र° । १०. म - अतः । ११-११. शृ१. मै - °संख्यापूरणात् ।

एकस्मान्नपञ्चाशद्रात्रः]

षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिꣳशत

षट् । आश्विनानि । भवन्ति । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठन्ति । ऊनातिरिक्ता इत्यून-अतिरिक्ताः । वै । एताः । रात्रयः । ऊनाः । तत् । यत् । एकस्यै । न । पञ्चाशत् । अतिरिक्ता इत्यति-रिक्ताः । तत् । यत् । भूयसीः । अष्टाचत्वारिꣳशत इत्यष्टा-चत्वारिꣳशतः ।

[50]एक [51-] इत्याचार्य आह -[51] प्रथमं - - - - पञ्च [52-][प्रथमः पञ्चमः][-52] षोडश [53]एकान्नत्रिंशत् , षट्त्रिंशत् , एकान्नपञ्चाशच्च [54]षडतिरात्राः । [55]' षड्वा ' इत्यादि । गतम् ॥

' ऊनातिरिक्ता वै ' इत्यादि ॥ [V]एताः [56]एकान्नपञ्चाशत् रात्रयः [V]ऊनातिरिक्ताः च । कथमूनत्वं कथं [57]वा अतिरिक्तत्वमित्याह - ' ऊनास्तत् ' इत्यादि । [V]यत् यस्मात् [V]एताः [V]रात्रयः [V]एकस्यै एकया [58]ऊनया । व्यत्ययेन [59]तृतीयार्थे चतुर्थी । [V]न [V]पञ्चाशत् पञ्चाशन्न भवति पञ्चाशत्संख्यां न [60]लभन्ते । तस्मात् [V]ऊनाः । यस्माच्च [V]अष्टाचत्वारिंशतः [61]भूयसीः

षडिति ॥ [12]एतत् क्रतुगतेषु षट्स्वहःस्वाश्विनशस्त्रं विधत्ते - ' षडाश्विनानि भवन्ति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति ' इति ॥

ऊनातिरिक्ता इति ॥ एकोनपञ्चाशद्रूपं स्तौति - ' ऊनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिꣳशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ' इति ॥ अस्मिन् क्रतौ विद्यमानाः [V]एताः [V]रात्रयः [V]ऊनाः चातिरिक्ताश्च भवन्ति । कथमिति तदुच्यते - यद्यस्मात् कारणादेकोनपञ्चाशदेकया रात्र्या वर्जिता पञ्चाशत् संख्या तस्मादेता ऊनाः । यद्यस्मात्

५०. मै२ - ' एकः ' नास्ति । ५१-५१. मै१. अ - आचार्य इत्याह, अ१ - आचार्य इत्याप्रथमम् । ५२-५२. मै१. मै२. मै३. अ. अ१ - ' [प्रथमः पञ्चमः] ' नास्ति । ५३. अ१ - एकादशोनत्रिंशत् । ५४. मै२ - अतिरात्रः । ५५. मै२ - ' षड्वा ' नास्ति । ५६. मै१. अ - °पञ्चाशत्संख्याराात्र° । ५७. मै. मै१. मै२. मै३. अ१ - ' वा ' नास्ति । ५८. [मै१ - पुस्तकमवलम्ब्यास्माभिः शुद्धतामापादितोऽयमंशः ।] , मै१ - अनया, मै. मै२. मै३. अ. अ१ - ' ऊनया ' नास्ति । ५९. मै१. अ. अ१ - ' तृतीयार्थे ' नास्ति । ६०. मै१ - लभते । ६१. अ१ - भूयसः ।

१२. शृ१ - तत् ।

ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया (३)

ऊनात् । च । खलु । वै । अतिरिक्तादित्यति-रिक्तात् । च । प्रजापतिरिति प्रजा-पतिः । प्रेति । अजायत । ये । प्रजाकामा इति प्रजा-कामाः । पशुकामा इति पशु-कामाः । स्युः । ते । एताः । आसीरन् । प्रेति । एव । जायन्ते । प्रजयेति प्र-जया (३) ।

भूयस्यः अष्टाचत्वारिंशत् [६२-] संख्याम् [६३-]अतीत्य [-६२] वर्तन्ते [-६३] तस्मात् [६४V]अतिरिक्ताः । अष्टाचत्वारिंशदक्षरा जगती जागताः पशवः [६५]द्विपादश्चतुष्पादश्च सर्वे विराड्दशाक्षराः पञ्च विराजः पञ्चाशद्विराट् चान्नं तच्च सर्वाः प्रजाः । किं च ऊनाच्चातिरिक्ताच्च कारणवस्तुनः [V]प्रजापतिः [६६V]प्राजायत प्रजाः [६७]प्राजनयत् [६८-] सर्वाः, तद्धि औपाधिकेन रूपेण ऊनं [-६८], पारमार्थिकेन [६९]च अतिरिक्तं [७०]सर्वातिशयीति । [७१-] एवमपि प्रजाकारणेन [-७१] [७२]संख्याद्वयेन [७३]ऊनातिरिक्त-स्वरूपतापादनेन [७४]उपजायमाना [७५]एकान्नपञ्चाशत्संख्या ऊनातिरिक्तस्वभावशालि-

---

[१३-] कारणादष्टाचत्वारिंशत्संख्याया अधिकास्तस्मादतिरिक्ताः [-१३] । [१४V]प्रजापतिः पुरा क्वचित् [V]ऊनात् अल्पात् वीर्यात् प्रौढशरीररूपाः प्रजा असृजत । क्वचिच्च [V]अतिरिक्तात् अधिकात् आकाशादेरुत्तरोत्तरन्यूनान् वाय्वादीनसृजत । तस्मादूनातिरिक्तरूपोऽयं क्रतुः [१५]प्रशस्तः ॥

य इति ॥ पूर्वं विधिवाक्येऽभिहितं फलमुपसंहरति - 'ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिः' इति ॥

६२-६२. मै१ - संख्यावत्यः । ६३-६३. अ - अन्ववत । ६४. अ - अतिरिक्ताः तस्मादतिरिक्ताः । ६५. मै२ - द्विपदश्चतुष्पादश्च । ६६. मै२ - प्रजाधानाः । ६७. मै२ - प्राजायत । ६८-६८. मै२ - सर्वां मृद्धनिन्द्रं विवित्तेन आयुषेण दनम्? । ६९. मै२ - वा, अ - चैवम् । ७०. मै१. अ - सर्वातिशायीनि । ७१-७१. मै१. - एवमतिरिक्तं सर्वातिशायिनिति, अ१ - एवमतिरिक्तं एवं विविधप्रजाकारणेन । ७२. मै१. अ१ - संख्यान्वयेन, अ - संख्यान्वये । ७३. मै२ - ऊनातिरिक्ततास्वरूप°, मै. मै१. मै३. अ. अ१ - °स्वरूपतापदेन । ७४. अ१ - प्रजायमाना । ७५. मै१. अ१ - एकस्मान्नपञ्चाशत्संख्या ।

१३-१३. शृ१ - °संख्यया अतिरिक्तायाः अधिकाः तस्मा अतिरिक्ताः । १४. म - 'प्रजापतिः' नास्ति । १५. मै - 'प्रशस्तः' नास्ति ।

एकस्मान्नपञ्चाशद्रात्रः]

पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳसः एकस्मान्नपञ्चाशमासंते विराजमेव गच्छन्त्यन्नादा

पशुभिरिति पशु-भिः । वैराजः । वै । एषः । यज्ञः । यत् । एकस्मान्नपञ्चाश इत्येकस्मात्-नपञ्चाशः । ये । एवम् । विद्वाꣳसः । एकस्मान्नपञ्चाशमित्येकस्मात्-नपञ्चाशम् । आसंते । विराजमिति वि-राजम् । एव । गच्छन्ति । अन्नादा इत्यन्न-अदाः ।

[७६]परकारणवस्तुसदृशी [७७]भवति इति । [७८]Vएताः एकान्नपञ्चाशतं रात्रीरासित्वा Vप्रजया Vपशुभिः [७९]च Vप्रजायन्ते यजमानाः [८०]कारणगतस्योनातिरिक्तस्याभावात् पञ्चाशदष्टाचत्वारिंशत्संख्ययोः [८१]अकारणत्वमेवेति भावः । अष्टौ चत्वारिंशच्च अष्टाचत्वारिंशत् । " अष्टनः संख्यायाम् " (पा ६.३.१२५) [८२]इत्यात्वम् , " संख्या " (पा ६.२.३५) इति पूर्वपदप्रकृतिस्वरत्वम् ॥

किञ्चेत्याह - 'वैराजः 'इत्यादि ॥ इदानीं [८३]समस्तस्य प्रजाकारणस्य अन्नस्य साधनभावेन ताद्रूप्यमुपचर्य स्तुतिः क्रियते विराडेव वैराजः । स्वार्थिकोऽण् । [८४]यद्वा - विराजः साधनभावेन

वैराज इति ॥ क्रतुगतामहःसंख्यां प्रशंसति - वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्ति ' इति ॥ [१६]चतुर्ष्वहर्दशकेषु दशसंख्यासद्भावात् मुख्यं वैराजत्वम् । पञ्चमस्य [१७]दशकस्यैकेन न्यूनत्वेऽपि [१८]वैराजत्वमुपचरितुं [१९]शक्यम् । " न वा एकेनाक्षरेण छन्दांसि [२०]वियन्ति न द्वाभ्याम् " इति श्रुत्यन्तरात् । अतो वैराजत्वादन्नप्राप्तिः ॥

७६. [मै - तलटिप्पण्यां 'परकारणावस्थासदृशी 'इति पाठो लभ्यते ।] । ७७. अ - 'भवति 'नास्ति । ७८. अ - 'एताः' नास्ति । ७९. मै१. अ - 'च 'नास्ति । ८०. मै२ - °गतस्थानाति°, अ१ - वैराजस्योनाति° । ८१. अ१ - कारणत्वमेवेति । ८२. अ१ - इत्यन्तोदात्तत्वम् । ८३. मै. मै१. मै३. अ. अ१ - सप्तमस्य । ८४. अ - ' यद्वा ' नास्ति ।

१६. क - चतुर्दशकेषु । १७. शृ१ - दशमस्यै° । १८. म - °मुपचरितम् । १९. म - 'शक्यम् 'नास्ति । २०. शृ१ - विशंसति, म - विजयन्ति ।

भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य
परिगृहीत्यै ॥७॥

(वज्रं आत्मन् प्रजया द्वाविंऽ शतिश्च ।)

~~~~~~

भवन्ति । अतिरात्राविल्यंति-रात्रौ । अभितः । भवतः ।
अन्नाद्यस्येत्यंन्न-अद्यंस्य । परिगृहीत्या
इति परि-गृहीत्यै ॥७॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

~~~~~~

संबन्धी [V]वैराजः । [८५]' विराजम् ' इति । प्रभूतमन्नं प्राप्नुवन्ति । [V]अन्नादाः च [V]भवन्ति इति । ' अतिरात्रौ ' इति उक्तयोरेवानुवादः अन्नाद्यपरिग्रहाभिधानार्थः ॥

॥ इति सप्तमे चतुर्थे सप्तमोऽनुवाकः ॥

~~~~~~

अतिरात्राविति ॥ प्रायणीयोदयनीयौ विधत्ते - ' अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ' इति ॥ उक्तन्यायेनान्नहेतुत्वादन्नपरिग्रहः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥

~~~~~~

८५. मै१ - वैराजम्, अ - ' विराजम् ' नास्ति ।

संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी

संवत्सरायेति सं-वत्सराय । दीक्षिष्यमाणाः । एकाष्टकायामित्येक-अष्टकायाम् । दीक्षेरन् । एषा । वै । संवत्सरस्येति सं-वत्सरस्य । पत्नी ।

इत उत्तरं गवामयनम् - " गावो वा एतत्सत्रमासत " (तैसं ७.५.१) [१]इत्यादि वक्ष्यति । तत्र [२]दीक्षारम्भकालं विदधाति - ' संवत्सराय ' इत्यादि ॥ संवत्सरकालसाध्यं गवामयनं संवत्सरशब्देनोच्यते । प्रकृतिश्चेयं सांवत्सरिकाणाम् आदित्यानामयनादीनां संवत्सरार्थं [V]दीक्षिष्यमाणाः दीक्षितुकामाः [V]एकाष्टकायां [V]दीक्षेरन् । माघकृष्णाष्टमी एकाष्टका । [३]यथाहुः - ' या माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षते, [४-] तस्याम् एकाष्टकायां कर्मात्मिकायाम् एष संवत्सरे वसति एतां रात्रिं कालात्मिकाम् '[-४] [५]इति । एकाष्टका प्रधानाष्टका । " पूर्वकालैक°" (पा २.१.४९) इति समासः । [६-] " अष्टका पितृदैवत्ये [-६] " (पा ७.३४५ वा) इतीत्वाभावः । तत्कालसाध्यं च कर्म [७]दर्शादिवदुपचारेणोच्यते ।

सप्तमेऽनुवाक एकोनपञ्चाशद्रात्रोऽभिहितः । अथाऽष्टमादिषु चतुर्ष्वनुवाकेषु [१]संवत्सरसत्रमभिधीयते ॥

[२-] **संवत्सरायेति** ॥ [३]तत्राष्टमे [४-] तस्य सत्रस्य [-४] दीक्षाकालं विधत्ते - ' संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एता९ रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्ते ' इति ॥ ये यजमाना संवत्सरसत्रार्थं दीक्षिष्यन्ते ते यजमानाः [V]एकाष्टकायां माघकृष्णाष्टम्यां दीक्षां कुर्युः । येयमेकाष्टकाभिमानिनी देवता सेयं संवत्सराभिमानिनो देवस्य पत्नी । एकाष्टकाया अभिमानिदेवतारूपत्वं गर्भधारणादवगम्यते । तथा चाग्निकाण्डे मन्त्र आम्नायते - " एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् " (तैसं ४.३.११) इति [-२] । [५]संवत्सरपत्नीत्वं चान्यत्र [६]मन्त्रान्तरेण [७]आम्नातम् -

---

१. मै. मै१. मै३. अ. अ१ - इत्यादि च । २. अ१ - दीक्षारम्भम् । ३. मै. मै१. मै२. मै३. अ१ - यदाहुः । ४-४. मै. मै१. मै२. मै३. अ - ' तस्याम्° - - - - °त्मिकाम् ' नास्ति । ५. अ१ - ' इति ' नास्ति । ६-६. अ१ - अष्टकपितृदैवत्यै । ७. मै१. अ१ - दर्शवदुप° ।

---

१. शृ१ - संवत्सरमभि° । २-२. वा - ' संवत्सरायेति - - - - इति ' नास्ति । ३. अ. आ. क. पा. हा. इ. वै. म - °ष्टमेऽनुवाके । ४-४. अ. आ. क. पा. हा. इ. वै. म. उ - संवत्सरसत्रस्य । ५. अ. आ. क. पा. हा. इ. वा. वै. उ - संवत्सरस्य पतित्वम् । ६. शृ१ - मन्त्रान्तरे । ७. मै - प्राप्तम् ।

यदेकाष्टकैतस्यां वा एष एताꣳ रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्त आर्तं वा एते संवत्सरस्याभि दीक्षन्ते

यत् । एकाष्टकेत्येक-अष्टका । एतस्याम् । वै । एषः । एताम् । रात्रिम् । वसति । साक्षादिति स-अक्षात् । एव । संवत्सरमिति सं-वत्सरम् । आरभ्येत्या-रभ्य । दीक्षन्ते । आर्तम् । वै । एते । संवत्सरस्येति सं-वत्सरस्य । अभीति । दीक्षन्ते ।

[८-] तत्र कालवृत्तेः कर्मण्युपचारः[-८], अत्र तु कर्मवृत्तेरुपचार इति । 'एषा वै' इति । [९][V]एषा एकाष्टका कर्मात्मिकेति [V]संवत्सरस्य कर्मात्मनः [१०][V]पत्नी पत्नीस्थानीया संवत्सरभाविनां कर्मणां पालयित्री एषेत्युक्तम् । [११]केत्याह-'यदेकाष्टका' इति । कः पुनरस्या विशेष इत्याह - 'एतस्याम्' इत्यादि । [V]एतस्याम् एकाष्टकायां कर्मात्मिकायां [V]एषः संवत्सरः [V]वसति [V]एतां [V]रात्रिं [१२-] कालात्मिकाम् एकाष्टकाम् [-१२] । अत्यन्तसंयोगे द्वितीया (द्र पा. २.३.५) । एतस्यां रात्रावित्यर्थः । तस्मात् [V]साक्षात् समस्तम् [V]एव [V]संवत्सरम् [V]आरभ्य परिगृह्य [V]दीक्षन्ते ॥

[१३]एतद्दूषयति - 'आर्तं वै' इत्यादि ॥ [१४-] संवत्सरसंबद्धं यदिदं [V]आर्तं आर्तियुक्तं [-१४] [१५]स्थानं [१६-] तदभिलक्ष्य [V]दीक्षन्ते [-१६] एते । "अभिरभागे (पा १.४.९१) इति लक्षणे अभेः कर्मप्रवचनीयत्वम् । कस्मादित्याह - यस्मात् 'एकाष्टकायां दीक्षन्ते' इति । [१७]हेतुगर्भमिदम् ।

"एकाष्टका तपसा तप्यमाना संवत्सरस्य [८]या पत्नी दुदुहे प्रपीना" (आपमंप्र २.२०.३५) इति । [९]एष संवत्सराभिमानी देवः [V]एतां माघकृष्णाष्टमीं [V]रात्रिं सर्वामप्येतस्यामेकाष्टकादेवतायामेव [V]वसति । अतस्तत्र दीक्षां कुर्वन्तो यजमाना [१०]मुख्यम् एव [V]संवत्सरम् [V]आरभ्य दीक्षितवन्तो भवन्ति ॥

८-८. मै२ - तत्राकर्मणाभ्युपचारः । ९. मै१ - 'एषा' नास्ति । १०. मै१ - 'पत्नी' नास्ति । ११. अ - 'केत्याह' नास्ति । १२-१२. मै२ - कालात्मिकाष्टकाम् । १३. मै१ - °दूषयन्ति । १४-१४. [मै१ - पुस्तकमवलम्ब्य संशोधितोऽयं पाठोऽस्माभिर्द्रष्टव्यः ।], मै - संवत्सरसम्बद्धं यदिदम् आर्तियुक्तम्, मै१ - सवत्सरसम्बन्धं यदार्तमार्तियुक्तम्, मै२. मै३ - संवत्सरसंबन्धि यदिदमार्तियुक्तम्, अ - संवत्सरस्य संबन्धितयार्तियुक्तम्, अ१ - संवत्सरस्य सम्बन्धी यदार्तमार्तियुक्तम् । १५. अ - 'स्थानम्' नास्ति । १६-१६. अ - तदतिदीक्षन्ते, अ१ - तदभिदीक्षन्ते । १७. अ - हेतु आह गर्भमिदम् ।

---

८. म. शृ१ - 'या' नास्ति । ९. वा - एषु । १०. इ - 'मुख्यम्' नास्ति ।

य एंकाष्टकायां दीक्षन्तेऽन्तंनामानावृतू भंवतो

**ये । एकाष्टकायामित्येक-अष्टकायाम् । दीक्षन्ते ।
अन्तंनामानावित्यन्तं-नामानौ ।
ऋतू इति । भवतः ।**

तदपि कुत इत्याह - 'अन्तनामानौ' इति । ऋत्ववयवे [१८]मासे ऋतुशब्दः, यथा "मधुश्च माधवश्च वासन्तिकावृतू" (तैसं ४.४.११) इति । एतौ हि [१९]तैषमाघौ मासौ संवत्सरस्य [V]अन्तनामानौ अन्तिमाख्यौ यत्र सर्वेऽपि स्थावरजङ्गमाः शीतेन पीड्यन्ते । [२०]तस्मादेतावार्तिस्थानमिति । अन्य आहुः - [२१]अन्तो विनाशः तत्कारिणावेतौ मासौ हिमेन प्रजानामिति । नैरुक्ता आहुः - अन्तशब्देन प्राणा उच्यन्ते, [२२]यथा "यदेदन्ता अदद॒ह्रन्त पूर्वे" (तैसं ४.६.२) इति । [२३]अननवन्तः [२४]प्राणिनः, [२५]औणादिकस्तः (उसू ३.८६) । तेषां [२६-] नामयितारौ नाशयितारौ [-२६] शीतपीडयेति अन्तनामानाविति । "नामन्°" (उसू ४.१५०) इति [२७]निपात्यते । अनयोः पक्षयोः दासीभारादिर्द्रष्टव्यः (गणपाठ २११, पा ६.२.४९) । एवं [२८]प्राणिस्वभावाद्यजमाना अपि पीड्येरन्निति ॥

आर्तमिति ॥ तमेतं पक्षं दूषयित्वा [११]पक्षान्तरं विधत्ते - 'आर्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यत् फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते' इति ॥ [V]ये यजमानाः [V]एकाष्टकायां [V]दीक्षन्ते ते यजमानाः संवत्सरसत्रस्य [V]आर्तम् [V]अभि विनाशमभिलक्ष्य [१२]दीक्षन्ते । तत्रायं हेतुः - पुष्य *[पौष] माघरूपावृत्ववयवौ संवत्सरस्यान्त इत्येतन्नामधारिणौ । तयोः शिशिरर्तुरूपत्वात् । तेन चर्तुना पूर्वसंवत्सरस्य समाप्तत्वात् पौषपौर्णमासीमारभ्य

१८. मैर - मासोऽयम् । १९. मै१ - तिष्यमाघौ । २०. अ१ - तस्मादेतदार्तवं स्थान° । २१. मैर - अथोऽपि । २२. मै. मै१. मै३. अ. अ१ - 'यथा' नास्ति । २३. [अस्माभिः शुद्धतामापादितोऽयमंशः, तैसं ४.६.२ इत्यत्रत्यं सायणभाष्यमनुरुन्ध्य ।], मै. मै१. मै३. अ - अननदन्ताः, मै२ - अन्नअन्ताः, अ१ - अनन्तीत्यनन्ताः । २४. मै२ - अप्राणिनः । २५. मै२ - ग्रहाणां तत्तत् । २६-२६. मै२ - नाशयितारौ विनाशयितारौ । २७. मै. मै२. मै३ - निहन्यते, अ१ - पात्यते । २८. अ - प्रमाणस्वभावा° ।

११. शृ१ - यज्ञान्तरम् । १२. शृ१ - 'दीक्षन्ते' नास्ति । *[आनन्दाश्रममुद्रितावृत्तौ प्रपूरितोऽयमंशः ।] ।

व्यस्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् (१) संवत्सरस्य यत् फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते

व्यस्तमिति वि-अस्तम् । वै । एते । संवत्सरस्येति सं-वत्सरस्य । अभीति । दीक्षन्ते । ये । एकाष्टकायामित्येक-अष्टकायाम् । दीक्षन्ते । अन्तनामानावित्यन्त-नामानौ । ऋतू इति । भवतः । फल्गुनीपूर्णमास इति फल्गुनी-पूर्णमासे । दीक्षेरन् । मुखम् । वै । एतत् (१) । संवत्सरस्येति सं-वत्सरस्य । यत् । फल्गुनीपूर्णमास इति फल्गुनी-पूर्णमासः । मुखतः । एव । संवत्सरमिति सं-वत्सरम् । आरभ्येत्या-रभ्य । दीक्षन्ते ।

अथ दोषान्तरमप्याह - ‘व्यस्तम्’ इत्यादि ॥ [V]व्यस्तं [२९-] विक्षिप्तं प्रदेशम् [V]अभि [-२९] एते [V]दीक्षन्ते । कस्मादित्याह - [३०-]‘यस्मात् एकाष्टकायां [-३०] दीक्षन्ते’ इति हेतुत्वेन योज्यम् । तदपि कुत इत्याह - ‘अन्तनामानौ’ इति । अन्तौ एतौ संवत्सरस्य मासौ, तत्र दीक्षन्ते । स च संवत्सरः समाप्तः, संवत्सरान्ते [३१-] यज्ञ इति [-३१] विक्षिप्तमेतत् भवति संवत्सराख्यं कर्म, संवत्सरस्य विक्षिप्तत्वात् ‘व्यस्तम्’ इति । गतिस्वरे कृते “उदात्तस्वरितयोर्यणः [३२]स्वरितः°” (पा ८.२.४) इति [३३]धात्वकारः स्वर्यते ॥

एवं दूषयित्वा पक्षान्तरं परिगृह्णाति - ‘फल्गुनीपूर्णमासे’ इत्यादि ॥ फल्गुन्या युक्तः पूर्णमासः [V]फल्गुनीपूर्णमासः । ‘मुखं वै’ इति । अत्र केचिदाहुः - फाल्गुनादिः संवत्सरः इति । [३४]तन्मते [V]मुखतः [V]एव [V]संवत्सरं परिगृह्य दीक्षा कृता भवति । आद्यादिभ्यस्तसिः ॥

फाल्गुनपौर्णमास्याः प्राचीनः कालः संवत्सरस्यान्तः । किं च [V]एकाष्टकायां दीक्षमाणाः [V]संवत्सरस्य [V]व्यस्तम् [V]अभि विपर्यासमभिलक्ष्य [V]दीक्षन्ते । आदौ हि दीक्षा कर्तव्या । अयं [१३]च संवत्सरस्य [१४]अन्त्यः कालः । ऋत्ववयवयोरेकयोरुक्तन्यायेनान्तनामोपेतत्वात् । तस्मादुत्तरफल्गुनीयुक्ते [१५]पूर्णमासे दीक्षां कुर्युः । तस्य च भाविसंवत्सरोपक्रमदिनत्वात् । एतदेवाभिप्रेत्याऽऽधानब्राह्मणे समाम्नातम्- “उत्तरयोरादधीत । एषा वै प्रथमा रात्रिः संवत्सरस्य । यदुत्तरे फल्गुनी” (तैब्रा १.१.२) इति ॥

२९-२९. मै२ - विक्षिप्ते । ३०-३०. अ१ - यदेकाष्टकायाम् । ३१-३१. मै१ - यज्ञपति । ३२. मै२ - ‘स्वरितः’ नास्ति । ३३. मै१ - धात्वाकारः । ३४. मै. मै३. अ. अ१ - तन्मतम् , मै२ - तन्मते इति ।

१३. शृ१ - सः । १४. म - ‘अन्त्यः’ नास्ति; अ. आ. क. पा. हा. इ. बा. वै. उ - अन्तः । १५. शृ१. म. मै - ‘पूर्णमासे’ नास्ति ।

तस्यैकैव निर्या यत् सांमेघ्ये विषूवान्त्संपद्यते चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्

तस्य । एका । एव । निर्येति निः - या । यत् । सांमेघ्य इति सां-मेघ्ये । विषूवानिति विषु-वान् । संपद्यत इति सं-पद्यते । चित्रापूर्णमास इति चित्रा-पूर्णमासे । दीक्षेरन् । मुखम् । वै । एतत् ।

अथैनमपि पक्षं [35]दूषयितुमाह - 'तस्यैकैव' इत्यादि ॥ [V]तस्य एकपक्षस्य । यद्वा - तस्य [V]फल्गुनीपूर्णमासे दीक्षित्वा क्रियमाणस्य संवत्सरयज्ञस्य [V]एका [V]एव [V]निर्या निकृष्टा प्राप्तिः, दोषः इति यावत् । " आतश्चोपसर्गे " (पा ३.३.१०६) इत्यङ् । का पुनः सेत्याह - 'यत्' इति । [36]संगता मेघाः अस्मिन्निति संमेघो वर्षाः, संमेघा एव सांमेघ्यम् । [37]चतुर्वर्णादित्वात् (गणपाठ १६३, पा ५.१.१२४) [38-] ष्यञ् स्वार्थे [-38] । तत्र [V]विषूवान् [V]संपद्यते अहःक्रमेण संपतेत् । [39]तत्र एकाशीतितममहरेकविंशोऽग्निष्टोमो विषूवान् । [40-] विष्वञ्चि नाना गच्छतीति [-40], [41]अहानि पुरस्ताच्चास्येति विषूवान् । अन्येषामपि दृश्यते " (पा ६.३.१३७) इति दीर्घत्वम् ।

तस्येति ॥ एतमपि पक्षं दूषयित्वा पक्षान्तरं विधत्ते - 'तस्यैका एव निर्या यत् सांमेघ्ये विषूवान्त्संपद्यते चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यत् चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति' इति ॥ [V]तस्य फल्गुनीपूर्णमासदीक्षापक्षस्य [V]एका [V]एव [V]निर्या वक्ष्यमाण एक एव दोषः, न तु [16]पूर्वोक्तावार्तवत्वव्यस्तत्वदोषौ । कोऽसावेको दोष इति [17]तदुच्यते - समीचीना अतिवर्षणक्षमा मेघा यस्मिन् वर्षर्तौ सोऽयं संमेघः । तस्य संबन्धी प्रत्यासन्नः कालः सांमेघ्यः । अस्मिन् काले [V]विषूवान् [18]अहः(?) संपद्यते । तथा हि विषूवानिति संवत्सरस्य मध्यवर्ती मुख्योऽहर्विशेषः । ततः पूर्वे षण्मासाः उत्तरे च षण्मासाः । तयोरुभयोर्मासषट्कयोर्मध्ये सोऽहर्विशेषः कर्तव्यः । अत्र च फल्गुनीपूर्णमासमारभ्य द्वादश दीक्षा द्वादशोपसदश्चानुष्ठायोत्तरदिने प्रथममासोपक्रमः कार्यः । तथा सति

---

३५. मै१ - दृढयितुमाह । ३६. मै२ - संमता । ३७. मै१ - चातुर्मास्यादित्वात् , मै२ - चातुर्वर्ण्यादित्वात् । ३८-३८. मै२ - स्वार्थे ष्यङ् । ३९. मै१ - तत् , अ१. मै२ - 'तत्र' नास्ति । ४०-४०. मै२ - विश्वञ्चं ता नाना गतीनि तानि, अ१ - विश्वञ्च नाना गतीनि । ४१. मै२ - चाहानि ।

---

१६. अ. आ. क. पा. हा. इ. वा. वै. उ. म - पूर्वोक्तार्तत्व°, अ. पा - '°वार्तवत्वदोषौ' नास्ति । १७. अ. आ. क. पा. हा. इ. वा. वै. उ. मै - स उच्यते । १८. म - 'अहः'(?) नास्ति ।

संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन्

संवत्सरस्येति सं-वत्सरस्य । यत् । चित्रापूर्णमास इति चित्रा-पूर्णमासः । मुखतः । एव । संवत्सरमिति सं-वत्सरम् । आरभ्येत्या-रभ्य । दीक्षन्ते । तस्य । न । का । चन । निर्येति निः - या । भवति । चतुरह इति चतुः-अहे । पुरस्तात् । पौर्णमास्या इति पौर्ण-मास्यै । दीक्षेरन् ।

" ह्रस्वनुड्भ्यां [४२]मतुप् " (पा ६.१.१७६) इति मतुप उदात्तत्वम् । अस्मिन् पक्षे एष दोषः, तथा हि - तत्रादित्यं दृष्ट्वा यत्कर्तव्यं तन्न भवेत् । अतः पक्षान्तरं परिगृह्णाति - ' चित्रापूर्णमासे ' इत्यादि । गतम् । [४३-] चैत्रादिः संवत्सर [-४३] इति येषां [४४]मतं [४५]तदिदानीमुच्यते [४६][V]तस्य [V]न [४७-][V]का [V]चन [-४७] [V]निर्या [४८-] न कश्चित् [-४८] दोषः ॥

चैत्रशुद्धनवम्यामुपक्रमो भवति । आश्वयुजशुद्धाष्टम्यां मासषट्कं समाप्य नवम्यां विषूवान् कार्यः । स च वर्षर्तोः प्रत्यासन्नः । भाद्रपदपौर्णमास्यां वर्षर्तौ समाप्ते सत्यनन्तरमासवर्तित्वात् । अतो वर्षर्तुसमीपे विषूवद्दिनसंपत्तिपरिहाराय चित्रानक्षत्रयुक्तायां पौर्णमास्यां दीक्षा कर्तव्या । सोऽपि वसन्तर्तुमध्यपातित्वात् संवत्सरस्य मुखमेव । अतः [V]मुखतः एवारम्भः कृतो भवति । एवं सति कार्तिकशुद्धनवम्यां [१९]विषुवान् संपद्यते । तच्च दिनं वर्षर्तोर्दूरवर्ती । अतो [२०]वृष्टिशंकाया अभावाद् *विसंभ्रेणानुष्ठातुं शक्यत इति तस्य पक्षस्य न कोऽपि दोषोऽस्ति ॥

चतुरह इति ॥ अथ गुणविशेषमवलोक्य पक्षान्तरं विधत्ते - ' चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छम्बट्कुर्वन्ति ' इति ॥ माघपौर्णमास्याः [V]पुरस्तात् [V]चतुरहे शुक्लैकादश्यां दीक्षेरन् । तथा सति माघकृष्णसप्तम्यां द्वादशदीक्षाणां समाप्तत्वात् [२१]तदनन्तरवर्तिन्याम्

---

४२. मै. मै१. मै३. अ. अ१ - ' मतुप् ' नास्ति । ४३-४३. [अस्माभिः संभावितोऽयं पाठः, मै. मुद्रितपुस्तके सर्वेष्वपि लिखितपुस्तकेषु ' चैत्रादिसंवत्सरः ' इति पाठो लभ्यते ।] , मै१ - °संवत्सरम् । ४४. मै२ - मन्त्र । ४५. मै२ तदिदमु°, मै१ - ततः स इदानीमु° । ४६. मै. मै१. मै३ - ' तस्य ' नास्ति । ४७-४७. मै१ - कदाचन । ४८-४८. अ१ - तस्मात् , मै१. अ - ' न कश्चित् ' नास्ति ।

---

१९. शृ१ - त्रिषु° । २०. म - वृत्ति° । ★- अत्र विस्रम्भशब्दः विश्वासवचनः ' समौ विस्रम्भविश्वासौ इति अमरोक्तेः । " स्रम्भु विश्वासे " (धापा ७५८) इति धातुपाठः । २१. हा - अनन्तर° ।

तेषा॑मेकाष्ट॒काया॑ क्र॒यः सं प॑द्यते॒ तेनै॑काष्ट॒कां न छ॒म्बट्कु॒र्वन्ति॒ तेषां॑(२) पूर्वप॒क्षे सु॒त्या सं प॑द्यते पूर्वप॒क्षं मासा॑ अ॒भि सं प॑द्यन्ते॒ ते पू॑र्वप॒क्ष उत्ति॑ष्ठन्ति॒

तेषा॑म् । ए॒का॒ष्ट॒का॒यामित्ये॑क-अ॒ष्ट॒काया॑म् । क्र॒यः । समिति॑ । प॒द्य॒ते॒ । तेन॑ । ए॒का॒ष्ट॒कामित्ये॑क-अ॒ष्ट॒काम् । न । छ॒म्बट् । कु॒र्वन्ति॒ । तेषा॑म् (२) । पू॒र्व॒प॒क्ष इति॑ पूर्व-प॒क्षे । सु॒त्या । समिति॑ । प॒द्य॒ते॒ । पू॒र्व॒प॒क्षमिति॑ पूर्व-प॒क्षम् । मासा॑ः । अ॒भि । समिति॑ । प॒द्य॒न्ते॒ । ते । पू॒र्व॒प॒क्ष इति॑ पूर्व-प॒क्षे । उदिति॑ । ति॒ष्ठ॒न्ति॒ ।

अधुना प्रथममेव पक्षं परिगृह्य [४९]आह - 'चतुरहे' इत्यादि ॥ माघ्याः Vपौर्णमास्याः Vपुरस्तात् Vचतुरहे दीक्षमाणानामेकस्तावदयं गुणः । Vएकाष्टकायां [५०]त्वच्छम्बट्कारः । [५१]किञ्च तेषां Vपूर्वपक्षे Vसुत्या Vसंपद्यते । " संज्ञायां समज° " (पा ३.३.९९) इति, '[५२]क्यप् उदात्तः' इति हि तत्रानुवर्तयन्ति । सर्वेऽपि Vमासाः Vपूर्वपक्षम् Vअभिसंपद्यन्ते । Vपूर्वपक्षे एवारभ्यन्ते । पूर्वपक्ष एव च [५३]संतिष्ठन्ते । ते च यजमानाः पूर्वपक्ष एव Vउत्तिष्ठन्ति । Vतान् च Vउत्तिष्ठतः सत्रिणः Vओषधयः Vवनस्पतयः [५४]च Vअनूत्तिष्ठन्ति समृद्धा जायन्ते । [५५-] ततः Vतान् [-५५]

---

[२२]Vएकाष्टकायां सोमक्रयः Vसंपद्यते । तथा सत्येकाष्टकाया अप्युपयुक्तत्वात् संवत्सरपत्नीत्वेन मुख्यामेतां Vन Vछम्बट्कुर्वन्ति निष्प्रयोजनां न कुर्वन्ति । ततः [२३]संवत्सरपत्न्याः सत्कार एको गुणः ॥

तेषामिति ॥ अथ गुणान्तरं दर्शयति - 'तेषां पूर्वपक्षे सुत्या संपद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान् कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति ' इति ॥ Vतेषाम् एकाष्टकायां क्रयमनुतिष्ठतां यजमानानां तद्दिनमारभ्यानुष्ठीयमाना उपसदः [२४]चैत्रशुक्लचतुर्थ्यां संपद्यन्ते । तत उत्तरदिने क्रियमाणा Vसुत्या शुक्लपक्ष एवोपक्रान्ता भवति । तत आरभ्य सर्वेऽपि Vमासाः शुक्लपक्षमेवाभिलक्ष्य समाप्यन्ते । तेषु समाप्तेषु [२५]Vते सत्रिणोऽपि Vपूर्वपक्षे एव सत्रादुत्तिष्ठन्ति । Vउत्तिष्ठतः Vतान् [२६]यजमानाननु भूम्याम् Vओषधयः Vवनस्पतयः च सत्कर्मानुष्ठानसामर्थ्यादुद्भवं गच्छन्ति । तदुद्भवे सति Vतान् यजमानान् अनु पुण्यकीर्तिः Vउत्तिष्ठति ।

---

४९. मैर - 'आह' नास्ति । ५०. मैर - छम्बट्कारः । ५१. मैर - 'किञ्च' नास्ति । ५२. मै. मै१. मै३. अ. अ१ - क्विपि । ५३. मैर - संवर्तन्ते । ५४. मै. मै१. मै३. अ. अ१ - 'च' नास्ति । ५५-५५. मै१ - तस्मात् ।

---

२२. पा - एकायाम् । २३. शृ१ - संवत्सरपक्षत्वात् । २४. उ. म - फाल्गुनशुद्ध° । २५. मै - 'ते' नास्ति । २६. मै - यजमानोऽनु ।

तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान् कल्याणी
कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति
तदनु सर्वे राध्नुवन्ति ॥८॥

(एतच्छम्बट्कुर्वन्ति तेषां चतुस्त्रिँशच्च ।)

तान् । उत्तिष्ठत इत्युत्-तिष्ठत । ओषधयः । वनस्पतयः । अनु । उदिति । तिष्ठन्ति । तान् । कल्याणी । कीर्तिः । अनु । उदिति । तिष्ठति । अरात्सुः । इमे । यजमानाः । इति । तत् । अन्विति । सर्वे । राध्नुवन्ति ॥८॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

सत्रिणः [V]कल्याणी [V]कीर्तिः पुण्या समृद्धिः [V]अनूत्तिष्ठति । अधुना तस्याः कीर्तेः स्वरूपं दर्शयति - ' अरात्सुः ' इति । [५६]अहो बुद्धिमन्तः [५७]सम्पन्ना [V]इमे [V]यजमानाः इति । [५८][V]तदनु तत्समृद्ध्या [V]सर्वे अपि स्थावरजङ्गमा [V]राध्नुवन्ति [५९]पुष्ट्यादिद्वारेण समृद्धा भवन्तीति ॥

॥ इति सप्तमे चतुर्थे अष्टमोऽनुवाकः ॥

कीदृशी कीर्तिरिति सोच्यते - [V]इमे यजमानाः [V]अरात्सुः समृद्धिं गता इत्येतादृशी [V]कीर्तिः । [२७]सत्कीर्त्युत्थानमनु [V]सर्वे प्राणिनः समृद्धा भवन्ति । एतदीयेन सत्कर्मानुष्ठानेन भूमौ सर्वसस्याभिवर्धनात् । तस्मादीदृशं गुणसंघमवेक्ष्य माघशुक्लैकादश्यां दीक्षेत्ययमेव मुख्यः पक्षः ॥

अत्र मीमांसा ।

षष्ठाध्यायस्य [२८]पञ्चमपादे चिन्तितम् -

" गवामयन उक्ता तु या काचित् [२९]पूर्णिमाऽथवा ।
चैत्री माघ्युत काचित् स्यादविशेषात् प्रशंसया ॥
चैत्री स्यात् क्रय एकाष्टकायामित्युपवर्णितम् ।
माघकृष्णाष्टमीत्वेकाष्टकाऽतो माघपूर्णिमा " ॥ (जैन्या ६.५.१३-१४)

५६. मै२ - अरात्सु । ५७. मै२ - संपद्यन्ताम् । ५८. मै. मै१. मै३. अ. अ१ - तदनु च । ५९. मै१ - वृष्ट्यादि° ।

२७. अ. आ. क - तत्कीर्त्युत्थानम् , शृ१. मै - तत्कान्त्युत्थानम् । २८. आ. क - °पादे दशमाधिकरणे । २९. अ. पा. इ. वा. उ - पूर्णिमा मता ।

गवामयने श्रूयते - " चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयः संपद्यते " (तैसं ७.४.८) इति ॥ पौर्णमास्याः पूर्वस्मिंश्चतुरहे दीक्षेरन्नेकादश्यां दीक्षामारभेत । तथा सति पौर्णमास्या उपरितने सप्तमे दिने द्वादश दीक्षाः पूर्यन्ते । [३०]तत उपरितन्यामष्टम्यां सोमक्रय इत्यर्थः । [३१]तत्र विशेषस्य [३२]अनुक्तत्वात् या काचित् [३३]पूर्णिमेत्येकः पक्षः । " चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यच्चित्रापूर्णमासः " (तैसं ७.४.८) इति । [३४]प्रशस्यमानतया चैत्री पौर्णमासीति द्वितीयः [३५]पक्षः । [३६-] याज्ञिक समाख्यया माघकृष्णाष्टम्येकाष्टका । तत्र सोमक्रयसंपत्तये [-३६] माघ्याः पौर्णमास्याः पूर्वस्यामेकादश्यां दीक्षाऽरब्धव्या ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टमोनुवाकः ॥

~~~~~~~~~~~~

३०. शृ१ - तत्र । ३१. शृ१ - तस्य । ३२. अ. आ. क. पा. हा. इ. वा. वे. उ - अदृष्टत्वात् । ३३. शृ१ - पौर्णिमेत्येकः । ३४. म - प्रशस्यतया । ३५. पा. म. मै - पूर्वपक्षः । ३६-३६. शृ१ - याज्ञिकस्य माघकृष्णाष्टम्याम् एकाष्टकत्वात्तत्र सोमक्रयसंपत्तेः, मै - याज्ञिकसमाख्यया माघकृष्णाष्टम्यां एकाष्टकत्वात्तत्र सोमक्रयसंपत्तये ।
~~~~~~~~~~~~

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भिर्द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां माꣳसं द्वाभ्यामस्थि द्वाभ्यां

~~~~~~~~~~~~~~~~~~~~~~

सुवर्गमिति सुवः-गम् । वै । एते । लोकम् । यन्ति । ये । सत्रम् । उपयन्तीत्युप-यन्ति । अभीति । इन्धते । एव । दीक्षाभिः । आत्मानम् । श्रपयन्ते । उपसद्भिरित्युपसत्-भिः । द्वाभ्याम् । लोम । अवेति । द्यन्ति । द्वाभ्याम् । त्वचम् । द्वाभ्याम् । असृत् । द्वाभ्याम् । माꣳसम् । द्वाभ्याम् । अस्थि । द्वाभ्याम् ।

~~~~~~~~~~~~~~~~~~~~~~

अष्टमे संवत्सरसत्रस्य दीक्षाकाल उक्तः । अथ नवमे दीक्षा उपसदश्चोच्यन्ते ॥

सुवर्गमिति ॥ ता उभयीर्विधत्ते - 'सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भिः' इति ॥ [1]सत्रानुष्ठायिनः स्वर्गं गच्छन्ति । अतस्तद्योग्यतायै [2]दीक्षाभिरात्मानं स्वदेहम् [V]अभीन्धते [V]एव सर्वतो ज्वलयन्त्येव । [V]उपसद्भिः [V]तु [V]श्रपयन्ते स्वदेहं पचन्ति । तस्माद्दीक्षा उपसदश्चानुष्ठेया इति विध्युन्नयः । [3]यद्यपि द्वादशाहविकृतित्वेन प्राप्तास्तथाऽपि विकृतिलिङ्गत्वाय स्तुतये वा तदनुवादोऽस्तु ॥

द्वाभ्यामिति ॥ अथ विभज्य प्रशंसां [4]कुर्वन्नासामुभयविधानां द्वादशत्वं प्रकटयति - 'द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां माꣳसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति' इति ॥ [V]द्वाभ्यां दिनद्वयानुष्ठेयाभ्यां दीक्षाभ्यामुपसद्भ्यां

~~~~~~~~~~~~~~~~~~~~~~

एतस्मिन् नवमानुवाके भट्टभास्करीयभाष्यस्य क्वापि कोशे अनुपलम्भादस्माभिः केवलं सायणीयमेवात्र योजितम् ।

~~~~~~~~~~~~~~~~~~~~~~

१. शृ१. म - अनुष्ठायिनः, मै - यत्रानुष्ठायिनः । २. अ. आ. क. पा. हा. इ. वा. वै. उ - स्वदीक्षाभिः । ३. शृ१. अ. पा. इ. वा. वै. मै - यदि । ४. अ. आ. क. पा. हा. इ. वा. वै. म. उ - कुर्वंस्तासाम् ।

मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाꣳसः सुवर्गं लोकमयामेति (१) ॥९॥

(सुवर्गं पञ्चाशत् ।)

~~~~~~~~~~~~~~~~~~~~~~

मज्जानम् । आत्मदक्षिणमित्यात्म-दक्षिणम् । वै । सत्रम् । आत्मानम् । एव । दक्षिणाम् । नीत्वा । सुवर्गमिति सुवः-गम् । लोकम् । यन्ति । शिखाम् । अनु । प्रेति । वपन्ते । ऋद्ध्यै । अथो इति । रघीयाꣳसः । सुवर्गमिति सुवः-गम् । लोकम् । अयाम । इति (१) ॥९॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

~~~~~~~~~~~~~~~~~~~~~~

च स्वकीयं ᵛलोम हविरर्थम् ᵛअवद्यन्ति । [5] अनन्तरभाविनीभ्यां ᵛद्वाभ्यां ᵛत्वचम् अवद्यन्ति [5] । एवं रक्तमांसास्थिमज्जसु योजनीयम् । [6]ᵛयदेतत् ᵛसत्रं [7]तदिदम् ᵛआत्मदक्षिणं ᵛवै स्वशरीरमेव तत्र दक्षिणा न त्वन्या गवादिरूपाऽस्ति । तस्मात् स्वशरीरमेव दक्षिणारूपेण ᵛनीत्वा स्वर्गं प्राप्नुवन्ति ॥

शिखामिति ॥ यदुक्तं सूत्रकारेण - " सत्रं चेद्वपनकाले [8]'सशिखानि वपन्ते " (आपश्रौ २१.१३.४) इति तदेतद्विधत्ते - ' शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाꣳसः सुवर्गं लोकमयामेति ' इति ॥ ᵛशिखाम् [9]अनुलक्ष्य प्रकर्षेण वपनं कुर्युः । [10]तच्च मृतत्वग्रूपाणां केशानामपगमात् समृद्ध्यै भवति । अपि च केशभाररहिता ᵛरघीयांसः लघुतराः सन्तः स्वर्गं प्राप्नुयामेत्यभिप्रायेण सशिखं वपनं कुर्युः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~~~

५-५. शृ१ - ' अनन्तर° - - - - °वद्यन्ति ' नास्ति । ६. म - यदि तत् । ७. अ. आ. क. पा. हा. इ. वा. वै. म. मै - तदेतत् । ८. शृ१ - अशिखानि । ९. म - अभिलक्ष्य । १०. अ. आ. क. पा. हा. इ. वा. वै. म. उ - तत्र ।
~~~~~~~~~~~~~~~~~~~~~~

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात् तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ

ब्रह्मवादिन इति ब्रह्म-वादिनः । वदन्ति । अतिरात्र इत्यति-रात्रः । परमः । यज्ञक्रतूनामिति यज्ञ-क्रतूनाम् । कस्मात् । तम् । प्रथमम् । उपेति । यन्ति । इति । एतत् । वै । अग्निष्टोममित्यग्नि-स्तोमम् । प्रथमम् । उपेति । यन्ति । अथ । उक्थ्यम् । अथ ।

अतः परमह्नां क्लृप्तिः - ‘ ब्रह्मवादिनः ’ इत्यादि ॥ यज्ञक्रतवः सोमयागाः । [V]अतिरात्रः [1]तेषां [2][V]परमः उत्तमः, अन्त्या संस्था । ननु तस्मात्कारणात् [V]तं [V]प्रथमम् [V]उपयन्ति [V]इति [V]ब्रह्मवादिनः पर्यनुयोगं [V]वदन्ति । अथ समाधत्ते ‘ एतद्वै ’ इत्यादि । यद् [V]एतत् अतिरात्रं [V]प्रथमं प्रायणीयम् [V]उपयन्ति [V]एतत् खल्वग्निष्टोमादीन् चतुरः [V]यज्ञक्रतून् संवत्सरस्य [3]मुखे [4][V]अनुपूर्वम् अनुक्रमेण [V]उपेत्य [V]तान् [V]आलभ्य पृथक्पृथगारभ्य [5][V]परिगृह्य समाप्यते [V]सोमं

नवमे दीक्षा उपसदश्चोक्ताः । अथ दशमे प्रायणीयाख्यं प्रथममहरुच्यते ॥

ब्रह्मवादिन इति ॥ तदेतद्विधत्ते - ‘ ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात् तं प्रथममुपयन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत् पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युङ्क्ते ’ इति ॥ योऽयमतिरात्राख्यः क्रतुः सोऽयं [V]यज्ञक्रतूनां [V]परमः, सोमयागरूपाः ये क्रतवस्तेषां मध्ये चरमः । अग्निष्टोम उक्थ्यः षोडश्यतिरात्र इत्येतस्य [1]तदीयक्रमगताग्निष्टोमस्य च प्राथम्यम् । “ प्रजननं ज्योतिः ” (तैसं ७.१.१) इत्यनुवाके “ तस्मादाहुर्ज्येष्ठयज्ञः ” (तैसं ७.१.१) इत्याम्नातम् । एवं सत्यग्निष्टोमं परित्यज्य चरमभाविनमतिरात्रं [V]कस्मात् [V]कारणात् सत्रे [V]प्रथमम् अनुतिष्ठन्तीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा एवमुत्तरमाहुः - नात्राग्निष्टोमः परित्यक्तः । [2]अथाग्निष्टोमोक्थ्यषोडश्यतिरात्राणामुत्तरोत्तरस्य [3]पूर्वपूर्वगर्भितत्वात् । [4] द्वादशस्तोत्रमग्निष्टोममन्तर्भाव्य पुनः स्तोत्रत्रयाधिक्येनोक्थ्यः संपद्यते । [5]तमप्यन्तर्भाव्य [6]पुनरेकस्तोत्राधिक्येन षोडशी संपद्यते । [7]तमप्यन्तर्भाव्य पुनस्त्रयोदशस्तोत्राधिक्येना-

---

१. अ - ‘ तेषाम् ’ नास्ति । २. मै१ - प्रथमः । ३. मै२ - मुखेन । ४. मै२ - पूर्वम् । ५. अ - ‘ परिगृह्य ’ नास्ति ।

---

१. अ. आ. क. पा. हा. इ. वा. वै. म. उ - °क्रमत्वादग्नि° । २. आ. क - अत्राग्नि°, मै - ‘ अथ ’ नास्ति । ३. म - पूर्वपूर्वमेव गर्भि° । ४-४. इ - ‘ द्वादशस्तोत्र° - - - - गेयम् ’ नास्ति । ५. अ. आ. क. पा. हा. इ. वा - तमन्तर्भाव्य । ६. म - °स्तोत्राधिक्ये । ७. अ. आ. क. पा. हा. इ. वा - तमन्तर्भाव्य ।

षोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत्पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युञ्जते ते (१) सꣳस्तुता विराजमभि सं पद्यन्ते

षोडशिनम् । अथ । अतिरात्रमित्यति-रात्रम् । अनुपूर्वमित्यनु-पूर्वम् । एव । एतत् । यज्ञक्रतूनिति यज्ञ-क्रतून् । उपेत्येत्युप-इत्य । तान् । आलभ्येत्या-लभ्य । परिगृह्येति परि-गृह्य । सोमम् । एव । एतत् । पिबन्तः । आसते । ज्योतिष्टोममिति ज्योतिः-स्तोमम् । प्रथमम् । उपेति । यन्ति । ज्योतिष्टोम इति ज्योतिः-स्तोमः । वै । स्तोमानाम् । मुखम् । मुखतः । एव । स्तोमान् । प्रेति । युञ्जते । ते (१) । सꣳस्तुता इति सं-स्तुताः । विराजमिति वि-राजम् । अभि । समिति । पद्यन्ते ।

ᵛपिबन्तः संवत्सराय ᵛआसते सत्रिणः । ' ज्योतिष्टोमम् ' इत्यादि । तस्मात्सर्वयज्ञक्रत्वर्थं ᵛज्योतिष्टोमम् ᵛएव अतिरात्रं ᵛप्रथमम् ᵛउपयन्ति । [६-]ᵛज्योतिष्टोमः ᵛस्तोमानां स्तोमवतां[-६] ᵛमुखम् । तस्मात् ᵛमुखतः ᵛएव आरभ्य सर्वान् ᵛस्तोमान् ᵛप्रयुञ्जते ॥

[७]अत्र ज्योतिर्गौरायुरिति [८]त्रितयावृत्तिजन्मा प्रायः सकलः संवत्सरः । तत्र केन [९]विशेषेण [१०]तुल्यप्रभावानां ज्योतिरेव सत्रस्य [११]प्रथमं [१२]युज्यते न गोआयुषी इति पर्यनुयोगावसरे ज्योतिषो

तिरात्रः संपद्यते । अतः सत्रिणोऽतिरात्रमनुतिष्ठन्तीति यदेतद्वा एतस्मिन् [८]स्तोमानुष्ठानेऽग्निष्टोमं प्रथममनुतिष्ठन्ति । [९]अथोक्थ्यषोडश्यतिरात्रान् तदेतत् ᵛअनुपूर्वम् एव अनुक्रमेणैव यज्ञक्रतूनुपेत्यानुष्ठातुं निश्चित्य तान् ᵛक्रतून् उपक्रम्य परितः स्वीकृत्य [१०]तत्र [११-] सर्वत्र ᵛसोमम् [-११] ᵛएव ᵛपिबन्तः सत्रिणः ᵛआसते । तस्मादग्निष्टोमपरित्यागाभावादतिरात्ररूपं ᵛज्योतिष्टोमं प्रथममनुतिष्ठेयुः । स हि ज्योतिष्टोमो ज्योतिर्गौरायुरित्येतन्नामकानां [१२]ᵛस्तोमानां क्रतूनां मुखसदृशः । तस्मात् ᵛमुखतः ᵛएव आरभ्य ᵛस्तोमान् क्रतून् सत्रिणः प्रयुञ्जते ॥

६-६. अ१ - ज्योतिष्टोमानां स्तोमवताम् । ७. अ१ - तत्र । ८. मै१ - त्रितयावृत्तिजः, अ१ - त्रितीयावृत्तिजन्मा । ९. मै. मै१. मै३. अ - विशेषणेन । १०. अ१ - तुल्यप्रभावम् । ११. मै२ - प्रथमं प्रथमम् । १२. मै१. अ - प्रयुञ्जते, मै२ - प्रयुज्यते ।

८. मै. म - एवानुष्ठाने । ९. शृ१ - अथोक्थ्यः षोडशी°, मै - अथोक्थ्यं षोडशी । १०. अ. आ. क. पा. हा. वा. वै - ततः । ११-११. शृ१ - सर्वसोमम् । १२. पा. म - 'स्तोमानाम्' नास्ति ।

द्वे च॒र्चाव॑ति॑ रिच्ये॒ते॒ एक॑या॒ गौरति॑रिक्त॒ एक॒याऽऽयु॑रू॒नः

द्वे इति॑ । च॒ । ऋचौ॑ । अतीति॑ । रि॒च्ये॒ते॒ इति॑ । एक॑या । गौः । अति॑रिक्त॒ इत्यति॑-रि॒क्तः । एक॑या । आयु॑ः । ऊ॒नः ।

गुणविशेषवत्ताम् [१३]इत्युत्तरयोश्च तदभावं [१४]दर्शयितुमाह - 'ते [१५]सं॒ऽस्तु॒ताः' इत्यादि ॥ [१६]Vते [१७]अनन्तरोक्ता ज्योतिरादयः त्रयः [१८]Vसंस्तुताः Vविराजम् Vअभिसंपद्यन्ते, विराट् दशाक्षरा, [१९]तत्संपत्त्या संपद्यन्ते[१९], दशकाः संपूर्णा [२०] एव भवन्ति [२०] । ज्योतिरतिरात्रस्य [२१]सप्तत्यधिकशतत्रयं (?) स्तोत्रीया इति कृत्वा । "नातिरात्रे षोडशिनं गृह्णाति" [२२]इत्यस्मिन् पक्षे इदमुच्यते । [२३]ग्रहणपक्षे तु[२३] "अथ षोडशिनम्" (तैसं ७.४.१०) इति पूर्वोक्तं वेदितव्यम् । [२४]विराट्संपत्तिलक्षणं गुणविशेषं ज्योतिषः[२४] प्रतिपाद्य इदानीं गोआयुषोस्तदभावं [२५]प्रतिपादयति - 'द्वे च' इति । Vद्वे Vऋचौ Vअतिरिच्येते अतिक्रम्य वर्तेते । [२६]विराट्संपत्तिविघातोऽतिक्रमः । किं ज्योतिष्येव नैवं भवितुमर्हतीति, न ह्येकत्र सम्भवतीति विराजमभिसंपद्यन्ते । 'द्वे चर्चावतिरिच्यते' इति । तस्मात् सामर्थ्यात् गोआयुषोरिति वेदितव्यम् । यद्वा - [२७]द्वे गोआयुषी ऋचावतिरिच्येते [२८]इति गोआयुषोर्व्यतिरेकः कथ्यते । तमेवातिरेकं दर्शयति 'एकया' इत्यादि । [२९]Vगौः Vएकया ऋचा Vअतिरिक्तः[२९] विराजम्

त इति ॥ गोष्टोमायुष्टोमाभ्यां पूर्वभावित्वं ज्योतिष्टोमस्य प्रकारान्तरेण पुनः प्रशंसति - 'ये सऽस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराट्सुवर्गमेव तेन लोकं यन्ति' इति ॥ ज्योतिष्टोमे स्तोत्रगताः Vये ऋग्विशेषाः सन्ति ते संस्तुताः सन्तो विराजं दशसंख्यामेव [१३]प्राप्नुवन्ति न तु न्यूना नाप्यधिका । इतरयोस्तु [१४]गोष्टोमायुष्टोमयोः

१३. मै. मै१. मै३. अ. अ१ - इतरयोश्च । १४. मै१. मै२ - प्रदर्शयितुम् । १५. मै१. अ. अ१ - संस्कृताः । १६. मै२ - 'ते' नास्ति । १७. मै२ - अन्तरोक्ता । १८. मै१ - संस्कृताः । १९-१९. मै२ - तस्मात् संपद्यते । २०-२०. मै१ - एवं विभवन्ति । २१. अ१ - सप्तत्यधिकं शतद्वयम् (?), मै२ - सप्तम्यधिक° । २२. मै२ - इति । २३-२३. मै१. अ - °पक्षेऽपि वा । २४-२४. अ१ - विराट् तेन सुवर्गं लोकं यन्ति । २५. मै. मै१. मै३. अ. अ१ - प्रदर्शयति । २६. मै१ - विराट्संपत्तिविरहतोऽतिक्रमः । २७. मै१. अ - 'द्वे' नास्ति । २८. मै१. मै२ - 'इति' नास्ति । २९-२९. मै१. मै२ - गौरेकयार्चा अतिरिक्तम्, अ - गौरेकः यद्वातिरिक्तम् ।

१३. हा - तदाप्नुवन्ति । १४. वा - गोष्टोमयोः, मै - गौरायुः ।

सुवर्गो वै लोको ज्योतिरूर्ग्विराट्त्सुवर्गमेव तेन लोकं यन्ति

सुवर्ग इति सुवः-गः । वै । लोकः । ज्योतिः । ऊर्क् । विराडिति वि-राट् । सुवर्गमिति सुवः-गम् । एव । तेन । लोकम् । यन्ति ।

अतिक्रम्य वर्तते । [V]आयुः [V]एकया [३०-] विराजः [V]ऊनः [-३०] वर्तते । [३१-] दर्शितौ चैतयोरूनातिरेकावाचार्येण [-३१] - " गौः [३२]नु [३३-] खलु पञ्चदशो [-३३] बहिष्पवमानः [३४]त्रिवृन्त्याज्यानि [३५]सर्वसप्तदशं माध्यन्दिनं [३६]सवनं सर्वैकविंशं तृतीयसवनं सोक्थ्यम्" (बौश्रौ २६.१६) इति । एवमेकचत्वारिंशदधिकं शतद्वयं [३७-] गोः स्तोत्रीयाः [-३७] । [३८-]"अथागोस्त्रिवृत् बहिष्पवमानं [-३८] पञ्चदशाज्यानि [३९]सर्वसप्तदशं माध्यन्दिनं [४०]सवनं सर्वैकविंशं तृतीयसवनं [४१-] सोक्थ्यमिति" (बौश्रौ २६.१६) । एवमनयोरेकोनषष्ट्यधिकं [-४१] शतद्वयम् इति । [४२]तस्मादनयोरप्राथम्यं विराजभिसंपत्त्या ज्योतिष एव प्राथम्यमिति ॥

पुनरपि ज्योतिरेव स्तूयते - 'सुवर्गो वै' [४३]इत्यादिकम् ॥ [४४]किं बहुना [V]सुवर्गः एव

[V]द्वे [V]ऋचौ [V]अतिरिच्येते दशसंख्यां न प्राप्नुतः । तत्कथमिति तदुच्यते - [V]एकया ऋचा गोष्टोमो दशसंख्याया [V]अतिरिक्तः, आयुष्टोमः [V]एकया न्यूनः । तस्माद्विराड्रूपत्वं ज्योतिष्टोमस्य [१५-] प्राशस्त्ये हेतुः [-१५] । किं च भासकत्वात् [V]ज्योतिष्टोमः स्वर्गलोकात्मको विराड्रूपः । तस्मादुभयथा प्रशस्तेन तेन ज्योतिष्टोमेन स्वर्गं लोकं प्राप्नुवन्ति ॥

३०-३०. अ. अ१ - विराजमानः । ३१-३१. मै२ - दर्शनावेति तयोरूनातिरेक° । ३२. [सूत्रमवलम्ब्य प्रपूरितोऽयमंशोऽस्माभिः, मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'नु' इत्ययमंशो नोपलभ्यते ।] । ३३-३३. अ१ - एकविंशः । ३४. मै१. मै२ - त्रिवृत्त्याज्यानि, अ१ - त्रिवृदाज्यानि । ३५. [बौश्रौसूत्रमवलम्ब्य संशोधितोऽयं पाठोऽस्माभिर्द्रष्टव्यः, मै मुद्रितपुस्तके सर्वेष्वपि लिखितपुस्तकेषु च 'सप्तदशम्' इति पाठो लभ्यते ।] । ३६. मै२ - 'सवनम्' नास्ति । ३७-३७. अ१ - गोस्तु स्तोत्रीयाः, अ१ - गोस्तु स्तोत्रीयात् । ३८-३८. [बौश्रौसूत्रमवलम्ब्य संशोधितोऽयं पाठः ।] , मै१ - अथानयोस्त्रिवृत् , मै. मै२. मै३ - अथान्यस्त्रिवृत् बहिष्प°, अ - अथ तयोस्त्रिवृत् बहिष्प°, अ१ - 'अथ - - - - °मानम्' नास्ति । ३९. मै२ - सप्तदशम् । ४०. मै. मै१. मै३. अ. अ१ - 'सवनम्' नास्ति । ४१-४१. मै२ - मैकथ्यामिति एतस्मात् एतेन । ४२. मै. मै१. मै३. अ. अ१ - °प्राधान्यम् । ४३. मै. मै१. मै३. अ. अ१ -इत्यादि गतम् । ४४. अ१. मै२ - 'किम्' नास्ति ।

१५-१५. मै - प्राशस्त्यहेतुः ।

रथन्तरं दिवा भवति रथन्तरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं बृहत्

रथन्तरमिति रथं-तरम् । दिवा । भवति । रथन्तरमिति रथं-तरम् । नक्तम् । इति । आहुः । ब्रह्मवादिन इति ब्रह्म-वादिनः । केन । तत् । अजामि । इति । सौभरम् । तृतीयसवन इति तृतीय-सवने । ब्रह्मसाममिति ब्रह्म-सामम् । बृहत् ॥

[V]लोकः [V]ज्योतिः । तत्साधनत्वात्ताच्छब्द्यम् । [V]उर्क् अन्नं [V]विराट् । तां चाभिसंपद्यते ज्योतिः तस्मात् [४५]तेन ज्योतिषा स्वर्गमेव गच्छन्ति । अन्नस्य [४६]स्वर्गपर्यायत्वात् [४७]पृथगुपादानम् ॥

'रथन्तरम्' इत्यादि ॥ अतिरात्रे [४८]दिवासवने [V]रथन्तरम् एव [४९]प्रवर्तते । नक्तमपि [V]रथन्तरम् एव [५०][V]भवति प्रवर्तते । [५१]त्रिवृद्रथन्तरसन्धिरिति [५२]सन्ध्यभिप्रायम् । [५३-] एवमस्य रथन्तरैकसामताम् [-५३] [५४]पश्यन्तः [V]ब्रह्मवादिनः [V]आहुः, [५५][V]केन [५६-][V]तत् [V]अजामित्वम् [-५६] आलस्यभावः केन [५७-][V]तत् [V]अजामि [-५७] इति । तत्रोत्तरं [५८]ब्रूयात् - 'सौभरम्' इत्यादि ।

रथन्तरमिति ॥ अथास्मिन्नतिरात्रसंस्थे ज्योतिष्टोमे सामविशेषं विधत्ते - 'रथंन्तरं दिवा भवति रथन्तरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं बृहत् तन्मध्यतो दधति विधृत्यै तेनाजामि' इति ॥ [V]दिवा पृष्ठस्तोत्रं रथन्तरं गीयते, [V]नक्तम् [१६]अपि रात्रिपर्यायेषु [V]रथन्तरं गीयते [१७]तदानीमालस्यं भवति । [१८]तादृशालस्यपरिहारः [V]केन अन्येन साम्ना भवतीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा

---

४५. मै१ - केन । ४६. मै२ - स्वपर्यायत्वात्° । ४७. मै२ - पृथगनुपदानम् । ४८. मै. मै२. मै३ - दिवासवनेषु, मै१. अ - दिवावसाने । ४९. मै. मै१. मै२. मै३. अ - साम भवति । ५०. मै. मै१. मै३. अ. अ१ - 'भवति' नास्ति । ५१. मै२. अ१ - त्रिवृद्राथन्तर° । ५२. मै. मै१. मै२. मै३. अ - च सन्ध्यभि°, अ१ - °भिप्रायेण । ५३-५३. अ१ - रथन्तरे सामतां । ५४. मै. मै१. मै३. अ - अपश्यन्तः । ५५. मै२ - तेन । ५६-५६. मै२ - तदजामि स्यादजामित्वम्, अ. अ१ - तदजामि अजामित्वम् । ५७-५७. मै. मै१. मै२. मै३. अ - तत्र संपद्यते । ५८. मै२ - ब्रूते ।

---

१६. क - अधि, अ - इति । १७. शृ१ - तत्तदानीम् । १८. शृ१. म - अजाम्यालस्यपरिहारः, हा - सनातीयनाभ्यालस्य°, वा - काम्यालस्य°, मै - अज्ञाभ्यालस्य° ।

तन्मध्यतो दधति विधृत्यै तेनाजामि ॥१०॥

(त एकान्न पञ्चाशच्च ।)

तत् । मध्यतः । दधति । विधृत्या इति वि-धृत्यै । तेन । अजामि ॥१०॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

Vतृतीयसवने [५९]उक्थ्यपर्याये [६०]सौभरं नाम [६१-] ब्रह्मणः सामास्ति [-६१] । "अनसन्तान्नपुंसकात्" (पा ५.४.१०३) इति अच् समासान्तः । Vबृहत् बृहता गेयः Vतत् Vमध्यतः [६२-] मध्यमे उक्थ्ये विदधाति [-६२] Vविधृत्यै विधारणार्थम् उक्थ्यानाम् । 'तेन' इत्यादि । [६३-]Vतेन इत्थं [-६३] क्रियमाणेन [६४]Vअजामि अजामित्वमपि सम्पद्यते इति ॥

॥ इति सप्तमे चतुर्थे [६५]दशमोऽनुवाकः ॥

उत्तरमाहुः - सौभराख्यं यदन्यत् सामास्ति तत् Vतृतीयसवने ब्रह्मसामत्वेन [१९]गेयम् [-१९] । [२०]तच्च Vबृहत् प्रौढं तदेतद्बृहद्रथन्तरयोरुभयोर्मध्ये स्थापयन्ति । तच्च यज्ञस्य धृत्यै संपद्यते । तेन [२१]विजातीयसाम्नाऽऽलस्यपरिहारो [२२]भवति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः ॥

---

५९. मै२ - उक्थ्यपर्यायम् । ६०. मै. मै१. मै३. अ. अ१ - सौभरः । ६१-६१. मै१ - ब्राह्मणसामास्ति, मै२ - ब्राह्मणः समाप्तिम् । ६२-६२. मै२ - उक्थ्ये दधाति, अ - मध्यमे उक्थ्ये दधाति विदधाति, अ१ - मध्ये दधाति । ६३-६३. मै२ - तेनान्यर्थम् । ६४. मै२ - 'अजामि' नास्ति । ६५. मै१ - दशमः ।

---

१९. मै - ज्ञेयम् । २०. शृ१ - तत्र । २१. मै - °साम्नालक्ष्य° । २२. शृ१ - भविष्यति ।

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्

ज्योतिष्टोममिति ज्योतिः-स्तोमम् । प्रथमम् । उपेति । यन्ति । अस्मिन् । एव । तेन । लोके । प्रतीति । तिष्ठन्ति । गोष्टोममिति गो-स्तोमम् । द्वितीयम् । उपेति । यन्ति । अन्तरिक्षे । एव । तेन । प्रतीति । तिष्ठन्ति । आयुष्टोममित्यायुः-स्तोमम् । तृतीयम् । उपेति । यन्ति । अमुष्मिन् । एव । तेन । लोके । प्रतीति । तिष्ठन्ति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । यत् । एतान् ।

---

[1]सम्प्रति [2]अभिप्लवषडहो विधीयते - 'ज्योतिष्टोमम्' इत्यादि । गतम् । अत्र ज्योतिष्टोम अग्निष्टोमः वेदितव्यः । 'अग्निष्टोमावभितः' इति । गवायुःशब्दयोः स्तोमविशेषस्वभाववृत्तित्वात् [3]बहुव्रीहिद्वयम् ॥

'इयं [4-] वाव' इत्यादि [-4] ॥ प्राथम्यादिना ताच्छब्द्यं स्तुतिर्वा [5]तद्गुणप्रापणार्था । [6]'यदेतान्' इत्यादि । विशिष्टस्तोमकान् [V]एतान् क्रतूनित्यर्थः । 'एषु' इति । पृथिव्यादिषु । 'ते [7]सं[V]स्तुताः' इत्यादि । [8]अग्निष्टोमो ज्योतिश्च गौश्चायुश्चेत्येते त्रयोऽपि सह स्तुताः [V]विराजम् [9][V]अभिसम्पद्यन्ते । [10]नवाधिकं षट्छतं स्तोत्रीया इति । न ह्येषामन्यतमः कश्चित् त्रिकस्य

दशमे प्रायणीयमहरुक्तम् । अथैकादशे मासगतानि [1]अहानि उच्यन्ते ॥

ज्योतिष्टोममिति ॥ तत्रादौ तावत् त्रीण्यहानि विधत्ते - 'ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुपयन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति' इति ॥ ज्योतिष्टोमगोष्टोमायुष्टोमा एकाहविशेषाः । एतैरेव [2]अनुलोमप्रतिलोमगतैः [3-] इति पूर्वः [-3]

---

१. मै२ - सर्वप्रति । २. अ - अग्निष्टोमहोमः । ३. अ१ - 'बहुव्रीहिद्वयम्' नास्ति । ४-४. मै१. अ - वेत्यादि । ५. मै२ - तत्र गुणप्रा° । ६. अ - यद्देवता । ७. मै१ - संस्कृता । ८. अ१ - 'अग्निष्टोमः' नास्ति । ९. मै१ - °संपद्यते । १०. अ - नवत्यधिकम् ।

---

१. अ. आ. क. पा. हा. इ. वा. वै. उ - 'अहानि' नास्ति । २. वा - अनुलोमगतैः, म - °प्रतिलोमगतैः । ३. अ. क. पा. हा. इ. वा. म. वै - अभिप्लवः ।

स्तोमा॑नुप॒यन्त्ये॒ष्वे॑व त॒ल्लो॒केषु॑ स॒त्रिणः॑ प्रति॒ति॒ष्ठ॑न्तो यन्ति॒ ते सꣳस्तु॑ता वि॒राज॑(१) म॒भि सं प॑द्यन्ते॒ द्वे च॒र्चाव॑ति॑ रिच्ये॒ते॒ एक॑या गौरति॑रिक्त॒ ए॒क॒याऽऽयु॑रू॒नः

स्तोमा॑न् । उ॒प॒य॒न्तीत्यु॑प-यन्ति॑ । ए॒षु । ए॒व । तत् । लो॒केषु॑ । स॒त्रिणः॑ । प्र॒ति॒ति॒ष्ठ॑न्त॒ इति॑ प्रति-ति॒ष्ठ॑न्तः । य॒न्ति॒ । ते । सꣳस्तु॑ता॒ इति॒ सं-स्तु॒ता॒ः । वि॒राज॒मिति॑ वि-राज॑म् (१) । अ॒भि । सिमिति॑ । प॒द्य॒न्ते॒ । द्वे इति॑ । च॒ । ऋ॒चौ॑ । अ॒तीति॑ । रि॒च्ये॒ते॒ इति॑ । एक॑या । गौः । अति॑रिक्त॒ इत्यति॑ रि॒क्त॒ः । एक॑या । आयुः॑ । ऊ॒नः ।

[11]प्रथमोऽस्त्वित्याशङ्क्य ज्योतिष [12-] एव गुणवत्वात् [-12] प्राथम्यमितरयोश्च तदभावात् तदभावं च दर्शयति –– 'द्वे' इत्यादि । व्याख्यातम् (तैसं ७.४.१०) । ज्योतिषश्च स्वर्गस्थानीयत्वात् विराडभिसम्पत्त्या [13]च प्राथम्यमिति [14]नवतिशतस्तोत्रीयोऽग्निष्टोमः [15-] इत्युक्तम् । अत्र [-15] समुदायस्यापि विराट्संपत्त्या [16-] तस्य प्राधान्यमिति [-16] [17]ऊर्जमेवावरुन्धते' इत्युक्तम् । ततः Vते यजमानाः प्रथममेव [18]विराड्भावेन Vक्षुधा Vआर्तिम् [19-]Vन Vआर्च्छन्ति [-19] [20-] न गच्छन्ति [-20] । [21]' गोपोषं पुष्णाति ' इतिवत् [22]सामान्यविशेषभावादपौनरुक्त्यम् । किञ्च

षडहः संपद्यते । तस्मिन् षडहे पूर्वभागवर्तिनोऽनुलोमगता एतेऽनुष्ठेयाः । क्रमेणैतैर्लोकत्रये प्रतिष्ठा भवति । ज्योतिरादीनां भूरादिरूपत्वादेतेषां त्रयाणामनुष्ठानेन सत्रिणो लोकत्रये प्रतिष्ठिताः सुखेन व्यवहरन्ति । पूर्वस्मिन्ननुवाके प्रथमदिनेऽनुष्ठेयः [4]प्रायणीयाख्योऽतिरात्ररूपो ज्योतिष्टोमो विहितः । इह तु तृतीयदिनेऽनुष्ठेयोऽग्निष्टोमात्मको ज्योतिष्टोम इति विशेषः ॥

त इति ॥ तस्यैतस्याग्निष्टोमरूपस्य ज्योतिष्टोमस्य प्राथम्यं पूर्वोक्तातिरात्रवत् प्रशंसति - ' ते सꣳस्तुता विराजमभि संपद्यन्ते द्वे चर्चावतिरिच्येते एकया गौरतिरिक्तः एकयाऽऽयुरूनः सुवर्गो वै लोको

११. मै. मै२. मै३. अ. अ१ - °मोस्तीत्या°, अ१ - °त्याशङ्क्य परिहरति । १२-१२. अ१ - ' एव गुणत्वात् ' नास्ति । १३. मै२ - ' च ' नास्ति । १४. मै१ - त्रिणवतिशत° । १५-१५. अ१ - ' इत्युक्तम् अत्र ' नास्ति । १६-१६. मै१ - तस्याप्राधान्य° । १७. मै१ - °रुन्धे । १८. मै२ - विराट् तेन । १९-१९. मै२ - ' न आर्च्छन्ति ' नास्ति । २०-२०. मै१. अ. अ१ - ' न गच्छन्ति ' नास्ति । २१. अ - गोपवेषम् । २२. मै२ - °विशेषभावमपौन° ।

४. मै - प्रायणीयस्यातिरात्ररूपः ।

सुवर्गो वै लोको ज्योतिरूग्विराड्र्जमेवाव रुन्धते ते न क्षुधाऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधा इव हि सत्रिणोऽऽग्निष्टोमावभितः प्रधी तावुक्थ्यां मध्ये नभ्यं

सुवर्ग इति सुवः-गः । वै । लोकः । ज्योतिः । ऊर्क् । विराडिति वि-राट् । ऊर्जम् । एव । अवेति । रुन्धते । ते । न । क्षुधा । आर्तिम् । एति । ऋच्छन्ति । अक्षोधुकाः । भवन्ति । क्षुत्संबाधा इति क्षुत्-संबाधाः । इव । हि । सत्रिणः । अग्निष्टोमावित्यग्नि-स्तोमौ । अभितः । प्रधी इति प्र-धी । तौ । उक्थ्याः । मध्ये । नभ्यम् ।

[V]अक्षोधुकाः [२३]अक्षुच्छीलाः एव [V]भवन्ति सत्रिणः । छान्दस उकञ् । कस्मादेवमुच्यत इत्याह - 'क्षुत्संबाधाः '[२४]इत्यादि । [२५-] क्षुधा संबाध्यन्ते इति [-२५] [V]क्षुत्संबाधाः । दासीभारादिः (गणपाठ २११, पा ६.२.४९) । यद्वा [२६]क्षुन्निमित्तं संबाधा एषामिति बहुव्रीहिः । एवं स्वभावा एव [V]सत्रिणः भवन्ति ॥

इदानीं च क्रतुत्वेन षडहं रूपयति - [२७]' अग्निष्टोमावभितः ' इत्यादि ॥ [V]अग्निष्टोमौ [२८]द्वौ [२९][V]अभितः [३०]षडहस्यास्य आदावन्ते च भवतः । ' प्रधी [३१]तौ ' इति । [३२] प्रान्ते धीयेते

ज्योतिरूग्विराडूर्जमेवाव रुन्धते ते न क्षुधाऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधा इव हि सत्रिणः ' इति ॥ [५]ज्योतिष्टोमस्य [६]स्तोत्रियागतसंख्यया [७-] विराट्संपत्तौ विराज ऊर्ग्रूपत्वात् [-७] [V]ते सत्रिणः [V]क्षुधा संपादिताम् [V]आर्तिं [८][V]न प्राप्नुवन्ति । किन्तु [V]अक्षोधुकाः सर्वदा क्षुद्रहिता भवन्ति । [९]सत्रिणाम् अनुष्ठानप्रयासबाहुल्यात् प्रायेण ते [१०]क्षुत्संपादितबाधयुक्ता [११]इव भवन्ति । तस्मात् तेषां क्षुत्परिहारायोर्ग्रूपविराट्संपत्तियुक्तो ज्योतिष्टोम एव प्रथममनुष्ठेयः ॥

अग्निष्टोमाविति ॥ इदानीमुक्तैर्ज्योतिरादिभिरनुलोमप्रतिलोमगतैर्निष्पन्नमभिप्लवषडहं [१२]रथचक्ररूपकक्लृप्त्या विधत्ते - ' अग्निष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत्तदेतत् परियद्देवचक्रं

---

२३. मै१ - शुच्छीलाः । २४. मै२ - इव । २५-२५. मै२ - संबाध्यन्त इति किमुत सर्वबाधा, अ१ - ' क्षुधा - - - - इति ' नास्ति । २६. मै२. अ. अ१ - °न्निमित्ता । २७. मै. मै१. मै३. अ. अ१ - अग्निष्टोमौ । २८. अ१ - तु । २९. मै१ - अतः । ३०. मै२ - षडहस्य । ३१. अ१ - एते । ३२-३२. अ१ - ' प्रान्ते - - - - इति ' नास्ति ।

---

५. मै - ज्योतिष्टोमस्थ । ६. मै - स्तोत्रीयगत° । ७-७. मै - विराड्रूपं तौ विराड्रूपत्वात् । ८. म - ' न ' नास्ति । ९. शृ१ - सत्रिणः । १०. इ. वा - °दितबोधयुक्ताः, मै - °दितवधयुक्ताः । ११. म - ' इव ' नास्ति । १२. अ. आ. क. पा. हा. इ. वा. म. मै. उ - °रूपक्लृप्त्या ।

तत् तदेतत् परियद्देवचक्रं यदेतेन (२) षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते

तत् । तत् । एतत् । परियदिति परि-यत् । देवचक्रमिति देव-चक्रम् । यत् । एतेन(२) । षडहेनेति षट्-अहेन । यन्ति । देवचक्रमिति देव-चक्रम् । एव । समारोहन्तीति सम्-आरोहन्ति । अरिष्ट्यै । ते । स्वस्ति । समिति । अश्नुवते ।

इति [-३२] [V]प्रधी, प्रकर्षेण धार्यते [३३]चक्रमाभ्यामिति [३४]वा । "उपसर्गे घोः किः" (पा ३.३.९२) । [V]तौ च पर्यन्तफलके याभ्यां [३५]विष्कम्भार्थप्रमाणाभ्यां सर्वं [३६]चक्रं परितो व्याप्यत इति । [३७]अयमर्थः - [३८-] यावेतौ [V]अग्निष्टोमौ [V]अभितः [-३८] स्थितौ [V]तौ अस्य चक्रस्य [३९]प्रधिस्थानीयौ वर्तेते इति । [४०-] 'उक्थ्या मध्ये' [-४०] [४१]इत्यादि । [४२]ये गो आयुषी [४३-] गो आयुषी [-४३] इति चत्वारः [V]उक्थ्याः ते अस्य चक्रस्य [V]मध्ये भवन्ति । कथं तेषामवस्थानमित्याह - 'नभ्यं तत्' इति । चक्रस्य मध्ये [४४]नभ्यवत् परिमण्डलाकारेण वर्तते । नाभये हितं [V]नभ्यम् । [४५]" नाभिनभं च " (पाम - पा ५.१.२) इति [४६]यत्प्रत्ययः, [४७]नभभावश्च, " यतोऽनावः " (पा ६.१.२१३) इत्याद्युदात्तत्वम् । [V]तत् [V]एतत् [V]परियत् परितो गच्छेत् [४८]तत् [V]देवचक्रं [४९]देवाः क्रियन्ते

यदेतेन षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते' इति ॥ लोके रथचक्रं फलकत्रयेण निष्पाद्यते । तत्र पार्श्ववर्तिनी फलके [V]प्रधी इत्युच्येते । प्रकर्षेण धीयते धार्यते मध्यफलकमाभ्यामिति प्रधी । मध्यफलकं तु [V]नभ्यम् इत्युच्यते नाभिस्थानीयत्वात् । एवं च सत्यत्र चक्ररूपस्याभिप्लवषडहस्याभितो वर्तमानावाद्यन्तदिनयोरनुष्ठेयौ ज्योतिःशब्दाभिधेयौ यावग्निष्टोमौ तावुभौ प्रधी । ये च मध्यवर्तिनो [१३]गौरायुरायुर्गौरित्येतन्नामान उक्थ्यरूपाश्चत्वारः [१४]क्रतवः ते सर्वे मिलित्वा [१५-] मध्ये स्थितं नभ्यं [-१५]

---

३३. अ - चक्रेणेभ्याम् । ३४. मै. मै१. मै२. मै३. अ - 'वा' नास्ति । ३५. मै१ - अविष्कंभार्थप्रमा°, अ१ - विश्वंभार्धप्रमा° । ३६. अ१ - चक्रवत् । ३७. मै. मै१. मै३ - असमर्थः, अ१ - अयमर्थतया । ३८-३८. अ१ - एतावग्नि°, अ. मै१ - °वग्निष्टोमादिति । ३९. अ१ - प्रस्थानीयौ । ४०-४०. मै२ - उक्थ्यो मध्ये, अ - 'उक्थ्या मध्ये' नास्ति । ४१. मै२ - इति । ४२. अ. अ१ - यत् । ४३-४३. अ. अ१ - 'गो आयुषी' नास्ति । ४४. मै१. अ. अ१ - 'नभ्यवत्' नास्ति । ४५. मै२ - नाभिनभः । ४६. अ१ - यत्प्रत्ययेन । ४७. अ१ - भावः, अ - नभिभावश्च । ४८. मै. मै१. मै२. मै३. अ - 'तत्' नास्ति । ४९. अ - 'देवाः' नास्ति ।

---

१३. अ. आ. क. पा. हा. इ. वा. म. उ. वै - गौरायुर्गौरित्येतम् । १४. म - 'क्रतवः' नास्ति । १५-१५. शृ१ - मध्ये च तन्नभ्य ।

षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतोज्योतिषा यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति

षडहेनेति षट्-अहेन । यन्ति । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठन्ति । उभयतोज्योतिषेत्युभयतः-ज्योतिषा । यन्ति । उभयतः । एव । सुवर्ग इति सुवः-गे । लोके । प्रतितिष्ठन्त इति प्रति-तिष्ठन्तः । यन्ति ।

इज्यन्ते [५०]अस्मिन्निति देवचक्रं षडहात्मकम् । [V]यत् [V]एतेन [V]षडहेन [V]यन्ति । [V]देवचक्रम् [V]एव देवसेनामेव [V]समारोहन्ति संगता आरोहन्ति । तच्च [V]अरिष्ट्यै अहिंसायै च भवति । [V]ते हि देवचक्रं समारुह्य वर्तमानाः [V]स्वस्ति अविनाशेन अभिमतफलम् [५१][V]अश्नुवते ॥

एवं षडहं [५२]प्रतिपाद्य संप्रति [५३]माससंपादनार्थमाह - ' षडहेन ' इत्यादि ॥ [५४]मासावयवाः स्तूयन्ते - ' षड्वा ' इत्यादि । गतम् । उभयतोज्योतिषा आदावन्ते [५५]च [५६]ज्योतिष्टोमाग्निष्टोमवता । ' द्वौ ' इति । द्वादशत्वयोगाद्द्वादशात्मकं [५७]पुरुषमभिपर्यावर्तन्ते ।

तद्भवति । तदेतदाभिप्लवषडहरूपं [१६][V]परियत् पुनः [१७]पुनः प्रवर्तमानं [V]देवचक्रम् इत्युच्यते । [१८-][V]यत् [V]एतेन -[१८] देवचक्ररूपेण [V]षडहेन यजमाना अनुष्ठानं [१९]निष्पादयेयुस्तर्हि [२०]ते यजमानाः [V]देवचक्रम् [V]एव [V]समारोहन्ति । तच्चारोहणम् [२१][V]अरिष्ट्यै हिंसाराहित्याय भवति । हिंसारहिताश्च ते [V]स्वस्ति समश्नुवते क्षेमं प्राप्नुवन्ति ॥

षडहेनेति ॥ पुनरपि षडहं प्रशंसति - ' षडहेन यन्ति षट् वा ऋतवः ऋतुष्वेव प्रति तिष्ठन्ति ' इति ॥

उभयतोज्योतिषा इति ॥ तस्य [२२]च षडहस्यानुलोमप्रतिलोमरूपत्र्यहात्मकत्वं विधत्ते - ' उभयतोज्योतिषा [२३-] यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति ' इति ॥ ज्योतिर्गौरायुरित्येवमानुलोम्ये सत्यादौ ज्योतिः,

---

५०. मै१. अ. अ१ - ' अस्मिन् ' नास्ति । ५१. अ - अश्नुते । ५२. मै. मै१. मै३. अ. अ१ - संपाद्य । ५३. मै२. अ१ - सामसंपा° । ५४. मै१ - मासाः अवयवाः । ५५. मै२ - ' च ' नास्ति । ५६. अ - ' °ग्निष्टोमवता ' नास्ति । ५७. अ१ - °मनुपर्यावर्तन्ते ।

---

१६. म - परितः । १७. आ. क. वा. म - ' पुनः ' नास्ति । १८-१८. अ. आ. क. पा. हा - यद्ययेतेन, इ. वा. वै. म - यस्मात् एतेन; मै - तस्मादेतेन । १९. वा - निर्दधेयुस्त° । २०. मै - ये । २१. मै - इष्ट्यै । २२. शृ१. अ. क. हा. वा - ' च ' नास्ति, म - तस्मात् , पा - यस्य, इ - तत् । २३-२३. उ - ' यन्त्यु° - - - - °ज्योतिषा ' नास्ति ।

द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ (३) तत्

द्वौ । षडहाविति षट्-अहौ । भवतः । तानि । द्वादश । अहानि । समिति । पद्यन्ते । द्वादशः । वै । पुरुषः । द्वे इति । सक्थ्यौ । द्वौ । बाहू इति । आत्मा । च । शिरः । च । चत्वारि । अङ्गानि । स्तनौ । द्वादशौ (३) । तत् ।

पुरुषमेव लक्ष्यमाणं [५८]पुनःपुनरभ्यावर्तन्ते Vद्वे सक्थ्यौ पादमूले । " ई च द्विवचने " (पा ७.१.७७) इतीकारः । [५९-]Vद्वौ Vबाहू [-५९] हस्तमूले Vआत्मा कुक्षिः Vशिरः ग्रीवाभ्यः परं Vचत्वारि Vअङ्गानि हस्तौ पादौ च Vस्तनौ [६०]स्तनाधारौ वा [६१]वक्षोग्रीवाभागौ Vद्वादशौ एकादशौ द्वादशाहः [६२]च । सत्सु हि द्वादशसु पूर्वेऽपि [६३]द्वादशांशाः [६४]द्वादशैरवयवैः तद्वान् पुरुषो द्वादशः । डत्प्रत्ययान्तः मत्वार्थीयो लुप्यते । परिमाणप्रत्ययो वा । 'त्रयः' इति । नवत्वान्वयात् नवात्मकं [६५]प्राणम् Vअभिपर्यावर्तन्ते । [६६]ननु त्रयः षडहा [६७]अष्टादशाहा भवन्ति कथं नवेत्याह- ' नवान्यानि ' इति । Vनवान्यानि [६८]त्रिणवं तावत् भवन्ति । [६९-] सर्वधा नवत्ववचनम् [-६९]

आयुर्गौर्ज्योतिरित्येवं प्रतिलोम्ये सति अन्ते ज्योतिः । एवं Vउभयतोज्योतिषा [-२३] षडहेनानुष्ठाने सति स्वर्गप्रवेशकाले फलावसानकाले च Vप्रतितिष्ठन्तः अवज्ञारहिताः सन्तः संचरन्ति ॥

द्वाविति ॥ तस्य च षडहस्य द्विरावृत्तिं विधत्ते - 'द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ तत्पुरुषमनुपर्यावर्तन्ते ' इति ॥ सक्थिशब्देन [२४]श्रोणीद्वयमुच्यते । बाहुशब्देनांसद्वयम् । Vआत्मा मध्यदेहः । Vशिरः प्रसिद्धम् । हस्तौ पादौ [२५]च मिलित्वा Vचत्वारि Vअङ्गानि । ततो द्वौ Vस्तनौ द्वादशसंख्यापूरकौ । तथा [२६-] सत्येवं द्वादशाहानि [-२६] Vपुरुषम् अनुसृत्य पर्यावृत्तानि भवन्ति ॥

५८. मैर२ - °पुनरावर्तन्ते । ५९-५९. अ - ' द्वौ बाहू ' नास्ति । ६०. अ१ - स्तनाधारे । ६१. अ१ - आक्षिग्रीवास्यादि । ६२. अ१ - ' च ' नास्ति । ६३. मैर२. अ - द्वादशाङ्गाः । ६४. मैर२ - दशैरवयवैः । ६५. मैर२ - प्रमाणम् । ६६. मैर२ - नतु । ६७. मैर२. अ - अष्टादश । ६८. मै. मैर२. मै३. अ - त्रीणि नव, अ१ - त्रीणि नवम् । ६९-६९. मैर२ - सर्वथा नवनवत्व°, अ - सर्वसाधनत्व° ।

२४. म - श्रोणीरुच्यन्ते । २५. मै - ' च ' नास्ति । २६-२६. म - सत्ययं द्वादशः द्वादशाहानि, उ - सत्ययं द्वादशाहासंपुरुषमनु° ।

पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत् प्राणाननु पर्यावर्तन्ते

पुरुषम् । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते । त्रयः । षडहा इति षट्-अहाः । भवन्ति । तानि । अष्टादशेत्यष्टा-दश । अहानि । समिति । पद्यन्ते । नव । अन्यानि । नव । अन्यानि । नव । वै । पुरुषे । प्राणा इति प्र-अनाः । तत् । प्राणानिति प्र-अनान् । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते ।

---

[७०]अनुवर्तत इति । '[७१]नव वै ' इत्यादि । सप्त शीर्षण्याः, द्वाववाञ्चाविति । ' चत्वारः ' इति । V चत्वारः चतुर्विंशतिसंख्यान्वयात् । [७२]V नव चतुर्विंशत्यर्धमासात्मकं संवत्सरम् [७३]V अभिपर्यावर्तन्ते । एवमेतानि V चतुर्विंशतिरहानि पृष्ठ्यषडहो वक्ष्यते । मासिमासि पृष्ठान्युपयन्तीति । तेन मासः प्रतिपादितो भवति ॥

[७४]अधुना मासान्तरसंपादनार्थमाह - ' अप्रतिष्ठितः ' इत्यादि ॥ एवं [७५]मासमात्रमेव अनेन [७६]ब्राह्मणेन प्रतिपादितमिति मत्वा [७७]आहुरेके - [७८]' अप्रतिष्ठितः संवत्सरः ' इति । हेतुं च V आहुः V वर्षीयान् V प्रतिष्ठाया V इति । [७९]प्रतितिष्ठति अभ्रंशेन [८०]तिष्ठत्यासामिति [८१]प्रतिष्ठा आधारः । " आतश्चोपसर्गे " (पा ३.१.१३६) इत्यधिकरणे अङ्प्रत्ययः । एकोऽयं मासः प्रतिष्ठा - [८२]प्रतिपादितः । [८३]इतश्च V वर्षीयान् वृद्धतरः [८४-]V संवत्सरः स्यात् V अप्रतिष्ठितः [-८४]

त्रय इति ॥ तस्य च षडहस्य तृतीयामावृत्तिं विधत्ते - ' त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत् प्राणाननु पर्यावर्तन्ते ' इति ॥ पूर्वाभ्यां द्विरावृत्ताभ्यां सह त्रित्वम् । अष्टादशानामह्नां द्वेधा विभागे सति [२७]नवसंख्यया नवच्छिद्रगतप्राणाननुसृत्य षडहास्त्रयः पर्यावृत्ता भवन्ति ॥

---

७०. मैर - अनुवर्तन्ते । ७१. मैर - ' नव ' नास्ति । ७२. मै१. अ. अ१ - ' नव ' नास्ति । ७३. मैर - अभिवर्तते, मै१ - °वर्तन्ते ते । ७४. अ - अथ । ७५. मै. मै१. मै३. अ. अ१ - मासमात्रम् । ७६. मै१. अ. अ१ - ' ब्राह्मणेन ' नास्ति । ७७. अ - °रेकेतु । ७८. मै१ - प्रतिष्ठितः । ७९. मै. अ - अप्रतितिष्ठति । ८०. मैर - तिष्ठस्यस्याम् । ८१. मैर - अप्रतिष्ठा । ८२. अ१ - प्रतिपादिता । ८३. अ - इति यश्च । ८४-८४. मैर - संवत्सरस्याप्रति° ।

---

२७. मै - नवसंख्यायाः विमुक्ते ।

चत्वारः षडहा भवन्ति तानि चतुर्विंशतिरहानि सं पद्यन्ते चतुर्विंशतिरर्धमासाः संवत्सरस्तत् संवत्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः

चत्वारः । षडहा इति षट्-अहाः । भवन्ति । तानि । चतुर्विंशतिरिति चतुः-विंशतिः । अहानि । समिति । पद्यन्ते । चतुर्विंशतिरिति चतुः-विंशतिः । अर्धमासा इत्यर्ध-मासाः । संवत्सर इति सं-वत्सरः । तत् । संवत्सरमिति सं-वत्सरम् । अन्विति । पर्यावर्तन्त इति परि-आवर्तन्ते । अप्रतिष्ठित इत्यप्रति-स्थितः ।

[८५-] सुखेन स्थातुं [-८५] न शक्नोति । “ प्रियस्थिर°” (पा ६.४.१५७) आदिना [८६]वर्षादेशः । [८७]यद्वा वर्षीयान् खलु प्रतिष्ठायै प्रतिष्ठार्थं [८८]प्रभवति । न चायं प्रथमो मासः संवत्सराद्वर्षीयान् । न चास्मादन्यो वर्षीयानस्ति यः प्रतिष्ठार्थं स्यात् । [८९]तस्मादप्रतिष्ठितः संवत्सरः इति । अस्मिन्पक्षे [९०]भावे [९१]अङ्प्रत्ययः । चतुर्थ्यर्थे षष्ठी ॥

[९२]अत्रोत्तरम् ‘ एतावद्वै ’ [९३]इत्यादिना ब्रूमः । मासमेकं प्रतिपाद्यायमेको मासः संवत्सरः [९४]इति तु एतावत्संवत्सरस्य [९५]द्वादशानां मासानां [९६V]ब्राह्मणं [९७]क्रियते [९८-V]यावन्मासः यावन्मासमात्रस्य [-९८] ब्राह्मणं मन्यसे । ‘ ज्योतिष्टोमं प्रथममुपयन्ति ’ इत्यारभ्य ‘ चतुर्विंशतिरर्धमासाः

चत्वार इति ॥ [२८-] अथ पूर्वाभिस्तिसृभिरावृत्तिभिः सह चतुर्थीमावृत्तिं [-२८] विधत्ते - [२९-] चत्वारः षडहा भवन्ति तानि चतुर्विंशतिरहानि सं पद्यन्ते चतुर्विंशतिरर्धमासाः संवत्सरस्तत् संवत्सरमनु पर्यावर्तन्ते ’ इति ॥ संख्याद्वारेणार्धमासद्वारा संवत्सरमनुसृत्य [V]चत्वारः [V]षडहाः पर्यावृत्ता [V]भवन्ति । अत्र मासपूरणाय पृष्ठ्यः षडह [३०]आहर्तव्यः । अत एव छन्दोगा आमनन्ति - “ यदेष पृष्ठ्यः षडहो भवति वीर्य एवान्ततः प्रतितिष्ठन्ति [-२९] ” (तांब्रा ४.१.१६) इति ॥

८५-८५. अ१ - सुस्थातुम् । ८६. मै१ - वर्षायादेशः । ८७. मै१. अ. अ१ - ‘ यद्वा ’ नास्ति । ८८. मै२ - भवति । ८९. मै२ - तस्माद्वाप्रति°, अ१ - ततश्चाप्रति° । ९०. मै२ - अभावे । ९१. मै२ - अङ्गप्रत्ययेन । ९२. मै१. अ - अथोत्तर°, अ१ - अत उत्तर° । ९३. अ१ - इत्यादि न । ९४. मै१. अ१ - इति किम् । ९५. अ१ - ब्राह्मणम् । ९६. मै१ - ब्राह्मणः । ९७. मै१. अ१ - कियत् । ९८-९८. मै२ - यावन्मासं यावन्मासस्य ।

२८-२८. आ - अत्राक्षेपसमाधानमुखेन सर्वमासामनुष्ठानम् । २९-२९. उ. मै - ‘ चत्वारः - - - - इति ’ नास्ति । ३०. अ. आ. क. पा. हा. इ. वा. वै. मै. उ - अध्याहर्तव्यः ।

संवत्सर इति खलु वा आहुर्वर्षीयान् प्रतिष्ठाया इत्येतावद्वै(४) संवत्सरस्य ब्राह्मणं

संवत्सर इति सं-वत्सरः । इति । खलु । वै । आहुः । वर्षीयान् । प्रतिष्ठाया इति प्रति-स्थायाः । इति । एतावत् । वै (४) । संवत्सरस्येति सं-वत्सरस्य । ब्राह्मणम् ।

संवत्सरः '[९९]इत्यन्तम् । " पद्दन्°" (पा ६.१.६३) आदिना मासशब्दस्य [१००]मासभावः । " ऊडिदम्°" (पा ६.१.१७१) [१०१] इत्यादिना षष्ठ्या उदात्तत्वम् । अयमेव [१०२]मासोऽभ्यासेन संवत्सरं पूरयिष्यतीति [१०३]ब्राह्मणस्याभिप्रायः । तस्मात् [V]मासि मासि [V]प्रतितिष्ठन्तः

अप्रतिष्ठित इति ॥ [३१-] अत्राक्षेपसमाधानमुखेन सर्वमासामनुष्ठानं [-३१] विधत्ते - ' अप्रतिष्ठितः संवत्सर इति खलु वा आहुर्वर्षीयान् प्रतिष्ठाया इत्येतावद्वै संवत्सरस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति ' इति ॥ पूर्वोक्तन्यायेन मास एकः [V]प्रतिष्ठितो न [३२V]संवत्सरः तस्योक्तप्रतिष्ठा-हेतोर्मासाद्वर्षीयस्त्वादत्यन्ताधिकत्वात् [V]इति [३३]एतं केचिच्चोद्यवादिनः [V]आहुः। अत्रैतदुत्तरं - मासः [V]ब्राह्मणं [३४]पूर्वोक्तरीत्या मासस्य प्रतिपादकं ब्राह्मणवाक्यं यावदस्ति एतावदेव [V]संवत्सरस्य प्रतिपादकं [V]ब्राह्मणं

---

९९. मै२ - इत्यतः । १००. अ - माससंवत्सराभावः, अ१ - मास आदेशः । १०१. मै. मै१. मै३. अ. अ१ - इति । १०२. मै२ - मासोऽव्यासेन । १०३. मै१. अ - ब्राह्मणाभिप्रायः ।

३१-३१. आ - अथ पूर्वाभिस्तिसृभिरावृत्तिभिः सह चतुर्थीमावृत्तिम् । ३२. क - संवत्सरः इत्येव केचिच्चोद्यवादिन आहुः तस्योक्त° । ३३. अ. आ. क. पा. हा. इ. वा. वै. म. उ - एव । ३४. मै - पूर्वो नीत्या ।

यावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति ॥११॥

(विराजमेतेन द्वादशावेतावद्वा अष्टौ च ।)

यावत् । मासः । मासिमासीति मासि-मासि । एव ।
प्रतितिष्ठन्त इति प्रति-तिष्ठन्तः । यन्ति ॥११॥

[काम्ं ३३.३; कपिसं - - - -; मैसं - - - -; वासं - - - -]

प्रतिष्ठितसंवत्सरा [V]यन्ति । [१०४]तस्मान्नितरां [१०५]प्रतिष्ठितः संवत्सरः इति भावः । पूर्ववद्विभक्त्युदात्तत्वम् (पा ६.१.१७१) । " अनुदात्तं च " (पा ८.१.३) इत्याम्रेडितस्यानुदात्तत्वम् ॥

॥ इति सप्तमे चतुर्थे एकादशोऽनुवाकः ॥

नन्वितोऽधिकं [३५]किञ्चिन्नूतनमस्ति । अनेनैव [३६]न्यायेन प्रतिमासमनुतिष्ठन्तो यजमानास्तस्मिंस्तस्मिन् मासि प्रतितिष्ठन्तः क्रमेण संवत्सरं [V]यन्ति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकादशोनुवाकः ॥

१०४. मै१ - °न्निरन्तरम् । १०५. मै१. अ. अ१ - 'प्रतिष्ठितः ' नास्ति ।

३५. म - किञ्चिन्न्यूनम् । ३६. अ. आ. क. पा. हा. इ. वा. वै. मै. म. उ - प्रकारेण ।

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो

मेषः । त्वा । पचतैः । अवतु । लोहितग्रीव इति लोहित-ग्रीवः । छागैः । शल्मलिः । वृद्ध्या । पर्णः । ब्रह्मणा । प्लक्षः ।

अतः परमश्वमेधमन्त्राः । तत्र अपाव्यानि जुहोति - 'मेषस्त्वा' इति । [1]रात्रिहोमेषु [2]पर्यग्निकरणे चाश्वस्य । हे अश्व, [V]पचतैः पचनीयैः अन्नैः सह [V]मेषः पचनीयानां मुख्यः [3][V]त्वा [V]अवतु अनुप्रविशतु । अवतिरनेकार्थः (धापा ६०१) । पचतेरौणादिकोऽतच् (उसू ३.११०) । [V]लोहितग्रीवः अजानां मुख्यः [V]छागैः सह त्वामवत्वित्येव । अत्र सहाभिगमनेऽवतिर्वर्तते (धापा ६०१) । यथोक्तम् - "पर्यग्निकृतानारण्यानुत्सृजन्ति" (तैसं ३.९.३), [5-]'वाडवे पुरुषवाजः [-5] पुरोनीयते अश्वस्य' इति । [V]शल्मलिः पादपः वर्षिष्ठः [V]वृद्ध्या सह त्वामवतु [6-] अनुप्रविश्य वर्धयतु । [V]पर्णः पलाशः प्रशस्तानां प्रथमः, सः [7][V]ब्रह्मणा मन्त्रैर्ब्राह्मणैर्वा त्वामवतु रक्षतु । जातावेकवचनम् । [V]प्लक्षः यज्ञियानां मुख्यः, सः [V]मेधेन यज्ञेन यज्ञबलेन वा त्वामवतु प्राप्नोतु । [V]न्यग्रोधः [V]चमसैः पात्रैः सह त्वामवतु [8]धारयतु [-6] । यथोक्तम् -

एकादशे संवत्सरगतेषु सर्वमासेष्वहानि विहितानि । अथावशिष्टेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते ॥

मेषस्त्विति ॥ कल्पः - "मेषस्त्वा पचतैरवत्विति पर्यग्नौ क्रियमाणेऽपाव्यानि जुहोति" (आपश्रौ २०.१७.४) इति ॥

पाठः - 'मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृत् स्तोमैः' इति ॥ अविजातौ मुख्यः पुमान् यः [V]मेषः अस्ति [1]सोऽयं [2][V]पचतैः हविष्ट्वेन पचनीयैः [3]क्षुद्रैरविविशेषैः सह हेऽश्व, त्वाम् [V]अवतु । एवमुत्तरेष्वपि मन्त्रेषु त्वामवत्वित्यनुषञ्जनीयम् । [4]अजजातौ योऽयं मुख्यो बस्तः [V]लोहितग्रीवः सोऽयमन्यैः [V]छागैः सह

१. मै२ - रात्रिहोमे । २. मै. मै१. मै३. अ. अ१ - अग्निपर्यग्नि° । ३. मै. मै२. मै३. अ. अ१ - त्वाम् । ४. मै२ - सहातिगमने°, मै१. अ. अ१ - °गमने वर्तते । ५-५. मै१. अ - वडवे पुरुषी वाजः, अ१ - बडवे पुरुषी अजः । ६-६. मै२ - 'अनुप्रविश्य - - - - धारयतु' नास्ति । ७. अ - ब्राह्मण । ८. अ१ - धारणमस्तु ।

१. म - 'सोऽयम्' नास्ति । २. मै - पथकैः । ३. शृ१. अ. हा. क. पा. वा. मै - क्षुद्रैरविशेषैः । ४. म - अविजातौ । ५.

मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृत्स्तोमैरवन्तीः

मेधेन । न्यग्रोधः । चमसैः । उदुम्बरः । ऊर्जा । गायत्री ।
छन्दोभिरिति छन्दः-भिः । त्रिवृदिति त्रि-वृत् ।
स्तोमैः । अवन्तीः ।

" नैयग्रोधश्चमसः " [९]इति । [१०]Vउदुम्बरः [११]Vऊर्जा, रसानां मुख्यः [१२]ऊर्जा [१३]सह त्वामवतु [१४]रसेन वर्धयतु । Vगायत्री छन्दसामाद्या Vछन्दोभिः [१५]उष्णिगादिभिः सह त्वामवतु [१६]रक्षतु । Vत्रिवृत् स्तोमानां [१७]प्रथमः, [१८]त्वां Vस्तोमैः [१९]पञ्चदशादिभिः सह अवतु । ' अवन्तीः स्थ ' इति । पङ्क्तिप्रकारश्चतुष्पदः एकादशाक्षरः प्रथमः द्वितीयतृतीयौ षडक्षरौ षोडशाक्षरश्चतुर्थः । Vअवन्तीः अवन्त्यः । " वा छन्दसि " (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम् । [२०]अन्या अपि [२१-] प्रजा अवन्त्यो [-२१] भवन्ति, [२२]आप ओषधयो वा । यद्वा - पूर्वोक्तानां मेषादीनाम् [२३]अवतां [२४]सम्बधिन्यः याः पत्न्यः [२५]अवन्त्यो भवन्ति ताः

त्वामवतु । [५]Vशल्मलिः अत्युन्नतो वृक्षविशेषः । स च स्वकीयया Vवृद्ध्या सह त्वामवतु । Vपर्णः पलाशवृक्षः । स च स्वाभिमानिना Vब्रह्मणा मन्त्रेण वा सह त्वामवतु । Vप्लक्षः यज्ञियेषु मुख्यः वृक्षः । स च Vमेधेन यज्ञेन सह त्वामवतु । Vन्यग्रोधः [६]चमसहेतुर्वृक्षः । स च [७-] स्वकार्यैः Vचमसैः [-७] सह त्वामवतु । Vउदुम्बरः प्रसिद्धः । [८-] स च Vऊर्जा स्वकीयफलेन [-८] त्वामवतु । Vगायत्री [९-] चान्यैः [१०]त्रिष्टुबादिच्छन्दोभिः सह त्वामवतु । [११-]Vत्रिवृत् Vस्तोमः चान्यैः पञ्चदशादिस्तोमैः सह त्वामवतु [-११] । एतैर्नवभिर्मन्त्रैरपाव्याख्या आहुतीर्जुहुयात् ॥

९. मै१. अ - 'इति ' नास्ति । १०. मै१ - ' उदुम्बरः' नास्ति । ११. मै१. अ - ऊर्जानाम् , अ१ - ' ऊर्जा ' नास्ति । १२. मै१ - ऊर्जा ऊर्जार्हः । १३. मै१ - सः । १४. मै१. अ१ - तेन सह । १५. मै२ - उष्णिहादिभिः । १६. अ. अ१ - ' रक्षतु ' नास्ति । १७. मै१ - प्रथमम् । १८. मै२ - ' त्वाम् ' नास्ति । १९. मै२. अ - पञ्चदशभिः । २०. मै. मै१. मै२. मै३. अ - या अन्या । २१-२१. मै२ - प्रजावत्यो, अ - प्रजादि वष्टयो । २२. मै२ - आप वा । २३. मै१ - अवतामवताम् । २४. मै२ - ' संबधिन्यः' नास्ति । २५. मै. मै२. मै३. अ. अ१ - ' अवन्त्यः ' नास्ति ।

क - शाल्मलिः । ६. म - चमसः । ७-७. क. हा - स्वकीयचमसैः । ८-८. शृ१ - स चोर्जस्वकीयफलत्वेन । ९-९. मै - ' चान्यैः - - - - स्थेति ' नास्ति । १०. म - त्रिष्टुभादिच्छ° । ११-११. शृ१. मै - ' त्रिवृत् - - - - °मवतु ' नास्ति ।

स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा

स्थ । अवन्तीः । त्वा । अवन्तु । प्रियम् । त्वा । प्रियाणाम् । वर्षिष्ठम् । आप्यानाम् । निधीनामिति नि-धीनाम् । त्वा ।

सर्वाः [२६]त्वमेवासि । सर्वथा पुरुषव्यत्ययात् [२७]वचनव्यत्ययाद्वा न मुच्यामहे । [२८]ता अवन्त्यः त्वाम् [V]अवन्तु । तं [V]त्वा [२९-V]प्रियाणां [V]प्रियम् [V]आप्यानां [-२९] वृद्धानामपि [V]वर्षिष्ठम् वृद्धतमम् । [३०]पूर्ववद्वषदिशः (पा ६.४.१५७) । आङ्पूर्वात् [३१]प्यायतेः छान्दसो डः, [३२-] अप्छब्दाद्वा ण्यः[-३२] । [३३]वृषादिर्द्रष्टव्यः (गणपाठ २०८. पा ६.१.२०३) । अनवधारणादनवग्रहः । [३४-V]निधीनाम् अपि [-३४] [V]निधिपतिं महानिधिं महान्तं निधिम् । यद्वा - सर्वेषां निधीनां [३५]संबन्धिनं [३६]निधिपतिं स्वामिनम् । अथवा - निधयो निधातारस्तेषामपि निधिपतिम् , अतिशयेन निधातारम् । सर्वथा " परादिश्छन्दसि " (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् । ईदृशं त्वां [V]हवामहे [३७]जुहुमः ।

अवन्तीरिति ।। कल्पः - " ता दक्षिणान् केशपक्षानुद्ग्रथ्य सव्यान् [१२]प्रस्रस्य दक्षिणानूरूनाघ्नानाः [१३]सिग्भिरभिधून्वन्त्यस्त्रिः [१४]प्रदक्षिणमश्वं परियन्त्यवन्तीः स्थेति " [-९] (आपश्रौ २०.१७.१३) [१५]इति ।। अत्र तच्छब्देन राजपत्न्यः परामृश्यन्ते, तासां प्रकृतत्वात् । मृतमश्वं प्रति पत्नीभिः क्रियमाण एष उपचारः ।।

पाठस्तु - 'अवन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिं हवामहे वसो मम ' इति ।। ताः पत्न्यः परस्परं संबोध्य वदन्ति - हे राजपत्न्यः, यूयम् [V]अवन्तीः [V]स्थ अश्वस्य पालयित्र्यः स्थ । हेऽश्व, त्वाम् [V]अवन्तीः पालयित्र्यः पत्न्यः [V]अवन्तु रक्षन्तु । मम [V]वसो वासयितस्तादृश

---

२६. मैर - त्वामेवावहन्ति । २७. मैर - °व्यत्ययान्मा । २८. मैर - ' ताः ' नास्ति । २९-२९. अ - प्रियमप्रियमाणाः । ३०. मैर - वर्धादिशः । ३१. मै. मैर. मै३. अ. अ१ - व्यायतेः । ३२-३२. मैर - अभाण्डिन्यः । ३३. मैर - वर्षादि°, अ - पृषदादि° । ३४-३४. मैर - संन्निधीनाम् । ३५. अ१ - सम्बन्धि । ३६. मैर - निधिपतिं निधि । ३७. मैर - जुहुमहे ।

---

१२. क. म - विस्रस्य । १३. उ. इ. वा - °भिधून्वन्त्यस्त्रिः, शृ१ - °भिधून्वेन्त्यास्त्रैः, पा - °भिधून्वेन्त्यात्यास्त्रिः, म - भिरनभिधून्वन्त्यस्त्रिः । १४. आ - °मश्वं धुवन्त्यः, उ. शृ१ - धुवन्ति, अ. पा. हा. इ. वा - धुवन्तीः, म - धुवन्त्यः । १५. वा. म - 'इति ' नास्ति ।

निधिपतिं॑ हवामहे वसो मम १२॥

(मेषः षट्त्रिं॑शत् ।)

~~~~~~~~~~~~

निधिपतिमिति निधि-पतिम् । हवामहे । वसो इति । मम ॥१२॥

[कासं, अश्वमेध ४.१; कपिसं - - - - ; मैसं - - - - ; वासं २३.१३]

~~~~~~~~~~~~

व्यत्ययेन [३८]शप् आत्मनेपदम् [३९]च । यद्वा - होतुमाह्वयामः । " बहुलं छन्दसि " (पा ६.१.३४) इति संप्रसारणम् । [४०]हे Vवसो धनस्थानीय, Vमम । यद्वा - [४१-] मम वासयितः पुण्येषु लोकेषु [-४१] । " परमपि छन्दसि " इति परस्य षष्ठ्यन्तस्य [४२]पूर्वामन्त्रितानुप्रवेशात् [४३]षष्ठ्यन्तामन्त्रितसमुदायो निहन्यते ॥

॥ [४४-] इति सप्तमे चतुर्थे द्वादशोऽनुवाकः [-४४] ॥

~~~~~~~~~~~~

हेऽश्व, Vप्रियाणां मध्येऽतिप्रियं त्वां Vहवामहे आह्वयामः । Vआप्यानां कामप्राप्तिहेतूनां मध्ये Vवर्षिष्ठम् अतिशयेन वृद्धं त्वां हवामहे । तथा Vनिधीनां शङ्खपद्मादीनां मध्ये Vनिधिपतिम् अत्यन्तमधिकस्य निधेः पालयितारं [१६]त्वां हवामहे ॥

॥ [१७-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः [-१७] ॥

~~~~~~~~~~~~

३८. मैर - शपि । ३९. मैर - 'च 'नास्ति । ४०. मै१. अ. अ१ - 'हे 'नास्ति । ४१-४१. मै१. अ१ - वासयन्नः पुण्यलोकेषु । ४२. मैर - पूर्वनावितानु° (?) । ४३. मैर - षष्ठ्यन्तनावित°(?) । ४४-४४. चतुर्थे द्वादशः ।

~~~~~~~~~~~~

१६. मै - 'त्वाम् 'नास्ति । १७-१७. मै - इति द्वादशोऽनुवाकः ।
~~~~~~~~~~~~

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा

कूप्याभ्यः । स्वाहा । कूल्याभ्यः । स्वाहा । विकर्याभ्य इति वि-कर्याभ्यः । स्वाहा । अवट्याभ्यः । स्वाहा । खन्याभ्यः । स्वाहा । ह्रद्याभ्यः । स्वाहा । सूद्याभ्यः । स्वाहा । सरस्याभ्यः । स्वाहा । वैशन्तीभ्यः । स्वाहा ।

पुनरपि [1]तत्रैव रात्रिहोमेष्वपां [2]होमाः - 'कूप्याभ्यः' इत्यादि ॥ कूपाः प्रसिद्धाः । सर्वत्र "भवे छन्दसि" (पा ४.४.११०) इति यत् । [3]द्व्यचां "यतोऽनावः" (पा ६.२.२१३) इत्याद्युदात्तत्वम् । अन्यत्र [4]"तित्स्वरितम्" (पा ६.१.२१३) इति स्वरितत्वम् । कुल्यासु भवाः [5]कूल्याः, छान्दसं दीर्घत्वम् । यद्वा - [6-] कूलसमीपभवाः क्षुद्रकूपाः [-6] कूल्याः । [7-] विकर्या भूविवराः [-7] । किरतेः ऋदोरप् । [8]विकृतावादेशः, करोतेः छान्दसो दीर्घः । अवटा गर्ताः, [10-] तत्र भवाः अवट्याः [-10], खन्याः खननेन निर्वृत्ताः तटाकादयः । ह्रदाः अगाधा जलाशयाः । सूदाः कदाचिदप्यशोषितपङ्काः । [11]सुष्ठून्नयनीया सूद्या इति केचित्, [12]काष्ठादियन्त्रप्रभावा उच्यन्ते । सरांसि स्वयमुत्पन्ना जलाशयाः । [13]आर्तास्वार्तासु स्फुटं पुनः पुनर्विशन्ति उत्पद्यन्ते [14]एष्वाप

[1-] अपाव्यहोममन्त्रा द्वादशेऽभिहिताः । अथानुवाकद्वयेनापां [2-] होमा उच्यन्ते [-2] ॥

तथा च ब्राह्मणम् - "कूप्याभ्यः स्वाहाऽद्भ्यः स्वाहेत्यपा९ होमाञ्जुहोति" (तैब्रा ३.८.१७) इति ॥

कूप्याभ्य इति ॥ तत्र प्रथमानुवाकमन्त्रानाह [-1] - 'कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः

---

१. मै२ - 'तत्रैव' नास्ति । २. मै२ - होमः । ३. मै२ - 'द्व्यचाम्' नास्ति । ४. मै२ - नित्यस्वरितम् । ५. मै१ - 'कूल्याः' नास्ति । ६-६. मै१. अ. अ१ - कूलं समीपभावः क्षुद्रकूपस्थाः । ७-७. मै१ - कपिवरा भूरिवरा, अ - कपिवरद्रविवरा, अ१ - विकरा भूरिवरा । ८. अ१ - विकृतो वादेशः । ९. मै२ - अप् । १०-१०. मै. मै१. मै२. मै३. अ - 'तत्र भवा अवट्याः' नास्ति । ११. मै२ - सुष्ठूरुदनीया (?) । १२. मै२ - °यत्रप्रभाव । १३. मै१. अ - आतास्वार्तासु, अ१ - गर्तम् । १४. मै१. अ - एतेष्वपि ।

१-१. उ - अथान्यमन्त्रानाह, मै - अवाच्य - - - - । २-२. मै - होमः उच्यते ।

अपां होमाः]

पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा

पल्वल्याभ्यः । स्वाहा । वर्ष्याभ्यः । स्वाहा । अवर्ष्याभ्यः । स्वाहा । ह्रादुनीभ्य इति ह्रादुनि-भ्यः । स्वाहा । पृष्वाभ्यः । स्वाहा । स्यन्दमानाभ्यः । स्वाहा ।

इति [15]वेशन्ताः । [16]विशतेरौणादिकोऽतच् (उसू ३.११०) । [17]" वेशन्तहिमवद्भ्यामण् " (पा ४.४.११२), [18]अन्तोदात्तः इति केचित् । पल्वलानि [19-] वन्या जलाशयाः [-19] । वर्ष्याः [20-] वर्षे भवाः [-20] । वर्षे न भवन्तीत्यवर्ष्याः [21]पीडनप्रभावाः । " ययतोश्चातदर्थे " (पा ६.२.१५६) इत्युत्तरपदान्तोदात्तत्वम् । [22-] ह्रादुन्यः ह्रादुशब्दवत्यः [-22] । [23-] ह्रादेरौणादिको [24]निप्रत्ययः । [25]सांहितिकं दीर्घत्वम् [-23] । [26-] पृष्वाः अवश्यायजलानि संचितानीत्यन्ये । [27]स्यन्दमानाः [-26] [28]वहन्त्यो [29-] यत्र क्वापि [-29] । [30-V]स्थावराभ्यः तिष्ठन्तीभ्यः [-30] यत्र क्वापि । " स्थेशभास°"

स्वाहा पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा ' इति ॥ कूपे भवाः कूप्या आपः । नदीपूरणेन कूले तीरे भवाः कूल्याः । विकरे भूविवरे भवाः विकर्याः । अवटे गर्ते भवा अवट्याः । खननेन निष्पन्नाः खन्याः । ह्रदे भवा ह्रद्याः । सूदे पङ्के भवा सूद्याः । सरसि भवाः सरस्याः । [3]वेशन्ते भवा वैशन्त्यः । यत्र कूल्यादौ पुनः पुनरापो विशन्ति तत्रत्या इत्यर्थः । पल्वले [4]स्वल्पजलाशये

१५. अ - वैशन्ताः । १६. मै२ - °णादिकोरयच् । १७. [पाणिनिसूत्रमवलम्ब्यास्माभिः संशोधितोऽयं पाठः, मै - मुद्रितपुस्तके सर्वेष्वपि च लिखितपुस्तकेषु ' वेशन्तहिमवद्ध्यामणि ' इति पाठ उपलभ्यते ।] । १८. [अस्माभिः संशोध्य पुनर्दत्तः पाठोऽयं द्रष्टव्यः । सर्वेष्वपि लिखितपुस्तकेषु ' आदत्तभावः ' इति पाठ उपलभ्यते । मै - सूचितपाठस्तु ' अन्तोदात्तभावः ' इति ।] । १९-१९. अ१ - वन्यजलाशयाः । २०-२०. मै२ - वर्षप्रभवाः । २१. अ - विसन्नप्रभवाः । २२-२२. मै१ - ह्रादुनीभ्यः हृदाशब्दवत्यः ह्रादुनीभ्य इति, अ. अ१ - ह्रादिनीभ्यः ह्रादुन्यः शब्दवत्यः ह्रादुनीभ्य इति । २३-२३. मै१ - णादिक इनिप्रत्यये छान्दस°, अ - मारणादिकविनिप्रत्यये, अ१ - °दिको इनिप्रत्ययः दीर्घत्वम् । २४. मै२ - इमनिच् प्रत्ययः । २५. मै. मै१. मै३. अ. अ१ - छान्दसम् । २६-२६. अ - पुष्पाभ्यः अपर्याविन्य स्यन्दमानाः, अ१ - पुष्पाभ्यः अथान्ये स्यन्दमानाः । २७. मै२ - स्यन्नामन्नाना यत् कवबापि (?) । २८. अ१ - प्रवहन्त्यः । २९-२९. मै२ - ' यत्र क्वापि ' नास्ति । ३०-३०. अ१ - स्थावराः तिष्ठन्त्यः ।

३. म - वैशन्तेऽप्सु । ४. अ. आ. क. पा. हा. इ. वा. म - अत्यल्प° ।

स्थाव॒राभ्यः॒ स्वाहा॑ नादे॒यीभ्यः॒ स्वाहा॑ सैन्ध॒वीभ्यः॒ स्वाहा॑ समु॒द्रिया॑भ्यः॒ स्वाहा॒ सर्वा॑भ्यः॒ स्वाहा॑ ॥१३॥

(कूप्याभ्यश्चत्वारि॒ꣳशत् ।)

स्था॒व॒राभ्यः॑ । स्वाहा॑ । ना॒दे॒यीभ्यः॑ । स्वाहा॑ । सै॒न्ध॒वीभ्यः॑ । स्वाहा॑ । स॒मु॒द्रिया॑भ्यः । स्वाहा॑ । सर्वा॑भ्यः । स्वाहा॑ ॥१३॥

[कासं, अश्वमेध ४.२; कपिसं - - - -; मैसं - - - -; वासं २२.२५]

(पा ३.२.१७५) इति [31]वरच् । [32]नादेय्यः नद्यां भवाः [32] । "नद्यादिभ्यो ढक्" (पा ४.२.९७) । [33V]सैन्धवीभ्यः [34]महानदीप्रभवाभ्यः, पुंनदाः [35]सिन्धवः इति केचित् । औत्सर्गिकेण उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । समुद्रियाभ्यः । [36]"समुद्राभ्राद्घः" (पा ४.४.११८) । सर्वाभ्यः [37]इत्यनुक्तपरिग्रहार्थम् ॥

॥ इति सप्तमे चतुर्थे त्रयोदशोऽनुवाकः ॥

भवाः पल्वल्याः । वर्षे भवा वर्ष्याः । वर्षनैरपेक्ष्येण भूमाववस्थिता अवर्ष्याः । प्रवाहध्वनिसहिताः [5]ह्रादुन्यः । अवश्यायजन्याः [6]पृष्वाः । प्रवाहरूपाः स्यन्दमानाः । एकत्रावस्थिताः स्थावराः । नद्यां भवा नादेय्यः । सिन्धौ पुंनदे भवाः सैन्धव्यः । समुद्रे भवाः समुद्रियः । अनुक्तसंग्रहार्थः सर्वशब्दः ॥

॥ [7]इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके त्रयोदशोऽनुवाकः[7] ॥

---

३१. मै२ - अपवरच् । ३२-३२. अ. अ१ - नादेयीभ्यः नद्यां भवः । ३३. मै. मै१. मै३ - सैन्धव्यः । ३४. मै. मै१. मै३. अ. अ१ - महानद्दिप्रभवाः । ३५. मै२ - सिन्ध इव । ३६. मै२ - समुद्रयक् यः, अ - समुद्रान प्रापः, अ१ - समुद्रात् भ्राद्धः । ३७. मै२ - इत्युक्तपरि° ।

---

५. मै - ह्रादिन्यः । ६. मै - पृष्टाः । ७-७. मै - इति त्रयोदशोऽनुवाकः ।

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा

अद्भ्य इत्यत्-भ्यः । स्वाहा । वहन्तीभ्यः । स्वाहा । परिवहन्तीभ्य इति परि-वहन्तीभ्यः । स्वाहा । समन्तमिति सम्-अन्तम् । वहन्तीभ्यः । स्वाहा । शीघ्रम् । वहन्तीभ्यः । स्वाहा । शीभम् । वहन्तीभ्यः । स्वाहा । उग्रम् । वहन्तीभ्यः । स्वाहा ।

पुनरपि तत्रैवापां होमाः — 'अद्भ्यः स्वाहा' इत्यादि ॥ [१]Vअद्भ्यः सामान्याभिधानं, [२]विशेषान् वक्ष्यामीति । " ऊडिदम्°" (पा ६.१.१७१) इति विभक्तेरुदात्तत्वम् । वहन्त्यः । [३]परिवहन्त्यः मण्डलं [४]भ्रमन्त्यः । कूलं [५]भित्त्वाऽतिनिष्पतन्त्यः इत्यन्ये । Vसमन्तं वहन्त्यः कूले अतिलङ्घ्य सर्वतो गच्छन्त्यः । Vशीघ्रं द्रुतं यथा कूले [६]निपतिते [७]भवतः [८]तथा । Vशीभं [९]शोभनं कूलाबाधेन -[९] । Vउग्रं [१०]उद्गूर्णं [११]मेघपटलसंछन्नम् । Vभीमं [१२]भीतिहेतुजननं

अद्भ्य इति ॥ तस्मिन्नेवापां होमे द्वितीयानुवाकगतान् मन्त्रानाह - 'अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा' इति ॥ [१]उदकजातिमात्रयुक्ता आपः । प्रवाहरूपा वहन्त्यः । परिमण्डलरूपा [२]आवर्तगताः परिवहन्त्यः । [३-] भूमेः समतलत्वेन -[३] [४]सर्वतो गच्छन्त्यः [५-] समन्तं वहन्त्यः -[५] । निम्नाधिक्येन Vशीघ्रं वहन्त्यः । ईषन्निम्नत्वेन Vशीभं शोभनं यथा भवति तथा वहन्त्यः । [६]पर्वताग्रादधः [७-]Vउग्रं वहन्त्यः -[७] । दृश्यमानमकरादिजीवोपेता

---

१. अ१ - अद्भ्यः इति । २. मै२ - विशेषम् । ३. अ. अ१ - 'परिवहन्त्यः' नास्ति । ४. मै. मै१. मै३. अ. अ१ - भ्रमयन्त्यः । ५. मै२. अ - भित्वा निपतन्त्यः । ६. अ - निपतन्त्यः । ७. अ - 'भवतः' नास्ति । ८. अ. अ१ - 'तथा' नास्ति । ९-९. मै२ - शोभनकूला° । १०. मै२ - मा । ११. [सांहितिकेन 'वहन्तीभ्यः' इति पदेन अन्वयः स्फुटो न भवति ।] । १२. मै२ - भीमहेतु° ।

---

१. म - उदकजात्या प्रयुक्तः । २. मै - सावर्तगताः । ३-३. शृ१ - भूमेरतलत्वेन, म - भूमेः समस्थलत्वेन । ४. शृ१ - सहसा । ५-५. शृ१. वा. मै - 'समन्तं वहन्त्यः' नास्ति । ६. शृ१ - पर्वतादधः । ७-७. शृ१. मै - 'उग्रं वहन्त्यः' नास्ति ।

भी॒मं व॒हन्ती॑भ्य॒ः स्वाहाऽम्भो॑भ्य॒ः स्वाहा॒ नभो॑भ्य॒ः स्वाहा॒ महो॑भ्य॒ः स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥१४॥

(अ॒द्भ्य एका॒न्न त्रि॒ꣳशत् ।)

~~~~~~~~~~~~~~~~~~~~

भी॒मम् । व॒हन्ती॑भ्यः । स्वाहा॑ । अम्भो॑भ्य॒ इत्यम्भ॑ः-भ्य॒ः । स्वाहा॑ । नभो॑भ्य॒ इति॒ नभ॑ः-भ्य॒ः । स्वाहा॑ । महो॑भ्य॒ इति॒ मह॑ः-भ्य॒ः । स्वाहा॑ । सर्व॑स्मै । स्वाहा॑ ॥१४॥

[कासं, अश्वमेध ४.३; कपिसं - - - - ; मैसं - - - - ; वासं २२.२५]

~~~~~~~~~~~~~~~~~~~~

कृष्यमाणकूलपादपं महासत्त्वम् । अम्भांसि अस्मिन् लोके भवाः आपः " अयं वै लोकोऽम्भांसि " (तैब्रा ३.८.१८) इति ब्राह्मणम् । नभांसि आन्तरिक्ष्याः । महांसि अमुष्मिन्लोके भवाः । सर्वस्मै जलमात्राय ॥

॥ इति सप्तमे चतुर्थे चतुर्दशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

[V]भीमं वहन्त्यः । अम्भोनभोमहःशब्दैर्लोकत्रयगता आप उच्यन्ते । " अयं वै लोकोऽम्भांसि " (तैब्रा ३.८.१८) " अन्तरिक्षं वै नभाꣳसि " (तैब्रा ३.८.१८) । " असौ वै लोको महाꣳसि " (तैब्रा ३.८.१८) इति ब्राह्मणेनोक्तत्वात् । पूर्वानुवाकोक्तैर्विंशतिमन्त्रैरेतदनुवाकोक्तैर्द्वादशमन्त्रैश्च रात्रावन्नहोमाः कर्तव्याः । तेषामेव [8]मन्त्रविशेषप्रयुक्तोऽपां होमः इति व्यवहारः ॥

॥ [9]इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः[9] ॥

~~~~~~~~~~~~~~~~~~~~

८. क - °प्रयुक्तोऽयम् । ९-९. म - इति चतुर्दशोऽनुवाकः ।

शुनः प्रहारः]

यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ।

यः । अर्वन्तम् । जिघांसति । तम् । अभीति । अमीति । वरुणः । परः । मर्तः । परः । श्वा ।

श्वानं हन्यमानमनुमन्त्रयते - 'यो अर्वन्तम्' इति द्विपदया गायत्र्या ॥ [१-V]यः श्वा [V]अर्वन्तम् अश्वं [V]जिघांसति हन्तुमिच्छति [V]तं [V]वरुणः [V]अभ्यमीति आभिमुख्येन नाशयतु । [२]अमतेर्लेटि शपो लुकि "तुरुस्तुशम्यमः°" (पा ७.३.९५) इतीडागमः ॥

तं हतं [३]श्वानम् अश्वस्याधस्पदमुपास्यति - 'परः' इत्येकपदया गायत्र्या [-१] ॥ [४]योऽश्वस्य [५]हन्ता [V]मर्तः [६]मर्त्यः [७]सः [V]परः अस्तु [८]परस्तादस्तु [V]श्वा च परस्तादस्तु, [९-] इतोऽन्यत्र अस्तु [-९] । परशब्दात्परस्यास्तातेः छान्दसोऽसिप्रत्ययः । [१०]तेनान्तोदात्तत्वम् ॥

पूर्वयोरनुवाकयोरपां [१-] होमे मन्त्रा [-१] उक्ताः । अथास्मिन् [२]अनुवाके श्वप्रहारोऽभिधीयते ॥

य इति ॥ कल्पः - "योऽर्वन्तमिति सैध्रकेण मुसलेन पौंश्चलेयः [३]शुनः [४]प्रहन्ति" (आपश्रौ २०.३.१२) इति ॥ पाठस्तु - 'यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः' इति ॥ [V]यः अयं श्वा जले [५]स्नाप्यमानम् [V]अर्वन्तं स्वयमपि जले प्रविश्य हन्तुमिच्छति, तं श्वानं जलाधिपतिः [V]वरुणः [V]अभ्यमीति सर्वतो रोगग्रस्तं करोति ॥

पर इति ॥ कल्पः - "[६]तमश्वस्याधस्पदमुपास्यति परो मर्तः परः श्वेति" (आपश्रौ २०.३.१३) इति ॥ [७-] पाठस्तु - 'परो मर्तः परः श्वा' इति [-७] ॥ [V]परः [V]श्वा प्रबलोऽयं श्वा [८V]परः [V]मर्तः अस्तु परस्ताद्गत्वा मृतो भवतु ॥

१-१. मैर - 'यः - - - - गायत्र्या नास्ति । २. अ - अभिमतेर्लेटि । ३. मै. मै१. मैर. मै३. अ - 'श्वानम्' नास्ति । ४. अ१ - यो ह्यस्य । ५. अ१ - 'हन्ता' नास्ति । ६. मैर - 'मर्त्यः' नास्ति । ७. अ - 'सः' नास्ति । ८. अ - परस्तादस्मदस्तु । ९-९. मै. मैर. मै३ - इतोऽन्यं हिनस्तु, अ - इतोन्यं नस्तु । १०. मैर - °न्तोदात्तम्, अ - °न्तोदात्तः ।

१-१. अ. आ. क. पा. हा. इ. वा. वै. म - होममन्त्राः । २. अ. आ. क. पा. हा. इ. वा. वै - 'अनुवाके' नास्ति । ३. शृ१ - पुनः, मै - शुनम् । ४. अ. आ. क. पा. हा. इ. वा. वै - प्रहरति, शृ१ - प्रभवन्ति । ५. शृ१ - सेव्यमानम्, म - स्नाप्यमानम् । ६. मै - °धत्सदमु° । ७-७. अ. पा. हा. क. मै - 'पाठस्तु - - - - इति' नास्ति, [आ - मुद्रितावृत्तावयमंशः प्रथमपरिच्छेदानन्तरं 'रोगग्रस्तं करोति' इत्यस्योर्ध्वं कल्पपाठात् पूर्वमस्ति । परं सायणार्यशैलीमनुरुन्ध्यास्माभिर्व्यवस्थापितोऽयं क्रमोऽवगन्तव्यः ।] ८. शृ१ - 'परः' नास्ति ।

अ॒हं च॒ त्वं च॑ वृत्रह॒न्त्सं ब॑भूव स॒निभ्य॒ आ।
अ॒राती॒वा चि॑दद्रि॒वोऽनु॑ नौ शूर मꣳसतै भ॒द्रा इन्द्र॑स्य रा॒तयः॑।

अ॒हम्। च॒। त्वम्। च॒। वृ॒त्र॒ह॒न्निति॑ वृत्र-ह॒न्। समिति॑। ब॒भूव॒। स॒निभ्य॒ इति॑ स॒नि-भ्यः॒।
आ। अ॒रा॒ती॒वा। चि॒त्। अ॒द्रि॒व॒ इत्य॑द्रि-व॒ः। अन्विति॑। नौ॒। शू॒र॒।
म॒ꣳस॒तै॒। भ॒द्राः। इन्द्र॑स्य। रा॒तयः॑।

ब्रह्मा यजमानस्य हस्तं गृह्णाति - 'अहम्' चेति पञ्चपदया पङ्क्त्या ॥ हे वृत्रहन्, पाप्मनां हन्तः [११]यजमान, Vअहं Vच Vत्वं Vच Vसंबभूव, वचनव्यत्ययः [१२-] संबभूविथ(?)। छान्दसो लिट्। संबभूव [-१२] वा। सर्वार्थेषु संसृज्य वर्तावहै। Vसनिभ्यः सन्यर्थं सर्वे [१३]लाभाः संपद्यन्तामिति। आकारो मर्यादायाम्। हे अद्रिवः अद्रिमत् वज्रवत् इन्द्र, हे तदात्मन् ॥ [१४]"छन्दसीरः" (पा ८.२.१५) इति [-१४] मतुपो वत्त्वं, "मतुवसोः°" (पा ८.३.१) इति रुत्वम्। हे Vशूर, Vनौ त्वां च मां च Vअरातीवा Vचित् अदानवन्तावपि। अरातिरदानम्। [१५]ततः

अहमिति ॥ कल्पः - "अहं च त्वं च वृत्रहन्निति ब्रह्मा यजमानस्य हस्तं गृह्णाति" (आपश्रौ २०.३.१४) इति ॥ पाठस्तु - 'अहं च त्वं च वृत्रहन्त्सं बभूव सनिभ्य आ। अरातीवा चिदद्रिवोऽनु नौ शूर मꣳसतै भद्रा इन्द्रस्य रातयः' इति ॥ हे Vवृत्रहन् वैरिहन्तृत्वेनेन्द्रसमान यजमान, Vत्वं Vच Vअहं [९]ब्रह्मा च Vसनिभ्यः बहुभ्यो लाभेभ्यो [१०]बहुविधद्रव्यसिद्धये Vआ Vसंबभूव सर्वतः संयुक्तौ भवाव। [११-] हे Vअद्रिवः [-११], पर्वतसदृशो [१२]वज्रोऽस्यास्तीत्यद्रिमानिन्द्रः, स एवाद्रिवान् तद्रूप हे यजमान [१३]शूर, [१४]शौर्योपेतेन्द्रस्य देवाधिपतेः Vभद्राः Vरातयः कल्याणानि फलदानानि Vनौ आवाम् उभौ Vअनुमंसतै अनुमन्यन्तामङ्गीकुर्वन्तु। कीदृशौ नौ, Vअरातीवा रातिर्हविर्दानं [-१५] तद्युक्तौ रातिमन्तौ तद्रहितावरातिमन्तौ तावेवारातीवा Vचित् यद्यप्यावां हविर्दानरहितौ तथाऽपीन्द्रदत्तानि फलान्यावां प्रत्यागच्छन्त्वित्यर्थः ॥

---

११. [अस्माभिः शुद्धीकृतः पाठो द्रष्टव्यः, मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'यजमानः' इति लभ्यते।]। १२-१२. अ - संद्रक्ति तच्छान्दसो लुप् सम्भवेन। १३. मैर - लाभार्थिनः। १४-१४. मैर - छन्दसि। १५. मैर - तत्तत्।

---

९. शृ१. म. मै - होता। १०. अ. आ. क. पा. हा. इ. वा. बै. म. मै - द्रव्यलाभसिद्धये। ११-११. म - अद्रिवः अद्रिः, मै - हे अद्रिवसद्रिः। १२. मै - वज्रः सोऽस्यास्तीत्य°। १३. शृ१ - भूधर। १४. म - कार्योपेतेन्द्रस्य। १५. शृ१ - 'दानम्' नास्ति।

अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमान॑ँ
रजा॑ँसि । स्वेना हि वृत्र॑ँ
शवसा जघन्थ

अभीति॑ । क्रत्वा॑ । इन्द्र । भूः । अध॑ । ज्मन् । न । ते ।
विव्यक् । महिमान॑म् । रजा॑ँसि । स्वेन॑ ।
हि । वृत्रम् । शव॑सा । जघन्थ॑ ।

---

[१६]" छन्दसीवनिपौ " (पा ५.२.१२२ वा) [१७]इति मत्वर्थीयो वनिप् । " अन्येषामपि दृश्यते " (पा ६.३.१३७) इति दीर्घत्वम्, ततः परस्य द्विवचनस्य [१८]डाजादेशः । ईदृशावप्यावाम् Vइन्द्रस्य Vभद्रा गम्भीरा रातयः दानानि Vअनुशंसतै अनुमन्यताम् [१९]अस्मद्विषये । यद्यप्यावाम् [२०]अल्पहविर्मात्रप्रदानेन उपक्षीणौ [२१]तथाऽप्यावाभ्यां प्रभूतानि [२२]धनानि इन्द्रो ददात्विति भावः ॥

[२३-]' अभि क्रत्वा ' इत्यादि ॥ ' स्वेना हि ' इति [-२३] । सांहितिकं दीर्घत्वं [२४]छान्दसम् । [२५]Vशत्रुः Vते तव अन्तं विनाशं Vयुधा युद्धेनापि Vन Vविविदत् न वेत्तु न [२६]लभतां वा ।

अभीति ॥ कल्पः - " अभि क्रत्वेन्द्र भूरध ज्मन्नित्यध्वर्युर्यजमानं वाचयति " (आपश्रौ २०.३.१५) इति ॥ पाठस्तु - ' अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ् महिमानँ रजाँसि । स्वेना हि वृत्रँ शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ' इति ॥ हे Vइन्द्र परमैश्वर्ययुक्त यजमान, Vक्रत्वा अनेन क्रतुना Vअभिभूः शत्रुमभिभूतवानसि । Vअध अनन्तरं Vज्मन् अस्यां भूमौ, नकारान्तस्य ज्मन्शब्दस्य भूमिनामसु पठितत्वात् (निघण्टु १.१.३) । तस्यां भूमौ Vते त्वदीयं Vमहिमानं Vरजांसि जगद्रञ्जकानि चरितानि च न

---

१६. अ१ - छन्दसि । १७. मै२ - इति वनिप् । १८. मै२ - आजादेशः । १९. मै२ - अस्मिन् विषये सन्तु । २०. मै२ - अस्य हवि° । २१. मै२ - तयाद्यापि । २२. मै२ - धनानि तस्यै । २३-२३. मै२ - स्वेनेत्यस्य । २४. मै२ - ' छान्दसम् ' नास्ति । २५. मै२ - शत्रुम् । २६. मै२ - अह्वताम् ।

न शत्रुरन्तं विविद(१)युधा ते ॥१५॥

(विविदद्धे च ।)

न । शत्रुः । अन्तम् । विविदत् (१) । युधा । ते ॥१५॥

[कासं, अश्वमेध ४.४; कपिसं - - - -; मैसं ३.१२.१४; वासं २२.५]

[२७]वेत्तेर्विन्दतेर्वा लेटि शपः " लेटोऽडाटौ " (पा ३.४.९४) इत्यडागमः " नाभ्यस्तस्याचि°" (पा ७.३.८७) इति गुणाभावः ॥

॥ इति सप्तमे चतुर्थे पञ्चदशोऽनुवाकः ॥

Vविव्यक् कश्चिदपि विवेक्तुं न समर्थः । त्वं तु Vस्वेन Vशवसा स्वकीयेन बलेन Vवृत्रं Vजघन्थ शत्रुं हतवानसि । स तु Vशत्रुः युधा युद्धेन Vते Vअन्तं त्वदीयं नाशं Vन Vविविदन् नैव लब्धवान् ॥

॥ [१६-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके पञ्चदशोऽनुवाकः[-१६] ॥

२७. मैर - 'विन्दतेः' नास्ति ।

१६-१६. म - इति पञ्चदशोऽनुवाकः ।

यव्याख्यो होमः]

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये
नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा
कुर्वधिपतिरहं प्रजानां भूयासं

नमः । राज्ञे । नमः । वरुणाय । नमः । अश्वाय । नमः । प्रजापतय इति
प्रजा-पतये । नमः । अधिपतय इत्यधि-पतये । अधिपतिरित्यधि-पतिः ।
असि । अधिपतिमित्यधि-पतिम् । मा । कुरु ।
अधिपतिरित्यधि-पतिः । अहम् ।
प्रजानामिति प्र-जानाम् ।
भूयासम् ॥

रात्रिहोमेषु यव्यानि जुहोति - ‘ नमो राज्ञे ’ इत्यादि । सर्वं निगदसिद्धम् । राजा सोमः । मां [V]धेहि धारय । [1]यत्रावस्थापितेन मया भूयोऽपि [2]किंचित्कर्तव्यमस्ति तत्र [V]मां [3]स्थापय [4]यद्दातव्यम् ॥

पञ्चदशे [1] शुनः प्रहारः [1] अभिहितः । षोडशे यव्याख्यो होमोऽभिधीयते । तथा च ब्राह्मणम् - “ नमो राज्ञे नमो वरुणायेति यव्यानि जुहोति ” (तैब्रा ३.८.१८) इति ॥

नम इति ॥ पाठस्तु - ‘ नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा ’ इति ॥ राजा सोमः । इतरे प्रसिद्धाः । अधिपतिशब्देन धर्मदेवतोच्यते । “ धर्मो वा अधिपतिः ” (तैब्रा ३.९.१६) इति ब्राह्मणेनोक्तत्वात् । हे धर्मदेव, त्वम् [V]अधिपतिः [V]असि [V]माम् अपि [V]अधिपतिं [V]कुरु [2]त्वत्प्रसादात् [V]अहं [V]प्रजानाम् [V]अधिपतिः [V]भूयासम् । [V]मां [V]धेहि प्रजानामाधिपत्ये स्थापय । मयि च

---

१. मैर - यात्राव° । २. मैर - क्वचित्कर्त° । ३. अ१ - स्थापय तत्र मां स्थापय । ४. अ१ - निधातव्यम् ।

१-१. म - अश्वप्रहारः । २. मै - तत्प्रसादात् ।

मां धे॑हि॒ मयि॑ धेह्यु॒पाकृ॑ताय॒ स्वाहाऽऽल॑ब्धाय॒ स्वाहा॑ हु॒ताय॒ स्वाहा॑ ॥१६॥

(नम॒ एका॒न्नत्रि॒ꣳशत् ।)

माम् । धे॒हि॒ । मयि॑ । धे॒हि॒ । उ॒पाकृ॑ताये॒त्युप-आकृ॑ताय । स्वाहा॑ । आल॑ब्धा॒येत्या-ल॒ब्धा॒य॒ । स्वाहा॑ । हु॒ताय॑ । स्वाहा॑ ॥१६॥

[कासं, अश्वमेध ४.५; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'उपाकृताय' इत्यादौ लिङ्गादेव सिद्धो विनियोगः । [५]आद्ययोः " गतिरनन्तरः " (पा ६.२.४९) इति [६]गतेः प्रकृतिस्वरत्वम् ॥

॥ इति सप्तमे चतुर्थे षोडशोऽनुवाकः ॥

ताः प्रजाः पालनीयत्वेन स्थापय । तैरेतैः [३]षड्भिर्यव्यनामकैरन्नहोमाञ्जुहुयात् । 'उपाकृताय' इत्यादिमन्त्राणां त्रयाणां कालविशेषे होमो ब्राह्मणे श्रूयते - " उपाकृताय स्वाहेत्युपाकृते जुहोति । आलब्धाय स्वाहेति नियुक्ते जुहोति । हुताय स्वाहेति हुते जुहोति " (तैब्रा ३.९.१६) इति ॥

॥ [४] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके षोडशोऽनुवाकः [४] ॥

५. मै२ - आमयोः । ६. मै. मै१. मै२. मै३ - 'गतेः' नास्ति ।

३. म - °कैरन्नहोमं जुहु° । ४-४. मै - इति षोडशोऽनुवाकः ।

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।
पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड ।

मयोभूरिति मयः-भूः । वातः । अभीति । वातु । उस्राः । ऊर्जस्वतीः । ओषधीः । एति । रिशन्ताम् । पीवस्वतीः । जीवधन्या इति जीव-धन्याः । पिबन्तु । अवसाय । पद्वत इति पत्-वते । रुद्र । मृड ।

तत्रैव दश गव्यानि जुहोति - 'मयोभूः' [1]इत्यादिना ॥ त्रैष्टुभः सर्वोऽनुवाकः । "इह धृतिः" (तैसं ७.१.१२) इत्यादि [2]यजुः । "महीमू षु" (तैसं १.५.११), "सुत्रामाणम्" (तैसं १.५.११) इति [3]द्वयोः त्रिष्टुभोः प्रतीकग्रहणम् । तत्र प्रथमं — 'मयोभूः' इत्यादि । हे [V]रुद्र, त्वत्प्रसादात् [V]मयोभूः सुखस्य भावयिता । "बहुलमन्यत्रापि°" (उसू २.२३) इति णिलुक् । ईदृशः [V]वातः [V]उस्राः [4]गाः [V]अभिवातु आभिमुख्येन सेवताम् । [V]ऊर्जस्वतीः रसवतीः [V]ओषधीः [5]तृणादीनि [V]आरिशन्ताम् आस्वादयन्तु । रिशतिरभ्यवहारे । किं च — [V]पीवस्वतीः पीवस्वत्यः स्थौल्यवत्यः अकृशाः । "पीव स्थौल्ये" (धापा ५६४), असुनि "वा छन्दसि" (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम् । [6][V]जीवधन्याः जीववत्साः क्षीरादिधनमर्हन्तीति धन्या वत्साः, ईदृश्यः सत्यः [V]पिबन्तु । किम् ? स्वादूदकमिति सामर्थ्याद्गम्यते । [7]यद्वा - याभिः जीवधन्या भवन्ति ता अपः पिबन्तु । किञ्च - [V]अवसाय [8]अवितव्याय (द्र.नि. १.१७)

षोडशे यव्याख्यो होमोऽभिहितः । सप्तदशे गव्याख्यैर्मन्त्रैर्होमोऽभिधीयते ॥

तथा च ब्राह्मणम् - "मयोभूर्वातो अभि वातूस्रा इति गव्यानि जुहोति" (तैब्रा ३.८.१८) इति ॥

मयोभूरिति ॥ तत्र प्रथममाह - 'मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड' इति ॥ [V]मयोभूः सुखस्य भावयिता [1][V]वातः वायुः [V]उस्रा [2]अभि [3-] सर्वा गाः[-3] अभिलक्ष्य [V]वातु [4]प्रसरतु, अतिवातेनोपद्रवं मा करोतु किन्तु मन्दवातेन गवां सुखं यथा भवति तथा [5][V]एव वातु । एताश्च [6]गावः [V]ऊर्जस्वतीः रसयुक्ताः [V]ओषधीः [7][V]आरिशन्ताम् आस्वादयन्तु ।

---

१. अ - इत्यादीनि । २. मै२ - यजुर्भिः । ३. मै२ - 'द्वयोः' नास्ति । ४. अ१ - गौः । ५. मै२ - तृणादिः । ६. अ - 'जीवधन्याः' नास्ति । ७. अ१ - 'यद्वा' नास्ति । ८. अ - अद्वितत्वाय । ९. मै२ - असुच् प्रत्ययः ।

---

१. मै - चात्रो । २. क - 'अभि' नास्ति । ३-३. म - सर्वदा, अ. पा. इ. वा - सर्वदौ । ४. वा - प्रसरति । ५. अ. आ. क. पा. हा. इ. वा. वै. म - 'एव' नास्ति, मै - एवम् । ६. शृ१ - गाः । ७. म - आविशन्ताम्, मै - आदिशन्ताम् ।

[गव्याख्यो होमः

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।
या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ।

याः । सरूपा इति स-रूपाः । विरूपा इति वि-रूपाः । एकरूपा इत्येक-रूपाः । यासाम् । अग्निः । इष्ट्या । नामानि । वेद । याः । अङ्गिरसः । तपसा । इह । चक्रुः । ताभ्यः । पर्जन्य । महि । शर्म । यच्छ ।

---

[९]अवतेरौणादिकोऽसच्प्रत्ययः (उसू ३.११७) । [V]पद्वते [१०]पादवते सञ्जातगमनसामर्थ्याय [११]अभीताय [V]मृड सुखय । जातावेकवचनम् , " क्रियाग्रहणं कर्तव्यम् " संप्रदानत्वम् । [१२]देवस्य पशूनां पतित्वात् [१३]तमेवासां रक्षणं प्रार्थयते ॥

अथ द्वितीया - ' याः सरूपाः ' इति ॥ [V]सरूपाः समानसंस्थानाः, [V]विरूपाः विविधशुक्लादिवर्णाः [V]एकरूपाः एकजात्यविच्छिन्नाः [V]यासां [V]नामानि नमनप्रकारान् यागं प्रति [१४-] साधनभावात् आज्यपयोदधिलक्षणान् [-१४] [V]अग्निः [V]इष्ट्या [१५-] यागेन [V]वेद जानाति [-१५], यद्यस्याः विहितं तत्तदेवान्या [१६]देवता [१७]जानाति, अग्निस्तु सर्वाणीति । याः (गाः) च

जीवरूपं धनं जीवधनं प्राणिजातमित्यर्थः । तदर्हन्तीति [V]जीवधन्याः । [८]पातुं योग्या आपस्ताश्च पीबस्वत्यः पानेन पुष्टिरूपस्य [९]स्थौल्यस्य [१०]प्रापणात् तादृशीरपो गावः पिबन्तु । [११-] हे [V]रुद्र [-११], [V]अवसाय अवितुं रक्षितुं [१२]योग्याय [V]पद्वते पादसंचारिणे पशवे [V]मृड सुखं कुरु ॥

या इति ॥ अथ द्वितीयामाह - ' याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद । या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ' इति ॥ [V]याः गावः [१३][V]सरूपाः समानप्रमाणदेहाः [V]विरूपाः [१४]विविधवर्णाः [V]एकरूपा एकजातियुक्ताः [V]अग्निः आहवनीयादिरूपः [V]इष्ट्या यागेन निमित्तभूतेन [V]यासां गवां [V]नामानि " सा विश्वायुः सा विश्वव्यचाः [१५-] सा विश्वकर्मा "[-१५] (तैसं १.१.३) इत्यादीनि, " इडे

---

१०. अ - ' पादवते ' नास्ति । ११. मै२ - अभीकाय । १२. अ - वेदस्य । १३. मै२ - तमेमावश्यम् । १४-१४. मै२ - साधनभाविनं त्यपयोदस्यादिलक्षणम् । १५-१५. मै२ - यागो देव न जानाति । १६. अ१ - देवान् , मै२ - ' देवताः ' नास्ति । १७. अ१ - देवतानामिति ।

---

८. वा - पातुं पिबन्तु , इ - ' पातुम् ' नास्ति । ९. म - ' स्थौल्यस्य ' नास्ति । १०. म - प्रदीपनात् । ११-११. म - ' हे रुद्र ' नास्ति । १२. मै - योगाय । १३. मै - सुरूपाः । १४. म - विविधकर्णा । १५-१५. म. मै - ' सा विश्वकर्मा ' नास्ति ।

गव्याख्यो होमः]

या देवेषु तनुवमैरयन्त यासाᳪ सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र (१) गोष्ठे रिरीहि ।

याः । देवेषु । तनुवम् । ऐरयन्त । यासाम् । सोमः । विश्वा ।रूपाणि । वेद । ताः ।
अस्मभ्यमित्यस्म-भ्यम् । पयसा । पिन्वमानाः । प्रजावतीरिति
प्रजा-वतीः । इन्द्र (१) । गोष्ठ इति गो-स्थे । रिरीहि ।

Vअङ्गिरसः Vतपसा [१८]इत्थंभूताः तपस्विनः [१९]Vचक्रुः । [२०-] यद्वा - तपसा चक्रुः [-२०] तपसा [२१]शोधितवत्यः । Vइह Vताभ्यः गोभ्यः, हे Vपर्जन्य, Vमहि [२२]महत् Vशर्म सुखं Vयच्छ देहि ॥

अथ तृतीया - [२३]'या देवेषु' इति ॥ Vया Vदेवेषु [२४]देवनिमित्तमेव । निमित्तात्सप्तमी । Vतनुवम् आत्मशरीरम् Vऐरयन्त गमितवत्यः [२५]देवयागार्थमेव दत्तवत्यः । Vयासां Vरूपाणि [२६-] दध्यादिलक्षणानि विश्वान्यपि [-२६] Vसोमः Vवेद जानाति Vताः Vपयसा सर्वाः प्रजाः Vपिन्वमानाः तर्पयन्ति । "[२७]पिवि प्रीणने" (धापा ५८९) । Vप्रजावतीः शोभनपुत्रपौत्रादिमतीः, हे Vइन्द्र , Vगोष्ठे व्रजे Vअस्मभ्यम् [२८]अस्मदर्थं Vरिरीहि [२९-] समागमय । "[३०-] रि गतौ" [-२९-३०] (धापा १४२९) । व्यत्ययेन परस्मैपदम् , शपः श्लुः ॥

रन्तेऽदिते" (तैसं ७.१.६) इत्यादीनि वा श्रुत्युक्तानि Vवेद जानाति । Vअङ्गिरसः महर्षयः Vतपसा स्वकीयेन तपःसामर्थ्येन Vयाः गा इह भूमौ Vचक्रुः स्थापितवन्तः । हे Vपर्जन्य जलदेव, ताभ्यो [१६]गोभ्यः Vमहि Vशर्म Vयच्छ महत्सुखं देहि ॥

या इति ॥ अथ तृतीयामाह - 'या देवेषु तनुवमैरयन्त यासाᳪ सोमो विश्वा रूपाणि वेद । ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि' इति ॥ Vयाः गावः Vदेवेषु निमित्तभूतेषु Vतनुवं शरीरम् Vऐरयन्त भूमौ प्रवर्तितवत्यः Vसोमः देवः Vयासां गवां Vविश्वा Vरूपाणि शुक्लकृष्णादीनि

---

१८. अ. अ१ - इत्थंभूतान् । १९. [मै मुद्रितावृत्तौ 'चक्रुः' इत्यस्यानन्तरं '(कतरव्यत्ययः)' इति, अ१ - इत्यस्मिन् कोशे च 'कृतवत्यः' इत्यधिकोंऽश उपलभ्यते ।] ।२०-२०. मै२ - 'यद्वा - - - - चक्रुः' नास्ति । २१. मै२ - शोषितवत्यः । २२. मै२ - महान् । २३. मै२ - 'या' नास्ति । २४. मै. मै१. मै२. मै३. अ१ - देवनिमित्तम् । २५. अ१ - देवतायागार्थमेव । २६-२६. अ१ - °लक्षणविश्वान्यपि । २७. अ - जिवि । २८. अ - अस्मदर्थे । २९-२९. अ - 'समागमय - - - - गतौ' नास्ति । ३०-३०. अ१ - रिरीहि ।

---

१६. हा - 'गोभ्यः' नास्ति ।

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सꣳसदेन ।

प्रजापतिरिति प्रजा-पतिः । मह्यम् । एताः । रराणः । विश्वैः । देवैः । पितृभिरिति पितृ-भिः । संविदान इति सं-विदानः । शिवाः । सतीः । उपेति । नः । गोष्ठमिति गो-स्थम् । एति । अकः । तासाम् । वयम् । प्रजयेति प्र-जया । समिति । सदेम ।

[31]चतुर्थी — ‘ प्रजापतिः ’ इति ॥ Vमह्यं मदर्थं Vप्रजापतिः Vएताः गाः [32]Vरराणः ददत् [33]उत्पादयन् मह्यं च ददत् । रातेर्व्यत्ययेनात्मनेपदम् , शपः श्लुः, “ अभ्यस्तानामादिः ” (पा ६.१.१८९) इत्याद्युदात्तत्वम् । Vविश्वैः Vदेवैः Vपितृभिः च Vसंविदानः ऐकमत्यं गतः । “ समोगम्यृच्छि° ” (पा १.३.२९) इत्यात्मनेपदम् । Vशिवाः कल्याणस्वभावाः Vसतीः सततं भवतीः [34]Vनः अस्माकं सम्बन्धिनं Vगोष्ठं गवां स्थानम् Vउपाकः उपाकरोतु [35-] उपागमयतु । [36]करोतु [37]वा [-35] । करोतेः छान्दसो लुङ् , “ मन्त्रे घस° ” (पा २.४.८०) इति च्लेर्लुक् । [38-] लिङि वा शपो लुक् [-38] । Vवयं च Vतासां गवां Vप्रजया पुत्रपौत्रादिकया Vसंसदेम [39]संगसीमहि । सीदतेराशिषि लिङि “ लिङ्याशिष्यङ् ” (पा ३.१.८४) इत्यङ् , “ छन्दस्युभयथा ” (पा ३.४.११७) इति सार्वधातुकत्वात् सलोपः ॥

बहुक्षीराल्पक्षीरादीनि च सर्वाणि रूपाणि Vवेद जानाति, हे Vइन्द्र, Vपयसा Vपिन्वमानाः स्वकीयेन क्षीरेण प्राणिजातं [17]प्रीणयन्तीः Vप्रजावन्तीः बहुवत्सोपेताः Vताः गाः Vअस्मभ्यम् अस्मदर्थं Vगोष्ठे Vरिरीहि गोशालायां प्रापय ॥

प्रजापतिरिति ॥ अथ चतुर्थीमाह - ‘ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः । शिवा सतीरूप नो गोष्ठमाऽकस्तासां वयं प्रजया सꣳ सदेम ’ इति ॥ यः Vप्रजापतिः सोऽयं Vमह्यं यजमानाय Vएताः उक्तलक्षणाः [18]गाः Vरराणः प्रयच्छन् [19]Vविश्वैः सर्वैः [20]Vदेवैः Vपितृभिः च Vसंविदानः ऐकमत्यं

३१. अ - चतुर्धः । ३२. अ - रराणाः । ३३. मैर - उत्पादयत् । ३४. मैर - ‘ नः ’ नास्ति । ३५-३५. अ - ‘ उपाग° - - - - वा ’ नास्ति । ३६. मैर - करोति । ३७. मैर - वा गमयतु । ३८-३८. अ - ‘ लिङि - - - - लुक् ’ नास्ति । ३९. मैर - आꣳसीमहि ।

१७. मै - प्रीणयः ताः । १८. म - गावः, मै - माः । १९. क - विश्वैः देवैः । २०. शृ१ - ‘ देवैः ’ नास्ति ।

कि॑ स्वि॑दासीत् पू॒र्वचि॑त्तिः कि॑ स्वि॑दासीद् बृ॒हद्वयः। कि॑ स्वि॑दासीत् पि॒शङ्गि॒ला कि॑ स्वि॑दासीत् पि॒लिप्पि॒ला।

किम्। स्वि॒त्। आ॒सी॒त्। पू॒र्वचि॑त्ति॒रिति॑ पू॒र्व-चि॒त्तिः। किम्। स्वि॒त्। आ॒सी॒त्। बृ॒हत्। वयः॥ किम्। स्वि॒त्। आ॒सी॒त्। पि॒श॒ङ्गि॒ला। किम्। स्वि॒त्। आ॒सी॒त्। पि॒लि॒प्पि॒ला।

अथ होतुः प्रश्नाः, ब्रह्मणः प्रतिवचनानि - 'किं स्विदासीत्' इत्यादीनि, आनुष्टुभः सर्वोऽनुवाकः। पृच्छामीति द्वे त्रिष्टुभौ। तत्र [1]प्रथमा 'किं स्वित्' इति प्रश्नः। Vकिम् इति सामान्यविवक्षया नपुंसकत्वम्। Vस्वित् इति वितर्के। किं नु Vपूर्वचित्तिः Vआसीत् पूर्वा प्रथमा चित्तिः ज्ञानमस्याः, [2]किं नु इदमेव श्रेष्ठमिति प्रथमं चिन्त्यत इत्यर्थः। [3]उत्तरापेक्षया [4]स्त्रीलिङ्गता। यद्वा- पूर्वे देवाः त एव चित्तयश्चेतयितारो यस्याः। कर्मणि क्तिन्, कर्तरि बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। [5]तत्रान्तोदात्तत्वं छान्दसम् [?]। Vकिं नु खलु Vबृहत् महत् Vवयः [6]अन्नमयम् Vआसीत्। यदन्नं लब्ध्वा पुनरन्यदन्नं न मृग्यं भवति [7]तन्महत्। Vकिं वा नु खलु Vपिशङ्गिला Vआसीत्। "पिश अवयवे" (धापा १५३९) [8]तौदादिकः। इगुपधलक्षणः कः (पा ३.१.१३५)।

सप्तदशो गव्याख्यहोम उक्तः। [1]अथाष्टादशो ब्रह्मोद्यमुच्यते॥

कल्पः - "अभितोऽग्निष्ठं [2]ब्रह्मोद्याय पर्युपविशेते, दक्षिणो ब्रह्मोत्तरो होता। "कि॑स्विदासीत् पूर्वचित्तिः" (तैसं ७.४.१८) इत्येतस्यानुवाकस्य पृष्टानि होतुः प्रतिज्ञातानि ब्रह्मणः" (आपश्रौ २०.१८.६-७) इति। एकविंशतियूपेषु मध्यवर्ती यूपः [3]अग्निष्ठः। ब्राह्मणयोरुक्तिप्रत्युक्तिरूपेण [4]संवादा ब्रह्मोद्यम्। [5]पृष्टानि [6-] प्रश्नाख्यानि वाक्यानि [-6]। प्रतिज्ञातानि प्रत्युत्तरवाक्यानि (णि)॥

किमिति॥ तस्मिन् ब्रह्मोद्ये [7]पृष्टामृचमाह - 'कि॑ स्विदासीत् पूर्वचित्तिः कि॑ स्विदासीत् बृहद्वयः। कि॑ स्विदासीत् पिशङ्गिला कि॑स्विदासीत् पिलिप्पिला' इति॥ हे ब्रह्मन्, Vपूर्वचित्तिः Vकिं Vस्वित् Vआसीत्। चित्तिर्ज्ञानम्। पूर्वचित्तिः [8]जन्मप्रभृति [9]ज्ञानम्, उत्पन्नानां यस्यां विद्यते सा पूर्वचित्तिः।

१. मै२ - प्रथमम्। २. मै२ - किन्तु। ३. मै२ - उत्तरापेक्षतया। ४. मै२ - त्रिलिङ्गता। ५. मै२ - इतरत्रान्तो [?]। ६. मै२ - अन्यम्। ७. मै२ - तस्मात् महत्। ८. मै. मै१. मै३. अ१ - रौधादिकः, अ - रौणादिकः।

१. अ. आ. क. पा. हा. इ. वा. वै. मै - 'अथ' नास्ति। २. मै - ब्रह्मोद्याथ। ३. शृ१ - अग्निष्टोमः। ४. अ. आ. क. पा. हा. इ. वा. वै. म - संवादः। ५. शृ१ - प्रश्नानि। ६-६. अ. आ. क. पा. हा. इ. वा. वै. म. मै - प्रश्नवाक्यानि। ७-७. म. मै. शृ१ - प्रतिज्ञामृचमाह। ८. शृ१ - °प्रभृत्यादि। ९. मै - स्थानमुत्प°।

द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः । रात्रिरासीत् पिशङ्गिलाऽविरासीत् पिलिप्पिला ।

द्यौः । आसीत् । पूर्वचित्तिरिति पूर्व-चित्तिः । अश्वः । आसीत् । बृहत् । वयः ॥ रात्रिः । आसीत् । पिशङ्गिला । अविः । आसीत् । पिलिप्पिला ।

[९]पिशशब्देन [१०]रूपादीन्युच्यन्ते । तानि गिरति [११]छादयतीति छान्दसः कः, करणे वा " घञर्थे कविधानम् " (पा ३.३.५८वा) इति कः । पचाद्यचि (गणपाठ ३७, पा ३.१.१३४) वा [१२-] छन्दसि कित्वम् [-१२], " अचि विभाषा " (पा ८.२.२१) इति लत्वं [१३]पूर्वपदस्याम्भावः । यद्वा – पिशङ्गो नानावर्णः तेन तद्वती पिशङ्गिला, तुन्दादिलक्षण इलच् (गणपाठ १८२, पा ५.२.११७) । केन रूपादिकं छाद्यते केन वा प्रकाश्यते [१४]इत्यहोरात्राभिप्रायेण प्रश्नः । [१५-] नानावर्णता चाहर्मिश्रत्वात् [-१५] । [V]किं वा [V]स्वित् [V]पिलिप्पिला [V]आसीत् [१६-]अत्यर्थं [१७]प्रीणयित्री पिलिप्पिला [-१६] । [१८-]" पृ प्रीतौ [-१८]" (धापा १३३९), [१९]यङ्लुगन्तात्परिपर्तेः पचाद्यचि [२०-] गुणे उपधाया [२१]इत्त्वं, उभयत्र लत्वं, पकारोपजनः, अभ्यासस्य चेत्त्वं [२२]छान्दसम् । पिलिप्पिलेति धात्वन्तरमौज्ज्वल्यवाचीति केचित् । ततः पचाद्यच् [-२०] । का

ताद्दशं ज्ञानं किं नामासीदित्यर्थः । सोऽयमेको होतुः प्रश्नः । कान्त्यर्थात् [१०]वीधातोः [११]वयःशब्दनिष्पत्तेः । [१२-] अत्यन्तं कमनीयं वस्तु किं नाम [V]आसीत् इति द्वितीयः प्रश्नः । [V]पिशङ्गिला मिश्रवर्णा किं नाम [V]आसीत् इति तृतीयः प्रश्नः । [V]पिलिप्पिला [-१२] अत्यन्तं प्रकाशमाना [१३]सिता किं नाम [V]आसीत् इति चतुर्थः प्रश्नः । [१४]सामान्याभिप्रायेण किमिति नपुंसकनिर्देशः ॥

द्यौरिति ॥ अथ द्वितीयामाह - ' द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः । रात्रिरासीत् पिशङ्गिलाऽविरासीत् पिलिप्पिला ' इति ॥ तान्येतानि ब्रह्मण उत्तराणि । येयं [V]द्यौः सैव [V]पूर्वचित्तिः ।

९. मै२ - पिशङ्गशब्देन । १०. मै२ - रूपादित्युच्यत । ११. मै२ - छन्दयतीति । १२-१२. मै. मै१. मै३. अ. अ१ - बहुलं छन्दसि इति कित्वम् । १३. अ - पूर्वपदप्रकृतिस्वरस्यामभावः । १४. मै२ - इत्यादिरात्रा° । १५-१५. मै२ - नानावर्णः ता चाहंमिश्रत्वात् । १६-१६. मै२ - ' अत्यर्थं - - - - पिलिप्पिला ' नास्ति । १७. अ. अ१ - प्रीणयति । १८-१८. मै२ - वृ पाता । १९. मै२ - पुलिलङ्गता परिवर्ते । २०-२०. अ - ' गुणे - - - - पचाद्यच् ' नास्ति । २१. मै२ - द्वित्वम् । २२. अ१ - छान्दसं, पृ प्रीतौ यङ्लुगनात् ।

१०. म - वनिधातोः, वा - वेतधातोः, उ. अ - वेञ्धातोः, शृ१. मै - वेतिधातोः, क - वाधातोः, पा - वेस्फीञ्धातोः, इ - वेन्धातोः । ११. अ. आ. क. पा. हा. इ. वा. वै. म - वयशब्दः । १२-१२. वा - ' अत्यन्तं - - - - पिलिप्पिला ' नास्ति । १३. अ. आ. क. पा. हा. इ. वा. वै. म - श्वेता । १४. मै - सामान्यविषयत्वाभिप्रायेण ।

कः स्विदेकाकी चरति क उं स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महत् ।

कः । स्वित् । एकाकी । चरति । कः । उ । स्वित् । जायते । पुनः ॥
किम् । स्वित् । हिमस्य । भेषजम् । किम् । स्वित् । आवपनमित्या-वपनम् । महत् ।

[V]स्वित् उज्ज्वलयित्री प्रजानामिति ॥

अथ उत्तराणि — ' द्यौः ' इत्यादीनि । [V]द्यौः [V]पूर्वचित्तिः [23]चित्यानां मुख्यत्वात् देवैर्ज्ञातव्यत्वाच्च । तस्य च साधनं [V]अश्वः [V]बृहत् [24][V]वयः । तेन [25]च [26]सकृदिष्ट्वा [27-] वरामुच्छ्रितिं प्राप्य पुनरन्यत्स्थानं भोगार्थमिच्छतीति तस्य निमित्तकारणम् [-27] । [V]रात्रिः [V]पिशङ्गिला, सा हि रूपाणां [28]छादयित्री, स्वयं च [29]प्रकाशाप्रकाशव्यामिश्ररूपा, तारकाभिरन्धकारेण च समन्वितत्वात् अहर्मिश्रत्वाद्वा [30]पिशङ्गिला । [31-] अथ तस्याप्यभिवृद्धिकारणं [-31] [V]अविः [32-][V]पिलिप्पिला अवति [-32] [33-] विश्वमित्यविः वृष्टिः [-33] । आदित्यप्रभवा श्रीर्वा । सा हि जगत् भृशं प्रीणयति [34]ज्वलयति च " श्रीर्वै पिलिप्पिला " (तैब्रा ३.९.५) इति च ब्राह्मणम् ॥

पूर्वप्रवृत्तं हि ज्ञानं तत्रास्ति, तत्रत्यानां देवानां जन्मप्रभृतिज्ञानोपेतत्वात् । तदिदं प्रथममुत्तरम् । [V]अश्वः अत्यन्तं कमनीयं वस्तु । अत एव हि राजानः [15]सर्वप्रयत्नेनाप्यश्वान् संपादयन्ति । तदिदं द्वितीयमुत्तरम् । [V]रात्रिः मिश्रवर्णा अन्धकारस्य नक्षत्रचन्द्रप्रकाशस्य च विद्यमानत्वात् । तदिदं तृतीयमुत्तरम् । अवति सर्वं प्राणिजातमिति श्रीः [V]अविः । सैवातिप्रकाशा । अत एव ब्राह्मणे " श्रीर्वै पिलिप्पिला (तैब्रा ३.९.५) " । इति [16]आख्यातम् ॥

क इति ॥ [17-] अथ तृतीयामाह -' कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महत् ' इति ॥ [18]त एते होतुः प्रश्नाः । [V]कः नामात्र लोके सहायान्तरनिरपेक्ष

२३. अ - चैत्यानाम् । २४. अ - वयम् । २५. मै. मै१. मै२. मै३ - हि । २६. अ१ - सकृदिष्ट्वा उपरेम । २७-२७. अ. अ१ -' वरामुच्छ्रितिं - - - - °कारणम् ' नास्ति । २८. मै२ - छादयन्ती । २९. मै२ - प्रकाशव्यामिश्ररूपा । ३०. मै. मै१. मै३. अ. अ१ -' पिशङ्गिला ' नास्ति । ३१-३१. अ - अस्थाप्यभि°, मै२ - अस्मादप्यभि । ३२-३२. मै२ - पिप्पलाश्ववतिः । ३३-३३. मै२ - विश्वमित्यविः धृष्टिः, अ - विश्वमित्यन्दृष्टिः, अ१ - वायमित्यविः वृष्टिः । ३४. अ - यद्वयमिति । ३५. मै२ - स्विद् । ३६. मै२ - °वचनादि ।

१५. मै - सर्वप्रयत्नेनाश्वान् । १६. मै - व्याख्यातम् । १७-१७. वा -' अथ - - - - विशालम् ' नास्ति । १८. म - अतः ।

सूर्य एकाकी चरति (१) चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ।

सूर्यः । एकाकी । चरति (१) । चन्द्रमाः । जायते । पुनः । अग्निः । हिमस्य । भेषजम् । भूमिः । आवपनमित्या-वपनम् । महत् ।

'किं [35]स्विदासीत्' इत्यादयः प्रश्नाः उक्तान्यादित्यव्यापारजानि [36]प्रश्नप्रतिवचनानि । इदानीमादित्यमारभ्य प्रश्नाः क्रियन्ते — [V]कः नु खलु [37][V]एकाकी असहायः [V]चरति; सामर्थ्यात् सर्वदेति गम्यते । सर्वो हि कदाचिदेकाकी चरति । प्रकृतत्वाच्च वृष्टेः प्रवर्तयिता एकाकी चरतीति । [V]कः एव खलु [V]पुनः [V]जायते, अत्रापि सामर्थ्यात् पुनःपुनरिति गम्यते । सर्वोऽपि [38]हि मृत्वा पुनर्जायते । प्रकृतत्वाच्चादित्यवशात् [39]पुनःपुनर्जायत इति । [V]किं नु खलु [V]हिमस्य शैत्यस्य [V]भेषजं निवर्तकं प्रकृतत्वाच्च चन्द्रमसोत्पादितस्य । किं नु खलु [V]महत् [V]आवपनम् [40]आवापस्थानम्, [41]ओप्यते अस्मिन्निति आवपनम् ॥

अथोत्तराणि — 'सूर्यः' इत्यादीनि ॥ 'सूर्यः' असहायः सर्वदा दिवि [V]चरति । सेनान्यादीनामनुपलम्भात् असहाय्यत्वं मन्यन्ते । [V]चन्द्रमाः [V]पुनः [42]पुनरादित्यात् [V]जायते । तदुत्पादितस्य [V]हिमस्य [V]अग्निः [V]भेषजम् । तत्सृष्टानामोषध्यादीनां [V]भूमिः [V]आवपनम् इति ॥

एवं भूम्यन्तानि प्रश्नप्रतिवचनानि । अधुना [43-] भूमेरारभ्य प्रश्नाः [-43] क्रियन्ते — 'पृच्छामि' इत्याद्याः । हे ब्रह्मन्, त्वां [V]पृच्छामि [V]पृथिव्या [V]परम् [V]अन्तं [44]यत्र सर्वा पृथिवी

आलस्यरहितः सर्वदा [V]चरति । [V]कः नाम [V]पुनः पुनः शुक्लपक्षे [V]जायते । [V]किं नाम वस्तु शैत्यकृतस्योपद्रवस्यौषधम् । [V]किं नाम स्थानं बहूनां बीजानामावापायोपयुक्तं विशालम् [-47] ॥

सूर्य इति ॥ अथ चतुर्थीमाह - 'सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत्' इति ॥ तान्येतानि ब्रह्मण उत्तराणि स्पष्टार्थानि ॥

३७. मैर - एकाकी चरति । ३८. मैर - 'हि' नास्ति । ३९. मैर - पुनर्जायते । ४०. मैर - 'आवापस्थानम्' नास्ति । ४१. मै. मै१. मै३. अ. अ१ - उप्यन्ते । ४२. मैर - पुनः पुनरेक आदित्यात् । ४३-४३. अ. अ१ - राज्यप्रश्नाः । ४४. मैर - यज्ञम् । ४५. मैर - समाप्तम् । ४६. मैर - तत् । ४७-४७. मैर - पृथिव्या इत्यत्र ।

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ।

पृच्छामि । त्वा । परम् । अन्तम् । पृथिव्याः । पृच्छामि । त्वा । भुवनस्य । नाभिम् । पृच्छामि । त्वा । वृष्णः । अश्वस्य । रेतः । पृच्छामि । वाचः । परमम् । व्योमेति वि-ओम ॥

---

[४५]समाप्ता, अथ [४६]तत्र प्रतिष्ठितां [V]भुवनस्य [V]नाभिं [४७-][V]पृच्छामि, यत्र [-४७] प्रतिबद्धं सर्वं [४८-] जीवति स [-४८] नाभिः [४९-]" नहो भश्च " (उसू ४.१२५) इति [-४९] [५०]इञ्प्रत्ययः । [५१-] हेतुं च [-५१] [५२][V]पृच्छामि तस्य [V]वृष्णोः वर्षितुः [V]अश्वस्य [५३]व्यापकस्य किं [V]रेतः [५४]यतः सर्वं जायते । अथ तच्च [V]पृच्छामि [V]वाचः वेदात्मिकायाः [५५]ऋगादेः तस्य रेतसो [५६]विधात्र्याः किं [V]परमं [V]व्योम प्रकृष्टं रक्षास्थानं [५७]सर्गप्रतिसर्गनिबन्धनं [५८]व्योमेति । विपूर्वादवतेः [५९-] मन्प्रत्ययः,

---

पृच्छामीति ॥ अथ [१९]पञ्चमीमाह - ' पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ' इति ॥ [२०-] होतुः प्रश्नाः [-२०] । हे ब्रह्मन्, त्वां [V]पृथिव्याः [V]परम् [V]अन्तं [V]पृच्छमि । [२१]यतः परमुत्कृष्टप्रदेशोऽन्यो नास्ति, सोऽयं [२२]परमोऽन्तः । तथा चक्रस्य नाभिरिव सर्वस्य [V]भुवनस्य नाभिस्थानीयं वस्तु [V]पृच्छामि । तथा [V]वृष्णः पुंस्त्वाधिकस्य [V]अश्वस्य रेतस्थानीयं सारं वस्तु [V]पृच्छामि । [२३]तथैवाक्षरात्मिकायाः [V]वाचः [V]परमं व्योम विशेषेण रक्षकं स्वरूपं वस्तु पृच्छमि ॥

वेदिमिति ॥ अथ षष्ठीमाह - 'वेदिमाहुः परमन्तं पृथिव्याः यज्ञमाहुर्भुवनस्य नाभिम् । सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ' इति ॥ तान्येतानि ब्रह्मण उत्तराणि । येयं यागे [V]वेदिः तामेव पृथिव्याः [V]परम् [V]अन्तं याज्ञिकाः [V]आहुः । नहि [२४-] वेद्या अधिकः [-२४] कश्चिद्भूप्रदेशोऽस्ति । अत एव हि सोमप्रकरणे

४८-४८. मैर - जीवन्ति सा । ४९-४९. मैर - नहश्चेति, अ. अ१ - नभो नभभावश्चेति । ५०. मै - ईङ् प्रत्ययः, मैर - तिङ्प्रत्ययः । ५१-५१. मैर - हेत्वं च, अ - ' हेतुं च ' नास्ति । ५२. मैर - पृच्छामि इति । ५३. मैर - ' व्यापकस्य ' नास्ति । ५४. मैर - ' यतः ' नास्ति, अ१ - ततः । ५५. अ - जगदादेः । ५६. मैर - विधात्र्याम् । ५७. अ - प्रसर्गप्रति° । ५८. मैर - ' व्योमेति ' नास्ति । ५९-५९. मैर - पुक् ओर्गुणः ।

---

१९. इ. वा - पञ्चमी । २०-२०. शृ१. म. मै - ' होतुः प्रश्नाः ' नास्ति । २१. शृ१. हा. अ. पा. इ. वा. मै - यद् यतः । २२. आ. क. हा - परोऽन्तः । २३. मै - तदैवा° । २४-२४. शृ१ - वेद्याम् अधिकः, मै - वेद्यधिकाः ।

वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम् । सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ॥१८॥

(सूर्यं एकाकी चरति षट्चत्वारिंशच्च ।)

वेदिम् । आहुः । परम् । अन्तम् । पृथिव्याः । यज्ञम् । आहुः । भुवनस्य । नाभिम् । सोमम् । आहुः । वृष्णः । अश्वस्य । रेतः । ब्रह्म । एव । वाचः । परमम् । व्योमेति वि-ओम ॥१८॥

[कासं, अश्वमेध ४.७; कपिसं - - - - ; मैसं ३.१२.९; वासं २३.९-१२,५३,५४,६१,६२]

" ज्वरत्वरस्रिव्यविमवाम्°" (पा ६.४.२०) इत्यादिना ऊठि गुणः [-५९] ॥

अथोत्तराणि [६०]'वेदिम् ' इत्यादीनि ॥ Vपृथिव्याः Vपरम् Vअन्तं Vवेदिम् Vआहुः ब्रह्मवादिनः, " सा वा इयं सर्वैव वेदिः " (तैसं ६.२.४) इति च स्तूयते । तत्र [६१]निर्वर्त्यं Vयज्ञम् Vआहुः Vभुवनस्य सर्वस्य भूतजातस्य [६२-] नाभिः । तस्य [-६२] Vवृष्णः Vअश्वस्य यज्ञस्य Vरेतः Vसोमम् Vआहुः सर्वस्य बीजं यागद्वारेण वृष्ट्याद्युत्पत्तिहेतुत्वात् । [६३]अश्वस्यैव वा वर्षितुः सोमो रेतः सर्वलोकजीवनोदकहेतुभूतसोमसाधनत्वात् । तत्फलं वाचः Vपरमं Vव्योम [६४]ब्रह्मैव परमात्मैव प्राप्यत इति ॥

॥ इति सप्तमे चतुर्थे अष्टादशोऽनुवाकः ॥

श्रुतम् - " एतावती वै पृथिवी । यावती वेदिः " (तैब्रा ३.२.९) इति । तया Vयज्ञं सर्वस्य लोकस्य नाभिस्थानीयम् Vआहुः । यथा नाभिमाश्रित्य सर्वं चक्रं परिवर्तते तथा यज्ञाधीनः सर्वेषां [२५]प्राणिनामिहलोकपरलोकसंचारः । तथा Vअश्वस्य रेतोवदत्यन्तं सारभूतः सोमः । अश्वमेधेन हि त्रिरात्रेण [२६]यागेन ब्रह्महत्यादिकं [२७]सर्वं निवर्तते । यदेतन्मन्त्रसंघातरूपं ब्रह्म तदेतदक्षरात्मिकाया Vवाचः Vपरमं Vव्योम । तेन हि मन्त्रजातेन प्राणिनो विशेषेण रक्ष्यन्ते ॥

॥ [२८-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके अष्टादशोऽनुवाकः[-२८] ॥

६०. मै२ - वेदितमाहुः । ६१. [शुद्धीकृतोऽयं पाठोऽस्माभिर्द्रष्टव्यः, मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु ' निवर्त्यम् ' इति लभ्यते ।] । अ१ - निवृत्तिम् । ६२. अ - ' नाभिः तस्य ' नास्ति । ६३. मै२ - अश्वस्यैव च । ६४. मै२ - प्रशस्तैव ।

२५. क - °संचारम् । २६. मै - सोमयागेन । २७. वा - सर्वे । २८-२८. मै - इत्यष्टादशोऽनुवाकः ।

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन । ससस्त्यश्वकः ।

अम्बे । अम्बालि । अम्बिके । न । मा । नयति । कः । चन । ससस्ति । अश्वकः ।

महिषीं [1-] सर्वैरलङ्कारैरलङ्कृतां गर्हमाणां [-1] निह्नुवानां [2]अध्वर्युरुदानयति - [3]“ अम्बे ” इति गायत्र्या ॥ अध्वर्युणा [4]महिष्यामन्त्रयते एतैस्त्रिभिरामन्त्रितैः पर्यायैः [5]बहुभिरपि । [6-] हिंसादं [विषादं] चेदमध्येषणरूपम् [-6] (?) । लोके [7-] हि प्रेमातिभरेण [-7] वक्तारो भवन्ति [8-] मातर्दारिके स्वामिनीति [-8] । एवमत्रापि वेदितव्यम् । [9]भुङ्क्ष्वेति शेषः । [10-]“ छन्दसि वेति [-10] वक्तव्यम् ” (पा ५.४.१५८ वा) इति प्रथमस्याम्बार्थलक्षणह्रस्वत्वभावः (पा ७.३.१०७) [11]द्वितीयस्य । तृतीयस्य तु “ डलकवतीनां प्रतिषेधः ” इति प्रतिषेधः, “ आमन्त्रितं पूर्वमविद्यमानवत् ” (पा ८.१.७२) [12]इत्यविद्यमानवत्वान्निघाताभावे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् (पा ६.१.१९८) । अथ सा ब्रवीति - [V]न [V]मा [V]नयति न मां [13-] यब्धुं क्षमो नयति [-13] [V]कश्चन कश्चिदपि, अयं च [V]अश्वकः [14]क्षमोऽपि [V]ससस्ति [15]स्वपिति । कुत्सायां [16]प्रागिवीयः कः (पा ५.३.७०) ।

अष्टादशे ब्रह्मोद्यमुक्तम् । अथैकोनविंशे राजपत्नीनां विलापरूपो [1]मृताश्वोपचारोऽभिधीयते ॥

अम्ब इति ॥ कल्पः - “ अम्बे अम्बाल्यम्बिक इति प्रतिप्रस्थाता [2]पत्नीरुदानयति ” (आपश्रौ २०.१७.१२) इति । [3]पाठस्तु - ‘ अम्बे अम्बाल्यम्बिके न मा नयति कश्चन । ससस्त्यश्वकः ’ इति ॥ उत्तमा मध्यमाऽधमा [4-] चेत्येवं त्रिविधा राजपत्न्यः । तास्तिस्रस्त्रिभिर्मातृवाचकैः पदैः प्रतिपस्थात्रा संबोध्यन्ते । एवं संबोध्याऽऽहूतानां तिसृणां मध्ये प्रधानभूता महिष्युत्तरं वक्ति - [V]कः चिदपि पुमान् मां भोगार्थं रहसि [V]न एव [V]नयति । एषः [V]अश्वकः [V]ससस्ति निद्रां करोति । [5]भोगाभावदुःखेनैवेनं गर्हते । गर्हार्थोऽयं क - प्रत्ययः । कुत्सितोऽश्व इत्यर्थः ॥

१-१. मैर - °कृतां गर्भमाणाम् , अ - कृतमाणाम् । २. मैर - °र्युरानयति, अ - °रुदान । ३. अ - ‘ अम्बे ’ नास्ति । ४. मैर - मभिषवामन्त्रयते । ५. मैर - अवयवैरपि, अ - बहुभिरिह । ६-६. अ - ‘ हिंसादं - - - - °रूपम् ’ नास्ति । ७-७. मैर - अभिप्रेतादिभरेण । ८-८. मैर - मार्जारिके स्वामीति । ९. मैर - भङ्क्ष्वेति । १०-१०. मैर - छन्द एवेति । ११. मै. मै१. मैर. मै३. अ - ‘ द्वितीयस्य ’ नास्ति । १२. मै. मै१. मै३. अ. अ१ - °विद्यमानत्वा° । १३-१३. अ - लब्धुं क्षमो भवति । १४. मैर - अक्षमोऽपि । १५. मैर - श्वेपि । १६. मैर - प्रागपीयः । १७. मै. मै१. मैर. मै३. अ१ - ‘ कथम् ’ नास्ति ।

१. मै - अमृताश्वोपचारः । २. शृ१. म. मै - पत्नीम् । ३. अ. आ. क. पा. हा. इ. वा. वै. म - तत्र पाठस्तु । ४-४. मै - ‘ चेत्येवं - - - - सुभगे ’ नास्ति । ५. म - °दुःखनटनेन, उ. शृ१. हा - °दुःखेनैतेन, क - °दुःखेन एषैनम् , अ. पा. इ. वा - °दुःखेन एनेन ।

सुभगे काम्पीलवासिनि सुवर्गे लोके सं प्रोर्ण्वाथाम् ।

सुभग इति सु-भगे । काम्पीलवासिनीति काम्पील-वासिनि ।
सुवर्ग इति सुवः-गे । लोके । सम् ।
प्रेति । ऊर्ण्वाथाम् ।

---

[१७]कथं [१८]मय्यशयानायामेव स्वयं तूर्ष्णी शेते इति रोषेण कुत्सा प्रयुक्ता । "[१९]षस स्वप्ने" (धापा ११५४), [२०]आदादिकः व्यत्ययेन शपः श्लुः । केचिदेकवाक्यत्वेन व्याचक्षते - महिष्येव स्वात्मानमेव एतैरामन्त्रयते यब्धुरभावनिमित्तं [२१]विषादमिव दर्शयतीति । अन्ये पुनराहुः – [२२]रतिरभसप्रभवा [२३]यब्धुरेवामन्त्रितभणितय इति । एवं प्रयुञ्जानः को मामानीय भवे[यभे ?]दिति ॥

अध्वर्युस्तार्प्येण [२४]वाससा [२५]महिषीमश्वं [२६]च संप्रोर्णोति - '[२७]सुभगे' इति यजुषा ॥ हे [V]सुभगे शोभनभगे, [V]काम्पीलवासिनि काम्पीलं नाम श्लाघ्यो वस्त्रविशेषः, हे तद्वासिनि तदाच्छादिनि । [२८]यद्वा - काम्पीलो नाम देशविशेषः, तत्र वसन्ती काम्पीलवासिनी । काम्पीले हि स्त्रियो दर्शनीया सुभगाश्च भवन्तीति प्रसिद्धिः । हे तथाभूते । [२९]उभयोरप्यामन्त्रिताद्युदात्तत्वम् ।

सुभग इति ॥ कल्पः - " सुभगे [४] काम्पीलवासिनीति क्षौमेण वाससाऽध्वर्युर्महिषीमश्वं च प्रच्छाद्य " (आपश्रौ २०.१८. ३) इति ॥ पाठस्तु - ' सुभगे काम्पीलवासिनि सुवर्गे लोके सं प्रोर्ण्वाथाम् । आऽहमजानि गर्भधमा त्वमजासि गर्भधम् ' इति ॥ हे [V]सुभगे शोभनभगे महिषि हे [V]काम्पीलवासिनि, काम्पीलशब्देन श्लाघ्यो वस्त्रविशेष उच्यते । [६] तं वस्त्रं [६] आच्छादयतीति काम्पीलवासिनी, तादृशे, त्वमयमश्वश्चोभौ [V]सुवर्गे [V]लोके स्वर्गसदृशेऽस्मिन् स्थाने [V]संप्रोर्ण्वाथाम् इदं क्षौमं वस्त्रं सम्यगाच्छादयतम् । आच्छाद्यमाना च तेनाश्वेन सहैवं ब्रूहि - हेऽश्व, [V]गर्भधं गर्भधारिणं त्वाम् [V]अहं महिषी

---

१८. अ - मय्यश्वापनाया°, मै२ - मय्यपि वा सनाया° । १९. अ - षिसः, मै२ - स । २०. अ - 'आदादिकः' नास्ति । २१. अ - विषादमितिवत् । २२. मै. मै१. मै३. अ१ - अतिरभस°, अ - अतिराभासप्रावा (?) । २३. [अस्माभिः शुद्धतामापादितोऽयं पाठो द्रष्टव्यः ।], मै. मै१. मै३. अ. अ१ - °तफणितयः, मै२ - °तभरितयः । २४. अ - सथा (?) । २५. अ - महीमश्वम् । २६. मै२ - 'च' नास्ति । २७. मै२ - सुवर्ये । २८. अ१ - यथा । २९. मै२ - उभयोराद्युदात्तत्वम् ।

६-६. क - तेन वस्त्रेण, हा - तं वस्त्रे, म - तद्वस्त्रम् ।

आऽहमंजानि गर्भधमा त्वमंजासि गर्भधम् ।

एतिं । अहम् । अजानि । गर्भधमितिं गर्भ-धम् । एतिं । त्वम् ।
अजासि । गर्भधमितिं गर्भ-धम् ।

सा [३०]त्वमश्वश्च युवां [३१-]Vसुवर्गे Vलोके [-३१] स्वर्गलोकस्थानीये [३२]अश्वस्य संज्ञापनस्थाने अस्मिन् Vसंप्रोर्ण्वाथां संछन्नौ सह [३३]वसताम् । यद्वा - [३४-] सुवर्गे लोके [-३४] । निमित्तसप्तम्यौ । [३५-] स्वर्गस्थानीयं यद्भोगसुखं [-३५] , तन्निमित्तं [३६]संप्रोर्ण्वाथामिति ॥

[३७-] महिष्या उपस्थे [३८]शेफमाधत्ते - 'आहमजानि' इत्यनुष्टुभा ॥ Vआऽहम् Vअजानि त्वामाभिमुख्येन आगच्छामि । " अज गतिक्षेपणयोः" (धापा २३०) । Vगर्भधं गर्भधातारं त्वमपि मां [३९-]Vआ Vत्वम् Vअजासि [-३९] आभिमुख्येनागच्छ । तस्मादेव धातोर्लेट्याडागमः । Vगर्भधं [-३७] गर्भस्य धात्रीं धारयित्रीम् । छान्दसो लिङ्गव्यत्ययः । [४०-]Vतौ आवां त्वं च [-४०] अहं

Vअजानि [७]आभिमुख्येन प्राप्नवानि । Vत्वम् अपि [८]Vगर्भधं गर्भधात्रीं माम् [९]Vअजासि आभिमुख्येन प्राप्नुहि ॥

ताविति ॥ [१०]कल्पः - " तौ सह चतुरः पदः सं प्र सारयावहा इति [११]पदः [१२]संप्रासारयेते " (आपश्रौ २०.१८.२) इति । [१३-] पाठस्तु - 'तौ सह चतुरः पदः सं प्र सारयावहै' इति [-१३] । [१४-] हेऽश्व, यस्त्वं या

---

३०. मैर - त्वमश्वं च । ३१-३१. मैर - स्वर्गे लोके, अ१ - 'सुवर्गे लोके' नास्ति । ३२. मै. मै१. मै३. अ. अ१ - 'अश्वस्य' नास्ति । ३३. मैर - आसताम् । ३४-३४. मैर - सुवर्ग लोक इति । ३५-३५. मैर - स्वर्गस्थानं स्वर्गभोगसुखम् । ३६. [अत्र 'संप्रोर्ण्वाथामिति' इत्यस्यानन्तरं, 'मैर' इति लिखितपुस्तकं विहायान्यत्र सर्वत्र लिखितपुस्तकेषु मै - मुद्रितपुस्तके च 'छान्दसो लिङ्गव्यत्ययः' इत्यधिकोंऽश उपलभ्यते । परं प्रकृते तस्यासंबन्धादस्माभिः सोंऽशः परित्यक्तः ।] । ३७-३७. अ. अ१ - 'महिष्या - - - - गर्भधम्' नास्ति । ३८. मैर - शेफ आधत्ते । ३९-३९. मैर - आ प्रमजासि । ४०-४०. अ. अ१ - 'तौ - - - - च' नास्ति ।

---

७. मै - स्वाभिमुख्येन । ८. म - 'गर्भधम्' नास्ति । ९. म - 'अजासि' नास्ति । १०. म - 'कल्पः' नास्ति । ११. शृ१ - पटः, हा - पादः । १२. क. हा - प्रसारयेते । १३-१३. अ. आ. क. पा. हा. इ. वा. वै. उ. म - 'पाठस्तु' नास्ति, [अत्रानुपूर्विक्रमोऽस्माभिः, म - लिखितपुस्तकं, सायणभाष्यशैलीं चानुरुन्ध्य व्यवस्थापितो द्रष्टव्यः, आ - मुद्रितपुस्तके लिखितपुस्तकेषु च इयं पङ्क्तिः कल्पपङ्क्तेः पूर्वमुपलभ्यते ।] । १४-१४. इ - 'हेऽश्व - - - - संप्रसारयावहै' नास्ति ।

तौ स॒ह च॒तुरः॑ प॒दः सं प्र सा॑रयावहै ।
वृषा॑ वा॑ꣳ रेतो॒धा

तौ । स॒ह । च॒तुरः॑ । प॒दः । सम् । प्रेति॑ । सा॒र॒या॒व॒है॒ ।
वृषा॑ । वा॒म् । रे॒तो॒धा इति॑ रेतः-धाः ।

[४१]च Vसह शयानौ Vचतुरः [४२]Vपदः पादान् Vसंप्रसारयावहै । अश्वस्याग्रिमौ हस्तावित्यभिप्रायः । स्त्रीपुंसयोर्मैथुनाय [४३]संसृज्य सहशयानयोः [४४]चत्वारः पादाः संश्लिष्टाः प्रसारिताश्च [४५]भवन्ति । " पादः पत् " (पा ६.४.१३०) इति पद्भावः, "ऊडिदम्°" (पा ६.१.१७१) इति [४६-] विभक्तेरुदात्तत्वम् , " त्यदादीनां [-४६] यद्यत्परम् " इति अस्मदः शेषः ॥

[४७]तावध्वर्युरभिमन्त्रयते - ' वृषा वाम् ' इत्यष्टया अष्टपदया ॥ ' दधातु ' इति [४८]प्रथमपादान्तः । Vवां युवयोः दम्पत्योर्मध्ये Vवृषा सेक्ता सेचनसमर्थः Vरेतोधाः रेतसो धाता पतिः Vरेतः Vदधातु स्थापयतु । तदर्थमित्थं कर्तव्यमित्याह — वृषणमूले Vसक्थ्योः तयोर्मध्ये Vगृदं गुदस्योर्ध्वप्रदेशं Vधेहि ऊर्ध्वं स्थापय यत् प्रजननं व्राह्म[ब्रह्मा ?]णमाहुः । [४९-]" ई च [-४९] द्विवचने " (पा ७.१.७७) इति सक्थिशब्दस्य ईकारः । उदात्त इति तत्रानुवर्तते । " उदात्तयणः°" (पा ६.१.१७४) इति विभक्तेरुदात्तत्वं बाधित्वा व्यत्ययेन " उदात्तस्वरितयोर्यणः " (पा ८.२.४)

चाऽहं महिषी Vतौ आवामुभौ मदीयं [१५]पादद्वयं त्वदीयं [१६]च पश्चाद्भागवर्ति पादद्वयमित्येवं Vचतुरः पादान् Vसंप्रसारयावहै [-१४] संगताः परस्परं [१७]संश्लिष्टा यथा भवन्ति तथा प्रसृतान् करवाव ॥

वृषेति ॥ कल्पः - " वृषा वामित्यभिमन्त्रयते " (आपश्रौ २०.१८.३) इति ॥ पाठस्तु - ' वृषा वाꣳ रेतोधा रेतो दधातु ' इति ॥ Vवां युवयोर्मध्ये Vवृषा सेचकोऽश्वः, सिञ्चत्वित्यध्याहारः । Vरेतोधाः वीर्यधारिणी [१८]महिषी त्वदीयं Vरेतः धारयतु ॥

४१. अ. अ१ - च त्वं चाहं च । ४२. अ - ' पदः ' नास्ति । ४३. मै. मै१. मै३. अ. अ१ - ' संसृज्य ' नास्ति । ४४. मै२ - ' चत्वारः ' नास्ति । ४५. मै२ - भवन्ति इति । ४६-४६. अ - °दात्तकमित्यादीनाम् । ४७. मै२ - °र्युरनुमन्त्रयते । ४८. मै२ - °पादान्तम् । ४९-४९. अ१ - ' ई च ' नास्ति ।

१५. शृ१. उ. अ. पा. हा. वा. वै. म. मै - पदद्वयम् । १६. अ. आ. क. पा. हा. वा. म - ' च ' नास्ति । १७. अ. आ. क. पा. हा. इ. वा. वै. उ. म - श्लिष्टा । १८. अ. आ. पा. हा - ' महिषी ' नास्ति ।

रेतो॑ द॒धा॒तू॒त्स॒क्थ्यो॑र्गृ॒दं धे॑ह्य॒ञ्जिमुद॒ञ्जि॒मन्व॑ज ।
यः स्त्री॒णां जी॑व॒भोज॑नो॒ य आ॑सां (१)बि॒ल॒धाव॑नः ।

रेतः॑ । द॒धा॒तु॒ । उदिति॑ । स॒क्थ्योः॑ । गृ॒दम् । धे॒हि॒ । अ॒ञ्जिम् । उद॑ञ्जि॒मित्युत्-अ॒ञ्जि॒म् । अन्विति॑ । अ॒ज॒ । यः । स्त्री॒णाम् । जी॒व॒भोज॑न॒ इति॑ जीव-भोज॑नः । यः । आ॒सा॒म् (१) । बि॒ल॒धाव॑न॒ इति॑ बिल-धाव॑नः ।

इति स्वरितत्वं प्रवर्तते । “ गृ सेचने ” (धापा ९६२) इत्यस्मात् [50]धातोः औणादिके दक्प्रत्यये गृदमिति [51]भवति । [52]तत्तथा कृत्वा [V]अञ्जिं प्रजननम् [V]उदञ्जिम् [53]उपस्थं प्रवेशय । अञ्ज्यते [54]जन्यते प्रजा अनेनेति अञ्जिः । सर्वे चैते मन्त्राः प्रहेलिकास्थानीयाः अन्यपराक्षरत्वात् अश्वमेधप्राशस्त्याभिप्राया एव । “ अप वा एतस्माच्छ्री राष्ट्रं क्रामति ” (तैब्रा ३.९.७) इत्यत्र तथैव प्रतिपादयिष्यते । [55] अधुना अञ्जिः [56]विशेष्यते [55] [V]यः [V]स्त्रीणां [V]जीवभोजनः जीवो भुङ्क्ते [57] अनेनेति जीवभोजनः । जीवो भुज्यते [57] रक्ष्यते अनेनेति वा । अन्ये त्वाहुः - स्त्रीणां संबन्धि जीवभोजनः जीवत्वहेतुः भोजनं, अनेन हि भोगे सति पुरुषा जीवन्ति इत्युच्यते, अन्यथा मृता एवेति । [58] तादृशश्च भोगः अनेन क्रियते इति [58] । स्त्रीणामिति “ नामन्यतरस्याम् ”

उदिति ॥ कल्पः - “ उत्सक्थ्योर्गृदं धेहीति प्रजनने [19] प्रजननꣳ [19] संनिधाय ” (आपश्रौ २०.१८.४) इति । पाठस्तु - ‘ उत्सक्थ्योर्गृदं धेह्यञ्जिमुदञ्जिमन्वज । यः स्त्रीणां जीवभोजनो य आसां बिलधावनः । प्रियः स्त्रीणामपीच्यः । य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत् ’ इति ॥ हेऽश्व, [V]गृदं [20]त्वदीयगुदसमीपवर्तिनं पाश्चात्यं भागं [V]सक्थ्योः महिषीसंबन्धिनोरूर्वोः [V]उद्धेहि ऊर्ध्वं स्थापय । [21]अज्यते स्त्रीत्वमभिव्यज्यतेऽनेनेत्यञ्जिर्योनिः । तथा [22]पुंस्त्वमभिव्यज्यतेऽनेनेति [22] मेढ्रोऽप्यञ्जिः । [23]स चोन्नतश्चासावञ्जिश्चेत्युदञ्जिः । हेऽश्व, महिषीसंबन्धम् [V]अञ्जिम् अनुलक्ष्य त्वदीयम् [V]उदञ्जिम् [24][V]अज [25]प्रेरय ।

५०. मै. मै१. मै२. मै३. अ - ‘ धातोः ’ नास्ति । ५१. अ - ‘ भवति ’ नास्ति । ५२. मै. मै१. मै३. अ१ - ततस्तथा, अ - ततस्था । ५३. मै२ - अन्वजानु , अ१ - उपस्थमन्वञ्जम् । ५४. मै. मै१. मै३. अ. अ१ - ‘ जन्यते ’ नास्ति । ५५-५५. अ - ‘ अधुना - - - - °श्यते ’ नास्ति । ५६. मै२ - विशेषमाह । ५७-५७. अ१ - ‘ अनेनेति - - - - भुज्यते ’ नास्ति । ५८-५८. मै२ - तादृशो योगोऽनेनेति यदिति ।

१९-१९. वा - ‘ प्रजननꣳ - - - - °ऽनेनेति ’ नास्ति । २०. मै - त्वदीयं गृहः समीप° । २१. मै - अञ्ज्यते । २२. मै - पूर्वास्तमभि° । २३. अ. आ. क. पा. हा. इ. वा. वै. म - सर्वोन्नतश्चा° । २४. म - अन्यज, मै - अह । २५. मै - प्रवण ।

प्रि॒यः स्त्री॒णाम॑पी॒च्यः॑ ।

प्रि॒यः । स्त्री॒णाम् । अ॒पी॒च्यः॑ ।

(पा ६.१.१७७) इति नाम उदात्तत्वम् । पुनश्च विशेष्यते — [V]यः [V]आसाम् स्त्रीणां [V]बिलधावनः बिलं छिद्रं प्रति धावति [५९]नान्यदस्यास्ति कर्म । यद्वा - नैवं बिलधावनकुशलोऽन्योऽस्ति । " कृत्यल्युटो बहुलम् " (पा ३.३.११३) इति कर्तरि ल्युट् । किं च - [V]प्रियः [V]स्त्रीणाम् [६०]इति । "[६१-] नामन्यतरस्याम् " (पा ६.१.१७७) इति नाम उदात्तत्वम् । पुनश्च विशेष्यते [-६१] – भृशं प्रीणयिता, कीदृशः सन् [V]अपीच्यः अप्रकाशः [६२]अपिगमनमप्यश्चः अन्तर्धानं [६३-] पुनःपुनश्चलनं वा । अपिपूर्वादश्चतेः " ऋत्विक्° " (पा ३.२.५९) इत्यादिना क्विन् प्रत्ययः । ततो " भवे छन्दसि " (पा ४.४.११०) इति यत् , " अचः " (पा ६.४.१३८) इत्यकारलोपः, " चौ " (पा ६.३.१३८) इति पूर्वपदस्य दीर्घत्वम् । अप्रकाशः सन् [-६३] [६४]पुनःपुनर्वा विशन् स्त्रीणां प्रीणन इति । [६५]तत्र किं कुर्वन् प्रीणयतीत्याह – [V]यः अयमश्विः [V]आसां [६६]स्त्रीणां [V]कृष्णे [६७]कर्षणीये [६८][V]लक्ष्मणि योनेरभ्यन्तरप्रदेशविशेषो लक्ष्म, उपस्थम् [६९]एवेति केचित् , स्त्रीणां व्यञ्जनमिति कृत्वा । तत्र [V]सर्दिगृर्दि सरणशीलं गुदस्योपरिभागं [V]परावधीत् ।

कीदृश उदश्विः ? जीवात्मना भुज्यते [२६]प्रीतिपूर्वकमनुभूयत इति [V]जीवभोजनः [V]यः उदश्विः [V]स्त्रीणां जीवभोजनः, स्त्रीजीवो ह्यस्मिन्नुदश्वौ प्रीतिमनुभवति । [V]यः चोदश्विः [V]आसां स्त्रीणां [२७-][V]बिलधावनः बिलं योनिं प्रति धावति सहसा प्रविशतीति बिलधावनः । किञ्चायमुदश्विः [V]स्त्रीणां [V]प्रियः सन् [२८][V]अपीच्यः भवति [२९]अपीच्यते अत्यादरेण प्राप्यत इत्यपीच्यः । [V]यः चोदश्विः [V]आसां स्त्रीणां [-२७] [३०][V]कृष्णे [V]लक्ष्मणि यत् [३१-] कृष्णवर्ण-मसाधारणं लक्षणभूतं [-३१] स्त्रीव्यञ्जनं तस्मिन् [V]सर्दिगृर्दि [३२]शुक्रपातस्थानविशेषं [V]परावधीत् वेगेन

---

५९. मै. मै१. मै३. अ - °दस्याह्निकम् । ६०. मै. मै१. मै३. अ. अ१ - 'इति ' नास्ति । ६१-६१. अ. अ१ - 'नामन्य° ---- विशेष्यते ' नास्ति । ६२. अ१ - °मप्ययः । ६३-६३. अ - 'पुनःपुन° ---- सन् ' नास्ति । ६४. मै२ - पुनः पुनः पुनर्वा । ६५. मै२ - ' तत्र ' नास्ति । ६६. अ - ' स्त्रीणाम् ' नास्ति । ६७. अ - कर्षणि, मै२ - ' कर्षणीये ' नास्ति । ६८. अ - ' लक्ष्मणि ' नास्ति । ६९. मै. मै१. मै३. अ - इति ।

---

२६. मै - °कमनुभुज्ययते । २७-२७. म - ' बिलधावनः ---- स्त्रीणाम् ' नास्ति । २८. मै - प्रीत्यः । २९. मै - अप्यच्यते । ३०. मै - ' कृष्णे ' नास्ति । ३१-३१. म - °मसाधारणभूतम् , शृ१ - °मसाधारणलक्षताभूतम् । ३२. मै - शुक्लपीतस्थानविशेषम् ।

य आ॒सां कृ॒ष्णे लक्ष्म॑णि सर्दि॑गृदिं प॒राव॑धीत् ।
अम्बे॒ अम्बा॒ल्यम्बि॑के॒ न मा॑ यभति॒ कश्च॒न । स॒स॒स्त्य॑श्व॒कः ।

यः । आ॒साम् । कृ॒ष्णे । लक्ष्म॑णि । सर्दि॑गृदिम् । प॒राव॑धी॒दिति॑ परा-अव॑धीत् ।
अम्बे॑ । अम्बा॑लि । अम्बि॑के । न । मा॒ । य॒भ॒ति॒ ।
कः । च॒न । स॒स॒स्ति॑ । अ॒श्व॒कः ।

पराहन्ति । छान्दसो लुङ् । असिश्छिनत्तीतिवत् करणे कर्तृनिर्देशः । [७०]आरूढो ह्यनेन तं देशं पराहन्ति । उक्तं हि – ' अञ्जिम् उदञ्जिमन्वज ' इति । " सृ गतौ " (धापा ९६०,११२४) " गृ सेचने " (धापा ९६२) । [७१]आभ्यामौणादिकोऽप्रत्ययः । [७२]सारणमुत्सारणं पुंस [७३]उत्थानस्थानीयं यद्योनिबृंहणमिति प्रसिद्धं तादृशं गृदिमिति [७४]कर्मधारयसमासे दासीभारादित्वात् (गणपाठ २११, पा ६.२.४२) पूर्वपदप्रकृतिस्वरत्वम् । यद्वा - [७५]सरणशीलो गृदिः [७६]यस्मिन् स्थानविशेषे यत् [७७-] शुक्लेन(शुक्रेण) सिच्यते [-७७] तादृशं स्थानं सर्दिगृदिशब्देनोच्यते । " बहुव्रीहौ [७८-] प्रकृत्या° " (पा ६.२.१) इति [-७८] पूर्वपदप्रकृतिस्वरत्वम् । सर्वथा व्युत्पत्त्यनवधारणात् नावगृह्यते । तादृशमुदञ्जिमन्वजेति ॥

महिषी गर्हते –– ' अम्बे ' इत्यादिना ॥ मय्युपशयानायामपि ᐯन ᐯमा ᐯयभति । [७९-]" यभ मैथुने "[-७९] (धापा १००५) । ᐯससस्ति एवायम् ᐯअश्वकः न ᐯकश्चित् अन्यः क्षमः मां यब्धुम् । न वाऽन्योऽस्य व्यापारयिता ॥

ताडयामास । येन ताडनेन [३३]शुक्रपातो भवति तत् करोति । अन्तर्बहिः प्रदेशभेदेन स्थानत्रयं स्त्रीव्यञ्जनं विद्यते । अत एवाऽन्यत्राऽऽम्नातम् - " त्रिवृत् प्रजननम् । उपस्थो [३४]योनिर्मध्यमा " (तैब्रा ३.११.९) इति । तत्र येयं मध्यमा गर्भधारिणी सा सर्दिगृदिः ॥

अम्ब इति ॥ कल्पः - " अम्बे अम्बाल्यम्बिक इति महिष्यश्वं [३५]गर्हते " (आपश्रौ २०.१८.४) इति । पाठस्तु ' अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससत्यश्वकः ' इति । सा महिषी भोगाभावदुःखेन

७०. अ. अ१ - पुरुषः । ७१. अ. अ१ - आभ्यामौणादिः । ७२. अ - सरणमुत्सरणम् । ७३. मै२, मै - तलटिप्पण्यां च ' जनस्थानीयम ' इति । ७४. मै२ - °धारये । ७५. मै२ - सरणशीला । ७६. अ१ - यस्मात् स्थानात् । ७७-७७. मै२ - सूक्तेन शिष्यते । ७८-७८. मै२ - ' प्रकृत्या इति ' नास्ति । ७९-७९. मै२ - यभं मैथुनम् ।

३३. मै - शुक्लपातः । ३४. मै - योनियोर्मध्यमा । ३५. मै - गर्भते ।

ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिराविव ।
अथास्या मध्यमेधता१ शीते वाते पुनन्निव ।

ऊर्ध्वाम् । एनाम् । उदिति । श्रयतात् । वेणुभारमिति वेणु-भारम् । गिरौ । इव ।
अथ । अस्याः । मध्यम् । एधताम् । शीते । वाते । पुनन् । इव ।

तां यजमानः अभिमेधति - 'ऊर्ध्वाम्' इत्यनुष्टुभा ॥ असहमान इव ब्रवीति । [V]एनाम् योनिम् [V]ऊर्ध्वाम् [V]उच्छ्रयतात् उच्छ्रितां कुरु उच्छ्रितं प्रजननं प्रत्युत्थितां कुरु, [V]वेणुभारम् [८०-][V]इव [V]गिरौ भारहारः, स यथा विवक्षुः [८१]जीवो [८२-] गौरवेण भारमुच्छ्रयति [-८२] । [८३-] वेणुग्रहणं [-८०] सुखनिपात्यत्वख्यापनार्थम् [-८३] । [V]अथ अनन्तरम् [V]अस्याः तथा ऊच्छ्रितायाः [V]मध्यम् [V]एधतां वर्धताम् । [८४]अभिमतान्तःप्रवेशेन । सर्वो [८५]ह्यभिमतलाभेन वर्धते [८६-] हर्षं गच्छति [-८६] यथा [V]शीते [V]वाते [V]पुनन् खलपूः पवनेन श्रान्तो वातलाभेन वर्धते । [८७-] अन्य आह -[-८७] यथा शीते

विलपन्ती स्वदुःखख्यापनाय स्वकीयां मातरं त्रिः संबोध्य स्वदुःखं कथयति । लोके [३६]ह्यसंनिहिता [३७]अपि माता स्वकीयापद्वेलायां [३८]संबोध्यते । बाल्ये मातुरेव सर्वापन्निवारकत्वेन तत्संबोधनस्य [३९]पठितत्वात् अन्यदाऽपि तत्संबोधनमेव सहसा जिह्वायामायाति । तां संबोध्यैवं [४०]ब्रूते - रिरंसुं मां कोऽपि न यभति । अयम् [४१][V]अश्वकः तु निद्राति ॥

ऊर्ध्वामिति ॥ कल्पः - " ऊर्ध्वामेनामुच्छ्रयतादिति पत्नयोऽभिमेधन्ते " (आपश्रौ २०.१८.५) इति । पाठस्तु - ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिराविव । अथास्या मध्यमेधता१ शीते वाते पुनन्निव ' इति ॥ स्वदुःखख्यापनार्थमम्बादिशब्दैर्मातरं संबोधयन्तीमेनां महिषीं प्रति वस्त्राच्छादनाद्बहिरेव स्थिता इतरा [४२]राजपत्न्यो बुद्धिप्रदानं कुर्वन्ति - हे महिषि, [V]एनां त्वदीयां योनिम् [V]ऊर्ध्वाम् [V]उच्छ्रयतात् [४३]ऊर्ध्वाभिमुखं

८०-८०. अ१ - 'इव ---- °ग्रहणम्' नास्ति । ८१. अ - 'जीवः' नास्ति । ८२-८२. अ१ - गिरौ वेणुभारमुच्छ्रयति । ८३. अ१ - वेणुभारं मूच्छनिपात्यत्व°, अ - वेणुसुखनिपत्यत्व°, मै२ - वेणुग्रहणं सुखनिपात्यत्वज्ञापनार्थम् । ८४. मै२ - °न्तःप्रवेशने । ८५. मै२ - अप्यभिमत° । ८६-८६. मै२ - 'हर्षं गच्छति' नास्ति । ८७-८७. मै२ - हर्षवद्भद्राति ।

---

३६. शृ१ - असंविहिता । ३७. अ. आ. क. पा. हा. इ. वा. वै. म - 'अपि' नास्ति । ३८. पा - बोध्यते । ३९. उ. अ. पा. हा. इ. वा - पातितत्वात् , शृ१. मै - वासितत्वात् , म - उचितत्वात् । ४०. शृ१ - वर्तते । ४१. मै - अस्त्वश्वकः । ४२. मै - रक्षिण्यः । ४३. अ. आ. क. पा. हा. इ. वा. वै. म - °मुखम् ।

अम्बे अम्बाल्यम्बिके न मा यभति कश्चन ।
ससस्त्यश्वकः ।

अम्बे । अम्बालि । अम्बिके । न ।
मा । यभति । कः । चन ।
ससस्ति । अश्वकः ॥

वाते पुनन् वर्धते [८८]वर्धिष्यतीति [८९]त्वरते, एवमस्या मध्यं उच्छ्रयणानन्तरं [९०]वर्धिष्यतीति । [९१-] एवमिमा कतुम् ऋक्सामो (?) नास्ति अयं [९२]त्वश्च इदानीं विश्राम्यत्विति [-९१] ॥

अथ सा तथैव [९३]गर्हते - 'अम्बे' इति ॥

[९४]अथ [९५]वावाताऽभिमेधति - 'यद्धरिणी' इत्यनुष्टुभा ॥ यदा Vहरिणी Vयवं [९६]क्षेत्रे उप्तम् Vअत्ति भक्षयति तदा [९७-]Vन Vपशु साधु Vपुष्टं [-९७] Vमन्यते अकृतार्थैव पुनर्भक्षयति न कदाचिदपि पर्याप्तं मन्यते, एवम् अकृतार्थैव भूयोभूयो भोक्तुं इयमेव क्षमेति ।

कृत्वोन्नतामवस्थापय । तत्र दृष्टान्तः - यथा लोके कस्मिंश्चित् Vगिरौ वेणून् खण्डयित्वा स्वगृहे नेतुं प्रौढभारमाबध्य प्रथमं [४४]भूमावूर्ध्वमुच्छ्रयति तद्वत् [४५]एनामुच्छ्रय । Vअथ उच्छ्रयणानन्तरम् Vअस्याः योनेः मध्यस्थानम् Vएधतां स्वाभिमतप्राप्त्याऽभिवर्धताम् । वृधिरत्र हर्षविशेषः । तत्र [४६-] हर्षे दृष्टान्तः[-४६], 'शीते वाते पुनन्निव'। यथा लोके कश्चित् खलपूरुद्धृतेन शूर्पेण [४७-] धान्यं Vपुनन् [-४७] व्यापारबाहुल्येन श्रान्तः खिन्नगात्रः Vशीते [४८]Vवाते प्रवृत्ते सति हृष्यति तद्वत् ॥

अम्ब इति ॥ [४९]कल्पः - 'त्रिर्महिष्यश्वं गर्हते । त्रिः पत्नयोऽभिमेधन्त उत्तरयोत्तरयर्चा' (आपश्रौ २०.१८.६) इति ॥ तत्र प्रथमां गर्हार्थामृचमाह - 'अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससत्यश्वकः'। इति ॥

---

८८. अ - वर्षिष्यतीति । ८९. मैर२ - ग्रदते । ९०. मैर२ - वर्धतोऽपि, अ. अ१ - वर्षिष्यतीति । ९१-९१. मैर२ - मै - तलटिप्पण्यां च - एवमिमं मत्समानेनास्त्ययं त्वश्च इदानीं वश्रितो (मैर२ - विश्रान्तो) विश्राम्यत्विति । ९२. अ१ - चाश्वः । ९३. मैर२ - वभिते (?) । ९४. मैर२ - अथ ताम् । ९५. मै. मै१. मै३. अ. अ१ - °मेधयति । ९६. मै. मै१. मै३. अ. अ१ - क्षेत्रेषु । ९७-९७. अ - पशु साधु पुष्टम् , अ१ - पशु साधु न पुष्टम् ।

---

४४. उ. शृ१. इ - °मुच्छ्रयन्ति । ४५. इ. वा. म - एताम् । ४६-४६. इ. वा - हर्षदृष्टान्तः । ४७-४७. म - पुनर् , मै - धान्यं पुन्वन् । ४८. मै - करे । ४९. अ. पा. हा. इ. वा - 'कल्पः' नास्ति ।

यद्धरिणी यवमत्ति न (२) पुष्टं पशु मन्यते ।
शूद्रा यदर्यजारा न पोषाय धनायति ।

यत् । हरिणी । यवम् । अत्ति । न (२) । पुष्टम् । पशु । मन्यते । शूद्रा ।
यत् । अर्यजारेत्यर्य--जारा । न । पोषाय । धनायति ।

[९८]पशुशब्दोऽसत्ववचनोऽव्ययम् । अन्य आह - यथा हरिणी [९९-] क्षेत्रिकस्य अप्रज्ञातं [-९९] [१००]यवं भक्षयति तत्तं पुष्टमपि भोगं पशु न [१०१]क्षेत्रिको मन्यते न जानाति । " सुपां सुलुक्° " (पा ७.१.३९) इति सुपो लुक् । एवं भोक्तुं त्वमेव क्षमेति । किञ्च — [V]शूद्रा शूद्रजातीया स्त्री । " शूद्रा चामहत् पूर्वा जातिः " (पा ४.१.४ वा) इति टाप् । सा यदा [V]अर्यजारा भवति । अर्यो ब्राह्मणादिः, स जारो यस्याः [१०२-] आत्मन एव वा स्वामी जारो यस्याः[-१०२], " अर्यः स्वामिवैश्ययोः " (पा ३.१.१०३) इति निपात्यते । सा किं तदानीं [V]पोषाय कुटुम्बाभिवृद्धये [V]धनायति स्पृहयति, कुटुम्बं मे वर्धतां [१०३-] परिशुद्धमपत्यं मे [-१०३] जायतामिति [१०४-][V]न इयं

यदिति ॥ अथ प्रथमामभिमेधनार्थामृचमाह - ' यद्धरिणी यवमत्ति न पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ' इति ॥ [५०-] [V]यत् यदा कदाचित् [V]हरिणी [-५०] मृगी रात्रौ समागत्य क्षेत्रे फलितं [V]यवं भक्षयति, तत्र [५१]क्षेत्रे भक्षयित्वा पुनरप्यरण्ये गतं [V]पशु [V]पुष्टम् अपि [V]न [V]मन्यते न जानाति । हे महिषि, तथा त्वमपि देवतारूपेण [५२]त्वामनुभूयान्तर्हितमश्वं [५३]न जानाति । भोगस्तु तव [५४]जात एवेति पत्नीनामभिप्रायः । किं च [V]यत् यदा [V]शूद्रा काचिद्दासी [५५]कदाचिदर्यः स्वकीयः स्वामी जारो यस्याः सेयम् [V]अर्यजारा भवति, तदानीं सा दासी स्वामिस्वीकारमात्रेणात्यन्तं हृष्यति, न तु [५६]स्वकीयकुटुम्बपोषाय

९८. अ१ - °नोव्ययः । ९९-९९. अ१ - क्षेत्रीकस्या अप्रज्ञाता । १००. [मै मुद्रितावृत्तावत्र ' यवम् ' इत्यस्मात्पूर्वम् अग्रिमं ' सुपां सुलुक् ' इत्यारभ्य ' शूद्रजातीया स्त्री ' इत्यन्तं पङ्क्तित्रयमाधिक्येनोपलभ्यते । परमस्यांशस्यात्रानावश्यकत्वादस्माभिः सोंऽशः परित्यक्तः ।] । १०१. मै२ - क्षेत्रिको न । १०२-१०२. मै. मै१. मै३ - ' आत्मनः - - - - यस्याः ' नास्ति । १०३-१०३. अ१ - शुद्धमेपत्यम् , मै२ - परिमृद्धमपत्यं मे । १०४-१०४. अ - यो न प्रवर्तते, अ१ - न प्रवर्तते ।

५०-५०. अ. आ. क. पा. हा. इ. वा. वै - यदा कदाचित् हरिणी । ५१. शृ१. मै - क्षेत्रिकः, म - क्षेत्रम् । ५२. मै - °र्हितमखम् । ५३. शृ१. मै - त्वं न । ५४. मै - जातवेदः । ५५. शृ१. मै - °दर्यजारा सती । ५६. म - स्वकुटुम्बपोषाय ।

अम्बे अम्बाल्यम्बिके न मा यभति कश्चन ।
ससस्त्यंश्वकः ।

अम्बे । अम्बालि । अम्बिके । न । मा । यभति । कः । चन ।
ससस्ति । अश्वकः ।

प्रवर्तते [-104] भोगार्थं [105]नूनं जानाति या [106]त्वमेवं तृप्यसीति । [107-]" अशनायोदन्यधनाया°" (पा ७.४.३४) [108]इति [109]गर्धे निपात्यते । अन्य आह - धनायति धनमात्मन इच्छति, [110]" सुप आत्मनः°" (पा ३.१.८) [111]इति क्यप्, " न छन्दस्यपुत्रस्य " (पा ७.४.३५) इतीत्वाभावः । शूद्रा अर्यजारा भवन्ती, तत्र किं पुष्ट्यर्थं [112]धनमिच्छन्ती, धनं [113]जिघृक्षन्ती । किञ्च [114-] या नूनं जाता [-114] तदेवमतृप्तभोगायैव भवसीति [-107] ॥

महिष्या अन्या राज्ञो भोग्या वावाता । अथ सा तथैव गर्हते - ' अम्बे ' इति ॥

अथ तां [115]परिवृक्त्योऽभिमेधन्ति - ' इयं [116]यका ' इत्यनुष्टुभा ॥ राज्ञो [117-] द्वेष्या भार्या [-117] [118]परिवृक्तिः । Vइयं Vशकुन्तिका [119]शकुन्तजातीया [120]स्त्री [121]Vयका [122]या

[57]Vधनायति धनमात्मन इच्छति । नहि स्वमिस्वीकाराद्धनमधिकं मन्यते । तथा मनुष्यशरीरा त्वमपि देवतारूपस्याश्वस्य स्वीकारादेव परितुष्टा भव, न तु तुच्छमिमं मानुषं भोगमपेक्षस्वेत्यभिप्रायः ॥

अम्ब इति ॥ अथ द्वितीयां गर्हार्थामृचमाह ' अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससत्यश्वकः ' इति ॥

इयमिति ॥ अथाभिमेधनार्थां द्वितीयामृचमाह - ' इयं यका शकुन्तिकाऽऽहलमिति सर्पति । आहतं गभे पसो नि जल्गुलीति धाणिका ' इति ॥ [58]Vइयं प्रत्यक्षतो दृश्यमाना Vयका Vशकुन्तिका, या

१०५. अ१ - नूनं न, मै - तलटिप्पण्यां, मै२ - तु न त्वं न । १०६. अ१ - त्वमेवं न । १०७-१०७. मै२ - ' अशना° - - - - भवसीति ' नास्ति । १०८. अ१ - ' इति ' नास्ति । १०९. अ - गर्धति, अ१ - गृधेति । ११०. अ - स्वं पदम् । १११. अ. अ१ - ' इति ' नास्ति । ११२. अ - °च्छन्तीति । ११३. मै. मै१. मै२. मै३ - जिघृक्षति । ११४-११४. अ - धनं जता । ११५. अ - °वृत्त्यभिमेधत, अ१ - परिवृत्त्यभिमेधति । ११६. अ१ - यज्ञ । ११७-११७. अ१ - द्वेष्यभार्या, मै - तलटिप्पण्यां-सेर्ष्या भार्या । ११८. मै२ - इयं वृक्तिः । ११९. अ१ - शकुन्तजातीयका । १२०. मै२ - ' स्त्री ' नास्ति । १२१. अ१ - यायका । १२२. अ१ - ' या ' नास्ति ।

५७. हा - ' धनायति ' नास्ति । ५८. मै - येयम् ।

इयं यका शंकुन्तिकाऽऽहलमिति सर्पति ।
आहंतं गभे पसो नि जंल्गुलीति धाणिका ।

इयम् । यका । शकुन्तिका । आहलमित्यां-हलम् । इतिं । सर्पति ।
आहंतमित्या-हतम् । गभे । पसः । नीतिं । जल्गुलीति । धाणिका ।

काचिदपि, [123]अविज्ञातविशेषत्वात् । [124]अज्ञातार्थे [125]प्रागिवीयः कः (पा ५.३.७०), "न यासयोः" (पा ७.३.४५) इतीत्वाभावः । इयं सर्वथा [126]अपि शकुन्तिका [V]आहलं समन्ताच्छब्दयित्वा [V]इति, इत्थं [127-] यथा वयं [-127] पश्यामः कुररादिषु एवं भृशं शब्दायमाना दयितमेव [V]सर्पति न जहाति, एवं त्वमसीति । हल व्यक्तायां वाचि, छान्दसः कमुल्प्रत्ययः । यद्वा - हला इति शकुन्तानामाह्वानशब्दः, आगतहलाशब्दम् आहलम् । "परादिश्छन्दसि°" (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम् । [128]दयितमेवाह्वयन्ती सर्पति न जहातीति । किञ्च [129][V]गभे [130]इति वर्णव्यत्ययः, [131]भगे [V]पसः सुखकरं जलम् । [132]जलम् [133-][V]आहतम् आहननोद्गतम् [-133] । [134]वर्णलोपो वा (?) । गर्भे स्थितं बहिरागतं [V]निजल्गुलीति भृशं निगिरति ग्रसते [135-] जलं [V]धाणिका [136]पालनशीला [-135] ।

काचित् [59]पक्षिस्त्री विद्यते । आहलशब्दः पक्षिध्वनेरनुकरणम् । इत्येतादृशं शब्दं [60]कुर्वती सा [V]शकुन्तिका [V]सर्पति पुमांसं पक्षिणं पृष्ठतो गच्छति, न [61]तु तृप्ता क्वचिदवतिष्ठते । हे महिषि, एवं त्वमपि न तृप्यसि तदेतदयुक्तमित्यभिप्रायः । किं च [V]धाणिका गर्भस्य धारयित्री योषित् [62][V]गभे [V]आहतं [V]पसः [V]निजल्गुलीति । [63-] गभशब्दे पसशब्दे [-63] च वर्णव्यत्ययो द्रष्टव्यः । तथा सति *योनिः [64]सपजन्यं रेतश्च

१२३. अ - अज्ञानविशेषत्वात् । १२४. अ१ - अज्ञार्थे । १२५. मै२ - प्राग्गिव्यतीयः । १२६. अ१ - 'अपि' नास्ति । १२७-१२७. मै२ - मा तया, मै - तलटिप्पण्यां - यद्यानीतया । १२८. अ१ - दयितमाहलमिति । १२९. अ१ - गंभ । १३०. मै. मै१. मै२. मै३. अ - 'इति' नास्ति । १३१. मै. मै१. मै२. मै३. अ - 'भगे' नास्ति । १३२. अ - गं पसम्, मै. मै१. मै२. मै३ - 'जलम्' नास्ति । १३३-१३३. अ. अ१ - आहतेनोद्गतम् । १३४. अ. अ१ - अवर्णलोपः । १३५-१३५ . मै२ - 'जलं - - - - पालनशीला' नास्ति । १३६. अ१ - पानशीला ।

५९. क - पक्षिणी स्त्री । ६०. इ. उ. वा. वै - कुर्वन्ती । ६१. अ. आ. क. पा. हा. इ. वा. वै. म - 'तु' नास्ति । ६२. शृ१. अ. मै - गर्भे । ६३-६३. पा. हा. इ - गभशब्देन पसशब्देन, अ. वा - गर्भशब्देन पसशब्देन । *-[आ - मुद्रितपुस्तके लिखितपुस्तकेषु च 'योनिम्' इति पाठ उपलभ्यते । परन्तु वाक्यरचनानुगुणमस्माभिरयं शुद्धीकृत्य प्रदत्तः पाठो द्रष्टव्यः ।] । ६४. शृ१ - सङ्गजन्यम् ।

अम्बे अम्बाल्यम्बिके न मा यभति कश्चन ।
ससस्त्यश्वकः ।

अम्बे । अम्बालि । अम्बिके । न । मा । यभति । कः । चन ।
ससस्ति । अश्वकः ।

धेटो ल्युटि संज्ञायां कनि " केऽणः " (पा ७.४.१३) इति ह्रस्वत्वे छान्दसो णकारः । व्यत्यस्तविकृतानेकपदोपादानेन [137-] रतिरभसं दर्शयति [-137] । अन्य आह - धाणिका योनिरेतसो धात्री, इयं धाणिका या काचित् शकुन्तिकेव आहलमिति आकृष्टमिति कृत्वा आकर्षणेन विलेखनेन हेतुना स्वयं सर्पति अभिसर्पति । अस्मिन् पक्षे व्यत्ययेनाख्यातस्य निघाताभावः । [138]किञ्च – [139]गभे [140]भगे गर्भे [141]चाहतं [142]चापादितं पसः शुक्लं निजल्गुलीति निगिरति परिगृह्णाति । अथवा आहतमिति कृत्वा [143]असौ निजल्गुलीति ग्रसते पिदधाति, एवमालपन्ती त्वं न तृप्यसीति ॥

सा भूयोऽपि तथैव च गर्हते - ' अम्बे ' इत्यादिना ॥

अथ तां सर्वा अङ्गना [144-] अभिमेधन्ते - ' माता च [-144] इत्यनुष्टुभा ॥ विकारे [145]प्रकृतिशब्दः । वृक्षविकारस्य खट्वायाः ᐯअग्रम् ᐯउत्सङ्गं तव ᐯमाता ᐯच ᐯपिता ᐯच पूर्वमारोहतः । अथ तत्र [146]खट्वामारुह्य तव ᐯपिता [147-]ᐯप्रसुलामि प्रसङ्गेन त्वां [-147] प्रेरयामीति

शब्दद्वयेनाभिधीयते । निजल्गुलीति निगिरति । यथा लोके गर्भधारिणी स्त्री योनावाहितं रेतो निगिरति गर्भरूपेणान्तर्धृत्वा संतुष्यति, एवं त्वमपि देवतारूपाश्वस्वीकारेण संतोष्टुमर्हसीत्यभिप्रायः ॥

अम्ब इति ॥ अथ गर्हार्थां तृतीयामृचमाह [65-] अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससस्त्यश्वकः ' इति [-65] ॥

१३७-१३७. अ१ - संदर्शयति । १३८. अ - ' किञ्च ' नास्ति । १३९. मै२ - भगे । १४०. मै. मै१. मै३. अ - ' भगे ' नास्ति । १४१. अ. अ१ - ' चाहतम् ' नास्ति । १४२. मै. मै१. मै२. मै३ - आपादितम् । १४३. मै२ - ' असौ ' नास्ति । १४४-१४४. मै. मै१. मै३ - अभिमेधयन्ते मातेत्यनुष्टुभा । १४५. अ१ - प्रतिशब्दः । १४६. मै. मै१. मै२. मै३ - ' खट्वाम् ' नास्ति, अ - तत्र । १४७-१४७. अ - प्रसुलामि प्रसङ्गे त्वाम् , अ१ - प्रसुलामि इति प्रसङ्गे त्वा, मै२. मै - तलटिप्पण्यां - प्रसुलानि प्रसुवानि असङ्गेन ।

६५-६५. उ - ' अम्बे - - - - इति ' नास्ति ।

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः (३) ।
प्र सुलामीति ते पिता गभे
मुष्टिमतꣳसयत् ।

माता । च । ते । पिता । च । ते । अग्रम् । वृक्षस्य । रोहतः (३) ।
प्रेति । सुलामि । इति । ते । पिता । गभे ।
मुष्टिम् । अतꣳसयत् ।

तव मातरं प्रलोभ्य तव मातुः Vगभे भगे Vमुष्टिं मुष्टिस्थानीयं [१४८]करं शेफम् Vअतंसयत् प्रावेशयत् । [१४९]'षू प्रेरणे' (धापा १४३३) तौदादिकः, छान्दसो लकारः । [१५०]तंसतिरवतंसनकर्मा [१५१]वा । यद्वा - [१५२]प्रसुलामि प्रसौमि अनुजानामि तवातिप्रसङ्गं, यच्छक्नोषि तत्कुरुष्वेति करिष्यमाणमतिप्रसङ्गं प्रकाशयन् [१५३]गभे मुष्टिं प्रावेशयदिति । " षु प्रसवैश्वर्ययोः " (पा ९९६,१०६६), [१५४]आदादिकः । व्यत्ययेन शः । [१५५]स्वपतेर्वा लेट्याडागमः, व्यत्ययेन शपो लुक् । 'भूसुवोस्तिङि' (पा ७.३.८८) इति गुणाभावः । एवं त्वमपि [१५६]अतिप्रसक्ताऽसि [१५७]वर्तस्वेदानीमिति । अन्य आह - माता योनिः, पिता [१५८]प्रजननं; तावुभौ वृक्षस्य वर्षणव्यापारस्य अग्रं परां काष्ठां Vरोहतः प्राप्तवन्तौ, अथानन्तरं [१५९]पिता प्रसुलामि प्रकर्षेण प्रेरितं मयेति एतावन्तं कालमनुज्ञातं [१६०]मयेति वा कृपामतीवोद्भावयन् तव गभे मातरि कृतमुष्टिं

मातेति ॥ [६६]अथाभिमेधनार्थां तृतीयामृचमाह - माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः । प्र सुलामीति ते पिता गभे मुष्टिमतꣳसयत्' इति ॥ हे महिषि , Vते तव या Vमाता तथा तव Vयः Vपिता तावुभावपि Vवृक्षस्य Vअग्रं वृक्षस्य कस्यचिच्छाखया निर्मितं तल्पं Vरोहतः आरुह्य शयाते तदानीं Vते [६७]Vपिता Vप्रसुलामि प्रवेशयामीत्येवमुक्त्वा [६८]Vगभे योनौ Vमुष्टिं मुष्टिसदृशं मेढ्रम् Vअतंसयत् प्रावेशयत् । एवमयमप्यश्वश्चकार । अतो हे महिषि, त्वमुत्तिष्ठेत्यभिप्रायः ॥

---

१४८. मै. मै१. मै२. मै३. अ - खरम् । १४९. अ१ - 'षू'नास्ति । १५०. अ. अ१ - तंसयतिरव° । १५१. अ१ - चौरादिकः । १५२. अ. अ१ - प्रसुलामि इति । १५३. मै. मै१. मै३. अ. अ१ - गर्भे । १५४. मै२ - इति तौदादिकः । १५५. अ१ - सुपतेर्वा । १५६. मै२ - °क्तासि इति । १५७. अ - विनिवर्तस्वे°, अ१ - निवर्तस्वे° । १५८. मै. मै१. मै३. अ - जननम् । १५९. अ१ - पिता प्रजननम् । १६०. अ१ - मया ।

---

६६. हा - अप्यमि° । ६७. वा - 'पिता'नास्ति । ६८. मै - गते ।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण
आयूꣳषि तारिषत् ।

दधिक्राव्ण इति दधि-क्राव्णः । अकारिषम् । जिष्णोः ।
अश्वस्य । वाजिनः ।
सुरभि । नः । मुखा । करत् । प्रेति । नः ।
आयूꣳषि । तारिषत् ।

संयोगमुद्रामतंसयत् [161]शिथिलीकृत्य निरगमत् ; [162]तेनेदानीमुत्तिष्ठेति । " तसु [163]उपक्षये " (धापा१२८९), छान्दसो नुगागमः ॥

सर्वे सुरभिमतीमृचं जपन्ति –– 'दधिक्राव्णः' इत्यनुष्टुभा ॥ व्याख्यातेयं " वैश्वानरो नः " (तैसं १.५.११) इत्यत्र । दधीनि वारणहवींषि, क्रमतोऽग्नेः [V]जिष्णोः जयशीलस्य [V]अश्वस्य [164]व्यापकस्य [V]वाजिनः [165]अन्नवतः अहमकार्षं कर्मकरः स्याम् । स चास्माकं मुखानि सुरभीणि सुकृतैः समासादितसौरभाणि [166]करोतु । [V]आयूंषि च अस्मभ्यं [V]प्रतारिषत् [167]वर्धयत्विति ॥

दधिक्राव्ण इति ॥ कल्पः - " दधिक्राव्णो अकारिषमिति सर्वाः सुरभिमतीमृचमन्ततो जपित्वा " (आपश्रौ २०.१८.७) इति । पाठस्तु - " दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत् " इति ॥ दधि क्रामति प्राप्नोतीति दधिक्रावा । एतन्नामको दधिप्रियः [69]कश्चिद्देवविशेषः । अग्निरित्यन्ये । तस्य देवस्य [V]अकारिषम् अहं कर्म कृतवानस्मि । कीदृशस्य ? [V]जिष्णोः जयशीलस्य [V]अश्वस्य व्यापिनः [V]वाजिनः अन्नवतः । सः देवः [V]नः अस्माकं मुखं [V]सुरभि [V]करत् [70]कर्पूरादिद्रव्यसमृद्धिप्रदानेन सुगन्धोपेतं [71]करोतु अस्माकं [V]आयूंषि च [V]प्रतारिषत् [72]प्रवर्धयतु ॥

आप इति ॥ कल्पः - [73]" आपो हि ष्ठीयाभिर्मार्जयित्वा [73] " (आपश्रौ २०.१८.७) इति ॥ तत्र प्रथमामाह - " आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे " इति । हिशब्दः एवकारार्थः

१६१. अ१ - अस्थिरीकृत्य । १६२. अ - °मुत्तिष्ठते । १६३. मै. मै१. मै३. अ. अ१ - क्षये । १६४. मै२ - 'व्यापकस्य' नास्ति । १६५. अ - अन्तवन्तम् । १६६. अ. अ१ - करोति । १६७. मै२ - वर्धयन् द्वितीय ।

६९. उ - विशेषः आष शये । ७०. मै - °द्रव्यप्रदानेन समृद्धिप्रदानेन । ७१. शृ१ - करोति । ७२. मै - प्रवर्धयत् । ७३-७३. आ - आपो हि ष्ठा मयोभुव इति तिसृभिर्मार्जयित्वा ।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ।
यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

आपः । हि । स्थ । मयोभुव इति मयः-भुवः । ताः । नः । ऊर्जे । दधातन ।
महे । रणाय । चक्षसे ।
यः । नः । शिवतम इति शिव-तमः । रसः ।
तस्य । भाजयत । इह । नः ।

अद्भिर्मार्जयन्ते - ‘आपो हिष्ठा’ इति तिसृभिर्गायत्रीभिः ॥ एताश्च तिस्रः “ वि पाजसा ” (तैसं ४.१.५) इत्यत्र व्याख्याताः । हे Vआपः, यूयम् आपो व्यापिकाः स्थ । Vमयोभुवः सुखस्य भावयित्र्यः Vताः यूयम् Vऊर्जे [१६८-] अन्नार्थं रसार्थं [-१६८] वा Vदधातन [१६९]धारयत । महते [१७०]Vरणाय रमणीयाय [१७१]Vचक्षसे दर्शनीयाय [१७२]Vवः युष्माकं Vशिवतमः Vरसः तमस्मान् सेवयत । Vइह

प्रसिद्ध्यर्थो वा । हे Vआपः, यूयमेव Vमयोभुवः Vस्थ सुखस्य भावयित्र्यो भवत । स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम् । Vताः तादृश्यः यूयं Vनः अस्मान् Vऊर्जे रसाय भवदीयरसानुभवार्थं Vदधातन स्थापयत । किञ्च Vमहे महते Vरणाय रमणीयाय Vचक्षसे दर्शनाय Vदधातन अस्मान् परतत्त्वसाक्षात्कारयोग्यान् कुरुतेत्यर्थः ॥

य इति ॥ अथ द्वितीयामाह - ‘यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः’ इति ॥ Vवः युष्माकं Vशिवतमः शान्ततमः [७४]सुखैकहेतुः Vयः Vरसः अस्ति, Vइह अस्मिन् कर्मणि Vनः अस्मान् Vतस्य Vभाजयत तं रसं प्रापयत । [७५-] तत्र दृष्टान्तः - Vउशतीः Vइव Vमातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयं स्तन्यरसं प्रापयन्ति तद्वदित्यर्थः [-७५] ॥

१६८-१६८. अ - अन्नाद्यरसार्थम् , अ१ - अन्ताद्यर्थं रसार्थम् । १६९. अ१ - ‘धारयत’ नास्ति । १७०. मै२ - दर्शनाय, मै. मै१. मै३. अ - ‘रणाय’ नास्ति । १७१. मै. मै१. मै२. मै३. अ - ‘चक्षसे’ नास्ति । १७२. अ१ - यः ।

---

७४. इ. वा - सुखैकपातुः । ७५-७५. वा - ‘तत्र - - - - °दित्यर्थः’ नास्ति ।

उशतीरिव मातरः ।
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ (४) ।
आपो जनयथा च नः ॥१९॥

(आसामत्ति न रोहतो जिन्वथ चत्वारि च ।)

उशतीः । इव । मातरः ।
तस्मै । अरम् । गमाम । वः । यस्य । क्षयाय । जिन्वथ (४) ।
आपः । जनयथ । च । नः ॥१९॥

[कासं, अश्वमेध ४.४ ; कपिसं - - - - ; मैसं ३.१२.२०;१३.१ वासं २३.१८.३२]

[१७३]अस्मिन् कर्मणि कामयमानाः [१७४]स्नेहवत्यः [V]मातरः [V]इव युष्माकं सम्बन्धिने [V]तस्मै रसाय [१७५-] पर्याप्तये [V]अरं गमाम [-१७५], [१७६]ततः पर्याप्तं गम्यास्म । [V]यस्य रसस्य निवासभूतं [१७७]पुरुषं [V]जिन्वथ प्रीणयत । अस्माकं [V]जनयथ [V]च जातान् कुरुत, युष्मदीयरसलाभेन [१७८]हि जाता भवन्ति इति ॥

॥ इति सप्तमे चतुर्थे एकोनविंशोऽनुवाकः ॥

तस्मा इति ॥ [७६]अथ तृतीयामाह - 'तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः' इति ॥ [V]यस्य रसस्य [V]क्षयाय क्षयेण निवासेन [V]जिन्वथ यूयं प्रीता भवथ, [V]तस्मै रसाय [V]वः युष्मान् [७७-] अरं गमाम [-७७] अलं भृशं प्राप्नुमः । किञ्च हे [V]आपः, यूयं [V]नः अस्मान् [V]जनयथ प्रजोत्पादकान् [७८]कुरुत ॥

॥ [७९-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकोनविंशोऽनुवाकः [-७९] ॥

१७३. अ१ - 'अस्मिन्' नास्ति। १७४. मै२. अ१ - ते भवत्यः। १७५-१७५. अ - पर्याप्तः अरं गमाम, अ१ - पर्याप्तं गमामतम्। १७६. मै२. अ१ - 'ततः' नास्ति। १७७. मै२ - पुरुषान्। १७८. मै२ - 'हि' नास्ति।

७६. इ. वा - 'अथ' नास्ति। ७७-७७. अ. आ. क. पा. हा. इ. वा. वै. म - 'अरं गमाम' नास्ति। ७८. शृ१. मै - कुरुत। ७९-७९. मै - इत्येकोनविंशोऽनुवाकः।

भूर्भुवः सुवर्वसंवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा

भूः । भुवः । सुवः । वसवः । त्वा । अञ्जन्तु । गायत्रेण । छन्दसा । रुद्राः । त्वा । अञ्जन्तु । त्रैष्टुभेन । छन्दसा । आदित्याः । त्वा । अञ्जन्तु । जागतेन । छन्दसा ।

पत्न्योऽश्वमञ्जन्ति । [1]प्राक्क्रोडात् महिषी 'वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा' इति 'भूः' इति च । अथ [2]क्रोडादारभ्या [3]नाभेर्वावाता 'रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसा' इति 'भुवः' इति च । [4]तथा [5]नाभेरारभ्य आपुच्छात् परिवृक्तिः 'आदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा' इति 'सुवः' इति च । गता मन्त्राः ॥

एकोनविंशेऽश्वस्य मरणोत्तरकालीन उपचारोऽभिहितः । विंशे तु पूर्वकालीन उपचारोभिधीयते ॥

भूरिति ॥ *कल्पः - "पत्नयोऽश्वमलंकुर्वन्ति महिषी वावाता परिवृक्तीति शत[९]शतमेकैकस्याः सचिवा राजपुत्रीः [1]दाराश्वोग्राणाम् [2]अराज्ञां सूतग्रामण्या इति सहस्रं सहस्रं मणयः सु(सौ)वर्णर(रा)जतसामुद्रान् [3]बालेषु मणीनावयन्ति भूरिति सौवर्णान् महिषी प्राग्वहात् भुव इति राजतान् वावाता [4]प्रत्यग्वहात् [5]प्राक्श्रोणेः सुवरिति सामुद्रान् परिवृक्ती प्रत्यक्श्रोणेः" (आपश्रौ २०.१५.७-१०) इति ॥ पाठस्तु - 'भूर्भुवः सुवः' इति ॥ अत्रोक्ता Vभूः Vभुवः Vसुवः इत्येतास्तिस्रो व्याहृतयो लोकत्रयवाचिन्यः । तथा सति सौवर्णराजतशङ्खमणयः क्रमेण भूम्यादिलोकत्रयरूपा इति [6]सूत्राणामर्थः । तैरेतैर्मन्त्रैर्मुखमध्यपाश्चात्यभागेषु महिषी वावाता [7]परिवृक्त्याख्या उत्तममध्यमाधमा राजपत्न्योऽश्वस्य केशेषु मणीन् योजयेयुः ॥

वसव इति ॥ कल्पः [8]" अथास्य स्वदेशानाज्येनाऽभ्यज्यन्ति [8]' वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसेति गौल्गुलवेन महिषी रुद्रा इति [9]कासाम्बवेन वावाताऽऽदित्या इति मुस्ताकृतेन परिवृक्ती" (आपश्रौ

---

१. अ - 'प्राक्क्रोडात्' नास्ति, अ१ - भूर्भुवः सुवरिति । २. मै२ - क्रोडादारभ्य । ३. अ - 'नाभेर्वावाता' नास्ति । ४. मै२ - 'तथा' नास्ति । ५. मै२ - नाभेरामह्य ।

---

*[आ - मुद्रितपुस्तके, मै - लिखितपुस्तके च अत्र 'कल्पः' इत्यस्य प्राक् 'भूर्भुवः सुवः' इति पाठ उपलभ्यते । परमयं पाठः संपूर्णकल्पपाठादूर्ध्वं 'पाठस्तु' इत्यनेनास्माभिः प्रदत्तः । सायणार्याणां भाष्यशैलीमनुरुन्ध्यास्माभिर्व्यवस्थापितोऽयं क्रमो द्रष्टव्यः।] । १. अ. आ. पा. इ. वा - धात्रीश्वो, °हा - धात्र्यश्वो° । २. क - राज्ञाम् । ३. शृ१. मै - बाले बालेषु । ४. आ - प्रत्यग्वह्नात्, शृ१. मै - प्रत्यग्वहान्, क - प्रत्यग्वाहात् । ५. हा - प्राक्श्रोणीः, मै - प्राक् श्रेणीः । ६. मै - मन्त्राणामर्थः । ७. मै - °वृक्ताख्यात् । ८-८. क - अथाश्वस्य देहानाज्येना°, मै - स्वदेशानाज्येना° । ९. [आपश्रौसूत्रमवलम्ब्य शुद्धीकृतोऽयं पाठः ।] । मै - कासाववनेन; अ. आ. क. पा. हा. इ. वा. वै. म - कौसुम्भेन ।

जीवतोऽश्वस्योपचारः]

यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् ।
एतꣳ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः ।

यत् । वातः । अपः । अगमत् । इन्द्रस्य । तनुवम् । प्रियाम् ।
एतम् । स्तोतः । एतेन । पथा । पुनः । अश्वम् । एति । वर्तयासि । नः ।

अथ शालां [६]नयन्ति – ‘ यद्वातः’ इति ॥ पथ्या बृहतीयं, तृतीयस्य पादस्य द्वादशाक्षरत्वात् । पुनरिति तस्यान्तः । हे [V]स्तोतः शब्दयितः [७-] वायो, यत् [-७] [८-] येन [V]पथा [-८] । “ सुपां सुलुक्° ” (पा ७.१.४९) इति लुक् । [V]वातः [९]प्राणाख्या तव वृत्तिः [१०][V]अपः [११][V]अगमत् अगमयत् । “ बहुलमन्यत्रापि° ” (उसू २.२३) इति णिलुक् । “छन्दस्युभयथा” (पा ३.४.११७) इत्यार्धधातुकत्वात् [१२]शपः । [V]इन्द्रस्य [V]प्रियां [V]तनुवं तनुम् । “ तन्वादीनां छन्दसि ” (पा ६.४.८६ वा) [१३]इत्युवङ् । एतेन पथा एतम् [V]अश्वं [V]पुनः अस्मान् प्रति [१४][V]आवर्तयासि । [१५]आवर्तयतेर्लेट्याडागमः । [१६-] (अस्माकं वा) [-१६] ॥

---

२०. १५.१२) इति ॥ पाठस्तु - ‘ वसवस्त्वाऽऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा ’ इति ॥ हेऽश्व, अष्टौ [V]वसवः [V]गायत्रेण [V]छन्दसा युक्ता [१०]गुग्गुलजन्येन तैलेन मुखभागे त्वाम् [V]अञ्जन्तु । एकादश [V]रुद्राः [११]कुसुम्भबीजजन्येन तैलेन त्वां मध्यभागे त्रिष्टुप्छन्दोयुक्ता अञ्जन्तु । द्वादश [V]आदित्याः जागतछन्दोयुक्ता मुस्तामूलजन्येन तैलेन पाश्चात्यभागे त्वाम् [V]अञ्जन्तु । एतदेव तैलं सूत्रे आज्यशब्देन व्यवहृतम् ॥

यदिति ॥ कल्पः - “ यद्वातो अपो अगमदिति [१२]प्रदक्षिणमावर्तयति यतः प्रयाति तदवतिष्ठते ” (आपश्रौ२०.१६.१६-१७) इति । रथयुक्तोऽयमश्वो यतो रथशालायाः प्रयातः पुनः प्रादक्षिण्येनऽऽवृतस्तस्यामेव रथशालायामवतिष्ठते । पाठस्तु - ‘ यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतꣳ स्तोतरेतेन पथा पुनरश्वमा

---

६. अ. अ१ - नयति । ७-७. अ१ - शब्दवत् । ८-८. मै२ - येन यथा, अ - ‘ येन पथा ’ नास्ति । ९. मै२ - प्राणादित्य । १०. अ - आपः । ११. मै२ - ‘ अगमत् ’ नास्ति । १२. अ - पापम् , मै२ - ‘ शपः ’ नास्ति । १३. मै२ - अवङ् । १४. अ - आवर्तयसि । १५. अ१ - आवर्तय लेट्याडागमः । १६-१६. अ. अ१ - आत्मकम् ।

---

१०. मै - गुल्गुलुजन्येन । ११. अ. आ. क. पा. हा. इ. वा. वै. म - कुसुम्भजन्येन । १२. [आपश्रौसूत्रमवलम्ब्यास्माभिः शुद्धतामापादितोऽयं पाठः ।] । अ. आ. क. पा. हा. इ. वा. वै. म. मै - °मावर्तते, क - °मावर्तयते ।

लाजी३ञ्छाची३न् यशो ममा३म् ।
यव्यायै गव्याया एतद्देवा

लाजी३न् । शाची३न् । यशः । ममा३म् ।
यव्यायै । गव्यायै । एतत् । देवाः ।

[१७]अश्वाय मधुमिश्रान् लाजान् [१८]उपवपन्ति - ' लाजीन् ' इत्यनुष्टुभा ।। हे [१९]लाजवन् Vलाजिन् हे [२०]शाचवन् [२१]Vशाचिन् , Vयशः [२२-]Vममाम् इत्यस्य मम यशोहेतोः [-२२] । " परमपि छन्दसि " इति षष्ठ्यन्तस्य पूर्वाङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य स्वरः । त्रयाणामपि [२३]पूर्वपूर्वाविद्यमानवद्भावेन [२४]षाष्ठिकं आमन्त्रिताद्युदात्तत्वम् (पा ६.१.१९८) । " दूराद्धूते च " (पा ८.२.८४) इत्युदात्तः प्लुतः, [२५]तस्यासिद्धत्वादुत्तरस्य [२६]वर्ज्यमानस्वराभावः । अन्त्यस्य " यणोऽप्रगृह्यस्य " इति [२७]सानुनासिकः प्लुतः । Vयव्यायै Vगव्यायै च यूयं नो भवत हे लाजा हे सक्तवः । यवानां समूहो यव्या । "[२८-] पाशादिभ्यो यः[-२८]" (गणपाठ ७२, पा ४.२.४९) ।

वर्तयासि नः ' इति ।। Vयत् येन पथा पुरा Vवातः वायुः Vअपः जलान् Vइन्द्रस्य Vप्रियां Vतनुवं पर्जन्यरूपाम् Vअगमत् प्रापयत् । हे Vस्तोतः स्तुतिकर्तः, त्वमश्वप्रेरणार्थं शब्दं कुर्वन् Vएतेन पूर्वसिद्धेन Vपथा मार्गेण Vएतम् Vअश्वम् Vनः अस्मान् प्रति Vआवर्तयासि आवृत्तं कुरु ।।

लाजीनिति ।। कल्पः - " लाजीञ्छाचीन् यशो ममा३मिति पत्नयोऽश्वायान्नपरिशेषान् [१३]उपवपन्ति " (आपश्रौ २०.१५.१९) इति ।। [१४-] पाठस्तु - " लाजीञ्छाचीन्यशो ममा३म् । यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते ' इति [-१४] ।। रात्रौ यैर्दशभिरन्नैर्होमाः कृतास्तदन्नशेषेषु लाजा अपि विद्यन्ते तानयमश्वो भक्षयति । अतो लाजा अस्य सन्तीति [१५]लाजी । भक्षयितुं शक्या अन्नविशेषाः शाचास्ता

१७. मै२ - ' अश्वाय ' नास्ति । १८. आपश्रौसूत्रमवलम्ब्यास्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः, मै. मै१. मै३ - प्रकिरति, अ - उपकिरन्ति, अ१ - उपहरन्ति, मै२ - अनुप्रकिरति । १९. मै२ - लाजवान् । २०. अ१ - शाचवान् । २१. अ१ - शाचिन् हे । २२-२२. अ१ - ममामन्यत्र यशः यशोहेतोः । २३. अ - पूर्वविप्रमाणवद्भावेन, अ१ - पूर्वाणां अविद्यमानवद्भावेन । २४. मै. मै१. मै२. मै३ - भावितम् , अ - भावित । २५. अ. अ१ - °द्धत्वादितरत्र । २६. मै - वर्जमान° । २७. अ१ - सानुनासिकः इति सानुनासिकः । २८-२८. मै२ - ' पाशादित्यो यः' नास्ति ।

१३. मै - उपसरति । १४. मै - ' पाठस्तु - - - - इति ' नास्ति । १५. मै - लाजाम् ।

अन्नमत्तैतदन्नमद्धि प्रजापते ।
युञ्जन्ति ब्रध्न(१)मरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ।

अन्नम् । अत्त । एतत् । अन्नम् । अद्धि । प्रजापत इति प्रजा-पते ।
युञ्जन्ति । ब्रध्नम् (१) । अरुषम् । चरन्तम् । परीति । तस्थुषः । रोचन्ते । रोचना । दिवि ।

गवां समूहो गव्या [२९]" खलगोरथात् " (पा ४.२.५०) इति [-२९] यः । यदन्तश्च [३०]स्वभावतः स्त्रियां वर्तते । Vएतत् च Vअन्नम् इव [३१]इममश्वम् अनुप्रविश्य हे Vदेवाः, Vअत्त । Vप्रजापते, त्वमपि Vएतत् Vअन्नम् [३२]Vअद्धि । प्राधान्यात् पुनरुपादानं प्रजापतेः । यथा – ब्राह्मणा आयाताः वसिष्ठोऽप्यायात इति ॥

अश्वं रथे युनक्ति –– ' युञ्जन्ति ब्रध्नम् ' इति ॥ एताः तिस्रो गायत्र्यः । Vयुञ्जन्ति युञ्जन्तु Vब्रध्नं परिमृढमश्वम् Vअरुषम् [३३]अरोषणं Vचरन्तं साधुचरणं Vपरितस्थुषः [३४]परितस्थिवांसः । विभक्तिव्यत्ययः । [३५-] पृष्ठमस्य मृज्यते [-३५] Vरोचन्ते अस्य पृष्ठे रोचनानि

अस्य सन्तीति शाची । अश्वो हि स्वामिनो यशः कीर्तिं संपादयति, तद्विवक्षया Vयशः Vमम इति वाक्यमेतन्नामत्वेन प्रयुज्यते । तैरेतैर्लाज्यादिभिस्त्रिभिर्नामभिरश्वं संबोध्य तिस्रः पत्न्यः [१६]आह्वयन्ति । [१७]दूराद्दाह्वातुमेते प्लुताः (द्र.पा ८.२.८४) । एवं संबोध्याश्वशरीरगतान् देवान् प्रत्येवं ब्रुवते - हे Vदेवाः, Vएतत् Vअन्नम् अस्माभिर्दीयमानमश्वरूपेण Vअत्त भक्षयत । हे Vप्रजापते देव स्वामिन् , त्वमपि Vएतत् Vअन्नं Vअद्धि भक्षय ॥

युञ्जन्तीति ॥ कल्पः - " युञ्जन्ति ब्रध्नमिति दक्षिणस्यां युगधुर्ये तमश्वं युनक्ति " (आपश्रौ २०.१६.१) इति ॥ पाठस्तु - ' युज्यन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः । रोचन्ते रोचना दिवि ' इति ॥ [१८]Vब्रध्नम् आदित्यरूपम् Vअरुषम् अग्निरूपं Vचरन्तं वायुरूपमिममश्वं तथा Vपरितस्थुषः परितोऽवस्थितांस्त्रींल्लोकानेतदश्वस्य रूपान् Vयुञ्जन्ति देवाः सर्वे रथे योजयन्ति । तथा Vदिवि द्युलोके वर्तमानानि Vरोचना प्रकाशरूपाणि नक्षत्राणि Vरोचन्ते [१९]अश्वमेतं प्रकाशयन्ति । अयमर्थः सर्वोऽपि ब्राह्मणे स्पष्टमुच्यते - " असौ वा आदित्यो ब्रध्नः । अग्निर्वा अरुषः । वायुर्वै चरन् । [२०-] इमे वै लोकाः परितस्थुषः [-२०] । नक्षत्राणि वै रोचना दिवि " (तैब्रा ३.९.४) इति ॥

२९-२९. अ - खलगोरथादीनि । ३०. मैर - स्वभावम् । ३१. अ - इममश्वं परिवृद्धमश्वमिव । ३२. अ१ - अपि । ३३. मैर - रोचनम् । ३४. मैर - परितस्थिवान् , अ१ - परितस्थिताः । ३५-३५. मै. मै१. मै३. अ - व्यष्टिं चिते, अ१ - पृष्ठे समृद्ध्यते ।

१६. आ - आह्वयन्ति, शृ१ - आनयन्ति, अ. पा. हा. इ. वा - आह्नियन्ति । १७. आ - °दाह्वातुम् , मै - दाहातुम् । १८. इ. वा - अघ्नम् । १९. वा. अश्वमेकम् । २०-२०. मै - ' इमे - - - - तस्थुषः ' नास्ति ।

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ।

युञ्जन्ति । अस्य । काम्या । हरी इति । विपक्षसेति
वि-पक्षसा । रथे । शोणा । धृष्णू इति ।
नृवाहसेति नृ-वाहसा ।

---

[३६]रोचमानानि रश्मयः दिवि । " अनुदात्तेतश्च हलादेः° " (पा ३.२.१४९) इति रोचतेर्युच् । " शेश्छन्दसि°" (पा ६.१.७०) इति शेर्लोपः ॥

इतरयोः पृष्ठे संमृज्येते - [V]युञ्जन्ति युञ्जन्तु [३७][V]अस्य [V]काम्याः [३८]काम्यौ इष्टौ । कामयतेः [३९]अचो यत्, " सुपां सुलुक्°" (पा ७.१.३९) इत्याकारः । [V]हरी [४०]अश्वौ [V]विपक्षसा विपक्षसौ उभयोः पक्षयोः स्थितौ । पूर्ववदाकारः । [V]रथे [V]शोणा शोणवर्णौ आलोहितौ [V]धृष्णू धर्षणसमर्थौ [४१]शत्रूणां [V]नृवाहसा [४२-] नॄन् वहन्तीति [-४२] नृवाहसौ मनुष्यवाहौ । " वहिहाधाञ्भ्यश्छन्दसि " (उ.सू ४.२२०) इत्यसुन् । " कारकपूर्वात् " इति, [४३]णिदिति च तत्रानुवर्तते । पूर्ववदाकारः ॥

युञ्जन्तीति ॥ कल्पः - " युञ्जन्त्यस्य काम्येति प्रष्टी " (आपश्रौ २०.१६.२) इति । तस्याश्वस्य सहायभूतावितरौ द्वावश्वौ [२१]युनक्ति । पाठस्तु - 'युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ' इति ॥ [२२][V]अस्य अश्वस्य सहायभूतौ [V]हरी द्वावश्वौ [V]युञ्जन्ति देवाः [V]रथे योजयन्ति । कीदृशौ [V]हरी [V]काम्या कमनीयौ, [V]विपक्षसा विशेषेण पक्षे रथस्य पार्श्वे वर्तमानौ, [V]शोणा ईषल्लोहितौ, [V]धृष्णू शत्रुधर्षणक्षमौ [V]नृवाहसा मनुष्यवाहिनौ ॥

---

३६. मैर. अ१ - ' रोचमानानि ' नास्ति । ३७. अ१ - ' अस्य ' नास्ति । ३८. अ१ - कामौ, मैर - ' काम्यौ ' नास्ति । ३९. मैर - अपः । ४०. अ१ - हरिवर्णौ । ४१. मैर - नृणाम् । ४२-४२. मैर - ' नॄन् वहन्तीति ' नास्ति । ४३. मैर - णिदि ।

---

२१. शृ१. मै - युञ्जात् । २२. वा - ' अस्य ' नास्ति ।

जीवतोऽश्वस्योपचारः]

केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥२०॥

(ब्रध्नं पञ्चविꣳशतिश्च।)

केतुम्। कृण्वन्। अकेतवे। पेशः। मर्याः।अपेशसे।
समिति। उषद्भिरित्युषत्-भिः। अजायथाः ॥२०॥

[कासं, अश्वमेध ४.९ ; कपिसं - - - - ; मैसं ३.१२.१८-१९ ; वासं २३.५-८]

ध्वजं प्रतिमुञ्चति — Vकेतुं ध्वजं Vकृण्वन् कुर्वन्तु। " कृवि हिंसाकरणयोश्च " (धापा ५९९), लेटि " धिन्विकृण्व्योर च " (पा ३.१.८०) इत्युप्रत्ययः, छान्दसो निघाताभावः। Vअकेतवे असत्यस्मिन्नज्ञापकाय Vपेशः रूपं रूपवृन्दं हे Vमर्याः मनुष्याः। " छन्दसि निष्टर्क्य° " (पा ३.१.१२३) इत्यत्र निपात्यते। Vअपेशसे असत्यस्मिन् रूपरहिताय। " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम्। तथा [४४]च सति त्वम् [४५-]Vउषद्भिः ज्वलद्भिरिव [-४५] Vसमजायथाः ज्वालावानिव संजायस्व। जानातेर्वा छान्दसो [४६]जभावः। ज्ञापकेन [४७]हेतुना [४८]ज्वालावानिव सर्वत्र ज्ञायस्व। " दृक्स्ववःस्वतवसाम् " (पा ७.१.८३) इत्यादिना उषसः तत्त्वम् ॥

॥ इति सप्तमे चतुर्थे विंशोऽनुवाकः ॥

केतुमिति ॥ [२३-]कल्पः - " केतुं कृण्वन्नकेतव इति रथे ध्वजमुपगूहति " (आपश्रौ २०.१६.३) इति ॥ पाठस्तु - 'केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः' इति। मर्या मनुष्याः, Vअकेतवे पूर्वं ध्वजरहिताय रथाय Vकेतुं Vकृण्वन् ध्वजं कुर्वन्तु। Vअपेशसे [-२३] सुवर्णालंकाररहिताय रथाय Vपेशः सुवर्णालंकारं कुर्वन्तु। हे रथ, त्वम् Vउषद्भिः ज्वालासदृशैः सुवर्णरश्मिभिः Vसमजायथाः संगतो जातोऽसि ॥

॥ [२४-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके विंशोऽनुवाकः [-२४] ॥

४४. मै. मै१. मै२. मै३. अ१ - हि। ४५-४५. मै२ - षट् ज्वालाभिः वीव। ४६. अ - भावः। ४७. मै२ - केतुना। ४८. अ१ - ज्वालानिव।

२३-२३. मै - 'कल्पः - - - - अपेशसे' नास्ति। २४-२४. मै - इति विंशोऽनुवाकः।

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥२१॥

(प्राणायाऽष्टाविंशतिः ।)

प्राणायेति प्र-अनाय । स्वाहा । व्यानायेति वि-अनाय । स्वाहा । अपानायेत्यप-अनाय । स्वाहा । स्नावभ्य इति स्नाव-भ्यः । स्वाहा । संतानेभ्य इति सं-तानेभ्यः । स्वाहा । परिसंतानेभ्य इति परि-संतानेभ्यः । स्वाहा । पर्वभ्य इति पर्व-भ्यः । स्वाहा । संधानेभ्य इति सं-धानेभ्यः । स्वाहा । शरीरेभ्यः । स्वाहा । यज्ञाय । स्वाहा । दक्षिणाभ्यः । स्वाहा । सुवर्गायेति सुवः-गाय । स्वाहा । लोकाय । स्वाहा । सर्वस्मै । स्वाहा (१) ॥

[कासं, अश्वमेध ४.१० ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

अथ नक्तं होमेष्वेव सन्ततिहोमाः — [१-] ' प्राणाय स्वाहा व्यानाय स्वाहा ' इत्याद्याः । प्राणादयः शब्दाः निगदसिद्धाः ॥

॥ इति सप्तमे चतुर्थे एकविंशोऽनुवाकः[१] ॥

विंशेऽनुवाके जीवतोऽश्वस्य उपचार उक्तः । एकविंशे [१]त्वन्नहोमशेषोऽभिधीयते । तथा च ब्राह्मणम् - " प्राणाय स्वाहा व्यानाय स्वाहेति संततिहोमाञ्जुहोति " (तैब्रा ३.८.१८) इति । पाठस्तु - ' प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ' इति ॥ स्नावसूत्पन्नाः शाखा नाड्यः संतानाः । तासूत्पन्ना उपशाखा नाड्यः परिसंतानाः । एतैश्चतुर्दशभिर्मन्त्रैरन्नहोमेषु संतत्याख्यं होमं कुर्यात् ॥

॥ [२-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकविंशोऽनुवाकः[-२] ॥

१-१. अ - ' प्राणाय - - - - °नुवाकः ' नास्ति । २. मै२ - इत्यादयः ।

१. मै - त्वन्नहोमविशेषः । २-२. मै - इत्येकविंशोऽनुवाकः ।

सि॒ताय॒ स्वाहा॒ऽसि॑ताय॒ स्वाहा॒ऽभिहि॑ताय॒ स्वाहा॒ऽन॑भिहिताय॒ स्वाहा॑ यु॒क्ताय॒ स्वाहा॒ऽयु॑क्ताय॒ स्वाहा॑ सु॒यु॑क्ताय॒ स्वाहो॒द्यु॑क्ताय॒ स्वाहा॑ विमु॑क्ताय॒ स्वाहा॑ प्रमु॑क्ताय॒ स्वाहा॑

सि॒ताय॑ । स्वाहा॑ । असि॑ताय । स्वाहा॑ । अ॒भिहि॑ता॒येत्य॒भि-हि॒ता॒य॒ । स्वाहा॑ । अन॑भिहिता॒येत्यन॑भि-हि॒ता॒य॒ । स्वाहा॑ । यु॒क्ताय॑ । स्वाहा॑ । अयु॑क्ताय । स्वाहा॑ । सु॒यु॑क्ता॒येति॒ सु-यु॒क्ता॒य॒ । स्वाहा॑ । उ॒द्यु॑क्ता॒येत्यु॒त्-यु॒क्ता॒य॒ । स्वाहा॑ । विमु॑क्ता॒येति॒ वि-मु॒क्ता॒य॒ । स्वाहा॑ । प्रमु॑क्ता॒येति॒ प्र-मु॒क्ता॒य॒ । स्वाहा॑ ।

[१-] पुनरपि [२]रात्रिहोमेष्वेव प्रमुक्तिहोमाः[-१]— 'सिताय स्वाहा' इत्यादयो निगदसिद्धा एव ॥

॥ इति भट्टभास्करमिश्रविरचिते ज्ञानयज्ञाख्ये यजुर्वेदभाष्ये सप्तमकाण्डे चतुर्थे प्रश्ने द्वाविंशोऽनुवाकः ॥

अथ द्वाविंशेऽन्नहोमेष्वेव प्रमुक्त्याख्या होमा उच्यन्ते । तथा च ब्राह्मणम् - " सिताय स्वाहाऽसिताय स्वाहेति [१]प्रमुक्तीर्जुहोति " (तैब्रा ३.८.१८) इति । पाठस्तु - ' सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा संवञ्चते स्वाहाऽनुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा ' इति ॥ [२]सितादीन्यश्वविशेषणानि । सितासितशब्दाभ्यामारोहण-कालीनबन्धाबन्धौ विवक्षितौ । अभिहितानभिहितशब्दाभ्यां [३]रशनायुगुले बन्धाबन्धौ । युक्तादिचतुष्टयेन रथयोजनविशेषाः । विमुक्तप्रमुक्तशब्दाभ्यां मोचनविशेषौ । वञ्चतादिशब्दपञ्चकेन गमनप्रकारविशेषाः ।

१-१. अ - 'पुनरपि - - - - °होमाः' नास्ति । २. मै२ - नक्तं होमेष्वेव ।

१. हा - मुक्तीर्° । २. मै - सिता दिव्याश्व° । ३. इ. वा - रशनायुगले, मै - रशनायगले ।

वञ्चते स्वाहा परिवञ्चते स्वाहा संवञ्चते स्वाहाऽनुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा ॥२२॥

(सितायाष्टात्रिꣳशत् ।)

वञ्चते । स्वाहा । परिवञ्चत इति परि-वञ्चते । स्वाहा । संवञ्चत इति सं-वञ्चते । स्वाहा । अनुवञ्चत इत्यनु-वञ्चते । स्वाहा । उद्वञ्चत इत्युत्-वञ्चते । स्वाहा । यते । स्वाहा । धावते । स्वाहा । तिष्ठते । स्वाहा । सर्वस्मै । स्वाहा ॥२२॥

[कासं, अश्वमेध ४.११ ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

उपर्यारूढेन प्रेरिताः वञ्चनादयः । [४] यतादिशब्दैस्तु स्वेच्छाकृता इति विशेषः । एतैरेकोनविंशतिमन्त्रैः [५]प्रयुक्तिहोमः कार्यः ।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः [४] -

चतुर्विंशतिरात्रौ द्वौ चतुर्थाद्यद्वितीययोः ।
त्रिंशद्रात्रस्तृतीये स्याद्द्वात्रिंशद्रात्र उत्तरे ॥१॥
[६]त्रयस्त्रिंशदहोऽन्यस्मिन् षट्त्रिंशद्रात्र उत्तरे ।
एकोनपञ्चाशदहः सप्तमे समुदीरितः ॥२॥
संवत्सराख्यसत्रस्य दीक्षाकालोऽष्टमे श्रुतः ।
दीक्षाश्चोपसदोऽन्यस्मिन् दशमे प्रायणीयकम् ॥३॥
मासा एकादशेऽथाश्वमेधमन्त्रा उदीरिताः ।
मेषो नवापाव्यहोमा अवन्तीः परियन्ति हि ॥४॥
कूप्याभ्यो विंशतिश्चाद्भ्यो द्वादशापां तु होमकाः ।
यो अर्व श्वप्रहारः स्यात् परोऽधस्पदसंस्थितिः ॥५॥
अहं ब्रह्मा [७]स्वामिहस्तं [८]धृत्वाऽभिक्रेति वाचयेत् ।
एते मन्त्रास्तु चत्वारो यव्यहोमा नमो नव ॥६॥

४-४. वा - 'यतादि° - - - - °संग्रहः' नास्ति । ५. आ - प्रयुक्ताख्यहोमः । ६. हा. इ - त्रयस्त्रिंशदहान्यस्मिन् । ७. अ. आ. क. पा.हा. वा - स्वामिहस्ते । ८. मै - धृत्वातिक्रेति ।

[बृह॒स्पति॒ः श्रद्यथा॒ वा ऋ॒क्षा वै प्र॒जाप॑ति॒र्येन॒ येन॒ द्वे वा॑वादि॒त्या वसि॑ष्ठः संवत्स॒राय॑ सुव॒र्गं ब्र॑ह्मवा॒दिनो॒ ज्योति॑ष्टोमं मे॒षः कू॒प्या॑भ्यो॒ऽद्भ्यो यो नमो॑ मयो॒भूः किꣳस्वि॒दम्बे॒ भूः प्रा॒णाय॑ सि॒ताय॒ द्वावि॑ꣳशतिः ।]

---

[९]मयोऽष्टौ स्युर्गव्यहोमाः किं [१०]ब्रह्मोद्ये षडीरिताः ।
पत्नीमुदानयेदम्बे सुभेत्याच्छादयेदुभौ ॥७॥
तौ संप्रसारयेत् पादान् [११-] वृषाध्वर्यस्तु मन्त्रयेत् [-११] ।
[१२]उत्सग्दधाति गुह्ये द्वे ह्यम्बे अश्वं [१३]विगर्हति ॥८॥
[१४]ऊर्ध्वामन्या [१५]बोधयेयुस्त्रिरेवं स्यात् पुनः पुनः ।
दधि सर्वा [१६-] जपित्वा हि [-१६] मार्जयन्ते [१७]त्रिभिर्जलैः ॥९॥
अम्ब इत्यनुवाकेऽस्मिन् मन्त्रा अष्टादशेरिताः ।
भूस्त्रिपत्न्योऽश्ववालेषु [१८]कीलेयुस्त्रिविधान् मणीन् ॥१०॥
वसाभ्यञ्जन्ति [१९]पत्न्योऽश्वं यद्धातो वर्तयद्गृहान् [-१९] ।
[२०]लाज्यन्नशेष आहार्यो युञ्जत्युञ्याद्रथेऽश्वकम् ॥११॥

---

९. मै - मधोऽष्टौ । १०. मै - ब्रह्माऽथ । ११-११. [शृ१. मै - कोषद्वयमवलम्ब्यास्माभिः शुध्दीकृतोऽयं पाठो द्रष्टव्यः ।] । अ. आ. क. पा. इ. वा - वृषेत्यध्वर्युर्मन्त्रयेत् , शृ१. मै - वृषाध्वर्यस्तु मन्त्रयेत् , हा - वृषेत्यध्वर्यु मन्त्रयेत् । १२. उ. हा - उत्संदधाति, शृ१. मै - उत्संसधाय, इ - उत्संद्धाति । १३. अ. आ. क. पा. हा. इ. वा - विगर्हयेत् । १४. मै - ऊर्ध्वामन्याम् । १५. मै - बोधयन्ते, अ. क. पा - बोधयन्ति । १६-१६. मै - जपित्वाऽहो । १७. आ. शृ१. मै - °भिर्जलात्, अ. इ. उ. क. पा. वा. हा - °भिर्जलान् । १८. शृ१. मै - कचेयु° । १९-१९. [अस्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः ।] । अ. आ. क. पा. हा. इ. वा. वै - पत्न्योऽश्वमेतमा(श्वं यद्वेत्त्या)वर्तयेद्गुणा(द्गृहा) न् , मै - पत्न्योऽश्वमेतमावर्तयेदमुम् । २०. मै - लाज्यं न शेषः ।

[बृ॒ह॒स्पति॒ः प्रति॑ ति॒ष्ठन्ति॒ वै द॑शरा॒त्रेण॑ सुव॒र्गं यो अर्व॑न्तं॒ भूस्त्रिप॑ञ्चा॒शत्॑ ।]

युञ्ज्यान्यौ योजयित्वाऽथ केतुं [२१]बध्यो रथे ध्वजः ।
भूर्भुवः सुवरित्यस्मिन् मन्त्रा एकादशेरिताः ॥१२॥
[२२]प्राणाः संततिहोमाः स्युस्तत्र [२३]मन्त्राश्चतुर्दश ।
सिताप्रमुक्तिहोमाः स्युर्मन्त्रा एकोनत्रिंशतिः ॥१३॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके [२४]द्वाविंशोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

॥ [२५-] इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थः प्रपाठकः[-२५] ॥

२१. अ. आ. क. पा. हा. शृ१. बा - बन्ध्यः, उ. इ - बन्ध्यो । २२. उ - प्राणः । २३. शृ१. मै - मन्त्रास्तु विंशतिः । २४. हा - °विंशोऽनुवाकः । समाप्तः प्रश्नः । श्रीकृष्णार्पणमस्तु । संवत् १८१८ समनामज्येष्ठमासे कृष्णपक्षे नवम्यां तिथौ रविवासरे पुण्यतीर्थौ रामनाम । २५-२५. अ - इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः । मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ।

(पञ्चमः प्रपाठकः)

हरिः ॐ ॥

गावो वा एतत् सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नरात्स्मेत्यथ यासां नाजायन्त ताः

गावः । वै । एतत् । सत्रम् । आसत । अशृङ्गाः । सतीः । शृङ्गाणि । नः । जायन्तै । इति । कामेन । तासाम् । दश । मासाः । निषण्णा इति नि-सन्नाः । आसन् । अथ । शृङ्गाणि । अजायन्त । ताः । उदिति । अतिष्ठन् । अरात्स्म । इति । अथ । यासाम् । न । अजायन्त । ताः ।

[1]अथ प्रकृतं गवामयनमेवाधिकृत्याह - 'गावो [2]वै' इत्यादि ॥ Vअशृङ्गाः सत्यः Vगावः Vशृङ्गाणि अस्माकं जायन्ताम् Vइति अनेन Vकामेन [3]Vएतत् Vसत्रम् Vआसत । [4]जनेर्लेटि "वैतोऽन्यत्र" (पा ३.४.९६) इत्यैकारः । Vतासां सत्रमासीनानां Vदश Vमासाः Vनिषण्णाः निर्गता Vआसन् । Vअथ अनन्तरं [5]दशमासव्यपगमे Vशृङ्गाणि Vअजायन्त प्रादुर्भूतानि । [6-]Vताः जातशृङ्गाः Vउदतिष्ठन् सत्रादुत्थिताः अरात्स्म ऋद्धा कृतकार्या वयमिति । Vअथ दशसु मासेष्वजातशृङ्गाः Vसंवत्सरम् Vआप्त्वा प्राप्य संवत्सरान्ते Vउदतिष्ठन् Vअरात्स्म

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
सत्रं संवत्सरान्तं यत् तच्चतुर्थे समीरितम् ।
विशेषः पञ्चमे तस्य वत्सराख्यस्य वर्ण्यते ॥

गाव इति ॥ तत्राऽऽदौ [1]तावत् संवत्सरसत्रं विधत्ते - 'गावो वा एतत् सत्रसमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नरात्स्मेत्यथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गोसत्रं वै संवत्सरो य एवं विद्वाꣳसः संवत्सरमुपयन्त्यृध्नुवन्त्येव' इति ॥ यद्यपि गावः तिर्यक्त्वान्न

१. मै२ - 'अथ' नास्ति । २. मै. मै१. मै२. मै३. अ१ - 'वै' नास्ति । ३. अ१ - 'एतत्' नास्ति । ४. अ - भासजत्येन लेटि । ५. मै. मै१. मै३. अ. अ१ - दशमासापगमे । ६-६. अ१ - 'ताः - - - - यासाम्' नास्ति ।

१. शृ१. मै - तावत् तत् ।

संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गोसत्रं वै (१) संवत्सरो य एवं विद्वाꣳसः संवत्सरमुपयन्त्यृध्नुवन्त्येव

संवत्सरमिति सं-वत्सरम् । आप्त्वा । उदिति । अतिष्ठन् । अरात्स्म । इति । यासाम् । च । अजायन्त । यासाम् । च । न । ताः । उभयीः । उदिति । अतिष्ठन् । अरात्स्म । इति । गोसत्रमिति गो-सत्रम् । वै (१) । संवत्सर इति सं-वत्सरः । ये । एवम् । विद्वाꣳसः । संवत्सरमिति सं-वत्सरम् । उपयन्तीत्युप-यन्ति । ऋध्नुवन्ति । एव ।

Vइति [7]जातशृङ्गाः स्मोऽधुना वयमिति । तत्र संवत्सरान्ते Vयासां [8]च शृङ्गाणि Vअजायन्त Vयासां -[8] Vच Vन Vअजायन्त इत्येव Vताः Vउभयीः उभय्यः जातशृङ्गाश्च [9]संवत्सरान्तेऽपि [10]अजातशृङ्गास्तूपराश्च द्विप्रकारा अपि गावः Vउदतिष्ठन् Vअरात्स्म वयं, सत्रं च संस्थितम् Vइति । " वा छन्दसि " (पा ६.१.१०६) इति पूर्वसवर्णदीर्घत्वम् । ननु तूपराणां का [11-] सत्रात् वृद्धिरित्यत [-11] आह - ' गोसत्रं वै ' ★इत्यादि ॥

कर्माधिकारिणस्तथाऽपि तदभिमानिदेवताऽत्र गोशब्देन विवक्षिता । अभिमन्तव्यानां शृङ्गभावाभावौ स्वस्मिन्नारोप्य गोभिः सह [2]तादात्म्यबुद्ध्या व्यवहरन्ति । पुरा शृङ्गरहिताः Vसत्यः गावः शृङ्गोत्पत्तिं [3]कामयित्वैतत् " संवत्सराय दीक्षिष्यमाणाः " (तैसं ७.४.८) इत्याद्यनुवाकोक्तं सत्रमन्वतिष्ठन् । तासां [4]शृङ्गकामोपेतानामनुष्ठाने प्रवृत्तानां गवां Vदश Vमासाः निर्गता अभूवन् । Vअथ मासदशकादूर्ध्वं Vशृङ्गाणि उत्पन्नानि । तदानीं Vताः [5-] गावोऽपेक्षितेन फलेन [-5] समृद्धाः स्मः इति मत्वा तस्मात् सत्रादुत्थिताः । अथैतस्मिन् काले कासांचिद्गवां शृङ्गाणि Vन उत्पन्नानि, [6-]Vताः पुनरपि मासद्वयमनुष्ठाय संवत्सरसंपूर्तिं कृत्वा समृद्धाः Vस्मः Vइति [7]एवं मत्वा, तस्मात् सत्रादुत्थिताः । तदेवं Vयासां शृङ्गाण्युत्पन्नानि [-6] Vयासां Vच Vन उत्पन्नानि Vताः उभयविधा अपि गावो वयं समृद्धा [8]इत्येवं मत्वोत्थिताः । यस्माद्गोभिरनुष्ठितं तस्मात् [9]Vगोसत्रम् इत्येवायं संवत्सराख्यः कर्मविशेषोऽभिधीयते । Vये यजमानाः Vएवं Vविद्वांसः संवत्सराख्यं कर्मविशेषमनुतिष्ठन्ति ते समृद्धिं प्राप्नुवन्त्येव ॥

---

७. मै. मै१. मै३. अ. अ१ - अथजातशृङ्गाः । ८. मै. मै१. मै३. अ. अ१ - ' च ' नास्ति । ९. मै. मै१. मै३. अ. अ१ - वत्सरान्ते । १०. अ१ - °ङ्गाश्च अपराश्च । ११-११. मै२ - सत्रवृद्धिरित्यतः । ★ मै - इत्यादि । गतम् ।

---

२. अ. आ. क. पा. हा. इ. वा - तादृशबुद्ध्या । ३. शृ१. मै - विक्रामयित्वा° । ४. शृ१ - शृङ्गे कामोपे° । ५-५. मै - °पेक्षितफलेन । ६-६. वा - ' ताः - - - - °त्पन्नानि ' नास्ति । ७. शृ१ - एव । ८. शृ१ - इत्येव । ९. मै - गोत्रम् ।

तस्मा॑त् तू॒प॒रा वा॒र्षि॑कौ॒ मा॒सौ॒ प॒त्वी॑ च॒र॒ति स॒त्राभि॑जित॒ꣳ ह्य॑स्यै॒

तस्मा॑त् । तू॒प॒रा । वा॒र्षि॑कौ॒ । मा॒सौ॒ । प॒त्वी॑ । च॒र॒ति॒ ।
स॒त्राभि॑जित॒मिति॑ स॒त्र-अ॒भि॒जि॒त॒म् । हि । अ॒स्यै॒ ।

का तर्हि सा तूपराणां [१२-] वृद्धिरित्यत आह [-१२] - ‘ तस्मात् तूपरा ’ इत्यादि ॥ [१३]सामान्यविवक्षया एकवचनम् । Vवार्षिकौ Vमासौ Vपत्वी [१४-] प्रीत्वा प्रीता [-१४] भूत्वा Vचरति Vतूपरा इयमेव तस्याः [१५]सत्रवृद्धिः । [१६-]“ प्रीङ् प्रीतौ ”[-१६] (धापा ११६९) । वर्षशब्दात् “ छन्दसि ठञ् ” (पा ४.३.१९) इति ठञ्, “ अत्यन्तसंयोगे [१७-] च ” (पा २.१.२९) इति [-१७] द्वितीया । सत्रेणाभिजितं Vसत्राभिजितम् । “ तृतीया कर्मणि ” (पा ६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वम् ॥

तस्मादिति ॥ यदुक्तमर्थवादे यासां गवां शृङ्गाण्यजायन्त यासां च नाजायन्त ता [१०]उभय्योऽप्यृद्धिं गता इति, तत्र जातशृङ्गाणां [११]शृङ्गजन्मैवर्धिः । इतरासां [१२]तु कथं सा समृद्धिरित्याशङ्क्य तां दर्शयति - ‘ तस्मात् तूपरा वार्षिकौ मासौ पत्वी चरति सत्राभिजितꣳ ह्यस्यै ’ इति । यस्मादजातशृङ्गाः [१३]Vतूपराः सत्रेण समृद्धिं गताः Vतस्मात् [१४]इयं [१५][तूपरा] वर्षर्तुसंबन्धिनौ [१६]Vमासौ Vपत्वी प्रीतिं प्राप्यारण्ये Vचरति । वार्षिकयोर्हि मासयोररण्ये संचरन्तीनां दीर्घशृङ्गयुक्तानां गवां महान् क्लेशो जायते । प्रबलवायूपेतया [१७-] तीव्रया वृष्ट्या [-१७] मुखे प्रतिहताः सत्यो [१८]मुखमर्वाग्भूतं कृत्वा शृङ्गभारेण पीड्यन्ते । [१९]तूपरायास्तु नास्त्ययं क्लेशः ॥ यथा केशश्मश्रुपूर्णशिरस्कानां पुरुषाणां सत्यपि सौन्दर्याभिमानकृते सुखे नदीस्नानघृतभोजनादौ [२०-] महान् क्लेशस्तद्वत् [-२०] । यदेतत् Vअस्यै तूपरायाः गोर्वर्षासु प्रीतिसंपादनं तदेतत् Vसत्राभिजितं सत्रानुष्ठानलब्धम् ॥

१२-१२. मै. मै१. मै३. अ. अ१ - °रित्याह । १३. मै२ - सातत्यवि° । १४-१४. मै२ - चरतां प्रीत्या । १५. मै. मै१. मै३. अ. अ१ - वृद्धिः । १६-१६. मै२ - वृद्धित्वे । १७-१७. मै२ - ‘च इति ’ नास्ति ।

---

१०. शृ१. हा. पा. अ. इ. वा. मै - उभयोऽप्यृद्धिम् । ११. म - °जन्मैवार्धः । १२. हा - ‘ तु ’ नास्ति । १३. मै - तूपरा अपि । १४. मै - इयं च । १५. [स्पष्टतासंपादनार्थमस्माभिः प्रपूरितोऽयमंशो द्रष्टव्यः ।] । १६. मै - ‘ मासौ ’ नास्ति । १७-१७. अ. आ. क. वै - तीव्रवृष्ट्या । १८. शृ१ - मुखमवाग्भूतम् , उ. हा - मुखमवाग्भूमौ, अ. वै - मुखममुखवातम् । १९. उ. इ. वा - तूपरायां तु , शृ१. मै - तूपराणां तु । २०-२०. मै - महाक्लेशस्तादृक् ।

तस्मात् संवत्सरसदो यत् किं च गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये संवत्सरमुपयन्ति

तस्मात् । संवत्सरसद इति संवत्सर-सदः । यत् । किम् । च । गृहे । क्रियते । तत् । आप्तम् । अवरुद्धमित्यव-रुद्धम् । अभिजितमित्यभि-जितम् । क्रियते । समुद्रम् । वै । एते । प्रेति । प्लवन्ते । ये । संवत्सरमिति सं-वत्सरम् । उपयन्तीत्युप-यन्ति ।

'तस्मात्'इत्यादि ॥ [V]संवत्सरसदः [१८]संवत्सरसत्रिणो [V]गृहे [१९][V]क्रियते [२०-] यत्किंचिदपि प्रशस्तं [-२०] क्रियते [V]तत् [V]आप्तं पर्याप्तम् [V]अवरुद्धं काले लब्धम् [V]अभिजितं [२१]न्यायोपेतमेव [V]क्रियते । [२२]तदस्यैव फलं न निर्मूलमिति यावत् । उभयत्रापि " गतिरनन्तरः " (पा ६.२.४९) इति गतेः [२३]प्रकृतिस्वरत्वम् ॥

अथ प्रायणीयोदयनीयावतिरात्रावस्य विधातुमाह - 'समुद्रं वै' इत्यादि ॥ [V]एते हि [V]समुद्रं [२४][V]प्रप्लवन्ते [२५]प्रतरन्ति [V]ये संवत्सरसत्रम् [२६][V]उपयन्ति । यः च समुद्रे तरन् तस्य

तस्मादिति ॥ अथ प्रकारान्तरेण सत्रानुष्ठानं प्रशंसति - 'तस्मात् संवत्सरसदो यत् किं च गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते' इति ॥ यस्मात् सत्रं प्रशस्तं [V]तस्मात् [V]संवत्सरसदः संवत्सरसत्रमनुष्ठितवतो यजमानस्य [V]गृहे [V]यत् [V]किं [V]च [V]क्रियते यत् किमप्यग्निहोत्रादिकमङ्गविकलमप्यनुष्ठीयते [२१-][V]तत् [V]आप्तम् अङ्गसंपूर्णमेव [-२१] भवति । तथा [V]अवरुद्धम् अकाले कृतमपि स्वकाले कृतं भवति । अभिजितं फलापेक्षाराहित्येऽपि संपादितफलं भवति । अत एव शास्त्रन्यायाभिज्ञा आहुः " तेषां तेजोविशेषेण प्रत्यवायो न विद्यते " इति ॥

समुद्रमिति ॥ अथैतस्य सत्रस्य प्रायणीयोदयनीयावहर्विशेषौ विधत्ते - 'समुद्रं वा एते प्र प्लवन्ते ये संवत्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स तत उदेति संवत्सरो वै समुद्रस्तस्यैतत् पारं यदतिरात्रौ य एवं विद्वाꣳसः संवत्सरमुपयन्त्यनार्ता एवोदृचं गच्छन्ति' इति ॥ [V]ये यजमानाः संवत्सरसत्रमुपक्रमन्त एते यजमानाः [V]समुद्रम् एव बाहुभ्यां तरितुमुद्युञ्जते । सत्रस्य समुद्रवदतिप्रभूतत्वात् । एवं सति [V]यः पुरुषः [V]समुद्रस्य [२२][V]पारं परतीरं [V]न [V]पश्यति स पुरुषः समुद्रादुद्गन्तुं न शक्नोति । अयं च

१८. अ१ - °सत्रीणि । १९. अ१ - क्रियन्ते । २०-२०. अ१ - °ञ्चिदप्रशस्तम् । २१. मै. मै१. मै३. अ. अ१ - न्यायोपात्तमेव । २२. मै२ - न तस्यैव । २३. मै२ - °स्वरः । २४. मै२ - 'प्रप्लवन्ते' नास्ति । २५. मै. अ. अ१ - आप्लवेन प्रतरन्ति । २६. अ१ - उपयन्ति । दृष्टपारत्वादर्थे शा एव ।

२१-२१. मै - तदा प्रथमसङ्गसंपूर्णमेव । २२. शृ१. मै - 'पारम्' नास्ति, हा - परम् ।

यो वै संमुद्रस्यं पारं न पश्यंति न वै स तत उदेति संवत्सरो (२) वै संमुद्रस्तस्यैतत् पारं यदंतिरात्रौ य एवं विद्वाꣳसः संवत्सरमुपयन्त्यनांर्ता एवोदृचं गच्छन्तीयं वै पूर्वोऽतिरात्रोऽसावुत्तंरो मनः पूर्वो वागुत्तंरः प्राणः पूर्वोऽपान उत्तंरः प्ररोधनं

यः । वै । समुद्रस्यं । पारम् । न । पश्यंति । न । वै । सः । ततंः । उदितिं । एति । संवत्सर इतिं सं-वत्सरः (२) । वै । समुद्रः । तस्यं । एतत् । पारम् । यत् । अतिरात्रावित्यंति-रात्रौ । ये । एवम् । विद्वाꣳसंः । संवत्सरमितिं सं-वत्सरम् । उपयन्तीत्युंप-यन्तिं । अनांर्ताः । एव । उदृचमित्युंत्-ऋचंम् । गच्छन्ति । इयम् । वै । पूर्वः । अतिरात्र इत्यंति-रात्रः । असौ । उत्तंर इत्युत्-तरः । मनंः । पूर्वः । वाक् । उत्तंर इत्युत्-तरः । प्राण इतिं प्र-अनः । पूर्वः । अपान इत्यंप-अनः । उत्तंर इत्युत्-तरः । प्ररोधंनमितिं प्र-रोधंनम् ।

[V]पारं [V]न [V]पश्यति स खलु [V]ततः [V]न [V]उदेति नोत्तरति । संवत्सरसत्रं च दुस्तरत्वात् समुद्रस्थानीयम् । [V]तस्य चैतौ पारस्थानीयौ [V]अतिरात्रौ । तस्मात् [V]ये [V]एवं [V]विद्वांसः उभयतोऽतिरात्रं [२७] संवत्सरसत्रम् [V]उपयन्ति [२७] [२८]ते [V]अनार्ता [V]एव दृष्टपारत्वादक्लेशा एव [V]उदृचं सत्रसमाप्तिं [V]गच्छन्ति इति । अतिरात्रयोर्विधिः । ऋचेरुत्पूर्वात्संपदादिलक्षणः क्विप् ॥

अथातिरात्रयोः स्तुतिः - 'इयं वै' इत्यादि ॥ [V]इयं [२९][V]वै [३०]पृथिवी [V]पूर्वः प्रायणीयः

[V]संवत्सरः तेन समुद्रेण समानः । तस्मादस्य समाप्तिपरिज्ञानाभावे [२३][V]ततः उत्थातुमुत्साहो न [२४]भवेत् । तस्मात् समाप्तिरूपमहर्विज्ञेयम् । [V]तस्य च समुद्रसमस्य संवत्सरस्य पारावारतीरभूतौ [V]अतिरात्रौ । एतदभिज्ञाय यजमानाः [V]अनार्ताः मनस्युद्वेगरहिताः [V]एव [V]उदृचम् उत्तमां समाप्तिसंबन्धिनीमृचं [V]गच्छन्ति । तस्मादतिरात्रावुभावनुष्ठेयावित्यर्थः । यदि "ब्रह्मवादिनो वदन्त्यतिरात्रः परमः" (तैसं ७.४.१०) इत्यनुवाके एव प्रायणीयोऽतिरात्रो विहितः तर्ह्युदयनीयातिरात्रेण सह निर्देष्टुमत्र पुनरुपन्यासः ॥

इयमिति ॥ [२५]तावेवातिरात्रौ [२६] बहुधा प्रशंसति - 'इयं वै पूर्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो

२७-२७. अ१ - संवत्सरं प्रथमातिरात्रमुपयन्ति । २८. अ - 'ते' नास्ति । २९. मै. मै१. मै२. मै३. अ - 'वै' नास्ति । ३०. अ - 'पृथिवी' नास्ति ।

२३. शृ१. मै - तद् । २४. मै - भवति । २५. अ. आ. क. पा. हा. इ. वा. वै. मै. शृ१ - तावेतावतिरात्रौ । २६-२६. हा - 'बहुधा ---- °वतिरात्रौ' नास्ति ।

पूर्वं उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्वि॑ꣳशः प्रायणीयो भवति

~~~~~~~~~~~~~~~~~~~~~~~~

पूर्वः । उदयनमित्युत्-अयनम् । उत्तर इत्युत्-तरः । ज्योतिष्टोम इति ज्योतिः-स्तोमः । वैश्वानरः । अतिरात्र इत्यति-रात्रः । भवति । ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु-ख्यात्यै । चतुर्वि॑ꣳश इति चतुः-वि॑ꣳशः । प्रायणीय इति प्र-अयनीयः । भवति ।

~~~~~~~~~~~~~~~~~~~~~~~~

[V]अतिरात्रः । [V]असौ [३१-] द्यौः [V]उत्तरः [-३१] उदयनीयोऽतिरात्रः । [V]मनः [V]पूर्वः इति । पूर्वोत्तरत्वसाम्यात् । [३२-] प्राणः पूर्व इति । [३३]प्रथमचरमसाम्यात् [-३२] । [V]प्ररोधनं परिग्रहः । [V]उदयनम् [३४]उत्थानम् ॥

'ज्योतिष्टोमः' [३५]इत्यादि ॥ प्रायणीयस्येदं लक्षणम् ॥

'चतुर्विंशः' इत्यादि ॥ [३६]प्रायणीयानन्तरमारम्भणीयः [V]चतुर्विंशः उक्थ्यः [३७]कार्य इत्यर्थः । 'प्रयन्त एव' इति । [V]प्रयन्तः [V]एव आरभमाणा एव [V]संवत्सरे [V]प्रतितिष्ठन्ति

~~~~~~~~~~~~~~~~~~~~~~~~

वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरः' इति ॥ [V]पूर्वः प्रायणीयोऽतिरात्रः प्राथम्यसाम्येन पृथिव्यादिरूपः ॥ उदयनीयस्तु पश्चाद्भावित्वेन द्युलोकादिरूपः । [V]प्ररोधनं लौकिकस्य वैदिकस्य वा व्यापारस्य प्रारम्भः ॥

ज्योतिष्टोम इति ॥ यावेतावतिरात्रौ [-२६] सामान्येनोक्तौ तयोर्विशेषाकारेण स्वरूपं विधत्ते - 'ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै' इति ॥ योऽयम् [V]अतिरात्रः स ज्योतिष्टोमरूपः । स च वैश्वानरेण दृष्टः । तदनुष्ठानेन स्वर्गमार्गे [२७]प्रदीपवत् [V]पुरस्तात् [V]ज्योतिः [V]दधते । तच्च स्वर्गप्रकाशनाय भवति ॥

चतुर्विंश इति ॥ यदुक्तं सूत्रकारेण - "प्रायणीयमतिरात्रमुपेत्य [२८]चतुर्वि॑ꣳशमुक्थ्यमारम्भणीय-मुपयन्ति" (आपश्रौ २१. १५.८) इति, तदिदं विधत्ते - 'चतुर्वि॑ꣳशः प्रायणीयो भवति चतुर्विंशतिरर्धमासाः संवत्सरः प्रयन्त एव संवत्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य

~~~~~~~~~~~~~~~~~~~~~~~~

३१-३१. मैर - अन्यः । ३२-३२. अ१ - 'प्राणः - - - - °साम्यात्' नास्ति । ३३. मैर - °चरमत्वसा° । ३४. अ१ - उत्थानं ज्योतिः । ३५. मै. मै१. मैर. मै३. अ - इत्यादि गतम् । ३६. अ - प्रायणान° । ३७. अ. अ१ - 'कार्यः' नास्ति ।

~~~~~~~~~~~~~~~~~~~~~~~~

२७. अ. आ. क. पा. हा. इ. वा. वै. म - 'प्रदीपवत्' नास्ति । २८. मै - चतुर्दशमुक्थ्याम् ।
~~~~~~~~~~~~~~~~~~~~~~~~

चतुर्विꣳशतिरर्धमासाः (३) संवत्सरः प्रयन्त एव संवत्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रय उभे एव संवत्सरस्य रूपे आप्नुवन्ति

चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासा इत्यर्ध-मासाः (३) । संवत्सर इति सं-वत्सरः । प्रयन्त इति प्र-यन्तः । एव । संवत्सर इति सं-वत्सरे । प्रतीति । तिष्ठन्ति । तस्य । त्रीणि । च । शतानि । षष्टिः । च । स्तोत्रीयाः । तावतीः । संवत्सरस्येति सं-वत्सरस्य । रात्रयः । उभे इति । एव । संवत्सरस्येति सं-वत्सरस्य । रूपे इति । आप्नुवन्ति ।

समस्तसंवत्सरोऽत्रैव समापितो भवति । 'तस्य' इत्यादि । उक्थ्यस्य पञ्चदश स्तोत्राणि [38-] तानि च सर्वाणि [-38] [39]चतुर्विंशानि पञ्चदशानां चतुर्विंशतेश्च संवर्गः षष्ट्यधिकं शतत्रयम् । तावत्यः Vसंवत्सरस्य Vरात्रयः इति । 'उभे एव' इति । [40]चतुर्विंशत्वेन अर्धमासानामाभिरूप्यं [41]स्तोत्रियाभिरह्नामाभिरुप्यमित्यादि । प्रारम्भे Vएव प्राप्तस्य Vसंवत्सरस्य [42]समाप्त्यर्थमविनाशार्थं च Vउत्तरैः Vअहोभिः चरन्ति प्रारब्धस्य समाप्तिः एतावता भवतीति । यद्वा - [43]Vसंस्थित्यै संस्थित्याः संस्थायाः अत्रैव लब्धाया अविनाशार्थमुत्तरैरहोभिः चरन्ति । षष्ठ्यर्थे चतुर्थी ॥

रात्रयः उभे एव संवत्सरस्य रूपे आप्नुवन्ति ' इति ॥ यदेतदारम्भणीयमहस्तदेतत् पूर्वोक्तादतिरात्रादुत्तरभावित्वेऽपि वक्ष्यमाणेभ्योऽभिप्लवषडहावृत्तिरूपेभ्यो मासेभ्यः प्रथमभावित्वात् [29]प्रायणीयम् इत्युच्यते । स चाहर्विशेषश्चतुर्विंशस्तोमयुक्तः कार्यः । तथा सति संख्यासाम्यादर्धमासद्वारा Vसंवत्सरः संपद्यते । तत्संपत्तौ सत्यां प्रारभमाणा एव यजमानाः संवत्सरसत्रानुष्ठाने स्थिरा भवन्ति । किंचैतस्याह्न उक्थ्यरूपत्वादुक्थ्यस्य च पञ्चदशस्तोत्रयुक्तत्वादेकैकस्मिन् स्तोत्रे चतुर्विंशतिसंख्याकास्वृक्षु स्तोत्रीयासु सतीषु मिलित्वा षष्ट्युत्तरशतत्रयपरिमिताः स्तोत्रीयाः भवन्ति । एवं सति संवत्सरस्य यदिदं चतुर्विंशत्यर्धमासात्मकं रूपं, यच्च [30]षष्ट्युत्तरशतत्रयरात्र्यात्मकं रूपं ते Vउभे अपि Vरूपे संख्यासाम्येन Vप्राप्नुवन्ति ॥

३८-३८. मै२ - 'तानि - - - - सर्वाणि ' नास्ति । ३९. अ. अ१ - चतुर्विंशादीनि । ४०. अ - चतुर्विंशत्येन । ४१. मै२ - स्तोत्रियाभिर्होमाभिरूप्यमिति इत्यादि । ४२. अ१ - प्राप्त्यर्थम् । ४३. अ - 'संस्थित्यै ' नास्ति ।

---

२९. अ. आ. क. पा. हा. इ. वा. वै. उ. म - प्रायणीयः । ३०. उ - शतत्रयात्मकम् ।

ते सꣳस्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्ति गौश्चाऽऽयुश्च मध्यतः स्तोमौ भवतः संवत्सरस्यैव तन्मिथुनं

ते । सꣳस्थित्या इति सं-स्थित्यै । अरिष्ट्यै । उत्तरैरित्युत्-तरैः । अहोभिरित्यहः-भिः । चरन्ति । षडहा इति षट्-अहाः । भवन्ति । षट् । वै । ऋतवः । संवत्सर इति सं-वत्सरः । ऋतुषु । एव । संवत्सर इति सं-वत्सरे । प्रतीति । तिष्ठन्ति । गौः । च । आयुः । च । मध्यतः । स्तोमौ । भवतः । संवत्सरस्येति सं-वत्सरस्य । एव । तत् । मिथुनम् ।

'षडहाः' इति ॥ चत्वारोऽभिप्लवा इत्युक्तम् । स्तुत्यर्थं पुनर्वचनम् । 'गौश्चायुश्च' इति । तेषु षडहेषु ज्योतिषां मध्ये गोआयुषी उक्थ्यौ भवतः स्तोमविशेषवन्तौ स्तोमौ । उक्थ्यस्यैव पुनर्वचनं स्तुत्यर्थम् । 'संवत्सरस्यैव' इत्यादि । [V]संवत्सरस्य [V]एव मध्ये [४४]पुनः प्रवेशितं [४५][V]तत् [V]मिथुनं [V]प्रजननाय प्रजानां भवति । 'ज्योतिरभितः' इति । आदौ अन्ते [४६]च षडहस्य ।

ते इति ॥ अनन्तरभावीन्यहानि विधत्ते - 'ते सꣳस्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति' इति ॥ अनुष्ठितप्रायणीयारम्भणीयाः [V]ते यजमानाः तत ऊर्ध्वं [V]संस्थित्या [V]अरिष्ट्यै सत्रसमाप्तेरविनाशाय [V]उत्तरैः ज्योतिर्गौरायुरित्यादिभिः [V]अहोभिः अनुतिष्ठेयुः । अत्र यानि [३१]पूर्वप्रपाठकविहितानि तेषां स्तुत्यर्थोऽनुवादः । यानि त्वविहितानि तेषामत्र विधिरिति विवेकः ॥

षडहा इति ॥ [३२]ज्योतिरादीनामभिप्लवषडहरूपतां विधत्ते - 'षडहा भवन्ति षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्ति' इति ॥ ज्योतिर्गौरायुरायुर्गौर्ज्योतिरिति [३३]षडहत्वम् ॥

गौरिति ॥ उक्ते षडहे मध्यवर्त्यहर्द्वयं प्रशंसति - 'गौश्चाऽऽयुश्च मध्यतः स्तोमौ भवतः संवत्सरस्यैव तन्मिथुनं मध्यतो दधति प्रजननाय' इति ॥ योऽयं गोष्टोमो यः [V]च आयुष्टोमस्तावुभौ षडहस्य मध्ये कर्तव्यौ । तत् तेन संवत्सरसत्रस्य मध्ये मिथुनं संपादयन्ति । तच्च [V]प्रजननाय भवति ॥

ज्योतिरिति ॥ षडहस्याऽऽद्यन्तावहर्विशेषौ प्रशंसति - 'ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं लोकं यन्ति' इति ॥

---

४४. मै. मै१. मै३. अ. अ१ - पुनः पुनः । ४५. मै२ - 'तत्' नास्ति । ४६. अ - अपि ।

---

३१. शृ१. मै - °प्रपाठके विहिता° । ३२. पा - षडहम्, अ. आ. क. हा. इ. उ. वा. वै - °षडहताम् । ३३. मै - षडहाः ।

मध्यतो (४) दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं लोकं यन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति

मध्यतः (४)। दधति। प्रजननायेति प्र-जननाय। ज्योतिः। अभितः। भवति। विमोचनमिति वि-मोचनम्। एव। तत्। छन्दाꣳसि। एव। तत्। विमोकमिति वि-मोकम्। यन्ति। अथो इति। उभयतोज्योतिषेत्युभयतः-ज्योतिषा। एव। षडहेनेति षट्-अहेन। सुवर्गमिति सुवः-गम्। लोकम्। यन्ति। ब्रह्मवादिन इति ब्रह्म-वादिनः। वदन्ति। आसते। केन। यन्ति। इति। देवयानेनेति देव-यानेन। पथा। इति।

Vविमोचनम् Vएव Vतत् इति। ज्योतिर्नाम [४७]विमोचनमिति। तेन [४७] Vछन्दांसि [४८]Vविमोकं ततो [४८] विमुच्य विस्रस्य Vयन्ति गच्छन्ति [४९]सत्रिणः। [५०]‘अथो’ इत्यादि [५०]। Vउभयतः ज्योतिष्ट्वेनातिप्रकाशत्वात् स्वर्गं प्राप्नुवन्ति ॥

‘ब्रह्मवादिनः’ इत्यादि ॥ Vआसते अमी सत्रिणः तेऽमी Vकेन पथा [५१]Vयन्ति Vइति Vब्रह्मवादिनः पर्यनुयोगं [५२]Vवदन्ति। [५३]तत्र Vदेवयानेन Vपथा यन्ति [५३] [५४]आसीना एव [५४]

षडहस्याऽऽद्यन्तयोर्ज्योतिष्टोमः कार्यः। तदेतदादौ ज्योतिष्टोममनुष्ठाय पुनरप्यन्ते ज्योतिष्टोमस्यानुष्ठानमुपक्रमे निरुद्धस्य विमोचनसमानं भवति। तेन ज्योतिर्गौरायुरित्येतत्त्रयरूपाणि Vछन्दांसि गायत्र्यादीन्येव Vविमोकं प्राप्नुवन्ति। अपि च पार्श्वद्वये ज्योतिर्युक्तेन दीपद्वयसमानेन षडहेन प्रकाशितं स्वर्गं सुखेन प्राप्नुवन्ति ॥

ब्रह्मवादिन इति ॥ अथ प्रश्नोत्तराभ्यां ज्योतिरादिकं प्रशंसति - ‘ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री गोस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव तत्पथा यन्ति’ इति ॥ ये यजमानाः Vआसते सत्रमनुतिष्ठन्ति

४७-४७. मैर - विमोचनं भवति। ते। ४८-४८. अ१ - विमोचनं ततः, मैर - विमोकतः। ४९. मैर - णमुल्। ५०-५०. मैर - अथो अपि च। ५१. अ. अ१ - पतन्ति। ५२. अ१ - पृच्छन्ति। ५३-५३. अ१ - ‘तत्र - - - - यन्ति’ नास्ति। ५४-५४. मैर - अधीनाभावम्।

ब्रूयाच्छन्दा॑ꣳसि वै दे॒वया॑नः पन्था॑ गाय॒त्री त्रि॒ष्टुब्जग॑ती॒ ज्योति॒र्वै गा॑य॒त्री गौस्त्रि॒ष्टुगायु॒र्जग॑ती॒ यदे॒ते स्तोमा॒ भव॑न्ति देव॒याने॑नै॒व (५) तत् प॒था य॑न्ति समा॒नꣳ साम॑ भवति देवलो॒को वै साम॑

ब्रूया॒त् । छन्दा॑ꣳसि । वै । दे॒वया॒न इति॑ देव-यान॑ः । पन्था॑ः । गा॒य॒त्री । त्रि॒ष्टुप् । जग॑ती । ज्योति॑ः । वै । गा॒य॒त्री । गौः । त्रि॒ष्टुक् । आयु॑ः । जग॑ती । यत् । ए॒ते । स्तोमा॑ः । भव॑न्ति । दे॒व॒याने॒नेति॑ देव-याने॑न । ए॒व (५) । तत् । प॒था । य॒न्ति॒ । स॒मा॒नम् । साम॑ । भ॒व॒ति॒ । दे॒व॒लो॒क इति॑ देव-लो॒कः । वै । साम॑ ।

गच्छन्ति [V]इति उत्तरं [V]ब्रूयात् तेषाम् । देवा येन यन्ति स देवयानः पन्थाः देवयोग्यो मार्गः । ' छन्दांसि ' इत्यादि । [५५]गतम् । [५६]' ज्योतिर्वै ' इत्यादि । त्रीण्येवैतान्यहानि आवृत्त्या संवत्सरं प्रीणयन्ति । एतानि च [५७]गायत्र्याद्यात्मकानि । गायत्र्यादयश्च [५८][V]देवयानः पन्था इति आसीना एवामी अनेन पथा स्वर्गं यन्तीति ॥

' समानम् ' इत्यादि ॥ एकमेव [V]साम [V]भवति रथन्तरं वा बृहद्वा सर्वेष्वहःसु । [५९]तस्यैकत्वात्तदात्मनो [V]देवलोकात् [V]न [V]यन्ति [६०-] न कदाचित् तेन वियुज्यन्ते [-६०] । ' अन्याअन्या ' इत्यादि । साम्नो योनिभूता [V]ऋचः [V]अन्याअन्याः [V]भवन्ति [६१]ऋचः प्रत्यहं भिद्यन्ते । तासां च भेदात्तदात्मकात् [V]मनुष्यलोकात् अन्यस्माच्च [V]देवलोकम् एवाभिमुख्येन

ते यजमानाः [V]केन पथा स्वर्गं गच्छन्तीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञः [V]देवयानेन [V]पथा गच्छन्ति [V]इति उत्तरं [V]ब्रूयात् । येन देवा यन्ति सोऽयं देवयानः पन्थाः । सोऽपि कीदृश इति चेच्छ्रूयताम् - गायत्र्यादीनि [V]छन्दांसि एव मार्गसाधनत्वात् [V]देवयानः [V]पन्थाः इत्युच्यन्ते । इह तु ज्योतिष्टोमादीन्येव गायत्र्यादीनि । तस्मादेतेषामनुष्ठानेन [३४-][V]तत् तेनैव [-३४] [V]पथा गच्छन्ति ॥

समानमिति ॥ अत्र सर्वेष्वहःसु पृष्ठस्तोत्रे सामैक्यं विधत्ते - ' समानꣳ साम भवति देवलोको वै साम देवलोकादेव न यन्ति ' इति ॥ बृहदेव वा रथन्तरमेव वा [३५]सर्वेष्वप्यहःस्वेकमेव [V]साम पृष्ठस्तोत्रे

५५. अ१ - जगती । ५६. मै२ - ज्योतिर्वैता । ५७. मै२ - गायत्र्यात्मकानि । ५८. मै. मै१. मै२. मै३ - देवानाम् । ५९. मै२ - तयैकत्वा° । ६०-६०. मै. मै१. मै२. मै३ - न गच्छन्ति कदाचिदपि न वियुज्यन्ते । ६१. मै२. अ - ' ऋचः ' नास्ति ।

३४-३४. क - तेनैव, अ. पा. हा. इ. वा. वै - ' तत् तेनैव ' नास्ति, मै - देवयानेन । ३५. अ. आ. क. पा. हा. इ. वा. वै. उ. म - सर्वेष्वहःसु ।

देवलोकादेव न यन्त्यन्याअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो

देवलोकादिति देव-लोकात् । एव । न । यन्ति । अन्याअन्या इत्यन्याः-अन्याः । ऋचः । भवन्ति । मनुष्यलोक इति मनुष्य-लोकः । वै । ऋचः । मनुष्यलोकादिति मनुष्य-लोकात् । एव । अन्यमन्यमित्यन्यम्-अन्यम् । देवलोकमिति देव-लोकम् । अभ्यारोहन्त इत्यभि-आरोहन्तः ।

[६२-V]आरोहन्तः [V]यन्ति गच्छन्ति [-६२] । व्यत्ययेन पञ्चम्यर्थे द्वितीया । यद्वा - [६३]मनुष्यलोकान्नानासुकृतसाधनमनुष्यलोकवशात्तदनुरूपमन्यमन्यं देवलोकमेव प्राप्नुवन्ति न कदाचिद्देवलोकेन [६४]वियुज्यन्त इति ॥

उक्तं समानं 'साम भवति' इति; किं पुनस्तत्सामेत्याह - [६५]'अभिवर्त' इति [-६५] ॥ अभिवर्ताख्यं ब्रह्मण एव साम [V]भवति भिन्नान्येवान्यानि [६६]सामानि । कश्चिदाह - अभिवर्तत्वं ब्रह्मसाम्नोऽनेन विधीयते । सर्वत्रैव [६७]साम्न ऐक्यमिति । 'अभिवृत्त्यै' इति । [६८V]सुवर्गस्य आभिमुख्येन प्राप्त्यर्थम् ॥

गायेत् । देवलोकः हि पक्षपातराहित्येन सर्वसमत्वात् सामरूपः । अत एकविधेन साम्ना कदाचिदपि [V]देवलोकात् [V]न निर्गच्छन्ति ॥

अन्या इति ॥ तस्य साम्न आधारभूतानामृचामेतेष्वःहसु भेदं विधत्ते - 'अन्याअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्ति' इति ॥ [V]ऋचः हि मनुष्यलोकस्वरूपाः । साम्न आधारभूतत्वात् । यथा कर्मानुष्ठानद्वारा देवलोकस्याधारभूतो मनुष्यलोकस्तद्वत् । [V]अन्यम् [V]अन्यम् इति पञ्चम्यर्थे द्वितीया । ऋचामन्यत्वे सत्यृग्रूपादन्यस्मादन्यस्मात् [V]मनुष्यलोकात् [V]देवलोकम् [V]अभ्यारोहन्तः यजमानाः सुखं प्राप्नुवन्ति । नानाविधकर्माधारत्वान्मनुष्यलोकस्य नानाविधत्वम् । यद्वाऽन्यमन्यं देवलोकं कर्मवैचित्र्येण फलवैचित्र्यमित्यर्थः ॥

६२. मै२ - रोहन्तो गच्छन्ति इति । ६३. मै२ - °सुकृतमनुष्यलोकस्थान° । ६४. अ१ - निवर्तन्ते । ६५-६५. अ - 'अभिवर्त इति' नास्ति । ६६. मै२ - सामानि इति । ६७. मै२ - साम्नोऽन्य । ६८. मै२. अ - 'सुवर्गस्य' नास्ति ।

यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्या अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै

यन्ति । अभिवर्त इत्यभि-वर्तः । ब्रह्मसाममिति ब्रह्म-सामम् । भवति । सुवर्गस्येति सुवः-गस्य । लोकस्य । अभिवृत्त्या इत्यभि-वृत्त्यै । अभिजिदित्यभि-जित् । भवति । सुवर्गस्येति सुवः-गस्य । लोकस्य । अभिजित्या इत्यभि-जित्यै । विश्वजिदिति विश्व-जित् । भवति । विश्वस्य । जित्यै ।

[६९-] अभिजित् ' इत्यादि [-६९] ।। [V]अभिजित् [७०]विश्वजितोर्विधिः । पूर्वस्मिन् पक्षे परःसाम्नामधस्तात् अभिजिदुत्तरस्मिन् पक्षे [७१]अर्वाक्साम्नामुपरिष्टाद्विश्वजित् । ' मासिमासि पृष्ठानि ' [७२-] इति । न [-७२] कश्चिदपि मासः [७३]पृष्ठशून्यः कार्यः । ' मासिमास्यतिग्राह्या ' इति । आग्नेयैन्द्रसौर्याः । अत्र नियमार्थं वचनम् । ' उपरिष्टात् ' इति । क्वचित् चतुर्विंशादह्नः पराणि क्वचिदष्टादशात् । ' तस्मात् ' इत्यादि । गतम् ।।

।। इति सप्तमे पञ्चमे प्रथमोनुवाकः ।।

अभिवर्त इति ।। प्राकृतं [३६-] साम बाधितुं [-३६] सामान्तरं विधत्ते - ' अभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्यै ' इति ।। ब्रह्मणः संबन्धि यत् साम तदभिवर्तनामकं कार्यम् । तच्च स्वर्गलोकस्याभितः प्राप्त्यै भवति ।।

अभिजिदिति ।। अहरन्तरं विधत्ते - ' अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै ' इति ।। विषुवदाख्यं यत् प्रथममहस्तस्मात् पूर्वे स्वरसामाख्यास्त्रयोऽहर्विशेषाः तेभ्योऽपि पूर्वमभिजिदाख्यमेकमहः कर्तव्यम् । [३७]तच्च स्वर्गाभिजयाय भवति ।।

विश्वजिदिति ।। पुनरप्यन्यदहर्विधत्ते - ' विश्वजिद्भवति विश्वस्य जित्यै ' इति ।। विषुवदाख्यादह्न ऊर्ध्वभाविनो ये त्रयः [३८]स्वरसामानोऽहर्विशेषास्तेभ्य ऊर्ध्वं विश्वजिदाख्यमहः कर्तव्यम् । तच्च विश्वस्य जयाय भवति ।।

६९-६९. अ - ' अभिजित् इत्यादि ' नास्ति । ७०. अ - विश्वजिदाह । ७१. मै. मै१. मै३ - स्वरसाम्नामु°, मै२ - पूर्वात्साम्नामु° । ७२-७२. मै२ - ' इति न ' नास्ति । ७३. अ१ - पृष्ठवर्ज्यः ।

३६-३६. इ - ' साम बाधितुम् ' नास्ति । ३७. उ - तस्य । ३८. मै - °षस्तेन्यदूर्ध्वम् ।

मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं (६) दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति ॥१॥

(गोसत्रं वा एति संवत्सरोऽर्धमासा मिथुनं मध्यतो देवयानेनैव वीर्यं त्रयोदश च ।) ॥१॥

मासिमासीति मासि-मासि । पृष्ठानि । उपेति । यन्ति । मासिमासीति मासि-मासि । अतिग्राह्या इत्यति-ग्राह्याः । गृह्यन्ते । मासिमासीति मासि-मासि । एव । वीर्यम् (६) । दधति । मासाम् । प्रतिष्ठित्या इति प्रति-स्थित्यै । उपरिष्टात् । मासाम् । पृष्ठानि । उपेति । यन्ति । तस्मात् । उपरिष्टात् । ओषधयः । फलम् । गृह्णन्ति ॥१॥

[कासं ३३.१-२; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

मासिमासीति ॥ प्रतिमासमभिप्लवषडहेभ्य ऊर्ध्वं पृष्ठ्यं षडहमतिग्राह्यनियमं च विधत्ते -'मासिमासि पृष्ठान्युपयन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं दधति मासां प्रतिष्ठित्यै' इति ॥ प्रतिमासानुष्ठानेन तस्मिंस्तस्मिन् Vमासि Vवीर्यं संपद्यते ॥

उपरिष्टादिति ॥ पृष्ठ्यस्य षडहस्य मासेषूर्ध्वभागं स्थानत्वेन विधत्ते - 'उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति' इति ॥

अत्र मीमांसा ॥

सप्तमाध्यायस्य [39]तृतीयपादे चिन्तितम् -

" गवामयन आद्येऽह्नि प्रायणीयेति नाम यत् ।
तद्द्वादशाहिकादह्नो धर्मान्नतिदिशेन्न वा ॥
पूर्वन्यायेनातिदेशो मैवं प्रथमता द्वयोः ।
[40]अह्नोस्तुल्येति मुख्यत्वं समं [41]नातिदिशेदतः " ॥

द्वादशाहे प्रथमस्याह्नः प्रायणीयमिति नाम । तथा गवामयनेऽपि [42]तत्राग्निहोत्रनामन्यायेनवतिदेश इति

---

३९. आ - °पादे द्वितीयाधिकरणे । ४०. अ. पा. इ. वा - स्तुत्येति, उ - स्तुत्वेति । ४१. अ. क. पा. हा. उ. वा. वै - नातिदिशेत्ततः, शृ१ - तातिदिशेदितः, इ - नातिदिशेन्नवा । ४२. शृ१ - °ग्निहोत्र इति नाम° ।

चेन्मैवम्। प्रायणीयशब्दप्रवृत्तिनिमित्तस्य [४३]प्राथम्यस्य [४४]द्वयोस्तुल्यत्वेनोभयत्र [४५]मुख्यत्वेऽप्यनेकार्थत्वप्रसङ्गाभावात् ॥ [४६]- प्रारभ्यायति गच्छति प्रवर्तते -[४६] कर्मानेनेति प्रायणीयम्। अतो नैतन्नाम धर्मानतिदिशति।

तत्रैव [४७]चतुर्थपादेऽन्यच्चिन्तितम् -

[४८]गावामयनिके ज्योतिरादौ किं द्वादशाहिकी।
ऐकाहिकी [४९]वानुमानादाद्योऽन्त्यो नामबाधनात् ॥ (जैन्या ७.४.२.३)

गवामयने ज्योतिर्गौरायुरिति ज्योतिरादिनामकास्त्रयो यागा विहिताः। तेषु द्वादशाहिकीतिकर्तव्यता युक्ता। कुतः। अनुमितवाक्येन तत्प्रापणात्। गवामयनं हि द्वादशाहविकृतिरिति [५०]वक्ष्यति। अतस्तत्संबन्धिलिङ्गेन तदीयधर्मप्रापकश्चोदकोऽनुमीयत इति प्राप्ते ब्रूमः - सन्ति ज्योतिरादिनामकास्त्रय एकाहाः। तदीयधर्मा [५१]गावामयनिकेषु ज्योतिरादिषु [५२]ज्योतिरादिभिस्त्रिभिस्त्रिभिर्नामभिः प्राप्ताः। नाम [५३]चाऽऽनुमानिकाच्चोदकात् [५३]प्रबलं, [५४]प्रत्यक्षश्रुतत्वात्। [५५]अतः चोदकस्य बाधितत्वादेतेष्वैकाहिकीतिकर्तव्यता ग्राह्या ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥१॥

~~~~~~~~~~

४३. मै - प्राथम्यस्थ। ४४. मै - °नोभय। ४५. अ. आ. क. पा. इ. वा - °नेकार्थत्वाप्रसङ्गात्, शृ१ - °नेकार्थप्रसङ्गाभावात्, मै - एकार्थप्रसङ्गाभावात्। ४६-४६. मै - प्रारभ्यातिगच्छति वर्तते। ४७. आ - °पादे तृतीयाधिकरणे। ४८. अ. क. पा. हा. इ. उ. वा. वै - गवा°। ४९. मै - नानुमाना°। ५०. मै - 'वक्ष्यति' नास्ति। ५१. अ. पा. हा. इ. वा. वै. उ - गवा°। ५२. शृ१. उ. हा. क. मै - °रादिभिस्त्रिभिर्नामभिः। ५३. इ - 'प्रबलम्' नास्ति, शृ१ - प्रबलप्रत्यक्ष°। ५४. अ. पा. इ. वै. क - °श्रुतित्वात्, वा. मै - °श्रुतितत्वात्। ५५. शृ१ - 'अतः' नास्ति।
~~~~~~~~~~

गावो वा एतत् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त

गावः । वै । एतत् । सत्रम् । आसत । अशृङ्गाः । सतीः । शृङ्गाणि । सिषासन्तीः । तासाम् । दश । मासाः । निषण्णा इति नि-सन्नाः । आसन् । अथ । शृङ्गाणि । अजायन्त ।

पुनरपि [१-] गवामयनस्यैव विशेषं [-१] दर्शयति - 'गावः' इत्यादि ॥ गतम् (तैसं ७.५.१) । [V]सिषासन्तीः सिषासन्त्यः लब्धुमिच्छन्त्यः । सनोतेः "जनसनखनाम्°" (पा ६.४.४२) इत्यात्वम् , [२-]"सुपां सुलुक्"[-२] (पा ७.१.३९) इति [३]पूर्वसवर्णदीर्घत्वम् । 'ता अब्रुवन्' इति । [४]दशमासव्यपगमे जातशृङ्गाः सर्वा गावः [५][V]अब्रुवन् ; कथम् ? [V]अरात्स्म ऋद्धिं गता वयं, [V]उत्तिष्ठाम इदानीमभिमतं [६]हि [V]कामम् [७][V]अवारुत्स्महि [८]लब्धवत्यो वयं शृङ्गजन्मात्मकं येन [V]कामेन न्यषदाम आसिष्महे, नास्त्येवान्योऽस्माकं कामः, तत उत्तिष्ठाम इति ॥

प्रथमेऽनुवाके गवामयननामकं संवत्सरसत्रं [१]कैश्चिद्विशेषैः सह विहितम् । सोमयागा द्विविधाः - आवृत्ता अनावृत्ताश्च । [२]तत्र अनावृत्ता एकाहाः । आवृत्ता अपि द्विविधाः - अहीनरूपाः सत्ररूपाश्च । द्विरात्रमारभ्यैकादशरात्रपर्यन्ता अहीनाः । एकादशरात्रद्वादशरात्रौ तु द्विविधौ - अहीनरूपौ [३]सत्ररूपौ च । त्रयोदशरात्रमारभ्योपरितनानि सत्राण्येव । तान्यपि द्विविधानि - रात्रिसत्राण्ययनात्मकसत्राणि च । तत्र शतरात्रपर्यन्तानि रात्रिसत्राणि । [४] संवत्सरसत्रमारभ्योपरितनान्ययनरूपाणि । तेषां च सर्वेषां प्रकृतिभूतमिदं गवामयनम् । तस्य च [५]संवत्सरसाध्यः प्रयोगः पूर्वानुवाकेऽभिहितः । अथ द्वितीये दशमाससाध्येन प्रयोगेण सह विकल्पोऽभिधीयते ॥

१-१. मैर - °मयनविशेषम् । २-२. मैर - पूर्ववत् । ३. मै. मै१. मै३. अ. अ१ - पूर्ववत् सवर्ण° । ४. अ - तद्दशमास° । ५. मैर - अभूवन् । ६. मै. मै१. मै३. अ. अ१ - 'हि' नास्ति । ७. मैर - अपाकुर्वन् । ८. मैर - अलब्धवन्त्यः ।

---

१. मै - कश्चिद्विशेषैः । २. अ. आ. क. पा. हा. इ. वा. वै - ते च । ३. वा - 'सत्ररूपौ' नास्ति । ४. क - संवत्सरमारभ्यो° । ५. अ. आ. क. पा. हा. इ. उ. वा. वै. मै. म - संवत्सरकालसाध्याः ।

ता अंब्रुवन्नरात्स्मोत्तिंष्ठामाव तं कामंमरुत्स्महि येन कामेंन न्यषंदामेति तासांमु त्वा अंब्रुवन्नर्धा वा यावंतीर्वाऽऽसांमहा

ताः । अब्रुवन् । अरांत्स्म । उदितिं । तिष्ठाम । अवेतिं । तम् । कामंम् । अरुत्स्महि । येनं । कामेंन । न्यषंदामेतिं नि-असंदाम । इतिं । तासांम् । उ । तु । वै । अब्रुवन् । अर्धाः । वा । यावंतीः । वा । आसांमहै ।

'तासामु त्वा' [९]इत्यादि ॥ Vउ Vतु Vवै इति त्रयो निपाताः अवधारणविशेषप्रसिद्धिषु । Vतासाम् एव तु मध्ये Vअर्धा ऋद्धाः, [जातशृङ्गाः] शृङ्गकामाः [१०]अजातशृङ्गाः ताश्च Vअब्रुवन् । चार्थे वा शब्दः । ऋधेर्निष्ठायां छान्दसो गुणः । Vयावतीः Vवा स्वयं भावानतिरेकिण्यः (कामान् अति°) ? यावत्यश्च अन्याः शृङ्गकामाः किमेभिरुत्थितैः इति । अत एव जातशृङ्गाः ताश्चाब्रुवन् । [११]कथमब्रुवन् । यद्वा - अर्धा [१२]एतादृशाः यावतीर्वा सर्वा आसामहा इत्यर्थः । Vआसामहै Vएव Vइमौ Vद्वादशौ Vमासौ नोत्तिष्ठाम इति इमावप्यासित्वा संपाद्योत्तिष्ठाम इति । द्वादशानां पूरणौ द्वादशौ, सत्सु हि द्वादशसु , द्वादशापि द्वादशाः । अत्रेदं चिन्त्यम् — दशसु मासेषु या जातशृङ्गाः ता द्वादशौ

गाव इति ॥ तमेतं विधातुं पूर्वोक्तमेवार्थवादं कस्यचिद्विशेषस्य विवक्षया पुनः पठति - 'गावो वा एतत् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नरात्स्मोत्तिष्ठामाव तं काममरुत्स्महि येन कामेन न्यषदामेति ' इति ॥ पुरा शृङ्गरहिताः सत्यः Vगावः Vशृङ्गाणि Vसिषासन्तीः सनितुं लब्धुमिच्छन्त्यः Vएतत् उच्यमानं Vसत्रम् अन्वतिष्ठन् । Vतासां गवां Vदश Vमासाः अनुष्ठिता अभवन् । Vअथ अस्मिन् काले Vशृङ्गाणि उत्पन्नानि । Vताः चोत्पन्नशृङ्गाः परस्परमिदम् Vअब्रुवन् - Vयेन शृङ्गविषयेण Vकामेन Vन्यषदाम सत्रानुष्ठानार्थं वयमेकत्र स्थाने निषण्णाः Vतं शृङ्गविषयं Vकामम् [६]Vअरुत्स्महि वयं संपादितवत्यः । एवमुक्त्वा काश्चिद्गावः कृतार्थबुद्ध्या सत्रादुत्थिताः । ता उदतिष्ठन्निति पूर्वस्मिन्नर्थवादे श्रवणात् ॥

तासामिति ॥ तत्रैव यदन्यदुक्तम् - " अथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदतिष्ठन् " (तैसं ७.५.१) इति । [७]तत्र विवक्षितं विशेषं दर्शयति - " तासामु त्वा अब्रुवन्नर्धा वा यावतीर्वाऽऽसामहा एवेमौ

९. अ - इत्यादिभिः । १०. मै - जातशृङ्गाः । ११. अ - अथ । १२. [अस्माभिः संशोधितोऽयं पाठः लिपिसाधर्म्यात् । मै मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु 'एकादशाः' इत्युपलभ्यते ।] ।

६. मै - अवारुत्स्महि । ७. मै - सत्र ।

एवेमौ द्वादशौ मासौ संवत्सरꣳ संपाद्योत्तिष्ठामेति तासां (१) द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा

एव । इमौ । द्वादशौ । मासौ । संवत्सरमिति सं-वत्सरम् । संपाद्येति सं-पाद्य । उदिति । तिष्ठाम । इति । तासाम् (१) । द्वादशे । मासि । शृङ्गाणि । प्रेति । अवर्तन्त । श्रद्धयेति श्रत्-धया । वा । अश्रद्धयेत्यश्रत्-धया । वा ।

मासौ [13]पुनः [14]किमर्थमासतेति (°सत इति ?) । [15]अथ यास्त्वशृङ्गकामाः [16-] ता अस्मादेव दशमासानासीनाः [-16] पुनरपि द्वादशौ मासौ [17-] कस्मादेवासत इति [-17] । अयं भावः — जातशृङ्गा अपि शृङ्गाश्रद्धया शृङ्गगुणान् कामयन्ते स्म [18-] प्रथमाः । उत्तरास्तु अन्यदेव किंचित् श्रेयः कामयन्ते स्म [-18], न शृङ्गेषु तासां श्रद्धेति । तदिदमुभयमपि स्वयमेव स्पष्टीकरोति - 'तासां द्वादशे' इत्यादि । अत्र [19]या [20]दशमासानासित्वा जातशृङ्गा उत्थिताः

द्वादशौ मासौ संवत्सरꣳ संपाद्योत्तिष्ठामेति तासां द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन् याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुन्धत" इति ॥ या गावः सत्रमनुतिष्ठन्ति [8-]Vतासाम् Vउ Vत्वै [-8] तासामेव मध्ये [9]जातशृङ्गासूत्थाय गतास्ववशिष्टा Vअर्धाः Vवा काश्चिदेव गावः परस्परमेवम् Vअब्रुवन् । [10]एतास्वर्धरूपासु गोषु मध्ये राशिद्वयम् । तत्र काश्चिच्छृङ्गकामाः । अपरास्तु किमेभिः शृङ्गैः, रुर्जमेवोदरपूरणक्षमां संपादयाम इति मन्यन्ते । एवं सति शृङ्गकामा अशृङ्गकामाश्च Vयावतीः Vवा यावत्यः सन्ति ताः सर्वा अपि मिलित्वा परस्परमेवमब्रुवन् । किमब्रुवन्निति तदुच्यते - इमौ संवत्सरावशिष्टौ द्वादशसंख्यापूरणौ Vमासौ Vआसामहे Vएव [11]सर्वतोऽप्यनुतिष्ठाम । ततः Vसंवत्सरं पूरयित्वा पश्चात् Vउत्तिष्ठाम Vइति । Vतासां संवत्सरं पूरयन्तीनां गवां मध्ये यासां शृङ्गश्रद्धाऽस्ति तासां तथैव Vश्रद्धया द्वादशे मासि Vशृङ्गाणि उत्पन्नानि । यासां तु श्रद्धा नास्ति Vताः Vअश्रद्धया एव Vइमाः [12]गाः संपन्ना [13]असंपन्नशृङ्गाः, Vयाः लोके Vतूपराः शृङ्गरहिताः

---

१३. अ - 'पुनः' नास्ति । १४. अ - विमर्थं मीमांसते, अ१ - °र्थमासते । १५. अ१ - 'अथ' नास्ति । १६-१६. अ१ - तास्माकं यस्मादेव दशमासाः आसीनाः । १७-१७. अ१ - °देवास्मेति । १८-१८. मै२ - 'प्रथमाः - - - - कामयन्ते स्म' नास्ति । १९. अ. अ१ - 'याः' नास्ति । २०. अ१ - द्वादशमासा° ।

८-८. मै - तासामुभे । ९. मै - जातशृङ्गाण्युत्थाय । १०. आ. मै - एतास्वर्थरूपासु । ११. अ. आ. क. पा. हा. इ. उ. वा. वै. म. मै - सर्वदाप्यनु° । १२. अ. आ. क. पा. हा. इ. उ. वा. वै. म. मै - 'गाः' नास्ति । १३. शृ१. मै - 'असंपन्नशृङ्गाः' नास्ति ।

ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन् याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुन्धतर्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति

ताः । इमाः । याः । तूपराः । उभय्यः । वाव । ताः । आर्ध्नुवन् । याः । च । शृङ्गाणि । असन्वन् । याः । च । ऊर्जम् । अवारुन्धतेत्यव-अरुन्धत । ऋध्नोति । दशस्विति दश-सु । मासु । उत्तिष्ठन्नित्युत्-तिष्ठन् । ऋध्नोति ।

---

[२१]ता विरूपशृङ्गा आसन् । [२२-] अथ या [-२२] द्वादशावपि मासावासत [२३]Vतासां Vद्वादशे Vमासि समाप्ते संवत्सरे Vशृङ्गाणि Vप्रावर्तन्त [२४]प्रकृष्टरूपाण्यभवन् । [२५-] अथ यासां [-२५] श्रद्धा आसामहा एवेमौ द्वादशाविति तासां या श्रद्धा हेतुभूता शृङ्गविषया तया हेतुभूतयेत्यर्थः । अथ या अशृङ्गकामा [२६-] द्वादशौ मासौ [-२६] अवासते Vताः Vइमाः अभवन् Vयाः Vतूपराः उच्यन्ते । अत्र हेतुः 'अश्रद्धया' इति । शृङ्गश्रद्धाया अभावात् तूपरा [२७]अभवन्निति । अत्रापि वाशब्दः समुच्चये । Vश्रद्धया च Vअश्रद्धया चेत्यर्थः । तासामभवदिति (?) । उपसंहरति 'उभय्यः' इति । द्विप्रकारा अपि Vताः Vआर्ध्नुवन् ऋद्धिं गताः Vयाः Vच शृङ्गाणि Vअसन्वन् समभजन्त Vयाः Vच Vऊर्जम् अलभन्तेति । 'ऋध्नोति' इत्यादि । विदुषः [२८-] फलम् ।

दृश्यन्ते । एवं सति या गावः शृङ्गाण्यलभन्त याश्चान्यास्तच्छ्रद्धारहिताः स्वापेक्षिताम् Vऊर्जम् एवालभन्त, ता उभयविधा [१४]अपि स्वस्वप्रयोजनसिद्ध्या समृद्धिं गताः । अत्र दशमासानुष्ठानेन [१५-] शृङ्गमात्रम् । द्वादशमासानुष्ठानेन [-१५] रमणीयशृङ्गत्वं, कर्मभूयस्त्वात् फलभूयस्त्वमिति न्यायात् ॥

ऋध्नोतीति ॥ तदेवमर्थवादेन दशमासानुष्ठानं द्वादशमासानुष्ठानं च प्रशस्य विकल्पितं पक्षद्वयं विधत्ते - 'ऋध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेद' इति ॥ Vयः यजमानः प्रकारद्वयं वेत्ति, सोऽयं स्वेच्छयाऽन्यतरं प्रकारमनुतिष्ठन् समृद्धिं प्राप्नोति ॥

पदेनेति ॥ [१६]ननु द्वादशसु मासेषु संपूर्णानुष्ठानत्वादस्तु फलम् । [१७-] दशमासपक्षे तु [-१७] कथमित्याशङ्क्योपपादयति - 'पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन्' इति ॥ Vएते दशमासानुष्ठायिनो यजमानाः कालाल्पत्वेऽपि Vपदेन Vखलु Vवै Vयन्ति [१८]शास्त्रीयेणैव मार्गेणानुतिष्ठन्ति ।

---

२१. अ१ - 'ताः' नास्ति । २२-२२. अ१ - अथवा । २३. अ१ - 'तासाम्' नास्ति । २४. अ१ - प्रकृष्टान्यासन् । २५-२५. मैर - 'अथ यासाम्' नास्ति । २६-२६. मैर - द्वादशे मासि । २७. मैर - भवन्तीति । २८-२८. अ. अ१ - उभयसिद्धापि ।

---

१४. मै - 'अपि' नास्ति । १५-१५. भृ१ - शृङ्ग° - - - - °ष्ठानेन' नास्ति । १६. वा. मै - न तु । १७-१७. वा - दशमासपक्षेषु । १८. अ. आ. क. पा. हा. इ. उ. वा. वै. म - 'एव' नास्ति ।

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यां वै त्रिरेकस्याह्न उपसीदन्ति दह्नं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति

प्रथमे । मासि । पृष्ठानि । उपेति । यन्ति । मध्यमे । उपेति । यन्ति । उत्तम इत्युत्-तमे । उपेति । यन्ति । तत् । आहुः । याम् । वै । त्रिः । एकस्य । अह्नः । उपसीदन्तीत्युप-सीदन्ति । दह्नम् । वै । सा । अपराभ्याम् । दोहाभ्याम् । दुहे । अथ । कुतः । सा । धोक्ष्यते । याम् । द्वादश । कृत्वः । उपसीदन्तीत्युप-सीदन्ति । इति ।

उक्तं मासिमासि पृष्ठोपेतं दशमास्यं द्वादशमास्यं च द्विप्रकारं गवामयनम् । इदानीं तृतीयं प्रस्तूयते - 'प्रथमे' इत्यादि ॥ प्रथममध्यमोत्तमेष्वेव मासेषु ^V^पृष्ठानि उपेयुरिति । अथैतत्तृतीयदूषणेन चतुर्थं दर्शयति - 'तदाहुः' [१]इति । [२-]^V^यां गाम् ^V^एकस्य ^V^अह्नः ^V^त्रिः ^V^उपसीदन्ति [३-] दुहन्ति ^V^सा ^V^अपराभ्यां द्वितीयतृतीयाभ्यां ^V^दह्नम् अल्पमेव क्षीरं ^V^दुहे दुग्धे [४]हरति । यदेवं [५]^V^सा कुतः ^V^धोक्ष्यते । ^V^यां सत्रधेनुं ^V^द्वादश ^V^कृत्वः[-२] [६]^V^उपसीदन्ति [-३] न किञ्चिदपि सा दुग्धे । तस्मादभिप्लवैरेव ^V^संवत्सरं ^V^संपाद्य ^V^उत्तमे ^V^मासि ^V^सकृत् ^V^पृष्ठानि

द्वितीये [१]दशमासद्वादशमासविकल्पोऽभिहितः । अथ तृतीये [२]पृष्ठ्यषडहविषयो विकल्पोऽभिधीयते ॥

प्रथमे इति ॥ यत् पूर्वं विहितं [३]" मासिमासि पृष्ठान्युपयन्ति " (तैसं ७.५.१) इति, तत्र पक्षान्तरं विधत्ते - 'प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति' इति ॥ सर्वेषु मासेषु [४-] पृष्ठ्यः षडहो [-४] नानुष्ठेयः, किन्तु प्रथममध्यमोत्तमेषु त्रिष्वेव मासेष्वित्ययमेकः पक्षः ॥

तदिति ॥ पुनरपि पक्षान्तरं विधत्ते - 'तदाहुर्यां वै त्रिरेकस्याह्न उपसीदन्ति दह्नं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति संवत्सरं संपाद्योत्तमे मासि

१. मै. मै१. मै३. अ. अ१ - इति । तत् तदर्थम् । २-२. अ१ - 'याम् - - - - कृत्वः' नास्ति । ३-३. अ - 'दुहन्ति - - - - उपसीदन्ति' नास्ति । ४. मै२ - हरति तस्मान्नापराभ्याम् । ५. मै२ - तासाम् । ६. अ१ - याथार्थ्यमेकस्यां उपसीदन्ति ।

१. मै - दशमासविकल्पो° । २. अ. पा. हा. इ. वा - पृष्ठ्यः षडह° । ३. पा. हा - मासि । ४-४. अ. पा. हा. इ. वा - पृष्ठ्यषडहः ।

संवत्सरꣳ संपाद्योत्तमे मासि सकृत् पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते समुद्रं वै (१) एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्ति

संवत्सरमिति सं-वत्सरम् । संपाद्येति सं-पाद्य । उत्तम इत्युत्-तमे । मासि । सकृत् । पृष्ठानि । उपेति । इयुः । तत् । यजमानाः । यज्ञम् । पशून् । अवेति । रुन्धते । समुद्रम् । वै (१) । एते । अनवारम् । अपारम् । प्रेति । प्लवन्ते । ये । संवत्सरमिति सं-वत्सरम् । उपयन्तीत्युप-यन्ति ।

Vउपेयुः । ततः Vयजमानाः [७-]Vयज्ञं धेनुस्थानीयं Vपशून् च तत्क्षीरस्थानीयान् [-७] Vअवरुन्धते । दुह इति कर्मकर्तरि " न दुहस्नुनमाम्°" (पा ३.१.८९) इति यगभावः । " लोपस्त [८]आत्मनेपदेषु " (पा ७.१.४१) इत्यादिना तलोपः ॥

'समुद्रं वै 'इत्यादि ॥ परागर्वाक्तीरे पारावारौ, ताभ्यां [९]रहितं समुद्रम् Vएते Vप्रप्लवन्ते Vये Vसंवत्सरम् Vउपयन्ति । अगाधम् अपारम् इत्येके । तत्र Vयत् Vबृहद्रथन्तरे Vअन्वर्जेयुः अविच्छेदेन स्वीकुर्युः तत् Vसमुद्रस्य Vमध्ये प्लवस्वीकरणरादृशं [१०-] वेदितव्यम् । " अर्ज

सकृत्पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते 'इति ॥ लोके दोग्धारः पुरुषाः Vएकस्य Vअह्नः मध्ये Vयां गां दोग्धुं त्रिवारं प्राप्नुवन्ति Vसा गौः प्रथमपर्याये प्रभूतं क्षीरं प्रयच्छति । Vअपराभ्यां द्वितीयतृतीयदोहनपर्यायाभ्यां Vदह्नं Vवै दुहेऽल्पमेव क्षीरं दोग्धि । एवं सति यां गामेकस्मिन् दिने द्वादशकृत्वः दोग्धुमुपयन्ति Vसा गौः Vकुतः [५]Vधोक्ष्यते । न हि क्षीराभावे दोहनमुचितम् । तस्माद्गोसमानस्य पृष्ठ्यषडहस्यापि [६]मासत्रयानुष्ठानमप्यनुचितम् । किमु वक्तव्यं [७]द्वादशमासानुष्ठानेऽनुचितत्वमित्येवम् । Vतद् Vआहुः तस्मिन् पृष्ठ्यषडहविषयेऽभिज्ञाः कथयन्ति । तस्मात् Vसंवत्सरम् अनुष्ठायान्ते Vमासि Vसकृत् एव पृष्ठ्यः षडहोऽनुष्ठेयः । इतरेषु तु मासेषु पञ्चमेनाभिप्लवषडहेनैव [८]मासपूरणं कर्तव्यम् । [९]Vतत् तथा सति Vयजमानाः पृष्ठ्यषडहस्य ससारत्वात् Vयज्ञं संपूर्णं प्राप्नुवन्ति [१०-] तत्फलभूतान् पशूनपि प्राप्नुवन्ति तान् [-१०] ॥

७-७. अ१ - पशुस्थानीयान् । ८. मै. मै१. मै३. अ. अ१ - 'आत्मनेपदेषु 'नास्ति । ९. अ१ - रहितं रहितौ अनवारा तादृशम् । १०-१०. अ - वेदितव्यम् - - - - संवत्सरम् 'नास्ति ।

---

५. मै - योक्ष्यते । ६. अ. आ. क. पा. हा. इ. वा. वै. मै - °त्रयानुष्ठानमनुचितम् । ७. अ. पा. हा. इ. उ. वा. वै - °प्यनुचितमित्येवम् , शृ१. म. मै - °नुष्ठानमित्येवम् । ८. मै - पूरणम् । ९. अ. आ. क. पा. हा. इ. उ. वा. मै. म. शृ१ - 'तत् 'नास्ति । १०-१०. अ. आ. क. पा. हा. इ. उ. वा. वै - तत्फल° - - - - तान् 'नास्ति ।

यद् बृहद्रथन्तरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुत्सर्गं बृहद्रथन्तराभ्यामित्वा प्रतिष्ठां गच्छन्ति

यत् । बृहद्रथन्तरे इति बृहत्-रथन्तरे । अन्वर्जेयुरित्यनु-अर्जेयुः । यथा । मध्ये । समुद्रस्य । प्लवम् । अन्वर्जेयुरित्यनु-अर्जेयुः । तादृक् । तत् । अनुत्सर्गमित्यनुत्-सर्गम् । बृहद्रथन्तराभ्यामिति बृहत् - रथन्तराभ्याम् । इत्वा । प्रतिष्ठामिति प्रति-स्थाम् । गच्छन्ति ।

---

[११]आर्जने" (धापा २२४), तस्मात् [V]अनुत्सर्गम् अनुत्सृज्य, छान्दसो णमुल् । अनुत्सृष्टबृहद्रथन्तर-प्लवा एव [१२]ताभ्याम् [V]इत्वा संवत्सरं [-१०] समुद्रं [१३]समतिक्रम्य [V]प्रतिष्ठां [V]गच्छन्ति ॥

'सर्वेभ्यः' इत्यादि ॥ सन्धिः सकृद्दोह्या गौः [१४]न पुनःपुनर्दोह्या । [V]सन्धिः हि [V]सर्वेभ्यः [V]कामेभ्यः पर्याप्तं क्षीरं [V]दुहे दुग्धे; तद्वत् सत्रधेनुरपि सकृत्पृष्ठोपयानेन सन्धिसदृशी सकृदेव [V]सर्वान् [V]कामान् दुग्धे । तस्माद्दोहनस्थानीयं पृष्ठोपयानं सकृत्कुर्वन्तः [V]यजमानाः सर्वान् कामान् [१५-V]अवरुन्धत इति । अन्य आहुः [-१५] - अन्यवत्सदोह्या गौः सन्धिरिति । सा हि

समुद्रमिति ॥ यत् पूर्वं विहितं " समान९ साम भवति " (तैसं ७.५.१) इति [११]तदेतदेवात्र विशेषाकारेण विधत्ते -'समुद्रं वा एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्ति यद्बृहद्रथन्तरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुत्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः सन्धिर्दुहे तद्यजमानाः सर्वान् कामानव रुन्धते ' इति ॥ पारावारे परावाची तीरे । [V]ये यजमानाः [१२]संवत्सरसत्रमनुतिष्ठन्ति [१३-] एते तीरद्वयरहितं [-१३] [V]समुद्रं बाहुभ्यां [१४]तरितुमिच्छन्ति, [१५]तच्चाशक्यम् । यदि तत्र [V]बृहद्रथन्तरे सामनी अनुक्रमेण पृष्ठस्तोत्रे संपादयेयुस्तदानीं [१६]यथा [V]समुद्रस्य [V]मध्ये तरणसाधनं [V]प्लवं संपादयेयुः [V]तादृक् [V]तत् भवति । तस्मात् [V]अनुत्सर्गं कदाचिदप्यपरित्यज्य [V]बृहद्रथंतराभ्याम् [१७-V]इत्वा स्तोत्रं प्राप्य [V]प्रतिष्ठां यज्ञसमाप्तिं [V]गच्छन्ति । अन्यदीयेनापि वत्सेन दोग्धुं शक्या गौः [V]सन्धिः

---

११. मैर - आनते । १२. मैर - आक्रान्ताभ्याम् । १३. मै. मै१. मै३. अ. अ१ - समतीत्य । १४. अ. अ१ - 'न' नास्ति । १५-१५. अ - अवरुन्ध इत्याहुः ।

---

११. क - तदेवात्र । १२. मै - °मनुतिष्ठन्त इति । १३-१३. मै - एतत्तीर° । १४. मै - तर्तुमिच्छन्ति । १५. भृ१ - तथाशक्यम् । १६. मै - तथा । १७-१७. मै - इत्वा - - - - °राभ्याम् ' नास्ति ।

**सर्वेभ्यो वै कामेभ्यः सन्धिर्दुहे तद्यजमानाः
सर्वान् कामानवरुन्धते ॥३॥**

(समुद्रं वै चतुस्त्रिꣳशच्च ।)

**सर्वेभ्यः । वै । कामेभ्यः । सन्धिरिति सं-धिः । दुहे ।
तत् । यजमानाः । सर्वान् । कामान् ।
अवेति । रुन्धते ॥३॥**

[कासं ३३.५; कपिसं - - - -; मैसं - - - -; वासं - - - -]

सर्वकामपर्याप्तं क्षीरं [१६]पुनःपुनर्दोहेन क्षरति, तद्वत् [१७]सत्रसन्धिरपि अन्यवत्सस्थानीयाभ्यां बृहद्रथन्तराभ्यामनुत्सर्गेण दुह्यमाना सर्वान् कामान् प्रयच्छतीति ॥

॥ इति सप्तमे पञ्चमे तृतीयोऽनुवाकः ॥

इत्युच्यते । सा च संधिः Vसर्वेभ्यः Vकामेभ्यः Vदुहे यथा यथा क्षीरमपेक्षितं तथा तथा यं कंचिद्वत्समादाय दोग्धुं शक्यते । तत्तथा सत्यत्रापि Vयजमानाः अन्यदीयाभ्यां प्रकृतिगताभ्यां बृहद्रथंतराभ्यां -[१७] तत्तद्दिने प्रयुज्यमानाभ्यां सर्वान् कामान् प्राप्नुवन्ति ॥

॥ [१८-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः -[१८] ॥

---

१६. मै. मै१. मै२. मै३ - पुनर्दोहेन । १७. अ - सत्रसन्धिरिति अपि ।

१८-१८. इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ।

समान्यं ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यत्साम भवति देवलोको वै साम

समान्यः । ऋचः । भवन्ति । मनुष्यलोक इति मनुष्य-लोकः । वै । ऋचः । मनुष्यलोकादिति मनुष्य-लोकात् । एव । न । यन्ति । अन्यदन्यदित्यन्यत्-अन्यत् । साम । भवति । देवलोक इति देव-लोकः । वै । साम ।

अथोत्तरस्मिन् पक्षसि विशेष उच्यते - ‘समान्यः’ इत्यादि ॥ [1]Vसमान्यः एकाः । “केवलमामक°” (पा ४.१.३०) इति ङीप्, “उदात्तस्वरितयोः°” (पा ८.२.४) इति विभक्तिः

तृतीये [1-] पृष्ठ्यषडहविषयः प्रकारविशेषोऽभिहितः [-1] । अथ चतुर्थ उत्तरे पक्षसि प्रकारविशेषोऽभिधीयते । द्वे [2]हि संवत्सरसत्रस्य पक्षसी । एतच्चान्यत्र समाम्नातम् “यथा शालायै पक्षसी । एवं संवत्सरस्य पक्षसी” (तैब्रा १.२.३) इति । तत्र प्रथमषण्मासात्मके पूर्वस्मिन् पक्षसि सामैक्यमृचां [3]नानात्वं पूर्वमभिहितम् । इदानीं द्वितीयषण्मासात्मक उत्तरस्मिन् पक्षसि पूर्ववैपरीत्येन ऋगैक्यं सामनानात्वं चाऽभिधीयते ॥

समान्य इति ॥ तत्रादावृगैक्यं विधत्ते - ‘समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्ति’ इति ॥ मनुष्यलोके हि कर्म कृत्वा पश्चाद्देवलोकं प्राप्नुवन्ति । एवमाधारभूतामृचमभ्यस्य पश्चात्तस्यां साम गायन्ति । तस्मात् Vऋचः मनुष्यलोकस्वरूपाः । ताश्च Vसमान्यः [4-] एकरूपाः कर्तव्याः [-4] । एकस्मिन्नहनि या ऋचस्ता एवान्यस्मिन् प्रयोक्तव्याः । एवं सति ऋगात्मकात् Vमनुष्यलोकात् कदाचिदपि Vन [5]अपगच्छन्ति । [6]अपत्यादिसंतानाविच्छेदात् ॥

अन्यदिति ॥ [7]अथ सामनानात्वं विधत्ते - ‘अन्यदन्यत् साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति’ इति ॥ साम्नः पश्चाद्भावित्वसाम्येन देवलोकत्वम् । तादृशं च Vसाम पूर्वस्मिन् दिने यत् Vभवति ततः Vअन्यत् उत्तरस्मिन् [8]अहनि [9]कर्तव्यम् । लोकेऽपि Vदेवलोकात् [10]निर्गच्छन्तः पुरुषाः Vअन्यम् Vअन्यं मनुष्यलोकप्रदेशं गच्छन्ति । यद्वाऽन्यमन्यमिति पञ्चम्यर्थे द्वितीया ।

१. अ - ‘समान्यः’ नास्ति ।

१-१. मै - °डहविषयप्रकार° । २. मै - हितम् । ३.आ - नानात्वं [च] । ४-४. मै - एकस्वरूपाः । ५. अ. पा. हा. इ. वा - आगच्छन्ति । ६. मै - ‘अपत्यादिसंतानविच्छेदात्’ नास्ति । ७. मै - स यः । ८. मै - ‘अहनि’ नास्ति । ९. मै - कर्तव्ये । १०. मै - न गच्छन्तः ।

गवामयने उत्तरपक्षविशेषः]

देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं वै छन्दाꣳसि प्रत्यवरोहन्त्याग्रयणं ग्रहा बृहत्पृष्ठानि

देवलोकादिति देव-लोकात् । एव । अन्यमन्यमित्यन्यम्-अन्यम् । मनुष्यलोकमिति मनुष्य-लोकम् । प्रत्यवरोहन्त इति प्रति-अवरोहन्तः । यन्ति । जगतीम् । अग्रे । उपेति । यन्ति । जगतीम् । वै । छन्दाꣳसि । प्रत्यवरोहन्तीति प्रति-अवरोहन्ति । आग्रयणम् । ग्रहाः । बृहत् । पृष्ठानि ।

स्वर्यते । ता एव [V]ऋचः न पृथक् ग्राह्याः । उत्तरस्मिन् पक्षसि [V]मनुष्यलोकात् [V]एष [V]न [V]यन्ति [2]अपत्यादिसन्तानविच्छेदेन । [3-]‘अन्यदन्यत्’ इत्यादि [-3] । बहवो देवलोकाः, [4-] तत्र सर्वस्मात् [-4] [V]देवलोकात् इष्टं [V]मनुष्यलोकं [V]प्रत्यवरोहन्तः [V]एव [V]यन्ति उपयन्ति सत्रम् ॥

---

[11]अन्यस्मात् अन्यस्माद्देवलोकात् कर्मफलानां तारतम्योपेतत्वेन विविधत्वात् [12]तदा तदा विलक्षणात् देवलोकात् [V]प्रत्यवरोहन्तः यजमाना मनुष्यलोकं प्राप्नुवन्तीत्यर्थः ॥

जगतीमिति ॥ विशेषान्तरं विधत्ते - ‘जगतीमग्र उप यन्ति जगतीं वै छन्दाꣳसि प्रत्यवरोहन्ति’ इति ॥ पूर्वस्मिन् पक्षसि गायत्री प्रथममनुष्ठिता । उत्तरस्मिंस्तु जगती प्रथममनुष्ठेया । तथा सति [V]जगतीं प्रत्यन्यानि सर्वाणि [V]छन्दांसि अवरोहं प्राप्तानि भवन्ति ॥

आग्रयणमिति ॥ पुनरपि विशेषत्रयं क्रमेण विधत्ते - ‘आग्रयणं ग्रहा बृहत्पृष्ठानि त्रयस्त्रिꣳशाꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान् प्रत्यवरोहति’ इति ॥ यथा गायत्र्यादिच्छन्दःसु पूर्वस्मात् पक्षसो [13]विपर्ययेणोत्तरस्य पक्षसोऽनुष्ठानमेवं ग्रहसामस्तोमेष्वपि द्रष्टव्यम् । तत्राऽऽग्रयणोऽन्ते गृहीत इह त्वादौ । तथा सति [V]ग्रहाः [14]प्रत्यवरूढा भवन्ति । तथा तत्र रथन्तरं पृष्ठं [15-] पूर्वस्मिन् दिने [-15]ऽनुष्ठितम् । इह तु बृहत्पृष्ठं पूर्वमनुष्ठेयम् । तथा सति सर्वाणि पृष्ठस्तोत्राणि प्रत्यवरूढानि भवन्ति । तथा तत्र त्रयस्त्रिंशस्तोमोऽन्तेऽनुष्ठितः । इह तु आदावनुष्ठेयः । तथा सति सर्वे स्तोमाः प्रत्यवरूढा भवन्ति । [16]यस्मादत्र

---

२. अ. अ१. मै२ - °विच्छेदात् । ३-३. मै२ - अय त्वाम्, अ - अन्या अन्यदित्यादि । ४-४. मै. मै१. मै३. अ१ - तत्र सामतः तस्मात् ।

---

११. हा - ‘अन्यस्मात्’ नास्ति । १२. हा - ‘तदा’ नास्ति । १३. मै - °णोत्तरस्मिन् । १४. मै - प्रत्यारूढा । १५-१५. अ. आ. क. पा. हा. इ. उ. वा. वै. म. मै - पूर्वदिने । १६. शृ१. हा - तस्मादत्र ।

त्रयस्त्रिꣳशाꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान् प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदित्यो (१) गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते मिथुनत्वाय प्रजात्या

त्रयस्त्रिꣳशमिति त्रयः-त्रिꣳशम् । स्तोमाः । तस्मात् । ज्यायाꣳसम् । कनीयान् । प्रत्यवरोहतीति प्रति-अवरोहति । वैश्वकर्मण इति वैश्व-कर्मणः । गृह्यते । विश्वानि । एव । तेन । कर्माणि । यजमानाः । अवेति । रुन्धते । आदित्यः (१) । गृह्यते । इयम् । वै । अदितिः । अस्याम् । एव । प्रतीति । तिष्ठन्ति । अन्योऽन्य इत्यन्यः-अन्यः । गृह्येते इति । मिथुनत्वायेति मिथुन-त्वाय । प्रजात्या इति प्र-जात्यै ।

'जगतीमग्रे' इति ॥ विस्पष्टम् । अत ऊर्ध्वमुत्तरस्मिन् पक्षस्यह्नां [५]परावृत्तत्वात् [६-][V]जगतीं [V]वै [V]छन्दांसि [-६] [V]प्रत्यवरोहन्ति [७-] तदभिमुखं न्यग्भावेन [-७] गच्छन्ति । [V]आग्रयणं [V]ग्रहाः प्रत्यवरोहन्तीत्येव । आग्रयणाग्रत्वात् ग्रहाणाम् । [V]बृहत् प्रत्यवरोहन्ति [V]पृष्ठानि सामानि

प्रौढस्त्रयस्त्रिंशः प्रथमभाव्यर्वाञ्चस्त्रिणवैकविंशादयः [१७]पश्चात्कालीनास्तस्माल्लोकेऽपि ज्यायांसं पितरं पितामहं वा प्रति [V]कनीयान् पुत्रः पौत्रो वा वाहनादश्वादेरवरोहति ॥

वैश्वकर्मण इति ॥ अथातिग्राह्यद्वयं [१८]क्रमेण विधत्ते - "वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदित्यो गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्ति' इति ॥ [१९-]"वाचस्पतिं विश्वकर्माणम् [-१९]" (तैसं ४.६.२) इत्यनेन गृह्यमाणोऽतिग्राह्यः [V]वैश्वकर्मणः । [V]तेन अतिग्राह्येण सर्वाणि [२०]अपि [V]कर्माणि [V]यजमानाः प्राप्नुवन्ति । "महीमू षु मातरम्" (तैसं १.५.११) इत्यनेन [२१]गृह्यमाणोऽतिग्राह्यः [V]आदित्यः । भूमेरदितित्वात् । तेनातिग्राह्येण भूमौ [V]प्रतितिष्ठन्ति ॥

अन्योन्य इति ॥ अत्र [२२]सूत्रम् - "वैश्वकर्मणमतिग्राह्याणामष्टमं गृह्णाति, "वाचस्पतिं विश्वकर्माणमूतय" (तैसं ४.६.२) इति, श्वोभूत आदित्यं "महीमू षु मातरम्" (तैसं १.५.११) इति तावेवमेव

---

५. अ - अपरावृत्तत्वात् , अ१ - परावृत्तत्वम् । ६-६. मै२ - जगतीं वै छन्दांसि ' नास्ति । ७-७. मै - तदभिमु तदयं भावेन ।

---

१७. अ. आ. क. पा. हा. इ. वा. वै. म. मै. उ - पश्चाद्भाविनः । १८. अ. आ. पा. हा. इ. उ. वा. वै. म - 'क्रमेण' नास्ति । १९-१९. मै - कर्माणम् । २०. मै - 'अपि' नास्ति । २१. मै - °णोतिग्राह्या । २२. अ. आ. क. पा. हा. इ. उ. वा. वै - सूत्रकारः ।

अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एता२ं ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या

अवान्तरमित्यव-अन्तरम् । वै । दशरात्रेणेति दश-रात्रेण । प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । यत् । दशरात्र इति दश-रात्रः । भवति । प्रजा इति प्र-जाः । एव । तत् । यजमानाः । सृजन्ते । एताम् । ह । वै । उदङ्कः । शौल्बायनः । सत्रस्य । ऋद्धिम् । उवाच । यत् । दशरात्र इति दश-रात्रः । यत् । दशरात्र इति दश-रात्रः । भवति । सत्रस्य । ऋद्ध्यै ।

तत्प्रधानत्वात् । Vत्रयस्त्रिंशं [८]प्रत्यवरोहन्ति Vस्तोमाः ततो न्यूनत्वात् । 'तस्मात्' इत्यादि । [९]गतम् । [१०-]Vज्यायांसं Vकनीयान् Vप्रत्यवरोहति [-१०] ॥

Vवैश्वकर्मणः अतिग्राह्यो Vगृह्यते [११-] आदित्यश्च । 'अन्योऽन्यः' इति । [१२]एकैकस्य गृह्यते [-११] आमहाव्रतात्, महाव्रते [१३-] सह Vगृह्येते [-१३] ॥

व्यत्यासं गृह्णात्या महाव्रतात्" (आपश्रौ २१.२१.८-१०) इति, तमिमं व्यत्यासं विधत्ते - 'अन्योऽन्यो गृह्येते मिथुनत्वाय प्रजात्यै' इति ॥ [२३-]Vअन्योऽन्यः एकैकः । यस्मिन् [-२३] दिने वैश्वकर्मणो गृह्यते, ततः परेद्युरादित्यः । ततोऽपि परेद्युर्वैश्वकर्मणः । पुनरपि परेद्युरादित्यः । एवं सति द्वित्वेन मिथुनरूपत्वात् प्रजोत्पत्तये संपद्यते ॥

अवान्तरमिति ॥ अथ द्वादशाहीयं दशरात्रं [२४]विधत्ते - 'अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एता२ं ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच

८. अ. अ१ - °रोहन्ति इति । ९. अ१ - 'गतम्' नास्ति । १०-१०. मै२. अ - 'ज्यायांसं - - - - °रोहति' नास्ति । ११-११. मै२ - 'आदित्यश्च - - - - गृह्यते' नास्ति । १२. अ - एकैकस्य न । १३-१३. अ. अ१ - स गृह्यते ।

२३-२३. अ. पा. हा. इ. वा - अन्योन्यस्य एकैकस्मिन् । २४. मै - धत्ते ।

अथो यदेव पूर्वेष्वहःसु विलोम क्रियते
तस्यैवै(२)षा शान्तिः ॥२॥

(आदित्यस्तस्यैव द्वे च ।)

अथो इति । यत् । एव । पूर्वेषु । अहःस्वित्यहः-सु ।
विलोमेति वि-लोम । क्रियते । तस्य ।
एव (२) । एषा । शान्तिः ॥२॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

'अवान्तरं वै' इत्यादि ॥ व्याख्यातं "द्वे वाव" (तैसं ७.४.५) इत्यत्र द्वादशाहीयो [१४]दशरात्रोऽपि [१५]विधीयते । समाप्तं गवामयनम् ॥

॥ इति सप्तमे पञ्चमे चतुर्थोऽनुवाकः ॥

यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवेषा शान्तिः' इति ॥ एतच्च वाक्यं "द्वे वाव देवसत्रे" (तैसं ७.४.५) इत्यत्र व्याख्यातम् ॥

[२५- इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः -२५] ॥

---

१४. मैर. अ - द्वादशरात्रः । १५. अ - हीयते ।

२५-२५. मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।

सोमौ संसुतौ स्याताम्]

यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात् पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्

यदि । सोमौ । सꣳसुताविति सं-सुतौ । स्याताम् । महति । रात्रियै । प्रातरनुवाकमिति प्रातः-अनुवाकम् । उपाकुर्यादित्युप-आकुर्यात् । पूर्वः । वाचम् । पूर्वः । देवताः । पूर्वः । छन्दाꣳसि । वृङ्क्ते । वृषण्वतीमिति वृषण्-वतीम् । प्रतिपदमिति प्रति-पदम् । कुर्यात् ।

अथ सत्रम् [१]एव अधिकृत्य किंचिदुच्यते - 'यदि सोमौ' इत्यादि ॥ [२V]यदि [३V]सोमौ [४]सोमयागौ [५]गोसत्रात्मकौ सन्तौ [६-V]संसुतौ समारब्धौ [-६] [V]स्यातां [V]महति [V]रात्रियै । उभयत्र व्यत्ययः लिङ्गस्य च वचनस्य । महत्यां रात्रौ इति "बृहन्महतोरुपसङ्ख्यानम्" इति महतो विभक्तिरुदात्ता । महारात्रिं उपोत्थाय [V]प्रातरनुवाकम् [V]उपाकुर्यात् । यो हि पूर्वमुपाकरोति स इतरस्य वागादीन् [V]वृङ्क्ते आदत्ते ॥

चतुर्थेऽनुवाक उत्तरे [१-] पक्षसि विशेषोऽभिहितः [-१] । अथ पञ्चमे मात्सर्येण प्रवृत्तयोर्द्वयोर्गवामयनयोर्विशेषोऽभिधीयते ॥

यदीति ॥ [२]तमेतं विधत्ते - 'यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात् पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दाꣳसि वृङ्क्ते' इति ॥ [V]यदि कदाचिद्यजमानसंघयोरुभयोः परस्परमात्सर्येण गवामयनगतौ [V]सोमौ संभूयाभिषुतौ [३V]स्यातां तदानीं [४]मध्यमरात्रे बुद्ध्वा प्रातरनुवाकनामकस्य शस्त्रस्योपाकरणं कुर्यात् । "[५]प्रातर्यावभ्यो देवेभ्यः" इत्यादिसंप्रैषमध्वर्युः पठेदित्यर्थः । यो यजमानसंघः [६]पूर्वं प्रवृत्तः सन्नुपाकरोति [७-] स एवान्यदीयां वाचं देवताश्छदांसि च [[V]वृङ्क्ते] विनाशयति [-७] ॥

वृषण्वतीमिति ॥ तस्मिंश्च प्रातरनुवाक ऋग्विशेषं विधत्ते - 'वृषण्वतीं प्रतिपदं कुर्यात् प्रातःसवनादेवैषामिन्द्रं वृङ्क्ते' इति ॥ प्रकृतौ "आपो रेवतीः क्षयथा हि [८]वस्व" (ऋ १०.३०.१२) इत्यैषा

---

१. मै२ - 'एव' नास्ति । २. मै२. अ१ - 'यदि' नास्ति । ३. अ - सोमम् । ४. मै२ - सोमयागौ सत्रात्मकौ । ५. अ. अ१ - 'गोसत्रात्मकौ' नास्ति । ६-६. मै२ - सहावस्यौ (स्थौ ?) ।

१-१. मै - पक्षविशेषोऽभि° । २. अ. आ. क. पा. हा. इ. वा. वै. म. मै - तमिमम् । ३. हा - 'स्याताम्' नास्ति । ४. अ. आ. क. पा. हा. इ. वा. वै. उ - महारात्रे । ५. मै - प्रातर्यावन्यो । ६. मै - पूर्वः । ७-७. अ. आ. क. पा. हा. इ. उ. वा. वै - सोऽन्यस्य संघस्य वागादीन् वृङ्क्त आदत्ते । ८. भृ१. म. मै - 'वस्व' नास्ति ।

[सोमौ संसुतौ स्याताम्

प्रातःसवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखेसंवनमुखे कार्येति सवनमुखात्संवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः

प्रातःसवनादिति प्रातः-सवनात् । एव । एषाम् । इन्द्रम् । वृङ्क्ते । अथो इति । खलु । आहुः । सवनमुखेसंवनमुख इति सवनमुखे-सवनमुखे । कार्या । इति । सवनमुखात्संवनमुखादिति सवनमुखात्-सवनमुखात् । एव । एषाम् । इन्द्रम् । वृङ्क्ते । संवेशायेति सं-वेशाय । उपवेशायेत्युप-वेशाय । गायत्रियाः । त्रिष्टुभः । जगत्याः । अनुष्टुभ इत्यनु-स्तुभः ।

'वृषण्वतीम्' इति ॥ वृषशब्दवतीमृचं बहिष्पवमानस्य Vप्रतिपदं प्रारम्भं Vकुर्यात् Vप्रातःसवनात् Vएव Vएषां [७]प्रत्यर्थिनां यजमानानाम् [-७] इन्द्रियं Vवृङ्क्ते आत्मसात् करोति । 'एषाम्' इति । लिङ्गात् सत्रविषयमेतदिति जानीमः । वृषशब्दान्मतुप्, "अनो नुट्" (पा ८.२.१६) [९] इति नुट् [-९] । Vअथो खलु Vआहुः Vसवनमुखेसवनमुखे त्रयाणामपि सवनानाम् [-८] आरम्भे प्रतिपदियं Vकार्या Vइति सर्वस्मात् Vसवनमुखात् Vएषां सम्बन्धिनम् [१०]Vइन्द्रं इन्द्रियम् Vवृङ्क्ते ॥

प्रथमा । इह तु तां परित्यज्य वृषन्शब्दवतीमन्यामृचं प्रथमां Vकुर्यात् । तथा सति [९] स एव [-९]अन्येषां यजमानानां देवतारूपम् Vइन्द्रं Vप्रातःसवनात् अपनयति ॥

अथो इति ॥ पक्षान्तरमाह - 'अथो खल्वाहुः सवनमुखेसवनमुखे कार्येति सवनमुखात्-सवनमुखादेवैषामिन्द्रं वृङ्क्ते' इति ॥ त्रयाणामपि सवनानां प्रारम्भे सेयं वृषण्वती पठनीयेत्येवं केचिदाहुः । तथा सति परेषां सर्वसवनारम्भात् Vइन्द्रम् अपसारयति ॥

संवेशायेति ॥ अथ [१०]तत्राभिभूतिहोममन्त्रान् [११]पञ्च पठति - 'संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा' इति ॥ Vसंवेशाय गायत्र्यादीनां छन्दसां स्वकीययज्ञे सम्यक् प्रवेशाय । Vउपवेशाय [१२]प्रविष्टानां चात्र [-१२] स्थिराबास्थितये । गायत्र्या Vअभिभूत्यै परकीयस्य

७. अ - प्रत्यर्थितानाम् । ८-८. अ - 'इन्द्रियं - - - - सवनानाम्' नास्ति । ९-९. मै. मै१. मै३. अ. अ१ - 'इति नुट्' नास्ति । १०. मै२. अ - 'इन्द्रम्' नास्ति ।

९-९. मै - 'स एव' नास्ति । १०. मै - °भूतिमन्त्रहोमान् । ११. वा - 'पञ्च' नास्ति । १२-१२. मै - प्रविष्टां वा चात्र ।

सोमौ संसुतौ स्याताम्]

पङ्क्त्या अभिभूत्यै स्वाहा छन्दांꣳसि वै संवेश उपवेशश्छन्दोभिरेवैषां (१) छन्दांꣳसि वृङ्क्ते सजनीयꣳ शस्यं विहव्यꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ

पङ्क्त्याः । अभिभूत्या इत्यभि-भूत्यै । स्वाहा । छन्दांꣳसि । वै । संवेश इति सं-वेशः । उपवेश इत्युप-वेशः । छन्दोभिरिति छन्दः-भिः । एव । एषाम् (१) । छन्दांꣳसि । वृङ्क्ते । सजनीयमिति स-जनीयम् । शस्यम् । विहव्यमिति वि-हव्यम् । शस्यम् । अगस्त्यस्य । कयाशुभीयमिति कया-शुभीयम् ।

'संवेशाय' [11]इत्यादिरभिभूतिहोममन्त्रो व्याख्यातप्रायः [12]" इष्टर्गः " (तैसं ३.१.७) इत्यत्र ॥ 'छन्दांसि वै' इत्यादि ब्राह्मणं च तत्रैव (तैसं ३.१.७) व्याख्यातप्रायम् । तत्त्वेकाहादि-विषयम् । [13] इदं तु [-13] [14]सत्रविषयम् । [15] तत्र तिस्रोऽभिभूतयः [-15], [16]अत्र तु पञ्चेति विवेकः ॥

'सजनीयम्' [17]इत्यादि ॥ निष्केवल्ये " इन्द्रस्य नु वीर्याणि प्र वोचम् " (ऋ १.३२.१) इत्यस्य स्थाने सजनीयं " यो जात एव ", (ऋ २.१२.१) इति [V]शस्यम् , [18]' सजनासः ' इति शब्दोऽस्मिन्नस्तीति [-18]। " मतौ छः°" (पा ५.२.५९) [19] इति छः[-19] । महावैश्वदेवे " आ नो भद्राः " (ऋ १.८९.१) इत्यस्य स्थाने [V]विहव्यं " ममाग्ने " (तैसं ४.७.१४) इति

गायत्रीछन्दसोऽभिभवाय स्वाहुतमिदमस्तु । त्रिष्टुभम् इत्यादिभिश्चतुर्भिः पदैरुत्तरे चत्वारो मन्त्रा भिद्यन्ते । तेषु संवेशायोपवेशायेत्येतदनुषञ्जनीयम् । प्रथममन्त्रे तु 'अभिभूत्यै स्वाहा' इत्येतदनुषज्यते ॥

छन्दाꣳसीति ॥ मन्त्राणां तात्पर्यं व्याचष्टे - 'छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवैषां छन्दाꣳसि वृङ्क्ते' इति ॥ योऽयं संवेशो यश्चोपवेशस्तावुभौ छन्दोविषयत्वात् [V]छन्दाꣳसि एव । तथा सति स्वकीयैः [V]छन्दोभिः इतरेषां [V]छन्दाꣳसि विनाशयति ॥

सजनीयमिति ॥ अथ शस्त्रविशेषान् विधत्ते - ' सजनीयꣳ शस्यं विहव्यꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते ' इति ॥ [13]" यो जात [-13] एव प्रथमो

---

११. अ१ - °भूतिष्टोम°, मै२ - °भूतिहोममन्त्रे । १२. अ१ - ' इष्टर्गः ' नास्ति । १३-१३. अ. अ१ - ' इदं तु ' नास्ति । १४. अ - ' सत्रविषयम् ' नास्ति । १५-१५. मै२ - अत्र तिस्रो विभूतयः । १६. मै२ - तत्र । १७. अ - इत्यादि तत् । १८-१८. मै२ - जानशब्दोऽस्मिन्° । १९-१९. अ - ' इति छः ' नास्ति ।

१३-१३. मै - योऽज्ञात एव ।

शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते यदि प्रातःसवने कलशो दीर्येत

शस्यम् । एतावत् । वै । अस्ति । यावत् । एतत् । यावत् । एव । अस्ति । तत् । एषाम् । वृङ्क्ते । यदि । प्रातःसवन इति प्रातः-सवने । कलशः । दीर्येत ।

---

[२०]Vशस्यम् । [२१]विहवशब्दोऽस्मिन् वर्तत इति मत्वर्थे यत् [-२१] । मरुत्वतीये [२२]" जनिष्ठा उग्रः " (ऋ १०.१२८.१) इत्यस्य स्थाने [-२२] [२३]-Vअगस्त्यस्य Vकयाशुभीयं [-२३] " कया शुभास वयसः " (ऋक्सं १.१६५.१) इति Vशस्यम् । पूर्ववच्छः (पा ५.२.५९) । ' एतावद्वा ' इत्यादि । Vएतावत् एवं Vसजनीयं प्रतियष्टॄणाम् Vअस्ति, Vयावत् Vएतत् अनुक्रान्तम् । वागादीनि इन्द्रछन्दांसि [२४]शस्त्रविशेषाश्च Vयावत् Vएव Vअस्ति Vतत् सर्वं Vएषां Vवृङ्क्ते आदत्ते । एतेन ज्ञायते विद्विषाणयोः संसवो न पितापुत्रादीनामिति ॥

मनस्वान् " (ऋ २.१२.१-१५) इति सूक्ते ' स जनास इन्द्रः ' इत्येवं सजनशब्दस्य विद्यमानत्वात् तत् सूक्तं Vसजनीयम् । निष्केवल्यशस्त्रे " इन्द्रस्य नु वीर्याणि " (ऋ १.३२.१) इत्यस्य स्थाने सजनीयसूक्तं शंसनीयम् । " ममाग्ने वर्चो विहवेष्वस्तु " (ऋ १०.१२८.१-९) इति सूक्ते [१४]विहव्यशब्दसद्भावात् तत् Vविहव्यम् । तच्च महावैश्वदेवशस्त्रे " आ नो भद्राः " (ऋ १.८९.१) इत्यस्य स्थाने शंसनीयम् । " कया शुभा सवयसः " (ऋ १.१६५) इत्येतत् सूक्तमगस्त्येन दृष्टत्वात् Vअगस्त्यस्य [१५]Vकयाशुभीयं मरुत्वतीयशस्त्रे " जनिष्ठा उग्र " (ऋ १०.७३.१) [१६]इत्यस्य स्थाने शंसनीयम् । [१७]यद्वा तत्तच्छस्त्रादौ शस्त्रात् पुरा यथोक्तं सूक्तजातं पठनीयम् । एतदुक्तं [१८]सूक्तत्रयं Vयावत् [१९]अस्ति एतावदेव सारम् । एतत्पाठे तु परेषां यावत् सारमस्ति Vतत् सर्वं विनाशयति ॥

यदीति ॥ अथ [२०]नैमित्तिकं स्तोत्रविशेषं विधत्ते - ' यदि प्रातःसवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन् यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवातिरिक्तमाप्त्वाऽव रुन्धते ' इति ॥ Vयदि प्रातःसवनकाले द्रोणकलशः

---

२०. अ - शब्दस्यम् । २१-२१. मैर. अ - छान्दसो यत् । २२-२२. मैर. अ. अ१ - ' जनिष्ठा - - - - स्थाने ' नास्ति । २३-२३. मैर - अगस्त्य कयाशुभीय वय । २४. मैर - शास्त्रविषयाश्च ।

---

१४. मै - विहशब्दसद्भा° । १५. हा - कायाशुभीयम् । १६. क - इत्येतस्य । १७. मै - यदा । १८. उ. शृ१. मै - सूत्रत्रयम् । १९. मै - असि । २०. मै - नैमित्तिकोक्तम् ।

सोमौ संसुतौ स्याताम्]

वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन् यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो

वैष्णवीषु। शिपिविष्टवतीष्विति शिपिविष्ट-वतीषु। स्तुवीरन्। यत्। वै। यज्ञस्य। अतिरिच्यत इत्यति-रिच्यते। विष्णुम्। तत्। शिपिविष्टमिति शिपि-विष्टम्। अभि। अतीति। रिच्यते। तत्। विष्णुः। शिपिविष्ट इति शिपि-विष्टः। अतिरिक्त इत्यति-रिक्ते। एव। अतिरिक्तमित्यति-रिक्तम्। दधाति। अथोइति।

'यदि प्रातःसवने' इत्यादि ॥ [V]कलशो द्रोणकलशः [V]यदि [V]दीर्येत भिद्येत, [V]वैष्णवीषु शिपिविष्टशब्दवतीषु ऋक्षु [V]स्तुवीरन्, [V]यत् [V]यज्ञस्य [V]अतिरिच्यते [25-] प्राकृतादिदमेव साम एतत् [V]विष्णुं [-25] [V]शिपिविष्टम् अभिलक्ष्य [V]अतिरिच्यते, [26-] तस्मात् तदतिरिक्तम्। [V]विष्णुः [27][V]शिपिविष्टः [-26] तत्प्राधान्यात्। तस्मात् तदतिरिक्ते शिपिविष्टे [28-] विष्णौ [V]एव [-28] [V]अतिरिक्तं पुनर्गृह्यमाणं सोमं [V]दधाति। [V]अथो [29-] अपि च [-29] [30][V]अतिरिक्तेन [V]एव [V]अतिरिक्तं पुनर्गृहीतम् [V]आप्त्वा अदोषरूपमेव शास्त्रीयमेव लब्ध्वा [31][V]अवरुन्धते सत्रफलम् ॥

[21]दीर्येत विदीर्णो भवेत् तदानीं स्तोतारः सामगा विष्णुदेवताकासु शिपिविष्टशब्दयुक्तास्वृक्षु स्तुतिं कुर्युः। [V]यज्ञस्य संबन्धि यदङ्गम् [V]अतिरिच्यते शास्त्रीयं [22]क्रममुल्लङ्घ्य वर्तते, तदङ्गं [23]शिपिविष्टगुणविशिष्टं [V]विष्णुम् अभिलक्ष्यातिरिक्तं भवति। "पशवः शिपिः" (तैसं २.५.५) इति श्रुत्यन्तराच्छिपिशब्दः पशुवाची। तेषु स्वामित्वेन प्रविष्टः शिपिविष्टः। तच्च [V]अतिरिक्तम् अङ्गं शिपिविष्टो विष्णुरेव। तत्स्वामिकत्वात्। ततो वैष्णवीषु [24]स्तुतौ [25]सत्यामतिरिक्तस्वामिन्येव विष्णौ [V]अतिरिक्तम् [26]अङ्गं स्थापयति। अपि चातिरिक्तस्वामिनैव विष्णुना [V]अतिरिक्तम् अयथाशास्त्रमङ्गम् [V]आप्त्वा शास्त्रीयं कृत्वा सत्रफलं लभते ॥

२५-२५. अ१ - प्राकृतात् देयसाम एतद्विष्णुः। २६-२६. अ - तस्मात् - - - - °विष्टः' नास्ति। २७. अ१ - शिपिविष्टम्। २८-२८. अ१ - विष्णवे। २९-२९. अ - 'अपि च' नास्ति। ३०. अ - अतिरेकेन। ३१. अ - अवरुन्धे।

२१. मै - 'दीर्येत' नास्ति। २२. क - फलमुल्लङ्घ्य। २३. शृ१ - °गुणयुक्तं विशिष्टम्। २४. मै - स्तुत्वा। २५. अ. पा. इ. उ. वा - तस्यामति - - - - स्वामिनैव। २६. क - 'अङ्गम्' नास्ति।

अतिरिक्तेनैवातिरिक्तमाप्त्वाऽव(२) रुन्धते यदि मध्यन्दिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै

अतिरिक्तेनेत्यति-रिक्तेन । एव । अतिरिक्तमित्यति-रिक्तम् । आप्त्वा । अवेति (२) । रुन्धते । यदि । मध्यन्दिने । दीर्येत । वषट्कारनिधनमिति वषट्कार-निधनम् । साम । कुर्युः । वषट्कार इति वषट्-कारः । वै ।

Vयदि [३२-] माध्यन्दिनसवने Vदीर्येत [-३२] । कलश इत्येव । गतमन्यत् । [३३]Vप्रतिष्ठाम् [३४]Vएव Vएनं [३५]क्रतुं गमयति अवैकल्येन समापयति । [३६]'यदि तृतीयसवने ' इत्यादि । अत्र यः सोमः तस्य [३७]दीरणे एतदेव कुर्युः वषट्कारनिधनमिति ब्राह्मणाच्छंसिनः स्तोत्रं कुर्युरिति ॥

॥ इति सप्तमे पञ्चमे पञ्चमोऽनुवाकः ॥

यदीति ॥ अथ [२७]माध्यन्दिनसवनतृतीयसवनयोर्विशेषं विधत्ते - ' यदि मध्यंदिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव ' इति ॥ [२८]माध्यन्दिनसवनतृतीयसवनयोर्द्रोणकलशे विदीर्णे सति Vवषट्कारनिधनं [२९]Vसाम [३०]Vकुर्युः [३१]गातव्यम् । निधनं साम्नः पञ्चमो भागः । वषट्शब्दो [३२]निधनं यस्य [३३]साम्ने [३४-] तदिदं वषट्कारनिधनम् [-३४],

---

३२-३२. मै२. अ - माध्यन्दिन इत्यादि । ३३. अ. अ१ - प्रतिष्ठा प्रतिष्ठाम् । ३४. मै२ - ' एव ' नास्ति । ३५. अ. अ१ - कामम् । ३६. मै२ - ' यदि ' नास्ति । ३७. अ - रणे ।

---

२७. अ. आ. क. पा. हा. इ. उ. वै - द्वितीयतृतीयसवनयो°, वा - द्वितीयसवनयो° । २८. अ. आ. क. पा. हा. इ. उ. वै - द्वितीयतृतीयसवनयो°, वा - द्वितीयसवनयो° । २९. मै - सामनी । ३०. शृ१ - ' कुर्युः ' नास्ति । ३१. अ. आ. पा. हा. इ. उ. वा. वै - ' गातव्यम् ' नास्ति, मै - गीतव्यम् । ३२. शृ१. मै - निधनम् इति । ३३. अ. आ. पा. हा. इ. उ. वा. वै - सामभक्तिविशेषः यस्य साम्नः, क - साम्नो भक्तिविशेषः । ३४-३४. अ. आ. पा. हा. इ. उ. वा. वै - तादृशं साम कुर्युः ।

सोमौ संसुतौ स्याताम्]

यज्ञस्यं प्रतिष्ठा प्रतिष्ठामेवैनंदुगमयन्ति यदि तृतीयसवन एतदेव ॥५॥

(छन्दोंभिरेवैषामेवैकान्नविं॰शतिश्चं)

~~~~~~~~~~~~~~~~~~~~~~~~

यज्ञस्यं । प्रतिष्ठेतिं प्रति-स्था । प्रतिष्ठामितिं प्रति-स्थाम् । एव । एनत् । गमयन्ति । यदि । तृतीयसवन इतिं तृतीय-सवने । एतत् । एव ॥२॥

[कासं ३४.४; कपिसं - - - -; मैसं - - - -; शब्रा ४.५.१०.७]

~~~~~~~~~~~~~~~~~~~~~~~~

Vवषट्कारः हि [३५]हविष्प्रदानसाधनत्वात् [३६-]Vयज्ञस्य समाप्तिस्थानम् [-३६]। [३७-] तद्युक्तसामगानेनैतद्विकलमङ्गं संपूर्तिं प्रापयन्ति । तस्मात् Vतृतीयसवने अपि कलशविदारणे सति Vएतत् Vएव साम गातव्यम् [-३७] ॥

॥ [३८-] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः[-३८] ॥

~~~~~~~~~~~~~~~~~~~~~~~~

३५. अ. क. पा. हा. इ. उ. वा. शृ१. मै - हविःप्रदान° । ३६-३६. इ. वा - यज्ञसमाप्ति° । ३७-३७. अ. आ. क. पा. हा. इ. उ. वा. वै. म - तद्युक्तसामगानेनैव प्रतिष्ठामेवैनत्सत्रं गमयन्ति अवैकल्पेन समापयन्ति । यदि तृतीयसवने कलशो भिद्येत तदाप्येतदेव । अत्र यत्साम तस्यैतदेव वषट्कारनिधनमेव साम कुर्युः । ३८-३८. मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।
~~~~~~~~~~~~~~~~~~~~~~~~

षडहैर्मासान्त्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्त्संपश्यन्त्यर्धमासैर्मासान्त्सं-पाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्त्संपश्यन्त्यमावास्यया

षडहैरिति षट्-अहैः । मासान् । संपाद्येति सं-पाद्य । अहः । उदिति । सृजन्ति । षडहैरिति षट्-अहैः । हि । मासान् । संपश्यन्तीति सं-पश्यन्ति । अर्धमासैरित्यर्ध-मासैः । मासान् । संपाद्येति सं-पाद्य । अहः । उदिति । सृजन्ति । अर्धमासैरित्यर्ध-मासैः । हि । मासान् । संपश्यन्तीति सं-पश्यन्ति । अमावास्ययेत्यमा-वास्यया ।

अथोत्सर्गिणामयनं प्रस्तूयते - इदं च [1]गवामयनस्य गुणविकारः । अत्र विशेष उच्यते –– 'षडहैः' इति ॥ मासः सावनः त्रिंशदुष्णकरोदयं सावनं मासमाहुः । उक्ताः षडहाः पृष्ठ्याभिप्लवात्मकाः । तैः [V]मासान् [V]संपाद्य पूरयित्वा अनन्तरस्य मासस्य आद्यम् [V]अहः ज्योतिराख्यं [V]उत्सृजन्ति त्यजन्ति । अत्र षडहा एव गण्यन्ते न दिवसाः । [V]षडहैः [2]अहःपञ्चभिः [V]मासान् [V]संपश्यन्ति गणयित्वा जानन्ति । पञ्चानां [3]च षण्णां [4]च संवर्गस्त्रिंशदिति ।

पञ्चमेऽनुवाके गवामयनप्रसङ्गेन सत्रविषये मात्सर्यविशेषोऽभिहितः । अथ षष्ठे गवामयनस्य [1-] गुणविकाररूप उत्सर्गोऽभिधीयते [-1] ।

षडहैरिति ॥ [2]तदेतद्विधत्ते - 'षडहैर्मासान्त्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्त्संपश्यन्ति' इति ॥ येऽभिप्लवषडहाः [3]तैः पञ्चकृत्व आवृत्तैरेकं मासमनुष्ठायानन्तरे मासे प्रथमदिने कर्तव्यं ज्योतिराख्यम् [V]अहः उत्सर्जेयुः । यद्वा चतुर्भिरभिप्लवैः [4]एकेन पृष्ठ्येन च मासं समाप्योत्तरमहरुत्स्रष्टव्यम् । यस्माल्लोकेऽपि पञ्चभिः [V]षडहैः त्रिंशद्दिनानि गणयित्वा सावनमासोऽयमिति [5]निश्चिन्वन्ति ॥

अर्धमासैरिति ॥ पक्षान्तरं [6]आह - 'अर्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्त्संपश्यन्ति' इति ॥ पूर्वस्मिन् पक्षे प्रायणीयारम्भणीयावहर्विशेषौ द्वौ परित्यज्य तृतीयदिने षडहस्याऽऽरम्भः । तदाऽऽरभ्य त्रिंशद्दिनात्मके सावनमासे गते सति [7]तत ऊर्ध्वम् [-7] अहरुत्स्रष्टव्यम् । इदानीं प्रायणीयदिनमारभ्य

---

१. अ - गवामयनं यदस्य, अ१ - गवामयनम् । २. अ. अ१ - 'अहः' नास्ति । ३. मै. मै१. मै३. अ. अ१ - 'च' नास्ति । ४. मै. मै१. मै३. अ. अ१ - च षडहानाम् ।

१-१. शृ१. मै - °रूपम् उत्सर्गिणामयनमभि°, वा - °विकारः स उत्सर्गोभिः° । २. आ - 'तदेतद्विधत्ते' नास्ति । ३. शृ१ - 'तैः' नास्ति । ४. मै - तेन । ५. शृ१ - निश्चरन्ति(?) । ६. शृ१ - अ. आ. क. पा. हा. इ. वा. वै - विधत्ते । ७-७. शृ१ - तदूर्ध्वम् ।

मासान्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति

मासान् । संपाद्येति सं-पाद्य । अहः । उदिति । सृजन्ति । अमावास्ययेत्यमा-वास्यया । हि । मासान् । संपश्यन्तीति सं-पश्यन्ति । पौर्णमास्येति पौर्ण-मास्या । मासान् । संपाद्येति सं-पाद्य । अहः । उदिति । सृजन्ति । पौर्णमास्येति पौर्ण-मास्या । हि । मासान् । संपश्यन्तीति सं-पश्यन्ति ।

'अर्धमासैः' इति । द्वाभ्यामर्धमासाभ्यां [5]पञ्चदशकाभ्यां एकमासं [6]संपादयन्ति । [7-] समप्रविभागे अर्धशब्दः[-7] । " अर्धं नपुंसकम् " (पा २.२.२) इति समासः । Vअर्धमासैः Vहि Vमासान् Vसंपश्यन्ति [8]द्वाभ्यां द्वाभ्यामर्धमासाभ्यां एकैको मास इति गणयित्वा मासान् [9]जानन्ति । अत्रार्धमासावेव गण्येते [10-] न च षडहाः [-10] । 'अमावास्यया' [11]इति । अमावास्यामारभ्य मासः संपाद्यः । अत्रामावास्यैव गण्यते । न दिवसादि, त्रिंशद्दिवसव्यपगमे अमावास्यान्तरापगमात् [12]Vअमावास्यया मासज्ञानम् । 'पौर्णमास्या' इति । गतम् ॥

पञ्चदशदिनात्मकाभ्यां द्वाभ्यामर्धमासाभ्यामेकं मासं समाप्य तदनन्तरभावि Vअहः उत्स्रष्टव्यम् । लोके Vहि द्वाभ्यामर्धमासाभ्यामेको [8]मासो निष्पद्यत इत्येवम् Vअर्धमासैः एव मासस्वरूपं निश्चिन्वन्ति । तदिदं पक्षद्वयं सावनमासाभिप्रायम् ॥

अमावास्ययेति ॥ अथ चान्द्रमासाभिप्रायेण पक्षद्वयम् । तत्रैकं पक्षमाह - 'अमावास्यया मासन्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति' इति ॥ [9]चान्द्रमासदर्शिनः केचित् Vअमावास्यया माससमाप्तिं निश्चिन्वन्ति । अतोऽत्रापि तथैव मासं समाप्य शुक्लप्रतिपदि यत् Vअहः अनुष्ठेयं तत् परित्याज्यम् ॥

---

५. [मै - मुद्रितपुस्तके 'पञ्चदशकाभ्याम्' इत्यस्मादूर्ध्वं 'पञ्चम एकाभ्यां' इत्यधिकोंऽशः धनुश्चिह्नाङ्कितेन उपलभ्यते । परयमंशः अत्राप्रस्तुतत्वादस्माभिः परित्यक्तः ।] । ६. [अस्माभिः शुद्धीकृतोऽयमंशो द्रष्टव्यः, मै - मुद्रितपुस्तके लिखितपुस्तकेषु च 'संपादयति' इति लभ्यते ।] , अ१ - संपादयेत् । ७-७. अ१ - संप्रविभागोऽर्धशब्दः । ८. अ१ - 'द्वाभ्याम्' नास्ति । ९. अ१ - जानन्ति जनयन्ति । १०-१०. अ१ - क च षडहाः, अ - षडहाः, मै. न दिवसाः, मै१. मै३ - 'न च षडहाः' नास्ति । ११. अ१ - 'इति' नास्ति । १२. अ. अ१ -अमावास्यायाम् ।

---

८. अ. पा. हा. इ. वा - 'मासः' नास्ति । ९. अ. आ. क. पा. वा. वै - चान्द्रमसदर्शिनः, हा - चन्द्रमास° ।

यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति (१) प्राणमस्मिन्त्स दधाति यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तत् प्राणं दधति तदनु सत्रिणः प्राणन्ति

यः । वै । पूर्णे । आसिञ्चतीत्या-सिञ्चति । परेति । सः । सिञ्चति । यः । पूर्णात् । उदचतीत्युत्-अचति (१) । प्राणमिति प्र-अनम् । अस्मिन् । सः । दधाति । यत् । पौर्णमास्येति पौर्ण-मास्या । मासान् । संपाद्येति सं-पाद्य । अहः । उत्सृजन्तीत्युत्-सृजन्ति । संवत्सरायेति सं-वत्सराय । एव । तत् । प्राणमिति प्र-अनम् । दधति । तत् । अन्विति । सत्रिणः । प्रेति । अनन्ति ।

'यो वै' इत्यादि ॥ [१३][V]यः [V]पूर्णे आधा(घा?)रे पुनरपि [V]आसिञ्चति प्रक्षिपति [१४-] जलादि, [V]सः[-१४] खलु तं [V]परासिञ्चति [१५]सेचनेन नाशयति । [१६]यतस्तत [१७]एवोदचति उत्सिञ्चति उद्धरति स्तोकं [V]सः [V]अस्मिन् प्राणावकाशं [V]दधाति । तस्मात् पौर्णमास्यनन्तरमहरुत्सर्जनेन [V]संवत्सराय

पौर्णमास्येति ॥ [१०]चान्द्रमासम् [११]आश्रित्यैव पक्षान्तरमाह - पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति ' इति ॥ शुक्लप्रतिपदमारभ्यामावास्यान्तश्चान्द्रो मासः इत्यतीतः पक्षः । कृष्णप्रतिपदमारभ्य [१२]पौर्णमास्यन्त इत्ययं [१३]च पक्षः । [१४-] एतस्मिन् [१५]पक्षे कृष्णप्रतिपदि [-१४] यत् [V]अहः प्राप्तं तदुत्स्रष्टव्यम् ॥

यो वा इति ॥ एतमेव पक्षं प्रशंसति - 'यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति प्राणमस्मिन्त्स दधाति यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तत् प्राणं दधति तदनु सत्रिणः प्राणन्ति ' इति ॥ लोके हि [V]यः कोऽपि पुरुषो घृतक्षीरादिना [१६-][V]पूर्णे पात्रे [-१६] पुनरप्युपरि तद्द्रव्यम् [V]आसिञ्चति [V]सः भूमौ पातयित्वा [१७]तद्द्रव्यं विनाशयति । [V]यः तु [१८]बुद्धिमान् [V]पूर्णात् पात्रात् [१९]उदचति

---

१३. अ - 'यः' नास्ति । १४-१४. अ. अ१ - जलानि । १५. मै२ - सेचने । १६. मै. मै१. मै३. अ. अ१ - यस्ततः । १७. मै२ - एवोदश्चति ।

---

१०. अ. आ. क. पा. वा. वै - चान्द्रमसम्°, हा - चान्द्रमससमासम् । ११. हा - समाश्रित्यैव, क - आश्रित्य । १२. हा - पौर्णमास्यन्तरः । १३. अ. आ. क. पा. हा. इ. उ. वा. वै. म. मै. शृ१ - 'च' नास्ति । १४-१४. मै - प्रतिपदि । १५. अ. पा. हा. इ. वा - 'पक्षे' नास्ति । १६-१६. पा - पूर्णपात्रे । १७. हा - द्रव्यम् । १८. आ - धीमान् । १९. शृ१. मै - उदश्चति ।

यदह्नोत्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येव संवत्सरो वि पतेदार्तिमार्छेयुर्यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति

यत् । अह्नः । न । उत्सृजेयुरित्युत्-सृजेयुः । यथा । दृतिः । उपनद्ध इत्युप-नद्धः । विपततीति वि-पतति । एवम् । संवत्सर इति सं-वत्सरः । वीति । पतेत् । आर्तिम् । एति । ऋच्छेयुः । यत् । पौर्णमास्येति पौर्ण-मास्या । मासान् । संपाद्येति सं-पाद्य । अह्नः । उत्सृजन्तीत्युत्-सृजन्ति । संवत्सरायेति सं-वत्सराय । एव । तत् । उदानमित्युत्-अनम् । दधति ॥

प्राणावकाशं [V]दधाति ततश्च [V]तदनु तेनैव हेतुना [V]सत्रिणः [V]प्राणन्ति । "अनुर्लक्षणे" (पा १.४.८४) इति कर्मप्रवचनीयत्वम् ॥

'यदहः'इत्यादि ॥ [१८]यदि यथोक्तम् [१९][V]अहः [V]न [V]उत्सृजेयुः [V]यथा [V]दृतिः [V]उपनद्धः [२०-] पूरयित्वा बद्धः [-२०] [V]विपतति विलोडनेन कचिदवतिष्ठते [V]एवं [V]संवत्सरः [V]विपतेत् ततश्च [V]आर्तिम् [V]आर्च्छेयुः यजमानाः । अथाहरुत्सर्जनेन संवत्सरस्य [V]उदानं [V]दधाति उच्छ्वासावकाशं

स्वल्पमुद्धरति [V]सः [V]अस्मिन् पात्रे प्राणरूपं वायुं [V]दधाति । सति ह्यवकाशे वायुः संचरति । एवं सति यदि यजमानास्तत्तत्[२०]पौर्णमास्या तं तं मासं पूरयित्वा [२१]कृष्णप्रतिपदि कर्तव्यम् [V]अहः उत्सृजेयुः, तदानीं [२२-] संवत्सरसत्ररूपपुरुषार्थं प्राणवायुं तस्मिन् दिने [-२२] स्थापयन्ति । तत्संवत्सरप्राणस्थापनमनु [V]सत्रिणः यजमाना अपि श्वासनिरोधाभावेन जीवन्ति ॥

यदहरिति ॥ अथ व्यतिरेकमुखेनै(णै)तमेव पक्षं प्रशंसति - 'यदहर्नोत्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येव संवत्सरो वि पतेदार्तिमार्छेयुर्यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति तदनु सत्रिण उदनन्ति नाऽऽर्तिमार्छन्ति' इति ॥ उक्तन्यायेनाहन्यनुत्सृष्टे सत्युदकपूर्णो [२३][V]दृतिः दृढं बध्यमानः [२४]अपि यथा द्वैधीभावेन नश्यति, एवं संवत्सरात्मकः क्रतुर्विनश्येत् यजमानाश्च मरणं [२५]प्राप्नुयुः । तत्परिहारार्थमहन्युत्सृष्टे सति तेनोत्सर्गेण संवत्सरसत्रस्याविनाशार्थं प्राणसंचारस्थानीयमुदानं संपादयन्ति । तत्संपादनम् [V]अनु [V]सत्रिणः अपि [V]उदनन्ति उच्छ्वसन्ति ततो [V]न [V]आर्तिं गच्छन्ति ॥

१८. मै२ - 'यदि' नास्ति । १९. मै२ - 'अहः' नास्ति । २०-२०. मै२ - 'पूरयित्वा बद्धः' नास्ति ।

२०. अ. आ. क. पा. हा. इ. उ. वा. वै - पौर्णमास्याः । २१. शृ१. मै - शुक्लप्रतिपदि । २२-२२. इ - °पुरुषार्थं तस्मिन् दिने प्राणवायुं । २३. मै - इति । २४. शृ१. मै - 'अपि' नास्ति । २५. अ. पा. हा. इ. वा - प्राप्नुवन्ति ।

तदनु सत्रिण उदं(२)नन्ति नाऽऽर्तिमार्छन्ति पूर्णमासे वै देवानां॑ सुतो यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति यत् षडहसंततं॑ सन्तमथाहरुत्सृजन्ति प्राजापत्यं पशुमा लभन्ते

तत् । अन्विति । सत्रिणः । उदिति (२) । अनन्ति । न । आर्तिम् । एति । ऋच्छन्ति । पूर्णमास इति पूर्ण-मासे । वै । देवानाम् । सुतः । यत् । पौर्णमास्येति पौर्ण-मास्या । मासान् । संपाद्येति सं-पाद्य । अहः । उत्सृजन्तीत्युत्-सृजन्ति । देवानाम् । एव । तत् । यज्ञेन । यज्ञम् । प्रत्यवरोहन्तीति प्रति-अवरोहन्ति । वीति । वै । एतत् । यज्ञम् । छिन्दन्ति । यत् । षडहसंततमिति षडह-संततम् । सन्तम् । अथ । अहः । उत्सृजन्तीत्युत्-सृजन्ति । प्राजापत्यमिति प्राजा-पत्यम् । पशुम् । एति । लभन्ते ।

कुर्वन्ति [२१-]Vतदनु Vसत्रिणः Vउदनन्ति उच्छ्वसन्ति Vन [-२१] आर्तिं गच्छन्ति । 'पूर्णमासे वै' इत्यादि । Vसुतः सुत्या । प्रायेण पूर्णमासे देवानां सुत्येति [२२]साधीयान् । तस्मात् पौर्णमास्युपक्रमं मासं Vसंपाद्य अह्नः पौर्णमास्याः उत्सर्जनात् Vदेवानाम् Vएव Vयज्ञेन Vयज्ञं पृष्ठं Vप्रत्यवरोहन्ति [२३]देवानां यज्ञमाकृष्य [२४]यज्ञपार्श्वं प्राप्नुवन्ति । ततश्च उत्सृष्टं चानुत्सृष्टं च तदहर्भवति ॥

पूर्णमास इति ॥ पुनः प्रकारान्तरेणैतमेव पक्षं प्रशंसति - 'पूर्णमासे वै देवानां॑ सुतो यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति' इति ॥ पौर्णमास्यामेव [२६]हि प्रकृतौ Vदेवानां संबन्धी सोमोऽभिषुतो भवति । अतः पौर्णमास्यां मासं पूरयित्वा पश्चात् Vअहः उत्सर्गे सति Vदेवानां संबन्धिना तेन [२७]पूर्वयागेन(ण) संयोजयितुमिमं Vयज्ञं यजमानाः [२८-]Vप्रत्यवरोहन्ति ॥

वीति ॥ यस्मिन् दिने कर्तव्यमहरुत्सृज्यते तस्मिन् दिने कर्तव्यमन्यद्विधत्ते - 'वि वा एतद्यज्ञं छिन्दन्ति यत् षडहसंततं॑ सन्तमथाहरुत्सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता देवताभिरेव यज्ञं॑ सं तन्वन्ति' इति ॥ षडहैरभिप्लवपृष्ठ्यरूपैः [-२८] [२९]सान्तत्येन वर्तमानं यज्ञमुपेत्य यद्यहरुत्सृजेयुरेतेन

२१-२१. मै२ - 'तदनु - - - - न' नास्ति । २२. मै. मै१. मै३. अ. अ१ - यावत् । २३. मै२ - देवानां यज्ञानाम् । २४. मै२ - यज्ञपार्श्वं प्रत्यवरोहन्ति ।

---

२६. अ. आ. क. पा. हा. इ. उ. वा. वै. म - 'हि' नास्ति । २७. अ. पा. हा. इ. उ. वा. वै - पूर्वयोगेन । २८-२८. मै - 'प्रत्यवरोहन्ति - - - - °पृष्ठरुपैः' नास्ति । २९. अ. क. पा. हा - सातत्येन ।

प्रजापतिः सर्वा देवता देवताभिरेव यज्ञ९ सं तन्वन्ति यन्ति वा एते सवनाद्येऽह(३)रुत्सृजन्ति तुरीयं खलु वा एतत् सवनं यत् सांनाय्यं यत् सांनाय्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतत्सोमपीथा ह्येतर्हि

प्रजापतिरिति प्रजा-पतिः । सर्वाः । देवताः । देवताभिः । एव । यज्ञम् । समिति । तन्वन्ति । यन्ति । वै । एते । सवनात् । ये । अहः (३) । उत्सृजन्तीत्युत्-सृजन्ति । तुरीयम् । खलु । वै । एतत् । सवनम् । यत् । सांनाय्यमिति सां-नाय्यम् । यत् । सांनाय्यमिति सां-नाय्यम् । भवति । तेन । एव । सवनात् । न । यन्ति । समुपहूयेति सम्-उपहूय । भक्षयन्ति । एतत्सोमपीथा इत्येतत्-सोमपीथाः । हि । एतर्हि ।

'वि वा एतत्' इत्यादि ॥ Vएतत् हि Vयज्ञं Vविच्छिन्दन्ति Vयत् Vषडहसन्ततं, षडहैरविच्छेदनेन सम्बद्धं सन्ततम् । "तृतीया कर्मणि" (पा ६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वम् । Vअथ अनन्तरभावि Vअहः Vउत्सृजन्ति यज्ञमहः उत्सर्गेण विच्छिन्दन्ति । अथ यच्चाहरुत्सृजन्ति । 'प्राजापत्यम्' इत्यादि । उत्सृष्टेऽह्नि Vसंतन्वन्ति अविच्छिन्नं कुर्वन्ति ॥

Vयज्ञं विच्छिन्दन्त्येव, तत्परिहाराय Vप्राजापत्यं Vपशुम् आलभेरन् । Vप्रजापतिः च [30]स्रष्टृत्वात् सर्वदेवतात्मकः । अतः Vदेवताभिः Vएव Vयज्ञं संततं कुर्वन्ति ॥

यन्तीति ॥ अथ तत्र कर्तव्यान्तरं विधत्ते - 'यन्ति वा एते सवनाद्येऽहरुत्सृजन्ति तुरीयं खलु वा एतत् सवनं यत् सांनाय्यं यत् सांनाय्यं भवति तेनैव सवनान्न यन्ति' इति ॥ Vये यजमानाः Vअहः Vउत्सृजन्ति [31]ते Vसवनात् अपगच्छन्ति । [32]प्रातःसवनादेरनुष्ठानाभावात् । तत्र क उपाय इति तदुच्यते - Vयत् सांनाय्यम् अस्ति, तत् [33]प्रातःसवनादिभ्यस्त्रिभ्योऽप्यतिरिक्तचतुर्थसवनस्थानीयम् । अतः सांनाय्येऽनुष्ठिते Vसवनात् Vन अपगच्छन्ति ॥

समुपहूयेति ॥ तस्य सांनाय्यशेषस्य सोमवदुपाह्वानपूर्वकं भक्षणं विधत्ते - 'समुपहूय भक्षयन्त्येतत् सोमपीथा ह्येतर्हि' इति ॥ उत्सृष्टेऽह्नि [34]मुख्यसोमाभावादेतस्मिन् काले यजमानाः Vएतत्सोमपीथाः एतदेव सांनाय्यशेषभक्षणं सोमपीथः सोमपानं येषां ते तादृशाः । तस्मात् सोमवत् [35]परस्परमभिज्ञाप्य भक्षयेयुः ॥

३०. शृ१. हा. पा - स्रष्टत्वात् । ३१. मै - तेन । ३२. शृ१. मै - °सवनाद्यनु° । ३३. क - °चतुर्थस्थानीयम् । ३४. शृ१ - मुख्यस्तोमाभा° । ३५. शृ१. मै - परस्परमनुज्ञाप्य ।

यथायतनं वा एतेषा॑ँ सवनभाजो॑ देवता॑ गच्छन्ति ये॑ऽहरुत्सृजन्त्य॑नुसवनं पु॑रोडाशान्निर्व॑पन्ति यथायतनादेव स॑वनभाजो॑ देवता अव॑ रुन्धतेऽष्टाक॑पालान् प्रातःसवन एका॑दशकपालान् माध्य॑न्दिने सव॑ने द्वाद॑शकपाला॑ँस्तृतीयसवने

यथायतनमिति॑ यथा-आयतनम् । वै । एतेषा॑म् । सवनभाज इति॑ सवन-भाज॑ः । देवता॑ः । गच्छन्ति । ये । अह॑ः । उत्सृजन्तीत्यु॑त्-सृजन्ति । अनुसवनमित्य॑नु-सवनम् । पुरोडाशा॑न् । निरिति॑ । वपन्ति । यथायतनादिति॑ यथा-आयतनात् । एव । सवनभाज इति॑ सवन-भाज॑ः । देवता॑ः । अवेति॑ । रुन्धते । अष्टाक॑पालानित्यष्टा-कपालान् । प्रातःसवन इति॑ प्रातः-सवने । एका॑दशकपालानित्येका॑दश-कपालान् । माध्य॑न्दिने । सव॑ने । द्वाद॑शकपाला॑निति द्वाद॑श-कपालान् । तृतीयसवन इति॑ तृतीय-सवने ।

'यन्ति वै' इत्यादि ॥ सन्नाय्यं भक्षयन्ति [V]समुपहूय असावुपह्वयस्वेति । [V]एतर्हि एतस्मिन्नह्नि एतदेव सोमपानमेषामिति । पिबतेरौणादिकः स्थक् प्रत्ययः । "इदमो र्हिल्" (पा ५.३.१६) इति हिल् प्रत्ययः, "एतेतौरथोः" (पा ५.३.४) इति एतादेशः । 'यथायतनम्' इत्यादि । इह [२५]कृत्याभावात् एतत् स्थानं हित्वा स्वंस्वं स्थानं [V]गच्छन्ति । गतमन्यत् ॥

यथायतनमिति ॥ पुनरपि [३६]कर्तव्यान्तरं विधत्ते - 'यथायतनं वा एतेषा॑ँ सवनभाजो देवता गच्छन्ति येऽहरुत्सृजन्त्यनुसवनं पुरोडाशान्निर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्धते' इति ॥ [३७-][V]ये यजमानाः [V]अहः [V]उत्सृजन्ति [V]एतेषां संबन्धिन्यः [V]सवनभाजः [V]देवताः सवनाभावान्निराशा सत्यः स्वस्वस्थानं गच्छन्ति । अतस्तन्मा भूदिति तत्तत् सवनस्थाने [V]पुरोडाशान् निर्वपेयुः । तेन [३८]तत्तत्स्थानात् [३९]तास्ताः [V]देवताः [४०]प्राप्नुवन्ति ॥

अष्टाकपालानिति ॥ तेषु पुरोडाशेषु विशेषं विधत्ते - 'अष्टाकपालान् प्रातःसवन एकादशकपालान् माध्यंदिने सवने द्वादशकपाला॑ँस्तृतीयसवने छन्दा॑ँस्येवाऽऽप्त्वाऽव रुन्धते' इति [-३७] ॥ अष्टत्वादिसंख्यासाम्याद्गायत्र्यादिछन्दःप्राप्तिः ॥

---

२५. अ - कृत्याः पातः, अ१ - कृत्या पादे ।

---

३६. शृ१ - पक्षान्तरम् । ३७-३७. उ - 'ये यज॰ - - - - इति' नास्ति । ३८. शृ१ - तत्स्थानात् । ३९. शृ१. मै - ताः । ४०. मै - प्राप्नोति ।

छन्दां॑ऽस्येवाऽऽप्त्वा(४)ऽवं रुन्धते वैश्वदे॒वं च॒रुं तृ॒तीयसव॒ने निर्वपन्ति वैश्वदे॒वं वै तृ॒तीयसव॒नं तेनै॒व तृ॒तीयसव॒नान्न यन्ति ॥६॥

(उ॒दच॒न्त्युद्येऽहरा॒प्त्वा पञ्चदश च ।)

छन्दां॑ऽसि । ए॒व(४) । आ॒प्त्वा । अवेति॑ । रु॒न्धते । वैश्वदे॒वमिति॑ वैश्व-दे॒वम् । च॒रुम् । तृ॒तीयसव॒न इति॑ तृ॒तीय-स॒व॒ने । निरिति॑ । व॒पन्ति । वैश्वदे॒वमिति॑ वैश्व-दे॒वम् । वै । तृ॒तीयसव॒नमिति॑ तृ॒तीय-स॒व॒नम् । तेन॑ । ए॒व । तृ॒तीयसव॒नादिति॑ तृ॒तीय-स॒व॒नात् । न । य॒न्ति । ॥६॥

[कासं - - - -; कपिसं - - - -; मैसं - - - -; शब्रा - - - -]

‘ अनुसवनम् ’ इत्यादि ॥ सवनेसवने सर्वस्मिन् सवने [२६]कालक्रमेण [V]पुरोडाशान् तत्तत्सवनोक्तान् निर्वपन्ति । वीप्सायां “ यथास्वे यथायथम् ” (पा ८.१.१४) इत्यनोरव्ययीभावः । ‘ यथायतनादेव ’ इति । स्वात्स्वात् [V]आयतनात् [V]देवताः [V]अवरुन्धते । “ यथाऽसादृश्ये ” (पा २.१.७) इत्यव्ययीभावः । ‘ अष्टाकपालान् ’ इत्यादि । [V]प्रातःसवने प्रातःसवनकाले । एवं सर्वत्र । ‘ छन्दांस्येव ’ इत्यादि । अष्टत्वादिकया गायत्र्यादीनां संख्यया गायत्र्यादीनि [V]छन्दांसि [V]आप्त्वा सवनं यज्ञम् [V]अवरुन्धते ॥

‘ वैश्वदेवम् ’ इत्यादि ॥ तृतीयसवनकाले निर्वपणात् तृतीयसवनानपगमः ॥

॥ इति सप्तमे पञ्चमे षष्ठोऽनुवाकः ॥

वैश्वदेवमिति ॥ पुनरपि कर्तव्यान्तरं विधत्ते - ‘ वैश्वदेवं चरुं तृतीयसवने निर्वपन्ति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति ’ इति ॥ तृतीयसवनस्य वैश्वदेवत्वमन्यत्र [४१]स्पष्टम् आम्नातम् - “ यद्वसूनां प्रातःसवनꣳ रुद्राणां माध्यन्दिनꣳ सवनं विश्वेषां देवानां तृतीयसवनम् ” (तैब्रा १.५.११) इति । अतो वैश्वदेवचरुणा [V]तृतीयसवनात् [V]न अपगच्छन्ति ॥

[४२]- इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः[४२] ॥

२६. अ - कालातिक्रमेण ।

४१. क - ‘ स्पष्टम् ’ नास्ति । ४२-४२. मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ।

उत्सृज्यां३ नोत्सृज्या३मिति मीमाꣳसन्ते ब्रह्मवादिनस्तद्वाहुरुत्सृज्यमेवेत्यमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि यज्ञं

उत्सृज्या३मित्युत्-सृज्या३म् । न । उत्सृज्या३मित्युत्-सृज्या३म् । इति । मीमाꣳसन्ते । ब्रह्मवादिन इति ब्रह्म-वादिनः । तत् । उ । आहुः । उत्सृज्यमित्युत्-सृज्यम् । एव । इति । अमावास्यायामित्यमा-वास्यायाम् । च । पौर्णमास्यामिति पौर्ण-मास्याम् । च । उत्सृज्यमित्युत्-सृज्यम् । इति । आहुः । एते इति । हि । यज्ञम् ।

उक्तमहरुत्स्रष्टव्यमिति ॥ तदिदानीं विचारपूर्वं निर्णेतुमारभते— ' उत्सृज्या३म् ' [१]इत्यादि ॥ [२]किम् उत्सृज्यम् [३]उत्स्रष्टव्यमहः उत Vन इति विचारयन्ति Vब्रह्मवादिनः । " ऋदुपधाच्च०" (पा ३.१.११०) इति क्यप्प्रत्ययः । " विचार्यमाणानाम् " (पा ८.२.९७) इत्युदात्तः प्लुतः, तस्यासिद्धत्वात् कृदुत्तरपदप्रकृतिस्वरत्वं च निवर्तते । " मान्बध०" (पा ३.१.६) इत्यादिना मानेर्जिज्ञासायां सन् प्रत्ययः । ' तद्वाहुः ' इत्यादि । तत्र च Vआहुः ब्रह्मवादिनोऽन्ये वा यज्ञविदः Vउत्सृज्यम् Vएव नेदं विचार्यम् इति । [४]अथोत्सर्गकाला उच्यन्ते — ' अमावास्यायां च ' इत्यादि । हेतुमाह — ' एते हि ' इति । Vयज्ञं कर्मान्तरं दर्शपूर्णमासात्मकं Vएते दर्शपूर्णमासे

षष्ठेऽनुवाकेऽहरुत्सर्ग उक्तः । सप्तमे तत्रैव विशेषोऽभिधीयते ॥

उत्सृज्यामिति ॥ तत्र निर्णयाय कंचिद्विचारं दर्शयति - 'उत्सृज्यां३नोत्सृज्या३मिति मीमाꣳसन्ते ब्रह्मवादिनस्तद्वाहुरुत्सृज्यमेवेति ' इति ॥ उत्सर्गपक्षे यज्ञविच्छेदः, अनुत्सर्गपक्षे श्वासनिरोध इति दोषद्वयं मनसि निधाय Vब्रह्मवादिनः विचारयन्ति । प्लुतिर्विचारार्था । तत्राभिज्ञाः प्राजापत्यपश्वादिभिर्विच्छेदस्य समाधातुं शक्यत्वाच्छ्वासनिरोधपरिहारायोत्सर्जनपक्षमेवात्र निश्चितवन्तः ॥

अमावास्यायामिति ॥ [१-] तमेव दिनविशेषं [-१] [२]दर्शयति - ' अमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि यज्ञं वहत [३]इति ' इति ॥ एतयोरमावास्यापौर्णमास्योर्यज्ञवाहित्वं प्रसिद्धम् । तथा चान्यत्र स्पष्टमाम्नायते - " ते अब्रूतां वरं वृणामहा [४]आवं देवानां भागधे असाव " (तैसं २.५.७) इति । अतस्तयोस्तिथ्योर्यदहर्[५]यदहः प्राप्तं तदुत्सृज्यमित्येषां निर्णयः ॥

---

१. अ - इति । २. अ१ - ' किम् ' नास्ति । ३. मै. मै१. मै३ - समुत्सृष्टव्यम् । ४. अ१ - अथोत्सर्जनकालाः ।

१-१. पा. हा. इ. वा -तमेव दिनविशेषे, शृ१, म - त एव दिनविशेषम् । २. शृ१ - निश्चिन्वन्ति । ३. मै - ' इति ' नास्ति । ४. मै - आवाम् । ५. शृ१. क. मै - ' यदहः ' नास्ति ।

अहरुत्सर्गे विशेषः]

वहत इति ते त्वाव नोत्सृज्ये इत्याहुर्ये अवान्तरं यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष वै मासो विशर इति

वहतः । इति । ते । तु । वाव । न । उत्सृज्ये इत्युत्-सृज्ये । इति । आहुः । ये इति । अवान्तरमित्यव-अन्तरम् । यज्ञम् । भेजाते इति । इति । या । प्रथमा । व्यष्टकेति वि-अष्टका । तस्याम् । उत्सृज्यमित्युत्-सृज्यम् । इति । आहुः । एषः । वै । मासः । विशर इति वि-शरः । इति ।

सर्वदा [V]वहतः तस्मादुत्स्रष्टव्या(?) नयोः न यज्ञकालः स्यादिति । किं च तदाधारत्वात् सर्वकर्मणां [५]ताभ्यां तेषां मिश्रणं च [६]प्रयोजनमिति ॥

किं सर्वदैव तयोरुत्सृज्यमित्याह — 'ते त्वाव' इति ॥ संहितायां [७]तोरन्त्यलोपः । तुशब्दो व्यावृत्तौ । [V]ते [V]तु अमावास्यापौर्णमास्यौ [V]नोत्सृज्ये नोत्स्रष्टव्ये तयोरिति यज्ञविद आहुः । अधिकरणे कृत्यः । नेत्युक्तं, के [८]ते इत्याह — [V]ये [V]अवान्तरम् [९]अभ्यन्तरं [V]यज्ञं [V]भेजाते अन्तः प्रविश्याङ्गभावेन यज्ञं [१०]भजेते धारयतः । छान्दसो लिट् । तत्र नोत्स्रष्टव्यमहः [११]अस्ति । अन्यथा एते [१२]अवेक्ष्यमाणस्य [१३]यज्ञस्याभाव एव स्यात् । [१४]या प्रथमा[१४] इत्यादि । [V]या [V]प्रथमा कृष्णाष्टमी व्यष्टकाख्या

त इति ॥ अथान्येषां पक्षमाह - 'ते त्वाव नोत्सृज्ये इत्याहुर्ये अवान्तरं यज्ञं भेजाते इति' इति ॥ [V]ये पौर्णमास्यमावास्ये [V]अवान्तरं [V]यज्ञं [V]भेजाते [V]ते सर्वथैव [V]न [६][V]उत्सृज्ये । न केवलमेते प्रकृतिरूपं दर्शपूर्णमासकर्मैव निष्पादयतः, किं त्वयनादिगतम् [V]अवान्तरं कर्मापि । तस्मात् तयोरुत्सर्गो न युक्त इति ॥

येति ॥ तर्हि कस्मिन् दिनेऽहरुत्सर्ग इत्याशङ्क्य तेषां वचनं दर्शयति - 'या प्रथमा व्यष्टका तस्यामुसृज्यमित्याहुरेष वै मासो विशर इति' इति ॥ व्यष्टकाशब्देन कृष्णप्रतिपदुच्यते, राजसूयप्रकरणे व्युष्टिद्विरात्रे पौर्णमास्या सह निर्देशात् । तथा चाऽऽम्नायते - "पौर्णमास्यां पूर्वमहर्भवति । [७]व्यष्टकायामुत्तरम्"

५. मै२ - 'ताभ्याम्' नास्ति । ६. अ१ - प्रयोगमिति । ७. [अस्माभिः शुद्धीकृत्योत्प्रेक्षितः पाठो द्रष्टव्यः, मै - मुद्रितपुस्तके सर्वेष्वपि लिखितपुस्तकेषु 'वाशब्दस्य लोपः' इति पाठ उपलभ्यते ।] । ८. अ. अ१ - 'ते' नास्ति । ९. अ - 'अभ्यन्तरम्' नास्ति । १०. अ. अ१ - भजाते । ११. अ - इति । १२. अ. अ१ - अपेक्षमाणस्य । १३. मै. मै१. मै२. मै३ - तस्य यज्ञस्याभावः, अ - भावः । १४-१४. अ - 'या प्रथमा' नास्ति ।

६. शृ१ - उत्सृजे । ७. मै - व्यष्टकायान्तरम् ।

ना॒ऽऽदि॑ष्ट॒(१)मुत्सृं॑जेयु॒र्यदादि॑ष्टमु॒त्सृ॒जेयुं॑र्या॒दृशे॒

न । आदि॑ष्ट॒मित्या-दि॒ष्टम् (१) । उदिति॑ । सृ॒जे॒युः॒ । यत् । आदि॑ष्ट॒मित्या-दि॒ष्टम् । उ॒त्सृ॒जे॒यु॒रित्यु॑त्-सृ॒जेयुः॑ । या॒दृशे॑ ।

[V]तस्याम् [V]उत्सृज्यम् [V]इति [V]आहुः (तैसं ७.४.८)। हेतुं चाहुः – मासस्यास्य [V]एषः [V]विशरः विशरणस्थानमियं व्यष्टकेति । [१५]शीतातिप्रवृत्त्या विनष्ट इव [V]मासः अत्र भवतीति ॥

'नाऽऽदिष्टम्' इति । [V]न नियमेनोत्सृष्टमपि [V]उत्सृजेयुः । यत्र क्वचिदुत्सृष्टं न पुनस्तत्रोत्सृजेयुः । प्रथमग्रहणादेव सिद्धे वचनं क्वचिदन्यत्र विधानार्थम् । तदेवाह [१६-]'यद्' इति [-१६] । [V]यादृशे दिवसे [V]आदिष्टम् [V]उत्सृजेयुः [१७-] यद्युत्सर्गः प्रयुज्येत तदादिष्टमुत्सृजेयुः । कीदृश इत्याह –– 'यादृशे' इत्यादि । पुनः [V]पर्याप्लावे पर्यावृत्तौ [१८]वर्तमानायां [V]मध्ये [V]षडहस्य [V]यादृशे दिवसे अष्टमी संपद्यते यदि तादृशे पूर्वमुत्सृष्टं न पुनरुत्सृजेयुः [-१७] । [१९]अतादृशत्वे

(तैब्रा १.८.१०) इति । [V]तस्यां व्यष्टकायां यत् प्राप्तमहस्तत् [V]उत्सृज्यम् । [V]एषः दिनविशेषः [V]विशरः विशीर्णो मासः । [८]पौर्णमास्यामेव पूर्वमासस्य समाप्तत्वात् । अतो मासविच्छेदाभावादत्र युक्त उत्सर्गः । [९]तस्याश्च व्यष्टकायाः प्राथम्यं कृष्णप्रतिपदादित्वादुपपद्यते ॥

नादिष्टमिति ॥ क्वचिदुत्सर्गमपवदति - 'नाऽऽदिष्टमुत्सृजेयुः' इति ॥ विषुवान् महाव्रतमिति [१०-]नामग्रहणपुरःसरं विशेषाकारेण [-१०] यदुच्यते तदादिष्टम् । तत् न उत्स्रष्टव्यम् । यत्तु षडहादिद्वारा सामान्यतः प्राप्तं तदेवोत्स्रष्टव्यम् । यद्वा-अनुत्सर्गपक्षम् 'एष वै मासः' इत्यादिना स्वीकरोति । योयमुत्सर्गः स [११]एष विशरो मासो भवति । अहरुत्सर्गे सति माससंपूर्तेरभावान्मासस्य विशीर्णत्वम् । इतिशब्दो हेत्वर्थः । [१२]यस्मान्मासवैकल्यं प्राप्नोति तस्मात् [V]आदिष्टं शास्त्रेणोपदिष्टमहरेकमपि [V]न [V]उसृजेयुः इति पक्षान्तरस्वीकारः । अत एव सूत्रकारः पक्षद्वयस्वीकारमुपन्यस्योत्सर्गपक्षेऽनुष्ठेयविशेषमुदाजहार - "उत्सृज्यां३ नोत्सृज्या३मित्युक्तं यद्यहान्युत्सृजेयुः प्रथमं पक्षं संस्थाप्य" (आपश्रौ २१.२४.२३) इत्यादिना ॥

यदादिष्टमिति ॥ तमिमं विशेषं वक्तुमत्राप्युत्सर्गं पाक्षिकं पुनर्विशदयति - 'यदादिष्टमुत्सृजेयुर्यादृशे

१५. मैर - शीतादिप्रकृत्या । १६-१६. अ - यदिति यादृश इति, अ१ - यादृश इति । १७-१७. अ१ - 'यद्युत्सर्गः - - - - पुनरुत्सृजेयुः' नास्ति । १८. अ१ - वर्तमानानाम् । १९. अ१ - तादृशे ।

८. मै - °मास्येव । ९. अ. आ. क. पा. हा. इ. उ. बा. वै. म - तस्यास्तु । १०-१०. मै - नामग्रहणं पुनः समं विशेषाकारेण । ११. हा - एव । १२. मै - °वैकल्पम् ।

अहरुत्सर्गे विशेषः]

पुनः पर्याप्लावे मध्ये षडहस्य संपद्येत षडहैर्मासान्त्संपाद्य यत्
सप्तममहस्तस्मिन्नुत्सृजेयुस्तदग्नये

पुनः । पर्याप्लाव इति परि-आप्लावे । मध्ये । षडहस्येति षट्-अहस्य । संपद्येतेति
सं-पद्येत । षडहैरिति षट्-अहैः । मासान् । संपाद्येति सं-पाद्य ।
यत् । सप्तमम् । अहः । तस्मिन् । उदिति ।
सृजेयुः । तत् । अग्नये ।

द्वितीयादावप्युत्सृजेयुरिति । अत्र हि [२०]सावनेन सत्रं प्रवर्तते [२१]चान्द्रमानेन [२२]- तिथिरिति वैषम्यात् -[२२] कदाचित्तादृशत्वमपि स्यादिति । [२३]आदिष्टम् इत्यादेशः निवर्तते [२४]- स्थानी स्यादिति तुल्यत्वादुत्सृष्टमहरित्युच्यते -[२४] । स्थानी ह्यस्य [२५]क्वचिदादेशेन निवर्तितो न तत्र पुनर्निवर्त्यते, विषयान्तरे तु निवर्त्यत इति ॥

‘ षडहैः ’ इत्यादि । [V]षडहैः पञ्चभिः पञ्च [V]मासान् [V]संपाद्य [V]यत् [V]सप्तमं पञ्चमषडहानन्तरभावि [V]अहः [V]तस्मिन् [V]उत्सृजेयुः क्रमप्राप्तं [२६]कर्म । ‘ तदग्नये ’ इत्यादि । [२७]तस्मिन् उत्सृष्टेऽह्नि आग्नेयादीनि [V]निर्वपेयुः –– ‘ अग्नेर्वै ’ इत्यादि । [२८]प्रातःसवने देवतां वसुमन्तमग्निं पुरोडाशेन भागवतीं कुर्वन्ति नोत्सृष्टा अप्यन्तरिता भवन्ति । अष्टत्वसङ्ख्यया

पुनः पर्याप्लावे मध्ये षडहस्य संपद्येत षडहैर्मासान्त्संपाद्य यत् सप्तममहस्तस्मिन्नुत्सृजेयुः ’ इति ॥ यदि शास्त्रोपदिष्टस्याप्युत्सर्गापेक्षा तदानीमपि [V]यादृशे यादृशमहर्ज्योतिरादिकं [V]पुनः पुनः पर्यावर्तमाने [V]षडहस्य [V]मध्ये [१३]संपद्येत, [१४]तादृशमेवोत्सृजेत् । [१५]- न तु -[१५] प्रतिपदोक्तं विषुवदादिकमित्यध्याहरणीयम् । तस्मादभिप्लवपृष्ठ्याख्यैः [V]षडहैः मासं पूरयित्वा पृष्ठ्यषडहादूर्ध्वभावि [V]यत् [V]सप्तमम् [V]अहः [V]तस्मिन् [१६]अहनि प्राप्तं ज्योतिर्यागमुत्सृजेत् ॥

तदग्नय इति ॥ इत्थमुत्सर्गं विशदीकृत्य तत्रानुष्ठेयं विशेषं विशदयति - ‘ तदग्नये वसुमते

२०. मै२. अ१ - सावने । २१. मै२ - चान्द्रमसे, अ१ - चान्द्रमसेन । २२-२२. मै२ - तिथिवैशम्यात् । २३. मै२ - मासिष्टन् । २४-२४. मै२ - सोऽपि तुल्यत्वादुत्सृष्टमहरित्युच्यते, मै तलटिप्पण्याम् - भूयिष्ठमित्यादेशनिवर्तितस्यापि तुल्यत्वादुत्सृष्टमहरुच्यते । २५. अ - क्वचिदादेशः । २६. अ१ - क्रमम् । २७. अ - अस्मिन् , अ१ - यस्मिन् , मै - तलटिप्पण्याम् - कस्मिन् । २८. अ१ - प्रातःसवनं तम् ।

१३. अ. आ. क. पा. हा. इ. उ. वा. वै. म - संपद्यते । १४. वा - °मुत्सृजेत । १५-१५. वा - ननु । १६. मै - अह्नि ।

वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालमग्नेर्वै वसुमतः प्रातःसवनं यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति (२) सवनमष्टाभिरुपयन्ति

वसुमत इति वसु-मते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निरिति । वपेयुः । ऐन्द्रम् । दधि । इन्द्राय । मरुत्वते । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । वैश्वदेवमिति वैश्व-देवम् । द्वादशकपालमिति द्वादश-कपालम् । अग्नेः । वै । वसुमत इति वसु-मतः । प्रातःसवनमिति प्रातः-सवनम् । यत् । अग्नये । वसुमत इति वसु-मते । पुरोडाशम् । अष्टाकपालमित्यष्टा-कपालम् । निर्वपन्तीति निः-वपन्ति । देवताम् । एव । तत् । भागिनीम् । कुर्वन्ति (२) । सवनम् । अष्टाभिः । उपेति । यन्ति ।

[29-] च गायत्रं [-29] Vप्रातःसवनम् [30]उपगच्छन्ति । नोत्सृष्टं भवति । एवमुत्तरत्र द्रष्टव्यम् ।

पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालम्' इति ॥ [17]Vतत् तस्मिन्नुत्सर्गदिने चत्वारि हवींषि Vनिर्वपेयुः ॥

अग्नेरिति ॥ तत्र प्रथमं हविः प्रशंसति - [18-] 'अग्नेर्वै वसुमतः प्रातःसवनं [-18] यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भगिनीं कुर्वन्ति सवनमष्टाभिरुप यन्ति' इति ॥ देवतां वसुमन्तमग्निं कपालगताष्टत्वसंख्यया गायत्रीद्वारा सवनप्राप्तिः ॥

यदैन्द्रमिति ॥ द्वितीयं हविः प्रशंसति - 'यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्ति' इति ॥

इन्दस्येति ॥ अथ तृतीयं हविः प्रशंसति - 'इन्द्रस्य वै मरुत्वतो माध्यंदिनꣳ सवनं यदिन्द्राय

२९-२९. अ१ - 'च गायत्रम्' नास्ति । ३०. मै - उपगच्छन्ति । (ततश्च उत्सृष्टं चानुत्सृष्टं च तदहर्भवति । एतदित्यादि । एतद्धि यज्ञं विच्छिन्दन्ति यत् षडहसन्ततं षडहैरविच्छेदेन सम्बद्धं सन्ततम् । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । अथानन्तरभावि अहरुत्सृजन्ति यज्ञमहरुत्सर्गेण विच्छिन्दन्ति । अथ यच्चाहरुत्सृजन्तीति । प्राजापत्यमित्यादि । उत्सृष्टेऽह्नि सन्तन्वन्ति अविच्छिन्नं कुर्वते) । [विहायैकं कोशमन्यत्र सर्वेषु कोशेष्वयमंशः नोपलभ्यते । मै - मुद्रितपुस्तके कुण्डलनिर्देशेनायं भागः स्वीकृतः । परमस्माभिः सोंऽशः प्रकृतेऽसंबन्धात् परित्यक्तो द्रष्टव्यः ।] ।

---

१७. शृ१. मै - 'तत्' नास्ति । १८-१८. मै - 'अग्ने° ---- °सवनम्' नास्ति ।

अहरुत्सर्गे विशेषः]

यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्तीन्द्रस्य वै मरुत्वतो माध्यन्दिनꣳ सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभिरुप यन्ति विश्वेषां वै देवानामृभुमतां तृतीयसवनं

यत् । ऐन्द्रम् । दधि । भवति । इन्द्रम् । एव । तत् । भागधेयादिति भाग-धेयात् । न । च्यावयन्ति । इन्द्रस्य । वै । मरुत्वतः । माध्यन्दिनम् । सवनम् । यत् । इन्द्राय । मरुत्वते । पुरोडाशम् । एकादशकपालमित्येकादश-कपालम् । निर्वपन्तीति निः-वपन्ति । देवताम् । एव । तत् । भागिनीम् । कुर्वन्ति । सवनम् । एकादशभिरित्येकादश-भिः । उपेति । यन्ति । विश्वेषाम् । वै । देवानाम् । ऋभुमतामित्यृभु-मताम् । तृतीयसवनमिति तृतीय-सवनम् ।

" ह्रस्वनुड्भ्याम् " (पा ६.१.१७६) [31-] इत्युदात्तः [32]मतुपो [-31] व्यत्ययेन भवति (द्र.पा. ६.१.१७७) ॥

मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभिरुप यन्ति ' इति ॥ यथा वसुमानग्निः प्रातःसवनस्य स्वामी तथा मरुत्वानिन्द्रो माध्यंदिनस्य सवनस्य स्वामी । वसुमतोऽग्नेस्तत्स्वामित्वं श्रुत्यन्तरद्वयादवगन्तव्यम् - " तꣳ स्तुतं देवतास्त्रेधा व्यगृह्णत, [19]अग्निः प्रातःसवनम् , इन्द्रो माध्यन्दिनꣳ सवनं, विश्वे देवास्तृतीयसवनम् " (तैआ ८.१) इत्येका श्रुतिः । " यद्वसूनां प्रातःसवनम् " (तैब्रा १.५.११) इत्यपरा श्रुतिः । यस्त्विन्द्रो माध्यन्दिनसवनस्वामी स तु मरुत्वान् । " इन्द्र मरुत्व इह पाहि सोमम् " (तैसं १.४.१८) इति श्रुत्यन्तरात् । तत्राग्नेर्यथा प्रथमेन हविषा [20]भागित्वमेवमिन्द्रस्याप्यनेन [21]हविषा भागित्वम् । कपालगतैकादशसंख्यया त्रिष्टुब्द्वारा सवनप्राप्तिः ॥

विश्वेषामिति ॥ अथ चतुर्थं हविः प्रशंसति - ' विश्वेषां वै देवानामृभुमतां तृतीयसवनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्भागिनीः कुर्वन्ति सवनं द्वादशभिरुप यन्ति ' इति ॥ [V]विश्वेषां [V]देवानां तृतीयसवनस्वामित्वं पुरोदाहृतम् । [22]ऋभुमत्वमप्यृभूणां [23]तृतीयसवनदेवतात्वादवगन्तव्यम् । तच्च तृतीयस्य

३१-३१. अ१ - मतुबुदातः वसुभ्यः, मै२ - इति मतुप उदात्तत्वम् । मै. मै१. मै३. अ - इत्युदात्तः वसुभ्यः । ३२. लिपिसाधर्म्यादस्माभिः संशोधितोऽयं पाठो द्रष्टव्यः, मै मुद्रितपुस्तके प्रायः सर्वेष्वपि लिखितपुस्तकेषु च ' वसुभ्यः ' इति पाठ उपलभ्यते ।] ।

१९. मै - अग्निम् । २०. वा - भावित्वमेव° । २१. मै - ' हविषा ' नास्ति । २२. मै - ऋभुमन्तमप्यृ° । २३. अ. आ. हा. इ. उ. वा. वै. म. मै - °देवत्वादवग°, शृ१ - °सवनं देवत्वादव° ।

यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्भागिनीः कुर्वन्ति सवनं द्वादशभि(३)रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापतिर्यज्ञस्याननुसर्गायाभिवर्त

यत् । वैश्वदेवमिति वैश्व-देवम् । द्वादशकपालमिति द्वादश-कपालम् । निर्वपन्तीति निः-वपन्ति । देवताः । एव । तत् । भागिनीः । कुर्वन्ति । सवनम् । द्वादशभिरिति द्वादश-भिः (३) । उपेति । यन्ति । प्राजापत्यमिति प्राजा-पत्यम् । पशुम् । एति । लभन्ते । यज्ञः । वै । प्रजापतिरिति प्रजा-पतिः । यज्ञस्य । अननुसर्गायेत्यननु-सर्गाय । अभिवर्त इत्यभि-वर्तः ।

'प्राजापत्यम्' [३३]इत्यादि ।। तस्मिन्नेवाह्नि उक्तस्य द्विर्वचनं पुरोडाशा मा बाधिषतेति । [३४]Vअननुसर्गाय अनुत्सर्गाय [३५-] प्राजापत्यः पशुः[-३५] ।।

[३६]'अभिवर्तः' इति ।। पूर्वस्मिन् पक्षसि Vइतः इमं प्रथममारभ्य इतो वा [३७]यतः षण्मासः Vअभिवर्तः Vब्रह्मसामं Vभवति । [३८]व्यत्ययेन ल्यब्लोपे पञ्चमी । [३९-]'ब्रह्म वै' इत्यादि । स्वर्गं

सवनस्य "ऋभुमतो विभुमत" इत्यादिमन्त्रादवगम्यते । ताश्च देवता अनेन हविषा [२४]भागिन्यः । कपालगतद्वादशसंख्यया जगतीद्वारा सवनप्राप्तिः ।।

प्राजापत्यमिति ।। अथ [२५]पूर्वानुवाकोक्तं प्राजापत्यं प्रशंसति - 'प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्राजापतिर्यज्ञस्याननुसर्गाय' इति ।। यज्ञस्य प्रजापतिसृष्टत्वात् तद्रूपत्वम् । अननुसर्गोऽपरित्यागः । उत्सृष्टेऽप्यहनि प्राजापत्येन यज्ञोऽपरित्यक्तो भवति ।।

अभिवर्त इति ।। अथ पूर्वस्मिन् पक्षसि ब्रह्मसाम विधत्ते - 'अभिवर्त इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तत् सुवर्गं लोकमभिवर्तयन्तो यन्ति [२६-] प्रतिकूलमिव हीतः सुवर्गो लोकः [-२६] इति ।। [२७]गवामयनविकृतित्वादस्याप्युत्सर्गिणामयनस्य द्वे पक्षसी । तत्र प्रथमेन पक्षसा

---

३३. मै२ - इति । ३४. मै२. अ१ - 'अननुसर्गाय' नास्ति । ३५-३५. अ१ - उत्सर्गयवेति प्राजापहुः (?) । ३६. अ१ - अभिवर्तते । ३७. मै२ - यताम् । ३८. मै - (व्यत्यये) मै१. मै२. मै३ - 'व्यत्ययेन' नास्ति । ३९-३९. अ१ - ब्रह्म वा अभिवर्त ब्रह्मणेन आभिमुख्येन ।

---

२४. मै - रागिन्यः । २५. मै - °वाकोक्ताम् । २६-२६. इ. उ. वा. वै. शृ१. मै - 'प्रतिकूल' - - - - लोकः नास्ति । २७. शृ१. मै - गवामयने विकृति° ।

इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तत् सुवर्गं लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

इतः । षट् । मासः । ब्रह्मसाममिति ब्रह्म-सामम् । भवति । ब्रह्म । वै । अभिवर्त इत्यभि-वर्तः । ब्रह्मणा । एव । तत् । सुवर्गमिति सुवः-गम् । लोकम् । अभिवर्तयन्त इत्यभि-वर्तयन्तः । यन्ति । प्रतिकूलमिति प्रति-कूलम् । इव । हि । इतः । सुवर्ग इति सुवः-गः । लोकः । इन्द्र । क्रतुम् । नः । एति । भर । पिता । पुत्रेभ्यः । यथा ।

[V]लोकं [४०-V]ब्रह्मणा [V]एव [-४०] आभिमुख्येन [-३९] वर्तयन्तो गच्छन्ति स्वर्गमेव प्रतिपद्यन्ते । 'प्रतिकूलम्' इति । [V]इतः इमं [४१]मनुष्यलोकमेवापेक्ष्य [V]प्रतिकूलं [४२]प्रतिरूपम् [V]इव [४३-V]हि स्वर्गः [V]लोकः [-४३] वर्ततेः अधोमुखत्वादित्येके । मृत्वा [४४-] तत्र गमनादित्यन्ये [-४४] ॥

'इन्द्र क्रतुम्' इत्यादि ॥ [V]अमुतः अमुं द्यामारभ्य [V]आयतां पर्यावृत्तानां [V]षण्मासः [V]ब्रह्मसामं [V]भवति 'इन्द्र क्रतुम्' इति मन्त्रेण । इयं च [४५]पथ्याबृहती, तृतीयस्य पादस्य द्वादशाक्षरत्वात् । अर्थस्तु हे [V]इन्द्र, [V]क्रतुं प्रज्ञां कर्म वा तद्विषयं [४६]कर्मैव वा [V]नः अस्मभ्यं [V]आभर [४७]आहर । "हृग्रहोर्भः°" (पा ३.१.८४ वा) । [४८][V]यथा [V]पिता [V]पुत्रेभ्यः आहरति ।

स्वर्गप्राप्तिः । द्वितीयेन पक्षसा पुनर्भूलोकप्राप्तिः । एवं व्यवस्थायां सत्याम् [V]इतः भूलोकान्निर्गत्य [२८]स्वर्गं [२९]गच्छतां यजमानानामानुकूल्येन पूर्वे पक्षसि षडपि मासान्नैरन्तर्येण प्रतिदिनमभिवर्ताख्यं [V]ब्रह्मसामं भवेत् । तथासत्यभिवर्तसाम्नो [३०]ब्रह्मरूपत्वाद्ब्रह्मसामर्थ्येन [३१]एव स्वर्गाभिमुख्यं गच्छन्तः स्वर्गं प्राप्नुवन्ति ॥

इन्द्र इति ॥ अथोत्तरस्मिन् पक्षस्यन्यद्ब्रह्मसाम विधत्ते - 'इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा नो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीत्यमुत आयता९ षण्मासो ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति' इति ॥ अमुतः [३२]स्वर्गलोकादायतां

४०-४०. मै२ - 'ब्रह्मणा एव' नास्ति । ४१. मै. मै१. मै२. मै३. अ - मनुष्यलोकमपेक्ष्य । ४२. मै. मै१. मै३. अ. अ१ - प्रतिकूलम् । ४३-४३. मै२ - स्वर्गं लोके । ४४-४४. मै२ - तद्गमनादित्यन्ये । ४५. अ - वीर्या ब्रह्मवती । ४६. अ१ - कर्म । ४७. मै२ - 'आहर' नास्ति । ४८. मै२ - तथा ।

---

२८. इ. उ. वै. शृ१ - स्वर्गे । २९. शृ१ - गच्छन्ताम् । ३०. शृ१. मै - ब्रह्मस्वरूपत्वा° । ३१. अ. आ. क. पा. हा. इ. उ. वा. वै. म - च ।

शिक्षा नो अस्मिन् पुरुहूत यामनि जीवा
ज्योतिरशीमहीत्य(४)मुतं आयता९
षण्मासो ब्रह्मसामं भवत्ययं वै
लोको ज्योतिः प्रजा

शिक्ष । नः । अस्मिन् । पुरुहूतेति पुरु-हूत । यामनि । जीवाः । ज्योतिः ।
अशीमहि । इति (४) । अमुतः । आयतामित्या-यताम् ।
षट् । मासः । ब्रह्मसाममिति ब्रह्म-सामम् ।
भवति । अयम् । वै । लोकः ।
ज्योतिः । प्रजेति प्र-जा ।

किञ्च - [V]नः अस्मान् [V]अस्मिन् [V]यामनि यज्ञे [V]शिक्ष शक्तान् कुरु । " द्व्यचोऽतस्तिङः " (पा ६.३.१३५) इति दीर्घः । हे [V]पुरुहूत, त्वत्प्रसादात् वयं [V]जीवाः जीवन्तः ज्योतिष्मन्तं मनुष्यलोकम् [V]अशीमहि [४९]प्राप्नुयामः । अश्नोतेः शपो लुक् ॥

भूलोकं प्रत्यागच्छतां यजमानानामानुकूल्येनोत्तरस्मिन् पक्षसि षडपि मासान्नैरन्तर्येण प्रतिदिनम् " इन्द्र क्रतुं न [३३]आभर " (ऋ ७.३२.२६, साम १४५६) इत्यस्यामृचि यदुत्पन्नं तत् [V]ब्रह्मसामं भवेत् । तस्या ऋचोऽयमर्थः - हे [V]इन्द्र [V]नः [३४]अस्मदर्थमिमं [V]क्रतुम् आहर । तत्र दृष्टान्तः [V]यथा लोके [V]पिता [V]पुत्रेभ्यः [३५]अभीष्टमाहृत्य प्रयच्छति तद्वत् । हे [V]पुरुहूत इन्द्र, [V]अस्मिन् अनुष्ठीयमाने [V]यामनि क्रतुविशेषरूपे नियमे [V]शिक्ष हितोपदेशं कुरु । वयं त्वत्प्रसादात् [V]जीवाः जीवन्तः [V]ज्योतिः प्रकाशरूपं मनुष्यलोकम् [V]अशीमहि प्राप्नुयामेति । अस्यामृचि ज्योतिःशब्देन भूलोकस्तत्रत्यप्रजाश्च विवक्षिताः । तथा सत्येतदीयसामप्रयोगेण [V]इमं भूलोकं ज्योतिषा पश्यन्तः

---

४९. अ१ - 'प्राप्नुयामः' नास्ति ।

---

३२. मै - °काहायताम् । ३३. अ. आ. क. पा. हा. इ. उ. वा. वै. म. मै - ' आभर ' नास्ति । ३४. शृ१ - अस्माकमिमम् । ३५. अ. आ. क. पा. हा. इ. उ. वा. वै. म - भागमाहृत्य ।

अहरुत्सर्गे विशेषः]

ज्योति॒रि॒मम॒व तल्लो॒कं पश्य॑न्तोऽभि॒वद॑न्त॒ आ य॑न्ति ॥७॥

(नाऽऽदिष्टं कुर्वन्ति द्वा॒द॒शभि॒रिति॒ वि॑श॒तिश्च॑ ।)

~~~~~~~~~~~~~~~~~~~~

ज्योति॑ः । इ॒मम् । ए॒व । तत् । लो॒कम् । पश्य॑न्तः । अ॒भि॒वद॑न्त॒
इत्य॑भि-वद॑न्तः । एति॑ । य॒न्ति॒ ॥७॥

[कासं ३३.७; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

~~~~~~~~~~~~~~~~~~~~

अथास्यैव ब्राह्मणम् - ' अयं वै ' इत्यादि ॥ [V]अयं [V]लोकः [V]ज्योतिः प्रकाशः प्रत्यक्षत्वात् । [V]प्रजा [V]ज्योतिः प्रकाशहेतुत्वात् । एवंविधाभ्यां पक्षाभ्याम् उभौ लोकौ अभिजितौ भवतः ॥

॥ इति सप्तमे पञ्चमे सप्तमोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

प्राप्नुयामेति वाचा [36]वदन्तश्चाऽऽगच्छन्ति ॥

॥ [37] इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः [-37] ॥

~~~~~~~~~~~~~~~~~~~~

३६. मै - वदन्तत्साम गच्छन्ति । ३७-३७. मै - इति माधवीये वेदार्थप्रकाशे यजुःसंहितायां सप्तमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ।

देवानां वा अन्तं जग्मुषामिन्द्रियं वीर्यमपाक्रामत् तत् क्रोशेनावारुन्धत तत् क्रोशस्य कोशत्वं यत् क्रोशेन चात्वालस्यान्ते स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं वीर्यमव रुन्धते

देवानाम् । वै । अन्तम् । जग्मुषाम् । इन्द्रियम् । वीर्यम् । अपेति । अक्रामत् । तत् । क्रोशेन । अवेति । अरुन्धत । तत् । क्रोशस्य । क्रोशत्वमिति क्रोश-त्वम् । यत् । क्रोशेन । चात्वालस्य । अन्ते । स्तुवन्ति । यज्ञस्य । एव । अन्तम् । गत्वा । इन्द्रियम् । वीर्यम् । अवेति । रुन्धते ।

इत्थं विकृतयः काश्चिद्विहिताः । अधुना प्रकृतावेव यदुपान्त्यं महाव्रतं नाम तद्गतान् कांश्चिद्विशेषान् विधातुमाह - 'देवानाम्' इत्यादि ॥ ᐯदेवानाम् ᐯअन्तं संवत्सरसत्रस्य समाप्तिं ᐯजग्मुषां गतवताम् ᐯइन्द्रियं ᐯवीर्यं च अपागच्छत् । ᐯतत् क्रोशनाम्ना साम्ना ᐯअवारुन्धत । ᐯतत् ᐯक्रोशस्य साम्नः ᐯक्रोशत्वम् । "क्रुश आह्वाने, रोदने च" (धापा ८८१) । उञ्छादिर्द्रष्टव्यः (गणपाठ २०७, पा ६.१.१६०) । यदित्यादि । गतम् । ᐯअन्ते समीपे ॥

उत्सर्गिणामयनं सप्तमे मीमांसया निर्णीतम् । तावता विकृतिं समाप्याथ प्रकृतावेव गवामयने यत् महाव्रतमस्ति [1]तस्मिन्नेवानुवाकत्रयेण [1] विशेषा केचिदुच्यन्ते [2] । तत्रास्मिन्नष्टमे सामविशेषा केचिदुच्यन्ते ॥

देवानामिति ॥ प्रथमं तावत् [3]क्रोशाख्यं साम विधत्ते - 'देवानां वा अन्तं जग्मुषामिन्द्रियं वीर्यमपाक्रामत् तत् क्रोशेनावारुन्धत तत् क्रोशस्य क्रोशत्वं यत् क्रोशेन चात्वालस्यान्ते स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं वीर्यमव रुन्धते' इति ॥ पुरा कदाचित् ᐯदेवानां [4]सत्रसमाप्तिं प्राप्तवताम् ᐯइन्द्रियं तत्सामर्थ्यं [5]चापक्रान्तम् । तच्च [6]ते [7]देवाः क्रोशाख्येन साम्ना पुनः प्राप्तवन्तः । " [8]क्रुश आह्वाने " (धापा ८८१) इत्यस्माद् धातोरुत्पन्नः क्रोशशब्द आह्वानसाधनमाचष्टे । तस्मादपगतवीर्यस्याऽऽह्वानसाधनत्वादेतस्य साम्नः क्रोश इति नामधेयम् । तेन कोशाख्येन साम्ना चात्वालसमीपे स्तुतिं कुर्युः । तेन [9]यज्ञसमाप्तिं प्राप्येन्द्रियसामर्थ्यं प्राप्नुवन्ति ॥

---

१. अ. आ. क. पा. हा. इ. उ. वा. वै - तस्मिन्ननेनानुवाक [1] । २. मै - केचिद्विशेषा उच्यन्ते । ३. मै - कोशाख्यम् । ४. मै - अत्र समाप्तिम् । ५. मै - चोपक्रान्तम् । ६. अ. आ. क. पा. हा. इ. उ. वा. वै. म - 'ते' नास्ति । ७. मै - देवताः । ८. मै - क्रुश । ९. उ - यज्ञं समाप्तिम् ।

सत्रस्यर्ध्याऽऽहवनीयस्यान्ते स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्धिमुप यन्ति प्रजापतेर्हृदयेन हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति

सत्रस्यर्ध्या । आहवनीयस्येत्या-हवनीयस्य । अन्ते । स्तुवन्ति । अग्निम् । एव । उपद्रष्टारमित्युप-द्रष्टारम् । कृत्वा । ऋद्धिम् । उपेति । यन्ति । प्रजापतेर्हृदयेन । हविर्धान इति हविः-धाने । अन्तः । स्तुवन्ति । प्रेमाणम् । एव । अस्य । गच्छन्ति ।

'सत्रस्यर्ध्या' इति ।। इयमपि समाख्या पदद्वयात्मिका; यथा [१-] अहिर्बुध्नियेति पदद्वयम् [२]इति [३V][समाख्या] एकस्य देवस्याख्यात्री [-१] । "गोपोषं पुष्णाति" इतिवत् प्रत्येकं वाचकत्वेऽपि समुदिताभ्यामेव देवस्याभिधानम् इति । उभयत्र [४-] अनवधारणात् अनवग्रहः [-४] । अत्र [५]तु अवयवयोः आनर्थक्यात् न पदकार्यं क्रियते । शशविषाणादिवत् विभक्त्युत्पत्तिः । सत्रस्य [६]समृद्धिहेतुत्वं तु [७]विद्यमानम् आख्याप्राधान्यात् न विवक्ष्यते । 'अग्निम्' इत्यादि । [८-V]अग्निम् [V]एव [-८] [९V]उपद्रष्टारं [१०]साक्षिणं [V]कृत्वा [११-] सत्रस्य [V]ऋद्धिम् [-११] [V]उपयन्ति ।।

'प्रजापतेर्हृदयेन' इति ।। [१२]इयमपि पूर्ववत् समाख्या पदद्वयात्मिका । प्रजापतेर्हृदयवत् विद्यमानोऽप्यर्थो न विवक्ष्यते । अनेन साम्ना [V]हविर्धाने [V]अन्तः हविर्धानस्य मध्ये स्तुवन्ति । [V]प्रेमाणं

सत्रस्येति ।। अथ सत्रस्य ऋद्धिनामकं सामान्तरं विधत्ते - 'सत्रस्यर्ध्याऽऽहवनीयस्यान्ते स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्धिमुप यन्ति' इति ।। यत् [V]सत्रस्य अर्धिनामकं साम तेनाऽऽहवनीयसमीपे स्तुतिं कुर्युः । [१०]तथा सति [V]अग्निम् [V]एव स्तुतेः साक्षिणं [V]कृत्वा समृद्धिमेव प्राप्नुवन्ति ।।

प्रजापतेरिति ।। सामान्तरं विधत्ते - 'प्रजापतेर्हृदयेन हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति' इति ।। प्रजापतेर्हृदयमिति कस्यचित् साम्नो नामधेयम् । तेन हविर्धानस्य [V]अन्तः स्थित्वा स्तुतिं कुर्युः । तेन च स्तोत्रेण [११V]अस्य प्रजापतेः प्रीतिं गच्छन्ति ।।

१-१. मैर - अहिर्बुध्न्या इति पदद्वयम् एकव्याख्यातत्त्वम् । २. अ - 'इति' नास्ति । ३. [स्पष्टतासंपादनार्थमस्माभिः प्रपूरितोऽयमंशो द्रष्टव्यः ।] । ४-४. अ - अर्थवत्त्वादवग्रहः । ५. मैर - 'तु' नास्ति । ६. मैर - °हेतुत्वस्य । ७. मैर - विद्यमानवदाख्या° । ८-८. अ१ - 'अग्निमेव' नास्ति । ९. मैर - 'उपद्रष्टारम्' नास्ति । १०. अ१ - कर्षणम् । ११-११. अ१ - सत्रस्यर्धेति समृद्धिम् । १२. मैर - तदियमपि ।

१०-१०. उ - 'तथा ---- कुर्युः नास्ति । ११. मै - 'अस्य' नास्ति ।

श्लोकेन पुरस्तात् सदसः (१) स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं

श्लोकेन । पुरस्तात् । सदसः (१) । स्तुवन्ति । अनुश्लोकेनेत्यनु-श्लोकेन । पश्चात् । यज्ञस्य । एव । अन्तम् । गत्वा । श्लोकभाज इति श्लोक-भाजः । भवन्ति । नवभिरिति नव-भिः । अध्वर्युः । उदिति । गायति । नव । वै । पुरुषे । प्राणा इति प्र-अनाः । प्राणानिति प्र-अनान् । एव । यजमानेषु । दधाति । सर्वाः । ऐन्द्रियः । भवन्ति । प्राणेष्विति प्र-अनेषु । एव । इन्द्रियम् ।

प्रियत्वम् [V]अस्य प्रजापतेः [V]गच्छन्ति । " प्रियस्थिर°" (पा ६.४.१५७) आदिना प्रादेशः । [१३]श्लोकानुश्लोकशब्दावपि समाख्ये । ताभ्यां [V]सदसः पुरस्तात् [V]पश्चात् च स्तुवन्ति । [V]श्लोकभाजः कीर्तिभाजः ॥ [१४-] नवभिरध्वर्युः ' इति [-१४] ॥ [V]नवभिः स्तोत्रियाभिः [V]उद्गायति [१५][V]अध्वर्युः । ' तस्मात् ' इत्यादि । [V]तस्मात् [V]शीर्ष्णः [V]अन्यानि [V]सर्वाणि [V]अङ्गानि [V]पुरुषः [V]प्रत्यचति

श्लोकेनेति ॥ अन्यत् सामद्वयं विधत्ते - ' श्लोकेन पुरस्तात् सदसः स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति ' इति ॥ श्लोकानुश्लोकशब्दौ सामविशेषनामनी । ताभ्यां [१२-] सदसः उभयतः [-१२] स्तुतिं कुर्युः [-१०] । तेन च यज्ञसमाप्तिं प्राप्य कीर्तिभाजो [१३]भवन्ति ॥

नवभिरिति ॥ तत्रानुश्लोके कंचिद्विशेषं विधत्ते - ' नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति ' इति ॥ अस्य साम्नः आधारभूताः स्तोत्रिया ऋचो नवसंख्याकाः । गानकर्ता चाध्वर्युर्न तूद्गाता । पुरुषशरीरे नवछिद्रवर्तित्वेन प्राणानां नवसंख्याकत्वात् तान् सर्वान् [V]यजमानेषु स्थापयति ॥

सर्वा इति ॥ तास्वृक्षु कंचिद्विशेषं विधत्ते - ' सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दधाति ' इति ॥ इन्द्रो देवता यासां ताः [V]ऐन्द्रियः । तथाविधा एव नवसंख्याकाः [V]सर्वाः अपि कार्याः । तेन [V]प्राणेषु सामर्थ्यं [१४]स्थापयन्ति ॥

---

१३. अ१ - श्लोकानुश्लोकावपि । १४-१४. मै. मै१. मै२. मै३. अ - ' नवभिरध्वर्युः इति ' नास्ति । १५. अ. अ१ - ' अध्वर्युः ' नास्ति ।

१२-१२. मै - सदसदुभयतः । १३. शृ१ - भवन्तः । १४. हा. शृ१ - स्थापयति ।

दधत्यप्रतिहताभिरुद्गायति तस्मात् पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यचति शिर एव न पञ्चदश९ रथन्तरं भवतीन्द्रियमेवाव रुन्धते सप्तदशं (२) बृहदन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त

दधति । अप्रतिहताभिरित्यप्रति-हताभिः । उदिति । गायति । तस्मात् । पुरुषः । सर्वाणि । अन्यानि । शीर्ष्णः । अङ्गानि । प्रतीति । अचति । शिरः । एव । न । पञ्चदशमिति पञ्च-दशम् । रथन्तरमिति रथं-तरम् । भवति । इन्द्रियम् । एव । अवेति । रुन्धते । सप्तदशमिति सप्त-दशम् (२) । बृहत् । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायन्ते ।

प्रत्याकर्षति संकोचयति । [१६-] प्रभावरहितत्वात् सङ्कोचः [-१६] । त्रिवृच्छिरो भवति [V]शिरः [V]एव केवलं [V]न प्रत्यचति तस्य त्रिवृत्त्वात् पञ्चदशकं [V]रथन्तरं साम [V]भवति [१७-] एकः पक्षः [-१७] ।

अप्रतिहताभिरिति ॥ तास्वृक्षु प्रतिहारभागं निषेधति - 'अप्रतिहताभिरुद्गायति तस्मात् पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यचति शिर एव न ' इति ॥ ऋचि गीयमानस्य साम्नः पञ्च भागाः हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्याः । तेषु [१५-] प्रतिहारभागं वर्जयित्वा [-१५] तद्रहिताभिरेव पूर्वोक्ताभिर्नवभिर्गायेत् । यस्मादत्र प्रतिहारो वर्जितः [V]तस्मात् लोके [१६]अपि [१७-V]पुरुषः शिरव्यतिरिक्तानि [-१७] हस्तपादादीनि [V]अङ्गानि [V]प्रत्यचति प्रत्याहृतानि संकुचितानि करोति । [V]शिरः [V]एव त्वेकं संकुचितं [१८V]न करोति । न हि हस्तपादवदङ्गुलीवच्च शिरः प्रतिहर्तुं शक्यते । [१९]तस्माच्छिरःस्थानीयेऽध्वर्युगाने प्रतिहारो वर्जनीयः ॥

पञ्चदशमिति ॥ [२०]अथैतस्य गानस्याभितः स्तोमद्वयविशिष्टं सामद्वयं विधत्ते - 'पञ्चदश९ रथन्तरं भवतीन्द्रियमेवाव रुन्धते सप्तदशं बृहदन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्ते ' इति ॥ पञ्चदशस्तोमकं रथन्तरं सामैकतो गायेयुः । तेन पञ्चदशस्येन्द्रेण सहोत्पन्नत्वादिन्द्रियप्राप्तिर्भवति । तथा सप्तदशस्तोमयुक्तं बृहत् अन्यतो गायेयुः । सप्तदशस्यान्नप्रजाहेतुत्वात् [२१]तत्प्राप्तिः । यथा पक्षिणो द्वौ [२२]पक्षौ एवमेतद्गानद्वयं द्रष्टव्यम् । अत एवान्यत्राऽऽम्नातम् - " पञ्चदशोऽन्यः पक्षो भवति । सप्तदशोऽन्यः " (तैब्रा १.२.६) इति ॥

१६-१६. मैर - °रहितत्त्वसंकोचः । १७-१७. अ - 'एकः पक्षः ' नास्ति ।

१५-१५. मै - प्रतिकर्माङ्गं जपित्वा । १६. मै - ' अपि ' नास्ति । १७-१७. मै - पुरुषशिरो° । १८. मै - 'न ' नास्ति । १९. अ. आ. क. पा. हा. इ. वा. वै. म - °च्छिरस्थानीयाध्वर्यु°, हा - °च्छिरोस्थानीयाध्वर्यु° । २०. अ. आ. क. पा. हा. इ. उ. वा. वै. म - अथ तस्य । २१. हा - प्राप्तिः । २२. इ - 'पक्षौ ' नास्ति ।

एकवि॒ꣳशं भ॒द्रं द्वि॒पदा॑सु॒ प्रति॑ष्ठित्यै॒ पत्न॑य॒ उप॑ गायन्ति मिथु॒न॒त्वाय॒ प्रजा॑त्यै प्र॒जाप॑तिः प्र॒जा अ॑सृजत॒ सो॑ऽकामयता॒ऽऽसाम॒हꣳ रा॒ज्यं परी॑या॒मिति॒ तासा॑ꣳ राज॒नेनै॒व रा॒ज्यं पर्यै॑त्

ए॒क॒वि॒ꣳश॒मित्येक॑-वि॒ꣳश॒म्। भ॒द्रम्। द्वि॒पदा॒स्विति॑ द्वि-पदा॑सु। प्रति॑ष्ठित्या॒ इति॒ प्रति॑-स्थित्यै। पत्न॑यः। उपेति॑। गा॒य॒न्ति॒। मि॒थु॒न॒त्वायेति॑ मिथुन-त्वाय॑। प्रजा॑त्या॒ इति॒ प्र-जा॒त्यै। प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒तिः। प्र॒जा इति॑ प्र-जाः। अ॒सृ॒ज॒त॒। सः। अ॒का॒म॒य॒त॒। आ॒साम्। अ॒हम्। रा॒ज्यम्। परीति॑। इ॒या॒म्। इति॑। तासा॑म्। रा॒ज॒नेन॑। ए॒व। रा॒ज्यम्। परीति॑। ऐ॒त्।

[V]सप्तदशं बृहत् सामकमेकपक्षः। [V]एकविंशं भद्रसामकं [V]द्विपदासु ऋक्षु [१८-] पञ्चभिः [१९-] स्तोत्रियाभिः [-१८] पच्छः [V]पत्नयः [V]उपगायन्ति [V]भद्रं साम। गतमन्यत्॥

'प्रजापतिः' इत्यादि॥ [२०]गतम्। [२१-][V]आसां [V]राज्यं राजभावम् [V]अहं [V]परीयां परिगच्छेयम् [V]इति [-१९] [२२]पुरोहितादित्वाद्राजशब्दाद्यक् [-२१] (गणपाठ १६४, पा ५.१.१२८)। ततः [V]राजनेन [V]एव

एकविंशमिति॥ अथ स्तोमसामविशेषमृग्विशेषैषु विधत्ते - 'एकविंꣳशं भद्रं द्विपदासु प्रतिष्ठित्यै' इति॥ एकविंशः स्तोमविशेषः। भद्रशब्दः सामविशेषस्य नामधेयम्। पादद्वयोपेता ऋचो द्विपदाः। तेन [२३]पदद्वित्वेन प्रतिष्ठा [२४]भवति॥

पत्नय इति॥ एतस्य भद्रसाम्नः समीपे पत्नीगानं विधत्ते - 'पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै' इति॥ यजमानानां याः [२५]पत्नयः ताः सर्वाः भद्राख्यसामगानस्य [२६-] समीपे स्वयमपि [-२६] गायेयुः। पुरुषाणां पत्नीनां च गानेन [२७]मिथुनसंपत्त्या प्रजोत्पत्तिर्भवति॥

प्रजापतिरिति॥ अथ सामान्तरं विधत्ते - 'प्रजापतिः प्रजा असृजत सोऽकामयताऽऽसामहꣳ राज्यं परीयामिति तासाꣳ राजनेनैव राज्यं पर्यैत् तद्राजनस्य राजनत्वं यद्राजनं भवति प्रजानामेव तद्यजमाना

१८-१८. मैर - भवति। १९-१९. अ१ - 'स्तोत्रियाभिः - - - - इति' नास्ति। २०. मैर - 'गतम्' नास्ति। २१-२१. अ - 'आसां - - - - °शब्दाद्यत्' नास्ति। २२. अ१ - दिगादित्वाद्राज°।

२३. अ. आ. क. पा. हा. इ. उ. वा. वै. म - पादद्वित्वेन। २४. मै - त्ववति। २५. पा. हा. शृ१. मै - पत्न्यः। २६-२६. मै - सममपि। २७. आ - मिथुनं (नत्वे) पत्न्याः, अ. क. पा. हा. इ. उ. वा. वै. म - मिथुनं पत्न्याः।

तद्राजनस्यं राजनत्वं यद्राजनं भवति प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविꣳशं भवति प्रजापते(३)राप्त्यै पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति

तत् । राजनस्यं । राजनत्वमिति राजन-त्वम् । यत् । राजनम् । भवति । प्रजानामिति प्र-जानाम् । एव । तत् । यजमानाः । राज्यम् । परीति । यन्ति । पञ्चविꣳशमिति पञ्च-विꣳशम् । भवति । प्रजापतेरिति प्रजा-पतेः (३) । आप्त्यै । पञ्चभिरिति पञ्च-भिः । तिष्ठन्तः । स्तुवन्ति । देवलोकमिति देव-लोकम् । एव । अभीति । जयन्ति ।

[23]साम्ना Vराज्यं Vपर्यैत् [24-]Vतत् Vराजनस्य [-24] Vराजनत्वम् । [25]राजन्तेऽनेनेति राजनम् । यदित्यादि । गतम् ॥

'पञ्चविंशम्' इत्यादि ॥ तद्राजनं पञ्चविंशं Vभवति आत्मा Vप्रजापतेः पञ्चविंशस्य Vआप्त्यै भवति । [26]Vपञ्चभिः स्तोत्रियाभिः Vतिष्ठन्तः Vस्तुवन्ति । Vपञ्चभिः Vआसीनाः

राज्यं परियन्ति' इति ॥ राजनमिति सामविशेषस्य नामधेयम् । [28]राज्यसाधनत्वात्तस्य राजनत्वम् । तत्सामप्रयोगेण Vयजमानाः Vराज्यं प्राप्नुवन्ति ॥

पञ्चविंशमिति ॥ तमेतं स्तोमविशेषं विधत्ते - 'पञ्चविंꣳशं भवति प्रजापतेराप्त्यै' इति ॥ प्रजापतेः पञ्चविंशस्तोमस्रष्टृत्वात् तेन तत्प्राप्तिः ॥

पञ्चभिरिति ॥ तस्मिन्नेव पञ्चविंशस्तोमे कंचिद्विशेषं विधत्ते - 'पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना मनुष्यलोकमेवाभि जयति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते' इति ॥ पञ्चविंशाख्यस्तोमे या आद्याः पञ्च स्तोत्रियास्ता [29]ऋत्विग्भिरुत्थितैः

२३. मै२ - अहे। २४-२४. मै२ - तस्य। २५. मै. मै१. मै३. अ. अ१ - राजत्यनेनेति। २६. [अत्र अ. अ१ इति कोशयोः 'पञ्चभिः स्तोत्रियाभिः' इत्यस्योर्ध्वं बहुशः पौर्वापर्यं दृश्यते ।], अ - पञ्च पत्नयः उपगायन्ति भद्रं साम गतमन्यत् । प्रजापतिरित्यादि गतम् । पञ्चविंशमित्यादि आसां राज्यं राज्यभावः अहं परीयां परिगच्छेयमिति पुरोहितादि ताभिः स्तोत्रियाभिः । अ१ - पच्छः पत्नयः उपगायन्ति भद्रं साम गतमन्यत् प्रजापतिरित्यादि, गतम् । पञ्चविंशमित्यादि तद्राजनं पञ्चविंशं भवति आत्मा प्रजापते आसां राज्यं राज्यभावमहं परीयां परिगच्छेयमिति पुरोहितादिति ताभिः स्तोत्रियाभिः ।

२८. उ - राजसाधनत्वात् । २९. आ - ऋत्विभि° ।

पञ्चभिरासीना मनुष्यलोकमेवाभि जयन्ति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयाऽस्तुतया समायन्ति दिग्भ्य एवान्नाद्य९ सं भरन्ति

पञ्चभिरिति पञ्च-भिः । आसीनाः । मनुष्यलोकमिति मनुष्य-लोकम् । एव । अभीति । जयन्ति । दश । समिति । पद्यन्ते । दशाक्षरेति दश-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजेति वि-राजा । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । पञ्चधेति पञ्च-धा । विनिषद्येति वि-निषद्य । स्तुवन्ति । पञ्च । दिशः । दिक्षु । एव । प्रतीति । तिष्ठन्ति । एकैकयेत्येकया-एकया । अस्तुतया । समायन्तीति सम्-आयन्ति । दिग्भ्य इति दिक्-भ्यः । एव । अन्नाद्यमित्यन्न-अद्यम् । समिति । भरन्ति ।

---

[२७]स्तुवन्तीत्येव । [२८]पञ्चकाभ्याम् [२९]उभयोर्लोकयोरभिजयः । 'दश' इत्यादि । गतम् ॥

[३०]नवभिरध्वर्युरुद्गायतीत्युक्तम् ॥ [३१-]Vपञ्चधा पञ्चस्तोत्रिया[-३१] Vविनिषद्य पृथक्पृथगासीना Vदिक्षु Vस्तुवन्ति Vएकैकया Vअस्तुतया Vसमायन्ति सङ्गच्छन्ति उद्गातारम् । Vताभिः चतसृभिः Vउद्गाता Vउद्गायति । 'तस्मात्' इत्यादि । गतम् ॥

पठनीयाः । याश्चानन्तरभाविन्यः [३०]पञ्चसंख्याकास्ता आसीनैर्गातव्याः । [३१]तेन लोकद्वयप्राप्तिः । [३२]दशसंख्यया [३३]विराड्द्वाराऽन्नप्राप्तिः ॥

पञ्चधेति ॥ आसीनगाने कञ्चिद्विशेषं विधत्ते - 'पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्ति' इति ॥ पञ्चभिः प्रकारैः [३४]स्थानविशेषेषूपविश्य Vस्तुवन्ति । ऊर्ध्वया सह दिशां पञ्चत्वाद्दिक्षु प्रतिष्ठा ॥

एकैकयेति ॥ तत्रैवान्यं विशेषं विधत्ते - 'एकैकयाऽस्तुतया समायन्ति दिग्भ्य एवान्नाद्य९ सं भरन्ति' इति ॥ [३५-] पञ्चसु स्थानेषु [-३५] [३६]उपवेशनकाले क्वचिदुद्गाता प्रथममुपविशति । तदानीमितरे

---

२७. मै२ - स्तुवन्त्येव । २८. मै२ - कालकामाभ्याम् । २९. मै२ - उभयोरभिजयः । ३०. अ - नवभिरध्वर्युः, अ१ - 'नवभिः - - - - °तीत्युक्तम्' नास्ति । ३१-३१. अ - पञ्चभिः स्तोत्रीयाभिः, पञ्चधा स्तोत्रीयाः ।

---

३०. अ. आ. का. हा. इ. उ. वा. वै. म - पञ्चसंख्यास्ताः । ३१. मै - तव । ३२. मै - दशसंख्या, उ - दशसंख्याका या, शृ१ - 'दशसंख्यया' नास्ति । ३३. मै - विराड्वान्न° । ३४. शृ१ - विशेषेषु प्रविश्य । ३५-३५. मै - पञ्चस्थानेषु । ३६. शृ१ - प्रवेशनकाले ।

ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यं (४) संभृत्य तेज आत्मन् दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्त्यासन्दीमुद्गाताऽऽरोहति

ताभिः । उद्गातेत्युत्-गाता । उदिति । गायति । दिग्भ्य इति दिक्-भ्यः । एव । अन्नाद्यमित्यन्न-अद्यम् (४) । संभृत्येति सं-भृत्य । तेजः । आत्मन् । दधते । तस्मात् । एकः । प्राण इति प्र-अनः । सर्वाणि । अङ्गानि । अवति । अथो इति । यथा । सुपर्ण इति सु-पर्णः । उत्पतिष्यन्नित्युत्-पतिष्यन् । शिरः । उत्तममित्युत्-तमम् । कुरुते । एवम् । एव । तत् । यजमानाः । प्रजानामिति प्र-जानाम् । उत्तमा इत्युत्-तमाः । भवन्ति । आसन्दीमित्या-सन्दीम् । उद्गातेत्युत्-गाता । एति । रोहति ।

[V]अथो अपि च [V]यथा [V]सुपर्णः [V]उत्पतिष्यन् उत्पतितुमारभमाणः [V]शिरः [V]उत्तमम् [32]उद्गततमं [V]कुरुते [V]एवम् [V]एव [V]यजमानाः आत्मनि तेजो दधानाः [V]प्रजानाम् [V]उत्तमाः [V]भवन्ति । उत्तमशब्दः [33]उञ्छादिरन्तोदात्तः (गणपाठ २०७, पा ६.१.१६०) ॥

[37-] सर्वेऽपि [V]अस्तुतया [-37] स्तोत्रियया तमुद्गातारं समागत्योपविशन्ति । एवं तत्तस्थानेषु प्रथममेवोद्गातर्युपविष्टे सति [38]तत्तदृचां स्तुतेः प्रागेव सर्वेऽप्युद्गातारमुपगच्छेयुः । तथा सति सर्वाभ्यः [V]दिग्भ्यः अन्नं संपादयीनित ॥

ताभिरिति ॥ इतरेष्वागतेषूद्गातृकृत्यं विधत्ते - 'ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्य९ संभृत्य तेज आत्मन् दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्ति' इति । यां स्तोत्रियां पुरस्कृत्योद्गातारमागच्छन्ति [39]तया स उद्गाता गायेत् । तथा सति [V]दिग्भ्यः संपादितमन्नं तेजोरूपं सर्वेऽपि स्वात्मन्येव स्थापयन्ति । यस्मादत्र सर्वेषु स्थितेष्वेक एवोद्गाता गायति [V]तस्मात् शरीरमध्येऽपि [V]एकः एव [V]प्राणः सर्वाणि [V]अङ्गानि रक्षति । अपि च [V]यथा कश्चित् पक्षिविशेष आकाशे [V]उत्पत्तिष्यन् स्वकीयं [V]शिरः ऊर्ध्वं कुरुते [V]एवम् [V]एव तेनोद्गातृगानेन [V]प्रजानां मध्ये [V]यजमानाः [V]उत्तमाः भवन्ति ॥

३२. अ. अ१ - उद्गतम् । ३३. मै - उत्सादि°, अ१ - उत्सादित्वातदन्तो° ।

३७-३७. शृ१ - सर्वेषु स्तुतया । ३८. मै - तत्तदृचा । ३९. शृ१ - तथा, हा - तस्य ।

साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति(५)तिष्ठन्त्यथो आक्रमणमेव तत् सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै ॥८॥

(सदसः सप्तदशं प्रजापतेर्गायति दिग्भ्य एवान्नाद्यं प्रत्येकादश च ।)

साम्राज्यमिति सां-राज्यम् । एव । गच्छन्ति । प्लेङ्खम् । होता । नाकस्य । एव । पृष्ठम् । रोहन्ति । कूर्चौ । अध्वर्युः । ब्रध्नस्य । एव । विष्टपम् । गच्छन्ति । एतावन्तः । वै । देवलोका इति देव-लोकाः । तेषु । एव । यथापूर्वमिति यथा-पूर्वम् । प्रतीति (५) । तिष्ठन्ति । अथो इति । आक्रमणमित्या-क्रमणम् । एव । तत् । सेतुम् । यजमानाः । कुर्वते । सुवर्गस्येति सुवः-गस्य । लोकस्य । समष्ट्या इति सम्-अष्ट्यै ॥८॥

[कासं ३४.५; कपिसं - - - -; मैसं - - - -; शब्रा ४.६.९.११]

आसन्दीम् आरोहति उद्गाता । साम्राज्यं गच्छन्ति सर्वे । एवं सर्वेषां फलं [३४]सर्वत्र । प्लेङ्खं डोलां होता आरोहतीत्येव । ब्रध्नस्य आदित्यस्य विष्टपं लोकम् ॥

'एतावन्तः' इत्यादि ॥ अथो अपि च आक्रमणसाधनं सेतुं यजमानाः कुर्वते । [३५]स्वर्गस्य समष्ट्यै [३६]सम्यगवाप्तये तत् भवति । "तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् ॥

॥ [३७]इति सप्तमे पञ्चमे अष्टमोऽनुवाकः ॥

आसन्दीमिति ॥ अथ त्रयाणामृत्विजामाधारविशेषान् विधत्ते - 'आसन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यथो आक्रमणमेव तत्सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै' इति ॥ आसन्दी चतुर्भिः पादैरुन्नतैरुपेता खट्वाकारा । [४०]उद्गातुस्तदारोहणेनैव सर्वे यजमानाः साम्राज्यं देशाधिपत्यं गच्छन्ति । [४१]प्लेङ्खो [४२]दोला तां होता समारोहति । तेन सर्वेऽपि

३४. अ१ - सत्र । ३५. मै. मै१. मै२. मै३ - स्वर्गस्य समुद्रस्य । ३६. मै२ - स्वर्गावाप्तये । ३७. अ१ - 'इति' नास्ति ।

४०. आ. उ - °तदारोहणे । ४१. पा. हा. शृ१ - प्रेङ्खः । ४२. अ. पा. हा. शृ१ - डोला ।

स्वर्गमारोहन्ति । कूर्चौ दर्भविशेषौ, तौ [V]अध्वर्युः [V]आरोहति । तेन [V]ब्रध्नस्य आदित्यस्य [V]विष्टपं स्थानं [V]गच्छन्ति साम्राज्यस्वर्गादित्यस्थानरूपा ये लोका एतावन्त एवापेक्षिताः [V]देवलोकाः [V]तेषु अनुक्रमेण [V]प्रतितिष्ठन्ति । अपि च [४३]तेनाऽऽरोहणेन स्वर्गसमुद्रस्याऽऽक्रमणसाधनं [V]सेतुं [V]यजमानाः [V]कुर्वते । तच्च स्वर्गप्राप्त्यै भवति ॥

अत्र मीमांसा ।

दशमाध्यायस्य चतुर्थे[४४]पादे चिन्तितम् -

"[४५]पत्नीनामुपगानं किमृत्विजां तन्निवर्तयेत् ।
[४६]समुच्चितं वा गानस्य [४७]शारीरस्याभिवर्धनम् ॥
स्वराभिव्यञ्जनं गानं ग्रहवत् तद्विधीयते ।
वादित्रोपचयः साम्यात् सान्निध्याच्च समुच्चयः" ॥ (द्र. जैन्या १०.४.११-१२)

महाव्रते श्रूयते - "पत्नयः उपगायन्ति" (तैसं ७.५.८) इति । प्रकृतौ श्रूयते - "ऋत्विज उपगायन्ति" (तांब्रा ५.५.६) इति । तदेतदृत्विगुपगानं पत्न्युपगानेन निवर्त्यते । ननु प्रकृतावुद्गात्रा साम्नि [४८]गीयमाने सत्यृत्विजोऽन्ये [४९]साम्नैवोपगायन्ति । इह तु पत्नयो वादित्रं वादयन्तीति भिन्नविषयत्वान्नास्ति निवृत्ति ॥ मैवं, गानशब्दस्य [५०]शारीरे प्रसिद्धत्वात् । तस्मादृत्विजो निवर्त्य पत्नयः सामोपगायेयुरिति प्राप्ते ब्रूमः - [५१]गानशब्दस्य नाक्षरोच्चारणमर्थः किन्तु स्वराभिव्यञ्जनं, तच्च शरीरेण वादित्रेण वा सिध्यति । अत एव गानतत्त्वज्ञा आहुः- "दारवी गात्रवीणा च द्वे वीणे गानजातिषु" इति । तच्च [५२] गानं ग्रहन्यायेनापूर्वक्रियाविधानान्न [५२] प्रकृतिलिङ्गं स्यात् । एवं तर्हि गानोपचयवाचिन उपशब्दस्य वैयर्थ्यमिति चेत् । न । [५३]वादित्रोपचयसंभवात् । अस्ति हि तत्र वादित्रनादः, "दिक्षु दुन्दुभयो नदन्ति" (द्र. कासं ३४.५, तांब्रा ५.५.१८) इति श्रुतेः । पत्न्युपगानं च वादित्रनादः । "काण्डवीणाभिरुपगायन्ति" इति श्रुतेः । अतः सादृश्यात् संनिधानाच्च तदुपचयो युक्तः । तस्मादनिवृत्तेरुपगायनयोः समुच्चयः ।

४३. शृ१ - तेनारोहेण । ४४. आ. क - °पादे षष्ठाधिकरणे । ४५. अ. पा. इ. वा. वै शृ१ - °मुपधानम् । ४६. अ. पा. हा. इ. उ. वा. वै - समुत्थितम् । ४७. हा. उ - शरीरत्वा° । ४८. अ. पा. हा. इ. उ. वा. वै. शृ१ - गायमाने । ४९. अ. आ. पा. हा. इ. उ. वा. वै. म - सामैवोप° । ५०. हा - शरीरे । ५१. उ - ज्ञानशब्दस्य । ५२-५२. वा - गानग्रहन्यायेनापूर्व° । ५३. उ - वाद्योपचय°, शृ१ - वादितोपचय° ।

तत्रैवान्यच्चिन्तितम् -

" बाध्यं श्लोकादिनाऽऽज्यादि न वाऽऽद्यः स्तुतिलिङ्गतः ।
[५४]देशसाम्नोर्विधौ भेदो [५५]वैशिष्ट्यात् स्यात् समुच्चयः " ॥ (जैन्या १०.४.१५)

महाव्रते श्रूयते - " श्लोकेन पुरस्तात् सदसः स्तुवन्त्यनुश्लोकेन पश्चात् " (तैसं ७.५.८) इत्यादि । तत्र श्लोकानुश्लोकनामकैः सामभिः प्राकृतान्याज्यपृष्ठादिस्तोत्रगतानि रथन्तरवामदेव्यादिनामकानि सामानि बाध्यानि । कुतः ? स्तूयत इति प्रकृतिलिङ्गदर्शनात् । [५६]प्रकृतावाज्यैः स्तुवत पृष्ठैः स्तुवत इति हि श्रुतम् । नैतत् सारम् । किमत्र स्तुतिमनूद्य [५७] देशसामगुणौ विधीयेते [५७] किंवा [५८]गुणद्वयविशिष्टा स्तुतिः । नाऽऽद्यो वाक्यभेदापत्तेः । द्वितीये तु कार्यभेदेन [५९]बाधाभावात् समुच्चयः स्यात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टमोनुवाकः ॥

५४. अ. पा. हा. शृ१ - देवसाम्नो°, इ. वा - साम्नोर्विधा । ५५. शृ१ - °त्समृद्धये । ५६. अ. क. पा. इ. वा. वै - °वाज्येन । ५७-५७. अ. पा. हा. इ. उ. वा. वै. शृ१ - °गुणो विधीयते । ५८. शृ१ - गुणविशिष्टा । ५९. क - बाध्याभावात् ।

अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां लूतामवारुन्ध यदर्क्यं भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां लूतामव रुन्धते

अर्क्येण । वै । सहस्रश इति सहस्र-शः । प्रजापतिरिति प्रजा-पतिः । प्रजा इति प्र-जाः । असृजत । ताभ्यः । इलान्देन । इराम् । लूताम् । अवेति । अरुन्ध । यत् । अर्क्यम् । भवति । प्रजा इति प्र-जाः । एव । तत् । यजमानाः । सृजन्ते । इलान्दम् । भवति । प्रजाभ्य इति प्र-जाभ्यः । एव । सृष्टाभ्यः । इराम् । लूताम् । अवेति । रुन्धते ।

'अर्क्येण' इत्यादि ॥ [1]अर्क्याख्येन साम्ना Vप्रजापतिः Vसहस्रशः सहस्रंसहस्रं Vप्रजाः बहुतमाः Vअसृजत । "संख्यैकवचनाच्च [2]वीप्सायाम्" (पा ५.४.४३) [3]इति शस् । Vताभ्यः सृष्टाभ्यः Vइलान्देन साम्ना Vइराम् [4]अन्नं Vलूतां लवनशीलां प्रजाभिः विच्छिन्नां अवारुन्ध अविच्छेदेनाप्तवान् । लूनातेरौणादिकः [5]तन् प्रत्ययः (उसू ३.८६) । 'यदर्क्यम्' इत्यादि । साम्नः स्तुतिः गता । इराम् [6]अन्दति बध्नातीति[6] इरान्दम् । "अदि [7]बन्धने" (धापा ६३) कर्मण्यण् । "संज्ञायां च" (पा ६.२.७७) इति पूर्वपदाद्युदात्तत्वम्, कपिलकादित्वाल्लत्वम् ॥

अष्टमे क्रोशसामादीन्युक्तानि । नवमे शततन्तुवीणादिकमुच्यते ॥

अर्क्येणेति ॥ तत्राऽऽदौ तावत् सामद्वयं विधत्ते - 'अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां लूतामवारुन्ध यदर्क्यं भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां लूतामव रुन्धते तस्माद्या९ समा९ सत्र९ समृद्धं क्षोधुकास्ता९ समां प्रजा इष९ ह्यासामूर्जमाददते या९ समां व्यृद्धमक्षोधुकास्ता९ समां प्रजा न ह्यासामिषमूर्जमाददते' इति ॥ अर्क्यमिति कस्यचित् साम्नो नामधेयं तेन Vप्रजापतिः पुरा [1]बहुविधाः सहस्रसंघरूपाः[1] Vप्रजाः Vअसृजत । इलान्दमिति सामान्तरस्य नामधेयम् । तेन साम्ना स्वसृष्टप्रजार्थं लूताम् Vइरां पूर्वं विच्छिन्नमन्नम् Vअवारुन्ध पुनरप्यविच्छेदेन

---

१. मै२ - अर्काख्येन । २. मै२ - 'वीप्सायाम्' नास्ति । ३. अ१ - 'इति' नास्ति । ४. मै२ - 'अन्नम्' नास्ति । ५. अ - मनन्, मै - तान् । ६-६. मै२. अ - अदन्ति बध्नाति । ७. मै२ - प्रतिबन्धने ।

१-१. भृ१ - बहुविधसहस्र° ।

तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धं क्षोधुकास्ताꣳ समां
प्रजा इषꣳ ह्यासामूर्जमाददते याꣳ समां
व्यृद्धमक्षोधुकास्ताꣳ समां प्रजाः (१)
न ह्यासामिषमूर्जमाददत

तस्मात् । याम् । समाम् । सत्रम् । समृद्धमिति सम्-ऋद्धम् । क्षोधुकाः । ताम् । समाम् । प्रजा इति प्र-जाः । इषम् । हि । आसाम् । ऊर्जम् । आददत इत्या-ददते । याम् । समाम् । व्यृद्धमिति वि-ऋद्धम् । अक्षोधुकाः । ताम् । समाम् । प्रजा इति प्र-जाः (१) । न । हि । आसाम् । इषम् । ऊर्जम् । आददत इत्या-ददते ।

[८-]'तस्मात्' इत्यादि[-८] ॥ [९]यस्यादित्थं प्रजाभ्यः [V]इराम् आददते [१०]सत्रिणः [V]तस्मात् [११-][V]यां [V]समां [-११] संवत्सरसत्रं [V]समृद्धम् अन्नादिना भवति, अत्यन्तसंयोगे द्वितीया, [V]तां [V]समां प्रजाः [V]क्षोधुकाः क्षुच्छीलाः स्युः । छान्दस उकञ् । हेतुमाह – 'इषम्' इत्यादि । [V]आसां प्रजानां [V]इषम् अन्नम् [V]ऊर्जम् रसं [१२]दुग्धादि [१३]च यस्मात् सत्रिणः [V]आददते तस्मात् क्षोधुकाः । अथ [V]यां [V]समां सत्रं [V]व्यृद्धं क्षीरादिना असमृद्धम् [V]अक्षोधुकाः [V]तां [V]समां [V]प्रजाः

संपादितवान् । तद्वत् [V]यजमानाः अपि सामद्वयेन [V]प्रजाः सृष्ट्वा तदर्थमन्नं संपादयन्ति । [२-]यस्मादस्मिन् सत्रे [-२] साम्नाऽन्नं संपाद्यते [V]तस्मात् [V]यां [V]समां [V]सत्रं [V]समृद्धं यस्मिन् संवत्सरे नैरन्तर्येण सत्रं समृद्धं प्रवृत्तं [V]तां [V]समां [V]प्रजाः [V]क्षोधुकाः तस्मिन् संवत्सरे [३]नैरन्तर्येण क्षुधिताः प्रजाः सत्रिणां समीपे सर्वदिग्भ्यः समागच्छन्ति । सत्रिणः [V]हि [V]आसां प्रजानां नानाविधमन्नं रसं च समादाय प्रयच्छन्ति । [४]यस्मिंस्तु संवत्सरे सत्रं व्यृद्धं न प्रवृत्तं तस्मिन् संवत्सरे [V]प्रजाः [V]अक्षोधुकाः [५]अक्षुधिताः काश्चिदपि नाऽऽगच्छन्ति । यस्मात् [V]आसां प्रजानां व्रीह्याद्यन्नं क्षीरादिरसं च [V]न एवाऽऽदाय प्रयच्छन्ति तस्मादनागमनम् ॥

८-८. अ१ - 'तस्मात् इत्यादि' नास्ति । ९. अ१ - तस्थम् । १०. मै२ - सति वा । ११-११. मै२ - 'यां समाम्' नास्ति । १२. मै२ - ऋध्यादि । १३. अ१ - 'च' नास्ति ।

२-२. शृ१ - तस्मादस्मिन्सत्रे । ३. शृ१ - नैरन्तर्येण तत्र तत्र । ४. शृ१ - तस्मिंस्तु । ५. अ. आ. क. पा. हा. इ. उ. वा. वै - क्षुधिताः ।

उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन् दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं

उत्क्रोदमित्युत्-क्रोदम् । कुर्वते । यथा । बन्धात् । मुमुचानाः । उत्क्रोदमित्युत्-क्रोदम् । कुर्वते । एवम् । एव । तत् । यजमानाः । देवबन्धादिति देव-बन्धात् । मुमुचानाः । उत्क्रोदमित्युत्-क्रोदम् । कुर्वते । इषम् । ऊर्जम् । आत्मन् । दधानाः । वाणः । शततन्तुरिति शत-तन्तुः । भवति । शतायुरिति शत-आयुः । पुरुषः । शतेन्द्रिय इति शत-इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठन्ति । आजिम् ।

---

[14]कुर्वते । हेतुमाह - 'न ह्यासाम्' इति । [15]उत्क्रोदतीति [16-] Vउत्क्रोदं साम [-16] सर्वे यजमानाः Vकुर्वते । [17]' क्रुद कुत्सिते शब्दे ' । 'यथा' इत्यादि । उत्कृष्टरवं [18-] हर्षेण कुर्वते [19]Vमुमुचानाः मुच्यमानाः । छान्दसः कर्मणि लिटः कानजादेशः । ' एवमेव ' इति । Vदेवबन्धात् संवत्सरसत्रात् मुच्यमानः Vउत्क्रोदं Vकुर्वते । एतत्सामकरणेन Vइषम् Vऊर्जम् चात्मनि Vदधानाः धारणेन [-18] हेतुना । हेतौ शानच् , " अभ्यस्तानामादिः " (पा ६.१.१८९) इत्यादेरुदात्तत्वम् ॥

उत्क्रोदमिति ॥ [6]अथान्यदनुष्ठेयं विधत्ते - ' उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन् दधानाः ' इति ॥ हर्षनिमित्तो ह्यत्युच्चध्वनिरुत्क्रोदः । सर्वे यजमानाः [7]सत्रसमाप्त्या संतुष्टा उत्क्रोदं कुर्युः । Vयथा लोके चिरं [8]शृङ्खलाबद्धाः पुरुषाः [9]तद्विमोकं गच्छन्तो हर्षेण Vउत्क्रोदं [10]कुर्वन्ति Vएवम् Vएव Vयजमानाः चिरकालानुष्ठेयसत्ररूपात् Vदेवबन्धात् विमोकं प्राप्नुवन्तः सत्रसामर्थ्येनान्नं रसं च स्वात्मनि संपादयन्ति । अतः Vउत्क्रोदं Vकुर्वते ।

वाण इति ॥ यदुक्तं सूत्रकारेण - " औदुम्बरस्य वीणादण्डस्य दशातिमथितान्येकैकस्मिन्नतिमथिते [11]दश दश मौञ्जांस्तन्तून् प्रवयति स वाणः शततन्तुः " (आपश्रौ २१.१७. ८-१०) इति, तदेतद्विधत्ते - 'वाणः

---

१४. मैर. अ. अ१ - 'कुर्वते' नास्ति । १५. अ. अ१ - 'उत्क्रोदतीति' नास्ति । १६-१६. अ - उत्क्रोक्षं साम, मैर - त्रयम् । १७. मैर - कुर्द । १८-१८. मैर - 'हर्षेण - - - - धारणेन' नास्ति । १९. अ१ - 'मुमुचानाः' नास्ति ।

---

६. शृ१ - अथोन्यदनु° । ७. क - सत्रं समाप्य । ८. शृ१ - शृङ्खलं बद्ध्वा । ९. इ. उ - तस्माद्विमोकम् , शृ१. क - तस्माद्बन्धाद्विमोकम् । १०. शृ१ - कुर्वते । ११. हा. क - 'दश' नास्ति ।

धावन्त्यनभिजितस्याभिजित्यै दुन्दुभीन् समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव (२) वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमां वाक् प्रविष्टा तामेवाव रुन्धतेऽथो इमामेव जयन्ति

धावन्ति । अनभिजितस्येत्यनभि-जितस्य । अभिजित्या इत्यभि-जित्यै । दुन्दुभीन् । समाघ्नन्तीति सम्-आघ्नन्ति । परमा । वै । एषा । वाक् । या । दुन्दुभौ । परमाम् । एव (२) । वाचम् । अवेति । रुन्धते । भूमिदुन्दुभिमिति भूमि-दुन्दुभिम् । एति । घ्नन्ति । या । एव । इमाम् । वाक् । प्रविष्टेति प्र-विष्टा । ताम् । एव । अवेति । रुन्धते । अथो इति । इमाम् । एव । जयन्ति ।

'वाणः' इत्यादि ॥ [20-] यदियं दण्ड इत्यादिस्थितेषु [-20] [21]दशास्वप्यतिमथितेषु तेषु प्रत्येकं [22-]दश दश [-22] तन्तवः प्रोताः [V]शततन्तुः [V]वाणः वीणाविशेषः, तेन वाद्यमानेन [V]आजिं [V]धावन्ति । तत् [V]अनभिजितस्य [V]अभिजित्यै भवति ॥

[23-V]दुन्दुभीन् [V]समाघ्नन्ति [-23] तदानीं युगपत् [24]ध्वनयन्ति । 'परमा' इत्यादि । गतम् । [V]भूमिदुन्दभिम् [25V]आघ्नन्ति । चर्मणाऽऽच्छादितमुखं भूगर्तं भूमिदुन्दुभिः

शततन्तुर्भवति शतायुः पुरुष शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति' इति ॥ दशेन्द्रियाणां दशसंख्याकासु नाडीषु वृत्तिभेदेन शतसंख्या ॥

आजिमिति ॥ उत्साहोपेतानां यजमानानां कांचिन्मर्यादां कृत्वा तत्पर्यन्तं धावनं विधत्ते - 'आजिं धावन्त्यनभिजितस्याभिजित्यै' इति ॥ [12-] यत् पूर्वमनभिजितम् [13]असंपादितं फलं तस्य संपादनायेदं धावनम् ।

दुन्दुभीनिति ॥ उत्साहद्योतकमन्यद्विधत्ते - 'दुन्दुभीन् समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेष वाचमव रुन्धते' इति [-12] ॥ दिक्षु स्थापिता ये दुन्दुभयस्तान् सम्यगाहन्युः । सोऽयं दुन्दुभिध्वनिः सर्वध्वनीनामुत्तमोऽत्युच्चत्वात् । तद्वादनेन समारञ्जनक्षमां [V]परमां [V]वाचं प्राप्नुवन्ति ।

२०-२०. मै२. मै तलटिप्पण्यां - यदि इन्दद इत्यादि स्थासु , अ१ - यदि यंदसै इत्यादिस्थितेषु । २१. मै२ - °प्यतिप्रथितेषु । २२-२२. मै२ - दश । २३-२३. अ - 'दुन्दुभीन् समाघ्नन्ति' नास्ति । २४. मै. मै१. मै३. अ. अ१ - ध्मानयन्ति । २५. मै२ - इति, अ. अ१ - 'आघ्नन्ति' नास्ति ।

१२-१२. वा - 'यत् - - - - इति' नास्ति । १३. शृ१ - संपादयन्ति ।

सर्वा॒ वाचो॑ वदन्ति॒ सर्वा॑सां वा॒चामव॑रुद्ध्या आ॒र्द्रे चर्म॒न् व्याय॑च्छेते

सर्वाः॑ । वाचः॑ । व॒दन्ति॒ । सर्वा॑साम् । वा॒चाम् । अव॑रुद्ध्या॒ इत्यव॑-रु॒द्ध्यै॒ । आ॒र्द्रे । चर्म॑न् । व्याय॑च्छेते॒ इति॑ वि-आय॑च्छेते ।

[२६-] पुच्छकाण्डेन । [V]या [-२६] [V]वाक् [V]इमां पृथिवीं [V]प्रविष्टा [V]ताम् [२७]अवरुन्धते । [२८V]अथो अपि च [२९-V]इमां [३०][पृथिवीं] जयत्येव । [V]सर्वाः [V]वाचः [-२९] [३१]रथन्तरमनुष्यादीनाम् ॥

भूमिदुन्दुभिमिति ॥ यदुक्तं सूत्रकारेण [१४]" अपरेणाऽऽग्नीध्रं भूमिदुन्दुभिमवटं खनन्त्यर्धमन्तर्वेद्यर्धं बहिर्वेदि तमार्द्रेण चर्मणोत्तरलोम्नः [१५]वितत्य शङ्कुभिः परिनिहत्यात्रैतत् पुच्छकाण्डमाहननार्थं निदधाति " (आपश्रौ २१.१८. २-३) इति ॥ तत्र तेन [१६]पुच्छकाण्डेनाऽऽहननं विधत्ते - ' भूमिदुन्दुभिमाघ्नन्ति यैवेमां वाक् प्रविष्टा तामेवाव रुन्धतेऽथो इमामेव जयन्ति ' इति ॥ [१७]भूमिदुन्दुभ्याघातेन पार्थिवेषु द्रव्येषु परस्परसंघट्टनेन जन्याः शब्दविशेषाः स्वाधीना भवन्ति ॥

सर्वा इति ॥ यदुक्तं सूत्रकारेण - " उपाकृते माहेन्द्रस्य स्तोत्रे सर्वा वाचो वदन्त्युत्क्रोदं यजमाना [१८]कुर्वतेऽपाघाटलिकास्तुम्बुरुवीणाः [१९-] पिच्छोला इति पत्नयो वादयन्ति [-१९] [२०]संप्रवदन्ति वीणाशङ्खो [२१]नालीरुपाहिताः " (द्र. आपश्रौ २१.१९. १-४) इति, तदेतद्विधत्ते - ' सर्वा वाचो वदन्ति सर्वासां वाचामवरुद्ध्यै ' इति ॥ [२२]अपाघाटलिकादिवाद्यविशेषजन्या मनुष्यगवाश्वादिशब्दजन्याश्च ये शब्दविशेषास्ते सर्वेऽपि प्राप्यन्त [२३]इत्यर्थः ॥

आर्द्रे चर्मन्निति ॥ अथ ब्राह्मणशूद्रयोश्चर्मनिमित्तं कलहं विधत्ते - ' आर्द्रे चर्मन् व्यायच्छेते इन्द्रियस्यावरुद्ध्यै ' इति ॥ तेनाऽऽर्द्रचर्मनिमित्तेन कलहेन सामर्थ्यसंपत्तिर्भवति । कलहप्रकारस्तु सूत्रे

२६-२६. मै२ - पुच्छआंकेन सा । २७. मै. मै१. मै३. अ. अ१ - अवरुन्धे । २८. मै२ - ' अथो ' नास्ति । २९-२९. मै२ - इमामेव सर्वां वाचं वीणावादिना(नां ?) वा । ३०. [स्पष्टतासंपादनार्थमस्माभिः प्रपूरितोऽयमंशो द्रष्टव्यः ।] । ३१. अ. अ१ - ' रथन्तरमनुष्यादीनाम् ' नास्ति ।

---

१४. [आपश्रौ सूत्रमवलम्ब्यास्माभिः शुद्धीकृतोऽयं पाठो द्रष्टव्यः, आ - मुद्रितपुस्तके लिखितपुस्तकेषु च सर्वेषु '°णाग्नीध्रमण्डपम् ' इति पाठ उपलभ्यते ।] । १५. अ. पा - मिवितत्य, आ. क. हा. इ. उ. वा. वै. म - निवितत्य । १६. शृ१ - ' पुच्छकाण्डेन ' नास्ति । १७. उ - भूमिं दुन्दुभ्या° । १८. क - °ऽपघाटालिकाः, शृ१ - ऽपाघा इलिकाः । १९-१९. उ - ' पिच्छोला - - - - वादयन्ति ' नास्ति । २०. अ. आ. क. उ. वै. म. मै - ' संप्रवदन्ति ' नास्ति । २१. क - नालीरूपहिताः । २२. क - अपघाटलिका°, शृ१ - अपाघा इलिका° । २३. शृ१ - ' इत्यर्थः ' नास्ति ।

इन्द्रियस्यावरुद्ध्या आऽन्यः क्रोशति प्राऽन्यः शꣳसति य आक्रोशति पुनात्येवैनान्त्स यः प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च (३)

~~~~~~~~~~~~~~~~~~~~~~~~

इन्द्रियस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । एति । अन्यः । क्रोशति । प्रेति । अन्यः । शꣳसति । यः । आक्रोशतीत्या-क्रोशति । पुनाति । एव । एनान् । सः । यः । प्रशꣳसतीति प्र-शꣳसति । पूतेषु । एव । अन्नाद्यमित्यन्न-अद्यम् । दधाति । ऋषिकृतमित्यृषि-कृतम् । च । (३) ।

~~~~~~~~~~~~~~~~~~~~~~~~

'आर्द्रे [32]चर्मन्' इति ॥ आर्द्रचर्मनिमित्तं ब्राह्मणशूद्रौ [33]आकर्षन्तौ [34]कलहं [35]कुरुतः । "आङो यमहनः" (पा १.३.२८) इत्थात्मनेपदम् । 'अन्यः' इत्यादि । तयोः [V]अन्यः [V]आक्रोशति निन्दति सत्रिणः "इम उद्वासीकारिण इमे दुर्भूतमक्रन्" (तैब्रा १.२.६) इति । [V]अन्यः ब्राह्मणः [V]प्रशंसति "इमेऽरात्सुरिमे सुभूतमक्रन्" (तैब्रा १.२.६) इति । "एकान्याभ्याम्°" (पा ६.१.६५) इति प्रथमा तिङ्विभक्तिः [36]न निहन्यते । तथा [V]यः [V]आक्रोशति सः [V]एनान् [37-V]उत्पुनाति शोधयति [-37] । [V]यः [V]प्रशंसति सः [V]पूतेषु एतेषु [V]अन्नाद्यं [V]दधाति ॥

~~~~~~~~~~~~~~~~~~~~~~~~

विस्पष्टमुक्तः - "शूद्रार्यौ चर्मकर्त्रे व्यायच्छेते आर्द्रे श्वेते परिमण्डलेऽन्तर्वेदि [24-] ब्राह्मणो बहिर्वेदि [-24] शूद्र आक्रोशति शूद्रः प्रशंसति ब्राह्मण इमेऽरात्सुरिमे सुभूतमक्रन्निति ब्राह्मण इम दुर्वासीकारिण इमे दुर्भूतमक्रन्निति [25]शूद्रस्तं ब्राह्मणः संजित्याऽऽग्नीध्रे [26]चर्माध्यस्यति" (आपश्रौ २१.१९.९-१२) इति ॥

आऽन्य इति ॥ तत्राऽऽक्रोशं प्रशंसां च क्रमेण विधत्ते - 'आऽन्यः क्रोशति प्राऽन्यः शꣳसति य आक्रोशति पुनात्येवैनान्त्स यः प्रशꣳसति पूतेष्वेवान्नाद्यं दधाति' इति ॥ इमे सत्रानुष्ठायिनो यजमानाः द्रव्यव्ययं कृत्वा सर्वशून्यकारिणोऽतो दुर्व्यापारमकुर्वन्नित्येवम् [V]अन्यः एकः शूद्रः [V]आक्रोशति [27]निन्देत् । [28-] इमे यजमानाः समृद्धिं गताः [29]सद्व्यापारमकुर्वन्नित्येवम् [V]अन्यः एको ब्राह्मणः प्रशंसेत् । तयोर्मध्ये शूद्रः [V]आक्रोशति [-28] [V]सः [V]एनान् यजमानान् शोधयित्वा निष्पापान् करोति । [V]यः ब्राह्मणः [V]प्रशंसति सः च [V]पूतेषु यजमानेषु [V]अन्नाद्यं संपादयति ॥

~~~~~~~~~~~~~~~~~~~~~~~~

३२. मैर - चर्मणि । ३३. अ१ - आकर्षंते । ३४. मैर - अलम् । ३५. मै. मै१. मै३. अ - कुर्वतः । ३६. मै. मै१. मै२. मै३. अ - 'न' नास्ति । ३७-३७. मैर - एतान् पुनाति ।

~~~~~~~~~~~~~~~~~~~~~~~~

२४-२४. उ - 'ब्राह्मणो बहिर्वेदि' नास्ति । २५. अ. पा. हा - शूद्रस्तु । २६. इ. वा - अध्यस्यन्ति, भृ१ - अस्यति । २७. अ. क. पा. हा. उ. भृ१ - निन्देत । २८-२८. इ - 'इमे - - - - आक्रोशति' नास्ति । २९. अ. क. पा. भृ१ - सद्व्यापारमकुर्वन् ।
~~~~~~~~~~~~~~~~~~~~~~~~

वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्भूतेच्छदा९ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाद्ये

वै । एते । देवकृतमिति देव-कृतम् । च । पूर्वैः । मासैः । अवेति । रुन्धते । यत् । भूतेच्छदामिति भूते-छदाम् । सामानि । भवन्ति । उभयस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । यन्ति । वै । एते । मिथुनात् । ये ।

[38-] ऋषिकृतम् ' इत्यादि ॥ ऋषिभिः [-38] कृतं [39][V]च देवैः कृतं [V]च उपकारं दृष्टस्वरूपं [V]पूर्वैः [V]मासैः [V]एते सत्रिणः [V]अवरुन्धते [40-][V]भूतेच्छदां सामभिस्तदुभयमप्यवरुन्धते [-40] मनुष्यकृतं [41][देवकृतं] च दृष्टस्वरूपम् । सर्वत्र " तृतीया कर्मणि " (पा ६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वम् ॥

' यन्ति वै ' इत्यादि ॥ [42-] अवगच्छन्ति खल्वेते मिथुनत्वात् मिथुनशक्तिं जहति [V]ये [V]संवत्सरम् [-42] [V]उपयन्ति, बहुत्वात् [43-] कालस्य व्यपगतमिथुनशक्तिः स्यात् [-43] । तस्मादन्तर्वेदि

ऋषिकृतमिति ॥ अथ कांश्चित् सामविशेषान् विधत्ते - ' ऋषिकृतं च वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्भूतेच्छदा९ सामानि भवन्त्युभयस्यावरुद्ध्यै ' इति ॥ योऽयमृषिभिर्मनुष्यैः कृत उपकारो [30-] यश्च देवैः कृत उपकारः [-30] तदुभयमप्यस्मान्महाव्रतादृगवामयनगतादुपान्त्यादह्नः पूर्वमनुष्ठितैः [V]मासैः यजमानाः प्राप्नुवन्ति । अतो महाव्रतेऽपि तदुभयप्राप्त्यर्थं भूतेच्छन्नामकानामृषीणां संबन्धीनि तैर्दृष्टानि सामानि गातव्यानि ॥

यन्तीति ॥ अथ ब्रह्मचारिपुंश्चल्योर्मिथुनीभावं विधत्ते - ' यन्ति वा एते मिथुनाद्ये संवत्सरमुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यन्ति ' इति ॥ ये यजमानाः संवत्सरसत्रमनुतिष्ठन्ति ते चिरकालब्रह्मचर्याभ्यासान्मिथुनशक्तेरपगच्छन्ति । अतः पुनस्तच्छक्तिप्राप्त्यर्थं वेदिमध्ये ब्रह्मचारिपुंश्चलीरूपौ

३८-३८. मैर - ' ऋषि° - - - - ऋषिभिः ' नास्ति । ३९. मैर - ' च ' नास्ति । ४०-४०. मैर - ' भूतेच्छदां - - - - °रुन्धते ' नास्ति । ४१. [अस्माभिः प्रपूरितोऽयमंशो द्रष्टव्यः ।] । ४२-४२. मैर - ' °गच्छन्ति - - - - संवत्सरम् ' नास्ति । ४३-४३. मैर - कालव्यपगतेन ।

३०-३०. अ. पा. हा. इ. उ. बा. वै - ' यश्च - - - - उपकारः ' नास्ति ।

[अर्क्यसामादिविधिः

संवत्सरमुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यन्ति ॥९॥

(व्यृद्धमक्षोधुकास्ता१ँ समां प्रजाः परमामेव च त्रि१ँशच्च ।)

संवत्सरमिति सं-वत्सरम् । उपयन्तीत्युप-यन्ति । अन्तर्वेदीत्यन्तः-वेदि । मिथुनौ । समिति । भवतः । तेन । एव । मिथुनात् । न । यन्ति ॥९॥

[कासं ३४.५; कपिसं - - - -; मैसं - - - -; शब्रा - - - -]

[४४-] मिथुनौ [V]संभवतः मिथुनकृत्यं सहाचरतः मैथुनं कुरुतः [-४४] पुंश्चली मागधश्च । [V]तेन [V]एव [V]मिथुनात् [४५-]मिथुनभावात् नापगच्छन्ति सत्रिणः ॥

॥ [४६-] इति सप्तमे पञ्चमे नवमोऽनुवाकः [-४६] ॥

मिथुनावयवौ संभवं [३१]कुर्यातां, [V]तेन संभवेन यजमानाः मिथुनशक्तेर्नोपगच्छन्ति । अन्तर्वेदिदेशश्च सूत्रकारेण दर्शितः - " उत्तरस्यां वेदिश्रोण्यां पुंश्चल्यै मागधाय च परिश्रयन्ति " (आपश्रौ २१.१७.१९) इति । मगधदेशोत्पन्नो ब्रह्मचारी मागधः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥

४४-४४. मैर - 'मिथुनौ - - - - कुरुतः' नास्ति । ४५. मैर - 'मिथुनभावात्' नास्ति । ४६-४६. अ१ - सप्तमकाण्डे पञ्चमप्रश्ने दशमोऽनुवाकः ।

३१. हा - कुर्यात्, शृ१ - कुर्वन्ति ।

चर्मावं भिन्दन्ति पाप्मानंमेवैषामवं भिन्दन्ति
माऽपं रात्सीर्माऽतिं व्यात्सीरित्यांह
संप्रत्येवैषां पाप्मानमवं

चर्मं । अवेतिं । भिन्दन्ति । पाप्मानंम् । एव । एषाम् । अवेतिं । भिन्दन्ति । मा । अपेतिं । रात्सीः । मा । अतीतिं । व्यात्सीः । इतिं । आह । संप्रतीतिं सं-प्रति । एव । एषाम् । पाप्मानंम् । अवेतिं ।

‘ चर्माव भिन्दन्ति ’ इत्यादि ॥ पूर्वोक्तं [V]चर्म ब्राह्मणेन [१-] सम्मितमाग्नीध्रेण मारुतं (?)[-१] [२]कवचिनो बाणेन [V]अवभिन्दन्ति । राजपुत्रा इत्येके । [३][V]एषां सत्रिणां [V]पाप्मानम् [V]एव [V]अवभिन्दन्ति अनेन चर्मावभेदेन । [V]मा [४-][V]अपरात्सीः लक्षादन्यत्र [-४] [५]व्यथनं मा कार्षीः । [V]मा[V]अतिव्यात्सीः वेगमतीत्य परस्तात् बाणं माजीगम [V]इति [V]आह, हे [६]विद्ध्यन् । ‘ संप्रत्येव ’ इति । [७][V]संप्रति [८]कृतक्रियमाणकरिष्यमाणसर्वपापक्षयकरत्वं [९]सम्यक्त्वं युक्तरूपं यत् [V]एषाम् इति ॥

नवमेऽनुवाक उत्क्रोदादिकमुक्तम् । अथ दशमे दासीनृत्यमुच्यते ॥

चर्मेति ॥ [१-] तत्रादौ तावत् चर्मवेधनं विधत्ते [-१] - ‘ चर्माऽव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति ’ इति ॥ अत्र [२]वेध्यं चर्म सूत्रकारेण विस्पष्टमुक्तम् - “ उत्तरेणाऽऽग्नीध्रं कटसंघाते [३]तेजनसंघाते वाऽऽर्द्रं चर्म [४]वेधनार्थं वितत्योच्छ्रयन्ति ” (आपश्रौ २१.१८.५) इति । वेधनप्रकारश्च तेनैव स्पष्टमुक्तः - [५-]“ विपरियान्त्येतत् चर्म [-५] कवचिनस्तेषाम् [६]एकैकं [७]संशास्ति माऽपरात्सीर्माऽतिव्यात्सीरिति तत्ते [८]विद्धा नातिपादयन्ति ” (आपश्रौ २१.१९.१३-१५) इति । तेन चर्मवेधनेनैषां यजमानानां [V]पाप्मानम् [V]एव भिन्दन्ति ॥

१-१. मै२. मै - तलटिप्पण्यां - °ग्नीध्रस्य शुभ्रम् । २. मै२ - क्वचिन्नो । ३. मै२ - एवम् । ४-४. मै२ - °रात्सीत् साक्षाद° । ५. मै२ - व्यसनम् । ६. मै. मै१. मै३. अ - वेदिन्, मै२ - तृन् । ७. अ. अ१ - संप्रति सम्यक् । ८. मै२ - °करत्वं अस्येति । ९. अ१ - संप्रतित्वम् ।

१-१. इ. वा - ‘ तत्रादौ - - - - विधत्ते ’ नास्ति । २. अ. आ. पा. हा. इ. उ. वा. वै. म - भेद्यम् । ३. वा - °नसंयाते । ४. इ. वा - व्यपनाथम् । ५-५. क - विपरियन्त्येतच्चर्म, भृ१ - विपरियन्ते तच्चर्म, हा - विपरियान्त्येतच्च कर्म । ६. क - एकैकशः । ७. भृ१ - संयाति । ८. क - विधाना, भृ१ - विधा ।

भिन्दन्त्युदकुम्भानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं

भिन्दन्ति । उदकुम्भानित्युद-कुम्भान् । अधिनिधायेत्यधि-निधाय । दास्यः । मार्जालीयम् । परीति । नृत्यन्ति । पदः । निघ्नतीरिति नि-घ्नतीः । इदंमधुमितीदं-मधुम् । गायन्त्यः । मधु । वै । देवानाम् । परमम् । अन्नाद्यमित्यन्न-अद्यम् ।

'उदकुम्भान्'[१०]इत्यादि ॥ Vउदकुम्भान् शिरसि Vअधिनिधाय Vदास्यः [११]दासकुमार्यः Vमार्जालीयं [१२-] परितः नृत्यन्ति [-१२] Vपदः पदा Vनिघ्नतीः निघ्नन्त्यः [१३]कुटित्वाऽ[भि]नयन्त्यः Vइदंमधुं Vगायन्त्यः 'इदं मधु इदं मधु' इत्येवं गायन्त्यः । केचिदाहुः — [१४-]" इयं वाव सरघा [-१४] । [१५-] तस्या अग्निरेव सारघं [-१५] [१६]मधु" (तैब्रा ३.१०.१०) इत्यादिमन्त्रः इदंमधुशब्देनोच्यते इति ॥

मेति ॥ अथ [९]वेधनात्पूर्वं कवचिष्वध्वर्योः [१०]संशासनं विधत्ते - 'माऽप रात्सीर्माऽति व्यात्सीरित्याह संप्रत्येवैषां पाप्मानमव भिन्दन्ति' इति ॥ हे कवचिंश्चर्मवेधनाय प्रवृत्तस्य बाणस्य स्खलनरूपमपराधं Vमा कार्षीः । अस्खलन्नपि चर्म भित्त्वा परतो बाणगमनरूपम् [११]अतिव्यधनं Vमा कार्षीरित्येवमध्वर्युर्ब्रूयात् । एवं सति Vएषां यजमानानां Vपाप्मानं सम्यगेव Vभिन्दन्ति ॥

उदकुम्भानिति ॥ अथ [१२]नृत्यं विधत्ते - 'उदकुम्भानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमव रुन्धते पदो निघ्नन्ति महीयामेवैषु दधति' इति ॥ अत्र दासीसंख्यां सूत्रकारो दर्शयति - " मार्जालीयस्यान्तेऽष्टौ दासकुमार्य [१३]उदकुम्भैः [१४]निकम्पन्ते" (आपश्रौ २१.१८.७) इति । ता एतास्तान् कुम्भान् शिरसि धृत्वा मार्जालीयस्य [१५]धिष्ण्यस्य परितः Vनृत्यन्ति [१६]नृत्यं कुर्वन्ति । कीदृश्यः Vदास्यः Vपदः Vनिघ्नतीः दक्षिणान् [१७]पादान् भूमौ ताडयन्त्यः

१०. मैर. अ - इति । ११. मैर - ता सुकुमार्यः । १२-१२. मैर - परिनृत्यन्ति । १३. मै - कुटित्वा न यन्त्यः (कुटिलं यन्त्यः), मैर. अ - कुटित्वा न यन्त्यः, अ१ 'कुटित्वाऽ[भि]नयन्त्यः' नास्ति । १४-१४. अ. अ१ - इदमेव सारघम्, मैर - 'इयं - - - - सरघा' नास्ति । १५-१५. अ. अ१ - 'तस्या - - - - सारघम्' नास्ति । १६. अ१ - 'मधु' नास्ति ।

९. वा - विधानात्पूर्वम् । १०. अ. आ. क. पा. हा. इ. वा. वै. म - शासनम् । ११. अ. आ. पा. हा. इ. उ. वा. वै. म - अतिव्यथनम् । १२. अ. पा. हा. इ. वा. शृ१ - नृत्तम् । १३. शृ१ - उदकुम्भेन । १४. आ. क - विकम्पन्ते । १५. अ. पा. हा. शृ१ - धिष्णियस्य । १६. अ. पा. हा. उ. शृ१ - नृत्तम् । १७. अ. पा. हा. इ. उ. वा. वै. शृ१ - 'पादान्' नास्ति ।

दासीनृत्यम्]

परममेवान्नाद्यमव रुन्धते पदो नि घ्नन्ति महीयामेवैषु दधति ॥१०॥

(चर्मैकान्नपञ्चाशत् ।)

परमम् । एव । अन्नाद्यमित्यन्न-अद्यम् । अवेति । रुन्धते । पदः । नीति । घ्नन्ति । महीयाम् । एव । एषु । दधति ॥१०॥

[कासं ३४.५; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

'मधु वै' इत्यादि ॥ गतम् । Vमहीयां [17]पूजाम् । [18]महीङ् कण्ड्वादिर्यगन्तः, (गणपाठ ३४, पा ३.१.२७) ततः [19]" अप्रत्ययात् [19]" (पा ३.३.१०२) इत्यकारप्रत्ययः ॥

॥ इति सप्तमे पञ्चमे दशमोऽनुवाकः ॥

'इदं मधुम्' इत्येतं शब्दं [18]गायन्त्यः । अथवा " इदमेव सारघं मधु " (आपश्रौ २१.१९.१९) इत्यादिमन्त्रं [19]गायन्त्यः । Vमधु च Vदेवानाम् अत्यन्तं प्रियमन्नम् । अतस्तद्गानेन Vपरमम् Vअन्नं प्राप्नुवन्ति । योऽयं पादघातस्तेन Vएषु यजमानेषु Vमहीयां पूजां संपादयन्ति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ॥

१७. अ - पूजां महीयामिति । १८. अ - महीङ्' नास्ति । १९-१९. अ - यततो प्रत्ययात् ।

१८. भृ१ - गायन्ति । १९. भृ१ - गायन्ति ।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा

पृथिव्यै । स्वाहा । अन्तरिक्षाय । स्वाहा । दिवे । स्वाहा । संप्लोष्यत इति सं-प्लोष्यते । स्वाहा । संप्लवमानायेति सं-प्लवमानाय । स्वाहा । संप्लुतायेति सं-प्लुताय । स्वाहा । मेघायिष्यते । स्वाहा । मेघायत इति मेघ-यते । स्वाहा । मेघिताय । स्वाहा । मेघाय । स्वाहा । नीहाराय । स्वाहा । नीहाकाया इति नि-हाकायै । स्वाहा । प्रासचाय । स्वाहा । प्रचलाकाया इति प्र-चलाकायै । स्वाहा ।

अथाश्वमेधे नक्तंहोमाः - ‘पृथिव्यै स्वाहा’ इत्यादयः निगदसिद्धाः ॥ संप्लवनं वर्षार्थमुपक्रमः; त्रैकाल्येन प्रवृत्तिरुच्यते । लृट् व्यत्ययेन [१]परस्मैपदम् । Vमेघायिष्यते मेघान् करिष्यते । “शब्दवैर°” (पा ३.१.१७) इति क्यङ्, व्यत्ययेन परस्मैपदम् । Vमेघायते मेघमात्मन इच्छते । “नच्छन्दस्यपुत्रस्य” (पा ७.४.३५) इतीत्वाभावः । Vमेघिताय

दशमे [१]दासीनृत्यमुक्तम् । तावता महाव्रतं [२]समाप्तम् । अथोत्तरेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते । [३]तत्रापि ★द्वयोरनुवाकयोर्नक्तं होममन्त्राः ॥

पृथिव्या इति ॥ तन्मध्ये प्रथमानुवाकगतान् मन्त्रानाह - ‘पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा वियोतिष्यते स्वाहा वियोतमानाय स्वाहा संवियोतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रं स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते स्वाहाऽनुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते

---

१. मै. मै१. मै२. मै३. अ१ - ‘परस्मैपदम्’ नास्ति ।

---

१. अ. पा. भृ१ - दासीनृत्त° । २ भृ१ - ‘समाप्तम्’ नास्ति । ३. अ. पा. हा. इ. बा - अत्रापि । ★[अस्माभिः शुद्धीकृत्य प्रदत्तोऽयं पाठो द्रष्टव्यः, आ - मुद्रितपुस्तके ‘°कयोरन्नहोम°’, अन्येषु सर्वेष्वपि लिखितपुस्तकेषु ‘°कयोरद्धाहोम°’ इति पाठ उपलभ्यते ।] ।

विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोऽग्रꣳ स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते (१) स्वाहाऽनुवर्षते स्वाहा

विद्योतिष्यत इति वि-द्योतिष्यते । स्वाहा । विद्योतमानायेति वि-द्योतमानाय । स्वाहा । संविद्योतमानायेति सं-विद्योतमानाय । स्वाहा । स्तनयिष्यते । स्वाहा । स्तनयते । स्वाहा । उग्रम् । स्तनयते । स्वाहा । वर्षिष्यते । स्वाहा । वर्षते । स्वाहा । अभिवर्षत इत्यभि-वर्षते । स्वाहा । परिवर्षत इति परि-वर्षते । स्वाहा । संवर्षत इति सं-वर्षते (१) । स्वाहा । अनुवर्षत इत्यनु-वर्षते । स्वाहा ।

सञ्जातमेघाय । इतच्प्रत्ययः " तदस्य सञ्जातम्°" (पा ५.२.३६) इति । [V]मेघाय वर्षहेतवे । निहाका नीहारस्य परा काष्ठा, [2]यत्र निहततरं कोष्ठम्(?) इति प्रयुञ्जते शीतेनार्ताः । तमोऽभिभूताय [V]प्रासचाय नीहारेण संकुचते यत्र जन्तवः शीतेन संकुचिता भवन्ति, तमसा वा निश्चेष्टाः । सर्वत्र पृषोदरादित्वादिष्टरूपसिद्धिः (गणपाठ २३४, पा ६.३.१०९) । प्रचलाका हेमन्तसमाप्तिकालः यत्रेतश्चेतश्च प्रचलन्ति जन्तवः । यद्वा - प्रकर्षेण चलन्ति । विशीर्य शिष्यन्त इति विद्योतनं विरलद्योतनम् । [3-] स्तननं शब्दनम् [-3] । उग्रं उद्गूर्णं [4]श्रवणकटुकम् । वर्षणं [5]धारापातनम् । अभिवर्षणम् उपर्युपरि वर्षणम् । [6]परिवर्षणं सर्वतो वर्षणम् । संवर्षणम् [7]सङ्गतपटलवर्षणम् । [8-] अनुवर्षणं स्थित्वा स्थित्वा वर्षणम् [-8] ॥

स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहाऽऽतप्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा ' इति ॥ पृथिव्यादयस्त्रयो लोकाः । मेघोत्पादनाय धूमज्योतिःसलिलमरुतां संनिपातः संप्लवः । स च त्रिविधः - आगामी वर्तमानो भूतश्च । अश्व एव सर्वात्मकप्रजापत्यभिन्नत्वात् तत्तद्रूपेण निर्दिश्यते । धूमादिसंप्लवादूर्ध्वं भविष्यद्वर्तमानातीतदशापन्ना मेघोत्पत्तिस्त्रिविधा । त्रिष्वप्यनुगताकारो मेघः । मेघनिष्पत्तेरूर्ध्वं [V]द्रप्सपतनं

२. अ - यव । ३-३. अ - शब्दने । ४. अ - श्रवणकरणिकम् । ५. अ१ - रसापातनम् । ६. अ - ' परिवर्षणम् ' नास्ति । ७. अ - स्वागतटेलिवर्षणम् (?) । ८-८. अ - ' अनु° - - - - वर्षणम् ' नास्ति ।

४. शृ१ - नीहारः ।

शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहाऽऽतप्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा

शीकायिष्यते । स्वाहा । शीकायत इति शीक-यते । स्वाहा । शीकिताय । स्वाहा । प्रोषिष्यते । स्वाहा । प्रुष्णते । स्वाहा । परिप्रुष्णत इति परि-प्रुष्णते । स्वाहा । उद्ग्रहीष्यत इत्युत्-ग्रहीष्यते । स्वाहा । उद्गृह्णत इत्युत्-गृह्णते । स्वाहा । उद्गृहीतायेत्युत्-गृहीताय । स्वाहा । विप्लोष्यत इति वि-प्लोष्यते । स्वाहा । विप्लवमानायेति वि-प्लवमानाय । स्वाहा । विप्लुतायेति वि-प्लुताय । स्वाहा । आतप्स्यत इत्या-तप्स्यते । स्वाहा । आतपत इत्या-तपते । स्वाहा । उग्रम् । आतपत इत्या-तपते । स्वाहा । ऋग्भ्य इत्यृक्-भ्यः । स्वाहा ।

[V]शीकायिष्यते [९-] शीकां करिष्यते [-९] वृष्ट्युत्तरकालं [१०]सिमसिमसिमाकरणं शीकाकरणम् । अन्य आह —– वर्षहेतुकं शैत्यं शीकीकरणमिति । [V]शीकायते शीकमिच्छते । [V]शीकिताय सञ्जातशीकाय । प्रोषणं पूरणादि । “[卐]पूष प्लुहस्नेहसेचनपूरणेषु” । [११]उद्ग्रहणं वर्षस्योपरमः; मेघानां वा वर्षोत्तरकालं ऊर्ध्वनयनम् । संप्लावो मेघानामप्युपरमः । विप्लवः प्रतीपकः । आतपनं रविकिरणैः सर्वतो दाहः । ऋचः पादबद्धा मन्त्राः । [१२]अपादानि यजूंषि । सामानि

नीहारः । द्रप्सानां [५]बाहुल्येन ईषदन्धकारापादनं निहाका । तदीयशैत्येनावयवसंकोचः प्रासचः । संकोचादूर्ध्वं पलायनं प्रचलाका । तत ऊर्ध्वं भविष्यदादिरूपेण त्रिविधा विद्युत् । तथा गर्जनस्याप्यवस्थात्रयम् । वृष्टेरपि तद्वदवस्थात्रयम् । तत्र तृतीयस्यामवस्थायां चत्वारो भेदाः - वायुवशादाभिमुख्येन वर्षणम् [६]अभिवर्षणं, परितो मण्डलाकारेण वर्षणं परिवर्षणम्, ऋजुधारारूपं [७]संवर्षणम्, गच्छतः पुरुषस्य पृष्ठतो वर्षणमनुवर्षणं चेति । वृष्टिक्लिन्नस्य पुरुषस्य त्रिविधा शैत्यावस्था शीकायनम् । धर्मकाले संतप्तायां भूमौ प्रथमवृष्टेरवसाने समुत्थित उष्मा प्रोषः । सोऽपि दशात्रयात्पन्नः । वृष्टेरुपरम उद्ग्रहणं, तदपि त्रिविधम् । तत ऊर्ध्वं मेघलेशानामपगमनं विप्लवः । सोऽपि त्रिविधः । मेघलेशेष्वपगतेषु सूर्यप्रकाशसंचार आतपः । सोऽपि

९- ९. अ१ - ‘शीकां करिष्यते’ नास्ति । १०. अ - असिमसिमसिमाकारणम् । 卐(धातुरयं पाणिनीये धातुपाठे नोपलभ्यते ।)११. अ - उद्ग्रहग्रहणम् । १२. मै. मै१. मै२. मै३. अ१ - अपदानि ।

---

५. वा - बाहुल्यम् । ६. भृ१ - ‘अभिवर्षणम्’ नास्ति । ७. उ - संकर्षणम् ।

यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा(२) सर्वस्मै स्वाहा ॥१॥

(संवर्षते रैभीभ्यः स्वाहा द्वे च ।)

~~~~~~~~~~~~~~~~~~~~

यजुर्भ्य इति यजुः-भ्यः । स्वाहा । सामभ्य इति साम-भ्यः । स्वाहा । अङ्गिरोभ्य इत्यङ्गिरः-भ्यः । स्वाहा । वेदेभ्यः । स्वाहा । गाथाभ्यः । स्वाहा । नाराशꣳसीभ्यः । स्वाहा । रैभीभ्यः । स्वाहा (२) । सर्वस्मै । स्वाहा ॥११॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

~~~~~~~~~~~~~~~~~~~~

गीतयः । अङ्गिरोभिर्दृष्टाः शाखाविशेषाः अङ्गिरोविधायकाः । गाथाः वैदिकाः श्लोकाः अविधायकाः । नरैः शंसनीया देवताविशेषाः नाराशंसाः, तत्सम्बन्धिन्यः ऋचः नाराशंस्यः । रेभः शब्दकृदग्निः । तदीया ऋचः रैभ्यः । ऊत्सादिलक्षणोऽञ् । गोबलीवर्दन्यायेन व्यतिरिक्तविषयः ऋक्छब्दोऽत्र द्रष्टव्यः ॥

॥ इति सप्तमे पञ्चमे एकादशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

त्रिविधः । पादबद्धा मन्त्रा ऋचः । ८प्रश्लिष्टपठितानि यजूंषि । गीत्यात्मकानि सामानि । अङ्गिरोभिर्मुनिभिर्दृष्टाश्चतुर्थवेदोत्पन्ना अङ्गिरसः । विधिभागैः सहितास्ते सर्वे वेदाः । ९देवताविषयाख्यानपरा मन्त्रा गाथाः । मनुष्यविषयाख्यानपरा ऋचो नाराशंस्यः । रेभः शब्दकृदग्निस्तद्विषया ऋचो रैभ्यः । अनुक्तसंग्रहार्थः सर्वशब्दः । एतैः पञ्चाशन्मन्त्रैरात्रावन्नहोमाः कार्याः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~

८. अ. पा. हा. इ. वा - '°ष्टप्रगीतानि, आ - तलटिप्पण्याम् - °ष्टप्रणीतानि । ९. भृ१ - देवताख्यान° ।

दत्वते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्षण्वते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा

दत्वते । स्वाहा । अदन्तकाय । स्वाहा । प्राणिने । स्वाहा । अप्राणाय । स्वाहा । मुखवत इति मुख-वते । स्वाहा । अमुखाय । स्वाहा । नासिकवत इति नासिक-वते । स्वाहा । अनासिकाय । स्वाहा । अक्षण्वत इत्यक्षण्-वते । स्वाहा । अनक्षिकाय । स्वाहा । कर्णिने । स्वाहा । अकर्णकाय । स्वाहा । शीर्षण्वत इति शीर्षण्-वते । स्वाहा । अशीर्षकाय । स्वाहा । पद्वत इति पत्-वते । स्वाहा । अपादकाय । स्वाहा । प्राणत इति प्र-अनते । स्वाहा । अप्राणत इत्यप्र-अनते । स्वाहा । वदते । स्वाहा । अवदते । स्वाहा ।

पुनरपि नक्तंहोमेष्वेव शरीरहोमाः - 'दत्वते' इत्याद्याः ॥ प्रशंसादिषु मतुप् । [१-] नञा च तत्तदपेक्षा [-१] प्रतिषिध्यते । देवताभूतस्य दन्ताद्यपेक्षाभावात् । यद्वा - अदन्तकादिबहुप्रकारा । बहुरूपेणाश्वः स्तूयते । V दत्वते । [२-] "ह्रस्वनुड्भ्याम्°" (पा ६.१.१७६) इति [-२] मतुप उदात्तत्वम् अविभक्तेरपि दृश्यते । यथा - "अवसायं पद्वते रुद्र मृड" (तैसं ७.४.१७) इति । V अदन्तकाय । "नञ्सुभ्याम्" (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् । [३-] एवं सर्वत्र [-३] । V नासिकवते । "ङ्यापोः°" (पा ६.३.६३) इति ह्रस्वत्वम् । अक्षण्वते । "छन्दस्यपि दृश्यते" (पा ७.१.७६) इत्यनङि "अनो नुट्" (पा ८.२.१६), "ह्रस्वनुड्भ्यां मतुप्" (पा ६.१.१७६) इति मतुप

अथ शरीरहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम् - "दत्वते स्वाहाऽदन्तकाय स्वाहेति शरीरहोमाञ्जुहोति" (तैब्रा ३.८.१८) इति ॥

दत्वत इति ॥ पाठस्तु - 'दत्वते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्षण्वते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने

१-१. अ - अन्ता च तदुपेक्षा । २-२. अ - ऊडिदम् इति । ३-३. अ१ - 'एवं सर्वत्र' नास्ति ।

पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने स्वाहा-(१)ऽमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वक्काय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा

पश्यते । स्वाहा । अपश्यते । स्वाहा । शृण्वते । स्वाहा । अशृण्वते । स्वाहा । मनस्विने । स्वाहा (१) । अमनसे । स्वाहा । रेतस्विने । स्वाहा । अरेतस्कायेत्यरेतः-काय । स्वाहा । प्रजाभ्य इति प्र-जाभ्यः । स्वाहा । प्रजननायेति प्र-जननाय । स्वाहा । लोमवत इति लोम वते । स्वाहा । अलोमकाय । स्वाहा । त्वचे । स्वाहा । अत्वक्काय । स्वाहा । चर्मण्वत इति चर्मण्-वते । स्वाहा । अचर्मकाय । स्वाहा । लोहितवत इति लोहित-वते । स्वाहा । अलोहिताय । स्वाहा ।

उदात्तत्वम् । [V]शीर्षण्वते । " शीर्षञ्छन्दसि " (पा ६.१.६०) [4]इति [5]पूर्ववन्नुट्स्वरौ । [V]पद्वते, दत्वत इति वत् । [V]प्राणते । " शतुरनुमः°" (पा ६.१.१७३) इति विभक्त्या उदात्तत्वम् । [6][V]अप्राणते, अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

[V]मनस्विने । " अस्मायामेधा°" (पा ५.२.१२१) इति विनिः । [V]अमनसे । " नञ्सुभ्याम् " (पा ६.२.१७२) इत्युत्तरपदान्तोदात्तत्वम् । [7-][V]त्वचे " सावेकाचः°" (पा ६.१.१६८)

स्वाहाऽमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वक्काय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा माꣳसन्वते स्वाहाऽमाꣳसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहाऽस्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मने स्वाहा सर्वस्मै स्वाहा ' इति ॥ दन्ता अस्य सन्तीति दत्वान् । न विद्यन्ते दन्ता यस्यासावदन्तकः । एवं सर्वत्र विधिनिषेधौ [1]योजनीयौ । जगति हि जीवा द्विविधाः

४. अ१ - ' इति ' नास्ति । ५. अ - पूर्वानुस्वारौ । ६. अ - ' अप्राणते ' नास्ति । ७-७. अ - ' त्वचे - - - - °दात्तत्वम् ' नास्ति ।

१. भृ१ - योज्यौ ।

माꣳसन्वते स्वाहाऽमाꣳसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहाऽस्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मनेस्वाहा (२) सर्वस्मै स्वाहा ॥१२॥

(मनस्विने स्वाहाऽनात्मने स्वाहा द्वे च ।)

माꣳसन्वत इति माꣳसन्-वते । स्वाहा । अमाꣳसकाय । स्वाहा । स्नावभ्य इति स्नाव-भ्यः । स्वाहा । अस्नावकाय । स्वाहा । अस्थन्वत इत्यस्थन्-वते । स्वाहा । अनस्थिकाय । स्वाहा । मज्जन्वत इति मज्जन्-वते । स्वाहा । अमज्जकाय । स्वाहा । अङ्गिने । स्वाहा । अनङ्गाय । स्वाहा । आत्मने । स्वाहा । अनात्मने । स्वाहा (२) । सर्वस्मै । स्वाहा ॥१२॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

इति विभक्तेरुदात्तत्वम् [७] । [V]चर्मण्वते, उक्तौ नुट्स्वरौ (पा ६.१.६०) । [V]मांसन्वते । छान्दसोऽनङादेशः, स्वरः पूर्ववत् । [V]अस्थन्वते " छन्दस्यपि दृश्यते " (पा ७.१.७६) इत्यनङ्, नुट्स्वरौ पूर्ववत् । एवं मज्जन्वते ॥

॥ [८] इति सप्तमे पञ्चमे द्वादशोऽनुवाकः [८] ॥

तत्तदवयवयोपेतास्तद्विकलाश्चेति । अश्वस्य प्राजापत्यत्वेन सर्वात्मकतामभिप्रेत्यैतानि विशेषणान्युच्यन्ते । तत्र दन्तयुक्ता जीवाः प्रसिद्धाः । अत्यन्तं बाला वृद्धास्तद्रहिताः । प्राणिनो जङ्गमा अप्राणिनो स्थावराः । वक्ष्यमाणा निषेधास्तत्तदवयवराहित्येन [२]वा सत्यप्यवयवे तदसौकर्येण वोदाहरणीयम् । [३] त्वगिन्द्रियं, चर्म तदाधारभूतं गोलकम् [३] ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥

८-८. मै१ - इति प्रथमे द्वादशः ।

२. अ. पा. हा - च । ३-३. क - त्वगिन्द्रियं - - - - गोलकम् ' नास्ति ।

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा
युनक्त्वस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या
अमुष्मै कामायाऽऽयुषे त्वा प्राणाय
त्वाऽपानाय त्वा व्यानाय त्वा

कः । त्वा । युनक्ति । सः । त्वा । युनक्तु । विष्णुः । त्वा । युनक्तु ।
अस्य । यज्ञस्य । ऋद्ध्यै । मह्यम् । संनत्या इति सं-नत्यै ।
अमुष्मै । कामाय । आयुषे । त्वा । प्राणायेति
प्र-अनाय । त्वा । अपानायेत्यप-अनाय ।
त्वा । व्यानायेति वि-अनाय । त्वा ।

अथ [1]परिधिमन्त्राः - 'कस्त्वा' इति ॥ तत्र 'अमुष्मै कामाय' इत्यन्ताः षट् मध्ये । 'आयुषे त्वा' इत्यारभ्य 'रय्यै त्वा' इत्यन्ताः दक्षिणे षट् । शेषाः पञ्च 'राधसे' इत्याद्याः उत्तरे । कः प्रजापतिरेव त्वा युनक्ति योक्तुमर्हति । तस्मात् सः एव त्वा युनक्तु यस्तस्यापि योक्ता अस्य यज्ञस्य समृद्ध्यै मम च संतत्यै सर्वो मां प्रति संनमेदिति अमुष्मै

अतीतयोरनुवाकयोः पञ्चाशन्मन्त्रैरेकपञ्चाशन्मन्त्रैश्च [1]साध्या [2]अन्नहोमा उक्ताः । अथ परिधिमन्त्रा उच्यन्ते ॥

कस्त्वेति ॥ कल्पः - "कस्त्वा [3]युनक्ति स त्वा युनक्त्विति परिधीन् युनक्तु [4]अस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या इति सर्वत्रानुषजति" (आपश्रौ २०.९.४-५) इति [4]॥ पाठस्तु - 'कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाऽराद्घोषाय त्वा प्रच्युत्यै त्वा' इति ॥ हे मध्यमपरिधे, कः प्रजापतिः त्वां युनक्ति वह्निसमीपे योजयति । हे दक्षिणपरिधे, सः प्रजापतिस्त्वां

---

१. मै. मै१ - °मन्त्रः ।

---

१. अ. आ. क. पा. हा - सह । २. ['नक्तं होमाः' 'इति संभाव्यते ।] । ३. भृ१ - युनक्ति इति । ४-४. भृ१. हा - 'अस्य - - - - इति ' नास्ति ।

व्यु॑ष्ट्यै त्वा र॒य्यै त्वा॒ राध॑से त्वा॒ घोषा॑य त्वा॒ पोषा॑य त्वाऽऽराद्घो॒षाय॑ त्वा॒ प्रच्यु॑त्यै त्वा ॥१३॥

(कौऽष्टात्रि॑ꣳशत् ।)

**व्यु॑ष्ट्या॒ इति॒ वि-उ॒ष्ट्यै॒ । त्वा॒ । र॒य्यै । त्वा॒ । राध॑से ।
त्वा॒ । घोषा॑य । त्वा॒ । पोषा॑य । त्वा॒ ।
आ॒रा॒द्घो॒षा॒येत्या॑रात्-घो॒षाय॑ । त्वा॒ ।
प्रच्यु॑त्या॒ इति॒ प्र-च्यु॒त्यै॒ । त्वा॒ ॥१३॥**

[कासं, अश्वमेध ५.९ ; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

कामाय प्रजायै वा । अमुष्मा इत्यत्राभीष्टः कामो निर्देष्टव्यः । राधोऽन्नम् । घोषः [२] कीर्तिः । पोषः [२] पश्वादेः । आराद्घोषः आरात् शब्दग्राहित्वम् । प्रच्युतिः सर्वदुःखनिवृत्तिः; प्रकृष्टा वा च्युतिर्गतिः स्वर्गाख्या ॥

॥ इति सप्तमे पञ्चमे त्रयोदशोऽनुवाकः ॥

[V]युनक्तु । हे उत्तरपरिधे, [V]विष्णुः त्वां [V]युनक्तु । किमर्थम् ? अस्य [V]यज्ञस्य समृद्ध्यर्थम् । तथा [V]मह्यं [V]संनत्यै मां प्रति सर्वेषां प्राणिनां संनमनाय, [V]अमुष्मै प्रजादिरूपाय [V]कामाय, [V]आयुषे आयुर्वृद्धये त्वामहं युनज्मि । एवं सर्वत्राध्याहारः । प्राणापानव्यानाः प्रसिद्धाः । व्युष्टिः प्रभातम् । रयिर्धनम् । राधोऽन्नम् । घोषः कीर्तिः । पोषः पश्वादिपुष्टिः । आराद्घोषो [५]दूरशब्दवाचित्वम् । प्रच्युतिः सर्वदुःखनिवृत्तिः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः ॥

२-२. अ - 'कीर्तिः पोषः' नास्ति ।

५. क - आराच्छब्द इह दूरवाची, पा - दूरशब्दग्राहित्वम्, हा - दूरशब्दग्राही त्वाम्, शृ१ - दूरे शब्दे ग्राहित्वम् ।

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकवि९शाभ्यां वैराजाभ्या९ शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय

अग्नये । गायत्राय । त्रिवृत इति त्रि-वृते । राथन्तरायेति राथं-तराय । वासन्ताय । अष्टाकपाल इत्यष्टा-कपालः । इन्द्राय । त्रैष्टुभाय । पञ्चदशायेति पञ्च-दशाय । बार्हताय । ग्रैष्माय । एकादशकपाल इत्येकादश-कपालः । विश्वेभ्यः । देवेभ्यः । जागतेभ्यः । सप्तदशेभ्य इति सप्त-दशेभ्यः । वैरूपेभ्यः । वार्षिकेभ्यः । द्वादशकपाल इति द्वादश-कपालः । मित्रावरुणाभ्यामिति मित्रा-वरुणाभ्याम् । आनुष्टुभाभ्यामित्यानु-स्तुभाभ्याम् । एकवि९शाभ्यामित्येक-वि९शाभ्याम् । वैराजाभ्याम् । शारदाभ्याम् । पयस्या । बृहस्पतये । पाङ्क्ताय । त्रिणवायेति त्रि-नवाय । शाक्वराय ।

अथ तत्रैव दशाहविषमिष्टिं विदधाति - 'अग्नये गायत्राय' इति ॥ देवतया छन्दसा स्तोमेन साम्ना ऋतुना विशेष्यते । सहोत्पत्त्यादिकृतः सम्बन्धविशेषः सर्वत्राग्न्यादीनां, गायत्र्यादीनां च क्वचित्प्राथम्यादिकृतश्च । सर्वत्राद्युदात्ता उत्साद्यञन्ता (गणपाठ ५२, पा ४.१.८६) द्रष्टव्याः । अन्ये एताः पञ्चदशादयः "स्तोमे डविधिः" (पा ५.१.५८ वा) इति डान्ताः । ऋतुभ्यः ऋत्वण् । वसन्तात्तु "सर्वत्राण्च°" (पा ४.३.२२) इति चकारात् । अष्टाकपालादयः तद्धितार्थे द्विगवः । "अध्यर्धपूर्वद्विगोः°" (पा ५.१.२८) इति प्रत्ययस्य लुकि "इगन्तकाल°" (पा ६.२.२९) इति पूर्वपदप्रकृतिस्वरत्वम् । Vवार्षिकेभ्यः । "छन्दसि ठञ्" (पा ४.३.१९) इति ठञ् ॥

अग्नय इति ॥ यदुक्तं सूत्रकारेण - 'अग्नये गायत्रायेति दशहविष९ सर्वपृष्ठां निर्वपति" (आपश्रौ २०.९.२) इति, तदिदं विधत्ते - 'अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकवि९शाभ्यां वैराजाभ्या९ शारदाभ्यां पयस्या बृहस्पतये

हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः ॥१४॥

(अग्नयेऽदित्या अनुमत्यै सप्तचत्वारिंशत् ।)

हैमन्तिकाय । चरुः । सवित्रे । आतिच्छन्दसायेत्याति-छन्दसाय । त्रयस्त्रिंशायेति त्रयः-त्रिंशाय । रैवताय । शैशिराय । द्वादशकपाल इति द्वादश-कपालः । अदित्यै । विष्णुपत्न्या इति विष्णु-पत्न्यै । चरुः । अग्नये । वैश्वानराय । द्वादशकपाल इति द्वादश-कपालः । अनुमत्या इत्यनु-मत्यै । चरुः । कायः । एककपाल इत्येक-कपालः ॥१४॥

[कासं, अश्वमेध ५.१० ; कपिसं - - - - ; मैसं ५.१५.१०; वासं २९.६०]

[V]पयस्या पयसि आमिक्षा । बृहस्पतिः । पारस्करादिः (गणपाठ २०६, पा ६.१.१५७) । [1V]हैमन्तिकाय " हेमन्ताच्च " (पा ४.३.२१) इति [2] ठञ् । [V]सवित्रे [2], " उदात्तयणः॰" (पा ६.१.१७४) इति चतुर्थ्या उदात्तत्वम् । [V]विष्णुपत्न्यै, " विभाषा सपूर्वस्य " (पा ४.१.३४) इति बहुव्रीहौ [3]ङीब्-नकारौ । कायः, ' कस्येत् ' (पा ४.२.२५) ॥

॥ इति सप्तमे पञ्चमे चतुर्दशोऽनुवाकः ॥

पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः ' इति ॥ अत्र षट्सु हविःषु च्छन्दसा स्तोमेन साम्नर्तुना च देवता विशेष्यते । पयसि भवाऽऽमिक्षा पयस्या ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः ॥

१. अ - ' हैमन्तिकाय ' नास्ति । २-२. अ - मन्त्रसंवित्रे । ३. अ - दीप्तिकारेण ।

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यत् संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां पशून् यजमानस्याभि मन्येत यत् संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनैवैनꣳ शमयति नास्य रुद्रोऽशान्त (१) उपोत्थाय प्रजां पशूनभि मन्यते

यः । वै । अग्नौ । अग्निः । प्रह्रियत इति प्र-ह्रियते । यः । च । सोमः । राजा । तयोः । एषः । आतिथ्यम् । यत् । अग्नीषोमीय इत्यग्नी-सोमीयः । अथ । एषः । रुद्रः । यः । चीयते । यत् । संचित इति सं-चिते । अग्नौ । एतानि । हवीꣳषि । न । निर्वपेदिति निः-वपेत् । एषः । एव । रुद्रः । अशान्तः । उपोत्थायेत्युप-उत्थाय । प्रजामिति प्र-जाम् । पशून् । यजमानस्य । अभीति । मन्येत । यत् । संचित इति सं-चिते । अग्नौ । एतानि । हवीꣳषि । निर्वपतीति निः-वपति । भागधेयेनेति भाग-धेयेन । एव । एनम् । शमयति । न । अस्य । रुद्रः । अशान्तः (१) । उपोत्थायेत्युप-उत्थाय । प्रजामिति प्र-जाम् । पशून् । अभीति । मन्यते ।

अथैषां ब्राह्मणं - 'यो वै ' इत्यादि ॥ [V]यः अयम् [V]अग्नौ अग्निं मथित्वा प्रणीयते [V]यः [V]च [V]सोमः [V]राजा [V]तयोः [V]एषः [V]आतिथ्यं यः अग्नीषोमीयपशुः । ' अथैषः ' इत्यादि । [V]एतानि [V]हवींषि " अग्नये गायत्राय " (तैसं ७.५.१४) इत्यादीनि । [V]अशान्तः क्रुद्धः [V]अभिमन्येत नाशयेत् ॥

यो वा इति ॥ एतेषां हविषामुत्पत्तिमभिधाय प्रयोगं विधत्ते - ' यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यत् संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां पशून् यजमानस्याभि मन्येत यत् संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनेवैनꣳ शमयति नास्य रुद्रोऽशान्त उपोत्थाय प्रजां पशूनभि मन्यते ' इति ॥ आधानसिद्धे [V]अग्नौ [V]यः [1][V]अन्यः [V]अग्निः मथित्वा [2][V]प्रह्रियते, [V]यः अपि [V]सोमः [V]राजा वल्लीरूपः स्थापितस्तयोरुभयोर्योऽयम् [V]अग्नीषोमीयः पशुः [V]एषः एव [V]आतिथ्यम् । तेन सत्कारेण तावुभौ तुष्टौ । अथ योऽयमग्निश्चयनेन निष्पाद्यते सः [V]एषः [V]रुद्रः क्रूरो वर्तते । यदि तस्मिन् [V]संचिते [V]अग्नौ [V]एतानि यथोक्तानि [V]हवींषि [V]न

---

१. भृ१ - ' अन्यः ' नास्ति । २. आ - प्रह्रियते ।

दश हवी९षि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवी९षि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते

दश । हवी९षि । भवन्ति । नव । वै । पुरुषे । प्राणा इति प्र-अनाः । नाभिः । दशमी । प्राणानिति प्र-अनान् । एव । यजमाने । दधाति । अथो इति । दशाक्षरेति दश-अक्षरा । विराडिति वि-राट् । अन्नम् । विराडिति वि-राट् । विराजीति वि-राजि । एव । अन्नाद्य इत्यन्न-अद्ये । प्रतीति । तिष्ठति । ऋतुभिरित्यृतु-भिः । वै । एषः । छन्दोभिरिति छन्दः-भिः । स्तोमैः । पृष्ठैः । चेतव्यः । इति । आहुः । यत् । एतानि । हवी९षि । निर्वपतीति निः-वपति । ऋतुभिरित्यृतु-भिः । एव । एनम् । छन्दोभिरिति छन्दः-भिः । स्तोमैः । पृष्ठैः । चिनुते ।

'दश हवींषि' इत्यादि ।। [१]- गतम् ।।

'ऋतुभिर्वै' -[१] इत्यादि ।। एषां हविषां निर्वापेन ऋत्वादिभिः एष चितो भवतीति । 'दिशः' इत्यादि । Vसुषुवाणेन सोमं [२]सुतवता, ऐश्वर्यप्राप्तेन वा । 'अभिजित्याः' इत्यादि । अभिजेतव्याः । छान्दसः क्यप्, कृदुत्तरपदप्रकृतिस्वरत्वम् । Vअभिजित्यै, "तादौ च°" (पा ६.२.५०) इति गतेः प्रकृतिस्वरत्वम् ।।

Vनिर्वपेत् तदानीम् Vएव क्रूरोऽतिक्रुद्धः सन् समीपमागत्य Vयजमानस्य Vप्रजां Vपशून् हिंस्यात् । तन्निर्वापे तु स्वकीयभागेन तुष्टो न हिनस्ति ।।

दशेति ।। पाठप्राप्तां हविःसंख्यां प्रशंसति - 'दश हवी९षि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठन्ति' इति ।।

ऋतुभिरिति ।। देवताविशेषणानि प्रशंसति - 'ऋतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवी९षि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते' इति ।। ऋतवो वसन्ताद्याः । छन्दांसि गायत्र्यादीनि । स्तोमास्त्रिवृदादयः । पृष्ठानि रथन्तरादीनि । एतेषां देवताविशेषणत्वेन उपात्तत्वादृत्वादिभिरेवाग्निश्चितो भवति ।।

१-१. अ - 'गतम् ऋतुभिर्वा' नास्ति । २. अ - सुधाता ।

दिशः सुषुवाणेना(२)भिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन् तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति

दिशः । सुषुवाणेन (२) । अभिजित्या इत्यभि-जित्याः । इति । आहुः । यत् । एतानि । हवीꣳषि । निर्वपतीति निः-वपति । दिशाम् । अभिजित्या इत्यभि-जित्यै । एतया । वै । इन्द्रम् । देवाः । अयाजयन् । तस्मात् । इन्द्रसव इतीन्द्र-सवः । एतया । मनुम् । मनुष्याः । तस्मात् । मनुसव इति मनु-सवः । यथा । इन्द्रः । देवानाम् । यथा । मनुः । मनुष्याणाम् । एवम् । भवति ।

'एतया वै' इत्यादि ॥ गतम् । [V]मनुष्याः अयाजयन्नित्येव । [V]दिग्वतीः दिक्शब्दवत्यः "समिद्दिशामाशया नः" (तैसं ४.४.१२) इत्याद्याः ॥

॥ इति सप्तमे पञ्चमे पञ्चदशोऽनुवाकः ॥

दिश इति ॥ अथ हवींषि प्रशंसति - 'दिशः सुषुवाणेनाभिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्यै' इति ॥ सुषुवाणेन सोमं सुषुवाणेन [V]दिशः जेतव्याः । प्राच्यादीनां चतुर्दिशामाग्नेय्यादीनां [3]चतुर्दिशामूर्ध्वाधोदिशोश्च मिलित्वा दशसंख्योपेतत्वाद्दशभिर्हविर्भिस्तासामभिजयः ॥

एतयेति ॥ अथ [4]दशहविःसंघातरूपामेतां सर्वपृष्ठेष्टिं प्रशंसति - 'एतया वा इन्द्रं देवा अयाजयन् तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते' इति ॥ सूयते ऐश्वर्यं प्राप्यते येनासौ सवः । इन्द्रस्यैश्वर्यहेतुः [V]इन्द्रसवः । एवं [V]मनुसवः अप्ययं यज्ञः । तेन यजमानस्ताभ्यामुभाभ्यां सदृशमैश्वर्यं प्राप्नोति ॥

३. अ. पा. हा. उ - °दिशश्च । ४. शृ१ - °रूपामेतेषाम् ।

य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै ॥१५॥

(अशान्तः सुषुवाणेनैकचत्वारिꣳशच्च ।)

यः । एवम् । विद्वान् । एतया । इष्ट्या । यजते । दिग्वतीरिति दिक्-वतीः । पुरोनुवाक्या इति पुरः-अनुवाक्याः । भवन्ति । सर्वासाम् । दिशाम् । अभिजित्या इत्यभि-जित्यै ॥१५॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; शब्रा ९.४.३.११]

दिग्वतीरिति ॥ एतेषु दशसु हविःषु "समिद्दिशामाशया नः" (तैसं ४.४.१२) इत्यनुवाकोक्ता दिक्शब्दयुक्ता याज्यानुवाक्या विधत्ते - 'दिग्वतीः पुरोनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै' इति ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः ॥

पूर्वमहिमाख्यग्रहमन्त्रः]

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

यः । प्राणत इति प्र-अनतः । निमिषत इति नि-मिषतः । महित्वेति महि-त्वा ।
एकः । इत् । राजा । जगतः । बभूव ।
यः । ईशे । अस्य । द्विपद इति द्वि-पदः । चतुष्पद इति चतुः-पदः ।
कस्मै । देवाय । हविषा ।

अथ वर्णेन महिमानं गृह्णाति - 'यः प्राणतः' इति त्रिष्टुभा उपरिष्टादुपयामया ॥ इयं च व्याख्याता " ऊर्ध्वा अस्य समिधः " (तैसं ४.१.८) इत्यत्र । [V]यः [V]प्राणतः [V]निमिषतः च [V]जगतः निजमाहात्म्येन [V]यः [V]एकः एव [V]राजा [V]बभूव, यश्चेष्टे [V]अस्य [V]द्विपदः [१-V]चतुष्पदः [V]कस्मै [-१] अज्ञातव्रतस्वभावाय [V]देवाय [V]हविषा परिचरेम । उपयामः पृथिवी । तयैव गृहीतः [V]असि । [V]प्रजापतये [V]जुष्टं प्रियं च [V]गृह्णामि । [V]तस्य [V]ते द्यौः [V]महिमा द्यौरिव

य इति ॥ कल्पः - " यः प्राणतो य आत्मदा इति [१]महिमानौ जुहोति राजतेन पूर्वं॰ सौवर्णेनोत्तरम् " (आपश्रौ २०.१३.२) इति ॥ तत्र पूर्वस्य महिमाख्यग्रहस्य मन्त्रं [२]दर्शयति - 'यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा' इति । [V]यः प्रजापतिः [V]एकः [V]इत् स्वयमेक एव [V]प्राणतः श्वासयुक्तस्य [V]निमिषतः चक्षुर्निमेषयुक्तस्य च [V]जगतः [V]महित्वा स्वमहिम्ना [V]राजा [V]बभूव [V]यः च प्रजापतिः [V]अस्य [V]द्विपदः मनुष्यादेः [V]चतुष्पदः [३]गवाश्वादेश्च [V]ईशे स्वामी भवति, [V]कस्मै [V]देवाय यस्मै कस्मैचित् प्राकृतप्राणिभिरनिश्चितरूपाय तादृशाय

१-१. अ - 'चतुष्पदः कस्मै' नास्ति ।

---

१. उ - महिमानम् । २. भृ१ - पठति । ३. अ. आ. क. पा. हा. इ. उ. वा. वै - गवादेश्च ।

[पूर्वमहिमाख्यग्रहमन्त्रः

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥१६॥

(यः प्राणतो द्यौरादित्योऽष्टात्रिꣳशत् ।)

विधेम । उपयामगृहीत इत्युपयाम - गृहीतः । असि । प्रजापतय इति प्रजा-पतये । त्वा । जुष्टम् । गृह्णामि । तस्य । ते । द्यौः । महिमा । नक्षत्राणि । रूपम् । आदित्यः । ते । तेजः । तस्मै । त्वा । महिम्ने । प्रजापतय इति प्रजा-पतये । स्वाहा ॥१६॥

[कासं, अश्वमेध ५.१३; कपिसं - - - -; मैसं ३.१२.१६-१७; वासं २३.३]

महांस्त्वमसि । [V]नक्षत्राणि तव [V]रूपं तव बिभ्रति । एतावन्ति वा तव रूपाणि । [V]आदित्यः [V]ते [V]तेजः आदित्योऽपि त्वया तेजस्वी भवति । एवं गृहीत्वा जुहोति । [V]तस्मै तादृशाय महिमवते [V]प्रजापतये [V]त्वा जुहोमीति स्वाहुतं करोमीति ॥

॥ इति सप्तमे पञ्चमे षोडशोऽनुवाकः ॥

प्रजापतिरूपाय देवायानेन [V]हविषा परिचरेम । [४] हे प्रजापते [-४], [V]तस्य [V]ते तादृशस्य तव [V]द्यौः [V]महिमा द्युलोक एवायं महिमाख्यग्रहो दृश्यमानानि [V]नक्षत्राणि तव [V]रूपम् । [V]आदित्यः त्वदीयं [V]तेजः । हे ग्रह, त्वां [V]तस्मै तादृशाय [V]महिम्ने महिमयुक्ताय [V]प्रजापतये [V]स्वाहा जुहोमि ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः ॥

४-४. भृ१ - ग्रहत्वम् उपयामेन पार्थिवपातितगृहीतोऽसि प्रजापत्यर्थं त्वां गृह्णामि । प्रजापतये - - - - ।

य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्वे॑ उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः ।
यस्य॑ छा॒याऽमृ॒तं॒ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥

यः । आ॒त्म॒दा इत्या॑त्म-दाः । ब॒ल॒दा इति॑ बल-दाः । यस्य॑ । विश्वे॑ । उ॒पास॑त॒ इत्यु॑प-आस॑ते । प्र॒शिष॒मिति॑ प्र-शिष॑म् । यस्य॑ । दे॒वाः । यस्य॑ । छा॒या । अ॒मृत॑म् । यस्य॑ । मृ॒त्युः । कस्मै॑ । दे॒वाय॑ । ह॒विषा॑ । वि॒धे॒म ॥

द्वितीयं महिमानं गृह्णाति - 'य आत्मदाः' इति त्रिष्टुभा उपरिष्टादुपयामया ॥ इयमपि तत्रैव व्याख्याता (तैसं ४.१.८) । [V]यः [V]आत्मदाः सर्वस्मै [V]बलदाः च [V]यस्य [१V]प्रशिषं प्रकृष्टामाशिषं [V]विश्वे अपि [V]उपासते [V]देवाः अपि यस्य प्रशिषमुपासते [V]अमृतं [V]मृत्युः च

य आत्मदाः इति ॥ अथ द्वितीयग्रहमन्त्रं पठति - 'य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ' इति ॥ [V]यः प्रजापतिः [V]आत्मदाः सर्वेषां शरीरप्रदः यश्च तस्मिन्शरीरे बलप्रदः, [V]यस्य प्रजापतेः [V]प्रशिषं प्रकृष्टं शासनं [V]विश्वे सर्वेऽपि [V]उपासते सेवन्ते, [V]देवाः अपि [V]यस्य प्रशिषमुपासते, [१-V]अमृतं स्वर्गरूपफलं [V]यस्य प्रजापतेः[१] [V]छाया इव [२]स्वाधीनं, तथा प्राणिनां [V]मृत्युः अपि [V]यस्य [३]स्वाधीनस्तादृशाय [V]कस्मै

---

१. अ - प्राशिषम् ।

१-१. अ. आ. क. पा. हा - यस्यामृतम् । २. अ. क. पा. हा - प्रविधेम । ३. आ. क - ह्यधीनस्ता°, अ. पा. हा. उ - ह्यधिकास्ता° ।

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्यं ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥१७॥

(य आत्मदाः पृथिव्यग्निरेकान्नचत्वारिꣳशत् ।)

उपयामगृहीत इत्युपयाम-गृहीतः । असि । प्रजापतय इति प्रजा-पतये । त्वा । जुष्टम् । गृह्णामि । तस्य । ते । पृथिवी । महिमा । ओषधयः । वनस्पतयः । रूपम् । अग्निः । ते । तेजः । तस्मै । त्वा । महिम्ने । प्रजापतय इति प्रजा-पतये । स्वाहा ॥१७॥

[कासं - - - - ; कपिसं - - - - ; मैसं - - - - ; शब्रा - - - -]

[V]यस्य [२V]छाया इव विधेया । ' कस्मै ' इत्यादि ॥ गतम् । [V]तस्य [V]ते [V]पृथिवी [V]महिमा पृथिवीव महांस्त्वम् [V]ओषधयः [V]वनस्पतयः तव [V]रूपम् । [V]अग्निः तव [V]तेजः इति गृहीत्वा जुहोति । ' तस्मै ' इत्यादि । गतम् ॥

॥ इति सप्तमे पञ्चमे सप्तदशोऽनुवाकः ॥

[४]केनाप्यविज्ञातस्वरूपाय [V]देवाय प्रजापतये हविषा परिचरेम । हे ग्रह, त्वमुपयामेन पार्थिवपात्रेण गृहीतः [V]असि [५]प्रजापत्यर्थं त्वां गृह्णामि । हे प्रजापते, तादृशस्य [६-V]ते तव [-६] [७]पृथिवीरूपो महिमाख्यो ग्रहः । [V]ओषधयः [V]वनस्पतयः च तव विचित्रं [V]रूपम् । [V]अग्निः त्वदीयं [V]तेजः । हे ग्रह, त्वां [V]तस्मै महिमयुक्ताय [V]प्रजापतये जुहोमि ॥

॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥

२. अ - जाया ।

४. शृ१ - °प्यनुज्ञातरूपाय । ५. शृ१ - प्रजापतय इत्यर्थम् । ६-६. अ. पा. हा - ' ते तव ' नास्ति, शृ१ - ते । ७. शृ१ - पृथिव्येवायम् , उ - पृथिवीयम् , पा. हा - पृथिवी यो ।

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य
इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः
सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः

एति । ब्रह्मन् । ब्राह्मणः । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । जायताम् । एति । अस्मिन् । राष्ट्रे । राजन्यः । इषव्यः । शूरः । महारथ इति महा-रथः । जायताम् । दोग्ध्री । धेनुः । वोढा । अनड्वान् । आशुः । सप्तिः । पुरन्धिः । योषा । जिष्णुः । रथेष्ठा इति रथे-स्थाः ।

अथ ब्रह्मवर्चसम् उपजुहोति - ‘ आ ब्रह्मन् ’ इत्यादि ॥ [V]ब्रह्मन् ब्रह्मणि ब्राह्मणजातौ अस्य यजमानस्य [1]सम्बन्धी सर्वः [V]ब्राह्मणः [V]ब्रह्मवर्चसी [V]आजायताम् । [V]अस्मिन् [V]राष्ट्रे यजमानस्य सम्बन्धी [V]राजन्यः सर्वोऽपि [2-] क्षत्रः [V]इषव्यः[-2] इष्वादिषु साधुः [V]शूरः महावीरः [V]महारथः रथचर्यायां प्रकृष्टश्च [V]आजायताम् । “ राजश्वशुराद्यत् ” (पा ४.१.१३७), राज्ञोऽपत्ये जातिग्रहणम् । [V]दोग्ध्री बहुक्षीरा सुदोहा च [V]धेनुः आजायताम् अस्य यजमानस्य । साधुकारिणि तृन् । [V]वोढा साधुवाही [V]अनड्वान् आजायताम् । [V]आशुः शीघ्रगतिः [V]सप्तिः आजायताम् । [V]पुरन्धिः [3-] रूपवती पुरं शरीरं धीयतेऽस्यामिति । “ कर्मण्यधिकरणे च ” (पा ३.३.९३) इति किः । पूर्वपदस्याम्भावश्छान्दसः । दासीभारादिः (गणपाठ, पा ६.२.४२) । पुरुभिर्वा ध्यातव्या पुरन्धिः [-3] । पृषोदरादिः (गणपाठ २३४, पा ६.३.१०९) । ईदृशी [4][V]योषा योषित् [V]अस्य [V]यजमानस्य [5]आजायताम् । [V]जिष्णुः जयशीलः [V]रथेष्ठाः रथे स्थातुं शक्तः । रथे तिष्ठति

आ ब्रह्मन्निति ॥ अथान्नहोम(?)मन्त्राः । तथा च ब्राह्मणम् - “ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि ब्रह्मवर्चसानि जुहोति ” (तैब्रा ३.८.१८) इति ॥ पाठस्तु - ‘ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ’ इति ॥ [V]ब्रह्मन् ब्राह्मणजातौ [V]ब्रह्मवर्चसी श्रुताध्ययनसंपन्नो ब्राह्मणः [V]आजायतां सर्वत उत्पद्यताम् । एतदेकं वाक्यमेको मन्त्रः । एवमुत्तरत्रापि । [V]इषव्यः बाणाद्यायुधेषु कुशलः । [1]धेनुरित्यादिष्वाजायतामित्यनुवर्तते । [2-][V]सप्तिः अश्वः । [V]आशुः शीघ्रगामी [-2] । पुरवासिभिर्ध्यायत इति [V]पुरन्धिः रूपवतीत्यर्थः । [V]अस्य [V]यजमानस्य जिष्णुत्वादिगुणविशिष्टः

१. अ - सर्वसंबन्धः । २-२. अ - क्षत्रियः इष्टव्यः । ३-३. अ - ‘ रूपवती - - - - पुरन्धिः ’ नास्ति । ४. अ - ‘ योषा ’ नास्ति । ५. अ - जायताम् ।

१. भृ१ - धेनुरित्यादिप्राजा° । २-२. भृ१ - ‘ सप्तिः - - - - शीघ्रगामी ’ नास्ति ।

सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥१८॥

(आ ब्रह्मन् एकचत्वारिंशत् ।)

सभेयः । युवा । एति । अस्य । यजमानस्य । वीरः । जायताम् । निकामेनिकाम इति निकामे-निकामे । नः । पर्जन्यः । वर्षतु । फलिन्यः । नः । ओषधयः । पच्यन्ताम् । योगक्षेम इति योग-क्षेमः । नः । कल्पताम् ॥१८॥

[कासं, अश्वमेध ५.१४: कपिसं - - - -; मैसं ३.१२.६; वासं २२.२२]

सङ्ग्रामेष्विति " सुपि स्थः " (पा ३.२.४) इति कः, " तत्पुरुषे कृति बहुलम् " (पा ६.१.१४) इत्यलुक् , वचनव्यत्ययः । Vसभेयः सभायां साधुः रूपवत्तया, " डश्छन्दसि " इति डः । Vयुवा तरुणः । Vवीरः विक्रान्तः । एवं जिष्णिवत्यादिगुणयुक्तः पुरुषः Vअस्य Vयजमानस्य Vआजायताम् । Vनिकामेनिकामे इच्छायां Vनः अस्माकं Vपर्जन्यः Vवर्षतु । Vफलिन्यः बहुफलाः Vओषधयः अस्माकं राष्ट्रे Vपच्यन्ताम् । कर्मकर्तरि यत् । योगसहितः क्षेमः Vयोगक्षेमः । शाकपार्थिवादित्वादुत्तरपदलोपी समासः (गणपाठ १३, पा २.१.६०) । इतरेतरयोगद्वन्द्वे वा वचनव्यत्ययः । समाहारद्वन्द्वे वा लिङ्गव्यत्ययः । योगश्च क्षेमश्चास्मिन् राष्ट्रे प्रजानां Vकल्पतां सम्पद्यताम् । अलब्धलाभो योगः । लब्धस्य परिपालनं क्षेमः ॥

॥ इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये सप्तमे काण्डे पञ्चमे प्रश्ने अष्टादशोऽनुवाकः ॥

[3] पुत्रो जायताम् [3] । Vनः अस्माकं यदा यदाऽपेक्षा तदा तदा Vपर्जन्यः Vवर्षतु । Vओषधयः [4]च [5]बहुफलयुक्ताः पच्यन्ताम् । अलब्धस्य लाभो योगः । लब्धस्य परिपालनं [6] क्षेमः । योगसहितः क्षेमः Vयोगक्षेमः । सोऽस्माकं संपद्यताम् [6] । एतैर्दशभिर्मन्त्रैर्ब्रह्मवर्चसनामकं होमं कुर्यात् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टादशोनुवाकः ॥

३-३. अ. आ. क. पा. हा - पुत्र आजायताम् । ४. भृ१ - तु । ५. उ - फलयुक्ताः । ६-६. भृ१ -' क्षेमः - - - - संपद्यताम् ' नास्ति ।

आऽक्रान् वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाऽक्रान् वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रꣳस्त सूर्यं युजमकृत वाज्यर्वाऽग्निस्ते वाजिन् युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारय वायुस्ते वाजिन् युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं (१) पारयाऽऽदित्यस्ते वाजिन् युङ्ङनु त्वाऽऽरभे

एति । अक्रान् । वाजी । पृथिवीम् । अग्निम् । युजम् । अकृत । वाजी । अर्वा । एति । अक्रान् । वाजी । अन्तरिक्षम् । वायुम् । युजम् । अकृत । वाजी । अर्वा । द्याम् । वाजी । एति । अक्रꣳस्त । सूर्यम् । युजम् । अकृत । वाजी । अर्वा । अग्निः । ते । वाजिन् । युङ् । अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय । वायुः । ते । वाजिन् । युङ् । अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति (१) । पारय । आदित्यः । ते । वाजिन् । युङ् । अन्विति । त्वा । एति । रभे ।

आक्रानिति ॥ [1]अथाश्वाऽनुमन्त्रणम् ॥ तथा च ब्राह्मणम् - " आक्रान् वाजी क्रमैरत्यक्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमनुमन्त्रयते " (तैब्रा ३.९.४) इति ॥ एतेषु [2]त्रिषु मन्त्रेषु प्रथमं मन्त्रं पठति - 'आऽक्रान् वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाऽक्रान् वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रꣳस्त सूर्यं युजमकृत वाज्यर्वाऽग्निस्ते वाजिन्युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारय वायुस्ते वाजिन्युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारयाऽऽदित्यस्ते वाजिन्युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह व्यानधृगसि व्यानं मे दृꣳहापानधृगस्यपानं मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुर्मयि धेहि ' इति ॥ ^V^वाजी वेगवानयमश्वः ^V^पृथिवीम् ^V^आक्रान् आक्रान्तवान् । सः ^V^अर्वा तस्यां पृथिव्याम् ^V^अग्निं ^V^युजं योजयितारं [3]व्यवहारनिर्वाहकमकृत । एवमुत्तरत्रापि योज्यम् । हे

---

१. उ. भृ१ - अथाश्वाभि° । २. भृ१ - 'त्रिषु 'नास्ति ।

**स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह
व्यानधृगसि व्यानं मे दृꣳहापानधृगस्यपानं
मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि
श्रोत्रमसि श्रोत्रं मयि
धेह्यायुरस्यायुर्मयि
धेहि (१९) ॥**

(वायुस्ते वाजिन् युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं त्रिचत्वारिꣳशच्च ।)

स्वस्ति । मा । समिति । पारय । प्राणधृगिति प्राण-धृक् । असि । प्राणमिति प्र-अनम् । मे । दृꣳह । व्यानधृगिति व्यान-धृक् । असि । व्यानमिति वि-अनम् । मे । दृꣳह । अपानधृगित्यपान-धृक् । असि । अपानमित्यप-अनम् । मे । दृꣳह । चक्षुः । असि । चक्षुः । मयि । धेहि । श्रोत्रम् । असि । श्रोत्रम् । मयि । धेहि । आयुः । असि । आयुः । मयि । धेहि ॥१९॥

[कासं, अश्वमेध ५.१५; कपिसं - - - - ; मैसं - - - - ; वासं - - - -]

[V]वाजिन् , [V]अग्निः [V]ते [V]युङ् तव योजयिता सहायभूतः । तस्मात् त्वाम् [४-V]अनु कर्मारभामहे [४] । त्वं च [V]स्वस्ति विनाशराहित्येन मां [V]संपारय सम्यक् कर्मसमाप्तिं प्रापय । एवमुत्तरत्रापि योज्यम् । प्राणं दृंहति दृढीकरोतीति [V]प्राणधृक् । [५]हेऽश्व, त्वं तादृशोऽस्यतः [५] [V]मे प्राणं दृढीकुरु । एवमुत्तरत्रापि । हेऽश्व, त्वं [V]चक्षुः [V]असि, अतः [V]मयि [V]चक्षुः स्थापय । एवमुत्तरत्रापि ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके एकोनविंशोऽनुवाकः ॥

३. भृ१ - निर्वाहक्रममकृत । ४. अ. आ. क. पा. हा - त्वामन्वारभे । ५-५. भृ१ - अश्व तादृश त्वमस्यतः ।

जज्ञि बीजं वर्ष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्षꣳ सुपावः पवमानः सूपस्थाना

जज्ञि । बीजम् । वर्ष्टा । पर्जन्यः । पक्ता । सस्यम् । सुपिप्पला इति सु-पिप्पलाः । ओषधयः । स्वधिचरणेति सु-अधिचरणा । इयम् । सूपसदन इति सु-उपसदनः । अग्निः । स्वध्यक्षमिति सु-अध्यक्षम् । अन्तरिक्षम् । सुपाव इति सु-पावः । पवमानः । सूपस्थानेति सु-उपस्थाना ।

जज्ञीति ॥ अथान्येऽन्नहोममन्त्रा उच्यन्ते ॥ तथा च ब्राह्मणम् - ‘जज्ञि बीजमिति जुहोत्यनन्तरित्यै’ (तैब्रा ३.८.१८) इति ॥ पाठस्तु - ‘जज्ञि बीजं वर्ष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोग्निः स्वध्यक्षमन्तरिक्षꣳ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन् यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासास्त्रिꣳशिनो मासाः क्लृप्ता ऋतवः शान्तः संवत्सरः’ इति ॥ यदेतद्व्रीह्यादि [V]बीजं तत् [V]जज्ञि [1]जननस्वभावमस्तु । अस्त्विति सर्वत्राध्याहारः । [V]पर्जन्यः [V]वर्ष्टा वृष्टिकारोऽस्तु । [V]सस्यं [V]पक्ता पाकशीलम् । [V]ओषधयः च [V]सुपिप्पलाः शोभनफलाः । [V]इयं पृथिवी [V]स्वधिचरणा सुखेनाधिष्ठाय चरितुं शक्या । [V]अग्निः [V]सूपसदनः [2]सुखेनोपसत्तुं परिचरितुं शक्यः । [V]अन्तरिक्षं [V]स्वध्यक्षं [3]सुखेनाध्यक्षितव्यं धूमकेत्वाद्युत्पातरहितमित्यर्थः । [V]पवमानः वायुः [V]सुपावः

---

१. भृ१ - जनकस्वभाव° । २. भृ१ - °नोपसक्तुम् । ३. भृ१ - °नाध्यजिजतव्यम् ।

द्यौः शिवमसौ तपन् यथापूर्वमहोरात्रे
पञ्चदशिनोऽर्धमासास्त्रिꣳशिनो
मासाः क्लृप्ता ऋतवः शान्तः
संवत्सरः ॥२०॥

(जङ्ग्येकत्रिꣳशत् ।)

~~~~~~~~~~~~~~~~~~~~~~~~~

द्यौः । शिवम् । असौ । तपन् । यथापूर्वमिति यथा-पूर्वम् । अहोरात्रे इत्यहः-रात्रे ।
पञ्चदशिन इति पञ्च-दशिनः । अर्धमासा इत्यर्ध-मासाः । त्रिꣳशिनः ।
मासाः । क्लृप्ताः । ऋतवः । शान्तः । संवत्सर
इति सं-वत्सरः ॥२०॥

[कासं, अश्वमेध ५.१७; कपिसं - - - -; मैसं - - - -; वासं - - - -]

~~~~~~~~~~~~~~~~~~~~~~~~~

[४]अनुपद्रवकारिसंचारयुक्तः । [V]द्यौः [V]सूपस्थाना [५]सुखेनावस्थातुं शक्या, दैविकोपद्रवरहितेत्यर्थः । [V]असौ आदित्यः [V]शिवम् उपद्रवराहित्यं यथा भवति तथा [V]तपन् वर्तताम् । [V]अहोरात्रे [V]यथापूर्वं कल्पादेवाऽऽरभ्य येन क्रमेण प्रवृत्ते तथैवाद्यापि प्रवर्तेताम् । [V]अर्धमासाः न्यूनाधिकराहित्येन पञ्चदशादिनयुक्ताः । तथा [V]मासाः त्रिंशद्दिनयुक्ताः । [V]ऋतवः [V]क्लृप्ताः तत्तलक्षणोपेताः । [V]संवत्सरः [V]शान्तः प्रजापीडारहितः । एतैः पञ्चदशभिर्मन्त्रैरन्नहोमाः कर्तव्याः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः ॥

~~~~~~~~~~~~~~~~~~~~~~~~~

४. क. उ - अनुपद्रवकारी° । ५. भृ१ - सुखेनास्थातुम्, [सुखेनोपस्थातुम् इति संभाव्यते ।] ।
~~~~~~~~~~~~~~~~~~~~~~~~~

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽगच्छेदग्नयेऽꣳहोमुचेऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागः ॥२१॥

(आग्नेयश्चतुर्विꣳशतिः ।)

आग्नेयः । अष्टाकपाल इत्यष्टा-कपालः । सौम्यः । चरुः । सावित्रः । अष्टाकपाल इत्यष्टा-कपालः । पौष्णः । चरुः । रौद्रः । चरुः । अग्नये । वैश्वानराय । द्वादशकपाल इति द्वादश-कपालः । मृगाखर इति मृग-आखरे । यदि । न । आगच्छेदित्या-गच्छेत् । अग्नये । अꣳहोमुच इत्यꣳहः-मुचे । अष्टाकपाल इत्यष्टा-कपालः । सौर्यम् । पयः । वायव्यः । आज्यभाग इत्याज्य-भागः ॥२१॥

[कासं, अश्वमेध ५.१६; कपिसं - - - -; मैसं - - - -; वासं - - - -]

अथाश्वस्य रोगादिनिमित्ते प्राप्ते [1]सति प्रायश्चित्तेष्टय उच्यन्ते । तथा च ब्राह्मणम् - “ यद्यश्वमुपतपद्विन्देत् । आग्नेयमष्टाकपालं निर्वपेत् ” (तैब्रा ३.९.१७) इत्यादि ॥

आग्नेय इति ॥ इष्टीनां पाठस्तु - ‘आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽगच्छेदग्नयेऽꣳहोमुचेऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागः ’ इति ॥ [V]मृगाखरे [2]अश्वनिवासस्थाने [V]यदि [V]न [V]आगच्छेत् तत्रानागमनमेकं निमित्तम् । निमित्तान्तराणि तु ब्राह्मणे द्रष्टव्यानि । तान्येतानि नव हवींषि प्रायश्चित्तरूपाणि ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥

---

१. अ. आ. क. पा. हा. इ. उ. वा. वै - ‘सति’ नास्ति । २. भृ१ - मृगनिवास° ।

अग्नयेऽꣳहोमुचेऽष्टाकपाल इन्द्रायाꣳहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरुरश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामꣳहोमुग्भ्यां द्विकपालः ॥२२॥

(अग्नयेऽꣳहोमुचे त्रिꣳशत् !)

अग्नये । अꣳहोमुच इत्यꣳहः-मुचे । अष्टाकपाल इत्यष्टा-कपालः । इन्द्राय । अꣳहोमुच इत्यꣳहः-मुचे । एकादशकपाल इत्येकादश-कपालः । मित्रावरुणाभ्यामिति मित्रा-वरुणाभ्याम् । आगोमुग्भ्यामित्यागोमुक्-भ्याम् । पयस्या । वायोसावित्र इति वायो-सावित्रः । आगोमुग्भ्यामित्यागोमुक्-भ्याम् । चरुः । अश्विभ्यामित्यश्वि-भ्याम् । आगोमुग्भ्यामित्यागोमुक्-भ्याम् । धानाः । मरुद्भ्य इति मरुत्-भ्यः । एनोमुग्भ्य इत्येनोमुक्-भ्यः । सप्तकपाल इति सप्त-कपालः । विश्वेभ्यः । देवेभ्यः । एनोमुग्भ्य इत्येनोमुक्-भ्यः । द्वादशकपाल इति द्वादश-कपालः । अनुमत्या इत्यनु-मत्यै । चरुः । अग्नये । वैश्वानराय । द्वादशकपाल इति द्वादश-कपालः । द्यावापृथिवीभ्यामिति द्यावा-पृथिवीभ्याम् । अꣳहोमुग्भ्यामित्यꣳहोमुक्-भ्याम् । द्विकपाल इति द्वि-कपालः ॥२२॥

[कासं, अश्वमेध ५.१९; कपिसं - - - -; मैसं ३.१५.११; वासं - - - -]

अग्नय इति ॥ यदुक्तं सूत्रकारेण " अग्नयेऽꣳहोमुचेऽष्टाकपाल इति दशहविषं [1]मृगारेष्टिम् अनुनिर्वपति ' (आपश्रौ २०.२३.२) इति, तदेतद्विधत्ते - ' अग्नयेऽꣳहोमुचेऽष्टाकपाल इन्द्रायाꣳहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरुरश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामꣳहोमुग्भ्यां द्विकपालः ' इति ॥ अंहसो मोचयतीत्यंहोमुक् । आगसो [2] मोचयत इत्यागोमुचौ [2] । वायुश्च सविता च Vवायोसावित्रः, वायुसवितृभ्यामित्यर्थः । Vधानाः भृष्टयवाः । एनसो मोचयन्तीत्येनोमुचः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥

१. भृ१ - इष्टिम्, [बौधायनानुसारमस्याः इष्टेः त्रीणि नामानि भवन्ति - 'तामेतां महापवित्रेष्टिरित्याचक्षते मृगारेष्टिरिति वा रहस्येष्टिरिति । बौश्रौ २८.१] २-२. भृ१ - मोचयतीति आगोमुक् ।

अग्नये समनमत् पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा (१) वरुणोऽद्भिः

अग्नये । समिति । अनमत् । पृथिव्यै । समिति । अनमत् । यथा । अग्निः । पृथिव्या । समनमदिति सम्-अनमत् । एवम् । मह्यम् । भद्राः । संनतय इति सं-नतयः । समिति । नमन्तु । वायवे । समिति । अनमत् । अन्तरिक्षाय । समिति । अनमत् । यथा । वायुः । अन्तरिक्षेण । सूर्याय । समिति । अनमत् । दिवे । समिति । अनमत् । यथा । सूर्यः । दिवा । चन्द्रमसे । समिति । अनमत् । नक्षत्रेभ्यः । समिति । अनमत् । यथा । चन्द्रमाः । नक्षत्रैः । वरुणाय । समिति । अनमत् । अद्भ्य इत्यत्-भ्यः । समिति । अनमत् । यथा (१) । वरुणः । अद्भिरित्यत्-भिः । साम्ने । समिति । अनमत् । ऋचे । समिति ।

अग्नय इति ॥ अथ संनतिहोमा उच्यन्ते । तथा च ब्राह्मणम् - "अग्नये समनमत् पृथिव्यै समनमदिति संनतिहोमाञ्जुहोति" (तैब्रा ३.८.१८) इति ॥ पाठस्तु - 'अग्नये समनमत् पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः संनमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत् क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु' इति ॥ सर्वोऽपि यजमानः ^V^अग्नये ^V^समनमत् ^१-^ संनतिं परिचर्यामकरोत् ^-१^ । तथा ^V^पृथिव्यै ^V^समनमत्

साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमन् क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं (२) भद्राः संनतयः सं नमन्तु ॥२३॥

(अद्भ्यः समनमद्यथा मह्यं चत्वारि च ।)

अनमत् । यथा । साम । ऋचा । ब्रह्मणे । समिति । अनमत् । क्षत्राय । समिति । अनमत् । यथा । ब्रह्म । क्षत्रेण । राज्ञे । समिति । अनमत् । विशे । समिति । अनमत् । यथा । राजा । विशा । रथाय । समिति । अनमत् । अश्वेभ्यः । समिति । अनमत् । यथा । रथः । अश्वैः । प्रजापतय इति प्रजा-पतये । समिति । अनमत् । भूतेभ्यः । समिति । अनमत् । यथा । प्रजापतिरिति प्रजा-पतिः । भूतैः । समनमदिति सम्-अनमत् । एवम् । मह्यम् (२) । भद्राः । संनतय इति सं-नतयः । समिति । नमन्तु ॥२३॥

[कासं, अश्वमेध ५.२०; कपिसं - - - -; मैसं - - - -; वासं - - - -]

परिचर्यामकरोत् । स च ^{V}पृथिव्याः सहितः ^{V}अग्निः ^{V}यथा ^{V}समनमत् येन प्रकारेण तस्मै यजमानाय संनतिमुपकारमकरोत् ^{V}एवम् अनेन प्रकारेण ^{V}मह्यं मदर्थं ^{V}भद्राः ^{V}संनतयः कल्याणा उपकारा देवकृताः ^{V}संनमन्तु प्राप्नुवन्तु । एवमुत्तरेष्वपि मन्त्रेषु योजनीयम् । समनमदेवं मह्यमित्यादिकं सर्वत्रानुषज्यते । तदर्थमेवान्ते पुनः पाठः । एतैर्दशभिर्मन्त्रैरन्नहोमेषु [2-] संनतिनामका होमाः [-2] कर्तव्याः ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥

१-१. शृ१ - संनतिपरिचर्या° । २-२. क - संनतिहोमाः ।

ये ते॒ पन्था॑नः सवितः पू॒र्व्यासो॑ऽरे॒णवो॒ वित॑ता अ॒न्तरि॑क्षे ।
तेभि॑र्नो अ॒द्य प॒थिभि॑ः सु॒गेभी॒ रक्षा॑ च नो॒ अधि॑ च देव ब्रूहि ।
नमो॒ऽग्नये॑ पृथिवि॒क्षिते॑ लोक॒स्पृते॑ लो॒कम॒स्मै यज॑मानाय देहि॒

ये । ते॒ । पन्था॑नः । स॒वि॒तः॒ । पू॒र्व्यासः॑ । अ॒रे॒णवः॑ । वित॑ता॒ इति॒ वि-त॒ताः॒ । अ॒न्तरि॑क्षे ।
तेभिः॑ । न॒ः । अ॒द्य । प॒थिभि॒रिति॑ प॒थि-भि॒ः । सु॒गेभि॒रिति॑ सु-गेभिः॑ । रक्ष॑ ।
च॒ । न॒ः । अधीति॑ । च॒ । दे॒व॒ । ब्रू॒हि॒ । नमः॑ । अ॒ग्नये॑ । पृ॒थि॒वि॒क्षि॒त॒
इति॑ पृथिवि-क्षिते॑ । लो॒क॒स्पृ॒त॒ इति॑ लोक-स्पृते॑ ।
लो॒कम् । अ॒स्मै । यज॑मानाय । दे॒हि॒ ।

ये त इति ॥ [1]कल्पः - " ये ते पन्थानः सवितः पूर्व्यास इत्यध्वर्युर्यजमानं वाचयति " इति ॥ पाठस्तु - 'ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि ' इति ॥ हे सवितर्देव, Vते तव संबन्धिनः Vपूर्व्यासः पूर्वसिद्धाः Vअन्तरिक्षे Vवितताः विस्तृताः Vअरेणवः [2]धूलिरहिताः Vये मार्गाः सन्ति, Vसुगेभिः सुष्ठु गन्तुं शक्यैः Vतेभिः तैर्मार्गैरागत्य Vअद्य अस्मिन् कर्मणि Vनः अस्मान् Vरक्ष । तथा Vनः अस्मान् Vअधिब्रूहि चाधिकोऽयं यजमान इति देवानामग्रे [3]कथय [4]च ।

नमोऽग्नये इति ॥ कल्पः - " नमोऽग्नये पृथिविक्षित इत्येतैश्च यथालिङ्गम् " (आपश्रौ २०.२.१) इति । उपतिष्ठत इत्यनुवर्तते । पाठस्तु - 'नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो

---

१. अ. पा - 'कल्पः ' नास्ति । २. भृ१ - धूळिरहिताः । ३. भृ१. उ - कथयत् । ४. भृ१ - 'च ' नास्ति ।

नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥२४॥

(ये ते चतुश्चत्वारिंशत् ।)

नमः । वायवे । अन्तरिक्षक्षित इत्यन्तरिक्ष-क्षिते । लोकस्पृत इति-लोक-स्पृते । लोकम् । अस्मै । यजमानाय । देहि । नमः । सूर्याय । दिविक्षित इति दिवि-क्षिते । लोकस्पृत इति लोक-स्पृते । लोकम् । अस्मै । यजमानाय । देहि (२४) ॥

[कासं, अश्वमेध - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ' इति ॥ Vपृथिविक्षिते भूमिवासिने Vलोकस्पृते लोकस्य [५]प्रीणयित्रे Vअग्नये Vनमः अस्तु । Vअस्मै Vयजमानाय Vलोकम् उत्तमस्थानं Vदेहि । एवमुत्तरयोरपि योज्यम् ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः ॥

५. भृ१ - प्रणयित्रे ।

यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान् मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवत्सर आत्मा

यः । वै । अश्वस्य । मेध्यस्य । शिरः । वेद । शीर्षण्वानिति शीर्षण्-वान् । मेध्यः । भवति । उषाः । वै । अश्वस्य । मेध्यस्य । शिरः । सूर्यः । चक्षुः । वातः । प्राण इति प्र-अनः । चन्द्रमाः । श्रोत्रम् । दिशः । पादाः । अवान्तरदिशा इत्यवान्तर-दिशाः । पर्शवः । अहोरात्रे इत्यहः-रात्रे । निमेष इति नि-मेषः । अर्धमासा इत्यर्ध-मासाः । पर्वाणि । मासाः । संधानानीति सं-धानानि । ऋतवः । अङ्गानि । संवत्सर इति सं-वत्सरः । आत्मा ।

---

*अथान्तिमेऽनुवाके सर्वजगदात्मकत्वेनाश्वः स्तूयते । [1]अथवा विराड्रूपेण [2]अश्वोपासन-प्रतिपादकोऽयमनुवाकः । प्रकरणादुत्कृष्योपनिषदादौ द्रष्टव्यः । अत एव वाजसनेयिन एतदर्थप्रतिपादकं ब्राह्मणमुपनिषदादावामनन्ति ॥

यो वा अश्वस्येति ॥ पाठस्तु - 'यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान् मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवत्सर आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका अस्थानि नमो मा॑ऽसान्योषधयो लोमानि वनस्पतयो वाला अग्निर्मुखं वैश्वानरो व्यात्त॑ समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्भ्यते तद्वि द्योतते यद्वि धूनुते तत् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवहदर्वाऽसुरान् वाजी गन्धर्वानश्वो मनुष्यान् समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ' इति ॥ Vयः पुमान् Vमेध्यस्य [3]यागयोग्यस्य Vअश्वस्य Vशिरः Vवेद [4]शिरःप्रभृतीनवयवान् विराडवयवभूतोषःकालादिरूपेणोपास्ते, सोऽयं Vशीर्षण्वान् उषःकालादिरूपैः [4]शिरःप्रभृतिभिर्विराडवयवैर्युक्तः Vमेध्यः यागफलयोग्यो भवति । क्रत्वनुष्ठानस्य चोपासनस्य च समानं फलम् । तथा च पञ्चमकाण्डे समाम्नातम् - " सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ

---

*[' हा ' इत्यङ्कितपुस्तके चरमोऽयमनुवाकः विनियोगसङ्ग्रहश्च नोपलभ्यते ।] । १. भृ१ - अथ । २. भृ१ - अश्वोपादकप्रतिपादकोऽनुवाकः । ३. भृ१ - वाहयोग्यस्य । ४-४. उ - 'शिरःप्रभृति° - - - - °रूपैः' नास्ति ।

रश्मयः केशा नक्षत्राणि रूपं तारका अस्थानि नभो माꣳसान्योषधयो लोमानि वनस्पतयो बाला अग्निर्मुखं वैश्वानरो व्यात्तं (१) समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्जभ्यते तद्वि द्योतते

रश्मयः । केशाः । नक्षत्राणि । रूपम् । तारकाः । अस्थानि । नभः । माꣳसानि । ओषधयः । लोमानि । वनस्पतयः । वालाः । अग्निः । मुखम् । वैश्वानरः । व्यात्तमिति वि-आत्तम् (१) । समुद्रः । उदरम् । अन्तरिक्षम् । पायुः । द्यावापृथिवी इति द्यावा-पृथिवी । आण्डौ । ग्रावा । शेपः । सोमः । रेतः । यत् । जंजभ्यते । तत् । वीति । द्योतते ।

चैनमेवं वेद " (तैसं ५.३.१२) इति । तत्र कस्मिन्नश्वावयवे को विराडवयवो ध्यातव्य इति तत्सर्वमुच्यते - [V]मेध्यस्य [V]अश्वस्य यत् [V]शिरः तत् [V]उषाः उषःकालरूपम् । यदश्वस्य [V]चक्षुः तत् [V]सूर्यः । यस्तदीयः [V]प्राणः सोऽयं बाह्यो वायुः । यत्तदीयं [V]श्रोत्रं सोऽयं [V]चन्द्रमाः । ये तदीयाः [V]पादाः ताः [५-] प्राच्यादिदिशः [-५] । ये [V]पर्शवः पार्श्वास्थिविशेषास्ता [६]इमा आग्नेय्याद्यवान्तरदिशाः [७-] यश्च तदीयो निमेष उन्मेषसहितः [-७], [८-] ते उभे [-८] [V]अहोरात्रे । यानि तदीयहस्तपादगतपर्वाणि ते शुक्लकृष्णपक्षरूपाः [V]अर्धमासाः । यानि च पर्वणां [V]संधानानि ते चैत्राद्याः [V]मासाः । यानि चानुक्तविशेषाणि खुराद्यङ्गानि ते [९]वसन्ताद्यृतवः, य [V]आत्मा मध्यदेहः स संवत्सरकालः । [१०-] ये तदीयाः [-१०] [V]केशाः ते सूर्यरश्मयः । यदश्वस्य [११]भास्वररूपं तानि कृत्तिकादिनक्षत्राणि । [१२-] यान्यनुक्तानि [V]अस्थानि [-१२] तानि बृहस्पतिशुक्रध्रुवाद्याः प्रौढतारकाः । यानि तत्र [१३]तत्र स्थितानि मांसखण्डानि तदेतत् [V]नभः । यानि क्षुद्रलोमानि ताः [V]ओषधयः । ये [V]वालाः पुच्छगता दीर्घकेशास्ते [V]वनस्पतयः । यदेतत् [V]मुखं संपद्यते [१४]सोऽयं लोकप्रसिद्धः [V]अग्निः । यत् [V]व्यात्तं मुखविदारणं सोऽयं वैश्वानरनामको देवताविशेषः । यत् [V]उदरं सोऽयं [V]समुद्रः । यः [V]पायुः तत् [V]अन्तरिक्षम् । यौ [V]अण्डौ ते [१५-][V]द्यावापृथिव्यौ । यः [V]शेपः सोऽयमभिषवार्थः [V]ग्रावा । यत् [V]रेतः सः सोमरसः । यत् [V]जञ्भ्यते गात्राणि विनामयति सेयं विद्युत् । यत् [V]विधुनुते सशब्दं [-१५] शरीरं कम्पयति तदेतद्गर्जनम् । यदेतन्मेहनं सेयं वृष्टिः ।

---

५. आ. अ. इ. वा. वै - प्राच्या दिशः । ६. शृ१. उ - 'इमाः' नास्ति । ७-७. अ. आ. क. पा. इ. उ. वा. वै - यस्तदीयो निमेष उन्मेष सहितः । ८-८. उ - तदुभये, शृ१ - तु उभयम् । ९. अ. आ. क. पा. इ. वा. वै - वसन्ताद्या ऋतवः । १०-१०. शृ१. उ. - एतदीयाः । ११. शृ१. क. उ - भास्वरं रूपम् । १२-१२. क - यान्युक्तान्यस्थीनि, आ - यान्यनुक्तान्यस्थानि । १३. शृ१. पा. उ - 'तत्र' नास्ति । १४. अ. आ. क. पा. उ - अयम् । १५-१५. उ - 'द्यावापृथिव्यौ - - - - सशब्दम्' नास्ति ।

यद्विधूनुते तत् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवहद(२)र्वाऽसुरान् वाजी गन्धर्वानश्वो

~~~~~~~~~~~~~~~~~~~~

यत् । विधूनुत इति वि-धूनुते । तत् । स्तनयति । यत् । मेहति । तत् । वर्षति । वाक् । एव । अस्य । वाक् । अहः । वै । अश्वस्य । जायमानस्य । महिमा । पुरस्तात् । जायते । रात्रिः । एनम् । महिमा । पश्चात् । अन्विति । जायते । एतौ । वै । महिमानौ । अश्वम् । अभितः । समिति । बभूवतुः । हयः । देवान् । अवहत् (२) । अर्वा । असुरान् । वाजी । गन्धर्वान् । अश्वः ।

~~~~~~~~~~~~~~~~~~~~

[V]अस्य [१६-] हेषाशब्दरूपा या [V]वाक् [-१६] सेयं वेदरूपा [V]वाक् एव । [V]जायमानस्य क्रतौ [१७]प्रयुज्यमानस्य [V]अश्वस्य यः संज्ञपनात् [V]पुरस्तात् महिमाख्यो राजतग्रहस्तदिदम् [V]अहः एव । [V]एनं [V]पश्चात् [१८-] एतस्याश्वस्य संज्ञपनादूर्ध्वं [-१८] यो महिमाख्यः [१९]सौवर्णग्रहः सेयं [V]रात्रिः । [२०-] [V]एतौ एव उभौ [-२०] [V]महिमानौ ग्रहौ [V]अश्वम् [V]अभितः [V]संबभूवतुः अश्वस्य संज्ञपनात्पूर्वम् पश्चाच्च व्यवस्थितौ । हयार्ववाज्यश्वा अवान्तरजातिविशेषास्तत्तद्रूपेण देवादीन् वहन्ति । एवंविधस्य विराड्रूपस्य [V]अश्वस्य [V]समुद्रः एव [V]योनिः कारणम् । सम्यगुद्रवत्युत्पद्यते जगदस्मादिति समुद्रः परमात्मा । [२१]न ह्यन्यस्मादयं विराडुत्पत्तुम् [२२]अर्हति । [२३-] तादृशः समुद्र एवास्य [V]बन्धुः । [२४]वर्धनस्तम्भः स्थितिहेतुरित्यर्थः [-२३] । [२५]एवमुपासितः पापक्षयद्वारा विराड्रूपं प्राप्नोति । “ [२६-] तद्यथा यथोपासते तथैव भवति ” [-२६] इति श्रुत्यन्तरात् । विराट्प्राप्तिश्च क्रममुक्तिहेतुः ।

~~~~~~~~~~~~~~~~~~~~

१६-१६. उ - °रूपो यावान् । १७. उ - संप्रयुज्य° । १८-१८. भृ१ - एतद् संज्ञपनाख्यम् । १९. भृ१ - सौवर्णमहः । २०-२०. भृ१ - ऐतेवोभौ । २१. भृ१ - न ह्यस्मादयम् । २२. भृ१ - प्रभवति । २३-२३. अ. आ. क. पा. उ - स एवास्य बन्धुः स्तम्भः स्थितिहेतुरित्यर्थः । २४. [‘बन्धनस्तम्भः’ इति सम्भाव्यते ।] । २५. भृ१ - °मुपासीनः, अ. आ. पा - °उपासिता, उ - °मुपासिनः । २६-२६. भृ१ - तत्तथा यथोपासते तत्तथैव भवति ।
~~~~~~~~~~~~~~~~~~~~

मनुष्यान्त्समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ॥२५॥

(व्यात्तमवहद्द्वादश च ।)

गावो गावः सिषासन्तीः प्रथमे मासि संमान्यौ यदि सोमौ षडहैरुत्सृज्यां३ देवानामर्क्येण चर्माव पृथिव्यै दत्वते कस्त्वाऽग्नये यो वै यः प्राणतो य आत्मदा आ ब्रह्मन्नाऽक्राञ्जि बीजमाग्नेयोऽष्टाकपालोऽग्नयेऽꣳहोमुचेऽष्टाकपालोऽग्नये समनमये ते पन्थानो यो वा अश्वस्य मेध्यस्य शिरः पञ्चविꣳशतिः ॥२५॥

गावः समान्यः सवनमष्टाभिर्वा एते देवकृतं चाभिजित्या इत्याहुर्वरुणोऽद्भिः साम्ने चतुःपञ्चाशत् ॥

मनुष्यान् । समुद्रः । वै । अश्वस्य । योनिः । समुद्रः । बन्धुः (२५) ॥

[कासं, अश्वमेध - - - -; कपिसं - - - -; मैसं - - - -; वासं - - - -]

तत्र ज्ञानोत्पत्तौ सत्यां तेन विराजा सह मुच्यमानत्वात् । तथा च स्मृतिः -

" ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
[२७]परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥" इति ॥

एतच्च भगवान् व्यासः "कार्यात्यये तदध्यक्षेणातः परमभिधानात् " इत्यस्मिन्नधिकरणे महता प्रबन्धेन प्रतिपादयामासेत्यशेषमतिमङ्गलम् ।

[२८]अत्रास्य प्रपाठकस्य विनियोगसंग्रहः -

विहितं पञ्चमस्याऽऽद्ये गवामयनसत्रकम् ।
[२९]तद्द्वैविध्यं द्वितीये स्यात् तृतीये पृष्ठनिर्णयः ॥
चतुर्थे व्यत्ययः [३०]पूर्वपक्षसोऽप्यन्यपक्षसि ।
पञ्चमे संसवः षष्ठे [३१]भवेदुत्सर्गसत्रकम् ॥
तन्मीमांसा सप्तमे स्यादष्टमे तु [३२]महाव्रतम् ।

---

२७. उ - यदस्यान्ते । २८. आ. क - अथास्य, अ. पा. उ - तत्रास्य । २९. भृ१. उ - ते द्वैविध्यम् । ३०. आ - पूर्वमक्षस्यान्त्यस्य पक्षसि । ३१. भृ१ - °दुत्सर्गिसत्रकम् । ३२. भृ१. उ - महाव्रते ।

सामानि नवमे प्रोक्ता वीणाद्या दशमे पुनः ॥
[33]दासीनृत्यं ततस्तूर्ध्वं [34]मन्त्राश्चैवाश्वमेधगाः ।
[35]पृथ्व्यन्नहोमाः [36]पञ्चाशदेकपञ्चाशदीरिताः ॥
दत्वते [37]परिधीनां तु [38]कस्त्वामन्त्रत्रयं भवेत् ।
अग्नये सर्वपृष्ठेष्टिः [39]प्रयोगोऽनन्तरे श्रुतः ॥
यः प्राणतो य आत्मेति तावुभौ महिमग्रहौ ।
आ ब्रह्मन् दशभिर्मन्त्रैब्रह्मवर्चसहोमकः ॥
[40-] आक्रानश्वं मन्त्रयेत [-40] जज्ञीति [41]दशभिर्हुतिः ।
[42]आग्ने नैमित्तिका यागा [43]मृगारेष्टिस्तथाग्नये ॥
[44]अग्न संनतिहोमाः [45-] स्युर्दश ये स्वामिवाचनम् [-45] ।
[[46-] नमस्त्रिभिरुपस्थानं यो वै विधिरुपासने ॥
क्रतुराडश्वमेधोऽयं विराड्ध्यानमुपास्तिराट् ।]
[47]ताभ्यामुत्पद्यते ज्ञानं कृतकृत्यो भवत्यतः[-46] ॥

॥ इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

॥ इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमः प्रपाठकः ॥

॥ इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमः काण्डः ॥

---

३३. भृ१ - दासीनृत्तम् । ३४. भृ१ - अश्वमेधस्य मन्त्रकाः, अ. पा - अश्वमेधकाः । ३५. अ. आ. पा - पृथ्यन्न°, भृ१ - पथ्यन्न°, उ - पृथिव्यन्न° । ३६. उ - पञ्चादेक° । ३७. भृ१ - परिधानम् । ३८. भृ१ - मन्त्रत्रयात् । ३९. भृ१ - प्रयोगो नेतरे । ४०-४०. भृ१ - आक्रानाख्यं मन्त्रयेते । ४१. आ - (पञ्च) दशभि° । ४२. क - आग्नये, अ. पा. उ - अग्नये । ४३. आ - °ष्टिरथाग्नये, उ - °ष्टिदग्नये अथ । ४४. क - अग्ना, अ. पा. उ - अग्नये । ४५. भृ१ - स्युर्दशमे ते तु वाचयेत् , क - दश ये ते सुवाच्यता । ४६-४६. भृ१. पा - ' नमस्त्रिभि° - - - - भवत्यतः ' नास्ति, क - योवा अश्वोपास्तिरित्थं कर्मविद्ये प्रपञ्चिते । ४७. उ - ' ताभ्याम् ' नास्ति ।

A. Our Publications

1) Ṛgveda Saṁhitā with Sāyaṇa's Commentary- Vols. I-V Rs. 2,805/-
2) Taittirīya Saṁhitā with the Commentaries of Bhaṭṭa Bhāskara and Sāyaṇa - Vols. I.1 – IV.1 and V Rs. 2277/-
3) Kāṇva Saṁhitā with the Commentaries of Sāyaṇācārya Ānandabodha and Anantācārya – Vol. I-V Rs. 1311/-
4) Śrautakośa-Sanskrit Section - Vol. I-II.2 Rs. 1105/-
5) Śrautakośa-English Section - Vol. I.1-II.3 Rs. 1325/-
6) Avesta in Devanāgarī - Parts 1-3 Rs. 555/-
7) Eighteen Principal Upaniṣads - Vol. I. Rs. 350/-
8) Bhāradvāja Śrauta Sūtra – Text and English translation Parts 1, 2 Rs. 650/-
9) Ṛksūkta-Vaijayantī (Select Ṛugvedic sūktas with Hindi Translation) Rs. 790/-
10) Descriptive Catalogue of Sanskrit Manuscripts - Vol. I-IX Rs. 1869/-
11) Kātyāyana Śulba Sūtra Rs. 100/-
12) Geometry according to Śulba Sūtra Rs. 100/-
13) Golden Jubilee Volume Rs. 125/-
14) Ṛgveda Sāra (Select Ṛugvedic sūktas and Mantras collected by Pūjya Vinoba Bhave - Translation by Dr. Mehendale) Rs. 250/-
15) Agnihotra Rs. 25/-
16) Mīmāṁsā Uddharaṇa Koṣa Rs. 125/-
17) Agnimīḷe Rs. 6.50/-
18) Avesta Reader Rs. 125/-
19) Yajñāyudhāni Rs. 130/-
20) गाथा ज़रथुश्त्राच्या आणि यस्न हप्तङ्हाइति (मराठी) Rs. 200/-
21) Vācaspatyam Rs. 200/-
22) Reflections on the Taittirīya Brāhmaṇa Rs. 150/-

23)	Understanding the Vedas	Rs. 210/-
24)	Maitrāyaṇī Padapāṭha : A Study	Rs. 280/-
25)	Studies on Veda and Avesta	Rs. 170/-
26)	The Maitrāyaṇī Saṁhitā : Its Ritual And Language	Rs. 685/-
27)	The Āraṇyaka-s (A Critical Study)	Rs. 300/-
28)	The Kaṭhāraṇyakam (With Text in Devanāgarī, Introduction and Translation)	Rs. 120/-
29)	Kalpa-Vedāṅga : Origin and Development	Rs. 170/-
30)	Studies on the Śikṣā-s and the Prātiśākhya-s	Rs. 450/-
31)	The Four Sacred Prayers of the *Avestā*	Rs. 140/-
32)	The Studies in the *Āraṇyaka*-s	Rs. 550/-
33)	The Full-moon and New-moon Sacrifices of the Kaṭha Śākhā	Rs. 300/-

With a view to give a clear idea of the practical performance of the Vedic sacrificial rituals as well as of the recitation, Mandala provides audio-visual aid to the scholars as follows:

B. Video CDs

1) Vājapeya Sacrifice (with Marvel of Memory)
   Set of 2 CDs — Rs. 1,000/-
2) Pūrṇamāseṣṭi — Set of 4 CDs — Rs. 1,500/-

C. Audio Cassettes

1) Vājasaneyī Mādhyandina Saṁhitā
   Set of 7 Cassettes — Rs. 1,000/-
2) Kramapāṭha of Vājasaneyī Saṁhitā
   Set of 13 Cassettes — Rs. 1,500/-